वैजवापः। शिवनेत्रोद्भवं यस्माद्रजतं पितृवल्लभं। अमंगलं तद्यत्नेन देवकार्येषु वर्जयेत्। टोडरानंदे वीपुराणे।
व्रते च तीर्थेध्ययने श्राद्धेपि च विशेषतः। परान्नभोजनाद्देवि यस्यान्नं तस्य तत्फलं। पृथ्वीचंद्रोदये त्रिपुराणे। नित्य

१५ स्नायीमिताहारोगुरुदेवद्विजार्चकः क्षारंक्षौरंचलवणंमधुमांसानिवर्जयेत। क्षारगणस्तत्रै। वाक्याः। तिलमुद्गादृतेशिंब्यंसस्येगोधू
मकोद्रवौ धान्यकंदेवधान्यंचशमीधान्यंतथैवच॥ खिन्नधान्यंतथापण्यंमूलंक्षारगणः स्मृतः। गोधूमानांतुतत्रैवप्रतिप्र
सवः। व्रीहिषष्टिकमुद्गाश्चकलायः सतिलंपयः। श्यामाकाश्चैवनीवारागोधूमाद्याव्रतेहिताः कूष्मांडालाबुवार्त्ताकपालंकी
ज्योत्स्निकास्त्यजेत। चरुभैक्षंसक्तुकणाशाकंदधिमधुघृतं। श्यामाकाः शालिनीवारायावकंमूलतंडुलं। हविष्यंव्रतनक्तादाव
ग्निकार्यादिकेहितं। मधुमांसंविहायान्यद्व्रतेवाहितमीरितमिति। शमीधान्यंमाषादि। पालंकीमध्यदेशेबोईतिप्रसिद्धा। ज्यो
त्स्निकाकोशातकी। मिताशनायांगौतमः चरुभैक्षसक्तुकणयावकपयोदधिघृतमूलफलोदकानिहवींष्युत्तरोत्तरंप्र
शस्तानिपयोघृतंचगव्यमिति। अन्येचविशेषाः। एकादशीचातुर्मास्यादिप्रकरणेवक्ष्यंते। गृहीतव्रतत्यागेतुछागलेयः पू
र्वंव्रतंगृहीत्वायोनचरेत्काममोहितः जीवन्भवतिचंडालीमृतःश्वाचाभिजायते। तत्रप्रायश्चित्तमुक्तंपृथ्वीचंद्रोदये। अ
ग्निगरुडपुराणयोः क्रोधात्प्रमादाल्लोभाद्वाव्रतभंगोभवेद्यदि। दिनत्रयंनभुंजीतमुंडनंशिरसोथवेति। प्रायश्चित्ताम्नानात
अतिक्रांतव्रतानुष्ठानंनास्तीतिगम्यते। अतिक्रांतमपिव्रतंकार्यमेवेतिशूलपाणिः। एतच्चशक्तविषयं। अशक्तौ। तुकाल एमः
हेमाद्रौ। पुराणांतरे। उपवासासमर्थश्चेदेकंविप्रंतुभोजयेत। तावद्धनानिवादद्याद्भुक्तस्याद्विगुणंतथा। भुक्तःकृतभोजनश्च ब्रा

स्तणभोजनं विनेति शेषः। सहस्रसंमितां देवीं जपेद्वा प्राणसंयमान्। कुर्याद्द्वादशसंख्याकान्यथाशक्त्या तडोन इति। शुद्धिवित्वे मात्स्ये उपवासेष्वशक्तानां नक्तं भोजनमिष्यते। महत्तरत्वे वासवीये। द्रव्यदातोपवासस्य फलं प्राप्नोत्यसंशयमिति। तथा पराकेंदेवलः। ब्रह्मचर्यं तथा शौचं सत्यमामिषवर्ज्जनं॥ व्रतेष्वेतानि कार्याणि निवर्त्यानि विपरीतानीति निश्चयः। मात्स्ये। तस्मात्कृतोपवासेन स्नानमभ्यंगपूर्वकं॥ वर्ज्जनीयं प्रयत्नेन रूपघ्नं तत्परं नृप। अन्ये च नियमास्तत्र तत्रान्वेषणीयाः। अथ स्त्रीव्रतेषु विशेष उच्यते। तत्र हेमाद्रौ व्रतकांडे गारुडे। गंधालंकारतांबूलं पुष्पमालानुलेपनं। उपवासे न दुष्यंति दंतधावनमंजनमिति। सभर्तृकोपवासविषये अंजनं च सतांबूलं कुंकुमं रक्तवाससी। धारयेत्सोपवासापि अवैधव्यकरं यतः। विधवायति मार्गेणाक्रमारी वा यदृच्छयेति। तच्चैव भविष्योक्तेः। तथापि विष्णुधर्मे। सर्वेषूपवासेषु पुमान्वाथ सुवासिनी। धारयेद्रक्तवस्त्राणि कुसुमानि सितानि च। विधवा शुक्लवस्त्रमेकमेव हि धारयेत्। मनुरपि। पुष्पालंकारवस्त्राणि गंधधूपानुलेपनं। उपवासे न दुष्यंति दंतधावनमंजनं। मदनरत्ने व्यासः। दंतधावनपुष्पादिधृतेष्वप्यस्या न दुष्यतीति। यद्यपीदं सर्वोपवासविषयं प्रतीयते। शिष्टाचारात्सौभाग्याद्यर्थं क्रियमाणानवरात्रत्रिरात्राद्युपवासविषयमेवामलकैकादश्यादिविषयं। असकृज्जलपानाच्च सकृत्तांबूलभक्षणात्। उपवासः प्रणश्येत दिवास्वापाच्च मैथुना

२६ ह्रिस्यपणर्के देवकलेन तन्निषेधात्। न चास्य पुंविषयत्वेन सावकाशत्वात् स्त्रीणां तांबूलादि प्राप्नोतीति वाच्यं। तांबूलादिप्रापकस्यैवै
कादशीतरविषयत्वेन वैपरीत्यस्यापि सुवचत्वात्। यत्तु हरिवंशे। अंजनं रोचनं चैव गंधान् सुमनसस्तथा। व्रते चैवोपवासे च
नित्यमेव विवर्जयेत्॥ शि। सौभ्यंजनं सौम्ये नैवमेतत्प्रशस्यते। न पादयोर्न गात्रस्य स्नेहेनेति। क्षितिः स्मृतेति। तत्रैवोक्तपु
णपकव्रतविषयं न तु सर्वत्र। पूर्वोक्तविरोधादिति मदनरत्ने उक्तः। तत्रैव। अश्रुप्रपातो रोषश्च कलहस्य कृतिस्तथा। उप
त्रिय ५ वासाद्धृताद्वापि सद्यो भ्रंशयति स्त्रियमित्युपलक्षणं। मदनरत्ने शिवधर्मे। दानं व्रतानि नियमाः ज्ञानध्यानं हुतं जपः। य
त्तेनापि कृतं सर्वं क्रोधितं स्याद्वृथा भवेत्। अथ सूतकादौ निर्णयः। तत्र शावसूत्याशौचयोः सर्वस्मार्तकर्मनिवृत्तिः
निबंधेषु स्पष्टैव। गोडास्तत्स्नताशौचादावपि तामाहुः। ज्ञानूर्ध्वंहतजे ज्ञाते नित्यकर्म न चाचरेत्। नैमित्तिकं च तद्वच्च
स्त्रवद्द्धोमं न चाचरेत्। लोतके च समुत्पन्ने स्वाकर्माणि मैथुने। धूमोद्गारे तथा वांते नित्यकर्माणि संत्यजेत्। द्रव्ये
भुक्ते त्वजीर्णे चैनैव भुक्त्वापि। किंच। नाकर्म कुर्यान्नरो नूनं सूतके मृतके तथेति कालिकापुराणात्। वस्तुतस्तु पूर्वं
देवीपूजोपक्रमात्तन्मात्रविषयत्वमस्येति युक्तं प्रतीमः। तथाह हेमाद्रौ पाद्मे। गर्भिणी सूतिकादिश्च कुमारी वाथ रोगि एम°
णी। यदा शुद्धा तदान्येन कारयेत्प्रयता स्वयमिति। पुंसोप्येष विधिः॥ लिंगस्याविवक्षितत्वात्॥ तेन यस्मिन्व्रते यत्पूजाद्यु

क्रांतदन्येनकारयेच्छरीरनियमान्स्वयमेवकुर्यादितिहेमाद्रिर्व्यचिख्यौ।नव्रतिनांव्रतइतिविस्मृक्तेश्च।आरंभक्तनभवत्येवाशु
द्धितत्वेविष्णुः।वहुकालीकसंकल्पोगृहीतश्चपुरायदि।सूतकेमृतकेचैवव्रतंतन्नैवदुष्यति।एतत्काम्यपरं।नित्येतुनारब्ध
मपिकार्यमितिगौडैः।मदनरत्ने।पूर्वसकल्पितंयच्चव्रतंसुनियतव्रतैः।तत्कर्तव्यंनरैःशुद्धंदानार्चनविवर्जनमिति।माधवीये
कौर्म्ये।काम्योपवासंप्रक्रांतेत्वंतरामृतसूतके।तत्रकाम्यव्रतंकुर्याद्दानार्चनविवर्जितमिति।एतेस्वांगेधिकाराद्भूतांतेगदेव
पूजादिकार्यमितिवर्धमानोक्तिः।परास्ता।पारस्वपूजादिकार्यमेव।नवरात्रेतुतत्रैव।विशेषंवक्ष्यामः।एवंरजस्वलास्वपि
यत्तुसत्यव्रतः।प्रारब्धदीर्घतपसांनारीणांयद्रजोभवेत्।नतत्रापिव्रतस्यस्यादुपरोधःकदाचनेति।तत्प्रतिनिधिनाका
रयेदित्येतत्परं।तदुक्तंमदनरत्नेमात्स्ये।अतरातुरजोयोगेपूजामन्येनकारयेत्।इतिप्रतिनिधिपक्षनिर्णयामृतेपै
ठीनसिः।भार्यापत्युर्व्रतंकुर्याद्भार्यायाश्चपतिर्व्रतं।असामर्थ्येपरास्ताभ्यांव्रतभंगोनजायते।स्कांदे।पुत्रंवाविनयो
पेतंभगिनींभ्रातरंतथा।एषामभावएवान्यंब्राह्मणंवानियोजयेत्।कात्यायनः।पितृमातृभ्रातृपतिगुर्वर्थेचविशे
षतः।उपवासंप्रकुर्वाणःपुण्यंशतगुणंलभेत्।मातामहादीनुद्दिश्यएकादश्यामुपोषणे।कृतेतुफलंविप्राःसमग्रं
समग्रंसमवाप्नुयुः।मदनरत्नेप्रभासखंडे।भर्तापुत्रःपुरोधाचभ्रातापत्नीसखापिवा।यात्रायांधर्मकार्येषुजायंतेप्र

१७ तिहस्तकाः। एभिःकृतंमहादेविस्वयमेवकृतंभवेत्। तत्रैववायवीये। स्वयंकर्त्तुमशक्तश्चेत्कारयीतपुरोधसा। इदंचसर्ववर्णसा
धारणं। अविशेषात्। यत्तुकश्चिदाह। शूद्रस्यब्राह्मणादिरेवप्रतिनिधिर्युक्तोनशूद्रः। जपस्तपस्तीर्थसेवाप्रव्रज्यामंत्रसाध
नं। विप्रैःसंपादितंयस्यसंपन्नंतस्यतत्फलमितिमरीचिवचनादिति। तत्तुच्छं। प्रव्रज्यादीनांशूद्रेऽसंभवात्विशेषप्रापदर्श
नादितिन्यायेनास्यब्राह्मणादिगोचरत्वात्। यदाह। ब्राह्मणोहीनवर्णस्ययःकुर्यात्कर्मकिंचन। सतांजातिमवाप्नोतिइ
हलोकेपरत्रचेति। कालहेमाद्रौमरीचिनिषेधाच्च। उपवासोव्रतंहोमस्तीर्थस्नानजपादिकमितिपूर्वार्द्धेपाठस्तदा
पिसएवदोषः। स्त्रीशूद्रपतनानिषट्इतिमानवीयेजपनिषेधात्। वस्तुतस्तु। संपूर्णतावचनमात्रमत्रोच्यतइति
प्रतिनिधेःकार्यत्वान्नेत्यलं। अत्रविशेषमाहत्रिकांडमंडनः। काम्येप्रतिनिधिर्नास्तिनित्येनैमित्तिकेचसः। काम्येष्वपिक्र
मादूर्ध्वंकेचित्प्रतिनिधिंविदुः॥ नस्यात्प्रतिनिधिर्मंत्रस्वामिदेवाग्निकर्मसु। सदेशकालयोर्नास्तिनारणेरग्निरेवसः। नापि
प्रतिनिधातव्यंनिषिद्धंवस्तुक्वचित्। हिरण्यकेशिसूत्रेऽपि। नस्वामित्वस्यभार्यायाःपुत्रस्यदेशस्यकालस्याग्नेर्देव
तायाःकर्मणःशब्दस्यचप्रतिनिधिर्विद्यतइति। अथयत्रतादृशसन्निपातेनिर्णयः। तत्राति। धेद्वयसंनिपातेत्रोक्तंदानहो एनः
मादिक्रमेणानुष्ठेयं अविरोधात्। यत्रतुनैकैकभक्तादौविरोधस्तत्रप्राथम्यादेकभक्तंकार्य्यंनक्तंतुपरेद्युस्तत्तिथौगो

त्मकालेकार्ये समकालीनविरुद्धकृत्यादौ त्वेकं स्वयं कृत्वान्यद्द्वार्यो ऽन्येनाकारयेदिति माधवः। यत्तु शिवरात्र्यादौ तिथिमध्ये पा
रणयाङ्क्षिभोजनं प्राप्तं भूताष्टम्योर्द्दिवा भुक्त्वा रात्रौ भुक्त्वा च पर्वणि। एकादश्यां दिवा रात्रौ भुक्त्वा चांद्रायणं चरेदिति त
न्निषेधश्च। पारणायां विधत्वाद्दिवैव भोजनं। निषेधस्तु रागप्राप्तभोजनविषयः। एवमष्टम्यादिनक्तव्रते संक्रांत्यादौ रवौ सं
कटचतुर्थ्यां न रात्रौ भोजनं। यत्त्वष्टम्यादौ दिवा भुजिनिषेधः। संक्रमे च रात्राविति निषेधद्वयं तत्रोपवास एव कार्यः। य
द्यपि पुत्रिणामुपवासोपि निषिद्धस्तथापि उपवासनिषेधे तु किंचिद्भक्ष्यं प्रकल्पयेदिति वचनात् किंचिद्भक्षयित्वोपवा
सः कार्यः। चांद्रायणमध्ये एकादश्यादौ तु भोजनमेव कार्यं। चांद्रायणस्य काम्यत्वेन नित्यबाधकत्वात्। अबाधे न गत्यं
तरासंभवाच्च। एकादश्यामेकांतरोपवासादिपारणायां जलपारणां कृत्वोपवसेत्। आपो वा अशितमनशितं चेति श्रुतेः।
एवं द्वादश्यां मासोपवासश्राद्धप्रदोषादिषुह्येयं। एवं काम्यनैमित्तिकनित्यत्वादिकृतं बलाबलं स्वयमूह्यमिति दि
क्। इति कमलाकरभट्टकृते निर्णयसिंधावुपरिभाषा समाप्ता॥ अथ प्रतिपदादिनिर्णयः। शुक्लप्रतिपदपराह्ण
व्यापित्वे पूर्वा ग्राह्या। युग्मवाक्यात्। प्रतिपत्संमुखी कार्या या भवेदापराह्णिकीति स्कांदाच्च। शुक्लास्यात्प्रतिपत्ति
थिः प्रपद्यते चेत्सापराह्णभवेदिति दीपिकोक्तेश्च। अपराह्णश्च दिने पंचधा भक्ते चतुर्थो भागः। तदभावे तु साया

१८

ह्णव्यापिनीग्राह्या।तदभावेतुसायाह्णव्यापिनीपरिगृह्यतामितिमाधवोक्तेः।कृष्णातुपरा।कृष्णातूत्तरतोखिलेतिदीपिकोक्तेः।कृष्णापिपूर्वैवेत्यनंतभट्टः।सर्वतिथिषुवर्ज्यान्युक्तानिमुहूर्तदीपिकायां।कुष्मांडंबृहतीपूलानिलवणांवर्ज्यंतिलाम्लंतथातैलंचामलकंदिवंप्रवसताशीर्षकपालांत्रकं।निष्पावांश्चमसूरिकांफलंमथोवृंताकसंज्ञंमधुद्यूतंस्त्रीगमनंक्रमात्प्रतिपदादिष्वेवमाषोऽश्व।शीर्षं।नालिकेरं।कपालंत्वलाबु।आंत्रं।पटोलं।भूपालः।कूष्मांडंबृहतीक्षारंमूलकंपनसंफलं।धात्री।शिरःकपालांत्रंनखचर्मतिलानिच।क्षुरकर्मांगनासेवांप्रतिपत्प्रभृतित्यजेत।नखं।शिंबी।चर्ममसूरिका।द्वितीयातुकृष्णापूर्वाशुक्लोत्तरेतिहेमाद्रिः।कृष्णाद्वितीयादिर्मो।पूर्वाह्णेपादेसामितातुपरतःसर्वेतिदीपिकोक्तेः।माधवानंतभट्टमतेतुसर्वापिद्वितीयापरा।तथाचमाधवः।पूर्वेद्युरसती।प्रातःपरेद्युस्त्रिमुहूर्तगा।साद्वितीयापरोपोष्यापूर्वविद्धाततोन्यथेति।तृतीयातुसर्वमतेरंभाव्यतिरिक्तापरैव।तेनयुग्मवाक्यंरंभाव्रतविषयं।रंभाख्यांवर्जयित्वातुतृतीयांद्विजसत्तम।अन्येषुसर्वकार्येषुगणयुक्ताप्रशस्यते।इतिब्रह्मवैवर्तात।गौरीव्रतेतुविशेषमाहमाधवः।मुहूर्तमात्रसत्वेपिदिनेगौरीव्रतंपरे।शुद्धाधिकायामप्येवंगणयोगप्रशंसनादिति।चतुर्थ्यापिसर्वमतेगणेशव्रतातिरिक्तापरैवायुग्मवाक्यात।एकादशीतथाषष्ठीअमावास्याचतुर्थिका।उपोष्याःपरसंयु

एमः

र्थी

क्ताः पराः पूर्वेण संयुताः ॥ इति माधवीये बृहद्वसिष्ठोक्तेश्च ॥ नागचतुर्थी मध्याह्नव्यापिनी पंचमीयुता च ग्राह्येति माधवीये निर्ण-
यामृते चोक्तं । गणेशव्रते तु तृतीयायुतैव । चतुर्थी तु तृतीयायां महापुण्यफलप्रदा । कर्त्तव्या व्रतिभिर्वत्स गणनाथसु-
तोषिणीति हेमाद्रौ ब्रह्मकैवर्त्तात् । माधवीये तु गणेशव्रते मध्याह्नव्यापिनी मुख्या । चतुर्थी गणनाथस्य मातृविद्धा प्र-
शस्यते । मध्याह्नव्यापिनी चेत्स्यात्परतश्चेत्परेऽहनीति बृहस्पतिवचनात् । प्रातः शुक्लतिलैः स्नात्वा मध्याह्ने पूजयेन्नृ-
पेति तत्कल्पेऽभिधानाच्च । तेन परदिने सत्त्वे परा । अन्यथा पूर्वैवेत्युक्तं । वस्तुतस्तु भाद्रशुक्लचतुर्थ्यां यो गणेशव्रतविशे-
षे मध्याह्नपूजोक्तात्द्विषयाण्येव प्रागुक्तवचनानि तु सार्वत्रिकाणि । संकष्टचतुर्थी चंद्रोदयव्यापिनी ग्राह्या । दिनद्व-
येतत्सत्त्वे मातृयोगस्य सत्त्वात्पूर्वैवेति केचित् । अन्ये तु दिने मुहूर्त्तत्रयादिरूपस्य तृतीयायोगस्याभावात्परे-
दिने माधवोक्तमध्याह्नसत्त्वात्संपूर्णत्वाच्च परैवेत्याचक्षते । दिनद्वये तदभावे तु परैव । गौरीव्रते पूर्वैव । गणेश-
गौरीबहुलाव्यतिरिक्ताः प्रकीर्त्तिताः । चतुर्थ्यः पंचमीविद्धाः देवतांतरयोगात इति मदनरत्ने ब्रह्मवैवर्त्तात् ।
पंचमी तु माधवमते सर्वापि पूर्वा । चतुर्थीसंयुता कार्या पंचमी परया न तु । दैवे कर्मणि पित्र्ये च शुक्लपक्षे तथा-
सिते । इति हारीतोक्तेः । हेमाद्रिमते तु कृष्णा पूर्वा सिता परा । कृष्णा पूर्वयुता सिता परयुता स्यात्पंचमीति दीपि

कोक्तेः। वरूक्ततक्रहारीतोक्तिरूपवाक्यविषया। प्रतिपत्पंचमी चैव सावित्री भूतपूर्णिमा। नवमी दशमी चैव नोपोष्याः परसंयु
ताः इति ब्रह्मवैवर्तात्। यत्तु। पंचमी तु प्रकर्त्तव्या षष्ठीयुक्ता तु नारदेत्यापस्तंबीयं तन्नागपूजाविषयमित्यनंतभट्टनिर्णी
यामृतादयः। चमत्कारचिंतामणौ तु। पंचमी नागपूजायां कार्या षष्ठीसमन्विता। तस्यां तु तुषिता नागा इतरा सचतु
र्थिकेति। तेन नागपूजान्यपरैव। यत्तु मदनरत्ने दिवोदासीययोः श्रावणपंचम्यतिरिक्ता पूर्वेत्युक्तं। श्रावणे पंचमी
शुक्ला संप्रोक्ता नागपंचमी। तां परित्यज्य पंचम्यश्चतुर्थीसहिता हिता इति संग्रहोक्तेः। गणेशस्कंदयोगाभ्यां क्र
मान्नागः शुभाशुभः। मित्रामित्रे तयोः पक्षे नागानामाखुबर्हिणाविति षड्विंशन्मताच्च श्रावणपंचम्यतिरिक्ता
याः पंचम्याश्चतुर्थ्युतत्वमुक्तं तदुपवासादिविषयं। पक्षेदाहने षष्ठी सर्वमते स्कंदव्रतातिरिक्ताः परैवयुग्म
वाक्यात्। नागविद्धा न कर्त्तव्या षष्ठी चैव कदाचनेति स्कांदाच्च। निर्णयामृते। षष्ठी च सप्तमी चैव वारश्चेद् शुभा लि
नः। योगोयं पद्मको नाम सूर्यकोटिग्रहैः समः। सप्तमी पूर्वैव युग्मवाक्यात्। षष्ठ्या युता सप्तमी च कर्त्तव्या तात सर्वदे
ति स्कांदाच्च। अष्टमी तु सर्वमते कृष्णा पूर्वा सिता परा। व्रतमात्रेऽष्टमी कृष्णा पूर्वा शुक्लाऽष्टमी परेति माधवोक्तेः। परयु एन॰
क्शुक्लोऽष्टमी पूर्वयुक्ता कृष्णेति दीपिकोक्तेश्च। शिवशक्त्युत्सवेप्युत्तरा। परवृद्धयेप्युत्तरैव शिवशक्तिमहोत्सवेति माधवो

क्तेः। स्विोदासीये भविष्ये। यदा यदा सिताष्टम्यां बुधवारो भवेत्क्वचित्। तदा तदा हि सा ग्राह्या एकभक्ताशनेन तु पोसंध्याका
लेतथा चैत्रे चैपसुप्ते च ज्जनार्द्दने। बुधाष्टमी न कर्त्तव्या हेति पुराणं पुराकृतं। नवमी तु सर्वमते पूर्वा। युग्मवाक्यात्। नकुर्या
न्नवमीं तातदशम्या तु कदाचनेति स्कांदाच्च। दशमी तु पूर्वा पैरवेति हेमाद्रिः। कस्मात् पूर्वोत्तरा युक्ता दशम्येवं व्यवस्थि
तेति माधवः। अवक्ततत्कमुख्या नवमीयुतेव ग्राह्या। दशमी तु प्रकर्त्तव्या सद्दुर्गा द्विजसत्तमेत्यापस्तंबोक्तेः। यत्तु सं
पूर्णा दशमी कार्या पूर्वया परयाथवेति अंगिरसोक्तं तन्नवमीयुक्तालाभे — दयि कीग्रा स्वेत्येवं नेयं। अथैकादशी॥
॥ तत्रैकादश्युपवासो द्वेधा॥ निषेधपरिपालनात्मको व्रतरूपश्च। तत्राद्यः नशंखेनपिबेत्तोयं नखादेत्कूर्मसू
करौ। एकादश्यां न भुंजीत पक्षयोरुभयोरपीति कौर्मदेवलाद्युक्तेः। अग्निपुराणेपि। गृहस्थो ब्रह्मचारी च आ
हिताग्निस्तथैव च। एकादश्यां न भुंजीत पक्षयोरुभयोरपीति। न चात्र पर्युदासेन व्रतविधिस्तद्धेतुत्वतादृशशब्दाभा
वात्। व्रतरूपस्तु ब्रह्मवैवर्त्ते मासे हरिदिने सम्यग्विधाय नियमं निशि। दशम्यामुपवासस्य प्रकुर्याद्वैष्णवव्रतमि
ति। रटे च शिवभक्ताद्यैरपि कार्यं। वैष्णवो वाथ शैवो वा कुर्यादेकादशीव्रतमिति शिवधर्मोक्तेः। वैष्णवो वाथ शैवो
वा सौरोप्येतत्समाचरेदिति सौरपुराणाच्च। सोपि द्वेधा नित्यः काम्यश्च। उपोष्यैकादशी नित्यं पक्षयोरुभयोरपीति गारु

२० डोक्तेः पक्षे पक्षे च कर्त्तव्यमेकादश्यामुपोषणमिति नारदोक्तेश्च नित्यता। परीछे। ह्निस्नुसापुत्रं श्रियं संततिमात्मनः।
एकादश्यां न भुंजीत पक्षयोरपीति कौर्मादिषु फलश्रुतेश्च। काम्यता। उभयैकादशीव्रतं च गृहस्थातिरिक्तानामे
व नित्यं। गृहस्थ~~यतिधर्मोयं शुक्लामेव सदा गृहीतिदे~~स्य तु शुक्लायामेव व्रतं नित्यं न कृष्णयां। एकादश्यां न भुंजी
त पक्षयोरुभयोरपि। वनस्थयतिधर्मोयं शुक्लामेव सदा गृही इति देवलोक्तेः। न चानेन निषेधपालनमेव वनस्थ
यतिविषये उपसंह्रियते न तु व्रतमिति वाच्यं। अस्य पर्युदासेन व्रतविधिपरत्वात्। अन्यथा पूर्वोक्ताग्निपुरा
णवचने निषेधपालने गृहस्थस्याधिकारोक्त्या विरोधः स्यात्। निषेधस्य निवृत्तिमात्रपरत्वेन विशेषानपेक्षणा
दुपसंहारायोगात्। अभावस्य धर्मत्वाभावाच्च। तस्मादनेन सर्वेषामेकादशीव्रतविधायिनां सामान्यवाक्यानां व
नस्थयतिविषये उपसंहारान्न गृहस्थकृष्णायां नित्यव्रतप्राप्तिः। कथं तर्हि संक्रान्त्यामुपवासं च कृष्णैकादशि
वासरे। चन्द्रसूर्यग्रहे चैव न कुर्यात्पुत्रवान्गृहीति नारदादिवचनेषु कृष्णानिषेधः। प्राप्त्यभावादिति चेत्। श्रूयतां
शयनीबोधनीमध्ये या कृष्णैकादशी भवेत्। सैवोपोष्या गृहस्थेन नान्या कृष्णा कदाचनेति पाद्मे। गृहस्थस्या राम:
षाढीकार्त्तिकीमध्यस्था या कृष्णा विहिता सा पुत्रवतो निषिध्यते। अन्यकृष्णायां तु न विधिः। सर्वविधीनां गृ

हस्थयतिरूपसंहारात्। ननिषेधः प्राप्त्यभावात्। शयन्यादिवाकंलपुत्रगृहिणो चरमित्यनंतभट्टहेमाद्र्यादिग्रंथोः दीपिकापि।
श्चसिता। तु शयनीबोधांतरस्थाप्यपयो न स्यात्स्त्रात्मजिनोपीति। मदनरत्नेभविष्येपि। यथाशुक्लात्तथाकृष्णाद्वादशीमेतदा
प्रिया। शुक्ला गृहस्थैः कर्त्तव्या भोगसंतानवर्द्धिनी। मुमुक्षुभिस्तथाकृष्णानते तेनोपदर्शितेति। निषेधपालनं काम्यव्रतं
च सर्वकृष्णायां सर्वगृहिणां संभवत्येव। पुत्रवांश्च सभार्यश्च बंधुयुक्तस्तथैव च। उभयोः पक्षयोः काम्यव्रतं कुर्याद्वैष्ण
वमिति नारदोक्तेः। एतच्च सर्वं कालादर्शे उक्तं। विधवायाश्च वनस्पयतेश्चैकादशीद्वये। उपवासो गृहस्थस्य शुक्लामेव पुत्रि
णः। भुजे निषेधः कृष्णायां सिद्धिस्तस्य ततो व्रते। इति। प्राच्यास्तु वैष्णवगृहस्थानां कृष्णापि नित्या। नित्यं भक्तिसमायुक्तैर्न
रैर्विष्णुपरायणैः। पक्षे पक्षे च कर्त्तव्यमेकादश्यामुपोषणं। सपुत्रश्च सभार्यश्च स्वजनो भक्तिसंयुतः। एकादश्यामुपवसे
त्पक्षयोरुभयोरपीति नारदोक्तेरित्याहुः। पुत्रशब्दश्चापत्यमात्रवचनः नारायणवृत्तेः। पुमांस एव मे पुत्रा जायेरन्नि
त्यत्रापत्यमात्रे। वाचितोक्तेः। जनयेद्बहून्पुत्रानिति लिंगात्। पौत्री मातामहस्तेनेति मनूक्तेः। पुत्र्या अपत्यमित्यर्थे
तु स्त्रीभ्योढ। कीपौत्रेय इत्यापत्तेः। पुमान्पुत्रो जायते इति च। उपवासनिषेधे विशेषो वायवीये उक्तः। उपवासनिषेधे
तु किंचिद्भक्ष्यं प्रकल्पयेत्। न दुष्यत्युपवासेन उपवासफलं लभेत्। भक्ष्यं च तत्रोक्तं। नक्तं हविष्यान्नमनोदनं च फलं

२१ तिलाःक्षीरमथाम्बुचाज्यंपात्रंपंचगव्यंयदिचापिवायुःप्रशस्तमत्रोत्तरमुत्तरंचेत्यलं।तत्रदशमीवेधोद्वेधा।अरुणोदय
वेधःसूर्योदयवेधश्चेति।आद्योगारुडे।दशमीशेषसंयुक्तोयदिस्यादरुणोदयः नैवोपोष्यंवैष्णवेनतद्दिनेकादशीव्रत
मिति।अरुणोदयस्वरूपंचमाधवीयेस्कांदे।उदयात्प्राक्चतस्रस्तुघटिकाअरुणोदयइति।यद्यपि।उदयात्प्राग्यदा
विप्रमुहूर्तद्वयसंयुता।संपूर्णैकादशीनामतत्रैवोपवसेद्गृहीतिगारुडसौरधर्मादिवचनं।पद्मभविष्ये।आदित्योदय
वेलायाःप्राङ्मुहूर्तद्वयान्विता।एकादशीतुसंपूर्णाविद्धान्यापरिकीर्तितेति।तदप्युपसंहारन्यायेनदंडचतुष्टयपरमे
व।हेमाद्रावप्येवं।यत्तुब्रह्मवैवर्ते।चतस्रोघटिकाःप्रातररुणोदयनिश्चयः।चतुष्टयविभागोऽत्रवेधादीनांकिलो
दितः।अरुणोदयवेधःस्यात्सार्द्धंतुघटिकात्रयं।अतिवेधोद्विघटिकःप्रभासंदर्शनाद्रवेः।महावेधोऽपितत्रै
वदृश्यतेऽर्कोनदृश्यते।तुरीयस्तत्रविहितोयोगःसूर्योदयेबुधैरिति।तदप्यवयववृद्धारुणोदयवेधविशेषपरमे
वेतिमाधवीयेमदनरत्नेच।अंत्यस्तूदयवेधः।तथान्येपिहेमाद्रौमाधवीयेगारुडे।उदयात्प्राक्त्रिघटिकाव्यापि एम॰
न्येकादशीयदि॥संदिग्धैकादशीनामवर्ज्यापंचधर्मकांक्षिभिः।उदयात्प्राङ्मुहूर्तेनव्यापिन्येकादशीयदा।संयु
क्तैकादशीनामवर्ज्यापंचधर्मवृद्धये।हेमाद्रौरात्रेरत्योष्टमभागोऽप्यरुणोदयउक्तः॥निशः प्रांतेतुयामार्द्धेदेववादित्र

दनो। सारस्वतानध्ययने वारुणोदय उच्यते। इति स्मृतेः॥ अत्रेके। एषां सर्वपक्षाणां मुहूर्त्तद्वयेन क्रोडीकारात्त्रिंशः प्रांते इतिवचनाच्च रात्रिमानवशात्तस्माद्द्वित्रिदंडाद्यो नेकेऽरुणोदयाः। तदाह हेमाद्रिः॥ सार्द्धघटिकात्रयोक्तिरष्टाविंशतिमानरात्रिविषया। महत्तराक्तरात्रीरपेक्ष्य चत्त्वारो घटिका इत्युक्तमितीत्याहुः॥ तत्रारुणोदयशब्दस्यानेकार्थत्वापत्तेः। न च मुहूर्त्तद्वयमर्थः। दंडद्वयैकमुहूर्त्तादिविधानानां तथाप्यनुपपत्तेः। न हि तेषां यामार्द्धसमरुणोदयत्वं चास्ति। मुहूर्त्तद्वयस्य यामार्धस्य चत्त्वारो घटिका इत्यनेनोपसंहाराच्च न तदर्थ। न च सार्द्धंतु घटिकात्रयमित्यनेनापि तदापत्तिः। शंक्या। तेन चतुर्दंडस्यैवोक्तेः। चतुर्दंडेर्धघटी दशमी सत्त्वे वेहिधस्तदर्थः॥ द्विघटिकादौ तदरुणोदये र्धघटिकातोन्यूनदशमीसत्त्वेन दोषदृष्टि। तत्तुच्छं। द्विदंडादावपि तदापत्तेः॥ दशमीशेषसंयुक्तो यदि स्यादरुणोदयः। नैवोपोष्यं वैष्णवेन तद्दिनेकादशीव्रतमिति गारुडे भविष्ये च। योगमात्रनिषेधात्। नारदीयेपि लववेधेपि विप्रेंद्र दशम्येकादशीं त्यजेत्। सुराया बिंदुना स्पृष्टं गंगांभ इव निर्मलं। स्कांदेपि। कलाकाष्ठादिगत्येव दृश्यते दशमी विभो। एकादश्यां न कर्त्तव्यं व्रतं राजन् कदाचनेति माधवोप्याह। सोयं कलादिवेधोरुणोदयवेधे रुणोदयवेधे च समान इति निगमेपि। सर्वप्रकारवेधोयमुपवासस्य दूषक इति। अत एव माधवेनारुणोदयाघदंडे। त्यद

शमीस्पर्शीसंप्रयुक्ता। कृत्स्नघटीयोगे तां दिग्धामुहूर्त्तैर्व्याप्तो संयुक्ता। अरुणोदयवेलायां दशमी यदि संगता। संपूर्णैकादशीं
तां तु मोहिन्यै दत्तवान्प्रभुरिति। गोभिलाद्युक्तेः। पूर्वोक्तगारुडादेश्च सामान्यतो विशेषतश्चारुणोदय। वधो निषिद्धः। य
त्तु षष्ठभागोरुणोदय इति हेमाद्रिणोक्तं पञ्चमहारात्री रिति तत्परमतं स्वयमेव दूषितं। अंतेप्युक्तं। वेधतारतम्यं च
दोषतारतम्यादुपपद्यत इति। दोषतारतम्यं च प्रायश्चित्तं तारतम्यादवगम्यते। तच्चोक्तं हेमाद्रौ स्मृत्यंतरे। अज्ञाना
द्यदि वा मोहात्कुर्वन्नेकादशीं नरः। दशमीशेषसंयुक्तां प्रायश्चित्तमिदं चरेत्। कृच्छ्रपादं नरः स्त्री वा गां च दद्यात्सव
त्सिकां। स्वर्णस्याद्धकं देयं तिलद्रोणसमन्वितं। विधानांतरं तत्रैव। ब्राह्मणान्भोजयेत्त्रिंशद्गां च दद्यात्सवत्सि
कां। धरण्यास्याद्धकं देयं तिलद्रोणमथापि वेति। अत्र वेधतारतम्याद्व्यवस्थेति हेमाद्रिः। निशः प्रान्तेत्यपि होषा
ड्डेल६ धिकार्यमेव। तस्माच्चतुर्घटिकात्मक एवारुणोदय इति सिद्धं। तेन षट्पंचाशद्दंडानंतरं दशमीप्रवेशेरुणो
दयवेधयुक्तो भवति। अंत्योपि तत्रैव कण्वेनोक्तः। उदयोपरि विद्धा तु दशम्येकादशी यदि। दानवेभ्यः प्रीणनार्थं द
त्तवान्पाकशासन इति स्मृत्यंतरेपि। दशम्याः प्रातमाहाय यदोदेति दिवाकरः। तेन स्पृष्टं हरिदिनं दत्तं जंभासुराय ति
ति। तत्रारुणोदयवेधो वैष्णवविषयः। तद्वाक्येषु वैष्णवग्रहणात्। तत्स्वरूपं तु माधवीये स्कांदे। परमापदमापन्नो हर्षे

एनः

वासमुपास्थिते॥ नैकादशींत्यजेद्यस्तुयस्यदीक्षास्तिवैष्णवी।विष्ण्वर्पिताखिलाचारःसाहिवैष्णवउच्यते।यद्यपिपित्रादेरा
मदीक्षापांतमात्रस्यवैष्णवत्वंनतुपुत्रादेः।तथापिस्वपारंपर्यप्रसिद्धमेववैष्णवत्वंस्मार्तत्वंचमन्यंतेवृद्धाः।तत्रसाग
रेभविष्ये।यथाशुक्लातथाकृष्णायथाकृष्णातथेतरा।तुल्येतेमन्यतेयस्तुसवैवैष्णवउच्यते।केचित्तुदशम्यांनव
मीवेधंत्यजंति।तत्रमूलंमृग्यंउदयवेधस्तुपारिशेषात्स्मार्तगोचरः।तदाहमाधवः।अरुणोदयवेधोत्रवेधःसूर्यो
दयेतथा।उक्तौह्येदशमीवेधौवैष्णवस्मार्तयोःक्रमात्।हेमाद्रिस्तुकेषांचिदर्धरात्रेपिदशमीवेधमाह।अर्द्ध
रात्रेतुकेषांचिद्दशमीवेधइष्यते।कपालवेधइत्याहुराचार्यायेहरिप्रियाइतिब्रह्मवैवर्तात्।कैमुतिकन्यायेना
रुणोदयवेधस्यैवयंस्मृतिरितितुमाधवः।यस्तुद्विकपंचदशभिस्तथेतिवेधः।सउपवासातिरिक्तविषयइति
माधवः।सर्वप्रकारवेधोयमुपवासस्यदूषकः।सार्द्धसप्तमुहूर्तस्तुयोगोयबाधतेव्रतमितिनिगमादित्यलं।त
त्रंमाधवमतेवैष्णवैररुणोदयविद्धात्याज्या।यदात्वेकादश्येशुद्धासतीवर्द्धतेद्वादशीवोभयंवातदापरैवोष्या
।एकादशीद्वादशीवाधिकाचेत्त्यज्यतांदिनंपूर्वंयात्येतत्तत्रस्यादितिवैष्णवनिर्णयइतिमाधवोक्तेः।स्मार्तैस्तु
सूर्योदयविद्धात्याज्या।यदात्वेकादशीशुद्धासतीवर्द्धतेद्वादशीचसमान्यूनावातदागृहस्थैःपूर्वायतिभिरुत्त

२२ एकापी। प्रथमेहनि संपूर्णा व्याप्याहोरात्रसंयुता। द्वादश्यां च ततस्तात दृश्यते पुनरेव च॥ पूर्वा कार्या गृहस्थैश्च यतिभिश्चो-
त्तरा विभो इति स्कांदोक्तेः। वर्द्धमानोप्येवमाह। उभयवृद्धौ तु शुद्धा विद्धा वा सर्वेषां परैव। संपूर्णैकादशी यत्र प्रभाते पुनरे-
सा। सर्वैरेवोत्तरा कार्या परतो द्वादशी यदीति नारदोक्तेः। द्वादशीमात्रवृद्धौ तु शुद्धाविद्धे व्यवस्थिते। शुद्धा पूर्वोत्तरा वि-
रा: द्धा स्मार्तैर्निर्णय ईदृशः इति माधवोक्तेश्च। मदनरत्नेप्येवं। यत्तु विद्धाप्यविद्धा विज्ञेया परतो द्वादशी न चेत्। अविद्धापि
चाविद्धा स्यात्परतो द्वादशी यदीति हेमाद्रौ पाद्मवचनं तदेकादश्यावृद्धौ ज्ञेयं। तदुक्तं माधवेन। एकादशी द्वादशी चेत्युभ-
यं वर्द्धेते यदा। तदा पूर्वदिनं त्याज्यं स्मार्तैर्ग्राह्यं परं दिनमिति। विद्धैकादश्यां द्वादशीमात्रवृद्धौ च सर्वेषां परैव। तत्रैका-
दशीमात्रवृद्धौ गृहिणः पूर्वा यतेरुत्तरा। पूर्वोक्तपाद्मोक्तेः। एकादशी विवृद्धा चेच्छुक्ले कृष्णे विशेषतः। उत्तरां तु
यतिः कुर्यात्पूर्वामुपवसेद्गृहीति प्रचेतसोक्तेः। एतच्छुद्धाविद्धातुल्यमिति माधवः। त्रयोदश्यां न लभ्येत द्वादशी
यदि किंचन। उपोष्यैकादशी तत्र दशमीमिश्रितापि चेति स्कांदात्। त। अविद्धानि निषिद्धैश्च न लभ्यंते दिनानि तु। मु-
हूर्तैः पंचभिर्विद्धा ग्राह्यैवैकादशी तिथिरिति ऋष्यशृंगोक्तेश्च। मुहूर्तपंचकमरुणोदयमारभ्य ज्ञेयं। अन्यथोत्तरेऽ एमः
ह्न्येकादश्यभावसंभवात्। यदपि हेमाद्रिणा शुद्धसमा शुद्धन्यूना वाधिकद्वादशिका चेत्परैवेत्युक्तं। तदपि वेधस्य विष-

यां स्मार्त्तानां तु पूर्वैवेत्यविरोधः। हेमाद्रिमते तूच्यते। तत्र शुद्धा विद्धा द्वयी नंदा त्रेधा न्यूनसमाधिकैः। षट् प्रकाराः पुनस्त्रेधा द्वादश्यूनसमाधिकैरित्यष्टादशैकादशीभेदाः। तत्र शुद्धाधिकान्यूनद्वादशिका शुद्धाधिकसमद्वादशिका च। सकामैः पूर्वा। निःकामैरुत्तरा कार्या प्रथमेहनि संपूर्णेति पूर्वोक्तेः स्कांदात्। न्यूनद्वादशिकायां तु विष्णुप्रीतिकामैरुपवासद्वयं कार्यं। संपूर्णैकादशी यत्र प्रभाते पुनरेव सा। लुप्यते द्वादशी तस्मिन्नुपवासः कथं भवेत्। उपोष्ये द्वे तिथी तत्र विष्णुप्रीणनतत्परैरिति हद्ववसिष्ठोक्तेः। शुद्धन्यूना शुद्धाधिका शुद्धसमा विद्धन्यूना विद्धसमा वाधिकद्वादशिका वेति हेमाद्रिः। मदनरत्ने तु शुद्धाधिका परा। संपूर्णैकादशी यत्रेति पूर्वोक्तेः। अन्या पूर्वा। शुद्धा यदा समा हीना समा हीनाधिकोत्तरा। एकादशीमुपवसेत् शुद्धां वैष्णवीमपीति स्कांदात्। शुद्धा एव एकादशी। उत्तरा द्वादशी। न चेदेकादशी विद्धा विति नारदोक्तेश्च। यत्तु। अविद्धापि च विद्धा स्याद्दिति पाद्मं। तच्छुद्धाधिकापरं। यत्तु। सपूर्णोकादशी त्याज्या परतो द्वादशी यदि। उपोष्या द्वादशी शुद्धा द्वादश्यामेव पारणं। इत्यादि तद्वैष्णवपरं। स्मार्त्तानां तु पूर्वैवेत्युक्तं। विद्धन्यूनासमद्वादशिका तु मुमुक्षूणां पुत्रवतां च परा। अन्येषां च पूर्वा। पुत्रवतोऽपि पूर्वेति मदनरत्ने। विद्धन्यूनान्यूनद्वादशिका च सैव सर्वैः कार्येति हेमाद्रिः। मुमुक्षूणां परान्येषां पूर्वेति मदनरत्ने। विद्धसमद्वादशि

र

२४ कोनद्वादशिका च श्रेष्ठा मुमुक्षुभिः परान्यैः पूर्वोक्ता या दशमीमिश्रिता पूर्वद्वादशी यदि लुप्यते। शुद्धैव द्वादशी राजन्नुपोष्या मो
क्षकांक्षिभिरिति व्यासोक्तेः। मोक्षकांक्षिग्रहणादन्येषां पूर्वैव। पारणाहे न लभ्येत द्वादशी कलयापि चेत्। तदानीं दश
मीविद्धाप्युपोष्यैकादशी तिथिरिति स्कंदपुराणोक्तेश्च। विद्धाधिकासमद्वादशिका च सर्वेषां परैव। माधवमते त्वग्रहिणः पू
र्वा यतेस्तूत्तरा। सर्वत्रैकादशी कार्या द्वादशीमिश्रिता नरैः। प्रातर्भवतु वा मा वा यतो नित्यमुपोषणमिति पाद्मोक्तेः। विद्धाधि
कासमद्वादशिका मोक्षपाक्षय विष्णुप्रीतिकामैः परा कार्या गृहस्थैर्न तु नक्तं कार्यं। एकादशी द्वादशी च रात्रिशेषे
त्रयोदशी। उपवासं न कुर्वीत पुत्रपौत्रसमन्वित इति कौर्मे दिनक्षये उपवासनिषेधात्। दशम्येकादशीविद्धा द्वाद
शी च क्षयं गता। क्षीणा सा द्वादशी ज्ञेया नक्तं तु गृहिणः स्मृतमिति वृद्धशातातपोक्तेश्च गृहिणः पूर्वत्रोपवासः।
एकादश्याः शुद्धन्यूनत्वे शुद्धसमत्वे वा द्वादश्या न्यूनसमत्वयोरेकादश्यामुपवासः। यानि तु दशम्यनुगता हं
ति द्वादश द्वादशीफलं।। धर्मापत्यधनायूंषि त्रयोदश्यां तु पारणमिति कौर्मादि दशमीवेधत्रयोदशीपारणयोर्निषे
धकानि तानि विहितभिन्नपराणि। अत्र मूलवचनानि तद्व्यवस्था चाकरे ज्ञेया। यत्तु कालहेमाद्रौ ब्रह्मवाक्यविरो
न धे संदेहो ज्ञायते यदा। द्वादशी लुप्ते रात्रा स्यात्त्रयोदश्यां तु पारणमिति मार्कंडेयोक्तेः संदिग्धेषु च वाक्येषु द्वादशी एमः

समुपोषयेत्। तथा। विवादेषु च सर्वेषु द्वादश्यां समुपोषणं। पारणं च त्रयोदश्यामाज्ञेयं मामकी मुने इति पाद्मोक्तेश्च। विध
संदेहे ज्योतिर्विदां विप्रतिपत्तौ वा परा कार्येत्युक्तात्तद्द्वैस्लवविषयमित्यलं बहुना। अथात्रोपयुक्तं किंचिदुच्यते। तत्र
दशम्यामेकादशीयोगे दशमीमध्य एव भोजनं। एकादश्यां न भुंजीतेति। तस्या एव निमित्तत्वात्। निषेधस्तु निवृत्तात्मा
कालमात्रमपेक्षत इति देवलोक्तेश्च। केचित्तु एकादशीव्रताभावेऽपि पूर्वेद्युरेकभक्तविधानाद्विद्धिस्पृष्टे च विधिनिषेधा
नवकाशेन काम्यव्रतांगे भोजननिषेधः प्रवर्तते तेनैकादशीमध्येऽपि पूर्वदिने भोजनमित्याहुः। अत्राधिकारी माध
वीये कात्यायनोक्तः। अष्टवर्षाधिको मर्त्यो ह्यशीतिन्यूनवत्सरः। एकादश्यामुपवसेत्पक्षयोरुभयोरपि। इति भविष्ये।
ब्रह्मचारी च नारी च शुक्लामेव सदा गृहीति। यत्तु विष्णुः। पत्यौ जीवति या नारी उपोष्य व्रतचारिणी। आयुष्यं हर
ते भर्तुर्नरकं चैव गच्छति। तदननुज्ञाविषयमिति प्रागुक्तं। उपवासासामर्थ्ये। तु मार्कंडेयकौर्मयोः एकभक्तेन नक्ते
न तथैवायाचितेन च। उपवासेन दानेन न निर्द्वादशिको भवेत्। अत्र एकभक्ते नयो भर्स्यं उपवासव्रतं चरेत्। इत्ये
कभक्तादिषूपवासशब्दस्तद्धर्मातिदेशार्थः। तेन तत्प्रयुक्ताः सर्वे धर्माः संकल्पमंत्रे चैकभक्तादिपदेनोहः कार्य इ
ति मदनरत्ने। तथासामर्थ्ये प्रतिनिधिना कारयेदिति प्रागुक्तं। व्रताकरणे प्रायश्चित्तमाह माधवीये कात्यायनः।

२५ अर्कपर्वद्वयेरात्रौ चतुर्दश्यष्टमी दिवा।एकादश्यामहोरात्रं भुक्त्वा चांद्रायणं चरेत्।इति॥ अथ काम्यव्रतविधिः लघुनारदीये। दशम्यादि महीपाल त्रिदिनं परिवर्ज्जयेत्। गंधतांबूलपुष्पादि स्त्रीसंभोगं महायशाः तत्र दशम्यां विधिः कौर्म्मे। कांस्यं मांसं मसूरांश्च चणकान्कोरदूषकान्। शाकं मधु परान्नं च त्यजेदुपवसन् स्त्रियं। तथा। शाकं मांसं मसूरांश्च पुनर्भोजनमैथुने। घृतमत्यंबुपानं च दशम्यां वैष्णवस्त्यजेत्। मदनरत्ने नारदीये। अक्षारलवणाः सर्वे हविष्यान्ननिषेविणः। अवनीतल्पशयनाः प्रियासंगमवर्ज्जिताः। व्रतधान्याह हेमाद्रौ देवलः असकृज्जलपानाच्च सकृत्तांबूलधर्येजनात्। उपवासः प्रणश्येत दिवास्वापाच्च मैथुनात्। अशक्तौ तु मदनरत्ने देवलः। अत्यये चांबुपानेन नोपवासः प्रणश्यति। आत्ययेकष्टे। विष्णुरहस्ये। गात्राभ्यंगं शिरोभ्यंगं तांबूलं चानुलेपनं। व्रतस्थो वर्ज्जयेत्सर्वं यच्चान्यच्च निराकृतं। एषु प्रायश्चित्तमुक्तं निर्णयामृते संग्रहे॥ स्तेनहिंसकयोः स्पर्शं कृत्वा स्तैन्यं च हिंसनं। प्रायश्चित्तं व्रती कुर्याज्जपेन्नामशतत्रयं। मिथ्यावादे दिवास्वापे बहुशोंबुनिषेवणे। अष्टाक्षरं व्रती जप्त्वा शतमष्टोत्तरं शुचिः। ॐ नमो नारायणायनमः येत्यष्टाक्षरः। तत्रैव पैठीनसिः। तांबूलचर्वणे स्त्रीसंभोगे मांसतिषेवणे। व्रतलोपे नचेत्कुर्यात्कूष्मावडुर्जिवर्ज्जीनमिति संभोगस्तु कालादन्यरेतःसेकात्मसंयोगमात्रे न्यत्र हयः स्मृतः इति तत्रैव कात्यायनोक्तेः। हेमाद्रौ वसिष्ठः

उपवासे तथा श्राद्धे न कुर्याद्दंतधावनं। दंतानां काष्ठसंयोगो हंत्यासप्तमं कुलं। काष्ठहरणान्नस्त्वोष्ठाग्र निषेध इति हेमाद्रिः॥ विष्णुरहस्ये श्राद्धोपवासदिवसे खादित्वा दंतधावनं। गायत्र्या शतसंपूतमंबु प्राश्य विशुध्यति॥ निर्णयामृते व्यासः। वर्जयेत्पारणे मांसं व्रताहेप्यौषधं तदेति। एकादश्यां श्राद्धप्रसक्तौ माधवीये कात्यायन आह। उपवासो महानित्यः श्राद्धं नैमित्तिकं भवेत्। उपवासं तदा कुर्यादाघ्राय पितृसेवितं। मातापित्रोः क्षये प्राप्ते भवेदेकादशी यदि। अभ्यर्च्य पितृदेवांश्च आजिघ्रेत्पितृसेवितमिति। हेमाद्र्यादि सर्वनिबंधेष्वप्येवम्। एतेनैकादशीनिमित्तकं श्राद्धं द्वादश्यां कार्यमिति वदंतः परास्ताः॥ किंच महालये सपसयाः सकलः पूज्यः श्राद्धषोडशकं प्रतीत्युक्तं षोडशत्वं। पौषैकादश्यां च मत्वादिश्राद्धं तस्याहापरिज्ञाने च तत्पक्षैकादश्यां विहितं श्राद्धं बाधितमेव स्यात्। यदपि स्मृतिचंद्रिकायां पठंति। अन्नाश्रितानि पापानि तद्भोक्तुर्दातुरेव वा। भक्तं ति पितरस्तस्य नरके शाश्वतीः समा इति। तस्यापि रागप्राप्तभुक्तिगोचरस्य वैधं श्राद्धं गोचरयतां महत्साहसमित्यलं॥ योपि। अकृतश्राद्धनिचयान्नलपिंडविनाकृताः इति लघुनारदीये। एकादश्यां श्राद्धादिनिषेधः। स मातापितृभिन्नविषयः। पूर्ववाक्ये तद्ग्रहणात्। निचयः प्रतिग्रहः। अव्रतघ्नान्याह। देवलः। सर्वभूतभयं व्याधिः प्रमादो गुरुशासनं। अव्रतघ्नानि पथ्यंते सकृदेतानि शास्त्रतः। स्कांदेपि। अष्टौतान्यव्रतघ्नानि आपो मूलं फलं पयः। हविर्ब्राह्मणकाम्या च गुरोर्वचनमौष

र्थैः नारदीये। अनुकल्पो नृणां प्रोक्तः क्षीणानां वरवर्णिनि। मूलं फलं पयस्तोयमुपभोग्यं भवेच्छुभे। न त्वेव भोजनं कैश्चिदेकादश्यां
बुधैः स्मृतं। अस्यापवादः। शयने च मडछानेमत्याम्र्व परिवर्त्तने। नरो मूलफलाहारी हृदि शल्यं ममार्प्पयेत्। इदं चाष्टिकांकष्टवि
षयं। एते चाविरोधिनो निर्णयाः सर्वव्रतेषु ज्ञेयाः। तत्रैकादश्यां संकल्पः गृहीत्वौदुंबरं पात्रं वारिपूर्णमुदङ्मुखः। उपवासं तु
गृह्णीयाद्यद्वा धारयेदिति माधवीये वाराहोक्तेः। मंत्रस्तु विष्णूक्तः। एकादश्यां निराहारः स्थित्वाहमपरेहनि। भो
क्ष्यामि पुंडरीकाक्ष शरणं मे भवाच्युतेति। शैवादीनां तु हेमाद्रौ सौरपुराणे। सावित्र्याप्यथवा नाम्ना संकल्पं तु समाचरेत्।
शिवादिगायत्र्यो यजुर्वेदे प्रसिद्धाः। वाराहे। इत्युच्चार्य ततो विद्वान्पुष्पांजलिमथार्प्पयेत्। ततस्तज्जलं पिबेत्। अष्टाक्ष
रेण मंत्रेण मंत्रेणात्रिर्जप्तेनाभिमंत्रिते॥ उपवासफलप्रेप्सुः पिबेत्पाणिगतं जलमिति कात्यायनोक्तेः। मध्यरात्रे उदये
वा दशमीवेधे त्वाद्रौ संकल्पः इति माधवः। दशम्याः संगदोषेण अर्द्धरात्रात्परेण तु। वर्जयेच्चतुरो यामान्संकल्पाचेन
मोः सदा॥ विद्धोपवासेनश्नं तद्दिनं त्यक्त्वा समाहितः। रात्रौ संपूजयेद्विष्णुं संकल्पं च तदाचरेदिति। नारदीयोक्तेः।
तत्रैव पूजामभिधाय। देवस्य पुरतः कुर्याज्जागरं नियतो व्रती। द्वादश्यां निवेदनमंत्रोक्तः कात्यायनेन। अज्ञान
तिमिरांधस्य व्रतेनानेन केशव। प्रसीद सुमुखो नाथ ज्ञानदृष्टिप्रदो भवेति। नारदीये। ब्राह्मणान्भोजयेच्छक्त्या दद्या।

यत्तोवाइमानिभूतानिजायंते।त्वंस्त्रीत्वंपुमानसित्वंकुमारउतवाकुमारी।त्वंजीर्णोदंडेनवंचसित्वंजातोभवसिविश्वतो
द्वैदक्षिणांततः।स्कांदे।कृत्वाचैवोपवासंतुयोश्नातिद्वादशीदिने।नैवेद्यंतुलसीमिश्रंहत्याकोटिविनाशनं।द्वादश्यांच
वर्ज्यान्याहबृहस्पतिः।दिवानिद्रांपरान्नंचपुनर्भोजनमैथुने।क्षौद्रंकांस्यामिषंतैलंद्वादश्यामष्टवर्ज्जयेत्।हेमाद्रौब्रह्मां
डपुराणे।पुनर्भोजनमध्यायोभारआयासमैथुने।उपवासफलंहन्युदिवानिद्राचपंचमी।स्कांदे।परान्नंकांस्यतांबूलेलो
भंवितथभाषणं।वर्ज्जयेदितिशेषः।विष्णुधर्मे।असंभाष्यान्हिसंभाष्यतुलस्यतसिकादलं।आमलक्याः फलंवापि
पारणेप्राश्यशुध्यति।ब्रह्मनारदीये।रजस्वलांचचंडालंमहापातकिनंतथा।सूतिकांपतितंचैवउच्छिष्टंरजका
दिकां।व्रतादिमध्येशृणुयाद्यद्येषांध्वनिमुत्तमः।अष्टोत्तरसहस्रंतुजपेद्वेदमातरं।एतद्व्रतंसूतकेपिकार्यं।सू
तकेमृतकेवापिमत्याज्यंद्वादशीव्रतमितिविष्णूक्तेः।तत्रत्युक्तंदानादिसूतकांतेकार्यं।सूतकांतेनरःस्नात्वा
पूजयित्वाजनार्दनं॥दानंदत्वाविधानेनव्रतस्यफलमश्नुते।इतिमात्स्योक्तेः।रजोदर्शनेपिकार्यं।एकादश्यांन
भुंजीतनारीदृष्टेरजस्यपीतिपुलस्त्योक्तेः।यदाद्वादश्यांश्रवणंस्यात्तदाशुद्धामप्येकादशींत्यक्त्वातत्रैवोपवासः
कार्यः।भुक्त्वावायदिवाकृत्वाद्वादशीश्रवणान्वितां।तयोरेवोपवासस्स्यात्त्रयोदश्यांचपारणमितिनारदीयोक्तेः।एते

चानियमाः काम्यव्रते नियताः। नित्यव्रते सति संभवे कार्याः। शक्तिमांस्तु पुनः कुर्यान्नियमं सविशेषणमिति कात्याय
नोक्तेः अशक्तौ तु माधवीये ब्रह्मवैवर्त्ते इति विज्ञाय कुर्वतावश्यमेकादशीव्रतं विशेषनियमाशक्तौ होत्वं भुक्तिवर्जि
त इति। अथाष्टौ महाद्वादश्यः। तत्र शुद्धाधिकैकादशीयुता द्वादशी उन्मिलनी संज्ञा। द्वादश्येव शुद्धाधिका वर्द्धते
चेत्सा वंजुली वा सा त्र्यहस्पर्शिनी त्रिस्पृशा। अथ पर्वणः संपूर्णाधिकत्वे पक्षवर्द्धिनी। पुष्यर्क्षयुता जया। श्रवणयु
ता विजया। पुनर्वसुयुता जयंती। रोहिणीयुता पापनाशिनी। एताः पापक्षयमुक्तिकाम उपवसेत्। अत्र मूलं हेमा
द्रौ ज्ञेयं। एकादशीद्वादश्योरेकत्वे तंत्रेणोपवासः। पार्थक्ये तु शक्तस्योपवासद्वयं। एकादशीमुपोष्यैव द्वादशीं स
मुपोषयेत्। इति विष्णुरहस्यात्। अशक्तौ तु द्वादश्यामेव। एवमेकादशीं त्यक्त्वा द्वादशीं समुपोषयेत्। पूर्ववास
रजं पुण्यं सर्वं प्राप्नोत्यसंशयमिति तत्रैवोक्तेः। यदा त्वल्पा द्वादशी तदैवैकं मात्स्ये। यदा भवति स्वल्पा विद्वा
ममथ विप्रेंद्र द्वादश्यामरुणोदशी पारणादिने। उषःकाले द्वयं कुर्यात्प्रातर्माध्याह्निकं सदा॥ नारदीयेपि। अ
ल्पायामथ विप्रेंद्र द्वादश्यामरुणोदये। स्नानार्चनक्रिया कार्या दानहोमादिसंयुता इति। संकटे तु माधवी
ये देवलः। संकटे विषमे प्राप्ते द्वादश्यां पारयेत्कथं। अद्भिस्तु पारणं कुर्यात्पुनर्भुक्तेन दोषकृत्। इति संकटे त्रयो

दश्याआद्यमदोषादेो।अत्रकेचिदाहुः।अपकर्षवाक्यान्यनाहिताग्निविषयाणि।अग्निहोत्रादीनांतुश्रौतत्वेनापकर्षायोगा
दिति।द्वादश्यांचप्रथमदंश्यांपादमतिक्रम्यपारणंकार्यं।द्वादश्याःप्रथमःपादोहरिवासरसंज्ञितः।तमतिक्रम्यकु
र्वतपारणंविष्णुस्तस्यरेतिनिर्णयामृतेमदनरत्नेचविष्णुधर्मोक्तेः।अत्रकेचित्संगिरंते।यदाभ्रमसीद्वादशीतदापि
प्रातर्मुहूर्तत्रयेपारणंकार्यं।सर्वेषामुपवासानांप्रातरेवहिपारणमितिवचनादिति।अस्मद्गुरवस्तु।बहूनांकर्म
कालानांविनाकारणंबाधापत्तेःप्रागुक्तवचनैःस्वल्पद्वादश्यामेवापकर्षविधानादपराह्ण एवकार्यं।प्रातःश
ब्दस्त्वायंप्रातर्द्विजातीनामशनंश्रुतिचोदितमितिवदपराह्णवाचित्वेप्युपपन्नः।नचवाक्यवैयर्थ्यंपुनर्भोजन
साम्येपारणानिहत्त्यर्थत्वात्रस्येत्याहुः।प्रमादेनैकादश्युपवासातिक्रमेऽपरार्केवाराहे।एकादशीविलुप्ताचेद्द्वादशी
परतःस्थिता।उपोष्याद्वादशीतत्रयदीच्छेत्परमंपदमिति।केचित्तुविष्णुनाचेदितिपठितं।अत्राविरोधिनोनिय
माःसर्वव्रतेषुबोद्धव्याः।अन्येचनवराचेवहृंते।इतिदिक॥इतिनिर्णयसिंधावेकादशीनिर्णयः।द्वादशीतुपूर्वैवयु
ग्मवाक्यात।द्वादशीतुप्रकर्तव्याएकादश्यायुताप्रभविति।स्कांदाच्च।त्रयोदशीतुसर्वमतेशुक्लापूर्वाकृष्णो
त्तरात्रयोदशाति।थिःपूर्वःसितोग्राह्यासितःपश्चादितिदीपिकोक्तेः।शुक्लत्रयोदशीपूर्वापराकृष्णात्रयोदशीतिमा

२८ धवाच्च। चतुर्दशी तु सर्वमते कृष्णा पूर्वा शुक्लोत्तरा उपवासे तद्व्यपि परेति मदनरत्ने। पौर्णमास्यामावास्ये तु सावित्रीव्रतं विना परे
यात्ये। भूतविद्धे न कर्त्तव्ये दर्शपूर्णे कदाचन। वर्जयित्वा मुनिश्रेष्ठ सावित्रीव्रतमुत्तममिति। ब्रह्मवैवर्त्तात्। अमायां योगवि
शेषोऽपरार्के शातातपः अमावास्यां भवेद्वारो यदा भूमिसुतस्य च। जाह्नवीस्नानमात्रेण गोसहस्रफलं लभेत्। अमा
वा सोमवारेण रविवारेण सप्तमी। चतुर्थी भौमवारेण विषुवत्सदृशं फलं। तत्रैव व्यासः॥ सिनीवाली कुहूर्वापि यदि सोमदि
ने भवेत्। गोसहस्रफलं दद्यात् स्नानं वै मौनिना कृतं। हेमाद्रौ बृहन्मनुः। श्रवणाश्वधनिष्ठार्द्रा नागदैवतमस्तके। यद्यमा
रविवारेण व्यतीपातः स उच्यते। नागदैवतमश्लेषा। मस्तको मृगशिरः प्रथमपाद इत्यन्ये। स च सर्वेषां। अथेष्टिका
लः। गोभिलः। पर्वांता उपवस्तव्याः पर्वाद्योऽभियष्टव्याः इति। उपवासोऽन्वाधानं। तच्च मध्याह्ने तत्पूर्वं वा पर्वप्रतिपत्सं
धौ तद्दिने यागः। पूर्वाह्णे वाथ मध्याह्ने यदि पर्व समाप्यते। उपोष्य तत्र पूर्वेद्युस्तदहर्याग इष्यते। इति लौगाक्षिवचना
त्। अत्र च द्वेधा विभागः आवर्तनात्तु पूर्वाह्णो ह्यपराह्णस्ततः परः। मध्याह्नस्तु तयोः संधिर्यदावर्तनमुच्यते। इति
मदनरत्नेवचनात्। मध्याह्नोर्ध्वसंधौ माधवमते परेह्नि यागः। अपराह्णेऽथवा रात्रौ यदि पर्व समाप्यते। उपोष्य तस्मि एम°
न्नहनि श्वोभूते याग इष्यते। इति लौगाक्षिवचनात्। हेमाद्रिस्त्वपराह्णसंधावपि परदिने प्रतिपच्चतुर्थांशे चंद्रोदये

चसतिद्वितीयादिघत्यंतत्त्रयेसतिपूर्वेद्युर्योगः।पर्वणोंशेद्वितीयेतुयष्टव्यंतुद्विजातिभिः॥द्वितीयासहितंयस्माद्दूषयंत्याश्व
लायनाइति।द्वितीयात्रितिकेमुतिकन्यायेनतुरीयांशपरं।तुरीयेत्रितिमूलपाठोपाठःस्पष्टार्थएव।तथा।भूतापंचद
शीपूर्णाद्वितीयान्वयगामिनी।चरुष्टिरमायांस्याद्भूतेकव्यादिकीक्रियेतिबोधायनवचनाच्चेत्सूचिवान्।मदनरत्ने
पिःचतुर्दशीचतुर्यामात्रमावास्यानदृश्यते।स्वोभूतेप्रतिपच्चेन्स्यात्सर्वातत्रैवकार्येदिति।यत्तुमाधवः।यस्तुवाजस
नेयःस्यात्तस्यसंधिदिनात्पुरा।नकार्यन्वाहितिः किंतुसदासंधिदिनेहिसेत्याह।यच्चकालादर्शेप्युक्तं।आवर्त्तनाद
धःसंधिर्यद्यन्वाधायतद्दिनेपरेद्युरिष्टिरित्याहुर्विप्रावाजसनेयिनइतिमदनरत्नेमध्यंदिनान्स्यादहनीहयस्मि
न्प्राक्पर्वणःसंधिरियंतृतीया।साश्वर्विकावाजसनेयिमत्यात्तस्यामुपोष्याथपरेद्युरिष्टिः।त्यतत्पौर्णमासी
परमितितत्रैव।आवर्त्तनोर्ध्वमर्वागस्तात्द्रात्रौवासमाप्तेद्वे।मध्यादर्वाक्तमाप्तात्तृतीयेत्यर्थः।तत्कर्कभाष्यदेव
ज्ञानीचअनंतभाष्यादितच्छास्त्रीयग्रंथविरोधाद्वृद्धानादराच्चोपेक्ष्यीपौर्णमास्यांविशेषमाह।कात्यायनः।संधिश्चे
संगवादूर्ध्वंप्राक्पर्यावर्त्तनाद्रवेः।सापौर्णमासीविज्ञेयासद्यस्कालविधौनरैः।अमायांविशेषमाहबौधायनः।द्विती
यात्रिमुहूर्त्ताचेद्भवतिपद्यापराह्निकी।अन्वाधानंचतुर्दश्यांपरतःसोमदर्शनात्।कात्यायनश्च।यजतीयेह्निसोम

२९ श्वेद्वारुण्यांदिशिदृश्यते। तत्रव्याहृतिभिर्हुत्वादंडंदद्याद्द्विजातयइति। एतच्चबौधायनवाजसनेयिविषयं। तैत्तिरीयस्मृतौतु
चंद्रदर्शनेपियागउक्तः। एषावैसुमनानामेष्टिर्यमद्येजातंपश्चाच्चंद्रमाअभ्युदेत्यस्मिन्नेवास्मैलोकेर्धुकंभवतीति। श्रु
त्यंतरेपि। यदहःपश्चाच्चंद्रमाअभ्युदेतितदहर्यजान्निमाल्लोकानभ्युदेतीति मदनरत्नेप्येवं। आपस्तंबभाष्यार्थसंग्रहे
प्येवं। अतःपक्षद्वयस्यस्वस्वसूत्रव्यवस्थेतितत्त्वं। हूषपंत्याश्वलायनाइतितुपूर्वाह्णिसंधिविषयमितिमाधवः। शेषपर्वणी
ष्टौविशेषमाहमाधवीयेगार्ग्यः। प्रतिपद्यप्रविष्टायांयदिवेष्टिःसमाप्यते। पुनःप्रणीयकृत्स्नेष्टिःकर्तव्यायागवित्त
मैः। गृह्याग्नौयंनियमइतिमदनपारिजातः। एवंपर्वांत्यांशःप्रतिपदश्चत्रयोंशायागकालउक्तः। क्वचित्प्रतिपत्तु
र्यांशेपियागः। संधिर्यद्यपराह्णेस्याद्यागंप्रातःपरेहनि। कुर्वाणाःप्रतिपद्भागेचतुर्थेपिनदुष्यतीति वृद्धशातातपोक्तेः
एतत्पूर्णिमापरमितिमदनरत्ने। पर्वणिप्रतिपदःह्रसयस्यवृद्धेश्चार्द्धेप्राप्तिप्प संधिर्ज्ञेयः। तदाहमाधवः। वृद्धिः प्र
तिपदोयास्तितदर्द्धंपर्वणिक्षिपेत्। ह्रासयस्याहृतंतस्याहित्वासंधिर्निर्णयतांसदेति। कात्यायनोपि। परेह्निघटिका
न्यूनास्तथैवाभ्यधिकाश्चयाः। तदर्द्धंक्षिप्य। पूर्वस्मिन्नह्नासहह्नी! प्रकल्पयेदिति। एवंस्मार्तेस्थालीपाकेपिज्ञेयं।
तत्रेष्टिस्थालीपाकावाधानगृहप्रवेशनीयहोमानंतरभाविन्यांपौर्णमास्यांप्रारंभणीयौ। नतुदर्शे। यद्यारंभेमल रामः

मासपौषमासशुक्लास्वादिभवतितदाप्यारंभःकार्यः॥ यानितु।उपरागोधिमासश्च यदिप्रथमपर्वणि॥ तथामलिम्लु
चेपौषेनान्वारंभणमिष्यते॥ गुरुभार्गवयोर्मौढ्ये चंद्रसूर्यग्रहेतथेति॥ संग्रहवचनानितान्यालस्यादतिक्रांतशुद्ध
कालप्रारंभविषयाणि॥ नामकर्मचदर्शेष्टिंयथामलेसमारभेत॥ अतिपातेसतितयोःप्रशस्तेमासिपुण्यतेत्यप
राकेगर्गवचनादितिप्रयोगपारिजाते॥ उक्तंचैतत्प्रयोगरत्नेभट्टैः॥ कालादर्शेतुनामकर्मतज्ञातेष्टिमितिपाठः
।याज्ञिकास्त्वाधानंतरंपौर्णमासीचेन्मलमासगातस्यामारंभणीयादीन्नकुर्वतकदाचनेति॥ त्रिकांडमंडनवच
नाच्छुद्धकालएव॥ चित्रेष्टिंकृत्वारंभंकुर्यादित्याहुः॥ कालादर्शेस्मृतिसंग्रहेपि॥ आरंभंदर्शपूर्णेष्ट्योरग्निहोत्र
स्यचादिमं॥ प्रतिष्ठाःपंचकूर्माद्यामलमासेविवर्जयेदिति॥ अथविकृतिः॥ तत्रापस्तंबः॥ यदीष्ट्यायदिपशु
नायदिसोमेनयजेतसोमावास्यायांपौर्णमास्यांवेति॥ अत्रप्रकृतितःकालेसिद्धेपिसद्यस्कालताविधेयात्वृ
तीयपक्षांगतोक्तेः॥ पौर्णमास्यमावास्याशब्दाभ्यांतदंत्यक्षणोगृह्यतेतेनतद्दलसहोमोत्रइत्यर्थमाहमांडारः॥
माधवोपि॥ इष्ट्यादिविकृतिःसर्वापर्वण्येवेतिनिर्णयइति॥ अत्रविशेषमाहत्रिकांडमंडनः॥ कात्यायनश्च॥ आवर्त
नात्प्राग्यदिपर्वसंधिःकृत्वातुतस्मिन्प्रकृतिंविकृत्याः॥ तदैवयागःपरतोयदिस्यात्तस्मिन्विकृत्याःप्रकृतेःप

रेद्युरिति। धूर्त्तस्वाम्यादयोप्येवमाहुः। मरस्थेति सांगाया विकृतेः पर्वकालत्वादावर्त्तनात्प्राक्तंधो प्रकृतेः प्रतिपदि समा
प्तिनियमात प्रकृत्यनंतरं प्रतिपदि विकृत्ययोगात्पूर्वेद्युर्विकृतिरिति फलं। तंत्ररत्ने पार्थसारथिना। यद्यपि प्रकृतेः पूर्व
त्वादपूर्वमंते स्यादित्यापस्तंबेनोक्तं। तथापि हेतुवादेन श्रुतिमूलत्वाभावादंगंवासमभिव्याहारादिति वेदप्रामाण्य
मिति तदाशयः। आग्रयणे तु विशेषं वक्ष्यामः। आरंभणीया चतुर्दश्यां कार्येति हिरण्यकेशिसूत्रे मातृदत्तीये।
अन्येषां पर्वण्येव। पशौ सोमे च कालांतरमप्याह बोधायनः। आमावास्येन वा हविषेष्ट्वा नक्षत्रे वेति। शुक्लपक्षे कृत्ति
कादिविशाखांतेषु देवनक्षत्रेष्विति केशवस्वामी व्याचख्यौ। चातुर्मास्येष्वपि द्वादशाहं यथा प्रयोगपक्षयोर्नक्ष
त्रेष्वप्यारंभः। यावज्जीवसांवत्सरप्रयोगयोस्तु फाल्गुन्यां चैत्र्यां वारंभः। पशौ तु विशेषमाह कात्यायनः। अर्द्धादन्हो
भवति नियतं पर्वसंधिः परस्तात्कृत्वा तस्मिन्नह्नि तु पशुं सद्य एव द्व्यहं च। आरभ्याथ प्रकृतिरथ चेत्पर्वसंधिः पुर
स्तात्कृत्वा तस्मिन्प्रकृतिमथ तस्याः सपशुः सद्य एव। अधिकारपशुस्त्वग्नीषोमीयेणासवनीयेन वा समानतंत्रो वा
यां यजनीये वा सुत्यमहः। पौर्णमास्यां दीक्षायजनीये वा पौर्णमास्या यजनीये वा सुत्यमहरिति लाट्यायनसूत्रेपि। एन:
पूर्वपक्षस्य प्रथमेह्नि दीक्षेत तद्दृष्टावानसत्रयोगमिति। पूर्वपक्षः शुक्लपक्षः। नक्षत्रयोगे चेत्ययमर्थः। चैत्र्यादिपू।

र्णिमायाश्चित्रानक्षत्रयोगे दीक्षेतेति। आधानं तु पर्वणि नक्षत्रेषु चोक्तं। तत्र पर्वनक्षत्रं गार्हपत्यमादधातीत्यादिकर्मकालव्यापिग्राह्यं। दिनद्वये तत्वे परं ग्राह्यं। संकल्पस्य पर्वणि लाभात्। पूर्वनक्षत्रमोतदेवग्राह्यं। यत्र त्रीणि संनिपतितान्यृतुर्नक्षत्रं पर्व तत्र समृद्धं विप्रतिषेधस्त्वृतुर्नक्षत्रं च बलीय इति हिरण्यकेशिसूत्रात्। ऋतुर्वसंते ब्राह्मणोग्निमादधीतेत्यादिः। रेणुकारिकायां तु माघादिपचमासेषु श्रावणे वाश्विने तथा। मार्गशीर्षे शुक्लपक्षे आधानमयकारयेदित्युक्तं। अत्र मूलं मृग्यं। आधाननक्षत्राणि त्वापस्तंबसूत्रे। कृत्तिकारोहिणीमृगशीर्षपुनर्वसुपुष्यपूर्वोत्तरापूर्वाषाढोत्तराषाढाहस्तचित्राविशाखानुराधाश्रवणोत्तराभाद्रपदा इति। सोमपूर्वाधाने विषशेमाहापस्तंबः। सोमेन यक्ष्यमाण आदधानो नर्तुं न पृच्छेन्न नक्षत्रमिति। अत्र प्रकरणादाधानकालबाधः। तेन सोमस्य वसंतकालता न बाध्यते। इति रुद्रदत्तं वृत्तौ नारायणवृत्तौ चोक्तं। धूर्त्तस्वामी तु सोमस्यापि यक्षतस्तस्यापि न पृच्छेदिति लिखनादुभयकालबाधं मन्यते। श्रीरामांडारस्तु कालांतरविधानं वा सर्वकालानादरो वेति पक्षद्वयमुक्तवान्। तत्राद्ये कृत्तिकालांतरस्य पथ्याधाने वसंताद्यबाधेन विधानं। तथा सोमेषुदगयनपूर्वपक्षपुण्याहसंनिपाते यज्ञकालो नादेश इति। छंदोगसूत्रोक्तोदगयनसोमाभिसंधिरुपकालांतरविधानादु

२१ दगयतंत्वपेस्मतरइत्युक्तं। द्वितीयपक्षेतुमदैवेनंयत्रउपनमेद्वितिसर्वकालाभावात्। उक्तइतिभरद्वाजस्तत्रान्सर्वेशहस्यविश्व
जित्सर्वएषइतिबह्वृचोरप्रयोगात्सर्वकालबाधइति। तेनदाक्षिणायनेपिभवतीत्युक्तं। षड्गुरुभाष्येदेवशतभाष्येतभाष्येत
त्रात्येचबह्वृपिसंतुषुभवेतीत्युक्तमितिदिक्। श्राद्धेत्वमावास्यात्रेधाविभक्तादिततृतीयांशेयोपराह्णभागस्तद्व्या
व्यापिनीसाग्निकैर्यास्या। पिंडान्वाहार्यकंश्राद्धंक्षीणेराजनिशस्यते। वासरस्यतृतीयेंशेनातिसंध्यासमीपतइतिका
त्यायनोक्तेः। दर्शश्राद्धंतुयत्प्रोक्तंपार्वणंतत्प्रकीर्तितं। अपराह्णःपितॄणांचतत्रदानंप्रशस्यतइति। शातातपो
क्तेश्च। दिनद्वयेतत्रसत्वेसर्वापराह्णव्यापीदर्शोग्राह्यः। यद्युभयेद्युरेषविहितःसर्वापराह्णेस्थितइतिदीपिको
क्तेः। यत्तुकार्ष्णाजिनिः। भूतविद्धाममावास्यांमोहादज्ञानतोपिवा। श्राद्धकर्मणियेकुर्युस्तेषामायुःप्रहीयतइतित
दपराह्णेचतुर्दशीवेधपरमितिश्राद्धहेमाद्रिः। अपराह्णव्याप्तिपरमितिमाधवः। दिनद्वयेपराह्णव्याप्त्यभावेंशतो
व्याप्तौचतिथिक्षयेपूर्वेतिहेमाद्रिः। यदातुचतुर्दशीयामंतुरीयमनुपूरयेत्। अमावास्याक्षीयमाणातदैवश्राद्धमि
ष्यते। इतिकात्यायनोक्तेः। चतुर्दश्याश्चतुर्थेयामेदर्शःपूरयेत्। चतुर्दशीयामत्रयंस्यादित्यर्थः। क्षीयमाणापरदि रामः
नेपराह्णव्यापिनीनेत्यर्थः। व्यतिरेकमाह। वर्द्धमानाममावास्यांलक्षयेदपरेहनि। यामांस्त्रीनधिकान्वापिपितृय

ङ्गस्ततो भवेत्। ततः श्राद्धं चादिनद्वये पराह्णव्याप्त्यासाम्ये तिथिद्वैधे च हारीतः। त्रिमुहूर्त्ता च कर्त्तव्या पूर्वा खर्वा च बह्वृचैः।
कुहूरध्वर्युभिः कार्या यथेष्टं सामगीतिभिः। त्रिमुहूर्त्ताभावे तु पूर्वैवेत्यर्थः। पिंडपितृयज्ञस्तु कात्यायनैर्यागादिना पूर्वे
द्युः कार्यः। पूर्वेद्युरंगत्वात्पिंडपितृयज्ञ इति स्मृत्यंतरात्। व्याख्यातं चैतत्कर्काचार्यैः। पूर्वएव दर्शात्पिंडपितृयज्ञो न पश्चा
त्कुतः। अंगत्वात्। तथा च श्रुतिः। तस्मात्पूर्वेद्युः पितृभ्यः क्रियते उत्तरमहर्देवान्यजंत इति। पूर्वेद्युः पितृभ्यो य
ज्ञं निपृणीय पश्चाद्देवेभ्यः प्रतनुत इति च। तेन तन्मतेंऽगमेवासौ। तदुक्तं। अंगं वा समभिव्याहारादिति। तेन कर्कम
ते च तु ईदृशी युक्तिः दर्शेपि पितृयज्ञ इति। श्री अनंतभाष्ये परेद्युरित्युक्तं। अत्र द्वेधाप्याचारो दृश्यते। आपस्तंबानां
तु परेद्दिने मुहूर्त्तेमपि दर्शसत्वे तत्रैव पितृयज्ञः। तदाहापस्तंबः। अमावास्यायां यदहश्चंद्रमसं न पश्यंति तदहः
पिंडपितृयज्ञं कुरुते इति। अस्य रुद्रदत्तीया व्याख्या। पिंडैर्युक्तः पितृयज्ञः पिंडपितृयज्ञः। स च कर्मांतरं। ननु दर्शशे
षः। यथा वक्ष्यति। पितृयज्ञः स्वकालविधानादनंगं स्यादिति। तं च यदहश्चंद्रमसं न पश्यंति पंचदश्यां प्रतिप
दि वा तदहः कुरुते। यदहस्तयोः संधिस्तदहरित्यर्थ इति। श्री मांडारोप्याह। पितृयज्ञस्तु पर्वसंधिमदहोरा
त्रापराह्ण इति। अतः पर्वसंधिदिने पितृयज्ञः। शतपथश्रुतिरपि। यदैष न पुरस्तान्न पश्चाद्ददृशेऽथ पितृभ्यो

ददातीति। पर्वसंधिदिने हि पूर्वतः पश्चाद्वा चंद्रो न दृश्यत एवेत्यर्थः॥ सत्याषाढोपि पितृयज्ञं प्रक्रम्य। दृश्यमाने नुपोष्य श्वो
भूते यजतेत्याह। हेमाद्रिस्तु। अमावास्याशब्दस्तिथिवचन एव पूर्वोक्तापस्तंबसूत्रे यदुक्तं न पश्यंतीति तत्र द्रष्टयो भिप्रे
तः। अतश्चतुर्दश्यां चंद्रस्य क्षीणत्वात्तद्युक्तदर्शोपि पितृयज्ञः॥ पितृयज्ञं तु निर्वर्त्य। विप्रश्चंद्रक्षयेग्निमान्। इति मनूक्तेः॥
यदुक्तं यदहस्त्वेव दर्शनं नेति चंद्रमाः। तत्रयापेत्नयाज्ञेयं क्षीणो राजनि चेत्यपीति यदुक्तं दृश्यमाने पितृश्चतुर्दश्य
येत्यपेति च कात्यायनोक्तेः॥ दृश्यमानेप्येक इति गोभिलोक्तेः॥ यस्यां संध्यागतः सोमो मृणालमिव दृश्यते। अपराह्णे
स यस्तस्यां पिंडान्यां करणं ध्रुवमिति हारीतोक्तेश्च। चंद्रक्षयकालश्चोक्तः कात्यायनेन। अष्टमेंशे चतुर्दश्याः क्षी
णो भवति चंद्रमाः। अमावास्याष्टमें शे तु पुनः किल भवेदणुरिति। तेन पूर्वेद्युरेव पितृयज्ञ इत्यूचिवान्। क
र्काचार्यैरपराह्णे पिंडपितृयज्ञश्चंद्रादर्शनेमावास्यायामिति कात्यायनसूत्रे दर्शने प्रत्यय एवोक्तः॥
तस्मिन् क्षीणो ददातीति श्रुतेः। अतस्तन्मते चतुर्दशीयुक्तदर्शे पितृयज्ञे मतिपरदिने यागोर्थात्सिद्धः
तदेतत्सर्वोत्कृष्टमपि हेमाद्रिकर्कादिव्याख्यानमापस्तंबेरनभ्युपगमात्कातीयबौधायनादिविषयं। आ एमः
श्वलायनानामपि शेषपर्वणि पितृयज्ञः। तथा च सूत्रं। अमावास्यायामपराह्णे पिंडपितृयज्ञ इति। अत्रनारा

यणाद्वृत्तिः। अमावास्यशब्दः प्रतिपत्पंचदश्योः संधिवचनोप्यत्रापराह्णशब्दसमन्वयात्। तद्वत्यहोरात्रे वर्त्तते। तस्यापरा
ह्णेस्वतुर्थेभागेपिंडपितृयज्ञःकार्यः। उं एवमर्थ्यमपजनीमषाहनि। यदास्वहोरात्रसंधौतिथिसंधिः स्यात्तदैवमध्य
एवाहनि क्रियत इति। अत एवामुहूर्त्तमप्यमावास्याप्रतिपद्यपि चेद्भवेत्। तदृत्तमस्यंज्ञेयंपर्वशेषेतत्पर्ववदिति हे
माद्रौ वचनं पिंडपितृयज्ञपरमुक्तं प्रयोगपारिजाते। अयं च स्मार्त्ताग्निमता संपूर्णे दर्शश्राद्धव्यतिषंगेण कार्यः
व्यतिषंगो नामोभयोः सहानुष्ठानं। एतच्च स्थालीपाकेन सह पिंडार्थमुद्धृत्येति सूत्रे वृत्तिकृतोक्तं। खंडपर्वणि तु के
चिदाहुः पूर्वेह्नि पिंडपितृयज्ञव्यतिषंगेण श्राद्धं कृत्वापरेह्नि केवलः पिंडपितृयज्ञः कार्यः। वृत्तिकृतान्वष्टकं च
पूर्वेद्युर्मासिमास्यथ पार्वणं। काम्यमाभ्युदयेष्टम्यामेकोद्दिष्टमथाष्टममित्युदाहृत्य पूर्वेषु चतुर्षु स्थाली
पाकाद्युद्धृत्याग्नौकरणमित्युक्तेर्दर्शश्राद्धे स्थालीपाको नियत इति गम्यते। स्थालीपाकश्च पितृयज्ञ एवेति
पूर्वदिने व्यतिषंगः प्रसिद्धः। प्रयोगपारिजाते तु वार्षिकश्राद्धादेरपि व्यतिषंग उक्तः किमुत दर्शश्राद्धस्य। अन्या
यविदस्त्वाहुः। सूत्रस्य वृत्तेश्च संपूर्णदर्शविषयत्वात् खंडपर्वणि पूर्वदिने केवलं श्राद्धं परदिने च केवलः पितृ
यज्ञः कार्यः। अत एवोक्तं वृत्तिकृता नात्रापूर्वः स्थालीपाकश्चोद्यते। सर्वश्राद्धेषु प्रसंगादिति। प्रयोगपारिजाते

२२ ।क्रिरप्येतद्विषये वा पूर्वेद्युस्तिने च श्राद्धेग्नौकरणमेव न पाणिहोमः। चतुर्षोद्धेषु साग्नीनां वह्नौ होमो विधीयते। पितृब्राह्मणह
स्ते स्यादुत्तरेषु चतुर्ष्वपीति परिशिष्टे नियमात्। न च लौकिकाग्नौ पक्कस्य कर्पं गृह्याग्नौ होमः। नान्याग्निपक्कमन्याग्नौ
जुहुयादिति निषेधात्। मेवं श्राद्धस्य गृह्यत्वेन स्मार्त्ताग्नौपचनाग्नौ वा कर्त्तव्यत्वात्। तस्मात्पूर्वेद्युः केवलं श्राद्धं नव्य
तिषंगः। इदमेव च युक्तं। आहिताग्निना तु सर्वाधानिनार्धाधानिना च संपूर्णे खंडे वा दर्शे श्रौताग्नौ पृथगेव पितृय
ज्ञः कार्यः। ननु दर्शश्राद्धव्यतिषंगेणेति विस्तरभीतेर्विरमामः। संपूर्णदर्शे च विशेषमाह लौगाक्षिः। पक्षांतं
कर्म निर्वर्त्य वैश्वदेवं च साग्निकः। पिंडयज्ञं ततः कुर्यात्ततोन्वाहार्यकं बुधः॥ इति। पक्षांतकर्मान्वाधानं। अ
न्वाहार्यकं दर्शश्राद्धं। अयमेव साग्नेर्जवापेतृकस्य पिंडपितृयज्ञकालो ज्ञेयः। तस्यापि कात्यायनेन होमां
तमनारंभो वेत्याम्नानात्। पिंडपितृयज्ञाकरणे प्रायश्चित्तमाह पराशरमाधवीये कात्यायनः। पितृयज्ञात्य
ये चैव वैश्वदेवात्यये पि च। भोजने पतितान्नस्य चरुर्वैश्वानरो भवेदित्यलं। प्रकृतमनुसरामः। निरग्निकादिभिस्तु मा
वास्यापराह्णव्याप्त्यभावे कुतपकालव्यापिनी ग्राह्या। भूतविद्धाप्यमावास्या प्रतिपन्मिश्रितापि वा। पित्र्ये कर्मणि एमः
विद्वद्भिर्ग्राह्या कुतपकालिकीति हारीतोक्तेः। इदं च निरग्निकादिविषयं। सिनीवाली द्विजैः कार्या साग्निकैः पितृक

मेणि। स्त्रीभिः शूद्रैः कुहूः कार्या तथा चानग्निकैर्द्विजैरिति लौगाक्षिवचनात्। अत्र साग्निरौपासनमात्राग्निरपीति मदनपारिजाते उक्तं। कुतपश्चापराह्णव्याप्त्याभावेनुकल्पः। अपराह्णव्यापी यदि दर्शस्तिथिद्वये आहिताग्नेः सिनीवाली निरग्न्यादेः कुहूर्मतेति जाबालिनाभावे विधानात्। तेन साग्नीनां निरग्नीनां वा पराह्णव्यापित्येव मुख्या। तिथिसाम्यवृद्धिक्षयैः समव्याप्तौ खर्वादिना निर्णयः। वैषम्येऽधिका दिनद्वये पराह्णास्पर्शे कुतपव्यापिनीति माधवः। इदमेव युक्तं। हेमाद्र्यादिमते कुतपव्यापिन्येवानिरग्न्यादेर्मुख्या। सिनीवाली दृष्टचंद्रा तथा च व्यासः। दृष्टचंद्रा सिनीवाली नष्टचंद्रा कुहूः स्मृतेति। पूर्वदिने परदिने एव वा तद्व्यापित्वे सैव ग्राह्या। अंशव्यापित्वे वैषम्येऽधिककालव्यापिनी ग्राह्या। दिनद्वयेंशतः समव्याप्तौ तिथिक्षये पूर्वा वृद्धौ साम्ये च परा। तिथिक्षये सिनीवाली तिथिवृद्धौ कुहूः स्मृता। साम्येपि च कुहूर्ज्ञेया वेदवेदांगवेदिभिरिति प्रचेतोवचनात्। दिनद्वये संपूर्णकुतपव्याप्तिस्तु तिथिवृद्धावेव भवतीत्यनंतरवचनात्सैवेति। कुतपस्तु। अष्टमो मुहूर्तो विज्ञेयो दश पंच च सर्वदा। तत्राष्टमो मुहूर्तो यः स कालः कुतपः स्मृत इति मात्स्योक्तेः। तुलादानपितृदेवप्रीत्यर्थोपवासादौ तु परा ग्राह्येत्यन्यत्र विस्तरः। दर्शे च मासिकवार्षिकादिश्राद्धप्राप्तौ कालादर्शे विशेष उक्तः। दर्शस्य चोदकुंभस्य द्वयोर्मा

३४ त्तिकयोरपि।नित्यस्यचाह्निकस्यापिदार्शिकाह्निकयोरपीत्युक्ता।संपातेदेवताभेदाच्छ्राद्धयुग्मंसमाचरेत्।निमित्तानिमित्ति
श्चात्रपूर्वानुष्ठानकारणमितिनिर्णयदीपे।नष्टचंद्रेयदाकालेस्त्याहदिवसोभवेत्।विश्वदेवंत्यश्राद्धंकुर्यात्स्मार्तदर्शेकर्म
णः।अमाश्राद्धंचानुपनीतोपिकुर्यात्।श्राद्धशूलपाणौअमावास्याष्टकाकृष्णपक्षेपंचदशीषुचत्सुपक्रम्य।एतच्चानु
पनीतोपिकुर्यात्सर्वेषुपर्वसु।श्राद्धंसाधारणंनामसर्वकामफलप्रदं।भार्याविरहितोप्येतत्प्रवासस्थोपिनित्यशः।
शूद्रोप्यमंत्रवत्कुर्यादनेनविधिनाबुधः।इतिमात्स्योक्तेः।अमाश्राद्धातिक्रमेप्रायश्चित्तमुक्तंमृग्विधाने।न्यूषुवाचंजपे
न्मंत्रंशतवारंदिनेदिने।अमाश्राद्धंयदानास्तितदासंपूर्णमेतितत्।अत्रपूर्वोक्तसाग्निकपदेनाहिताग्निःस्मार्ताग्निमां
श्चगृह्यतेविच्छिन्नाग्निकादिश्चनिरग्निकः।तथाचहेमाद्रिरग्नौकरणप्रकरणे।साग्निरग्नावनग्निस्तुद्विजपाणावथा
प्सुवा।कुर्याच्छ्रोत्रियोनित्यंलौ।कैकेनेतिमिश्रितमितिस्मृतिवाक्यमुदाहृत्यपत्न्यसहीकृतौपासनतयासमुच्छि
न्नाग्नितयाभार्याविधुरतयावाग्निरहितस्तस्यद्विजपाणौजलादौवाव्याचचक्षे।मदनपारिजातेप्येवं।इदमेवसा
ग्निकानग्निकस्वरूपंसर्वत्रज्ञेयं॥अथग्रहणंनिर्णीयते॥तत्रचंद्रग्रहणोपाकिन्यामेयग्रहणंतस्मात्पूर्वंप्रहरत्रयंनभुं रामः
जीत।सूर्यग्रहेतुप्रहारचतुष्टयंनभुंजीत।सूर्यग्रहेतुनाश्नीयात्पूर्वयामचतुष्टयं।चंद्रग्रहेतुयामांस्त्रीन्बालवृद्धातुरैर्वि

नेति माधवीये वृद्धगौतमोक्तेः। ग्रहणंतु भवेदिंदोः प्रथमादधियामतः। भुंजीतावर्तनात्पूर्वं प्रथमे प्रथमादधः इति मार्कंडेयोक्तेश्च। अधः ऊर्ध्वं। ननु चंद्रग्रहे यामचतुष्टयनिषेध उचितो न तु सूर्यग्रहे। सूर्योदयात्प्राक् भोजनाप्राप्तेः। मैवं। वचनस्य प्रथमयामे सूर्यग्रहे सति पूर्वद्युः पूर्वरात्रे भोजननिषेधपरत्वात्। चंद्रग्रहे विशेषमाह माधवीये वृद्धवसिष्ठः। अस्तोदययोः विधोः पूर्वं नाहर्भोजनमाचरेत्। इति। द्वयोर्ग्रस्तास्ते तु माधवीये व्यासः। अमुक्तयोरस्तगयोरद्याद्दृष्ट्वापरेहनीति विष्णुधर्मेपि। अहोरात्रं न भोक्तव्यं चंद्रसूर्यग्रहो यदा। मुक्तिं दृष्ट्वा तु भोक्तव्यं स्नानं कृत्वा ततः परं॥ अहोरात्रमस्तास्ते मदनरत्ने गार्ग्यः। संध्याकाले यदा राहुर्ग्रसते शशिभास्करौ। तदहर्नैव भुंजीत रात्रावपि कदाचन। सायंसंध्यायां सूर्यस्य ग्रस्तास्ते पूर्वेह्नि रात्रौ च न भोक्तव्यं। प्रातःसंध्यायां चंद्रस्य ग्रस्तास्ते पूर्वरात्रावुत्तरेह्नि च न भोक्तव्यमित्यर्थः। चंद्रस्य ग्रस्तास्ते उत्तरदिने संध्याहोमादौ न दोषः। तदाहोशना॥ ग्रस्ते चास्तंगते त्विंदौ ज्ञात्वा वास्तु तत्र वधारणं। स्नानहोमादिकं कार्यं भुंजीतेंदूदये पुनः। एतदनाहिताग्निविषयं। अपराह्णे व्रतोपायनियमाश्रितः इति कात्यायनोक्तव्रतस्य श्रौतत्वेन च प्रबलत्वात्। चाद्रिव्रतं कुर्यादिति निर्णयदीपः। प्रागप्राप्तभोजने काले नियमोयं। तेन ज्वरादावपि न भोजनमिति कर्कानुसारिणः। बालवृद्धातुराणांतु ग्रहयामात्पूर्वमेकयामो निषिद्धः। सा

याह्नेग्रहणंचेत्स्यादपराह्णेतुभोजनं।अपराह्णेनमध्याह्नेमध्याह्नेनतुसंगवे।भुंजीतसंगवेचेत्स्यान्नपूर्वंभोजनक्रियेति
मार्कंडेयोक्तेः॥ इदंचबालादिविषयं।बालवृद्धातुरैर्विनेपूर्वोक्तेः॥ वेधकालेग्रहणेचपक्वमन्नंत्याज्यं।सर्वेषामेववर्णानां
सूतकंराहुदर्शने।स्नात्वाकर्माणिकुर्वतशृतमन्नंविवर्जयेदितिहेमाद्रौषट्त्रिंशन्मतात्।शृतमितितदंतरितस्योपल
क्षणं।नवश्राद्धेषुयच्छिष्टंग्रहपर्युषितंचयदितिमिताक्षरायांवचनात्।भार्गवार्चनदीपिकायां।ज्योतिर्निबंधेचमेधा
तिथिः॥ आरनालंपयस्तक्रंदधिस्नेहाज्यपाचितं।मणिकस्थोदकंचैवनदुष्येद्राहुसूतके।नन्वर्थमुक्तावल्यां।अन्नं
पक्वमिहत्याज्यंस्नानंसवसनंग्रहे।वारितक्रारनालादितिलदर्भैर्नदुष्यति।जलेत्वदोषोगांगविषयः॥ ग्रहोषितंज
लंपीत्वापादकृच्छ्रंसमाचरेदितितत्रैवचतुर्विंशतिमतेन्यजलस्यदोषोक्तेः॥ वेधकालेग्रहणेवाभोजनेप्रायश्चि
त्तमुक्तंमाधवीयेकात्यायनेन।चंद्रसूर्यग्रहेभुक्त्वाप्राजापत्येनशुध्यति।तस्मिन्नेवदिनेभुक्त्वात्रिरात्रेणैवशुध्य
तीतिग्रहणेचत्रिरात्रमेकरात्रंवोपवासःश्रेयोर्थिनाकार्यः॥ एकरात्रमुपोष्यैवस्नात्वादत्त्वाचशक्तितः कंचुकादि
वसर्पस्यनिवृत्तिःपापकोशतः॥ त्रिरात्रंसमुपोष्यैवग्रहणेचंद्रसूर्ययोः॥ स्नात्वादत्त्वाचविधिवन्मोदतेब्रह्मणासहेति।हे एमः
माद्रौलैंगोक्तेः॥ इदंचपुत्र्यतिरिक्तविषयं।आदित्येहनिसंक्रांतौग्रहणेचंद्रसूर्ययोः॥ पारणंचोपवासंचनकुर्यात्पुत्रवा

न्गृहीतिजैमिनिवचनात्। यदातुरवेर्ग्रस्तास्तस्तदापुत्रिणः प्रहरद्वयंहित्वाबालादिवृद्धोजनंनतूपवासः॥ सायाह्नेग्रह
णंचेस्यादितिपूर्वोक्तमार्कंडेयवचनात्सायाह्नेसंगवेस्त्रीयाछारदेसंगा॥वादधः। मध्याह्नेपरतोस्त्रीयौन्नोपवासोरवि
ग्रहे। इतिस्मृतेश्चेतिहेमाद्रिः॥ शारदोःपराह्नः॥ माधवमतेतुपुत्रिणोपितत्रोपवासएव। अहोरात्रंनभोक्तव्यमिति
पूर्वोक्तनिषेधस्यतेनापिपालनीयत्वात्। उपवासनिषेधस्तुव्रतरूपोपवासपरः। कृष्णैकादशीनिषेधवदिति। म
दनरत्नेप्येवं। इदमेवचयुक्तंवर्द्धमानस्तु अहोरात्रंनभोक्तव्यमितिशातातपीयात्रेसूर्याचंद्रमसोर्लोकानदृ
यान्यातिमानवः॥ इतिफलश्रुतेर्मुक्तस्पर्शनेउपवासकाम्यः॥ नत्वयंनिषेधइत्याहातन्न। अत्रव्रतत्वेपिप्रागुक्तवि
स्तुधर्मेनिषेधोवश्यंभावात्। तथाव्यासः॥ रविग्रहःसूर्यवारेसोमेसोमग्रहस्तथा॥ चूडामणिरितिख्यातस्तत्रदत्तम
नंतकं॥ वारेष्वन्येषुयस्तुस्यात्ग्रहणंचंद्रसूर्ययोः। तत्तुस्यात्कोटिगुणितंयोगेचूडामणौस्मृतं। अत्रचाद्भुतयोः
स्नानंकुर्यात्। ग्रस्यमानेभवेत्स्नानंग्रस्तेहोमोविधीयते। मुच्यमानेभवेद्दानंमुक्तेस्नानंविधीयते। इतिहेमाद्रौवचनात्।
स्नानेस्यादुपरागादौमध्येहोमःसुरार्चनमितिब्रह्मवैवर्ताच्च। सर्वेषामेववर्णानांसूतकंराहुदर्शने। सचैलंचभवेत्स्ना
नंसूतकान्नंचवर्जयेत्। इतिवृद्धवसिष्ठोक्तेः। सचैलत्वंमुक्तिस्नानपरमितिमदनरत्नेउक्तं। भार्गवार्चनदीपिकायांचलविं

३६ शतिमते।मुक्तौयत्रनकृवतस्नानंग्रहणासूतको।सूतकीभवेत्तावद्यावन्स्यादपरोग्रहः॥इदंचस्नानममंत्रकंकार्यमितिस्मृ
तिरत्नावल्यां॥तत्रतीर्थविशेषोभारतौ।गंगास्नानंतुकृवतग्रहणेचंद्रसूर्ययोः।महानदीषुचान्यासुस्नानंकुर्याद्य
थाविधि।महानदीष्वपिमासविशेषेका।श्रेष्ठाः।प्रयागंदेविकारेवासत्रिहत्याचवारणां।सरस्वतीचंद्रभागाकौ
शिकीतापिकातथा।सिंधुगंडकिकाचाथसरयूःकार्त्तिकादितः।मूलंहेमाद्रौस्पष्टं।व्यासः।इंदोर्लक्षगुणंपुण्यं
रवेर्दशगुणंततः।गंगातोयेतुसंप्राप्तेइंदोःकोटीरवेर्दश।गवांकोटिसहस्रस्ययत्फलंलभतेनरः।तत्फलंलभते
मर्त्योग्रहणेचंद्रसूर्ययोः।अत्रतारतम्यमाहमार्कंडेयः।शीतमुष्णोदकात्पुण्यंमपारक्यंपरोदकात्।भमिष्ठ
मुद्धृतात्पुण्यंमहानद्यंबुपावनं।ततस्ततोपिगांगांबुपुण्यंपुण्यस्ततोंबुधिः।इतितुसोदकमात्रविषयं।तथा
।गोदावरीमहापुण्याचंद्रेराहुसमन्विते।सूर्येचराहुणाग्रस्तेतमोभूतेमहामुने।नर्मदातोयसंस्पर्शीकृत
कृत्याभवंतिहि।पृथ्वीचंद्रोदयेप्रभासखंडे।गावोनागास्तिलाधान्यंरत्नानिकनकंमही॥संप्रदायकुरुक्षेत्रे
यत्पुण्यंलभ्यतेनरैः।तदिंदुग्रहणेमोक्षेस्नानाद्भवतिषड्गुणं॥तत्रैववसिष्ठपुराणोक्तविधिस्नानमुपक्रम्य।स्नानानिया एम:
निलोकेषुविख्यातानिमनीषिभिः।तेषांफलमवाप्नोतिग्रहणेचंद्रसूर्ययोः।देवीपुराणे।गंगाकनखलेपुण्यंप्र

यागं पुष्करं तथा कुरुक्षेत्रं महापुण्यं राहुग्रस्ते दिवाकरे। स्नानासंभवे स्मरणं वा कार्यो स्मरणाशतक्रतुफलं दृष्ट्वा सर्वाघनाशनं। इष्ट्वा गोमेधपुण्यं तु पीत्वा सौत्रामणौर्लभेत्।। स्नात्वा वाजिमखं पुण्यं प्राप्नुयाद्विचारतः। रविचंद्रोपरागे च अयने चोत्तरे तथेति। मार्कंडेयोक्तेः। अत्र श्राद्धमाहो ऋष्यशृंगः। चंद्रसूर्यग्रहे यस्तु श्राद्धं विधिवदाचरेत्। तेनैव सकला पृथ्वी दत्ता विप्रस्य वै करे। भारते। सर्वस्वेनापि कर्तव्यं श्राद्धं वै राहुदर्शने। अकुर्वाणस्तु नास्तिक्यात्पंके गौरिव सीदति। विष्णुः। राहुदर्शनदत्तं हि श्राद्धमाचंद्रतारकं। इदं चामान्नेन हेम्ना वा कार्यमलन्नेन। आपद्यनग्नौ तीर्थे च चंद्रसूर्यग्रहे तथा। आमश्राद्धं प्रकुर्वीत हेमश्राद्धमथापि वेति शातातपोक्तेः। इति हेमाद्रिमाधवादयः। अपरार्कस्तु एतद्द्विजानां पाकाभावे द्रष्टव्यं। तीर्थश्राद्धवत्। पाकाभावे द्विजातीनामामश्राद्धं विधीयते इति सुमंतूक्तेः। सैंहिकेयो यदा सूर्यं ग्रसते पर्वसंधिषु। गजच्छाया तु सा प्रोक्ता तस्यां श्राद्धं प्रकल्पयेत्। घृतेन भोजयेद्विप्रान् घृतं भूमौ समुत्सृजेत् इति वायवीयोक्तेश्चेत्याह। विज्ञानेश्वरोप्याह। ग्रहणश्राद्धे भोक्तुर्दोषो दातुस्त्वभ्युदय इति। सूतके मृतके भुंक्ते ग्रहीते शशिभास्करे। छायायां हस्तिनश्चैव न भूयः पुरुषो भवेत्। इत्यापस्तंबेन भोजननिषेधाच्च। अयं च निषेधः श्राद्धभोक्तुः हस्तिच्छायासाहचर्यात्। अत्र ग्रहणनिमित्तकश्राद्धेनेनामासंक्रांत्यादिनिमित्तकानां सिद्धिः। दार्शकालभ्ययोरपीति का

२७ लादर्शोक्तिः॥ अत्राशौचमध्येपिस्नानश्राद्धादिकार्य्यमेव। सूतकेमृतकेचैवनदोषोराहुदर्शने। तावदेवभवेच्छुद्धिर्याव
न्मुक्तिर्नदृश्यते। इतिमाधवीयेवृद्धवसिष्ठोक्तेः॥ स्मार्त्तकर्मपरित्यागोराहोरन्यत्रसूतके। इतिव्याघ्रपादोक्तेश्चका
लादर्शेप्यंगिराः॥ सर्वेवर्णाःसूतकेपिमृतकेराहुदर्शने। स्नात्वाश्राद्धंप्रकुर्वतदानंशाठ्यविवर्जितं। मदनपा
रिजातेप्येवं। नेनस्नानमात्रंप्रकुर्वतदानंश्राद्धविवर्जितमितिनिर्मूलंवदंतीगौडाःपरास्ताः॥ इयंचशुद्धि
रविशेषान्मंत्रदीक्षापुरश्चरणादिसर्वस्मार्त्तकर्मविषयामदनरत्नेप्येवं। रजस्वलायास्तुभार्गवार्चनदी
पिकायां॥ सूर्योदयनिबंधोनसूतकादिदोषोस्तिग्रहेहोमजपादिषु। यत्तुस्नायादुदक्यापितीर्थादुद्धृ
तवारिणेति। अत्रस्नानेनैमित्तिकेप्राप्तेनारीयदिरजस्वला। पात्रांतरिततोयेनस्नानंकृत्वाव्रतंचरेत्। इत्या
दिमिताक्षरोक्तोविधिर्ज्ञेयः॥ तथाग्रहणेरात्रावपिश्राद्धादिकार्यं। ग्रहणोद्वाहसंक्रांतियात्रार्त्तिप्रसवेषु
च। दानंनैमित्तिकंज्ञेयंरात्रावपितदिष्यते। इत्यपरार्कव्यासोक्तेः। चंद्रग्रहेतथारात्रौस्नानंदानंप्रशस्यतेइ
तिदेवलोक्तेश्च। यदातुज्योतिःशास्त्रगम्योदिनेचंद्रग्रहोरात्रौसूर्यग्रहःतदास्नानादिनकार्यं। सूर्यग्रहोय राम०
दारात्रौदिवाचंद्रग्रहस्तथा। तत्रस्नानंनकुर्वतदद्याद्दानंनचक्वचित्। इतिषट्त्रिंशन्मतात्। ग्रहणादिनेवापि

कश्राद्धप्राप्तौतु प्रयोगपारिजाते गोभिलः। दर्शो विग्रहे पित्रोः प्रत्याब्दिकमुपस्थितं। अन्नेनासंभवे हेम्ना कुर्यादामेन
वा सुतः। इति। अत्र दर्शरविपितृस्तुतशब्दाः प्रदर्शनार्थाः। न्यायसाम्यात्। तेन चंद्रग्रहे विप्रपिंडप्रदिवार्षिकन्मा
दिनात् तद्दिन एव कार्यमिति मदनपारिजाते व्याख्यातं। पृथ्वीचंद्रोदयेऽप्येवं। तेन यानि च्यामश्राद्धं प्रकुर्वीत मासस्संवत्सरा
हत इति। अन्नेनैवाब्दिकं कुर्याद्धेम्ना वामेन न कचिदिति मरीचिलौगाक्ष्यादिवचनानि तानि ग्रहणादिनातिरिक्तविष
याणि। निर्णयामृतेऽप्येवं। यानि तु। ग्रहणं तु द्वितीयेऽह्नि रजो दोषात्तु पंचमे। तथा। ग्रस्तोदये यदा चंद्रे प्रत्यब्दे समुप
स्थितं। तद्दिने चोपवासः स्यात्प्रत्यब्दं तु परेऽहनि। तथा। ग्रस्तावेवास्तमानं तु रवींदू प्राप्नुतो यदि। प्रत्यब्दं तु तदा कार्यं प
रेऽहन्येव सर्वदा। चंद्रसूर्योपरागे च तथा श्राद्धं परेऽहनीत्यादीनि वचनानि तानि महानिबंधेष्वनुपलंभान्निर्मू
लानि। प्रस्तुत पूर्वोक्तनिबंधेषु तद्दिन एव श्राद्धमुक्तमित्यलं। ग्रहणादिसप्तदिनपर्यंत रामगोपालाद्यागमदीक्षो
क्ता। शिवार्चनचंद्रिकायां। ज्ञानार्णवे। मंत्राद्यारंभणं कुर्याद्ग्रहणे चंद्रसूर्ययोः। ग्रहणाद्यापि देवेशि कालः
सप्तदिनावधीति। रत्नसागरे। सत्तीर्थेऽर्कविधुग्रासे तंतुदामनपर्वणि। मंत्रदीक्षां प्रकुर्वाणो मासर्क्षादीन्न शोध
येत्। अत्र सूर्यग्रहणमेव मुख्यं। सूर्यग्रहणकाले तु नान्यदन्वेषितं भवेत्। सूर्यग्रहणकालेन समो नान्यः कदा

चनान्मासतिथिवारादिशोधनं सूर्यपर्वणीति। तत्रैव कालोत्तरवचनात्। चंद्रग्रहे तु यादीक्षा यादीक्षा व्रतचारिणां
वनस्थस्य च यादीक्षा हाहारिद्युंसप्तजन्मसु। इति तत्रैव योगिनीतंत्रे निषेधाच्च। ग्रहणं च जन्मराश्यादौ निषिद्धं। तत्
दुक्तं ज्योतिषे। त्रिषड्दशायोपगतं नराणां शुभप्रदं स्याद्ग्रहणं रवीन्द्वोः। द्विसप्तनंदेषु शुभमध्यमं स्याच्छेषेष्वनिष्टं क
थितं मुनीन्द्रैरिति। आयः एकादश। नंदाः नव। इषुः पंच। मदनरत्नेगगाः। जन्मसप्ताष्टरिष्फांकदशमस्थेनि
शाकरो दृष्टो रिष्फदो राज्ञो जन्मर्क्षे निधनोपि च। रिष्फं द्वादशं अंका नव निधनं अष्ट सप्त ताराः। पृथ्वीचंद्रो
दये विष्णुधर्मे यन्नक्षत्रगतो राहुर्ग्रसते शशिभास्करौ। तज्जातानां भवेत्पीडा ये नराः शांतिवर्जिताः। तत्रै
व पुराणांतरे। सूर्यस्य संक्रमो वापि ग्रहणं चंद्रसूर्ययोः। यस्य त्रिजन्मनक्षत्रे तस्य रोगोथवा मृतिः। तस्य दानं च
होमं च देवार्चनजपौ तथा। उपरागाभिषेकं च कुर्याच्छांतिर्भविष्यति। स्वर्णेन वाथ पिष्टेन कृत्वा सर्पस्य चाकृ
तिं। ब्राह्मणाय ददेत्तस्य न रोगादिश्च तत्कृतः। त्रिजन्मनक्षत्रं। जन्मनक्षत्रं तत्सर्वोत्तरे च। जन्मदशमैकोनविं
शतितताराः इति केचित्। सर्पस्य तदाकारस्य राहोरित्यर्थः। अद्भुतसागरे भार्गवः। यस्य राज्यस्य नक्षत्रे स्वर्भानुरु
परज्यते। राज्यभंगं। सुहृन्नाशं मरणं वात्र निर्दिशेत्। राज्यस्य नक्षत्रं अभिषेकस्य नक्षत्रमिति तत्रैव व्याख्यातं। भार्ग

एम०

वार्चनदीपिकायांज्योतिःसागरे।सौवर्णंकारयेन्नागंपलेनाथपलार्धतः॥ तदर्धेनतदर्द्धेनफणायांमौक्तिकंन्य
सेत्।ताम्रपात्रेनिधायाथघृतपूर्णेविशेषतः॥कांस्येवाकांतिलोहेवान्यस्यदद्यात्सदक्षिणं।चंद्रग्रहेतुरूप्य
स्यबिंबंदद्यात्सदक्षिणं।नागंरुक्तमयंसूर्यग्रहेबिंबंचहेमजं।तुरंगरथगोभूमितिलसर्पिंषिकांचनं।काल
विवेकेपि।सुवर्णनिर्मितंनागंसतिलंकांस्यभाजने।सदक्षिणंसवस्त्रंचब्राह्मणायनिवेदयेत्।सौवर्णं
राजतंवापिबिंबंकृत्वास्वशक्तितः।उपरागभवक्लेशछिदेविप्रायकल्पयेत्।मंत्रस्तु।तमोमयमहीभीम
सोमसूर्यविमर्द्दन।हेमताराप्रदानेनममशांतिप्रदोभव॥विधुंतुदनमस्तुभ्यंसिंहिकानंदनाच्युत।दानेनानेननागा
स्यरक्षमांवेधजाद्भयात्।इति।अथशांतिरप्युक्ताहेमाद्रौमात्स्ये।यस्यराशिंसमासाद्यभवेद्ग्रहणसंभवः
स्नानंतस्यप्रवक्ष्यामिमंत्रौषधिसमन्वितं।चंद्रोपरागंसंप्राप्यकृत्वाब्राह्मणवाचनं।संपूज्यचतुरोविप्रा
न्शुक्लमाल्यानुलेपनैः।पूर्वमेवोपरागस्यसमानीयौषधादिकं।स्थापयेच्चतुरःकुंभानव्रणान्सतिला
न्नवान्।गजाश्वरथ्यावल्मीकसंगमाद्ध्रदगोकुलात्।राजद्वारप्रदेशाच्चमृदमानीयनिक्षिपेत्।पंचग
व्यंपंचरत्नंपंचत्वक्पंचपल्लवान्।रोचनंपद्मकंशंखंकुंकुमंरक्तचंदनं।शुक्तिस्फटिकतीर्थांबुसितसर्षप

३९

रागुलून्नामधुकंदेवदारुंचविस्नुक्रांतांथतावरींबलांचसहदेवींचनिशाद्वितयमेवचा।गजदंतंकुंकुमंचतथैवोशी
रचंदनं।एतत्सर्वंविनिःक्षिप्यकुंभेष्वावाहयेत्सुरान्।सर्वेसमुद्राःसरितस्तीर्थानिजलदानदाः।आयांतुयजमानस्य
दुरितक्षमकोरकाः।योसौवज्रधरोदेवआदित्यानांप्रभुर्मतः।सहस्रनयनश्चेंद्रोग्रहपीडांव्यपोहतु।।मुखंयः
सर्वदेवानांसप्तार्चिरमितद्युतिः।चंद्रोपरागसंभूतामग्निःपीडांव्यपोहतु।यःकर्मसाक्षीलोकानांधर्मोमहिष
वाहनः।यमश्चंद्रोपरागोत्थांग्रहपीडांव्यपोहतु।रक्षोगणाधिपःसाक्षान्नीलांजनसमप्रभः।खड्गहस्तोतिभी
मश्चग्रपीडांव्यपोहतु।नागपाशधरोदेवःसदामकरवाहनः।सजलाधिपतिर्देवोग्रहपीडांव्यपोहतु।प्राणरूपो
हिलोकानांसदाकृष्णमृगप्रियः।वायुश्चंद्रोपरागोत्थांग्रहपीडांव्यपोहतु।योसौनिधिपतिर्देवःखड्गशूलगदाध
रः।चंद्रोपरागकलुषंधनदोमेव्यपोहतु।योसाविंदुधरोदेवःपिनाकीवृषवाहनः।चंद्रोपरागपापानिसनाशय
तुशंकरः।त्रैलोकेयानिभूतानिस्थावराणिचराणिचाब्रह्मविष्ण्वर्करुद्राश्चदहंतुममपातकं।एवमावाहयेद्दे
वान्मंत्रैरेभिश्चवारुणैः।एतानेवतथामंत्रान्स्वर्णपट्टेविलेखयेत्।ताम्रपट्टेथवालिख्यनचवस्त्रेतथैवच।मस्त एम०
केयजमानस्यनिदध्युस्तेद्विजोत्तमाः।कलशान्द्रव्यसंयुक्तान्नानारूपसमन्वितान्।गृहीत्वास्नापयेद्भूतंभद्रपीठे

परिस्थिता पूर्वै रेव तु मंत्रैस्तु यजमानं द्विजोत्तमाः॥ अभिषेकं ततः कुर्युस्त्रिवारुणसूक्तकैः॥ आचार्यं वरयेत्पश्चात्स्वर्णं पट्टं निवेदयेत्। आचार्याय दक्षिणां दद्याद्गोदानं च स्वशक्तितः॥ होमं चापि प्रकुर्वीत तिलैर्व्याहृतिभिस्तथा॥ दानं च शक्तितो दद्याद्यदीच्छेदात्मनो हितं। सूर्यग्रहे सूर्यनाम मुक्त्वा मंत्रांश्च कीर्त्तयेत्। अनेन विधिना यस्तु ग्रहणोक्तानमाचरेत्। न तस्य ग्रहणे दोषः कदाचिदपि जायते॥ ॥ इति ग्रहणशांतिः॥ भार्गवार्चनदीपिकायां। ब्रह्मसिद्धांते। सर्वैः पट्टस्थितं वीक्ष्यं स्वस्थे तैलांबुदर्पणे॥ ग्रहणं गुर्विणी ज्ञातुमपश्यंत पटं विना। तथ्यागलक्षणेषु वेधविशेषो हेमाद्रौ। त्रयोदश्यादितो वर्ज्यं दिनानां नवकं ध्रुवं। मांगल्येषु समस्तेषु ग्रहणे चंद्रसूर्ययोः प्रकारांतरं तत्रैवोक्तं। द्वादश्यादितृतीयांतो वेधः खंडग्रहे स्मृतः। एकादश्यादिकः सोरे चतुर्थ्यंतः प्रकीर्तितः। इदं च पूर्णग्रासे। त्र्यहं खंडग्रहे तयोरिति तत्रैवोक्तेः। इदं च ग्रस्तास्ते त्रिदिनं पूर्वमिति मारदेन ग्रस्तास्ते विशेषोक्तेः ग्रस्तास्तभिन्नग्रहणपरं। ज्योतिर्निबंधे च्यवनः। ग्रहणोत्पातभं त्याज्यं मंगलेषु ऋतुत्रयं। यावच्च रविणा भुक्तं भुक्तं भं दग्धकाष्ठवत्। अन्यानि चाग्नेयादिमंडलानि तत्फलं वर्णो विकारादि फलं च दैवज्ञेभ्योऽज्ञेयं। पराशरस्वरोट्टिकायां। चंद्रसूर्यौ परागे च ग्रस्तौ स्नात्वा प्रयतमानसः। स्पर्शादि मोक्षपर्यंतं जपेन्मंत्रं समाहितः। जपाद्दशांशतो होमस्त

४०

ध्याहोमान्तुतर्पणंतर्पणस्यदशांशेनमार्ज्जनंकथितंकिल।तच्चैवंदेवतारूपंध्यात्वात्मानंप्रपूज्यच।नमोंतंमंत्रमुच्चार्य
तदंतेदेवताभिधां।द्वितीयांतामहंपश्चादभिषिंचाम्यनेनतु।तोयैरंजलिनाशुद्धैरभिषिंचेत्समृद्धिनि।मार्ज्जनस्यदशांशे
नब्राह्मणान्नपिभोजयेत्।जपोर्चापूर्वकोहोमस्तर्पणंचाभिषेचनं।भूदेवपूजनंपंचप्रकारोक्तापुरश्क्रिया।तथा
होमाशक्तोजपंकुर्याद्धोमसंख्याचतुर्गुणं।एवंकृतेतुमंत्रस्यजायतेसिद्धिरुत्तमा।ग्रहणप्रसंगात्कुरुक्षेत्रप्र
तिग्रहेप्रायश्चित्तमुच्यते।तत्रपुराणम्।तोप्रतिग्राहीकुरुक्षेत्रेनभूःपुरुषोभवेत्।तथापिमनसःशुद्ध्यैप्रायश्चित्तं
समाचरेत्।तस्मात्कृच्छ्रद्वयंकुर्याद्देवेनसमन्वितं।सत्रेणवायजेनाथजपेद्वालक्षसप्तकं।वापीकूपतडागा
दिखननैर्विहरेज्जेद्धनमिति।एतच्च।यद्गृहीतेनार्जयंतिकर्मणाब्राह्मणाधनं।तस्योत्सर्गेणशुध्यंतिदाने
नतपसैवचेति।मनूक्तेःउत्सर्गोदानंज्ञेयमितिदिक्।ग्रहणांतरितस्यपूर्वसंकल्पितद्रव्यस्यद्विगुणंभवतीति
शिष्टाःपठंतिच।लघुब्रह्मवैवर्त्ते।दातव्यमितिनोकाश्यंवक्तव्यंकुत्रचित्क्वचित्।अहोरात्रमतिक्रम्यतद्दानं
द्विगुणंभवेत्।दशोत्तरंपर्वसुस्याच्छतंचंद्रग्रहेभवेत्।सूर्यग्रहेतत्सहस्रंतन्मरणोनंतकंस्मृतमिति।अत्रमूलंचिंत्यं। एमः
अत्रकेचिद्वेदतुल्याग्राद्रूः ग्रहाणामनिमित्तत्वेप्रोन।तन्निश्चयस्यप्रयोजकत्वात्।ज्योतिःशास्त्रादिनाज्ञातस्यज्ञा

तस्यनिमित्तत्वेप्याप्तेपि। स्नानं दानं ततः श्राद्धमनंतं राहुदर्शने। चंद्रसूर्योपरागे तु यावद्दर्शनगोचरः इति जाबाल्यादिवच
नेषु दृशिप्रयोगाच्चाक्षुषज्ञानस्यैवोपसंहारन्यायेन निमित्तत्वं। अन्यथा दृशो लक्षणा स्यात्। तेन मेघाच्छादनेंधा
दीनां जन्मसप्ताहेत्यादिनिषिद्धदर्शनानां च स्नानश्राद्धादौ नाधिकार इति। कल्पतरुस्त्वाह। दर्शनशब्देन चाक्षुष
ज्ञानं गृह्यते। न ज्ञानमात्रं अज्ञातस्य निमित्तत्वासंभवान्निमित्तमहिम्नैव ज्ञानलाभेन दर्शनपदवैयर्थ्यापत्तेः।
तेन चाक्षुषधीयोग्यः कालः पुण्यः। योग्यत्वं च प्रयत्नानपनेयचाक्षुषज्ञानप्रतिबंधकराहित्यं तेन मेघच्छन्ने
योग्यताभावान्न स्नानादीति निर्णयामृतेप्येवं। तदेतत्तुच्छं। यदि चाक्षुषज्ञानं निमित्तं स्यात्तदा। सूर्यग्रहो यदा
रात्रौ दिवा चंद्रग्रहस्तथा। तत्र स्नानं न कुर्वीत दद्याद्दानं न च क्वचिदिति वाक्यं व्यर्थं स्यात्। चाक्षुषज्ञानाभावे
न प्राप्त्यभावात्। तत्पूर्वकत्वाच्च निषेधस्य। न चेदं ग्रस्तास्तपरं। रविचंद्रयोरस्तानंतरं रात्रिदिवाग्रहत्वादिति
वाच्यं। तत्र पदस्य ग्रहपरत्वेधिकरणतायोगान्निमित्तपरत्वे च तद्ग्रहनिमित्तकस्नानादेरस्तात्प्रागप्यभावापत्तेः
अथ तन्नेति रात्रिदिने उच्येते। वैश्वदेवीतिवद्गुणभूतेऽपि। तन्न। तादृशमंत्रलिंगाभावात्। तयोर्निमित्तत्वेधि
करणत्वे वाऽन्यप्रयुक्तस्नानाद्यभावापत्तेश्च। किंच। नेक्षेतोद्यंतमादित्यं नास्तंयंतं कदाचन। नोपसृष्टं न वारि

स्पृष्टंनमध्यंनभसोगतमितिमनुवचनंबाध्येत। दृ ष्टोरिष्टप्रदोराहुरित्यादिनानचात्रविहितेदर्शनेनिषेधाप्रवृत्तिवत्स्पर्श
द्रसनीयतापिनयुक्तेतिवाच्यं। दर्शनस्यानुवादेनविधेयत्वाभावात्। एतच्चाग्रेवक्ष्यामः। तत्त्वेवाविरुद्धत्रिकद्वयापत्तेः।
अस्तसकृद्दर्शविधानेनसंकोचइतिचेत्। नमुक्तिंदृष्ट्वाततःस्नायादितिमुक्तिस्नानेपिचाक्षुषज्ञानस्यानिमित्त
।।अस्तकिंनश्छिन्नमितिचेत्। न। ग्रस्तास्ततयोःपरेद्युरुदयेदृष्ट्वाभ्यवहरेच्छुचिरितिदर्शनोत्तरंभोजनविधाना
दंधस्यपूर्ववेधकालत्ववद्यावद्दर्शनंभोजननिषेधापत्तेः। मध्येंधीभूतस्यसततरांयावच्चक्षुःप्राप्त्युपवासप्रसंग
श्च। अथान्नलोलुपत्वात्तज्ज्ञानमात्रंविवक्ष्येततत्सर्वमपिनिर्लज्जेनस्वीक्रियतां। एतेनयत्केनचिदुक्तंस्प
र्शस्नानंमुक्तिस्नानंच। यस्यदर्शनंतेनैवकार्यंनान्येन। क्त्वाप्रत्ययेनसमानकर्तृत्वावगतेरिति। तन्निरस्तं।
कातर्हितस्यगतिः। दृशेरुद्देश्यविशेषणत्वाद्ग्रहैकत्ववदविवक्षयार्थतःसिद्धज्ञानमात्रानुवादत्वेसर्वस्पृ
ष्टं। अङ्गुल्याद्यनादेश्यग्रहव्याप्तत्वाद्दर्शनस्यार्थवत्त्वं। नचोक्तायोग्यतापिसाध्वी। दर्शनोत्तरंमेघच्छन्ने
योग्यताभावापत्त्यादानाद्यभावापत्तेः। तेनतत्तद्देशावच्छेदेनज्योतिःशास्त्रावधृतमेवयोग्यता। किंचरकुसो एनः
दर्शनेनारीचिएवमशुचिर्भवेदित्यत्राप्यंधस्त्रीणामाशौचाभावप्रसंगः। यत्तुबहुमानेनोक्तं। ज्ञानोत्तरंस्नानाधिका

रोनज्ञानकाले। स्नानकालेज्ञानाभावात्। एवं दर्शनोत्तरं मुक्तिपर्यंतमहन्येव योग्यतेति। तदपि प्रतिज्ञामात्रं। किंचाग्रस्ता-
स्ततयोः परेद्युरुदये दृष्ट्वाभ्यवहरेच्छुचिरित्यादिवाक्यवैयर्थ्यापत्तेः। चाक्षुषज्ञानान्यथानुपपत्त्यैवार्थादुदये स्नाननिमि-
त्तेः। ननु मुक्तिस्नाने शास्त्रीयमेव ज्ञानं निमित्तं न चाक्षुषं। चंद्रसूर्यग्रहे नाद्यात्तस्मिन्नहनि पूर्वतः। राहोर्विमुक्तिं विज्ञाय
स्नात्वा कुर्वत भोजनमिति वृद्धगोतमेन विज्ञायेति ज्ञानमात्रोक्तेः। यत्तु मुक्तिं दृष्ट्वा तु भोक्तव्यं स्नानं कृत्वा ततः परमि-
ति तदपि ज्ञानमात्रपरं मिघमालादिदोषेण यदि मुक्तिर्न दृश्यते। आकलय्य तु तं कालं स्नात्वा भुंजीत वाग्यतः।
इति गौडनिबंधे दर्शनात्। मैवं। अज्ञानस्य निमित्तत्वाभावेन निमित्तमहिम्नैव ज्ञानलाभे वाक्यवैयर्थ्यात्। ग्रस्ता-
स्तेपि तत्तदापत्तेश्च। किंच। दर्शनं पुंसो विशेषणमुपलक्षणं वा। नाद्यः। दर्शनावच्छिन्ने काले स्नानतुल्यादेर्बाधात्
दर्शनविच्छेदे कृतमपि स्नानादि न ग्रहणनिमित्तं स्यात्। नांत्यः। यावद्दर्शनगोचर इति यावत्पदवैयर्थ्यप्रसंगात्।
दृष्टग्रहणोत्तरमपि स्नानाद्यापत्तेश्च। ज्ञानपक्षेप्येष दोषस्तुल्य इति चेत्। मूर्खोसि। यदि ज्ञानवाचकं पदं श्रूयेत तात
तत्तस्यान्वयो विचार्येत। दृशिस्तु श्रूयत इति वैषम्यात्। कथं तर्हि ज्ञानं लभ्यते। संक्रांतौ स्नायादितिवदर्थादित्य-
वेहि। अश्रुतत्वादेव नो दृश्यविशेषणविवक्षा। कृतो वाक्यभेदोपि। अस्तु तर्हि दृष्टग्रहणं निमित्तमिति चेत्। ग्रस्ता

४२ स्तेस्तोत्तरं स्नानापत्तेः। विशिष्टोद्देशे वाक्यभेदाच्चाप्तवाप्येतत्तुल्यमिति चेत्। यावद्दर्शनगोचर इति वचनेन तन्निषेधात्।
तव त्वन्यग्रहदर्शनस्तास्तेपि स्यात्। किंच। दर्शनस्य विधिरनुवादो वा। आद्ये ग्रहणोत्तरमपि स्नानाद्यापत्तेर्दर्शनद्
र्शन। विधिरुत दर्शनविशिष्टस्नानविधिः। नाद्यः। ग्रहोद्देशेन स्नानविधाने दर्शनविधाने च वाक्यभेदात्। एतेन द्विती
योऽपि परास्तः। न तृतीयः। स्नानस्याप्राप्तेः। दर्शनस्य निमित्तत्वेनाविधेयत्वाच्च। अन्यथा सोमवमनादौ प्रसंतनावि
धिः केन वार्येत। अथ नानावाक्ये युक्तचेद्दर्शनविशिष्टस्नानविधिः। क्वचिच्च प्राप्तदर्शनं निमित्तीकृत्य स्नानमात्र
विधिः। तत्र स्नानस्य प्रधानस्य प्राप्तौ तदंगदर्शनप्राप्तिः। तस्यां च निमित्ते सति स्नानविधौ ~~तदंगदर्शनविधिः~~। एव
मधिकामित्यन्योन्याश्रयात्। एवं दर्शनविधौ सति तन्निमित्तकस्नानविधिः। सति च प्रधानस्नानविधौ तदंगदर्शनविधिः
एवमधिकारे प्रयोजकत्वे च योज्यं। क्त्वार्थपूर्वकालत्वविधौ चास्ते च वाक्यभेदः। अन्यथा स्नानोत्तरमपि दर्शनमंगं स्या
त्। न द्वितीयः। तत्रापि दर्शनग्रहयोर्निमित्तत्वे स्नानद्वयापत्तेः। दर्शनावृत्तौ। नैमित्तिकावृत्तिप्रसंगात्। दर्शनविशिष्ट
ग्रहस्य विशिष्टस्यानुवादे वाक्यभेदापत्तेः। न च ग्रहविराशिर्वाद्विशिष्टं निमित्तमिति वाच्यं। आर्त्तिमात्रस्य हि निमित्तनिमि
त्तेसेनिमेषाद्यावृत्तेरपि तत्तापत्तेर्नैमित्तिकस्य भंगाद्युक्तं विशिष्टोद्देश्यत्वे। इह तु ग्रहणमात्रस्य निमित्तत्वेन काचित्क्षतिः

एमः

तस्माद्दर्शनवाक्यानांग्रस्तास्तविषयत्वातअनादेश्यग्रहपरत्वात्तद्वाज्ञानस्यचार्थतःप्राप्तेस्तद्देवनिमित्तं। तेनमेघाच्छा
दनेंधाद्देश्च स्नानादिभवत्येवेत्यलंवेदबाह्यैः संलापेन॥ इतिग्रहणनिर्णयः॥ अथसमुद्रस्नानं। आश्वलायनः। समु
द्रेपर्वसु स्नायाद्माघ्यांच विशेषतः। पापैर्विमुच्यतेसर्वैः माघ्यांस्नानमाचरन्। भृगुभौमदिनेस्नानं। नित्यमेवविवर्ज्जि
येत। भारते। अश्वत्थसागरौसेव्यौनस्प्रष्टव्यौकदाचन। अश्वत्थंमंदवारेतुसागरंपर्वणिस्पृशेत। पृथ्वीचंद्रोदये स्कां
दे पुनातिपर्वणिस्नानाद्दर्पणैः सरितांपतिः। कदाचिदपिनैवात्र स्नानंकुर्यादपर्वणि। अत्रस्यापवादस्तत्रैव। प्रभासखं
डे। पर्वकालेचसंप्राप्तेनदीनांचसमागमे। सेतुबंधेतथासिंधौतीर्थेष्वन्येषुसंप्लुतः। एवमादिषुसर्वेषुमेध्योन्येषु
स्वकर्मणि। तथा। विनामंत्रंविनापर्वक्षुरकर्मविनानरैः। कुशाग्रेणापिदेवेशि नस्प्रष्टव्योमहोदधिः। तथा। नका
लनियमः सेतौसमुद्रस्नानकर्मणि। तद्विधिस्तत्रैव। पिप्पलादसमुत्पन्नेकृत्येलोकभयंकरे। पाषाणंतेमया
दत्तमाहारार्थप्रकल्पितां। इतिपाषाणंप्रक्षिप्यविश्वाचीं च घृताचीचविश्वयोनेविशांपते। सान्निध्यंकुरुमेदे
व सागरेलवणांभसि नमस्तेविश्वगुप्तायनमोविष्णोअपांपते। नमोजलधिरूपायनदीनांपतयेनमः। समस्त
जगदाधारशंखचक्रगदाधर। देवदेहिममानुज्ञांतवतीर्थनिषेवणे। इतिस्नात्वाकमीशानंनोमिविभुमुमापतिं।

सान्निध्यं कुरु देवेश सागरे लवणांभसि। आग्निश्च यो निरनिलाच्च देहो रेतोधा विष्णुरमृतस्य नाभिः। एतद्ब्रुवन्पांडवस
त्यवाक्यं ततोवगाहेत पतिं नदीनामिति भाष्यात्। तोक्तमंत्रान्पठित्वा विधिवत्स्नात्वा सर्वरत्नोभवान् श्रीमान् सर्वरत्नाकरो यतः
सर्वरत्नप्रधानस्त्वं गृहाणार्घ्यं महोदधे। इत्यर्घ्यं दत्वा तर्पयेत्। पद्मोक्तं पृथ्वीचंद्रोदये स्कांदे। पिप्पलादं विकरावं चक्रतांतं श्री
वकेश्वरी। वसिष्ठं वामदेवं च पराशरमुमापतिं। वाल्मीकं नारदं चैव वालखिल्यांस्तथैव च। नलं नीलं गवाक्षं च गवयं गंध
मादनं। जांबवंतं हनूमंतं सुग्रीवं चांगदं तथा। मैंदं च द्विविदं चैव वृषभं शरभं तथा। रामं च लक्ष्मणं चैव सीतां चैव यश
स्विनीं। एतांश्च तर्पयेद्विद्वान् जलमध्ये विशेषतः। आब्रह्मस्तंबपर्यंतं यत्किंचित्सचराचरं। मयादत्तेन तोयेन तृप्तिमे
वाभिगच्छत्विति॥ इति श्रीमीमांसकनारायणभट्टसूनुरामकृष्णात्मजदिनकरभट्टानुजकमलाकरभट्टकृते निर्ण
यसिंधौ प्रथमः परिच्छेदः समाप्तः। अथ संवत्सरप्रतिपदमारभ्य॥ तिथिकृत्येच कृष्णादिं व्रते शुक्लादिमेव च। विवाहा
दौ च सौरादिं मासं कृत्ये विनिर्दिशेदिति ब्राह्मं प्रायशोनुसृत्य तिथिनिर्णयस्तत्कृत्यं च निरूप्यते। तत्र मीनसंक्रांतेपश्चा
त्षोडश घटिकाः पुण्यकालः। रात्रौ तु निशीथात्प्राक् परतः पूर्वोत्तरदिनार्द्धे पुण्यं निशीथे तु दिनद्वये पुण्यमिति सामा
न्यनिर्णयादवसेयं। अथ तिथिनिर्णयः। तत्र चैत्रशुक्लप्रतिपदि वत्सरारंभः। तत्रौदयिकी ग्राह्या। चैत्रे मासि जगद्ब्रह्मास

सर्ज्जे प्रथमेहनि। शुक्लपक्षे समग्रं तु तदा सूर्योदये सति॥ हेमाद्रौ ब्राह्मोक्तेः। दिनद्वये तद्व्याप्तौ अव्याप्तौ वा पूर्वैव। तदुक्तं ज्यो
तिर्निबंधे। चैत्रसितप्रतिपदि यो वारोर्कोदये स वर्षेशः। उदयद्वितये पूर्वा नोदययुगलेपि पूर्वाः स्यात्। वत्सरादौ वसंतादौ
बलिराज्यदिने तथा। पूर्वविद्धैव कर्त्तव्या प्रतिपत्सर्वदा बुधैरिष्टोक्तेः। चैत्रमासस्य या शुक्ला प्रथमा प्रतिपद्भवेत्। तद्दिने
ब्रह्मणः कृत्वा सोपवासस्तु पूजनं। संवत्सरमवाप्नोति सौख्यानि भृगुनंदनेति हेमाद्रौ विष्णुधर्मोक्तेः। यदा तु चैत्रो मल
मासो भवति तदा देवकार्यस्यात्र निषिद्धत्वाछुद्धे मासि संवत्सरारंभः कार्य इति केचिदाहुः। निष्कर्षस्तु। शुक्लादेर्मलमा
सस्य मासोंतर्भवति चोत्तरः इत्यादिवचनादग्रिमवर्षांतःपातात् मलमासमारभ्यैव वर्षप्रवृत्तेः। शुक्लांतास्त्वादाविव मलमासे
एव कार्य इति वयं प्रतीमः। न तु शुक्लांतादौ चैत्रशुक्लप्रतिपदंतरस्याभावाद्युक्तं तन्मध्य एवानुष्ठानं। मलमासे तु शुद्ध
प्रतिपदंतरस्य संभवाछुद्ध एव वत्सरारंभो युक्त इति चेत्। भ्रांतोसि। न हि प्रतिपदंतरसत्वं प्रयोजकं। अपि तु वत्सरारंभः।
स तु मलमासेपीत्युक्तं प्राक्। न हि चैत्रशुक्लादिर्मलमासः पूर्ववर्षेतर्भवतीति ब्रह्मणापि सुवचं। अत्र तैलाभ्यंगो नित्यः
वत्सरादौ वसंतादौ बलिराज्यदिने तथा। तैलाभ्यंगमकुर्वाणो नरकं प्रतिपद्यते। इति वृद्धवसिष्ठोक्तेः। अस्यामेव नवरात्रारं
भः। तदुक्तं मार्कंडेयपुराणे। शरत्काले महापूजा क्रियते या च वार्षिकी। तत्र परायुतैव ग्राह्या। अमायुक्ता न कर्त्तव्या प्रति

४४ पच्चैंडिकार्चने। मुहूर्त्तमात्रा कर्त्तव्या द्वितीयादिगुणान्वितेति देवीपुराणात्। तिस्रोप्येताः पराः प्रोक्तास्तिथयः कुरुनंदन। का
र्त्तिकाश्वियुजोर्मासोश्चैत्रे मासि च भारतेति हिमाद्रौ ब्राह्मोक्तेः। पराः परयुताः। अत्र विशेषः पारणानिर्णयश्च शारदनव
रात्रे वक्ष्यते। अत्र प्रपादानमुक्तमपरार्के भविष्ये। अतीते फाल्गुने मासि प्राप्ते चैत्रमहोत्सवे। पुण्येह्नि विप्रकथिते प्रपा
दानं समारभेत्। सुपकम्पात ततस्त्वोत्सर्जयेद्विद्वान्मंत्रेणानेन मानवः। प्रपेयं सर्वसामान्या भूतेभ्यः प्रतिपादिता। अस्याः
प्रदानात्तृप्यंतु पितरश्च पितामहाः। अनिवार्यं ततो देयं जलं मासचतुष्टयमिति। तथा। प्रपां दातुमशक्तेन विशेषाद्धर्ममीप्सु
ना। प्रत्यहं धर्मघटको वस्त्रसंवेष्टिताननः। ब्राह्मणस्य गृहे देयः शीतामलजलः शुचिः। तत्र मंत्रः। एष धर्मघटो दत्तो ब्रह्मवि
ष्णुशिवात्मकः। अस्य प्रदानात्सकला मम संतु मनोरथाः। अनेन विधिना यस्तु धर्मकुंभं प्रयच्छति। प्रपादानफलं सोपि
प्राप्नोतीह न संशयः। चैत्रशुक्लतृतीयायां गौरीमीश्वरसंयुतां। संपूज्य दोलोत्सवं कुर्यात्। तदुक्तं निर्णयामृते। देवीपु
राणे। तृतीयायां यजेद्देवीं शंकरेण समन्वितां। कुंकुमागुरुकर्पूरमणिवस्त्रसुगंधकैः। स्रग्गंधधूपदीपैश्च दमनेन वि
शेषतः। आंदोलयेत्ततो वत्स शिवोमातुष्टये सदेति। अत्र चतुर्थीयुता ग्राह्या। मुहूर्त्तमात्रसत्वेपि दिने गौरीव्रतं परे इति। एम॰
माधवोक्तेः। अत्रैव सौभाग्यशयनमुक्तं व्रत। मात्स्ये। वसंतमासमासाद्य तृतीयायां जनप्रिये। सौभाग्याय सदा स्त्रीभिः का

र्यं पुत्रसुखेप्सुभिः॥ इति तत्रापि परसुतैव। इयं मन्वादिरपि। अत्रैव प्रसंगात्सर्वमन्वादिनिर्णय उच्यते। ताश्चोक्ता दीपिकायां॥
तिष्यश्री। न। तिथिं॥ स्तिष्याशो। कृष्णेभो। नलौ। ग्रहः। तिष्यकौ। न। शिवो॥ श्वो॥ मातिष्यौ। मन्वादयो मधोः॥ तिथिः पूर्णिमा
। अग्निस्तृतीया। नेति वैशाखे नास्तीत्यर्थः। आशा दशमी। कृष्णेभः कृष्णाष्टमी। अनलस्तृतीया। ग्रहो नवमी। अर्को द्वा
दशी। अश्वः सप्तमी। मधोश्चैत्रात आरभ्य एताः मन्वादय इत्यर्थः। अत्र मूलवचनानि हेमाद्र्यादौ ज्ञेयानि। एताश्च मान्वा
दैव्यो हेमाद्रिमते शुक्लपक्षस्थाः पूर्वाह्णिकाः कृष्णपक्षस्था अपराह्णिका ग्राह्याः। पूर्वाह्णे तु सदा ग्राह्याः शुक्ला
मनुयुगादयः। दैवे कर्मणि पित्र्ये च कृष्णे चैवापराह्णिकाः। इति गारुडवचनात्। अन्यो मन्वादिकर्मतिथयः पूर्वाह्णि
काः स्युः सिते विज्ञेया अपराह्णिकाश्च बहुले इति दीपिकोक्तेश्च। कालादर्शे तु अपराह्णव्यापित्व मन्वादिषूक्तं। त
त्पक्षमिति युगादिनिर्णये वक्ष्यामः। अत्र श्राद्धमुक्तं मात्स्ये कृतं श्राद्धं विधानेन मन्वादिषु युगादिषु। हायनानि द्वि
साहस्रं पितॄणां तृप्तिदं भवेत्। इति मन्वादिश्राद्धं मलमासे सति मलमासद्वयेऽपि कार्यं। मन्वादिकं तै।र्थकं च कुर्या
न्मासद्वयेऽपि चेति स्मृतिचंद्रिकोक्तेः। अत्र पिंडरहितं श्राद्धं कुर्यात्। तदुक्तं कालादर्शे। विषुवायनसंक्रांतिमन्वादिषु यु
गादिषु। विहाय पिंडनिर्वापं सर्वं श्राद्धं समाचरेत् इति। मन्वादिश्राद्धं चातित्यं अकरणे प्रायश्चित्तदर्शनात्। तदुक्तं क

विधानोत्वंस्रुवःप्रतिमंत्रंचशतवारंजलेज्जपेत्।मन्वाद्योमदान्यूनाऽकृतेनैवचापियइति।एवंयत्रप्राप्तश्चित्रवीप्सादिदर्शनंता
निषण्णवश्राद्धानिनित्यानितानित्तु।अमामनुयुगक्रांतिधृतिपातमहालयाः।आन्वष्टक्यंचपूर्वेद्युःषण्णवत्यःप्रकीर्तिताइ
त्युक्तानि।चकारादष्टकामहरणं।चैत्रशुक्लतृतीयैवमत्स्यजयंती।अत्रैवदशावतारजयंत्योनिर्णीयंते।तत्रपुराणसमु
च्चये।मत्स्योभूद्भुतभुग्दिनेमधुसितेकूर्मोविधौमाधवेवाराहोगिरिजासुतेनभसियद्भूतेसितेमाधवे।सिंहोभाद्रपदेसिते
हरितिथौश्रीवामनोमाधवे।रामोगौरितिथौबलःपरमभूद्रामोनवम्यांमधौ।कृष्णोष्टम्यांनभसिसितपरेचाश्विनेयद्दशम्यां
बुद्धःकल्कीनभसिसमभवच्छुक्लषष्ठ्यांक्रमेण।अह्नोमध्येवामनोरामरामौ।मत्स्यःक्रोडश्चापराह्णेविभागो।कूर्मःसिंहोबौ:
द्धकल्कीचसायंकृष्णोरात्रौकालसाम्येचपूर्वेति।केचित्तुस्फुटानश्लोकानपठंति।यथा।चैत्रेतुशुक्लपंचम्यांभगवान्मीनरू
पधृक्।ज्येष्ठेतुशुक्लद्वादश्यांकूर्मरूपधरोहरिः।चैत्रेकृष्णनवम्यांतुहरिर्वाराहरूपधृक्।नरसिंहश्चतुर्दश्यांकूर्मरूपध
रोहरिः।चैत्रेकृष्णनवम्यांतुहरिर्वाराहरूपधृक्।नरसिंहश्चतुर्दश्यांवैशाखेशुक्लपक्षके।मासिभाद्रपदेशुक्लद्वादश्यांवा
मनोहरिः।राधशुक्लातृतीयायांरामोभार्गवरूपधृक्।चैत्रेशुक्लनवम्यांतुरामोदशरथ्यात्मजः।नभस्येतुद्वितीयायांब
लभद्रोभवद्धरिः।श्रावणेबहुलाष्टम्यांकृष्णोभूल्लोकरक्षकः।ज्येष्ठेशुक्लद्वितीयायांबोधःकल्कीभविष्यति।कोंकणस्थ

कल्किन: पूजनं हरें॥ आत: प्रातस्त्वमध्यान्हसायं सायं तथा निशि॥ मध्यान्हे मध्यरात्रे च सायं प्रातरनुक्रमादिति
तदन्यसमते त्वान्निर्णये सति कुलन्यभेदेन व्यवस्था द्रष्टव्या॥ एताश्च तत्तद्रूपासकानां नित्या:॥ अन्येषां तु काम्या:॥
जन्माष्टम्यादेर्विशेषं वक्ष्याम:॥ चैत्रशुक्लपंचमी कल्पादि:॥ तदुक्तं हेमाद्रौ मात्स्ये॥ श्वेतलणाया दिनस्यादि: कल्पादि: सा
वाराहपुराणस्थलेन वाक्यानि पठंति॥ आषाढे शुक्लपक्षे तु एकादश्यां महातिथौ॥ जनयंती मत्स्यनाम्नी सा तस्यां कार्यमुपो
षणं॥ नभोमासि तृतीयायां हरि: कमठरूपधृक्॥ नभस्य शुक्लपंचम्यां वाराहस्य जयंतिका॥ वैशाखे तु चतुर्दश्यां नृसिंह: स
मपद्यत॥ वैशाखे शुक्लपक्षे तु तृतीयायां भृगूद्वह:॥ मासि भाद्रपदे शुक्ले एकादश्यां वामनो हरि:॥ चैत्रे नवम्यां रामोभूत्कौशल्या
यां पर: पुमान्॥ श्रावणे बहुलेष्टम्यां वासुदेवो जनार्दन:॥ पौषशुक्ले तु सप्तम्यां कुर्याद्बौधस्य पूजनं॥ माघशुक्लतृतीया
यां कल्यायां फाल्गुनस्य वा॥ पंचमी चैत्रमासस्य तथैवांत्या तथापरा॥ शुक्ला त्रयोदशी माघे कार्तिकस्य तु सप्तमी॥ नव
मी मार्गशीर्षस्य सप्तैता: संस्मराम्यहं॥ कल्पानामादयो ह्येता दत्तस्याक्षयकारका:॥ अत्र सर्वोपि निर्णयो मन्वादि
वद्ज्ञेय:॥ हेमाद्रौ ब्राह्मे॥ शुक्लायामथ पंचम्यां चैत्रे मासि शुभानना॥ श्रीर्ब्रह्मलोकान्मानुष्यं संप्राप्ता केशवाज्ञया॥
ततस्तां पूजयेत्तत्र यस्तं लक्ष्मीर्न मुंचति॥ चैत्रे शुक्लाष्टम्यां भवान्या उत्पत्ति:॥ तत्र नवमीयुता ग्राह्या॥ अष्टमी नवमीयु
क्ता नवमी चाष्टमीयुते॥ ब्रह्मवैवर्ते॥ अत्र भवानीयात्रोक्ता काशीखंडे॥ भवानीं यस्तु पश्येत शुक्लाष्टम्यां मधौ न
र:॥ न जातु शोकं लभते सदानंदमयो भवेदिति॥ अत्रैवाशोककलिकाप्राशनमुक्तं हेमाद्रौ लैंगे॥ अशोककलिकाश्चा
ष्टौ ये पिबंति पुनर्वसौ॥ चैत्रे मासि सिताष्टम्यां न ते शोकमवाप्नुयु:॥ प्राशनमंत्रस्तु॥ त्वामशोक वराभीष्टं मधुमाससमुद्भ

कल्पादि:सा
मत्स्यजिंता॥
वैशाखस्य
तृतीया या
४५

वांपिबामिशोकसंतप्तोमामशोकंसदाकुर्विति। अत्रविशेषः॥ पृथ्वीचंद्रोदयेविष्णुः। पुनर्वसुबुधोपेताचैत्रेमासिसिताष्टमी
।प्रातस्तुविधिवत्स्नात्वावाजपेयफलंलभेत इतितिथितत्वे कालिकापुराणे। चैत्रेमासिसिताष्टम्यांयोनरोनियतेंद्रियः। स्ना
मात्सौहित्यतोयेषुसयातिब्रह्मणःपदं। चैत्रंतुसकलंमासंशुचिःप्रयतमानसः। लौहित्यतोयेयःस्नायात्सकैवल्यम
वाप्नुयात्। लौहित्योब्रह्मपुत्रः। मंत्रस्तुः ब्रह्मपुत्रमहाभागशंतनोःकुलसंभव। अमोघागर्भसंभूतपापलौहित्यमेहर। चैत्र
शुक्लनवमीरामनवमीतदुक्तमगस्त्यसंहितायां। चैत्रेनवम्यांप्राक्पक्षेदिवापुण्येपुनर्वसौ। उदयेगुरुगौरांश्वोःस्वोच्च
स्थेग्रहपंचकेमेषेपूषणिसंप्राप्तेलग्नेकर्कटकाह्वये। आविरासीत्सकलयाकौशल्यायांपरःपुमान्। तस्मिन्दिनेतु
कर्त्तव्यमुपवासव्रतंसदा। तत्रजागरणंकुर्याद्रघुनाथपरोभुवीति। इयंचमध्याह्नव्यापिनीग्राह्या। चैत्रशुद्धेनव
मीपुनर्वसुयुतायदि। सैवमध्याह्नयोगेनमहापुण्यतमाभवेदितितत्रैवोक्तेः। तथाचैत्रेमासिनवम्यांतुजातोरामः
स्वयंहरिः। पुनर्वस्वृक्षसंयुक्तासातिथिःसर्वकामदा। श्रीरामनवमीप्रोक्ताकोटिसूर्यग्रहाधिका। तथा। केवलापि
सदोपोष्यानवमीशब्दसंग्रहात्। तस्मात्सर्वात्मनासर्वैःकार्यंवैनवमीव्रतं पूर्वेद्युरेवमध्याह्नयोगेकर्मकालव्याप्तेःसैवग्रा
ह्या। दिनद्वयेमध्याह्नव्याप्तौतदभावेवापूर्वदिनेपुनर्वस्वृक्षयुक्तामपित्यक्त्वापरैवकार्या। तदुक्तंमाधवीयेगस्त्यसंहिता

यां नवमी वाष्टमीविद्धा त्याज्या विष्णुपरायणैः। उपोषणं नवम्यां च दशम्यां चैव पारणमिति अष्टमीविद्धा सकलव्यापि नोपोष्येति माधवः। रामार्चनचंद्रिकायामपि। विद्धैव चेद्दस्रयुक्ता व्रतं तत्र कथं भवेत्। विद्धानिषेधश्रवणान्नवमी चेति वाक्यतः। वैष्णवानां विशेषात्तु तत्र विष्णुपरैरपि। दशम्यादिषु शुद्धेष्वेव विद्धा त्याज्यैव वैष्णवैः। तदन्येषां च सर्वेषां व्रतं तत्रैव निश्चितमिति। अत्र दशम्यादिषु शुद्धेष्वेवेति तदन्येषामिति च वचनं यदा प्रात। त्रिमुहूर्त्तो नवमी दशमी च क्षयवशात्सूर्योदयात्प्रागेव समाप्यते तदा स्मार्त्तानां तत्रैव एकादशी निमित्तोपवासान्नवमीव्रतांगपारणलोपः स्यात्। अतोष्टमीविद्धैव स्मार्त्तानां तत्रैव एकादशी। निमित्तोपवासस्तु तैः कार्या वैष्णवानां त्वरुणोदयविद्धैकादश्याहेयत्वाहेयत्वान्नपारणलोपप्रसंगः। इति। द्वितीये व्रतैः कार्येति सूचयति। दशमीवृद्ध्यभावेष्टमीविद्धाया एव मध्याह्नव्यापित्वे क्षये च वैष्णवैरपि विद्धैवोपोष्येत्यर्थसिद्धं। इदं च व्रतं संयोगपृथक्त्वन्यायेन काम्यं नित्यं च। तदुक्तं हेमाद्रौ अगस्त्यसंहितायां उपोषणं जागरणं पितॄनुद्दिश्य तर्पणं। तस्मिन्दिने तु कर्तव्यं स्वर्गप्राप्तिमभीप्सुभिः। सर्वेषामप्ययं धर्मो भुक्तिमुक्त्येकसाधनः। अशुचिर्वापि पापिष्टः कृत्वेदं व्रतमुत्तमं। पूज्यः स्यात्सर्वभूतानां यथा रामस्तथैव सः। यस्तु रामनवम्यां तु भुंक्ते मोहाद्विमूढधीः। कुंभीपाकेषु घोरेषु पच्यते नात्र संशयः। तथा। अ

कृत्वा रामनवमीव्रतं सर्वव्रतोत्तमं। व्रतान्यन्यानि कुरुते न तेषां फलभाग्भवेत्। प्राप्ते श्रीरामनवमीदिने मर्त्यो विमूढधीः। उपोषणं न कुरुते कुंभीपाकेषु पच्यते। अत्र केचित्तदुपासकानामेवेदं व्रतं नित्यं न त्वन्येषामित्याहुः। अन्येषां तु अकरणे दोषश्रवणात्तस्मात्सर्वात्मना सर्वैः कार्यं वै नवमीव्रतमिति पूर्वोक्तवचनाच्च जन्माष्टम्यादिवदिदमपि सर्वेषां नित्यं। अन्ये त्वाजन्माष्टम्यादावपि तदुपासकानामेवेति नित्यतां वाक्कुठको वारयितेत्याहुः। अत्र विशेषो हेमाद्रावगस्त्यसंहितायां। आचार्यं चैव संपूज्य वृणुयात्प्रार्थयन्निशि। श्रीरामप्रतिमादानं करिष्येऽहं द्विजोत्तम॥ भक्त्याचार्यो भवशातोः श्रीरामोऽसि त्वमेव च। तथा स्वगृहे चोत्तरे देशे दानस्यालं मंडपं। शंखचक्रहनूमद्भिः प्राग्द्वारे समलंकृतं। गरुत्मच्छार्ङ्गबाणैश्च दक्षिणे समलंकृतं। गदाखड्गांगदैश्चैव पश्चिमे तु विभूषितं। पद्मस्वस्तिकनीलैश्च कौबेरे समलंकृतं। मध्ये हस्तचतुष्काढ्यं वेदिकायुक्तमापतें॥ ततः संकल्पयेद्देवं राममेव स्मरन्मुने। अस्यां रामनवम्यां च रामाराधनतत्परः। उपोष्याष्टसु यामेषु पूजयित्वा यथाविधि। इमां स्वर्णमयीं रामप्रतिमां च प्रयत्नतः। श्रीरामप्रीतये दास्ये रामभक्ताय धीमते। प्रीतो रामो हरत्वाशु पापानि सुबहूनि मे। अनेकजन्मसंसिद्धान्यभ्यस्तानि महांति च॥ ततः स्वर्णमयीं रामप्रतिमां पलमानतः। निर्मितां द्विभुजां दिव्यां वामांकस्थितजानकीं। बिभ्र

तीदक्षिणाकरेज्ञानमुद्रांमहामुने।वामेनाधःकरेणाराद्देवीमालिंग्यसंस्थितां॥सिंहासनेराजतेत्रपलद्वयविनिर्मिते।
तथा।अशक्तोयोमहाभागसत्तुवित्तानुसारतः।फलेनार्द्धतदर्द्धार्द्धतदर्द्धार्द्धेनवामुने।सौवर्णंराजतंवापिकारयेद्रघु
नंदनं।पार्श्वेभरतशत्रुघ्नौधृतछत्रकरावुभौ।चापद्वयसमायुक्तंलक्ष्मणंवा।पिकारयेत।दक्षिणांगेदशरथंपुत्रवीक्ष
णतत्परं।मातुरं।कगतंराम।मिंद्रनीलसमप्रभं।पंचामृतस्नानपूर्वंसंपूज्यविधिवत्ततः।कौशल्यामंत्रास्त्का।रामस्य
जननीचा।सिरामरूपमिदंजगत।अतस्त्वांपूजयिष्यामिलोकमातर्नमोस्तुते।नमोदशरथायेतिपूजयेत्सि
तरंततः।अत्रदशावरणपचावरणादिपूजान्यत्रज्ञेया।अशोककुंकुमैर्युक्तंमंर्घंदद्याद्विचक्षणः।दशाननवधा
र्थायधर्मसंस्थापनायच।राक्षसानांविनाशायदैत्यानांनिधनायच।परित्राणायसाधूनांजातोरामःस्वयंह
रिः।गृहाणार्घ्यंमयादत्तंभ्रातृभिःसहितोनघ।पुष्पांजलिंपुनर्दत्वायामेयामेप्रपूजयेत।दिवैवंविधिवत्कृत्वारा
त्रौजागरणंततः।ततःप्रातःसमुत्थायस्नानसंध्यादिकाःक्रियाः।समाप्यविधिवद्रामंपूजयेद्विधिवन्मुने।ततो
होमंप्रकुर्वीतमूलमंत्रेणमंत्रवित।पूर्वोक्तपद्मकुंडेवास्थंडिलेवासमाहितः।लौकिकाग्नौ।विधानेनशतमष्टोत्त
रंततः।साज्येनपायसेनैवस्मरन्राममनन्यधीः।ततोभक्त्यासंतोष्यआचार्यंपूजयेन्मुने।ततोरामंस्मरन्दद्यादेवं

मंत्रमुदीरयेत्।इमांस्वर्णमयींरामप्रतिमांसमलंकृतां।चित्रवस्त्रयुगछन्नांरामोहंराघवायते।श्रीरामप्रीतयेदास्येतुष्टोभवतुराघवः।इतिदत्वाविधानेनदद्याद्वैदक्षिणांमुदं।ब्रह्महत्यादिपापेभ्योमुच्यतेनात्रसंशयइति।इयंमलमासेनकार्या।तज्जन्ममप्यजन्मंस्यान्नोपवासःकृतोभवेदिति।नकुर्यान्मलमासेपिमहादानंव्रतानिचेतिमाधवीयेसंग्रहवचनात्।ननुरामनवमीव्रतस्यनित्यत्वादेकादशीवन्मलमासेपिकर्त्तव्यतास्यादितिचेत्।अत्रब्रूमः।नैकादश्युपवासस्यव्रतत्वेनप्राप्तिः।एकादश्यांनभुंजीतपक्षयोरुभयोरपीतिनिषेधस्यमलमासेपिपालनीयत्वात्।कृष्णैकादश्यांपुत्रवद्गृहिणांश्राद्धार्थोपवासाः प्रसज्यते।नाविहितत्वादितिव्रतत्वेनप्राप्तिर्वाच्या।साचनिषिद्धेत्यप्रसंगः।स्पष्टमासविशेषाख्याविहितंवर्जयेन्मलेइतिनिषेधाच्चजन्माष्टम्यादावपिबोद्धव्यं॥इतिरामनवमी॥ चैत्रशुक्लैकादश्यांदोलोत्सवउक्तोब्राह्मे।चैत्रमासस्यशुक्लायामेकादश्यांतुवैष्णवैः।आंदोलनीयोदेवेशःसलक्ष्मीकोमहोत्सवैरिति।चैत्रशुक्लद्वादश्यांदमनोत्सवः।द्वादश्यांचैत्रमासस्यशुक्लायांदमनोत्सवः।बोधायनादिभिःप्रोक्तःकर्त्तव्यःप्रतिवत्सरमिति।रामार्चनचंद्रिकोक्तेः।ऊर्ज्जेव्रतंमधौदोलाश्रावणेतंतुपूजनं।चैत्रेचदमनारोपमकुर्वाणोव्रजत्यधः।इतितत्रैवपाद्मवचनाच्च।शिवभक्तादिभिस्तुचतुर्दश्यादौकार्यं।तत्रस्यात्स्वीयतिथि

पुषद्गृह्णादिदंमनार्प्पणमितितत्रैवोक्तेः॥ तिथ्यथस्तावह्निर्विरंच्योगिरिजागणेशफणीविशाखोदिनकृन्महेशः॥ दु
र्गांतकोविश्वहरीस्मरश्चशर्वःशचीचेतितिथीषुपूज्याः॥ इत्युक्ताः। अथागमोक्तदीक्षावतोदमनारोपणविधिः
रामार्चनचंद्रिकोक्तः॥ तत्रैकादश्यां॥ क्रियालोपविधानार्थंयत्त्वयाविहितंप्रभो॥ नमेविघ्नोभवेदत्रकुरुनाथद
यांमयि। सर्वथासर्वदाविघ्नोममत्वंपरमागतिः॥ उपवासेनलीदेवतोषयामिजगत्पते। कामक्रोधादयोयेते
नमेस्तुव्रतघातकाः॥ अद्यप्रभृतिदेवेशयावद्वैशेषिकंदिनं। तावद्रक्षात्वयाकार्यासर्वस्यास्यजगत्पते। इतिदे
वंसंप्रार्थ्यदमनमारायपंचगव्येनप्रोक्ष्यवारिणामस्त्राल्याशोकमूलेदेवाग्रेच। अशोकायनमस्तुभ्यंकामस्त्रीशो
कनाशकाशोकार्त्तंहर। मेनित्यमानंदंजनयस्वमे। इत्यशोकंत्तुघादिकालपर्यंतः कालरूपीमहाबलः॥ कलतेचैव
यःसर्वस्मिन्कालात्मनेनमः॥ इतिकालं। वसंतायनमस्तुभ्यंवृक्षगुल्मलताश्रय। सहस्रमुखसंवासकामरूपनमो
स्तुते। इतिवसंतं। कामभस्मसमुद्भूतरतिबाष्पपरिप्लुत। ऋषिगंधर्वदेवादिविमोहकनमोस्तुते। इतिदमनंचसं
पूज्य। नमोस्तुपंचबाणायजगदाह्लादकारिणे। मन्मथायजगन्नेत्रेरतिप्रीतिप्रियायते। इतिस्मरमुपस्थाप्य ॐ
कामायनमः॥ इतिसंपूज्यनिशायांदेवाग्रेपंचवर्णैश्चंदनेनवाष्टदलंकृत्वाबहिश्चतुरस्रंतद्बहिर्वर्तुलत्रयंतद्बहिश्चत

इत्थं कृत्वा तत्र ॐ मंत्रं च संस्थाप्योपरि दमनं पूजयित्वा। पूजार्थं देवदेवस्य विष्णोर्लक्ष्मीपतेः प्रभोः। दमनक त्वमिहागच्छ सांनि
ध्यं कुरु ते नमः। ॐ कामदेवाय नमः। ॐ ह्रीं रत्यै नमः। इत्यावाह्य दिक्षु पूर्वादितः। स्मरशरीराय नमः। अनंगाय नमः।
मन्मथायः। कामायः ह्रीं वसंतसखाय नमः। स्मरायः। इक्षुचापाय· पुष्पबाणायः। इति पूजयित्वा। ॐ तत्स्वरूपाय
विद्महे कामदेवाय धीमहि। तन्नोऽनंगः प्रचोदयात्॥ इत्यष्टोत्तरशतमभिमंत्र्य पूजयित्वा ह्रीं नमः इति पुष्पांजलिं
दत्वा। नमोऽस्तु पंचबाणाय जगदाल्हादकारिणे। मन्मथाय जगन्नेत्रे रतिप्रीतिप्रियाय ते॥ इति नत्वा। आमंत्रितोसि देवे
श पुराणपुरुषोत्तम। प्रातस्त्वां पूजयिष्यामि सांनिध्यं कुरु केशव। सर्वथा सर्वदा विष्णो नमस्तेऽस्तु प्रसीद मे। इति देवं
संप्रार्थ्य पुष्पांजलिं दत्वा अस्त्रेण चक्रमंत्रेण वा रक्षां कुर्यात्। ततः प्रातर्नित्यपूजां कृत्वा पुनर्देवं संपूज्य हृत्वा स
तस्युक्तं दमनमादाय मूलमंत्रं पठित्वा। देवदेव जगन्नाथ वांछितार्थप्रदायक। हृदिस्थान् पूरय मे कामान्मम कामे
श्वरीप्रिय। इदं दमनकं देव गृहाण मदनुग्रहात्। इमां सांवत्सरीं पूजां भगवन्परिपूरय। इति मंत्रांते पुनर्मूलमंत्रे
ण देवे समर्पयेत्। ततोंगदेवताभ्यः स्वस्वमंत्रेण दत्वा समर्पयेत्। मणिविद्रुममालाभिर्मंदारकुसुमादिभिः। इ
यं सांवताभ्यः स्वस्वमं हडध्वज। वनमालां यथा विष्णो कौस्तुभं सततं हृदि। तद्वद्दामनकीं मालां पूजां च हृदये वह।

रामः

आनताज्ञानतावापिमेकृतंपत्रवार्चनं॥ तत्सर्वंपूर्णतांयातुत्वत्प्रसादाद्रमापते॥ जितंतेपुंडरीकाक्षनमस्तेविश्वभा
वन॥ नमस्तेस्तुहृषीकेशमहापुरुषपूर्वज॥ मंत्रहीनमितिचसंप्रार्थ्यपंचोपचारैःपुनःसंपूज्यनीराज्यपारयेदि
ति॥ दीक्षारहितानांतुनाम्नैवसमर्पणं॥ अत्रचतुर्दशीमतंतंत्रीकृस्यपारणाहोग्राह्यं॥ पारणाहेनलभ्येतद्वाद
शीघटिकापिचेत्॥ तदात्रयोदश्यांस्वापवित्रदमनार्पणेरितितत्रैवोक्तेः॥ गौणोपिकालउक्तस्तत्रैवाहरौनदमना
रोपःस्यान्मध्येविघ्नतोयदि॥ वैशाखेश्रावणेवापितत्तिथौस्यात्तद्दर्पणमिति॥ श्रावणेवापिशुक्लास्तेकर्तव्यमितिनार
दइतिपाठांतरं॥ इदंचमलमासेनकार्यं॥ उपाकर्मोत्सर्जनंचपवित्रदमनार्पणमितिकालादर्शेमलमासवर्ज्येषुपरिग
णनात्॥ उपाकर्मचतुर्थ्यंचकार्यंपर्वोस्यवतथा॥ उत्तरेनिपतेत्कुर्यात्पूर्वेतत्रिःफलभवेत्इतिमाधवीयेप्रजापतिवचना
त्॥ शुक्लास्तादौतुकार्यमेव॥ पूर्वोक्तवचनात्॥ उपाकर्मोत्सर्जनंचपवित्रदमनार्पणं॥ ईशानस्यबलिंविष्णोःशयनंप
रिवर्तनं॥ कुर्याच्छुक्रस्यचगुरोर्मौढ्येपीतिविनिश्चयइतिज्योतिर्निबंधेवृद्धगार्ग्यवचनाच्च॥ इतिदमनारोपः॥ चैत्र
शुक्लत्रयोदश्यामनंगव्रतं॥ हेमाद्रौभविष्ये॥ चैत्रोत्सवेसकललोकमनोनिवासेकामंत्रयोदशतिथौचवसंतयुक्तं॥ प
त्न्यासहार्च्यपुरुषप्रवरोथयोषित्सौभाग्यरूपसुतसौख्ययुतःसदास्यात्॥ तत्रसापूर्वाग्राह्या॥ त्रयोदशतिथिःसितर

तिदीपिकोक्तेः। चैत्रशुक्लचतुर्द्दशी पूर्वाग्राह्या। मधोः श्रावणमासस्य या च शुक्ला चतुर्द्दशी। सा रात्रिव्यापिनी ग्राह्या नान्या शुक्ला कदाचनेति हेमाद्रौ। बोधायनोक्तेः। परापूर्वाह्णव्यापिनीति पाठे वा। अत्र केचिद्यथाश्रुतमेव वर्णयंति। निशिभ्रमंति भूतानि शक्तयः शूलभृद्यतः। अतस्तत्र चतुर्द्दश्यां तस्यां तत्पूजनं भवेत्। इति ब्रह्मवैवर्तात्। हेमाद्रिमाधवादिलिखनमप्येवं। संप्रदायविदस्त्वाहुः। चतुर्द्दशी तु कर्त्तव्या त्रयोदश्यायुता विभो। इति स्कांदमुत्सर्गः। तदपवादश्च। तृतीयैकादशी षष्ठी शुक्लपक्षे चतुर्द्दशी। पूर्वविद्धा न कर्त्तव्या कर्त्तव्या परसंयुतेति नारदीयवचनं। तदपवादश्च। मधोः श्रावणमासस्येति। तत्रापवादाभावे पुनरुत्सर्गस्य स्थितिरिति न्यायेन पूर्वविद्धैव ग्राह्येति। सिध्यति। ब्रह्मवैवर्त्ते तु सामान्यरूपमन्यत्र सावकाशमिति। तेन पूर्वदिने मुहूर्त्तत्रयवेधे पूर्वा अन्यथोत्तरेति। चैत्रपूर्णिमा सामान्यनिर्णयात्सैव। अत्र विशेषो निर्णयामृते विष्णुस्मृतौ। चैत्री चित्रायुता चेत्स्यात्तस्यां चित्रवस्त्रप्रदानेन सौभाग्यमाप्नोतीति। तथा ब्राह्मे। मंदे वार्के गुरौ वापि वारेष्वेतेषु चित्रिका। तत्राश्वमेधकं पुण्यं स्नानश्राद्धादिभिर्लभेदिति। अत्र सर्वदेवानां दमनपूजोक्ता। तत्रैव वायवीये। संवत्सरकृतार्चायाः साफल्याप्यै। विलान्तु एना दमनेनार्चयेच्चैत्र्यां विशेषेण सदाशिवमिति। अत्र स्वीयतिथ्या समुच्चयमाहुः केचित्। स्वीयतिथावकरणे तु दमनपूजनमित्यन्ये। दीक्षितत

एम

दितरविषयत्वेनव्यवस्थेत्यपरे।इयंमन्वादिःपोसाचपूर्वमुक्ता।चैत्रकृष्णत्रयोदश्यांमहावारुणीसंज्ञकोयोगोगौडेषुप्रसिद्धः।तदुक्तंवाचस्पतिकृतौमूलपाठेस्कांदे।वारुणेनसमायुक्तामधौकृष्णात्रयोदशी।गंगायांयदिलभ्येतसूर्यग्रहशतैःसमा॥शनिवारसमायुक्तासामहावारुणीस्मृता।गंगायांयदिलभ्येतसूर्यकोटिग्रहैःसमा।शुभयोगसमायुक्ताशनौशतभिषायदि॥महामहेतिविख्याता।त्रिकोटिकुलमुद्धरेत्।तत्रैवज्योतिषे।चैत्रासितेवारुणऋक्षयुक्तात्रयोदशीसूर्यसुतस्यवारे।योगेशुभेसामहतीमहत्यागंगाजलेर्कग्रहकोटितुल्येति।विष्णुस्थलीसेतौब्रह्मांडपुराणेपि।वारुणेनसमायुक्तामधौकृष्णात्रयोदशी।गंगायांयदिलभ्येतशतसूर्यग्रहैःसमेति।चैत्रकृष्णचतुर्दश्यांविशेषःपृथ्वीचंद्रोदयेपुलस्त्यः।चैत्रकृष्णचतुर्दश्यांयःस्नायाच्छिवसन्निधौ।नप्रेतत्वमवाप्नोतिगंगायांतुविशेषतः।इतिगौडैस्त्वेतदेवशुक्लचतुर्दश्यामित्यवंदेवलीयत्वेनपठितं॥इतिश्रीकमलाकरभट्टकृतेनिर्णयसिंधौचैत्रमासः॥।मेषसंक्रमेप्रागपरादशदशघटिकाःपुण्यकालः।रात्रौतुप्रागुक्तं।अत्रधर्मघटादिदानमुक्तंपृथ्वीचंद्रोदयेपाद्मे।तीर्थेचानुदिनंस्नानंतिलैश्चपितृतर्पणं।दानंधर्मघटादीनांमधुसूदनपूजनं।माधवेमासिकुर्वतमधुसूदनतुष्टिदं।अथवैशाखस्नानमितिसोरमासक्रमः॥अन्यसत्स्नानद्वयमुक्तंतत्रैवपाद्मे।मधुमासस्यशुक्लायामेकादश्यामुपोषितः।

पंचदश्यांचभोवीरमेषसंक्रमणेतुवा।वैशाखस्नाननियमंब्राह्मणानामनुज्ञया॥मधुसूदनमभ्यर्च्यकुर्यात्संकल्पपू
र्वकं।तत्रमंत्रः।वैशाखंसकलंमासंमेषसंक्रमणेरवेः॥प्रातःसनियमःस्नास्येप्रीयतांमधुसूदनः।मधुहंतुःप्रसादेनब्रा
ह्मणानामनुज्ञया।निर्विघ्नमस्तुमेपुण्यंवैशाखस्नानमन्वहं॥माधवेमेषगेभानौमुरारेमधुसूदन।प्रातःस्नाने
नमेनाथफलदोभवपापहन्निति।तीर्थविशेषोपितत्रैवोक्तः॥मेषसंक्रमणेभानौमाधवेमासियत्नतः।महानद्यांनदी
तीर्थेनदेसरसिनिर्झरे।देवखातेथवास्नायाद्यथाप्राप्तेजलाशये।दीर्घिकाकूपवापीषुनियतात्माहरिंस्मरन्निति।
संकल्पेचतत्तीर्थनामग्राह्यं।अज्ञानेतुविष्णुतीर्थमितिवदेत्।यदानज्ञायतेनामतस्यतीर्थस्यभोद्विजाः।तत्रेत्यु
च्चारणंकार्यंविष्णुतीर्थमिदंत्विति।तीर्थस्यदेवताविष्णुःसर्वत्रापिनसंशयइतितत्रैवोक्तेः।तथान्योपिविशेषस्तत्रै
वपाद्मे।तुलसीकृष्णगौराख्यातयाभ्यर्च्यमधुद्विषं॥विशेषेणतुवैशाखेनरोनारायणोभवेत्।माधवंसकलंमासं
तुलस्यायोर्चयेन्नरः।त्रिसंध्यंमधुहंतारंनास्तितस्यपुनर्भवः।तथा।प्रातःस्नात्वाविधानेनमाधवमाधवप्रियं।योश्वत्थ एम-
मूलमासिंचेत्तोयेनबहुनासदा।कुर्यात्प्रदक्षिणांतंतुसर्वदेवमयंततः॥पितृदेवमनुष्यांश्चतः॥पृयेत्सचराचरं।योश्वत्थम
र्चयेद्देवमुकेनसमंततः।तंतेनतारितंस्यान्नसंशयः।कंडूयपृष्ठतोगोस्तुस्नात्वापिप्पलतर्पणं।कृत्वागोविंदमभ्यर्च्यन

दुर्गतिमवाप्नुयात्॥ तथा॥ एकभक्तमथोनक्तमयाचितमतंद्रितः॥ माधवेमासियःकुर्यात्सलभतेसर्वमीप्सितं॥ वैशाखेविधिनास्नानंदेवनद्यादिकेबहिः॥ हविष्यंब्रह्मचर्यंचभूशय्यानियमस्थितिः॥ व्रतंदानंदमोदेविमधुसूदनपूजनं॥ अपिजन्मसहस्रोत्थंपापंदहतिदारुणं॥ एवंमदनरत्नेस्कांदे॥ प्रपाकार्याचवैशाखेदेवेदेयागलंतिका॥ उपानद्व्यजनछत्रसूक्ष्मवासांसिचंदनं॥ जलपात्राणिदेयानितथापुष्पगृहाणिच॥ पानकानिचचित्राणिद्राक्षारंभाफलान्यपिति॥ घितले॥ ददातियोहिमेषादौसक्तूनंबुघटान्वितान्॥ पितॄनुद्दिश्यविप्रेभ्यःसर्वपापैःप्रमुच्यते॥ तथा॥ वैशाखेयोघटंपूर्णंसभोज्यंवैद्विजन्मने॥ ददातिसुरराजेंद्रसयातिपरमांगतिं॥ एवंसंपूर्णस्नानाशक्तोत्र्यहंवास्नायात्॥ तदुक्तंतत्रैवपाद्मे॥ त्रयोदश्यांचतुर्दश्यांवैशाख्यांवादिनत्रयं॥ अपिसम्यग्विधानेननारीवापुरुषोपिवा॥ प्रातःस्नातःसनियमःसर्वपापैःप्रमुच्यते॥ यदातुवैशाखोमलमासोभवति॥ तदातत्रकाम्यस्नानंसमाप्तिनिषेधात्मासद्वयेस्नानेतन्नियमाश्चकर्तव्याः॥ मासोपवासचांद्रायणमदितमलमासएमापयेत॥ तदुक्तंदीपिकायां॥ नियतत्रिंशद्दिनसाध्यशुभेमास्यारंभसमापयेतमलिनेमासोपवासव्रतमिति॥ अत्रदानविशेषउक्तोपराकेवामनपुराणे॥ गंधाश्चमाल्यानितथावैशाखेसुरभीणिचादेयानिद्विजमुख्येभ्योमधुसूदनतुष्टये॥ एवंस्नानेकृतेतस्योद्यापनंकार्यं॥ तदुक्तंतत्रैव॥ मासमेवंबहिः

स्नात्वानद्यादौविमलेजले।एकादश्यांचद्वादश्यांपौर्णमास्यामथापिवा।उपोष्यनियतोमत्वाकुर्यादुद्यापनंबुधः।मंडपंकारयेद्दौकलशंतत्रविन्यसेत्।निष्केणवातदर्द्धेनतदर्द्धार्द्धेनवापुनः।शक्त्यावाकारयेद्देवंसौवर्णंलक्षणान्वितं।लक्ष्मीयुतंजगन्नाथंपूजयेदासनेबुधः।भूषणैश्चंदनैःपुष्पैर्दपनैवेद्यसंचयैः।एवंसंपूज्यविधिवद्रात्रौजागरणंचरेत्।श्वोभूतेकृत्लमेचोष्यग्रहवेद्यांग्रहान्यजेत्।होमंकुर्यात्प्रयत्नेनपायसेनविचक्षणः।तिलाज्येनयवैर्वापिसर्वैर्वापिस्वशक्तितः।अष्टोत्तरसहस्रंवाअष्टोनविचक्षणः।तिलाज्येनयवैर्वापिसर्वैर्वापिस्वशक्तितः।अष्टोत्तरसहस्रंवाअष्टोत्तरशतंतुवा।एतद्विष्णुरनेनैवइदंविष्णुरनेनवा।व्रतसंपूर्त्तिसिद्ध्यर्थंधेनुमेकांपयस्विनी।पादुकोपानहौछत्रंगुरवेब्यजनंतथा।शय्यांसोपस्करांदद्याद्दीपिकांदर्पणंतथा।ब्राह्मणान्भोजयेत्त्रिंशत्तेभ्योदद्याच्चदक्षिणां।कलशान्जलसंपूर्णांस्तेभ्योदद्याद्यथावास्वया।एवंकृतेमाधवस्यउद्यापनविधौशुभे।फलमाप्नोतिसकलंविष्णुसायुज्यमाप्नुयात्।एतावत्यशक्तौतत्रैवोक्तं।वैशाख्यांविधिनास्नात्वाभोजयेद्ब्राह्मणान्दश।कृशरसर्वपापेभ्योमुच्यतेनात्रसंशयइति।वैशाखशुक्लतृतीयाअक्षय्यतृतीयोच्यते।सापूर्वाह्णव्यापिनीग्राह्या।दिनद्वयेपितद्व्याप्तौपरैव।तदुक्तंनिर्णयामृते।नारदीये।वैशाखेशुक्लपक्षेतुतृतीयारोहिणीयुता।दुर्लभाबुधवारेण·

सोमेनापियुतातथा।रोहिणीबुधयुक्तापिपूर्वविद्धाविवर्जिता।अज्ञयाकृतापिमांधातःपुण्यंहंतिपुराकृतं।गौरीविनायको
पेता।रोहिणीबुधसंयुता।विनापिरोहिणीयोगात्सुलयकोटिप्रदासदेति।इयंयुगादिर्ये।साचोक्तारत्नमालायां।माघेपंचद
शीकृष्णानभस्येचत्रयोदशीतृतीयामाधवेशुक्लानवम्यूर्जेयुगादयः।इति।यत्तुगौडाः।माघस्यपूर्णिमायांतुघोरंक
लियुगंस्मृतमितिब्राह्मोक्तेः।वैशाखमासस्यसितातृतीयानवम्यसौकार्त्तिकशुक्लपक्षे।नभस्यमासस्यतमिस्रपक्षे
त्रयोदशीपंचदशीचमाघेइतिविष्णुपुराणे।चकारेणतमिस्रपक्षानुषंगेपिपूर्वानुरोधात्पूर्णिमास्येवज्ञेया।द्वेशुक्ले
इत्यादिकंतुनिर्मूलमित्याहुः।तन्न।तन्ना।दर्शेतुमाघमासस्यप्रवृत्तंद्वापरंयुगं।इतिभविष्यविष्यविरोधात्।एतेनब्राह्मा
नुसारात्।पूर्णिमायामेवयुगादिश्राद्धंवदन्शूलपाणिःपरास्तः।तेनकल्पभेदाद्व्यवस्थेतितत्त्वं।एतेनकार्त्तिके
नवमीशुक्लामाघमासेचपौर्णिमेतिभारदीयंव्याख्यानं।निर्मूलत्वोक्तिर्नारदीयाज्ञानकृता।अत्रश्राद्धमुक्तंमा
त्स्ये।कृतंश्राद्धंविधानेनमन्वादिषुयुगादिषु।हायनानिद्विसाहस्रंपितॄणांतृप्तिदंभवेदिति।भारतेपि।यामन्वाद्या
युगाद्यास्तिथयस्तासुमानवः।स्नात्वाहुत्वादत्वाचजप्त्वानंतफलंलभेदिति।श्राद्धेपूर्वाह्णव्यापिनीग्राह्या॥पूर्वा
ह्णेतुसदाकार्याःशुक्लामनुयुगादयः॥दैवेकर्मणिपि।त्र्यचकृष्णेचैवापराह्णिकाइतिपाद्मोक्तेः।द्वेशुक्लेद्वेतथाकृ

ह्ने युगादौ कवयो विदुः। शुक्ले पूर्वाह्णिके ग्राह्ये कृष्णे चैवापराह्णिके इति हेमाद्रौ नारदीयवचनाच्चादीपिकापि। त्र्ययो युगा
दिमन्वादिकर्मेति अथ यः पूर्वाह्णिकाः स्युः सिते विके याश्चापराह्णिका स्युर्बहुले इति। स्मृत्यर्थसारेपि युगादिमन्वादिश्राद्धेषु
शुक्लपक्षे उदयव्यापिनी तिथिर्ग्राह्या। कृष्णपक्षे पराह्णव्यापिनीति। द्विवोदासीये गोभिलः। वैशाखस्य तृतीयां यः पू
र्वविद्धां करोति वै। हव्यं देवा न गृह्णन्ति कव्यं च पितरस्तथेति। गोभिलः। वैशाखस्य तृतीयां यः पूर्वविद्धां करोति वै॥ हव्यं
देवा न गृह्णन्ति कव्यं च पितरस्तथेति। गोविंदार्णवेप्येवं। तेनेयं पूर्वाह्णव्यापिनी दिनद्वये सत्वे परैवेति धर्मतत्त्वविदो
हेमाद्र्यादयः। अनंतभट्टस्तु सवैधृतिर्व्यतीपातो युगमन्वाद्यस्तथा। सन्मुखाउपवासे स्युर्दानादावंतिमाः। स्मृ
ता इत्याह। दानादाविति श्राद्धसंग्रहः। उपवासस्त्वग्रे वक्ष्यते। यत्तु मार्कंडेयः। शुक्लपक्षस्य पूर्वाह्णे श्राद्धं कुर्याद्विच
क्षणः। कृष्णपक्षापराह्णे तु रौहिणं तु न लंघयेत्। रौहिणो नवमो मुहूर्तः। अत्र च शुक्लपक्षे युगादिश्राद्धं पूर्वाह्णे कार्य
मिति शूलपाणिः। निर्णयामृतादयस्तु कालादर्शे। माघश्राद्धमापराह्णिकमुक्तं। एष मन्वादीनां युगादीनां निर्णयः। यत्तु
कृताद्येषु शुक्लत्वाद्दिवचनं विष्णुपूजादिविषयं। श्राद्धस्यापराह्णिके चेति व्यवस्थां जगदुः। सेयं पूर्वोक्तानेकवचनविरोधात् एमः
पूर्वाह्णे दैविकं कुर्यादित्यादिवचनादेवाप्तेर्द्वैवचनवैयर्थ्याच्च। खद्योतविलसितमित्युपेक्षणीया॥ किंच। कालादर्शे।

क्रिन्यायमूलावचोमूलावानाद्यः। युगादिश्राद्धस्यामाश्राद्धविकृतित्वेनन्यायतोपराह्णव्याप्तावपिवचनेनतस्यबाधात्।
तोल्यः। अतिदेशादेवापराह्णव्याप्तेर्वचनवैयर्थ्यात्। अप्राप्तेशास्त्रमर्थवदितिन्यायात्। तेनयदिकालादर्शोक्तेःक
र्यंचिछद्राज्ञाख्येनसमाविज्ञातंहिंन्यायप्राप्तकल्पपक्षस्तुयुगादिविषयत्वेनसाव्यवस्थापनीयेतिदिक्। अत्रविशेषो
हेमाद्रौभविष्ये। वैशाखेशुक्लपक्षेतुतृतीयायांतथैवच। गंगातोयेनरःस्नात्वामुच्यतेसर्वकिल्बिषैः। तस्यांकार्योय
वैर्होमोयवैर्विष्णुंसमर्चयेत्। यवान्दद्याद्द्विजातिभ्यःप्रयतःप्राशयेद्यवान्। अत्रदानविशेषस्तत्रैवभविष्ये। इमांप्र
कम्प्य। उदकुंभान्सकलकान्सान्नान्सर्वरसैःसह। यवगोधूमचणकान्सक्तुदध्योदनंतथा। ग्रैष्मिकंसर्वमेवात्र
सस्यंदानेप्रशस्यतेइति। देवीपुराणेपि। तृतीयायांतुवैशाखेरोहिण्यृक्षेप्रपूज्यच। उदकुंभप्रदानेन। शिवलोके
महीयते। मंत्रस्तु। एषधर्मघटोदत्तोब्रह्मविष्णुशिवात्मकः। अस्यप्रदानात्तृप्यंतुपितरोपिपितामहाः। गंधो
दकतिलैर्मिश्रंसान्नंकुंभंफलान्वितं। पितृभ्यःसंप्रदास्यामिअक्षय्यमुपतिष्ठतु। अत्रचपिंडरहितंश्राद्धंकुर्यात्।
अयनद्वितयेश्राद्धंविषुवद्द्वितयेतथा। युगादिषुचसर्वासुपिंडनिर्वपणादृते। इतिहेमाद्रौपुलस्त्यवचनात्। अत्र
रात्रिभोजनेप्रायश्चित्तमृग्विधाने। रात्रौभुंक्तेवत्सरेतुमन्वादिषुयुगादिषु। अभित्वावृषभिमंत्रंचजपेद्दशनपातकेइति। अ

परार्कैयमः।कृतोपवासःसलिलंयेयुगादिदिनेषुचादास्यंत्यन्नादिसहितंतेषांलोकामहोदयाः।इति।वैशाखेमलमासेसतितत्
त्रैवयुगादिःकार्या।तथाचहेमाद्रौऋष्यशृंगः।दशहरासुनोत्कर्षश्चतुर्थ्यपियुगादिषु।उपाकर्मणिचोत्सर्गेस्येतदिष्टंवृषादि
तः।इतिएतद्दशहरादिकंवृषादिसंक्रमेदृष्टं।कन्याचंद्रेहृषेरवावित्यादिचोक्तं।कालादर्शेपि।अह्नोरुक्तंभमन्वादिमहा
लययुगादिष्विति मलमासकर्तव्येषुपरिगणनाच्च।महालयशब्देनमघात्रयोदश्युच्यते।इतिमाधवः।स्मार्तचंद्रि
कायांतुमासद्वयेकर्तव्यमित्युक्तं।युगादिकंमासिकंचश्राद्धंचापरपक्षिकं।मन्वादिकंतैर्थिकंचकुर्यान्मासद्वयेपि
चेति।अपरपक्षःकृष्णपक्षः।ननुमहालयः।तस्यतत्रनिषेधात्।मदनरत्नेपिमरीचिः।प्रतिमा।संमृताहेचश्राद्धंयत्प्र
तिवत्सरं।मन्वादौचयुगादौचतन्मासोरुभयोरपीति प्रतिवत्सरं।किंप्रमाणंकल्पादिश्राद्धमितिसएवव्याचख्ये।
अत्रश्राद्धाकरणेप्रायश्चित्तमुक्तंऋग्विधाने।नयस्यद्यावामंत्रंचशतवारंतदाजपेत्।युगादयोयदान्यूनाःकुरुतेनैव
वापियः।इति।अत्रसमुद्रेस्नानंप्रशस्तं।तदुक्तंपृथ्वीचंद्रोदयेसौरपुराणे।युगादौतुनरःस्नात्वाविधिवल्लवणोदधौ।गो
सहस्रप्रदानस्यकुरुक्षेत्रेफलंलभेत्।तत्फलंलभतेमर्त्योभूमिदानस्यचाक्षयमिति।अयंनिर्णयःसर्वयुगादिषुबो
द्धव्यः।इतियुगादिनिर्णयः।इयमेववर्त्तीयापरशुरामजयंती।साप्रदोषव्यापिनीग्राह्या।तदुक्तंभार्गवार्चनदीपिकायां

अन्नैवमोद्भवतारदस्कंदे कल्पतरौ॥ अष्टाविंशतिमे प्राप्ते विष्णुः कलियुगे सति॥ आस्यो निविष्ट धर्मांश्च बुद्धो भूत्वा प्रवर्तयेत्॥ तत्र पूज्यो भविष्योऽसौ पुष्पाद्यैर्दिवसत्रयमिति॥ ×६

स्कंदे संभविष्यं योगं वैशाखस्य सिते पक्षे तृतीयायां पुनर्वसौ॥ निशायाः प्रथमे यामे रामाख्यः समये हरिः। स्वोच्चगैः षड्ग्रहैर्युक्ते मिथुने राहुसंस्थिते। रेणुकायास्तु यो गर्भादवतीर्णो हरिः स्वयंमिति। दिनद्वयेपि तद्व्याप्तावंशतः समव्याप्तौ च परा। अन्यथा पूर्वैवा तदुक्तं तत्रैव भविष्ये। शुक्लातृतीया वैशाखे शुद्धो यो व्याप्य दिनद्वये। निशायां पूर्वयामे चेद्ग्राह्यान्यत्र पूर्विकेति। वैशाखशुक्लसप्तम्यां गंगोत्पत्तिः। तदुक्तं पृथ्वीचंद्रोदये ब्राह्मे। वैशाखशुक्लसप्तम्यां जह्नुना जाह्नवी पुरा। क्रोधात्पीता पुनस्त्यक्ता कर्णरंध्रात्तु दक्षिणात्। तां तत्र पूजयेद्देवीं गंगां गगनमेखलामिति। अत्र शिष्टाचारान्मध्याह्नव्यापिनी ग्राह्या दिनद्वये तद्व्याप्तावेकदेशव्याप्तौ वा पूर्वा। युग्मवाक्यात्। वैशाखशुक्लद्वादश्यां योगविशेषो हेमाद्रौ ज्योतिःशास्त्रे। पंचाननस्थो। गुरुभूमिपुत्रौ मेषे रविः स्याद्यदि शुक्लपक्षे। पाशाभिधाना करभेण युक्ता तिथिर्व्यतीपात इतीह योगः। अस्मिन् कगोभूमिहिरण्यवस्त्रदानेन सर्वं परिहाय पापं। सुरत्वमिंद्रत्वमनामयत्वं मर्त्याधिपत्यं लभते मनुष्य इति। पंचाननः सिंहः। पाशाभिधाना तिथिर्द्वादशी। करभो हस्तः। वैशाखशुक्लचतुर्दशी नृसिंहजयंती। सा प्रदोषव्यापिनी ग्राह्या। तदुक्तं हेमाद्रौ नृसिंहपुराणे। [illegible]। वैशाखे शुक्लपक्षे च चतुर्दश्यां निशामुखे। मज्जन्मसंभवं पुण्यं व्रतं पापप्रणाशनं। वर्षे वर्षे तु क

५५

र्तव्यं ममसंतुष्टिकारणं ॥ इति ॥ दिनद्वये च तद्व्याप्तावंशतः समव्याप्तौ च परा विषमव्याप्तौ त्वधिकव्याप्तिमती ॥ दिनद्वयेप्यव्या
प्तौ परा ॥ परदिने गौणव्याप्तेः ॥ स्वातपूर्वदिने च तदभावात् ॥ यत्तु ततो मध्याह्नवेलायां नद्यादौ विमले जले ॥ इति उपक्रम्य
परिधाय ततो वासो व्रतकर्म समारभेत् ॥ इति तत्रैवोक्तं ॥ तत्संकल्परूपव्रतोपक्रमविषयं ॥ न त्वेतावता मध्याह्नव्यापिनी
ग्राह्येति भ्रमितव्यं ॥ पूर्वोक्तवचनविरोधात् ॥ वैशाखस्य च शुक्लायां चतुर्दश्यां सोमवारेऽनिलर्क्षके ॥ अवतारो नृसिंहस्य प्रदोषसमये द्वि
जाः ॥ इति ठोडरानंदे स्कांदात् ॥ कूर्मः सिंहो बौधकल्की च सायमिति पूर्वोक्तपुराणसमुच्चयाच्च ॥ केचित्तु हेमाद्रिवशात् मध्याह्न
व्यापिनीमाहुः ॥ इयमेव योगविशेषेणातिप्रशस्ता ॥ तदुक्तं ॥ तत्रैव ॥ स्वातीनक्षत्रयोगे च शनिवारे तु मद्व्रतं ॥ सिद्धियोगस्य
संयोगे वणिजे करणे तथा ॥ पुंसां सौभाग्ययोगेन लभ्यते दैवयोगतः ॥ तथा ॥ एभिर्योगैर्विनाप्यस्यान्मद्दिनं पापनाश
नं ॥ तथा ॥ सर्वेषामेव वर्णानामधिकारोस्ति मद्व्रते ॥ मद्भक्तैस्तु विशेषेण कर्तव्यं मत्परायणैः ॥ तथा ॥ सिंहः स्वर्णमयो
देयो मम संतोषकारकः ॥ तथा ॥ विज्ञाय मद्दिनं यस्तु लंघयेत्स पापकृन्नरः ॥ स याति नरकं घोरं यावच्चंद्रदिवाकरौ ॥ इदं
च संयोगात् घटकन्यायेन नित्यं काम्यं च ॥ अत्रायं विशेषः ॥ मध्याह्ने मृद्गोमयत इति ॥ मंत्रेणासंकल्पं कृत्वा चार्यं हृला एमः
सायंकाले हेमीं तु तत्र मन्मूर्तिं स्थाप्यालस्यास्तथैव च ॥ पलेन वा तदर्द्धेन तदर्द्धार्द्धेन वा पुनः ॥ यथाशक्ति तथा कुर्या

द्वित्तशाठ्यविवर्ज्जित इत्युक्तं। नृसिंहमूर्त्तिं शक्त्या कृतं सुवर्णसिंहं च कलशोपरि संपूज्य रात्रौ जागरणं कृत्वा प्रातः पुनः सं
पूज्य। नृसिंहाच्युत देवेश लक्ष्मीकांत जगत्पते। अनेनार्घ्यप्रदानेन सफलाः स्युर्मनोरथाः॥ इत्याचार्याय दत्वा। मद्वंशे
ये नरा जाता ये जनिष्यंति चापरे। तांस्त्वमुद्धर देवेश दुःसहाद्भवसागरात्। पातकार्णवमग्नस्य व्याधिदुःखाब्धिवारिभिः।
तीव्रैश्च परिभूतस्य महादुःखगतस्य मे। करावलंबनं देहि शेषशायिन्जगत्पते। श्रीनृसिंह रमाकांत भक्तानां भयनाश
न। क्षीरांबुधिनिवासिंस्त्वं चक्रपाणे जनार्द्दन। व्रतेनानेन देवेश भुक्तिमुक्तिप्रदो भवेति प्रार्थयेदिति संक्षेपः। वैशा
खपौर्णमास्यां विशेषः। अपरार्के जाबालिः। घृतान्नमुदकुंभं च वैशाख्यां च विशेषतः। निर्दिश्य धर्मराजाय गोदान
फलमाप्नुयात्। सुवर्णतिलयुक्तैस्तु ब्राह्मणान्सप्त पंच वा। तर्पयेदुदपात्रैस्तु ब्रह्महत्यां व्यपोहति। इति कुंभदा
नमंत्रस्त्वक्षयतृतीयाप्रकरणे उक्तः। भविष्येपि। वैशाखी कार्त्तिकी माघी तिथयोतीव पावनाः। स्नानदानवि
हीनास्ता नेयाः पांडुतां दिना। अत्र कृष्णाजिनदानं कार्यं। तथा च विष्णुः। कृष्णाजिने तिलान्कृत्वा हिरण्यं मधुसर्पि
षी। ददाति यस्तु विप्राय सर्वं तरति दुष्कृतमिति॥ इति श्रीनारायणभट्टसूनुरामकृष्णभट्टात्मजकमलाकरभट्टकृते निर्णय
सिंधौ वैशाखः॥ वृषसंक्रांतौ पूर्वाः षोडशघटिकाः पुण्यकालः। रात्रौ संक्रमे सति प्रागेवोक्तं। ज्येष्ठशुक्लतृतीयायां रंभाव्रतमु

क्रंमाधवीये भविष्ये।भद्रेकुरुष्वयत्नेनरंभाख्यंव्रतमुत्तमं।ज्येष्ठशुक्लतृतीयायांस्नाता।नियमतत्परेति।सापूर्वविद्धाग्राह्या
।बृहत्तपातथारंभासावित्रीवटपैतृकी।कृष्णाष्टमीचभूताचकर्तव्यासन्मुखीतिथिरितिस्कांदोक्तेः।ज्येष्ठशुक्लदश
मीदशहरा।तदुक्तंहेमाद्रौ।ब्राह्मे।ज्येष्ठेमासेसितेपक्षेदशमीहस्तसंयुता।हरतेदशपापानितस्माद्दशहरास्मृतेति
वाराहेपि।दशमीशुक्लपक्षेतुज्येष्ठेमासिकुजेहनि।अवतीर्णायतःस्वर्गाद्धस्तर्क्षेसरितांवरा।हरतेदशपापानित
स्माद्दशहरास्मृतेति।स्कांदेतुसादशयोगाउक्ताः।तथा।ज्येष्ठेमासिसितेपक्षेदशम्यांबुधहस्तयोः।व्यतीपातेऽगरा
नंदेकन्याचंद्रेवृषेरवौ।दशयोगेनरःस्नात्वासर्वपापैःप्रमुच्यतेऽइति।अत्रबुधभौमयोःकल्पभेदेनव्यवस्था।इयंच
पंचैवयोगबाहुल्यंसेव्यात्वद्य।।योगाधिक्येफलबाहुल्यात्।ज्येष्ठेमलमासेसतितत्रैवदशहराकार्या।दशहरासुनो
त्कर्षश्चतुर्ष्वपियुगादिषु।इतिहेमाद्रावृष्यशृंगोक्तेः।तथास्कांदे।यांकांचित्सरितंप्राप्यदद्याद्दर्भतिलोदकं।मुच्यतेद
शभिःपापैःसमहापातकोपमैः।अत्रविशेषःकाशीखंडे।ज्येष्ठेमासिसितेपक्षेप्राप्यप्रतिपदंतिथिं।दशाश्वमेधिके
स्नात्वामुच्यतेसर्वपातकैः।एवंसर्वास्तुतिथिषुक्रमस्नायीनरोत्तमः।आशुक्लपक्षदशमीप्रतिजन्माघमुत्सृजेत।तथा एमः
लिंगंदशाश्वमेधेशंदृष्ट्वादशहरातिथौ।दशजन्मार्जितैःपापैस्त्यज्यतेनात्रसंशयः।तथाभविष्योत्तरकाशीखंडयोः।निशा

यां जागरं कृत्वा समुपोष्य च भक्तितः। पुष्पैर्गंधैश्च नैवेद्यैः फलैश्च दशसंख्यया। तथा दीपैश्च तांबूलैः पूजयेच्छ्रद्धयान्वितः। स्नात्वा
भक्त्या तु जाह्नव्यां दशकृत्वो विधानतः। दशप्रसृतिकृष्णांश्च तिलान्सर्पिश्च वै जलो सक्तुपिंडान्गुडपिंडान्दद्याच्च दशसंख्य
या। ततो गंगातटे रम्ये हेम्ना रूप्येण वा तथा। गंगायाः प्रतिमां कृत्वा वक्ष्यमाणस्वरूपिणीं॥ संस्थाप्य पूजयेद्देवीं तदला
भे मृदापि वा। अथ तत्राप्यशक्तश्चेल्लिखेत्पिष्टेन वेनु विवक्ष्यमाणेन मंत्रेण कुर्यात्पूजां विशेषतः। नारायणं महेशं
च ब्रह्माणं भास्करं तथा। भगीरथं च नृपतिं हिमवंतं नगेश्वरं। गंधपुष्पाक्षतैः सम्यग्यथाशक्ति प्रपूजयेत्। दशप्रस्थां
स्तिलान्दद्याद्दशविप्रेभ्य एव च। दशप्रस्थान्यवान्दद्याद्दशसंख्यगवीस्तथा। प्रस्थः षोडशपलानि। पलं तु मुष्टिमात्रं। मु
ष्टिमात्रं पलं स्मृतमिति महार्णवे उक्तं। मत्स्यकच्छपमंडूकमकरादिजलेचरान्। कारयित्वा यथाशक्ति स्वर्णेन र
जतेन वा। तदलाभे पिष्टमयानभ्यर्च्य सकुमादिभिः। गंगायां प्रक्षिपेदात्यदीपांश्चैव प्रवाहयेत्। पुष्पाद्यैः पूजयेद्गं
गां मंत्रेणानेन भक्तितः। ॐ नमः शिवायै नारायण्यै दशहरायै गंगायै नमोनमः। इति मंत्रं तु यो मर्त्यो दिने तस्मिन्
दिवानिशं जपेत्स च सहस्राणि दशधर्मफलं लभेत्। काशीखंडे त्वन्यो मंत्र उक्तः। नमः शिवायै प्रथमं नारायण्यै प
दं ततः। दशहरायै पदमिति गंगायै मेत्र एव वै। स्वाहांतः प्रणवादिश्च भवेद्विंशाक्षरो मनुः। पूजा दानं जपो होमो ने

५८

नैवमनुनास्मृतइति। अत्र गंगास्तोत्रपाठमपि दशवारं कुर्यात्। तदुक्तं स्कांदभविष्ययोः। तस्याद्दशम्यामेतच्च स्तोत्रं गंगाजले स्थितः। यः पठेद्दशकृत्वस्तु दरिद्रो वापि चाक्षमः। सोपि तत्फलमाप्नोति गंगां संपूज्य यत्नतः। इति। स्तोत्रं च प्रतिपदादिदशमीपर्यंतं दिनवृद्धिसंख्यया पठनीयमिति शिष्टाः। अत्र च सर्वोपि विस्तरः स्तोत्रादि च भट्टकृतत्रिस्थलीसेतोरवधेयः। विस्तरभीतेस्तन्नालिख्यते। एवं कुर्वतः फलमुक्तं काशीखंडे। एवं कृत्वा विधानेन वित्तशाठ्यविवर्जितः। उपवासीवस्समागोर्दशपापैः प्रमुच्यते। सर्वान्कामानवाप्नोति प्रेत्यब्रह्मणि लीयते। इति च। अस्यां सेतुबंधरामेश्वरस्य प्रतिष्ठादिनत्वाद्विशेषेण पूजा कार्या। तदुक्तं स्कांदे सेतुमाहात्म्ये। ज्येष्ठे मासे सिते पक्षे दशम्यां बुधहस्तयोः। गरानंदे व्यतीपाते कन्याचंद्रे वृषे रवौ। दशयोगे सेतुमध्ये लिंगरूपः स्वयं हरः॥ रामो वै स्थापयामास शिवलिंगमनुत्तममिति। इति दशहरा॥ ज्येष्ठशुक्लैकादशी निर्जला। तत्र निर्जलमुपोष्य विप्रेभ्यो जलकुंभान्दद्यादिति निर्णयामृते उक्तं। मदनरत्ने स्कांदेपि। ज्येष्ठेमासिसितेपक्षेष्या शुक्लैकादशी शुभा। निर्जला समुपोष्यात्र जलकुंभान्सशर्करान्। प्रदाय विप्रमुख्येभ्यो मोदते विष्णुसंनिधौ। ज्येष्ठपौर्णमास्यां सावित्रीव्रतं। तदुक्तं स्कांदभविष्ययोः। ज्येष्ठे मासि सिते पक्षे द्वादश्यां रजनीमुखेत्युपक्रम्य व्रतं त्रिरात्रमुद्दिश्य दिवारात्रिस्थिरा भवेदिति। अंतेप्युपसंहृतं। ज्येष्ठे मासि सिते पक्षे पौर्णमास्यां व्रतं

रामः

याव्रतं। चीर्णं पुरा महाभक्त्या कथितं तं ते मया नृपेति। दाक्षिणात्यास्त्वेतदेवाद्रियंते। एतच्चामावास्यायामप्युक्तं निर्णयामृ
ते भविष्ये। अमायां च तथा ज्येष्ठे वटमूले महासती। त्रिरात्रोपोषिता नारी विधिनानेन पूजयेत्। मदनरत्ने त्विदं वाक्यं पं
चदश्यां तथा ज्येष्ठे इति पठित्वा ज्येष्ठपौर्णमास्यामुक्तं। तथा। अशक्तौ तु त्रयोदश्यां नक्तं कुर्याज्जितेंद्रिया। अयाचि
तं चतुर्दश्याममायां समुपोषणमिति। तत्तु पाश्चात्या आद्रियंते। हेमाद्रिसमयोद्योतादिषु तु भाद्रपदपौर्णमाया
मुक्तं तत्तु नेदानीं प्रचरति। गौडास्तु। मेषे वा वृषभे वापि सावित्रीं तां विनिर्दिशेत्। ज्येष्ठकृष्णचतुर्दश्यां सावित्री
मर्चयंति याः। वटमूले सोपवासा न ता वैधव्यमाप्नुयुरिति। पराशरोक्तेश्च चतुर्दश्यां प्रदोषे व्रतं। दिनद्वये तद्व्याप्तौ
परैवेत्याहुः तन्निर्मूलं। अत्र पूर्णिमामावास्ये पूर्वविद्धे ग्राह्ये। भूतविद्धा न कर्तव्या अमावास्या च पूर्णिमा। व
र्जयित्वा नरश्रेष्ठ सावित्रीव्रतमुत्तममिति। ब्रह्मवैवर्तात्। स्कांदेपि। भूतविद्धा सिनीवाली न तु तत्र व्रतं चरेत्। व
र्जयित्वा तु सावित्रीव्रतं तु शिखिवाहनेति। मदनरत्ने ब्रह्मवैवर्तेपि। प्रतिपत्पंचमी भूतसावित्री वटपूर्णिमा। नव
मी दशमी चैव नोपोष्याः परसंयुताः इति। यदा त्वष्टादशघटिका चतुर्दशी तदा परा ग्राह्या। पूर्वविद्धैव सावित्रीव्रते पं
चदशी तिथिः। नागोष्टादशभूतस्य स्तुश्चेत्तत्परेहनि। इति माधवः। वस्तुतस्तु। भूतोष्टादशनाडीभिर्दूषयत्युत्तरां ति

थिमित्यस्यव्रतांतरेसावकाशत्वात्।विशेषतःप्रवृत्तपूर्वविद्धाविधायकवचनेनतस्यबाधात्दृष्टादशनाडीवेधेपिपूर्वैवेत्ययंप
क्षःसाधुः।किंचाभ्युदितोष्टादशनाडीवेधोव्रतस्नानादिपरएवनतूपवासरूपसावित्रीव्रतपरः।साहिसप्तमुहूर्त्तैस्तुयोगो
यंबाधतेव्रतमितिनिगमोक्तेरितिमाधवेनोक्तं।अतःपूर्वापरविरोधातमाधवोभ्रांतएव।अत्रपौर्णिमानुरोधेनैवयथा
त्रिरात्रसंपत्तिर्भवतितथात्रयोदश्यादिग्राह्या।तस्याःप्रधानत्वात।अयंनिर्णयोमामपिस्तेपः।पारणंतुपौर्णिमांते
कार्यं।अत्रस्त्री।व्रतेषुविशेषःपरिभाषायामुक्तः।अत्रविशेषोभविष्ये।गृहीत्वावालुकांपात्रेप्रस्थमात्रांयुधिष्ठिर।त
तोवंशमयेपात्रेरक्तयुग्मेनवेष्टिते।सावित्रीप्रतिमांकूर्पासैवसंवापिमृन्मयीं।सार्द्धंसत्यवतासार्द्धंफलनैवेद्यदीप
कैः।रजन्याकंठसूत्रैश्चशुभैःकुंकुमकेसरैः।पूजयेदितिशेषः।रजनीहरिद्रा।कंठसूत्रंसौभातेविमलेग्यतंतुः।सावित्र्याः
ख्यानकंचैववाचयीतद्विजोत्तमं।रात्रौजागरणंकृत्वाप्रभातेविमलेततः।तामपिब्राह्मणेदत्वाप्रणिपत्यक्षमापयेत्।मं
त्रस्तु।सावित्रीयंमयादत्तासहिरण्यामहासती।ब्रह्मणःप्रीणनार्थायब्राह्मणप्रतिगृह्यतां।व्रतेनानेनराजेंद्रवैधव्यंना
प्नुयात्क्वचित्।ज्येष्ठपूर्णिमायांविशेषआदित्यपुराणे।ज्येष्ठेमासितिलानदद्यात्पौर्णमास्यांविशेषतः।अश्वमेधस्यय
त्पुण्यंतत्प्राप्नोतिनसंशयः।विष्णुरपि।ज्येष्ठीज्येष्ठायुताचेत्स्यात्तस्यांछत्रोपानत्प्रदानेननरोगणाधिपत्यमाप्नोतीति।हे

एम्नः

माह्रोज्योतिषे। ऐंद्रेगुरुःशशीचैवप्राजापत्येरविस्तथा। पूर्णिमाज्येष्ठमासस्यमहाज्येष्ठीप्रकीर्त्तिता॥ इयंमन्वादिरपि। सापू
र्वाह्णिकीग्राह्या॥ विशेषस्तुचैत्रेउक्तः। तथापरार्केवामनपुराणे। उदकुंभांबुदानंचतालवृंतंसचंदनं। त्रिविक्रमस्य
प्रीत्यर्थंदातव्यंज्येष्ठमासितु॥ इतिभट्टकमलाकरकृतेनिर्णयसिंधौज्येष्ठःसमाप्तः॥ मिथुनसंक्रांतौपरःषोडशघ
टिकाःपुण्यकालः। रात्रौतुप्रागुक्तं। आषाढशुक्लद्वितीयायांरथोत्सवः। तदुक्तंतिथितत्वेस्कांदे। आषाढस्यसितेपक्षेद्वि
तीयापुष्यसंयुता॥ तस्यांरथेसमारोप्यरामंमांभद्रयासह। यात्रोत्सवंप्रकुर्वीतप्रीणयेतद्विजान्बहून्। तथा। ऋक्षाभावे
तिथौकार्यायात्रासाप्रीतयेमम। आषाढशुक्लदशमीपौर्णमासीचमन्वादिः। साचपूर्वाह्णव्यापिनीतिप्रागुक्तं।
आषाढशुक्लद्वादश्यामनुराधारहितायांपारणंकुर्यात। तदुक्तंभविष्ये। आभाका। सितपक्षेषुमैत्रश्रवणरेवती॥
संगमेनहिभोक्तव्यंद्वादशद्वादशीर्हरेत। अस्यार्थः। आषाढभाद्रपदकार्त्तिकशुक्लद्वादशीषुअनुराधाश्रव
णरेवतीयोगेपारणंनकुर्यात। इति। अत्रयद्यप्येतावदेवोक्तं। तथाप्यनुराधाप्रथमपादएववर्ज्यः। तदुक्तंवि
ष्णुधर्मे। मैत्राद्यपादेस्वपितीहविष्णुःपौष्णांत्यपादेप्रतिबोधमेति। श्रुतेश्चमध्येपरिवर्त्तमेतिसुप्तिप्रबोधपरिवर्त्त
नमेववर्ज्यमिति। वस्तुतस्तुपूर्ववचनमिदंनिर्मूलमेव। अत्रैवविष्णुशयनोत्सवउक्तोहेमाद्रौब्राह्मे। एकादश्यांतुशु

क्षायांमाषाढे भगवान्हरिः॥ भुजंगशयने शेते क्षीरार्णवजले सदेति। टोडरानंदेपि स्कांदे। आषाढशुक्लैकादश्यां कुर्यात्स्व
प्नामहोत्सवं अयं द्वादश्यामप्युक्तः। आभाकाद्येषु मासेषु मैत्रश्रवणरेवती। आदिमध्यावसानेषु प्रस्वापावर्तनोत्स
वाः निशि स्वापो दिवा ध्यानं संध्यायां परिवर्तनं। अन्यत्र पादयोगेपि द्वादश्यामेव कारयेत्। आभाकाद्येषु मासेषु मि
थुने माधवस्य च। द्वादश्यां शुक्लपक्षे च प्रस्वापावर्तनोत्सवाः इति भविष्योक्तेः॥ द्वादश्यां संधिसमये नक्षत्राणामसंभवे।
आभाकासितपक्षेषु शयनावर्तनादिकमिति वाराहोक्तेश्च। संध्यायां विष्णु संपूज्य॥ प्रार्थयेत्। तत्र मंत्रः। वासुदेव
जगद्योनेऽप्राप्ते यं द्वादशी तव। भुजंगशयने ह्यो च सुखं स्वपिहि माधव॥ इयं तु द्वादशी देव शयनार्थं विनिर्मिता॥ अ
स्यां सुप्ते जगन्नाथ जगत्सुप्तं भवेदिदं॥ द्वादश्यामित्यत्र पारणाहोमात्रं विवक्षितं। पारणाहे तु पूर्वरात्रे घंटीन्न
वाद्यनुज्ञरिति। मार्चनं चंद्रिकोक्तः। अत्र मलं चिंत्यं। आदित्यपुराणे विष्णुर्दिवा न स्वपिति न च रात्रौ विबुध्यते। द्वादशीऋ
क्षसंयोगे पादयोगे न कारणं। अत्रैकादश्ये द्वादश्यौ देशभेदेन व्यवस्था। इदं च मलमासेन कार्यं। ईशानस्य बलि
र्विष्णोः शयनं परिवर्तनं मिति कालादर्शे निषेधात्। यदपि। एकादश्यां तु गृह्णीयात् संक्रांतौ कर्कटस्य च। आषाढ्यां वा एम
नरो भक्त्या चातुर्मास्यव्रतक्रियामिति हेमाद्रौ ब्रह्मवैवर्ते तदपि मलमासेप्यस्तीति द्रष्टव्यं। मिथुनस्थो यदा भानुरमावा

स्याद्द्वयं स्पृशेत्। द्विराषाढः सविज्ञेयो विष्णुः स्वपिति कर्कटे इति तत्रैव मोहचूलोत्तरोक्तेः। अत्रैव चातुर्मास्यव्रतारंभ उक्तो
भारते। आषाढे तु सिते पक्षे एकादश्यामुपोषितः। चातुर्मास्यव्रतं कुर्याद्यत्किंचिन्नियतो नरः॥ तैरिति। अस्य नित्यत्वं
तत्रैवोक्तं वार्षिकांश्चतुरो मासान्वाहयेत्केनचिन्नरः। व्रते। न नो चेदाप्नोति किल्बिषं वत्सरोद्भवं। असंभवे तुलार्केपि
कर्तव्यं तत्प्रयत्नतः। इति तेनास्याषाढशुक्लैकादश्यां द्वादश्यां पौर्णमास्यां वारंभः। समाप्तिस्तु कार्त्तिकशुक्लद्वादश्यामे
वा तदुक्तं हेमाद्रौ भारते। चतुर्धा गृह्य वै चीर्णं चातुर्मास्यव्रतं नरः। कार्त्तिके शुक्लपक्षे तु द्वादश्यां तत्समापयेत्। अ
स्यारंभस्तु शुक्रास्तादावपि कार्यः। न शैशवं न मौढ्यं च शुक्रगुर्वोर्न वा तिथेः। खंडत्वं चिंतयेच्चादौ चातुर्मास्यविधौ नर इ
तिः हेमाद्रौ वृद्धगार्ग्योक्तेः। आशौचमध्येपि द्वितीयाद्यारंभो भवति। अशुचिर्वा शुचिर्वापि यदि स्त्री यदि वा पुमान्।
व्रतमेतन्नरः कृत्वा मुच्यते सर्वपातकैरिति भार्गवार्चनदीपिकायां स्कांदोक्तेः। आरब्धे सूतकं न स्यादनारब्धे तु सूतक
मिति विष्णुवचनाच्चापत्सु। असंक्रांततथामासं दैवे पित्र्ये च कर्मणि। मालमासमशेषं च वर्ज्जयेन्मतिमान्नरः
इति। हेमाद्रौ चातुर्मास्यव्रतप्रकरणे भविष्यवचनं तत्सूत्रानुमंत्रणमंत्रवद्बसंह्मध्ये पठितमिति ज्ञेयं। अन्यथा
पि अस्य पूर्वोक्तस्य विवाहादेश्च चातुर्मास्यक्तेकः प्रसंगः। प्रकरणानिवेशेपि वा प्रथमारंभविषयं ज्ञेयं। केचि

९० त्तुप्रतिवर्षंचातुर्मास्यप्रयोगाणांभिन्नत्वादाशौचादिपातेद्वितीयादिप्रयोगोनभवत्येवेत्याहुः।तन्न।प्रतिवर्षंचयत्कुर्यादे
वेवंसंस्मरन्हरिं॥देहांतेतिष्ठदीप्तेनविमानेनार्कवर्चसा।मोदतेविष्णुलोकेसौयावदाभूतसंप्लवमितिहेमाद्रौभवि
ष्यवचनादित्यास्तांविस्तारः॥इदंचाशिवभक्तादिभिरपिकार्यं।शिवेवाभक्तिसंयुक्तोमानवोवागणनायके।कृत्वाव्रत
स्यनियमंपयोव्रतफलभाग्भवेतइतिब्रह्मवैवर्त्तात।व्रतग्रहणप्रकारस्तुहेमाद्रौभविष्ये।महापूजांततःकृत्वादेव
वस्यचक्रिणः।जातीकुसुममालाभिर्मंत्रेणानेनपूजयेत।सुप्तेत्वयिजगन्नाथजगत्सुप्तंभवेदिदं।विबुद्धेचविबु
ध्येतप्रसन्नोमेभवाच्युत।एवंतांप्रतिमांविष्णोःपूजयित्वास्वयंनरः।प्रभाषेत्तदग्रेतो।विष्णोःकृतांजलिपुटस्तथा।
चतुरोवार्षिकान्मासान्देवस्योत्थापनावधि।इमंकरिष्येनियमंनिर्विघ्नंकुरुमेच्युत।इदंव्रतंमयादेवगृहीतं
पुरतस्तव।निर्विघ्नंसिद्धिमायातुप्रसादात्तवकेशव॥गृहीतेस्मिन्व्रतेदेवपंचत्वंयदिमेभवेत।तदाभवतुसं
पूर्णंव्रतंप्रसादाज्जनार्दन।गृहीतेस्मिन्व्रतेदेवयद्यपूर्णेम्रियेत्यहं।तन्मेभवतुसंपूर्णंत्वत्प्रसादाज्जनार्दनेति।त
त्रभार्गवार्चनदीपिकायांनृसिंहपरिचर्यायांचभविष्ये।श्रावणेवर्जयेच्छाकंदधिभाद्रेविवर्जयेत।दुग्धमाश्वयुजेमासि रामः
कार्त्तिकेद्विदलंत्यजेतइति।स्कांदेपिचातुर्मास्यकल्पे।चत्वार्येतानिनित्यानिचरताश्रमवर्णिनां।प्रथमेमासिकर्त्तव्यंनि

त्यंशाकव्रतंनरैः॥ द्वितीयेमासिकर्त्तव्यंदधिव्रतमवार्णिनां।प्रथमेमासिकर्त्तव्यंनित्यंशाकव्रतंनरैः।द्वितीयेमासिकर्त्तव्यं
दधिव्रतमनुत्तमं।पयोव्रततृतीयेचचतुर्थेपिनिशामय।द्विदलंबहुबीजंचवृंताकंचविवर्जयेत्।नित्यान्येतानिविप्रे
न्द्रव्रतान्याहुर्मनीषिणः।जंबीरंराजमाषांश्चमूलंरक्तमूलकंरक्तमलकं।कूष्मांडंचेक्षुदंडंचचातुर्मास्येत्यजेद्बुधः।तथा॥
विशेषाद्बदरीधात्रीकूष्मांडंतिंतिणीस्त्यजेत्।जीर्णाधात्रीफलंग्राह्यंकथंचित्कापशोधनमिति।तीर्थसौख्येस्कां
दे।वार्षिकांश्चतुरोमासान्प्रसुप्तेवैजनार्दने।मंचखट्वादिशयनंवर्जयेद्भक्तिमान्नरः।अनृतौवर्जयेद्भार्यांमां
समधुपरौदनं।पटोलंमूलकंचैववृंताकंचनभक्षयेत्।अभक्ष्यंवर्जयेत्पूर्णतमसूरांसितसर्षपं।राजमाषान्।कु
लत्थांश्चआश्चधान्यंचसंत्यजेत्।शाकंदधिपयोमाषान्श्रावणादिषुसंत्यजेत्।अत्रत्यजेदितिवर्जनसंकल्परू
पःपर्युदासोज्ञेयः।व्रतोपक्रमात्।अत्रकेचित्शाकाख्यंपत्रपुष्पादीत्यमरकोशस्यशक्यतेऽशितुमनेनेति
शाकः इतिक्षीरस्वामिव्याख्यानात्।व्यंजनमात्रस्यनिषेधमाचक्षते।अन्येतुशाकशब्दस्यपत्रादिदशविध
शाकेयोगरूढत्वात्।योगाच्चरूढेर्बलीयस्त्वात्सूपादीनामपित्यागंपत्रेश्चतत्प्रत्याचक्षते।तेनामूलपत्रकरीराग्र
फलकांडाधिरूढकाः।त्वक्पुष्पंकवचंचेतिशाकंदशविधंस्मृतं।इतिक्षीरस्वामिनोक्तस्यशाकस्यनिषेधइति।अ

6

६१ विरूढकर्मांकुराः। वस्कतस्कतत्रकालोद्भवाः शाकावर्ज्जनीयाः प्रयत्नतः। बहुबीजमबीजं च विकारि यद्विवर्ज्जयेदिति भविष्य
वचनात्तत्कालोत्पन्नानां दशविधशाकानां निषेधः। अत्र तत्कालोद्भवत्वमात्रं विवक्षितं। तेनातपादिशोषितानां व
र्षीतरोद्भवानामपि निषेधः। अत्र तत्कालोद्भवत्वमात्रं विवक्षितं। न तु तन्मात्रकालोद्भवत्वं गौरवात्। तेनान्यकालो
द्भवानां तत्कालोद्भवानां च बिंबादीनां निषेधः। अत्र तत्कालोद्भवा इति वीप्सावशात्स्वस्वकालोद्भवानां सर्वेषां
निषेध इति निःकर्षः। बहुबीजमित्यनेकबीजमिति केचित्। एतएव यवापेक्षया बीजानि यवा यत्र बहव स्तादित्यन्ये।
अबीजं कदल्यादि। वस्कतस्कत इदं महानिबंधेष्वभावान्निर्मूलमेव। आचारप्रदीपे। इंताकं च कलिंगं च बिल्वो
दुंबराभिसटाः। उदरे यस्य जीर्यंति तस्य दूरतरो हरिः। तथापरार्के देवलः। ब्रह्मचर्यं तथा शौचं सत्यमामिषवर्ज्ज
नं। व्रते ष्वेतानि चत्वारि वरिष्ठानीति निश्चयः। आमिषाणि चोक्तानि रामार्चनचंद्रिकायां। ब्राह्मे। प्राण्यंगचूर्णं
चर्मांबु जंबीरं बीजपूरकं। अयज्ञशिष्टं माषादि यद्विष्णोरनिवेदितं। दग्धमन्नमसूरं च मांसं चेत्यष्टधामिषं। रूच्यंत
तद्देशलभ्यं स्तुष्टदेवे विवर्ज्जयेत्। ब्राह्मे कार्त्तिकमाहात्म्ये। गोछागीमाहिषीभूतादन्यदुग्धादि चामिषं। धान्ये एमः
मसूरिकाः प्रोक्ता अन्नं पर्युषितं तथा। द्विजक्रीता रसाः सर्वे लवणं भूमिजं तथा। ताम्रपात्रस्थितं गव्यं। जलं पल्वल

श्री

संस्थितं। आत्मार्थे पाचितं चार्थं मामिषं तत्स्मृतं बुधैः। तथा।। निष्पावा राजमाषाश्च मसूरं संधितानि च। हंताकं च कलिं
गं च लशुनं देवे विवर्जयेत्। संधितानि लवणशाकादीनि। तत्रैव विष्णुधर्मे। चतुर्ष्वपीह मासेषु हविष्याशी न पापभाक्।
हविष्याणि तु पृथ्वीचंद्रोदये भविष्ये। हैमंतिकं सितास्विन्नं धान्यं मुद्गा यवास्तिलाः। कलायकंगुनीवारा वास्तूकं हि
लमोचिका। षष्टिका कालशाकं च मूलकं केमुकेतरत्। कंदः सैंधवसामुद्रे गव्ये च दधिसर्पिषी। पयोनुद्धृतसारं च
पनसाम्रहरीतकी। पिप्पली जीरकं चैव नागरंगं च तिंतिणी। कदली लवली धात्री फलान्यगुडमैक्षवं। अतैल
पक्वं मुनयो हविष्याणि प्रचक्षते। रतिमदनरत्नेप्येवं तिलस्विन्नमलूष्मपक्वं धान्यं तंडुलाः। केमुकं। केमुन्वार
तिप्राच्येषु प्रसिद्धः। कंदः कलायः स्वल्पसतीनकस्समरः। स्तुत्रुतिप्रसिद्धं धान्यं। आग्रहस्पसंहितायां। हैमंताघुस्का।
नालिकेरफलं चैव कदली लवली तथा। आम्रमामलकं चैव पनसं च हरीतकी। व्रतांतरप्रशस्तं च हविष्यम
न्नं तेन्नधाः। अन्यान्यपि व्रतान्युक्तानि हेमाद्रौ भाद्रौ भविष्ये। स्त्रीवा नरो वा मद्भक्तो धर्मार्थे सुदृढव्रतः। गृह्णीयात्त्रि
यमानेतान्रेतधावनपूर्वकान्। तेषां फलानि वक्ष्यामि तत्कर्तृणां पृथक्पृथक्। मधुस्वरो भवेद्राजन्पुरुषो गुड
वर्ज्जनात्। तैलस्य वर्ज्जनाद्राजन्सुंदरांगः प्रजायते। योगाभ्यासी भवेद्यस्तु स ब्रह्मपदमाप्नुयात्। तांबूलवर्ज्जनाद्

गीक्ष्ककंठश्च जायते। घृतत्यागाच्च लावण्यं सर्वांगस्निग्धतनुर्भवेत्। शाकपत्राशनाद्रोगी अपक्वाहारोऽमलो भवेत्। भूमिप्रस्तरशायी चविप्रो मुनिवरो भवेत्। एकांतरोपवासेन ब्रह्मलोके महीयते। धारणान्नखरोम्णां च गंगास्नानफलं लभेत्। मौनव्रती भवेद्यस्तस्याज्ञा स्खलिता भवेत्। भूमौ भुंक्ते सदा यस्तु स पृथिव्याः पतिर्भवेत्। प्रदक्षिणाशतं यस्तु करोति कृतिपाठकः। हंसयुक्तविमानेन स च विष्णुपुरं व्रजेत्। अयाचितेन प्राप्नोति पुत्रान्धर्म्यान्न शोषतः। षष्टान्नकालभोक्ता यः कल्पस्थायी भवेद्दिवि। पर्णेषु यो नरो भुंक्ते कृच्छ्रस्नेत्रफलं लभेत्। गुडर्जी नरो दद्यात्तद्भृतं ताम्रभाजनं। सहिरण्यंनरपश्रेष्टलवणस्याप्ययं विधिः। सप्रेद्वेत यो विष्णोः शिवस्याग्रणामर्चयेत्। पंचवर्णैस्तु यो नित्यं स्वस्तिकैः पद्मकैस्तथा। स याति रुद्रलोकं हि गाणपत्यमवाप्नुयात्। अथैषां समाप्तौ कर्त्तव्यानि दानानि। नक्ते वस्त्रयुगं। एकांतरोपवासे गौः। भूशयने शय्या। षष्टकालभोजने गौः। व्रीहिगोधूमादित्यागे हेममश्री स्नादि। कृच्छ्रे गोयुगं। शाकाशने गौः। पयोव्रते च दधिमधुघृतव्रतेषु वासो गौश्च। ब्रह्मचर्ये स्वर्णमूर्त्तिः। तांबूलव्रते वासोयुगं। मौने घृतकुंभो वस्त्रयुगं घंटा च। देवाग्रे एणमालाकरणे धेनुर्हेमपद्मं च। दीपव्रते दीपिका वासोयुगं च। भूमिभोजने कंस्यपात्रं गौश्च। चतुष्पथदीपे रौप्यासे च गोवृषौ। प्रदक्षिणाशते वस्त्रं। अनुक्तेषु स्वर्णं गौश्च। त्यादि हेमाद्रौ ज्ञेयं। तथा भार्गवार्चनदी

पिकायां।पाद्मे।शयनीबोधनीमध्येशमीदूर्वापमार्गकैः।भृंगराजेनदेवांस्तुनार्चयीतकदाचन।हेमाद्रौपाद्मे।आषा
ढादिचतुर्मासानभ्यंगंचवर्ज्जयेन्नरः।समाप्तौचपुनर्दद्यात्तिलतैलघृतंघटं।आषाढादिचतुर्मासानभ्यंगंचवर्ज्जये
न्नरः।समाप्तौचपुनर्दद्यात्तिलतैलघृतंघटं।आषाढादिचतुर्मासंवर्ज्जयेन्नखकृंतनं।वृंताकंराजनंचैवम
धुसर्पिर्घटान्विते।कार्त्तिक्यांतुपुनर्हैमंब्राह्मणायनिवेदयेत।अन्यान्यपिचवर्ज्जानिसंकल्परूपाणिपृथ्वीचंद्रो
दयेज्ञेयानि।टोडरानंदेस्कांदे।एकांतरंघृतंवाकुर्यान्मासोपवासकं।अनोदनंफलाहारंनक्तंव्रतमथापि
वा।अत्रैवतप्तमुद्राधारणमुक्तंमाधवेनचंद्रिकायांभविष्ये।शयन्यांचैवबोधिन्यांचक्रतीर्थेतथैवच।शंखच
क्रविधानेनवह्निप्तप्तोभवेन्नरः।इति।अतप्ततनूर्नतदामोअश्नुतइतिऋग्वेदात्।सहोवाचयाज्ञवल्क्यः।तस्मा
त्सुमानात्महितायहरिंभजेत।सुश्लोकमौलेर्वर्माणयप्रिनासंदधतइतिशतपथश्रुतेः।एतद्धिलोअब्जचक्रे
तुतप्तेजन्मांभोधीततर्वेचर्षणीद्राः।मूलेबाह्वोर्दधत्यन्येपुराणालिंगान्यंगेतप्तान्युधान्यर्प्ययंतइतिसामवेदा
त्।अग्निहोत्रंयथानित्यंवेदस्याध्ययनंतथा॥ब्राह्मणस्यतथैवेदंतप्तमुद्रादिधारणमितिपद्मपुराणात्।ब्रा
ह्मणःक्षत्रियोवैश्यःशूद्रोवायदिवेतरः।शंखचक्रांकिततनुस्तुलसीमंजरीधरः।गोपीचंदनलिप्तांगोदृष्टश्चे

केशकर्त्तनादि

६२

त्वदग्धंकृतः। इतिकाशीखंडाच्चेति। तत्प्रकारस्तुएमार्चनचंद्रिकातोज्ञेयः॥ पृथ्वीचंद्रोदयस्त्वाय स्तुसंतप्तशंखादिलिंगाचि
ह्नतनुर्नरः। ससर्वयातनाभोगीचांडालोजन्मकोटिषु। द्विजंतुतप्तशंखादिलिंगांकिततनुंनरः। संभाष्यरौरवंयातियाव
दिंद्राश्चतुर्दशेति। बृहन्नारदीयोक्तेः। शंखचक्राद्यंकनंचयोगीतत्रस्यात्स्विकंतथा। एकजातेरयंधर्मोनिजातुस्याद्द्विज
न्मनः। शंखचक्रंमृदायस्तुकुर्यात्तप्तायसेनवा। सशूद्रवद्बहिःकार्यःसर्वस्माद्द्विजकर्मणः। यथाश्मशानजंका
ष्ठमनर्हंसर्वकर्मसु॥ तथाचक्रांकितोविप्रःसर्वकर्मसुगर्हितः। तथा॥ शिवकेशवयोरंकानशूलचक्रादिकान्
द्विजःनधारयेतमतिमान्वैदिकेवर्त्मनिस्थितः। इतिविष्णुस्थलायनादिवचनादृग्वेदादिश्रुतीनामन्यार्थत्वात्स्मृ
श्रुतीनांचासत्वाच्चक्रादिधारणंशूद्रविषयमित्यन्ये। स्कंदसंहितायांतुविष्णुरागमादितंत्रेषुदीक्षितानांविधीय
ते। शंखचक्रगदापद्मैरंकनंतान्यदेहिनां। वेदमार्गैकनिष्ठस्तुमोहेनाप्यंकितोयदि। पतत्येवनसंदेहस्तथापुं
ड्रंतदापीत्युक्तं। नृत्येचोदराग्र्येनिषिद्धमितिश्रीधरस्वामी। यद्यपिनिषेधस्यप्राप्तिसापेक्षत्वाद्विधिंविनाचतद
योगादुपजीव्यविरोधेननतोपशोकरोतीतिवद्विकल्पोयुक्तस्तथाप्येकजातेरयंधर्मइत्यनेनविधिवाक्यानामु एम:
पसंहाराद्द्विजातिनिषेधोनित्यानुवादइतितत्राशयः। अत्रशिष्टाचारएवसंकटपाशानिःसरणाय॥ इतिसंक्षेपः।

आषाढपौर्णमास्यां कोकिलाव्रतमुक्तं हेमाद्रौ भविष्ये। आषाढपौर्णमास्यां तु संध्याकाले ह्युपस्थिते। संकल्पयेन्मासमेकं श्रावणेप्यहं ह्यहं। स्नानं करिष्ये नियता ब्रह्मचर्ये स्थिता सती। भोक्ष्यामि नक्तं भूशय्यां करिष्ये प्राणिनां दयामिति। अस्य नक्तव्रतत्वान्नक्तव्यापिनी ग्राह्या। अत्रैव शिवशयनोत्सव उक्तो हेमाद्रौ वामनपुराणे। पौर्णमास्यामुमानाथः स्वपते चर्मसंस्तरे। वैयाघ्रे च जटाभारं समुद्ग्रथ्याहिचर्मणा। मदनरत्नेप्येवं। इयं प्रदोषव्यापिनी। अत्रैव व्यासपूजोक्ता। तंत्र त्रिमुहूर्त्ता चेत्परैवेति संन्यासपद्धतौ। त्रिमुहूर्ताधिकं ग्राह्यं पर्वहौस्मरणामयोरिति वचनात्॥ इति श्रीमद्रूस्तभट्टात्मजकमलाकरभट्टकृते निर्णयसिंधौ आषाढः॥ कर्कसंक्रांतौ पूर्वं त्रिंशद्दंडाः पुण्यकालः। सूर्ये ह्युत्तरसंक्रमे तु परत एव पुण्यं। रात्रौ तु निशीथात्प्राक्परतश्च संक्रमे हेमाद्र्यनंतभट्टादिमते पूर्वोत्तरयोः पंच नाड्यः पुण्यकालः। धनुर्मीनावतिक्रम्य कन्यां च मिथुनं तथा पूर्वापरविभागेन रात्रौ संक्रमते रविः। दिनांते पंच नाड्यस्तु तदा पुण्यतमाः स्मृताः। उदये पि तथा पंच दैवे पित्र्ये च कर्मणीति स्कांदोक्तेः पूर्वापरविभागेनेति मकरकर्कभिन्नसंक्रांतिपरं वक्ष्यमाणवचनविरोधादित्युक्तं मदनरत्ने। तेनायमर्थः। रात्रौ पूर्वभागे मकरे उदये पंच नाड्यः पुण्याः। रात्र्यपरभागे कर्कसंक्रमे दिनांते पंच नाड्यः पुण्याः। विषुवतोस्तु पूर्वदिने पंचापरदिने च पंचेति वा

नां
क्रांतराशुपेधात्। तेन हे माद्रि माधववयोः सर्ववचनानांचानाचौ विरोधः। माधवमते तु अर्धरात्रे तु ऊर्ध्वं वा संक्रांतो दक्षिणा
यने पूर्वमेव दिनं ग्राह्यं। यावन्नोदयते रविरिति वृद्धगार्ग्योक्तेर्मिथुनात्कर्कसंक्रांतिर्यदि स्यादंशुमालिनः। प्रभाते वा
निशीथे वा तत्पुण्यं तु पूर्वतः। इति भविष्योक्तेश्च पूर्वदिन एव पुण्यं दाक्षिणात्यास्तु तद्देशाद्रियंते अत्र रात्रावपि स्ना
नादि भवतीत्युक्तं प्राक्। अत्र रात्रौ नोपवासादि पूर्वे भुक्तां तथा कर्के केशादिकर्त्तनं निषिद्धं। उक्तं भेकर्कटके चापि क
न्यायां कार्मुके रवौ। रोमं खंडं गृहच्छ स्यापितः आशम्यते यमराति सुमंतु वचनादित्युक्तं जीवत्पितृकानिर्णये गुरु
भिः। अथ नदीनां रजोदोषः। हेमाद्रावत्रिः। सिंहकर्कटयोर्मध्ये सर्वानद्यो रजस्वलाः। तासु स्नानं न कुर्वत वर्जयि
त्वा समुद्रगा इति व्याघ्रोक्तेः। इदं त्विदं नदीषु। मास्येत्वगस्त्योदयावधि त्वमुक्तं। यावन्नोदेति भगवान्दक्षिणा
शाविभूषणं। तावद्रजोवहा नद्यः करतोयाः प्रकीर्तिताः। करतोया अल्पोदका इत्यर्थः। तथा कात्यायनः। याः शो
षमुपगच्छंति ग्रीष्मे कुसरितो भुवि। तासु प्रावृषि न स्नायादपूर्णे दशवासरे। इदं चापदि। स्मृतिसंग्रहे। धनुःसहस्राण्य
ष्टौ तु गतिर्यासां न विद्यते। न ता नदीशब्दवहा गर्तास्ताः परिकीर्तिताः। महानदीषु तु भविष्ये उक्तं। आदौ तु कर्कटे देवि एमः
महानद्यो रजस्वलाः। त्रिदिनं तु चतुर्थेऽह्नि शुद्धाः स्युर्जाह्नवी यथा। महानद्यश्च ब्राह्मे। गोदावरी भीमरथी तुंगभद्रा

चवेणीकातापीपयोष्णीविंध्यस्यदक्षिणेतुप्रकीर्त्तिताः॥ भागीरथीनर्मदाचयमुनाचसरस्वती॥ विशोकाचवितस्ताचविंध्य
स्योत्तरतःस्थिताः॥ द्वादशैतामहानद्योदेवर्षिक्षेत्रसंभवाः॥ मदनरत्नेपुराणांतरे महानद्योवेदिकाचकावेरीवंजरा॥ तथा
रजस्वलास्तुप्रदुष्टाःस्युःकर्कटादौत्र्यहंनृप॥ कात्यायनः॥ कर्कटादौरजोदुष्टागोमतीवासरत्रयं॥ चंद्रभागासतीसिंधुः
सरयूर्नर्मदातथा॥ इदंगंगाद्यतिरिक्तविषयं॥ गंगाचयमुनाचैवप्लक्षजातासरस्वती॥ रजसानाभिभूयंतेयेचान्ये
नदसंज्ञकाः॥ शोणसिंधुहिरण्याख्याःकोकलोहितघर्घराः॥ शतद्रूश्चनदाःसप्तपावनाःपरिकीर्त्तिताः॥ इतिदेवलो
क्तेः॥ यत्तुप्रथमंकर्कटेदेवीत्र्यहंगंगारजस्वलेत्यादिवचनंतज्जाह्नवीभिन्नगोदावर्यादिगंगांतरपरमितिमदनरत्ने॥
अन्येत्वंतर्गतरजोविषयं॥ गंगाधर्मद्रवःपुण्यायमुनाचसरस्वती॥ अंतर्गतरजोदोषाःसर्वावस्थासुचामलाः॥ इतिनि
गमोक्तेः॥ तीरवासिनांतुरजोदोषोनास्ति॥ ननुतत्तीरवासिनामितिनिगमोक्तेः॥ नूतनकूपादौतुयोगयाज्ञवल्क्यः॥
अजागावोमहिष्यश्चब्राह्मणीचप्रसूतिका॥ भूमेर्नवोदकंचैवदशरात्रेणशुध्यतीति॥ कश्चित्त्वदोषमाहव्याघ्रपा
दः॥ अभावेकूपवापीनामथवापिपयोभृतां॥ रजोदुष्टेपिपयसिग्रामभोगेनदुष्यति॥ योद्धृत अन्येनापिसमुद्धृतेइतिद्वि
तीयपादेपाठः॥ तेनोद्धृतेनदोषः॥ तथाच॥ तासुस्नानंनेतिप्रागुक्तमित्याहुः॥ वसिष्ठोपि॥ उपाकर्मणिचोत्सर्गेप्रेतस्नानेतथैवच॥

तेइति द्वितीचन्द्रसूर्यग्रहे चैव रजो दोषो न विद्यते। इत्यलं विस्तरेण। श्रावणशुक्लतृतीया मधुश्रवाख्या गुर्जरे प्रसिद्धा
सा परयुता ग्राह्येति दिवोदासः। श्रावणशुक्लचतुर्थी पूर्वयुता। मातृविद्धा गणेशव्रत इति वचनात। श्रावणशुक्लपंच
मी नागपूजादौ परेति सामान्यनिर्णये उक्तं। चमत्कारचिंतामणौ। पंचमी नागपूजायां कार्या षष्ठीसमन्विता। तस्यां
तु तुषिता नागा इतरा सचतुर्थिकेति। श्रावणे पंचमी शुक्ला संप्रोक्ता नागपंचमी। तां परित्यज्य पंचम्यश्चतुर्थीसहिता
इति मदनरत्नेऽभिधानाच्च तेन परैवेति। अत्र विशेषो हेमाद्रौ भविष्ये। श्रावणे मासि पंचम्यां शुक्लेपक्षे नराधिप। द्वार
स्योभयतो लेख्या गोमयेन विषोल्बणाः। पूजयेद्विधिवद्वीर दधिदूर्वांकुरैः कुशैः। गंधपुष्पोपहारैश्च ब्राह्मणानां
च तर्पणैः। एतस्यां पूजयंतीह नागान्भक्तिपुरःसराः। न तेषां सर्पतो वीर भयं भवति कुत्रचित। इति। श्रावणशुक्ल
द्वादश्यां दधिव्रतं प्रागुक्तं। तक्रादीनां न निषेधः। तत्र दधिव्यवहाराभावादिति कस्तते। अत्रैव विष्णोः पवित्रारो
पणमुक्तं हेमाद्रौ विष्णुरहस्ये। श्रावणस्य सिते पक्षे कर्कटस्थे दिवाकरे। द्वादश्यां वासुदेवाय पवित्रारोपणं
स्मृतं। द्वादश्यां श्रावणे वापि पंचम्यामथवा द्विज। आनुकूल्येषु कर्तव्यं पंचदश्यामथापि चेति शिवे तु तत्रैव वका एमः
लोत्तरे। आषाढांते चतुर्दश्यां न मेस्य नभसोऽथवा। अष्टम्यां वा चतुर्दश्यां पक्षयोरुभयोः समा मिति। अन्यदेवता

नांतकस्सते। अधिवासनं तु दीपिकायां॥ गोदोहंमात्तीते काले पूर्वें घुद्यीधिवासनमिति॥ गौणकालो रामार्चनचंद्रिकायां। प
वित्रारोपणं विघ्नाद्यावरणेन भवेद्यदि। कार्त्तिक्यां। वर्धिष्णुकात्तिकर्त्तव्यमिति नारदः॥ हेमरौप्यताम्रक्षौमैः सूत्रैः कौशेयपद्म
जैः। कुशैः काशैश्च कार्पासैर्ब्राह्मण्या कर्त्तितैः शुभैः॥ कृत्वा त्रिगुणितं सूत्रं त्रिगुणीकृत्य शोधयेत्। तत्रोत्तमं पवित्रं तु षष्ट्या
सहशतैस्त्रिभिः। सप्तत्या सहितं द्वाभ्यां शताभ्यां मध्यमं स्मृतं। साशीतिनाशतेनैव कनिष्ठं तत्समाचरेत्। साधारणपवित्रा
णि त्रिभिः सूत्रैः समाचरेत्। उत्तमं तु शतग्रंथि पंचाशद्ग्रंथिः मध्यमं। कनिष्ठं तु पवित्रं स्यात्षड्विंशद्ग्रंथिशोभनं। षड्विंश
च्च चतुर्विंश द्वादशेति च केचन। चतुर्विंशद्द्वादशाष्टाविसेके मुनयो विदुः॥ हेमाद्रौ विष्णुरहस्ये त्वन्यथोक्तं। अष्टोत्त
रशतं कुर्याच्चतुःपंचाशदेव वा। सप्तविंशतिरेवाथ ज्येष्ठमध्यकनीयसां। अधमं नाभिमात्रं स्यादूरुमात्रं द्वितीयकं।
प्रलंबतो ग्रंजानुमात्रं प्रतिमायां निगद्यते॥ शिवपवित्रं तु तत्रैव शिवागमे। एकाशीत्याथवा सूत्रैः त्रिंशता वाष्टयुक्त
या॥ पंचाशता वा कर्त्तव्यं तुल्यं ग्रथ्यंतरालकं। द्वादशांगुलमानानि व्यासादष्टांगुलानि वा॥ लिंगविस्तारमानानि चतु
रंगुलकानि चेति। अधिकारिणोपि तत्रैव विष्णुरहस्ये। ब्राह्मणाः क्षत्रियो वैश्यस्तथा स्त्री शूद्र एव च। स्वधर्मावस्थिताः।
सर्वे शक्त्या कुर्युः पवित्रकं। तथा। अतो देवेति मंत्रेण द्विजो विष्णोः समर्पयेत्। शूद्रस्तांवत्सरीपूजानिष्फलामुनिसत्तम।
स्य मूलमंत्रेण पाद्येन वै पूजयेद्धरिमिति॥ एतच्च नित्यं। न करोति विधानेन पवित्रारोपणं तु यः॥

तस्य

तस्माद्भक्तिसमायुक्तैर्नरैर्विष्णुपरायणैः। वर्षे वर्षे प्रकर्त्तव्यं पवित्रारोपणं हरेरिति तत्रैवोक्तेः। देवताविशेषे तिथयोपि तत्रैवाधु
नदश्चरमागौरीगणेशः सोमराट्गुहः। भास्करश्चंडिकायाश्च वासुकिश्च तथर्षयः। चक्रपाणिरनंगश्च शिवो ब्रह्मा तथैव च
चेति। तथा हेमाद्रौ कालोत्तरे। चतुर्दश्यामथाष्टम्यां सर्वे साधारणं खलु तदिति। तत्प्रकारस्तु रामार्चनचंद्रिकायां। त
तस्थानि पवित्राणि वैणवे पटले शुभे। संस्थाप्य शुचिवस्त्रेणापिधाय पुरतो न्यसेत्। आरात्रिसंमितां वेणीं कुर्यात्षड्विंशता
कुशैः। क्रियालोपविधानार्थं यत्त्वया विहितं प्रभो। मयैतत्क्रियते देव तव तुष्ट्यै पवित्रकं। न मे विघ्नो भवेद्देव कुरु नाथ दयां
मपि। सर्वथा सर्वदा विष्णो मम त्वं परमा गतिः। उपवासेन देव त्वां तोषयामि जगत्पते। कामक्रोधादयो प्येते न मे स्तु व्र
तघातकाः। अद्य प्रभृति देवेश यावद्वैपोषिकं दिनं। तावद्रक्षा त्वया कार्या सर्वस्यास्य नमोस्तु ते। इति देवं संप्रार्थ्य
कुंभं संस्थाप्य तत्र वंशपात्रे उं संवत्सरस्य यागस्य पवित्रीकरणाय भोः। विष्णुलोकात्पवित्राद्य आगच्छेह नमोस्तु ते।
अनेन मूलेन चावाह्योत्तममध्यमकनिष्ठेषु विष्णुब्रह्मरुद्रान् सत्वरजस्तमांसि वेदत्रयं वनमालायां प्रकृतिं चावाह्य
त्रिसूत्र्यां ब्रह्मविष्णुरुद्रान्ग्रंथिषु। क्रियापौरुषी। वीरा विजयाः ईशा· अपराजिता· मनोन्मनी जया· भद्रा· मुक्तिश्चेत्या
वाह्य संपूज्य। उं संवत्सरकृतार्चायाः संपूर्णफलदोपि यतः। पवित्रारोपणायेत कुरु कं धरते नमः। विष्णुतेजोद्भवं रम्यं सर्वपात

एमः

कनाशनं।सर्वकामप्रदं देवतवांगेधारयाम्यहं।इतिदेवकरेमंगलसूत्रंबध्वादेवंसंपूज्यनिमंत्रयेत्।आमंत्रितोसिदेवेश
पुराणपुरुषोत्तम।प्रातस्त्वांपूजयिष्यामिसांनिध्यंकुरुकेशव।क्षीरोदधिमहानागशय्यावस्थितविग्रह।प्रातस्त्वांपू
जयिष्यामिसांनिध्यंकुरुतेनमः।निवेदयाम्यहंतुभ्यंप्रातरेतत्पवित्रकं।सर्वथासर्वदाविष्णोनमस्तेस्तुप्रसीदमे।त
तःपुष्पांजलिंदत्वारात्रौजागरणंकुर्यादित्यधिवासनं।प्रातर्नित्यपूजांकृत्वागंधदूर्वाक्षतयुतंपवित्रमादाय।देव
देवनमस्तुभ्यंगृहाणेदंपवित्रकं।पवित्रीकरणार्थाययवर्षपूजाफलप्रदं।पवित्रकंकुरुष्वाद्ययन्मयादुष्कृतंकृतं।
शुद्धोभवाम्यहंदेवत्वत्प्रसादात्सुरेश्वर।मूलमंत्रपुटितेनानेनदत्वांगदेवताभ्योनाम्नासमर्प्यमहानैवेद्यंदत्वानीरा
ज्यमणिविद्रुममालाभिरित्यादिभिर्दमनारोपोक्तमंत्रैःप्रार्थयित्वागुरवेब्राह्मणेभ्यश्चदत्वास्वयंधारये
त्।तथामासंपक्षमहोरात्रंत्रिरात्रंधारयेत्तथा।देवेतंसूत्रसंदर्भंदेशकालविवक्षया।अकरणेतु।पवित्रा
रोपः।श्रावणशुक्लाणांकालेनकरोतिकथंचन।तदासुतंजपेन्मंत्रंस्तोत्रंवापिसमाहितमित्युक्तं।इतिपवित्रारोपः
श्रावणशुक्लचतुर्दशीपूर्वयुतात्याह्या।अत्रवक्तव्योविशेषश्चैत्रचतुर्दश्यामुक्तः।अथोपाकर्म।तत्रबह्वृचा
नांप्रयोगपारिजातेशौनकः।अथातःश्रावणेमासेश्रवणर्क्षयुतेदिने।श्रावण्यांश्रावणेमासिपंचम्यांहस्त

६७ संयुतेऽह्दिवसे विदधीतेतदुपाकर्मपयोदितं। अध्यायोपाकृतिं कुयत्तित्रोपासनवह्निनेति। अत्रपौर्णमास्युपसंहाराध्याये
नयजुर्वेदपरेति हेमाद्रिः। अत्र हस्तयुक्ता पंचम्युक्ता। कारिकापि। तन्मासे हस्तयुक्तायां पंचम्यां वा तत् क्षिप्यते। इति केवलपं
चम्यां हस्तयुते न्यास्मिन् दिने इति तु हेमाद्रिः। उपासनवह्निनेति तु कर्मद्वयमिदं केचिल्लौकिकाग्नौ प्रकुर्वते इति कारिको
क्तलौकिकाग्निना विकल्पते। तत्राप्यध्याप्येरन्वारब्धा इति सूत्रात् सशिष्यत्वे तदधिकारित्वस्याचार्यत्वेनान्यस्याध्याव
न्योऽनुयादिति निषेधाल्लौकिक एव। तदभावे स्मार्त इति निर्गर्वः। यद्यपि दीपिकायां वेदोपाकृतिरोषधिप्रजननेप
क्षे स्मिते। श्रावणो इति चोक्तः पक्षोऽपि सर्वेषां मुख्यकालत्वेनोक्तः। बह्वृचमात्रगा गार्ग्यवचनेन छंदोगानां तिथिविहित
स्य तस्याविरोधिनः सर्वान्प्रतिहस्तश्चात् तथापि श्रावणमाससंबंधसूत्रात्स्पष्टत्वात् कृष्णपक्षेऽपि कार्यमिति वृद्धाः।
तथा च सूत्रं। अथातोऽध्यायोपाकरणमोषधीनां प्रादुर्भावे श्रावणेन श्रावणस्य पंचम्यां हस्तेन वा। अत्र श्रवणेऽमु
ख्योऽन्यो गौणः। तस्मात् हस्तयोगे हेमाद्रौ व्यासः। धनिष्ठासंयुतं कुर्याच्छ्रावणं कर्म यद्भवेत्। तत्कर्म सफलं ज्ञेयं रामः
मुपाकरणसंज्ञितं। श्रवणेन तु यत्कर्म उत्तराषाढसंयुतं। संवत्सरकृतोऽध्यायस्तत्क्षणादेव नश्यतीति। प्रयोगपा
रिजाते गार्ग्योऽपि। उदयव्यापिनी त्वेव विश्वर्क्षे घटिकाद्वयं तत्कर्म सफलं ज्ञेयं तस्य पुण्यमनंतकमिति पूर्वेद्युरुत्तरा

षाढायोगोपरेद्युः श्रवणाभावे घटिकाद्वयन्यूनेवा पंचम्यादौ कार्यं। ननु पूर्वविद्धायां संगवेपिश्रपवाहाभावात्। किंच परेद्युः
संगवास्पर्शे निषिद्धपूर्वग्रहणे किंमानं। संगववाक्यं श्रवणवाक्यं चेति चेत्। तर्हि ब्रीहिवाक्यादश्वशफवाक्याच्च माष
मिश्राणामपूपानां स्यादिति महत्यांडिस्यं। एतेन पर्वण्योहयिकं व्याख्यातं। निषेधप्रवेशस्योभयत्रसाम्यात्। श्रव
णयुतदिने संक्रांत्यादौ तु। उपाकर्म न कुर्वीतेति क्रमात्सामर्थ्ये जुर्विदः। ग्रहसंक्रांतियुक्तेषु हस्तश्रवणपर्वसु। इति हेमा
द्रौ निषेधात्पंचम्यादयो ग्राह्याः। अत्र ग्रहसंक्रांतिदिने येषां प्राप्नुतेः सर्वैरुपाकर्म न कार्यं इत्येको वाक्यार्थः। तेनाथर्ववे
वेदिनामपि निषेधः। अन्यथा हस्तादित्रये प्रत्येकं ग्रहसंक्रांत्योः षड्वाक्यकल्पनापत्तेः। मदनरत्नेपि। यदि स्या
च्छ्रावणं पर्वग्रहसंक्रांतिदूषितं। स्यादुपाकरणं शुक्लपंचम्यां श्रावणस्य तु। इति महार्णवे। संक्रांतिर्ग्रहणं वा
पि यदि पर्वणि जायते। तन्मासे हस्तयुक्तायां पंचम्यां वा तदिष्यते। तत्रापि प्रयोगपारिजाते। वृद्धमनुकात्यायनौ।
अर्द्धरात्रादधस्ताच्चेत् संक्रांतिर्ग्रहणं तदा। उपाकर्म न कुर्वीत परतश्चेन्न दोषकृदिति। मदनरत्ने गार्ग्योपि। यद्यर्द्धरा
त्रादर्वाक्कुग्रहः संक्रम एव वा नोपाकर्म तदा कुर्याच्छ्रावण्यां श्रवणेपि वा। एतेन ग्रहणकाले श्रवणसत्त्वे एव निषेधो ना
वागीति मूर्खशंकापास्ता। हस्ताविशिष्टानां हस्तश्रवणपर्वणां प्रत्येकं निषेधे तद्युक्तोपाकर्मनिषेधे च विशिष्टोद्दे

६८

शेषाक्षभेदात्। पंचम्यां संक्रांतौ निषेधाभावापत्तेश्च। तेनार्द्रणत्वात्सूर्यग्रहणसत्वमात्रे उपाकर्मनिषेधो न तद्योगः। यत्तु प्रतिप
न्मिश्रिते नैव गोत्रणषाढ संयुते। श्रवणे श्रावणं कुर्युर्ग्रहसंक्रांतिवर्जिते इति। प्रतिपन्मिश्रितनिषेधकं वचनं तन्निर्मू
लं। हेमाद्रौ निगमः। ग्रहणयोगो गुरुं हंति संक्रांतिः शिष्यघातिनी॥ तपो हंत्युत्तराषाढा उपाकर्मणि वै स्मृतं। अत्र चा
वेदोपाकरणे प्राप्ते कुलीरे संस्थिते रवौ। उपाकर्म न कर्तव्यं कर्तव्यं सिंहयुक्तके। इति वचनं देशांतरविषयं। नर्मदोत्त
रभागे तु कर्तव्यं सिंहयुक्तके। कर्कटे संस्थिते भानावुपाकुर्यात्तु दक्षिणे इति बृहस्पतिवचनादिति। प्रयोगपारिजा
ते नोक्तं पराशरमाधवीयेप्येवं। सामगानां सिंहस्थरवावुक्तं तद्विषये रुद्रं पुरोडाशश्चतुर्द्धाकरणवदुपसंह्रियत इति।
ननु बह्वृचादिपरं। तेषां सूत्रे चांद्रश्रावणोक्तेः। सौरे पंचम्यपयोगात्तत्सामान्येन सौत्रविशेषस्य बाधायोगादिति त
द्वयं पश्यामः। यत्तु कालादर्शे। अध्यायानामुपाकर्म श्रावण्यां तैत्तिरीयकाः। बह्वृचाः श्रवणे कुर्युः। सिंहस्थोर्को
भवेद्यदि। सहस्तशुक्लपंचम्यां तद्वद्ग्रहणसंक्रमे। असिंहार्के प्रौष्ठपद्यां श्रवणेन व्यवस्थयेति तन्मूलालिखनात् स
त्रविरोधश्च चिंत्यो। सूत्रे हि श्रवणेन श्रवणस्येति चांद्रमास एवोक्तो न सौरः। तस्य पंचम्यभावात्। अकृतिलक्षणाभ्या
मुभयपरत्वेपि द्वयविरोधाच्च। तेन सिंहस्थोर्को भवेद्यदि। तदा कर्केपि ग्रहणसंक्रमे सति। असिंहार्के युक्तपंचम्यां श्रा

एमः

वणेवाबह्वृचाःप्रोष्ठपद्यांतैत्तिरीयाःइतिव्याख्येयं।तेषांसौरमासाभावात्।श्रावणेसस्यानुद्गमादौबह्वृचपरिशिष्टे।अनुष्ठेयौषधयस्तस्मिन्मासेतुनभवंतिचेत्।तदाभाद्रपदेमासिश्रवणेनतदिष्यतइति।तत्राप्यनुद्गमेतत्कुर्यादेव।तद्वार्षिकमित्याचक्षतेइतिस्मृत्यंतरात्।वर्षर्तौभवंवार्षिकं।एतच्चशुक्रास्तादावपिकार्यं।उपाकर्मोत्सर्जनंचपवित्रदमनार्पणमितिदमनारोपेलिखितवचनात्॥नित्येनैमित्तिकेजप्येहोमयज्ञक्रियासुच।उपाकर्मणिचोत्सर्गेग्रहवेधोनविद्यते।इतिप्रयोगपारिजातेहेमाद्रौचसंग्रहोक्तेः।पर्वणिग्रहणेत्वितिपूर्वंत्रिरात्रादिवेधाभाववदुक्तमिदंतेनपर्वणिग्रहणेपिचतुर्दश्यांश्रवणेकार्यमितिहेमाद्रिः।प्रथमारंभस्तुनभवति।गुरुभार्गवयोर्मौढ्येबाल्येवावार्द्धकेपिवा।तथाधिमासेसंसर्पेमलमासादिषुद्विजः।प्रथमोपाकृतिर्नस्यात्कृतकर्मविनाशकृदिति।तत्रैवकश्यपोक्तेः।अत्रप्रथमारंभेवृद्धिश्राद्धंकुर्यादितिनारायणवृत्तौ।एतच्चाधिमासेनकार्यं।उपाकर्मतथोत्सर्गःप्रसवाहोत्सवाष्टकाः।मासवृद्धौपराःकार्यावर्जयित्वातुपैतृकमितिज्योतिःपराशरोक्तेः।उत्कर्षःकालवृद्धौस्यादुपाकर्मादिकर्मणि।अभिषेकादिहानीनांनतूत्कर्षोयुगांशकेइतिकात्यायनोक्तेश्च।यत्तुउपाकर्मणिचोत्सर्गेत्वेतदिष्टंवृषादितःइतिऋष्यशृंगवचनंतत्सागमाविषयं।तेषांसिंहार्केएवोक्तेः।एतच्चापराह्णेकार्यं।उपाकर्मापराह्णेस्यादुत्सर्गःप्रा

तरेवलिखितः। अध्यायानामुपाकर्म कुर्यात्कालेपराह्णके। पूर्वाह्णे तु विसर्गः स्यादिति वेदविदो विदुरिति हेमाद्रौ गोभिलोक्तेः। वस्तुत
स्तु भवेदुपाकृतिः पौर्णमास्यां पूर्वाह्णएवाखिलेतिप्रचेतोवचनात्। पूर्ववाक्यं सामगाविषयं। तेषामपराह्णएवोक्तेरित्यनु
पदं वक्ष्यते। दीपिकापि। अस्यतु विधिः पूर्वाह्णः कालः स्मृत इति। याजुषास्तु पर्वणि कुर्युः। तच्चापरत्र वैरौदयिकं ग्रा
ह्यं। अन्ये स्तु पूर्वं। पर्वण्यौदयिके कुर्युः श्रावण्यां तैत्तिरीयकाः। बह्वृचाः श्रवणे कुर्युर्ग्रहसंक्रांतिवर्जिते। इति गार्ग्यो
क्तेः। संध्राश्रवानृक्षतीग्रहणापर्वण्यौदयिके पुनः। अतो भूतदिने तस्मिन्नोपाकरणमिष्यते। इति कालिकापुराणा
त्। अथ चेत्सयुक्ते पर्वणि स्यादुपाक्रिया। कुःखशोकमययस्नाणश्रुतस्मिन्नद्विजातयः इति मदनरत्ने गार्ग्योक्तेः।
अत्र सिंगाभट्टीये विशेषः। श्रवणः श्रावणं पर्व संगवस्पृग्यदा भवेत्। तदैवौदयिकं कार्यं नान्यदौदयिकं भवेत्।
पराशरमाधवीयेपि गार्ग्यः। श्रावणीपौर्णमासी संगवात्परतो यदि। तदैवौदयिकी ग्राह्या नान्यदौदयिकी न्य
भवेत्। कर्मकालमाह कालादर्शे निगमः। श्रावण्यां प्रौष्ठपद्यां वा प्रतिपत्षण्मुहूर्तकैः। विद्धा स्याद्यदि सा तत्रो
पाकर्मोत्सर्जनं भवेत्। अत्र पौर्णमासी श्रवणाहस्तयोरुपलक्षणं तेन तावपि संगवस्पर्शी। उदये षड्घटीस्पर्शी एमः
ऋतेपर्वणि वार्कभे। कुर्युर्नभस्युपाकर्म ऋग्यजुःसामगाः क्रमात्। इति पृथ्वीचंद्रः। विश्वर्षे घटिकाद्वयमिति पूर्वो

त्वविरोधात्। सामान्यवाक्यादौदयिकीकर्मपर्याप्ताग्राह्यात्यानपूर्वा। संगवनिमित्तपूर्वविद्धापवादाभावात्। माद्यद्वौ कालांतरे वा
स्मिन्नतु निषिद्धं। नहि व्रीहिलाभे निषिद्धमाषग्रहणं युक्तं। अत एव परेद्युः संगवव्याप्तौ पूर्वं निषेधः। तदभावे तु नेति मूलख
व्यवस्थाप्यपात्ता। विधिवैषम्यात्। माषनिषेधेतथा यत्नेष्ट्वा। पूर्वविद्धावचनमूले हि सा युज्यते। एवं श्रवणेपि ज्ञेयं। एतच्छुद्धा
धिकपर्यंते न यथाग्निपत्रे श्रद्धहोत्रादौ सायंप्रातःकालबाधे सामान्यस्याजीवनावच्छिन्नकाले दर्शादिरनुष्ठानं। यथाग्नीस्थस्व
शकाद्यभावे यागाग्निमनिषिद्धवर्ज्यद्रव्येण तथात्रसंगवाभावर्ज्यकर्मपर्याप्तौदयिके कालांतरे वानुष्ठानं न मुकदापि निषि
द्धे। अपकाराभावेन स्वर्गस्यैव प्राप्तेः। कात्यायनादीनां तु दिनद्वये पूर्वाह्णव्याप्तौ एकदेशस्पर्शे वा पूर्वैवेति हेमाद्रिः। बरिका
द्वयमिति पूर्वोक्तविरोधात्। तेन प्राशस्त्यमात्रपरमिदं। यदपि। श्रावणी दुर्गनवमी दूर्वा चैव हुता। शनी॥ पूर्वविद्धा प्रक
र्तव्या शिवरात्रिर्बलेर्दिनमिति ब्रह्मवैवर्ते तद्ब्रह्लपविक्तविषयमिति हेमाद्रिः। मदनपारिजातेपि पूर्वविद्धायां श्राव
ण्यां वाजसनेयिनामुपाकर्मेत्युक्तं। मदनरत्नेपि। पर्वण्यौदयिके कुर्युः श्रावण्यां तैत्तिरीयकाः। इति बह्वृचपरिशिष्टाद्बह्वृ
चानां प्रतिकर्मविधानार्थं प्रवृत्तेन तैत्तिरीयककर्मविध्ययोगात् पूर्वोक्तकालिकापुराणादौ सामान्यतऔदयिकपर्वप्र
सेस्त्यै निषेधेन बह्वृचानां श्रवणविधानात्तैत्तिरीयकपदे अनुवादत्वात्तस्य च प्राप्त्यधीनत्वात्प्राप्तेश्च यजुर्वेदिमात्रपर

७० त्वात्सर्वयजुर्वेद्युपलक्षणार्थो।ऽत्रवसुर्यंनुवादो वा। ननु विधायिकं। तेन विशेषविधिनाउपसंहारः स्यात्। अनुवादत्वाद्ध्र
हणान दोषः। अन्यथोदयिकपर्वविशिष्टोपाकर्मोद्देशेन कर्तृविधौ कर्तृविशिष्टे वाऽदयिकपर्वविधौ वाक्यभेदापत्तेः।
तस्मात्तैत्तिरीयकपदविवक्षया सर्वयजुर्वेदिनामौदयिकमेव पर्वेत्युक्तं। तन्न। न तावत्परिशिष्टे वक्ष्याम्यत्येव विधिः। धनि
ष्ठाप्रतिपद्युक्तत्वाद्धस्तहस्तसमन्वितमित्यादितदुदाहृते एव परिशिष्टे वेदांतरधर्मविधीनां दर्शनात्। नाप्यनुवादोऽयं। कालि
कापुराणाद्बह्वृचादीनामपि तदापत्तेः। कुर्युरित्यस्य विधित्वेन तस्यैवार्थवादत्वेनैतत्प्राप्तानुवादित्वाच्च। न चैतैत्तिरीयका
णां गृह्येत द्विधिरस्ति येनानुवादः स्यात्। न च वाक्यभेदः। तैत्तिरीयकपदमात्रस्य कर्ममात्रस्य वाउद्देश्यत्वायोगेन हविर्हि
वदष्टवर्षं ब्राह्मणमुपनयीतेतिवच्चागत्या विशिष्टस्योद्देश्यत्वायोगेन हविर्हिवदष्टवर्षं ब्राह्मणानुपनयीतेतिवच्चाग
त्या विशिष्टस्योद्देश्यत्वात्। अन्यथोत्तरार्द्धबह्वृचपदस्याप्यविवक्षापत्या श्रावण्यास्सर्वसाधारण्यापत्तेः। तस्माद्धे
माद्रिमतमेव युक्तमिति दिक्। इदं च शिष्यानध्यापयते आवसथ्येऽग्नौ। अनध्यापयतो नाधिकार इति कर्कः। श्रावण्या
मपि ग्रहणादिदुष्टायां कातीयाभिन्नैः प्रोष्ठपद्यां कार्यं तैरुक्तं। श्रावणपंचम्यां। संक्रांतिर्ग्रहणं वापि पौर्णमास्यां यदा भ एम्नः
वेत्। उपाकृतिस्तु पंचम्यां कार्या वाजसनेयिभिरिति स्मृतिमहार्णवे। वाजसनेयिग्रहणादिति हेमाद्रिः। इदं स्वसूत्रोक्तका

लपरत्वात्तबह्वृचपरमपि। शांख्यायनेनोक्तहस्ते कार्यं। आपस्तंबे श्रायर्वणौ श्रप्रौष्ठपद्यां॥ यत्तु बौधायनः। श्रावण्यां पौर्णमास्यामाषाढ्यां वोपाकृत्येत्सूत्रे। तत्प्रौष्ठपद्यामपि दोषे आषाढ्यां कार्यमित्येवमर्थं। तच्च शाखीयविषयं वा॥ सामगास्तु श्रावणे हस्ते कुर्युः। बह्वृचाः श्रावणे चैव हस्तर्क्षे सामवेदिन इति निर्णयामृते गोभिलोक्तेः। सोप्युत्तरः। धनिष्ठाप्रतिपद्युक्तं त्वाष्ट्रऋक्षसमन्वितं। श्रावणं कर्म कुर्वरन् ऋग्यजुःसामपाठकाः इति मदनरत्ने परिशिष्टोक्तेः। गार्ग्योपि। सिंहे रवौ तु पुष्यर्क्षे पूर्वाह्नेति विवरेव हिः। छंदोगा मिलिताः कुर्युरुत्सर्गं स्वस्वछंदसां। शुक्लपक्षे तु हस्तेन उपाकर्म पराह्णिकमिति। पुष्यर्क्षे पूर्वाह्णे तु उत्सर्गः अपराह्णिकमुपाकर्मत्य त्वयः। अविवरेग्रहादिदोषरहिते। अन्योविशेषः पूर्वमुक्तः प्रयोगपारिजाते गोभिलः उपाकर्मोत्सर्जनं च व्रतस्थानामपीष्यतो धारणाध्ययनांगत्वाद्गृहीणां ब्रह्मचारिणां। उत्सर्जनं च वेदानामुपाकरणकर्म च। अकृत्वा वेदजप्येन फलं नाप्नोति मानवः। सर्वथा नोपेत कृछ्रउपवासश्च। वेदोदितानां नित्यानामिति मनुना भोजनोक्तेः॥ एवमुत्सर्गेपि। अथ प्रसंगात्त्रैवोत्सर्जनमुच्यते। तच्च पौषमासे रोहिण्यां तत्र कृष्णाष्टम्यां वा कार्यं। पौठमासस्य रोहिण्यामष्टकायामथापि वा। जलांते छंदसां कुर्यादुत्सर्गं विधिवद्बहिः इति याज्ञवल्क्योक्तेः। श्रावण्यां प्रौष्ठपद्यां वोपाकृतौ क्रमेण पौषशुक्लप्रतिपदि माघशुक्लप्रतिपदि च कार्यौ। अर्धपंचमासानधीयातेति तैनैयोक्तेः। यत्तु हारीतः

७१

अर्धपंचमान्मासानधीत्योर्ध्वमुत्सृजेत्पंचार्धषष्ठान्वेति तदाषाढ्युपाकर्मविषयं बौधायनास्तु पौष्यां माघ्यां वा कुर्युः। पौष्यां माघ्यां वोत्सृजेदिति तत्सूत्रात्। तैत्तिरीयैस्तु तैष्यां कार्यं। तैष्यां पौर्णमास्यां रोहिण्यां वा विरमेदिति तत्सूत्रात्। बह्वृचैस्तु माघ्यां कार्यं। अध्यायोत्सर्जनं माघ्यां पौर्णमास्यां विधीयते। इति कारिकोक्तेः। कातीयास्तु भाद्रपदे कुर्युः। उत्सर्गश्चेत्तदा तिष्यतिथ्यां प्रौष्ठपदेपि वेति कात्यायनोक्तेः। कातीयास्तु भाद्रपदे कुर्युः। उत्सर्गश्चेत्तथा च सिंहे रवौ तिथौ गार्ग्यवचनं पूर्वमुक्तं। सर्वैरुपाकर्मदिने वा कार्यं। पुष्ये तूत्सर्जनं कुर्यादुपाकर्मदिनेथवेति। हेमाद्रौ खादिरगृह्योक्तेः। यदा सिंहस्थे सूर्ये मासि तन्मध्यस्थहस्तनक्षत्रात्प्राक् पुष्यः कर्कस्थो भवति तदा तस्मिन्पुष्ये उत्सर्गं कृत्वा तदुत्तरहस्ते उपाकर्म सामगाः कुर्युः। मासे प्रौष्ठपदे हस्तात्पुष्यः पूर्वो भवेद्यदि। तदा तु श्रावणे कुर्यादुत्सर्गं छंदसां द्विजः। इति तत्रैव परिशिष्टोक्तेः। अत्र द्वावपि सौरौ मासौ ज्ञेयौ। तेषां सौरस्यैवोक्तेः। अत्र विशेषमाह कार्ष्णाजिनिः। उपाकर्मणि चोत्सर्गे यथाकालं समेत्य च। ऋषीन्दर्भमयान्कृत्वा पूजयेत्तर्पयेत्ततः। इत्युपाकर्मण्युत्सर्गे च त्रिरात्रं पक्षिणीमहोरात्रमनध्याय इति मिताक्षरायामुक्तं। अत्र नदीनां रजोदोषो नास्ति। उपाकर्मणि चोत्सर्गे रजोदोषो न विद्यते इति गार्ग्योक्तेः। अत्रैव रक्षा एमः बंधनमुक्तं। हेमाद्रौ भविष्ये। ततोऽपराह्णसमये रक्षापोटलिकां शुभां। कारयेदक्षतैः शस्तैः सिद्धार्थैर्हेमभूषितैरिति

इदं भद्रायां न कार्यं॥ भद्रायां द्वे न कर्त्तव्ये श्रावणी फाल्गुनी तथा॥ श्रावणी नृपतिं हंति ग्रामं दहति फाल्गुनीति संग्रहोक्तेः तन्मस्त्वे तु। आवपितदंते कुर्यादिति निर्णयामृते। इदं प्रतिपद्युतायां न कार्यं। मदनरत्ने स्मृतिसंग्रहे। नंदायां दर्शने रक्षाबलिदानं दशासु च। भद्रायां गोकुलक्रीडा देशनाशाय जायते। इदं रक्षाबंधनं नियतकालत्वाद्भद्रावर्ज्यं ग्रहणदिनेपि कार्यं होलिकावत्। ग्रहसंक्रांत्यादौ रक्षानिषेधाभावात्। सर्वेषामेव वर्णानां सूतकं राहुदर्शने इति तत्कालमात्रनिषेधाच्च योपि। त्रयोदश्यादितो वर्ज्यं दिनानां नवकं ध्रुवं। मंगल्येषु समस्तेषु ग्रहणे चंद्रसूर्ययोरिति निषेधः सोप्यनियतकालीनकर्मपर एव। न त्वत्र। अन्यथा होलायां का गतिः। अत एव नित्ये नैमित्तिके जप्ये होमे यज्ञक्रियासु च। उपाकर्मणि चोत्सर्गे ग्रहवेधो न विद्यते। इति नियतकालीने तदभाव इति दिक्। उपाकर्मणीति तद्दिनभिन्नपरं। तत्र तन्निषेधादित्युक्तं प्राक्। मंत्रस्तु। येन बद्धो बली राजा दानवेंद्रो महाबलः। तेन त्वामपि बध्नामि रक्षे मा चल मा चल॥ ब्राह्मणैः क्षत्रियैर्वैश्यैः शूद्रैरन्यैश्च मानवैः। कर्त्तव्यो रक्षिकाचारो द्विजान्संपूज्य शक्तितः। अत्रैव हयग्रीवोत्पत्तिः। तदुक्तं कल्पतरौ। श्रावण्यां श्रवणे जातः पूर्वं हयशिरा हरिः। जगाद सामवेदं तु सर्वकल्मषनाशनं। स्नात्वा संपूजयेत्तं तु शंखचक्रगदाधरं। अत्राश्वलायनेन श्रावणाकर्मोक्तं श्रावण्यां पौर्णमास्यां श्रवणाकर्मेति। तत्रात्मपयोगिनीग्रा

७२ स्यात्त्वस्तमिते स्थालीपाकं श्रपयित्वेति तत्रात। अत एव निशीथे दर्शप्रयोगांतःपातनियमात्तदंगैः प्रसंगसिद्धिरुक्ता हा
दशे। अन्यथापरेद्युः प्राश्नीकः प्रसंगः अप्रसंगस्यायाज्ञिकात्कपौर्णिमादर्शशब्दयोः पर्वोत्यन्तणवदहोरात्रवाचित्वात्त
त्रैव कर्मकालव्यापिनी ग्राह्येति। विकृतित्वाच्छेषपर्वैर्वत्तंति। श्रावणादिमासचतुष्टयकृष्णपक्षद्वितीयासु अशून्य
शयनव्रतं। तत्र चंद्रोदयव्यापिनी। दिनद्वये तत्त्वे परेति निर्णयामृते। इति श्रीमीमांसकरामकृष्णभट्टात्मजकमलाक
रभट्टकृते निर्णयसिंधौ श्रावणमासः॥ सिंहे पराः षोडश घटिकाः पुण्यकालः। अन्यत्पूर्ववत्। अत्र गोप्रसवेद्भुतसा
गरे नारदः। भौमे वा सिंहगते चैव यस्य गौः संप्रसूयते। मरणं तस्य निर्दिष्टं षड्भिर्मासैर्न संशयः। तच्च शांतिं प्रवक्ष्यामि येन सं
पद्यते शुभं। प्रसूतां तत्क्षणादेव तां गां विप्राय दापयेत्। ततो होमं प्रकुर्वत हताज्येन सर्षपैः। आहुतीनां घृताक्ता
नामयुतं जुहुयात्ततः। व्याहृतिभिश्चायं होमः सोपवासः प्रयत्नेन दद्याद्विप्राय दक्षिणामिति। तथा। सिंहारो
गते सूर्ये गोप्रसूतिर्यदा भवेत्। पौषे च महिषी सूते दिवा वाश्वतरी तथा। तदा निष्टं भवेत्किंचित्तच्छांत्यै शांतिकं चरे
त्। अस्य वामेति सूक्तेन तद्विष्णोरिति मंत्रतः। जुहुयाच्चतिलाज्येन शतमष्टोत्तराधिकं। मृत्युंजयविधानेनजुहुयाच्च एम:
तथायुतं। श्रीसूक्तेन ततः स्नायाच्छांतिसूक्तेन वा पुनः। मध्यरात्रे निशीथे वा यदा गौः क्रंदते सदा। ग्रामे वा स्वगृहे वापि शां

तिकंपूर्वविद्धिशेत।एवंश्रावणेवडवाप्रसवोदिनेनिषिद्धः।तदुक्तमथर्ववेदिनांगार्ग्यपरिशिष्टेमाघेबुधेचमहिषीश्रवणेवड
वादिवा।सिंहेगावःप्रसूयंतेस्वामिनोमृत्युदायकाऽइति।ऐमात्रि अत्रतदुक्तामृताख्याशांतिःकार्या।भाद्रकृष्णतृतीया
कज्जलीसंज्ञासापराग्राह्येतिदिवोदासीयेउक्तं।भाद्रकृष्णचतुर्थीबहुलाख्यामध्यदेशेप्रसिद्धा।सासायाह्नव्यापिनी
ग्राह्या।दिनद्वयेसत्त्वेपूर्वा।गौर्याश्चतुर्थ्यवटधेनुपूजादुर्गाचैवंदुर्भरेहोलिकेच।वत्सस्यपूजाशिवरात्रिरेताःपराह्नित्ताङ्ग
तिरूपंसराशुमितिदिवोदासीयवचनात्।अत्रवत्सपूजायाःपृथगुपादानात्धेनुपूजाशब्देनबहुलाख्यागौःस्वतस्त्विति
स एवव्याचख्यौ।मदनरत्नेप्येवं॥अत्रगोपूजायवान्नाशनंचतत्रैवोक्तं।भाद्रकृष्णषष्ठीहकषष्ठी।सासप्तमीयुतेदि
तिदिवोदासः।भाद्रकृष्णसप्तम्यांशीतलाव्रतंतत्रपूर्वाग्राह्येतिहेमाद्रौ॥अथजन्माष्टमी।साचकृष्णादिमासेन
भाद्रपदकृष्णाष्टमी।तथाभाद्रपदेमासेकृष्णाष्टम्यांकलौयुगे।अष्टाविंशतिमेजातःकृष्णोसौदेवकीसुतःइतिक
ल्पतरौब्राह्मोक्तेः।अत्रेदंमाधवमतं।अष्टमीद्वेधा।जन्माष्टमीजयंतीचेति।तत्राद्याकेवलाष्टमी।येनकुर्वंतिजानंतः
कृष्णजन्माष्टमीव्रतं।तेभवंतिनराःप्राज्ञव्यालाध्याघ्राश्चकानने।इतिस्कांदात्।दिवावायदिवारात्रौनास्तिचेद्रोहि
णीकला।रात्रियुक्तांप्रकुर्वीतविशेषेणेंदुसंयुतामितिपुराणांतरात्।श्रावणेबहुलेपक्षेकृष्णजन्माष्टमीव्रतं।नकरो

तिनरो यस्तु भवति क्रूरसत्त्वसः। इति भविष्योक्तेश्च। केवलाष्टम्या एव तु पोष्या वगते। सैव रोहिणीयुता जयंती। कृष्णाष्टम्यां भवेद्य
त्र कलैका रोहिणी यदि। जयंती नाम सा प्रोक्ता उपोष्या सा प्रयत्नतः। इति वह्निपुराणात्। अष्टमी कृष्णपक्षस्य रोहिणीऋ
क्षसंयुता। भवेत्प्रौष्ठपदे मासि जयंती नाम सा स्मृतेति विष्णुरहस्यादिवचनाच्च। ज्योतिरादिवत्संज्ञया कर्मभेदः। रोहिणी
योगश्चाहोरात्र्यं मुख्यः। निशीथमात्रे मध्यमः। दिवसादावधमः। अहोरात्रं तयोर्योगोऽसंपूर्णो भवेद्यदि। मुहूर्त्तमप्यहो
रात्रे योगश्चेत्तामुपोषयेदिति वसिष्ठसंहितोक्तेः। अर्द्धरात्रे तु योगोयं तारापत्युदये सति। नियतात्मा शुचिः स्नातः पूजां त
त्र प्रवर्त्तयेत्। इति विष्णुधर्मोक्तेः। वासरे वा निशायां वा यत्र स्वल्पापि रोहिणी। विशेषेण नभोमासे सैवोपोष्या मनीषिभि
रिति पुराणांतराच्च। विशेषेणेति श्रुतेः। भाद्रपदेपीदं। श्रावणे वा नभस्येवेति वक्ष्यमाणत्वात्। गौडास्तु। निशीथ एव रो
हिणीयोगे जयंती नान्यथेत्याहुः। तन्न। वासरे वा निशायां वेति विरोधात्। योगविशेषात्तु णात्फलमित्यन्ये। तेप्यक
रणे दोषश्रुतेरुपेक्ष्याः। तत्र जन्माष्टमीव्रतं नित्यं। अकरणे निंदाश्रुतेः। वर्षे वर्षे तु या नारी कृष्णजन्माष्टमीव्रतं। नक
रोति महाप्राज्ञ व्याली भवति कानने। इति स्कांदे दोषश्रुतेश्च। मदनरत्ने स्कांदेऽत्र फलमप्युक्तं। जन्माष्टमीव्रतं ये वै कु रामः
र्वंति नरोत्तमाः। कारयंत्यथवा लोकाल्लक्ष्मीस्तेषां सदा स्थिरा। सिध्यंति सर्वकार्याणि कृते जन्माष्टमीव्रते। जयंतीव्रतं

तन्नित्यंकाम्यंमहाजयार्थंकृतंजयंतीमुक्तयेनघ।धर्ममर्थंचकामंचमोक्षंचमुनिपुंगव।ददातिवांछितानर्थानन्ये
चान्येप्यतिदुर्लभाः।इतिस्कांदादौफलश्रुतेः।शूद्रान्नेननुयत्पापंशवहस्तस्यभोजने।तत्पापंलभतेकुंतिजयंतीवि
मुखोनरः।नकरोतियदाविष्णोर्जयंतीसंभवंव्रतं।यमस्यवशमापन्नःसहतेनारकींव्यथामित्यकरणेनिंदाश्रुते
श्च।यदाचपूर्वेद्युर्वापरेद्युर्वारोहिणीयोगस्तदाजन्माष्टमीजयंत्यामंतर्भूताज्ञेया।ननुजन्माष्टमीव्रतंपृथक्कार्यं।त
दुक्तंमाधवेनैव।यस्मिन्वर्षेजयंत्याख्ययोगोजन्माष्टमीतदा।अंतर्भूताजयंत्यांस्यादृक्षयोगप्रशस्तितइतिमदनरत्ने
निर्णयामृतगौडमैथिलमतेप्येवं।हेमाद्रिस्तु।रोहिणीसंयुतोप्येषासर्वाघौघविनाशिनी।अर्धरात्रादधश्चोर्ध्वंकल
यावापयदाभवेत्।जयंतीनामसाप्रोक्तासर्वपापप्रणाशिनीत्यग्निपुराणादर्द्धरात्रएवरोहिणीयोगस्यप्राशस्त्यात्।मु
हूर्तमपिलभ्येतेत्यादीनांचार्द्धरात्रयोगेप्युपपत्तेर्नजयंतीव्रतंभिन्नं।तत्त्वंतुहेमाद्रिमतेपिजयंतीव्रतंभिन्नमेव।उ
दयेचाष्टमीत्यस्यतेमजयंतीपरत्वोक्तेः।रोहिण्यामर्धरात्रेचयदाकृष्णाष्टमीभवेत्।तस्यामभ्यर्चनंशौरेर्हंतिपापंत्रि
जन्मजमितिविष्णुधर्मोक्तेः।समायोगेतुरोहिण्यांनिशीथेराजसत्तम।समजायतगोविंदोबालरूपीचतुर्भुजः।तस्मा
त्तंपूजयेत्तत्रयथावित्तानुरूपतः।इतिवह्निपुराणाच्चार्द्धरात्रस्यकर्मकालत्वमवसीयते।अतःकर्मणोयस्ययःकालइत्यादि

७४

वक्तव्यात्सर्वत्रैव प्राप्तेः परदिने सतोपि रोहिणीयोगस्य न प्रयोजकत्वं। अन्यथा बुधवारादेरपि तत्वापत्तेः॥ किं चाजयंतीशब्दो रात्रिवि-
शेषवचनः। अभिजिन्नामनक्षत्रं जयंती नाम शर्वरी। मुहूर्तो विजयो नाम यत्र जातो जनार्दनः। इति हेमाद्रौ ब्रह्मांडपुराणात्। ते-
न तद्योगि रोहिण्यां गौणत्वान्न व्रतभेदः। परत्र वा सतो वा निशायां वेति तत्कैमुतिकन्यायेन निशीथयोगस्यैव कृतस्यार्थ्ये पूर्व-
दिने द्वैरात्रयोगाभावे वा प्राशस्त्यार्थं। यद्यपि दिवा वा यदि वा रात्रौ नास्ति चेद्रोहिणीकला। रात्रियुक्तां प्रकुर्वीत विशेषेणें-
दुसंयुतामित्यनेन रोहिणीयोगाभावे द्वैरात्रव्याप्तेर्ग्राह्यतोक्ता। तथापि यस्मिन्वर्षे जयंतीयोगो नास्ति तत्र जयंतीलोप-
प्रसंगेष्टमीमात्रेपि जयंतीव्रतं कार्यमित्येव परमिति तदाशयः। अत एवोक्तं जयंती नाम शर्वरीति। यच्च स्कांदं। उदये चाष्ट-
मी किंचिन्नवमी सकला यदि। भवेत्तु बुधसंयुक्ता प्राजापत्यर्क्षसंयुता। अपि वर्षशतेनापि लभ्यते वाथवा न वेति। यच्च
पद्मे। प्रेतयोनिंगतानां तु प्रेतत्वं नाशितं नरैः। यैः कृता श्रावणे मासि अष्टमी रोहिणीयुता॥ किं पुनर्बुधवारेण सोमेना-
पि विशेषतः॥ किं पुनर्नवमीयुक्ता कुलकोट्यास्तु मुक्तिदेति। तद्दानादिविषयं उपवासाश्रवणादित्यनंतभट्टः। जयंती
परमिति हेमाद्रिः। उदये चंद्रोदये रात्रिलक्ष्यं। तन्न। चंद्रोदये सत्वे व्यासंदेहात् नवमी सकलेत्य योगान्मानाभावाच्च। तेन पूर्वे-
द्युः सप्तमीवेधे परदिने सूर्योदये घटिकापि ग्राह्या। पूर्वविद्धाष्टमीतिपाभोक्तेरित्युक्तेः। अतो न व्रतभेदो नाप्यंतर्भाव इत्याहुः। गौ-

एमः

ठाक्तनवमीद्वयपरमिदं वचनं। नवमी सकलाप्यदीति विशेषोक्तेः। एतत्सर्वं दिने जयंत्यभावपरमित्याहुः। जयंत्यां दिवसे वोपवा
सोयमिति चूडामणिपाद्मः। वयं तु सत्यं व्रतभेदः। लोकास्तु जन्माष्टमीमेवानुतिष्ठंति। न हि श्रावणे वा नभस्ये वा रोहिणी
सहिताष्टमी। यदा कृष्णा नरैर्लब्धा सा जयंतीति कीर्तिता। श्रावणेन भवेद्योगो नभस्ये तु भवेद्ध्रुवं इति माधवीये वसिष्ठसं
हितोक्तापि भाद्रे जयंती केनापि क्रियते। यद्वा गुणात्फलं। सप्तमे ब्रह्मवर्चसकाममुपनयेदि त्विदित्यन्ये। तन्न। नित्य
ताद्यनुपपत्तेः। अतः जयंतीव्रतस्यानित्यत्वादुपवासद्वयं कार्यमिति ब्रूमः। अत एव हेमाद्रिमदनरत्नादौ जन्माष्टमी
व्रतं जयंतीव्रतं च भिन्नमुक्तं। भिन्नकालत्वात्सर्वथा तावदं तद्भावो नेति सिद्धं। तत्त्वं तु पूर्वा वा परा वापि रोहिणीयु
तैव कार्येति निर्णयामृतं। तज्जयंतीपरं। इदं काम्यमेवेत्यनंतभट्टः। तद्दूषणं हेमाद्रौ ज्ञेयं। नित्यं काम्यमिति तु ब
हवः। अत्र निशीथवेध एव ग्राह्यः। पूर्वोक्तवचनेषु तस्यैव मुख्यकालत्वोक्तेः। अष्टमी शिवरात्रिश्च अर्द्धरात्रादधो यदि
दृश्यते घटिकाप्येका सा पूर्वविद्धा प्रकीर्तिता इति माधवीये पुराणांतरात्। अर्द्धरात्रे तु रोहिण्यां यदा कृष्णाष्टमी भवेत्। त
स्यामभ्यर्चनं शौरेर्हंति पापं त्रिजन्मजमिति भविष्योक्तेः। अष्टमी रोहिणीयुक्ता निश्यर्द्धे दृश्यते यदि। मुख्यकाल इति
ख्यातस्तत्र जातो हरिः स्वयमिति वसिष्ठसंहितोक्तेश्च। तत्राष्टमी द्विधा रोहिणीरहिता तद्युता च। आद्यापि पंचधा। पू

७५ र्वेद्युरेवनिशीथयोगिनीपरेद्युरुभयेद्युरनुभयेद्युश्चेति।तत्राद्ययोरसंदेहएवकामकालव्याप्तेः।जन्माष्टमीरोहिणीचशिव
रात्रिस्तथैवच।पूर्वविद्धैवकर्त्तव्यातिथिभांतेचपारणमितिभृगूक्तेश्च।अस्माकंकेवलरोहिण्युपवासोपिसिद्धः।अन्त्ययोः
परैव।प्रातःसंकल्पकालव्याप्तेराधिक्यात्।वर्ज्जनीयाप्रयत्नेनसप्तमीसंयुताष्टमीतिब्रह्मवैवर्त्ताद्याः।एवमंशतःस
मव्याप्तावपि।विषमव्याप्तौत्वाधिक्येननिर्णयः।रोहिणीयुतापिचतुर्धा।पूर्वेद्युरेवरोहिणीयुता।परेद्युरुभ
येद्युरनुभयेद्युश्च।अत्राप्याद्ययोरसंदेहः।कार्याविद्धापिसप्तम्यारोहिणीसहिताष्टमीतिपाद्मोक्तेः।जयंत्यांपू
र्वविद्धायामुपवासंसमाचरेदितिगारुडात्।सप्तमीसंयुताष्टम्यांनिशीथेरोहिणीयदि।भवितासाष्टमीपुण्यायाव
च्चंद्रदिवाकरावितिवह्निपुराणाच्च।द्वितीयेप्यसंदेहएव।तृतीयपक्षेपक्षेपरैव।वर्ज्जनीयाप्रयत्नेनसप्तमीसंयुताष्ट
मी।सर्क्षापिनकर्त्तव्यासप्तमीसंयुताष्टमीतिब्रह्मवैवर्त्तात्।चतुर्थ्यापित्रेधा।पूर्वेद्युर्निशीथेष्टमीपरेऽह्निरोहिणी
परेद्युरष्टमीपूर्वेऽह्निरोहिणी।उभयेद्युरुभयस्यानिशीथासंबंधोवेति।आद्येपरेद्युर्जयंतीयोगस्यसत्वात्परैवेतिमाध
वः।तदुक्तंतेनैव।यास्मिन्वर्षेजयंत्याख्ययोगोजन्माष्टमीतदा।अंतर्भूताजयंत्यांस्यादत्रयोगप्रशस्तितः।इति।पूर्ववि
द्धाष्टमीयातुउदयेनवमीदिने।मुहूर्त्तमपिसंयुक्तासंपूर्णासाष्टमीभवेत्।कलाकाष्ठामुहूर्त्तोपियदाकृष्णाष्टमीति

रामः

यिः।नवम्यांसैवग्राह्यासप्तमीसहितानहीतिपाद्मोक्तेश्च।हेमाद्रिस्त्वाह।अष्टम्याःप्राधान्यात्तस्याश्चपूर्वेद्युःकर्मकालव्यापित्वात्पूर्वैव।पारणंतुपूर्वेद्युर्निशीथेऽष्टम्यभावेत्वियं।अंतर्भावोक्तिस्तुमर्त्येवधंप्रणामात्रमित्याहुः।अन्येतुपूर्वविद्धाष्टमीवाक्वोजन्माष्टम्यांसूर्योदयेसप्तमीवेधनिषेधात्कलाघटिकामात्राप्यौदयिकीग्राह्या।कार्याविद्धापिसप्तम्येतितुजयंतीपरं।जयंत्यांपूर्वविद्धायामुपवासंसमाचरेदित्येकवाक्यत्वात्।तथापिद्वयोर्नित्यत्वात्कालभेदाच्चोपवासद्वयंभवत्येव।यदातुकेवलाष्टमीशुद्धाधिकातदात्यागहेतोःसप्तमीवेधस्याभावाद्दिवाविद्धन्मूलात्तदापरेद्युर्ग्राह्यास्याविधेरभावात्पूर्वैव।एवंसर्वाण्यौदयिकवाक्यानिसप्तमीवेधपराणि।यत्तुजन्माष्टमीपूर्वविद्धासऋक्षांसकलामपि।विहायनवमींशुद्धामुपोष्यव्रतमाचरेदितिव्यासोक्तेर्विद्धायाःत्यागेशुद्धनवम्यामुपवासः।दशमीवेधेद्वादश्युपवासवदित्याद्युक्तेनिर्मूलत्वादुपेक्ष्याः।मुहूर्त्तमपिसंयुतेतिरोहिणीयोगएवत्याज्यत्वोक्तेः।तिथ्यंतपारणावाक्यानांनिर्विषयत्वापत्तेः।नचजयंतीपराणि।शुद्धाधिकपराणिवातानि।भृग्वादेःपूर्वविद्धाष्टम्यामपितिथ्यंतेपारणोक्तेः।तेनकलाकाष्ठेतिवाक्यं।तद्वशात्तुजयंतीपरमेव।तत्त्वंतु।अष्टम्याःकर्मकालव्याप्तेः।दिवावायदिवारात्रौनास्तिचेद्रोहिणीकला।रात्रियुक्तांप्रकुर्वीतेतिपूर्वोक्तवाक्येरोहिणीयोगाभावेग्राह्यत्वोक्तेःवचनात्कर्मकालव्यापिनीत्युक्तापूर्वापरावा

पारणं तु तिथीरष्टगुणं हंति नक्षत्रं च चतुर्गुणं ॥ तस्मात्प्रयत्नतः कुर्यात्तिथिभांते च पारणमिति ब्रह्मवैवर्त्ताद् ॥४

७६ त्वापि रोहिणीयुता जयंत्यां ग्राह्या ॥ माधवमदनरत्ननिर्णयामृतानंतभट्टगौडमैथिलग्रंथादिष्वप्येवमिति ॥ युक्तं तूपवासद्वयं
कार्यं द्वयोर्नित्यत्वादिति वयं ॥ अंत्ययोः परैव ॥ सप्तमीसंयुताष्टम्यां भूत्वा ऋक्षं द्विजोत्तम ॥ प्राजापत्यं द्वितीयेह्नि मुहूर्त्तैव
भवेद्यदि ॥ तदाष्टयामिकं पुण्यं प्रोक्तं व्यासादिभिः पुरेति स्कांदात ॥ मुहूर्त्तैर्नापि संयुक्ता संपूर्णा साष्टमी भवेत् ॥ किं पु
नर्नवमीयुक्ता कुलकोट्यास्तु मुक्तिदेति पाद्माच्चेति दिक् ॥ कौंतिथ्यृक्षयोर्यदा छेदो नक्षत्रांतमथापि वा ॥ अर्द्धरात्रे
यैवा कुर्यात्पारणं त्वपरेहनि ॥ इति हेमाद्रौ वचनाच्चार्द्धरात्रे उभयांतेन्यतरांते वेति मुख्यः पक्षः ॥ सर्वेष्वेवोपवासेषु दि
वा पारणमिष्यते ॥ इति ब्रह्मवैवर्त्तेन्यविषयं ॥ दिने मुख्यकाललाभेन्यतरांते वाज्ञेयं ॥ गौडास्तु नरात्रौ पारणं
कुर्यादृते वै रोहिणीव्रतात ॥ तत्र निश्यपि तत्कुर्याद्वर्जयित्वा महानिशां ॥ इति ब्रह्मांडपुराणाद्रात्रौ सार्द्धप्रहर
मध्यकोर्ये ॥ महानिशा तु सा ज्ञेया मध्यमं मध्ययामयोः ॥ तथा ॥ मध्यमप्रहरे मात्रे विज्ञेया तु महानिशेति ॥ स्मृत्यं
तरेतत्कल्पतरौ ॥ मदनरत्ने चैवं ॥ कामधेनौ गार्ग्यस्तु ॥ महानिशा तु विज्ञेया मध्यमं प्रहरद्वयमित्याह ॥ वृद्धशातात
पस्तु ॥ महानिशा द्वे घटिके रात्रौ मध्यमयामयोरित्याह ॥ वेदपाठपरमिदमित्यन्ये ॥ महानिशायामन्यतरांते ॥ तृती रामः
यदिने पारणं ॥ अपरेहनीति पारणोत्तरदिनपरत्वात् ॥ जयंत्यामुभयांतापेक्षणादित्याहुः ॥ तत्वे तु महानिशांतोर्वाग

न्यतरांतलाभेमहानिशानिषेधः।महानिशायामेवलाभेतत्रैवपारणमिति।सर्वंचेदंजयंतीपरं।संयोगस्यापिप्रबलत्वात्।जन्मा
ष्टम्यांतिथ्यंतमात्रेपारणं।अशक्तौतुवह्निपुराणे।भांतेकुर्यात्तिथेर्वापिशस्तंभारतपारणमिति।गारुडेविष्णुधर्मेचोजयंत्यां
पूर्वविद्धायामुपवासंसमाचरेत्।तिथ्यंतेवोत्सवांतेवाव्रतीकुर्वीतपारणं।इतिकालादर्शोक्तेश्चेतिसंक्षेपः।अष्टम्यां
विशेषोहेमाद्रौभविष्ये।ततोष्टम्यांतिलैःस्नातोनद्यादौविमलेजले।सुदेशेशोभनंकुर्याद्देवक्याःसूतिकागृहं।तन्म
ध्येप्रतिमास्थाप्यासाचाप्यष्टविधास्मृता।कांचनीराजतीताम्रीपैत्तलीमृन्मयीतथा।वार्क्षीमणिमयीचैववर्णकै
र्लिखिताथवा॥सर्वलक्षणसंपूर्णापर्यंकेचपटावृते।देवकीतत्रचैकस्मिन्प्रदेशेसूतिकागृहे।प्रसूतांचप्रसु
तांचस्थापयेन्मंचकोपरि।मांतत्रबालकंसुप्तंपर्यंकेस्तनपायिनं।यशोदांतत्रचैकस्मिन्प्रदेशेसूतिकागृहे।तद्व
शेकल्पयेत्सार्धंप्रसूतवरकन्यकां॥कश्यपोवसुदेवोयंमदितिश्चैवदेवकी।शेषोवैबलभद्रोयंयशोदादितिरेव
भूत।नंदःप्रजापतिर्दक्षोगर्गश्चापिचतुर्मुखः।गोधेनुःकुंजरास्त्रैवदानवाःशस्त्रपाणयः।लेखनीपार्श्वतत्रैवकालीयो
यमुनाह्रदे।इत्येवमादियत्किंचिच्छक्यात्तेचरितंममः।लेखयित्वाप्रयत्नेनपूजयेद्भक्तितत्परः।मंत्रेणानेनवैं।तेयदे
वकींपूजयेन्नाः।गायद्भिःकिंनराद्यैःसततपरिवृतावेणुवीणादिनादैर्भृंगारादर्शकुंभप्रवरकृतकरैःकिंकरैःसेव्यमाना।

७१ पर्यंकेस्वास्तृतेयामुदिततरमुखीपुत्रिणीसम्यगास्तेसादेवीदेवमाताजयतिसुतनयाःदेवकीकांतरूपा॥पादौसंवाह
यंतीश्रीर्देवक्याश्चरणांतिके॥निषस्मापंकजेपूज्यानमोदेव्यैश्रियेइति।अर्द्धरात्रेवसोर्धारांपातयेद्गुडसर्पिषा॥ना
डीवछेदनंषष्ठीनामादेःकरणंममततोमंत्रेणवेदध्याचंद्रायार्घ्यंसमाहितः॥शंखेतोयंसमादायसपुष्पकुशचंदनं
जानुभ्यांधरणींगत्वाचंद्रायार्घ्यंनिवेदयेत्॥क्षीरोदार्णवसंभूतअत्रिनेत्रसमुद्भवगृहाणार्घ्यंशशांकेमंरोहिण्या
सहितोमम॥ज्योत्स्नापतेनमस्तुभ्यंनमस्तेज्योतिषांपते॥नमस्तेरोहिणीकांतअर्घ्योनिःप्रतिगृह्यतां॥प्रभा
तेब्राह्मणान्शक्त्याभोजयेद्भक्तिमान्नरः॥ॐनमोवासुदेवायगोब्राह्मणहितायच॥शांतिरस्तुशिवंचास्तुइत्यु
क्त्वातांविसर्जयेत्॥इदंप्रतिमासंकृत्वाष्टम्यामपुत्रकं॥मदनरत्नेवह्निपुराणे॥प्रतिमासंचतेपूजामष्टम्यांचकरि
ष्यति।ममचैवाखिलान्कामान्संप्राप्स्यत्यसुतस्तयं॥तथा।अनेनविधिनायस्तुप्रतिमासंनरेश्वर॥करोतिवत्सरंपू
र्णंयावदागमनंहरेः।दद्याद्रूप्यांससंपूर्णांगोभीरत्नैरलंकृतां॥इतिजन्माष्टमीव्रतं॥भाद्रामावास्यायांकुशग्रहण
मुक्तंहारीतेन॥मासेनभस्यमावास्यातस्यांदर्भोच्चयोमतः।अयातयामास्तेदर्भाविनियोज्याःपुनःपुनः॥नभाःश्रा एमः
वणःतिनदर्शांतमासेजन्माष्टम्यनंतरदर्शोलभ्यते।मदनरत्नेतुमासेनभस्यमावास्यातस्यांदर्भोच्चयोमतः।इति

मणाविवाक्यमुक्तं॥ नभस्यो भाद्रपदः। तेन महालयांतर्गतदर्शो लभ्यते गौणमुख्यचांद्राभ्यां एक एव दर्शः इत्यन्ये। भाद्रप
दशुक्लतृतीयायां हरितालिकाव्रतं। तत्र परा ग्राह्या। मुहूर्तमात्रसत्वेपि दिने गौरीव्रतं परे। शुद्धाधिकायामप्येवं गणयो
गप्रशंसनादिति माधवोक्तेः। आद्या मधुश्रावणिका कज्जली हरितालिका॥ चतुर्थीमिश्रिता स्त्रीभिर्द्दिवा नक्तं विधी
यते। तृतीया नभसः शुक्ला मधुश्रावणिका स्मृता॥ भाद्रस्य कज्जली कृष्णा शुक्ला च हरितालिकेति दिवोदासोदा
हृतवचनाच्च। भाद्रशुक्लचतुर्थ्यां सिद्धिविनायकव्रतं। तत्र सा मध्याह्नव्यापिनी ग्राह्या। प्रातः शुक्लतिलैः स्नात्वा म
ध्याह्ने पूजयेन्नृपेति हेमाद्रौ भविष्ये। तत्रैव पूजोक्तेः। मदनरत्नेप्येवं। परदिने एवांशेन साकल्येन वा मध्याह्नेव्याप्त्यभा
वे सर्वपक्षेषु पूर्वा ग्राह्या। तथा च बृहस्पतिः। चतुर्थी गणनाथस्य मातृविद्धा प्रशस्यते। मध्याह्नव्यापिनी चेत्स्यात्पर
तश्चेत्परेहनीति। मातृविद्धा प्रशस्ता स्याच्चतुर्थी गणनायके। द्वयं रविभौमयोरतिप्रशस्ता। भाद्रशुक्लचतुर्थी यदा भौ
मेनार्केण वा युता। महती सात्र विघ्नेशमर्चित्वेष्टं लभेन्नरः इति निर्णयामृते वराहोक्तेः। अत्र चंद्रदर्शनं निषिद्धं। त
था चापरार्के मार्कंडेयः। सिंहादित्ये शुक्लपक्षे चतुर्थ्यां चंद्रदर्शनं। मिथ्याभिदूषणं कुर्यात्तस्मात्पश्येन्न तं सदेति। च
तुर्थ्यां न पश्येदित्यन्वयः। प्रधानक्रियान्वयलाभात्। तेन चतुर्थ्यामुदितस्य पंचम्यां न निषेधः। गौडा अप्येवमाहुः

७८

पराशरोपिकन्यादित्येचतुर्थ्यांतुशुक्लेचंद्रस्यदर्शनं।मिथ्या॥भिदूषणंकुर्यात्तस्मात्पश्येन्नतंतदा॥तद्दोषशांतये॥सिंहः
प्रसेनमवधीदितिविष्णुपुराणे॥सिंहःप्रसेनमवधीत्सिंहोजांबवताहतः।सुकुमारकमारोदीस्तवह्येषस्यमंतकः।इ
ति।भाद्रशुक्लपंचमीऋषिपंचमी॥सामध्याह्नव्यापिनीग्राह्या।पूजाव्रतेषुसर्वेषुमध्याह्नव्यापिनीतिथिरितिमाधवी
येहारीतोक्तेः।दिनद्वयेसत्वेहेमाद्रिमतेपराहिताख्यात्पंचमीतिदीपिकोक्तेः।माधवमतेपूर्वा।सर्वत्रपंचमीपूर्वेत्युक्तेः
ऋषिपंचमीषष्ठीयुतैवेतिदिवोदासः।युग्मवाक्यान्निर्णयस्तूक्तः।अत्रऋषीन्प्रतिमासुपूजयित्वाकृष्टभूमिज
शाकेनवर्तनं।एवंसप्तवर्षाणिकृत्वासप्तकुंभेषुप्रतिमासुसंपूज्यपरेह्नितन्मंत्रेणाष्टोत्तरशतंतिलाहुतीर्हुत्वासप्तब्रा
ह्मणान्भोजयेदितिनिर्णयामृते।भाद्रशुक्लषष्ठीसूर्यषष्ठीसासप्तमीयुतेतिदिवोदासः।शुक्लेभाद्रपदेषष्ठ्यांस्नानं
भास्करपूजनं।प्राशनंपंचगव्यस्यअश्वमेधफलाधिकंमितिवचनात्।कल्पतरौभविष्ये।येयंभाद्रपदेमासिषष्ठीस्या
द्भरतर्षभ।योस्यांपश्यतिगांगेयंदक्षिणापथवासिनं।ब्रह्महत्यादिपापैस्तुमुच्यतेनात्रसंशयः।गांगेयःस्वामिकार्त्ति
केयः।भाद्रशुक्लाष्टमीदूर्वाष्टमीसापूर्वाग्राह्या॥श्रावणीदुर्गानवमीदूर्वाचैवहुताशिनी।पूर्वविद्धातुकर्तव्याशिवरात्रिर्बै
लेर्दिनमितिहेमाद्रौबृहद्यमोक्तेः।शुक्लाष्टमीतिथिर्यातुमासिभाद्रपदेभवेत्।दूर्वाष्टमीतुसाज्ञेनोत्तरासाविधीयते॥इ

भाद्रपदशुक्लसप्तम्यांमुक्ताभरणव्रतं॥तत्रपूर्वा।युग्मवाक्यात्॥२

ललिताषष्ठी
गुर्जरप्रसि
द्धा

एमः

तिपुराणसमुच्चयात्। यत्तुमुहूर्त्तेरौहिणीष्टम्यांपूर्वावायदिवापरा। दूर्वाष्टमीतुसाकार्याज्येष्ठांमूलंचवर्ज्जयेदितितत्रैव
पराकार्येत्युक्तं। तत्पूर्वदिनेज्येष्ठादियोगेद्रष्टव्यं। दूर्वाष्टमीसदात्याज्याज्येष्ठामूलर्क्षसंयुता। तथा। ऐंद्रर्क्षेपूजितादूर्वाहं
त्यपत्यानिनान्यथा। भर्त्तृरामूलेतस्मात्तांपरिवर्ज्जयेत्। इति। तत्रैवतन्निषेधात्। इदमगस्त्योदयेकन्यार्केचनकार्यं
। शुक्लेभाद्रपदेमासिदूर्वासंज्ञातथाष्टमी। सिंहार्कएवकर्त्तव्यानकन्यार्केकदाचन। सिंहस्थेसोह्नमासर्मेऽनुदितेमु
निसत्तमे। इतिमदनरत्नेस्कांदोक्तेः। अगस्त्यउदितेतातपूजयेद्यस्तुदूर्वां। वैधव्यंपुत्रशोकंदशवर्षाणिपंचचेति।
तत्रैवदोषोक्तेश्च। भाद्रशुक्लाष्टम्यांअगस्त्योदयेभाविनिसतिपूर्वंकृष्णाष्टम्यामेवकुर्यादितिहेमाद्रिः दीपिकाप्ये
वं। इदंचव्रतंस्त्रीणांनित्यं। यानपूजयतेदूर्वांमोहादिहयथाविधि। त्रीणिजन्मानिवैधव्यंलभतेनात्रसंशयः। त
स्मात्संपूजनीयासाप्रतिवर्षंवधूजनैः। इतिपुराणसमुच्चयात्। यदाज्येष्ठादिकंविनाष्टमीनलभ्यतेतदातत्रैवोक्तं॥
कर्त्तव्याचैकभक्तेनज्येष्ठामूलंयदाभवेत्। दूर्वामभ्यर्चयेद्भक्त्यानवंध्यंदिवसंनयेत्। इति। अत्रविधिर्मदनरत्नेभवि
ष्ये। शुचौदेशेप्रजातायांब्राह्मणोत्तम॥ स्थाप्यलिंगंततोगंधैःपुष्पैर्धूपैःसमर्चयेत्। दध्यक्षतैर्द्विजश्रेष्ठअर्घ्यंद
द्यात्त्रिलोचने॥ दूर्वाशमीभ्यांविधिवत्पूजयेच्छ्रद्धयान्वितः। मंत्रस्तु। त्वंदूर्वेऽमृतजन्मासिवंदितासिसुरासुरैः। सौभाग्यंसं

७९

ततिं देहि सर्वकार्यकरी भव॥ यथा शाखाप्रशाखाभिर्विस्तृतासि महीतले। तथा ममापि संतानं देहि त्वमजरामरमिति। अत्रानग्निपक्वं भक्षयेत्। अनग्निपक्वमश्नीयात्स्नं दधिफलं तथा॥ अक्षारालवणं ब्रह्मन्नश्नीयान्मधुराण्वितीरितिति तच्चैव भविष्योक्तेः। भाद्रपदेऽधिमासे सति निर्णयदीपे स्कांदे। अधिमासे तु संप्राप्ते नभस्यतदये मुनेः। अर्वाग्पूर्वोव्रतं कार्यं परतो नैव कुत्रचित्। अत्रैव ज्येष्ठापूजोक्ता माधवीये स्कांदे॥ मासि भाद्रपदे शुक्लपक्षे ज्येष्ठर्क्षसंयुता॥ रात्रिर्यस्मिन्दिने कुर्याज्ज्येष्ठायाः परिपूजनमिति। इयं ज्येष्ठायोगवशेन पूर्वा परा वा ग्राह्या॥ दिनद्वये योगे परा पूर्वेह्नि रात्रियोगे पूर्वैव। नवम्या सह कार्या स्यादष्टमी नात्र संशयः। मासि भाद्रपदे शुक्लपक्षे ज्येष्ठर्क्षसंयुता। रात्रिर्यस्मिन्दिने कुर्याज्ज्येष्ठायाः परिपूजनमिति तत्रैवोक्तेः। अस्यापवादः। यस्मिन्दिने भवेज्ज्येष्ठा मध्याह्नादूर्ध्वमप्यणुः। तस्मिन्ह्[illegible]पूजा च न्यूना चेत्पूर्ववासरे॥ इति। इदं केवलतिथौ नक्षत्रे चोक्तं। तत्राद्यं केवलतिथौ कार्यं चांत्यं केवलर्क्षे। तदुक्तं मात्स्ये। प्रत्याब्दिकं तिथावुक्तं पज्ज्येष्ठादेवतं व्रतं। प्रतिज्येष्ठाव्रते यच्च विहितं केवलोडुनि॥ तिथावेवाचरेदाद्यं द्वितीयं केवलर्क्षके॥ इति। अत एव मदनरत्ने भविष्ये। नक्षत्रमात्रे उक्तं। मासि भाद्रपदे पक्षे शुक्ले ज्येष्ठा यदा भवेत्। रात्रौ जागरणं कृत्वा मंत्रैरेतैश्च पूजयेदिति। दाक्षिणात्यास्तु सर्व एव कुर्वंति। हेमाद्रौ स्कांदेपि। मासि भाद्रपदे शुक्ले पक्षे ज्येष्ठर्क्षसंयुते। यस्मिन्कस्मिन्दि-

नि

एभः

नेकुर्यात् [illegible] ज्येष्ठायाः परिपूजनमिति तथा । मैत्रेणावाहयेद्देवीं ज्येष्ठायां तु प्रपूजयेत् । मूले विसर्जयेद्देवीं त्रिदिनं
व्रतमुत्तममिति । मंत्रस्तु । एह्येहि त्वं महाभागे सुरासुरनमस्कृते । ज्येष्ठे त्वं सर्वदेवानां मत्समीपगता भवेति आवाह्य
तामग्निवर्णामिति संपूज्य । ज्येष्ठायै ते नमस्तुभ्यं श्रेष्ठायै ते नमो नमः । शर्वायै ते नमस्तुभ्यं शांकर्यै ते नमो नमः । ज्येष्ठे श्रे
ष्ठे तपोनिष्ठे ब्राह्मिष्ठे सत्यवादिनि । एह्येहि त्वं महाभागे अर्घ्यं गृह्ण सरस्वतीत्यर्घः । भाद्रशुक्लद्वादश्यां श्रवणायोगरहिता
यां पारणं कुर्यात् । आभाकासितपक्षेष्विति । दिवोदासोदाहृतवचनात् । उपोष्यैकादशीं मोहात्पारणं श्रवणे यदि । करो
ति हंति तत्पुण्यं द्वादशद्वादशीभवमिति तच्चैव स्कांदाच्च । अस्यं तत्रैव प्रतिप्रसवः । मार्कंडेयः । विशेषेण महीपाल
श्रवणं वर्द्धते यदि । तिथिक्षये न भोक्तव्यं द्वादशीं लंघयेन्न हीति । केचित्तु । यदा त्वपरिहार्यो योगस्तदा श्रवणन
क्षत्रे त्रेधा विभक्ते मध्यमविंशतिघटिकायोगं त्यक्त्वा पारणं कार्यं । तदुक्तं विष्णुपुराणे । श्रुतेश्च मध्ये परिवर्त्तमेति
सुप्तप्रबोधपरिवर्त्तनमेव वर्ज्यमिति केचित्तु चतुर्द्धा विभज्य मध्ययामद्वयं वर्ज्यमाहुः । अत्र मूलं चिंत्यं । अत्रैव वि
ष्णुपरिवर्त्तनोत्सवं कुर्यात् । संध्यायां विष्णुं संपूज्य प्रार्थयेत् । मंत्रस्तु । तिथितत्वे उक्तः । ॐ वासुदेव जगन्नाथ प्राप्तेयं
द्वादशी तव । पार्श्वेन परिवर्त्तस्व सुखं स्वपिहि माधवेति । अत्रैव शक्रध्वजोत्थापनमुक्तमपरार्के गार्ग्येण । द्वादश्यां तु सि

तेपक्षे मासि पौष्पपक्षे तथा॥ शक्रस्तूत्थापयेद्राजा विश्वश्रवणवासवै॥ अथश्रवणद्वादशी तत्रैकादश्या द्वादशीश्रवण-
योगे सैवोपोष्या॥ एकादशी द्वादशी चैव वैष्णव्यमपि तत्र चेत्। तद्विष्णुशृंखलं नाम विष्णुसायुज्यकृद्भवेत् इति विष्णुधर्मो-
क्तेः॥ नारदीयेपि॥ संस्पृश्यैकादशीं राजन् द्वादशीमपि संस्पृशेत्। श्रवणं ज्योतिषां श्रेष्ठं ब्रह्महत्यां व्यपोहति॥ द्वादशी श्रव-
णस्पृष्टा स्पृशेदेकादशीं यदि। स एव वैष्णवो योगो विष्णुशृंखलसंज्ञितः। इति हेमाद्रौ मात्स्योक्तेश्च। दिनद्वये द्वाद-
शीश्रवणयोगेपि पूर्वा। निर्णयामृते तु स्पर्शे पूर्वार्द्धमन्यथा पठितं॥ द्वादशी श्रवणर्क्षं च स्पृशेदेकादशीं यदी।ति
।तेन हेमाद्रिमते एकादश्याः श्रवणयोगाभावेपि तद्युतद्वादशीयोगमात्रेण विष्णुशृंखलं भवति निर्णयामृतम-
ते तु श्रवणस्यैकादशीद्वादशीभ्यां योग एव विष्णुशृंखलं नान्यथेति। यत्तु निशीथानंतरं सूर्योदयावधि वा द्विक-
लामात्रमपि श्रवणर्क्षं भवति तदापि पूर्वैव। तदुक्तं तत्रैव नारदीये द्वादशीं प्रकृत्य। तिथिनक्षत्रयोर्योगो योगश्चैव नरा-
धिप। द्विकलो यदि लभ्येत स ज्ञेयो ह्यष्टयामिक इति। द्वादशी श्रवणस्पृष्टा कृत्स्ना पुण्यतमा तिथिः। न तु सा तेन सं-
युक्ता तावत्येव प्रशस्यते। इति मदनरत्ने मात्स्याच्च। दिवोदासीये तु। रात्रेः प्रथमपादे चेच्छ्रवणं हरिवासरे। तदा पूर्वा एप:
मुपवसेत्प्रातर्भीते च पारणमित्युक्तं। इदं तु निर्मूलत्वात्पूर्वविरोधाच्चोपेक्ष्यं। इयं बुधवारेति प्रशस्ता। बुधश्रवणसंयु-

क्षीते वचेद्द्वादशी भवेत। अत्यंतमहती सा स्याद्दत्तं भवति चाक्षयं॥ इति हेमाद्रौ स्कांदात। यानि तु पठंति। उत्तराषाढसंमिश्रं श्रो
णामध्याह्नगापि च। आसुरी सैवता त्याज्येति पुण्यंपुण्यकृतं। उदयव्यापिनी ग्राह्या श्रोणाद्वादशिसंयुता॥ विश्वर्क्षसंयु
ता सा चेन्नैवोपोष्या शुभेप्सुभिरित्यादिवचनानि निर्मूलानि। यद्यपि स्मृत्यर्थसारे उदयव्यापिनी ग्राह्येत्युक्तं। यद्बृहन्नारदी
ये। उदयव्यापिनी ग्राह्या श्रवणद्वादशीव्रते। इति। तद्यदा शुद्धाधिका द्वादशी परदिने एवोदये श्रवणयोगः पूर्वेद्युश्च तद्दि
ने काले योगस्तत्परं। दिनद्वये उदययोगे पूर्वैव बह्वृक्कर्मकालव्याप्तेरित्युक्तं मदनरत्ने। यदा त्वेकादश्येव श्रवणयुक्ता न द्वा
दशी तदापि पूर्वैव। यदा न प्राप्यते ऋक्षं द्वादश्यां वैष्णवं क्वचित। एकादशी तदोपोष्या पापघ्नी श्रवणान्विता इति मदनरत्ने
नारदीयोक्तेः। यदा परैव ऋक्षयुता तदा परा। तत्र शक्तेनोपवासद्वयं कार्यं। एकादशीमुपोष्यैव द्वादशीं समुपोषयेत। न
चात्र विधिलोपः स्यादुभयोर्दैवतं हरिरिति भविष्योक्तेः। यत्तु विष्णुधर्मे पारणांते व्रतं ज्ञेयं। व्रतांते विप्रभोजनं। अ
समाप्ते व्रते पूर्वे नैव कुर्याद्व्रतांतं स्थूलशीर्षवचनात्काम्यमेवेदं। तेनाशक्तस्य नित्यैकादशीव्रतमेवेति मन्यते। द्वा
दश्यामुपवासेन शुद्धात्मा नृप सर्वशः। चक्रवर्तित्वमतुलं संप्राप्नोत्यतुलां श्रियं इति गौडनिबंधे मार्कंडेयोक्तेश्च। दा
क्षिणात्यास्तु। एकादश्यां नरो भुक्त्वा द्वादश्यां समुपोषणात। व्रतद्वयकृतं पुण्यं सर्वं प्राप्नोत्यसंशयमिति। वाराहवामन

पुराणोक्तेः।श्रवणद्वादशीव्रतमेवेत्याहुः।भुक्तेति फलाहारपरंनतुअन्नपरं।अन्नाश्रितानिपापानीतिनिषेधात्।उपवासद्वयंकर्त्तुंनशक्नोतिनरोयदिप्रथमेह्निफलाहारीनिराहारोपरेहनीतिदिवोदासीयेभविष्योक्तेः।अशक्तौतुगृहीतैकादशीव्रतोयस्तंप्रत्युक्तंमत्स्ये।द्वादश्यांशुक्लपक्षेतुनसत्त्वंश्रवणंयदि।उपोष्यैकादशींतत्रद्वादश्यांपूजयेद्धरिमिति।पूजयेन्नतूपवसेदित्यर्थः।अगृहीतैकादशीव्रतस्त्वेदेकादश्यांभुक्त्वाद्वादश्यामुपवसेत्।एवमेकादशींभुक्त्वाद्वादशींसमुपोषयेत्।पूर्ववासरजंपुण्यंसर्वंप्राप्नोत्यसंशयमितिनारदीयोक्तेः।पारणांतूभयांतेन्यतरांतेवाकुर्यात्।तिथिनक्षत्रनियमेतिथिभांतेचपारणामितिस्कांदात्।तिथिनक्षत्रसंयोगेउपवासोयदाभवेत्।पारणंतुनकर्त्तव्यंयावन्नैकस्यसंक्षयइतिनारदीयादितिहेमाद्रिः।यद्यप्यत्रनक्षत्रमात्रांतेपिपारणांप्रतिभातितथापितिथिमात्रांतेज्ञेयंनतुऋक्षांतेतिथिमध्येपि।याःकाश्चित्तिथयःप्रोक्ताःपुण्यानक्षत्रयोगतः।ऋक्षांतेपारणांकुर्याद्विनाश्रवणरोहिणीमितिविष्णुधर्मेश्रवणांतमात्रेपारणानिषेधात्।रोहिण्यांतुभांतेकुर्यात्तिथ्यंतेवापीतिवह्निपुराणात्तदंतेतत्प्रसक्ता।नक्षत्रैवमस्तीतिनक्षत्रांतोनुकल्पइतिमदनरत्ने।यत्तुमदनरत्नेद्वादशीवृद्धौश्रवणवृद्धौवाश्रवणांतएवपारणांकुर्यात्।पारणांतिथिवृद्धौतुद्वादश्यामुडुसंक्षयात्।वृद्धौतुकुर्यात्त्रयोदश्यांतत्रदोषोनविद्यते।इतिवह्निपुराणादित्युक्तं।तत्प्रकरण

देतस्यामेवश्रवणायुतैकादश्यांविहितविजयैकादशीव्रतपारंनतुश्रवणद्वादशीपरमितिमदनरत्ने।गौडास्तुश्रवणद्वाद
शीपरमाहुः।अत्रविधिर्मदनरत्नेविष्णुधर्मे।तस्मिन्दिनेतथास्नानंयत्रक्वचनसंगमे।तथादध्योदनयुतंजलपूर्णंघ
टंद्विजे॥वस्त्रसंवेष्टितंदत्वाछत्रोपानहमेवच।नदुर्गतिमवाप्नोतिगतिमग्र्यांचविंदति।मंत्रस्तुभविष्ये।घटेजनार्दनपू
जामभिधायनमोनमस्तेगोविंदमधुश्रवणसंज्ञक।अघौघसंक्षयंकृत्वासर्वसौख्यप्रदोभव।प्रीयतांदेवदेवेशोम
मसंशयनाशनः।वामनावतारनिमित्तोपवासस्तुव्रतहेमाद्रौभविष्ये।द्वादश्यास्तेविधिप्रोक्तःश्रवणेनयुधिष्ठिरः।सर्व
पापप्रशमनःसर्वसौख्यप्रदायकः।एकादशीयदाराजन्स्याच्छ्रवणेनसमन्विता॥विजयासातिथिःप्रोक्ताभक्तानांविज
यप्रदेत्युपक्रम्य।अथकालेबहुतिथेगतेसागुर्विणीभवत्।सुषुवेनवमेमासिपुत्रंसावामनंहरिमित्युक्त्वा।एतत्स
र्वंसमभवदेकादश्यांयुधिष्ठिरः।तेनेष्टादेवदेवस्यसर्वथाविजयातिथिः।एषाव्युष्टिःसमाख्याताएकादश्यांमया
तव।पूर्वमेवसमाख्याताद्वादशीश्रवणान्वितेत्युपसंहारादेकादश्यामेवव्युष्टिःफलं।भागवतेष्टमस्कंधेतुद्वादश्यां
वामनोत्पत्तिरुक्ता॥श्रोणायांश्रवणद्वादश्यांमुहूर्तेभिजितिप्रभुः।ग्रहनक्षत्रताराद्याश्चक्रुस्तज्जन्मदक्षिणं।द्वादश्यां
सवितातिष्ठन्मध्यंदिनगतोनृप।विजयानामसाप्रोक्तायस्यांजन्मविदुर्हरेः।श्रोणायांचंद्रेऽभिजितिश्रवणप्रथमांशः

८२ गौडाश्चाप्येवं।अत्रकल्पमेदाघवस्यात्तद्विधिस्तु हेमाद्रौ वह्निपुराणे।नदीनांसंगमेस्नात्वाप्यादर्चयेद्दत्तवामनं।सौवर्णेवस्त्रसंयु
क्तंद्वादशांगुलमुच्छ्रितं।ततोविधिवत्संपूज्यहिरण्मयेनपात्रेणदद्यादर्घ्यंप्रयत्नतः।नमस्तेपद्मनाभायनमस्तेजलशायि
ने।तुभ्यमर्घ्यंप्रयच्छामिबालवामनरूपिणे।नमःकमलकिंजल्कपीतनिर्मलवाससे।।महाहवरिपुस्कंधघृष्टचक्रायच
क्रिणे।नमःशार्ङ्गासिमीरबाणपाणायेवामनायच।यज्ञभुक्फलदात्रेचवामनायनमोनमः।देवेश्वरायदेवायदेवसं
भूतिकारिणे।प्रभवेसर्वदेवानांवामनायनमोनमः।एवंसंपूजयित्वातंद्वादश्यामुदयेरवेः।भृंगारसहितंतंतुब्राह्मणा
यनिवेदयेत्।वामनःप्रतिगृह्णातिवामनोहंददामिते।वामनंसर्वतोभद्रंद्विजायप्रतिपादयेत्।इति।अनंतभट्टो
प्याह।श्रवणद्वादश्यांजनार्दननाम्नाविष्णुःपूज्यतोश्रवणैकादश्यांवामनावतारइति।श्रवणयुतशुद्धैकाद
श्यलाभेतुदशमीविद्धापिश्रवणयुताकार्याद्वाशम्येकादशीयत्रसानोपोष्याभवेत्त्विति।थिः।श्रवणेनतुसंयुक्ता
साचेत्स्यात्सर्वकामदेतिवह्निपुराणादिसूक्तंमदनरत्ने।पूजाचमध्याह्नेकार्या।अह्नोमध्येवामनोरामरामाविति
पूर्वोक्तवचनात्।भागवताश्च।अथैवंदुग्धव्रतंसंकल्पयेत्।तदुक्तंदुग्धमाश्वयुजेमासीति।अत्रेदंचिंत्यते।दुग्धव्रतेपा
यसादिवर्ज्यंनवेति।नेतिकेचित्।नहिप्रकृतिवर्ज्जनेविकारवर्जनंयुक्तं।दधिघृतादीनामपिवर्जनापत्तेः।नचयत्रप्र

एमः

कृतिरसोपलंभस्तत्तद्वर्जनमिति वाच्यं। मांसविकारस्यौष्ट्रदध्यादेश्चावर्जनापत्तेः। तस्माद्दध्यादिवत्सायस्यादितस्यामिति। अत्र ब्रूमः। यत्र विकारे प्रकृतिरसोपलंभस्तत्प्रत्यभिज्ञावात तत्र विकारस्यापि निषेधः। अस्ति च मांसविकारे मांसप्रत्यभिज्ञा मांसत्वानपायात्। यत्त्वौष्ट्रदध्यादेरनिषेधापत्तिरिति। तन्न। औष्ट्रमिति विकारस्तद्धितेन निषेधात्। तथा च विज्ञानेश्वरः। औष्ट्रमेकशफं स्त्रैणमारण्यकमथाविकमित्यत्र औष्ट्रमिति विकारे तद्धिताच्छकृन्मूत्रादीनामपि निषेध इत्याह। नन्वेवं संधिन्यनिर्दशावत्सा गोपयः परिवर्जयेदिति संधिन्यादिक्षीरनिषेधेपि दध्यादिग्रहणं स्यात्। सत्यं प्राप्तं वचनेन परं निषेधः। तदाहापरार्के शंखः। क्षीराणि यान्यभक्ष्याणि तद्विकाराशने बुधः। सप्तरात्रं व्रतं कुर्यात्प्रयत्नेन समाहितः इति। व्रतं गोमूत्रं यावकं। तस्मात्पायसे दुग्धरसोपलंभाद्वर्जनं। अत एवामिक्षायां दधित्वेपि माधुर्योपलंभात्पयोरूपत्वमुक्तं मीमांसकैः। तदुक्तं। पय एव घनीभूतमामिक्षेत्यभिधीयते इति। दध्यादिषु तु तदभावादवर्जनमिति॥ इति दुग्धव्रतं॥ भाद्रशुक्लचतुर्दश्यामनंतव्रतं। तन्मध्याह्नभोज्यवेलायामिति कथायां श्रवणात् उपरिदेवेभ्यो धारयतीति षतविधिकल्पनात्पूजाव्रतेषु सर्वेषु मध्याह्नव्यापिनी तिथिरिति माधवीये वचनान्मध्याह्नव्यापिनी ग्राह्येति तु दिवोदासः। प्रतापमार्तंडेप्येवं। निर्णयामृते तु घटिकामात्राप्यौदयिकीत्युक्तं। तथा भाद्रपदस्यांते चतुर्द

श्यांद्विजोत्तमापौर्णमास्याःसमायोगेव्रतंचानंतकंचरेदिति।भविष्योक्तेः।मुहूर्त्तमपिचेद्भाद्रेपूर्णिमायांचतुर्द्दशी।।संपू
र्णांतांविदुस्तस्यांपूजयेद्विष्णुमव्ययमितिस्कांदाच्चेति।अत्रमूलंचिंत्यं।तत्वंतुविध्यर्थवादयोर्भिन्नार्थत्वेएकवाक्[illegible]या
गात्संदिग्धेषुवाक्यशेषादितिन्यायेनपूर्वापरावामध्याह्नव्यापिन्येवमुख्यामाधवस्तुसामान्यवाक्यान्निर्णयंकुर्वन्
भ्रांतएव।अनंतव्रतस्यपुराणांतरेष्वभावान्निबंधांतरेष्वभावाच्चवचनंनिर्मूलमेवेति।। अथागस्त्यार्घः।तत्कालोव्रता
हेमाद्रौभविष्ये।कन्यायामागतेसूर्येअर्वाग्वैसप्तमेदिने।कन्यायांसमनुप्राप्तेअर्घकालोनिवर्त्तते।तेनोदयोत्रांस
प्तदिनमध्येइत्यर्थः।यत्मात्स्ये।आसप्तरात्रादुदयादर्घमस्यप्रदातव्यमेतत्सकलनरेण।।यावत्समाःसप्तदशाथवा
स्युरथोर्द्धमप्यत्रवदंतिकेचित्।यमस्यागस्त्यस्यउदयकालश्चदिवोदासीयेउक्तः।उदेतियाम्यांहरिसंक्रमाद्वे
रेकाधिकेविंशतिमेह्यगस्त्यः।सप्तसप्तमेस्तंवृषसंक्रमाच्चप्रयातिगर्गादिभिरप्यभाणि।अत्रविधिर्विष्णुरहस्ये।का
शपुष्पमयींरम्यांकृत्वामूर्त्तिंतुवारुणेः।प्रदोषेविन्यसेत्रोतुपूर्णकुंभेस्वलंकृतां।।कुंभस्थांपूजयेत्तांतुपुष्पधूप
विलेपनैः।दध्यन्नतवलिंदद्यात्रात्रौकुर्यात्प्रजागरं।पूजावस्यमाणार्घमंत्रेण।कार्योप्रभातेतांसमादायपायाया एमः
स्तुएपजलाशये।।निशावसानेतांपश्यन्जलांतेप्रतिमांमुनेः।अर्घंदद्यादगस्त्यायभक्त्यासम्यगुपोषितः।।मात्स्येतु

अंगुष्ठमात्रंपुरुषंतथैवसौवर्णमत्यायतबाहुदंडं।पूर्वंकाशमयपात्रमशक्तौ।चतुर्भुजंकुंभमुखेनिधायधान्यानि
सप्तांकुरसंयुतानि सकाशपुष्पाक्षतमुक्तियुक्तं मंत्रेणदद्याद्द्विजपुंगवाय।धेनुंदधिक्षीरवतींचदद्यात्सवस्त्र
घंटाभरणांद्विजाय।भविरूढैःसप्रधान्यैश्चवंशपात्रनिधापितैः।सौवर्णरौप्यपात्रेणताम्रवंशमयेनवा॥मूर्ध्नि
स्थितेननम्रोणजानुभ्यांधरणींगतः।विस्तुरहस्ये।अगस्त्यखनमानेतिपठेन्मंत्रमिमंमुनेः॥अर्घंदद्यादगस्त्याय
शूद्रेमंत्रविधिस्त्वयं।काशपुष्पप्रतीकाशवह्निमारुतसंभव॥मित्रावरुणयोःपुत्रकुंभयोनेनमोस्तुते।विंध्य
वृद्धिक्षयकरमेघतोयविषापह॥रत्नवल्लभदेवेशलंकावासनमोस्तुते।वातापिर्भक्षितोयेनसमुद्रःशोषितः
पुरा।लोपामुद्रापतिःश्रीमानयोसौतस्मैनमोनमः।येनोदितेनपापानिविलयंयांतिव्याधयः।तस्मैनमोस्त्वग
स्त्यायसशिष्यायचपुत्रिणे॥अगस्त्यःखनमानेतिविप्रोर्घ्यंविनिवेदयेत्।राजपुत्रीमहाभागेऋषिपत्नीवरा
नने।लोपामुद्रेनमस्तुभ्यंमर्घ्यंमेप्रतिगृह्यतां॥दत्वैवमर्घ्यंकौरव्यप्रणिपत्यविसर्जयेत्।अर्चितस्त्वंय
थाशक्तिनमोगस्त्यमहर्षये।ऐहिकामुष्मिकींदत्वाकार्यसिद्धिंव्रजस्वमे॥विसर्जयित्वागस्त्यंतंविप्रायप्रति
पादयेत्।अगस्त्योमेमनःस्थोस्तुअगस्त्योस्मिन्घटेस्थितः।अगस्त्योद्विजरूपेणप्रतिगृह्णातुसत्कृतः।दान

८४

मंत्रः॥ अगस्त्यः सप्तजन्माघनाशपलाववयोऽयं। अतुलं विमलं सौख्यं प्रयच्छ त्वं महामुने॥ प्रतिग्रहमंत्र विष्णुर्हस्ते। त्यजेदग
स्त्यमुद्दिश्य धान्यमेकं फलं रसं। होमं कृत्वा ततः पश्चादूर्जयेन्मानवः फलं। होमश्चार्द्धे मंत्रेणाज्येन। भविष्ये। दत्वार्घमष्ट
वर्षाणि क्रमेणानेन पांडव॥ ब्राह्मणः स्याच्चतुर्वेदः क्षत्रियः पृथिवीपतिः। वैश्ये च धान्यनिष्पत्तिः शूद्रश्च धनवान्भवेत्
॥ यावदायुश्च यः कुर्यात्स परं ब्रह्म गच्छति। इत्यगस्त्यार्घः। भाद्रपौर्णमास्यां प्रपितामहात्परांस्त्रीनुद्दिश्य श्राद्धं कार्यं
तदुक्तं हेमाद्रौ ब्राह्ममार्कंडेययोः। नांदीमुखानां प्रत्यब्दं कन्याराशिगते रवौ। पौर्णमास्यां तु कर्त्तव्यं वराहवचनं यथे
ति। नांदीमुखत्वं चोक्तं ब्राह्मे। पिता पितामहश्चैव तथैव प्रपितामहः। त्रयो ह्यश्रुमुखा ह्येते पितरः परिकीर्तिताः। ते
भ्यः पूर्वतरा ये च प्रजावंतः सुखैधिताः। ते तु नांदीमुखा नांदी समृद्धिरिति कथ्यते। एतच्च प्रत्याब्दिकमित्युक्तेः पक्ष
श्राद्धपक्षे सकृन्महालयपक्षे चावश्यकमिति प्रयोगपारिजाते। अत्र मातामहा अपि कार्याः। पितरो यत्र पूज्यंते तत्र
मातामहा अपीति धौक्तेः॥ पितृशब्दस्य च जनकपरत्वे बहुवचनविरोधेन पितृभावापन्नपरत्वात्। वार्षिके तु वचना रामः
न्निवृत्तिः। न च जीवत्पितृकस्यान्वष्टकायां मातृश्राद्धे तदापत्तिः। इष्टापत्तेः। अत एव सउक्तश्राद्धेषु स्वमातृमातामहयोः
ईघादिति। मदनरत्नकालादर्शौ। एतज्जीवत्पितृकश्राद्धं वक्ष्यामः। केचित्तु अजहल्लक्षणया पित्रादयो यत्र मातामहा

त्तेनात्रनेत्याहुः। नचात्रनाम्नानांदीश्राद्धधर्मातिदेशः। वैकल्पवादिशाद्धवद्देवतापरस्यकर्मनामत्वाभावात्। नापिनांदीमुख
त्वंपितृविशेषणं। पारिभाषिकत्वादितिदिक्। तथानिर्णयदीपेगार्ग्यः। पौर्णमासीषुसर्वासुनिषिद्धंपिंडपातनं। वर्जयि
त्वाप्रोष्ठपदींयथादर्शस्तथैवसेति॥ इतिनिर्णयसिंधौभाद्रपदमासः॥ कन्यासंक्रमेपराःषोडशघटिकाःपुण्यकालः
शेषंप्रागुक्तं॥ अथमहालयः। तत्रपृथ्वीचंद्रोदयेवृद्धमनुः। आषाढीमवधिंकृत्वापंचमंपक्षमाश्रिताः। कांक्षंतिपित
रःक्लिष्टाअन्नमप्यन्वहंजलं॥ कन्यायोगेपुण्यतमत्वमाहशाट्यायनिः। कन्यास्थार्कान्वितःपक्षःसोत्यंतंपुण्यउच्य
ते।शौरति। अत्रविशेषमाहवृद्धमनुः। मध्येवायदिवाप्यंतेयत्रकन्यांव्रजेद्रविः। सपक्षःसकलःश्रेष्ठःश्राद्धषोडशकंप्रति।
तथाब्रह्मांडमार्कंडेययत्रकन्यांव्रजेद्रविः। सपक्षःसकलःश्रेष्ठःश्राद्धषोडशकंप्रति। तथाब्रह्मांडमार्कंडेययोः। कन्या
गतेसवितरिदिनानिदशपंचच। पार्वणेनेहविधिनाश्राद्धंतत्रविधीयते तथातत्रैवषोडशदिनान्युक्तानि। कन्यागते
सवितरियान्यहानितुषोडश। क्रतुभिस्तानितुल्यानिदेवोनारायणोब्रवीत्। अत्रहेमाद्रिःषोडशत्वंत्रेधाव्याचख्यौ।
तिथिवृद्ध्यापक्षस्यषोडशदिनत्वेश्राद्धहध्यर्थमित्येकःपक्षः भाद्रपूर्णिमयासहेतिपदासह। चंद्रक्षयाविशेषेणसा
पिदर्शांतिकास्मृतेतिदेवलोक्तेः। अत्रपंचपक्षाः तदुक्तंहेमाद्रौब्राह्मे। अश्वयुक्कृष्णपक्षेतुश्राद्धंकुर्याद्दिनेदिने। त्रिभा

परि २
४१

८५

गहीनपक्षंवात्रिभागमर्द्धमथवादिनेदिनेइतिपक्षपर्यंतत्वमुक्तं।त्रिभागहीनमिति।पंचम्यादिपक्षः।मौञ्जंगीतिथिमारभ्य
यावच्चंद्रार्कसंगममिति वाक्यात्।अर्द्धमित्यष्टम्यादिपक्षः।त्रिभागमिति दशम्यादिपक्षः।त्रिभागहीनमिति चतुर्दशी
सहितप्रतिपदादिचतुष्टयंपर्जनाभिप्रायेणेति कल्पतरुः।अत्रदिनपदं तिथिपरं।वीप्सयातत्पंक्तीपतिथित्वंश्राद्ध
व्याप्यतावच्छेदकौ।तेनपंचदशतिथिव्यापिश्राद्धंसिध्यति।तेनचतुर्दशीनिषेधोऽन्यकृष्णपक्षपरःइतिगौडाः।तन्न।श्रा
द्धेशस्त्रहतस्यैवचतुर्दश्यांमहालये।इत्यादिविरोधात्।यत्तुकश्चित्।पूरणप्रत्ययलोपेनतृतीयभागहीनंषष्ठ्या
दितृतीयभागमेकादश्यादि।तदर्द्धंत्रयोदश्यादिउत्तरोत्तरंलघुकालोक्तेरिति।तन्न।गौतमादिवशेनमूलकल्पना
लाघवात्।पक्षमित्यन्वयापत्तेश्च।पंचम्यूर्ध्वंचतत्रापिदशम्यूर्ध्वंततोप्यतीतितिविष्णुधर्मोक्तेःषष्ठ्याद्येकादश्यादि
पक्षावपिज्ञेयाविति तत्त्वं।काष्णाद्दर्शेपि।पञ्चाषाढ्यादिचदर्शांतंपंचम्यादिदिग्गादिच।अष्टम्यादियथाशक्तिकुर्यादा
परपक्षिकं।पक्षादिःप्रतिपत्तादिकृष्णदशमीदर्शांतमिति।सर्वत्रगौतमोपि।अथापरपक्षेश्राद्धंपितृभ्योदद्यात्पंच
म्यादिदर्शांतमष्टम्यादिदशम्यादिसर्वस्मिन्वेति।तथैकस्मिन्नपिदिनेश्राद्धमुक्तंहेमाद्रौनागरखंडे।आषाढ्याःपंच
मेपक्षेकन्यासंस्थेदिवाकरे।योवैश्राद्धंनरःकुर्यादेकस्मिन्नपिवासरे।तस्यसंवत्सरंयावत्तृप्ताःपितरोध्रुवमिति।अ

त्रशक्ताशक्तपक्षव्यवस्थेतिप्रांचः।तन्न।तद्वाचकपदाभावात्।त्रयोदश्यादिपक्ष एवनित्यः तत्रैवनिंदाश्रुतेः।श्रा
द्धे एवकारेण तस्यैवपंचमपक्षायोगव्यवच्छेदोक्तेरितिगौडाः।तन्न।एकस्मिन्नपीतिविरोधात्।तेनफलभूमार्थिनान्यानि
कार्याणीतितत्त्वं।तत्रचतुर्दशीश्राद्धाभावेपंचम्यादिदशम्यादिपक्षौ।तन्मतेषष्ठ्याद्येकादश्यादिकौ।एवंचतुर्दश्य
भावेद्वादश्यादिः।तत्सत्वेत्रयोदश्यादिरितिव्यवस्था॥विधवायास्तुविशेषःस्मृतिसंग्रहे।चत्वारःपार्वणाःप्रोक्ता
विधवायाःसदैवहि।स्वभर्तृश्वशुरादीनांमातापित्रोस्तथैवच।ततोमातामहानांचश्राद्धदानमुपक्रमेत्।तथा
श्वश्रूणांचविशेषेणमातामहस्यास्तथैवचेति।अशक्तौतुस्मृतिरत्नावल्यां॥स्वभर्तृप्रभृतित्रिभ्यःस्वपितृभ्य
स्तथैवच।विधवाकारयेच्छ्राद्धंयथाकालमतंद्रिता॥विधवासंकल्पंकृत्वान्यब्राह्मणद्वाराकारयेदित्युक्तंत्र
योगपारिजाते।सकृन्महालयेचवर्ज्यतिथ्याद्युक्तंपृथ्वीचंद्रोदयेप्रयोगपारिजातादिषु।वसिष्ठःनंदायां
भार्गवदिनेचतुर्दश्यांत्रिजन्मसु।एषुश्राद्धंनकुर्वीतगृहीपुत्रधनक्षयात्।जन्मभंतत्पूर्वोत्तरेचत्रिजन्मानि
वृद्धगार्ग्यः।प्राजापत्येचपौष्णेचपित्र्यर्क्षेभार्गवेतथा।यस्तुश्राद्धंप्रकुर्वीततस्यपुत्रोविनश्यति।प्राजापत्यंरो
हिणी।पौष्णंरेवती॥पित्र्यंमघा॥अन्यान्यपिप्रत्यरादीनितत्रैवज्ञेयानि।केचित्तुनंदाश्वकामस्रगवश्रिपितृका

८६

लमेगटे वै धृतिपाते च पिंडास्त्याज्याः सुतैस्त्रिभिरिति संग्रहात्। नंदाः प्रतिपत्षष्ठ्येकादश्यः अष्टा सप्तमी कामत्रयोदशी
आ ए भौमः भृगुः शुक्रः अग्निभं कृत्तिका। कालभं भरणी। अत्र पिंडाहर्त्याज्या इत्याहुः। तत्र मूलं मृग्यं। एतत्सकृन्म
हालयविषये। सकृन्महालये काम्ये पुनः श्राद्धे खिलेषु च। अतीतविषये चैव सर्वमेतद्विचिंतयेत्। इति पृथ्वीचंद्रो
दये नारदोक्तेः। अस्यापवादो हेमाद्रौ पृथ्वीचंद्रोदये च। अपपाते भरण्यां च द्वादश्यां पक्षमध्यके। तथा तिथिं
च नक्षत्रं वारं च न विचारयेत्। पराशरमाधवीयमदनपारिजातादिषु चैवं। निर्णयदीपिकायां तु पितृमृताहे निषि
द्धदिनेपि सकृन्महालयः कार्य इत्युक्तं। आषाढ्याः पंचमे पक्षे कन्यासंस्थे दिवाकरे। मृताहनि पितुर्यो वै श्राद्धं
दास्यति मानवः। तस्य संवत्सरं यावत्संतृप्ताः पितरो ध्रुवमिति नागरखंडोक्तेः। या तिथिर्यस्य मासस्य मृताहे तु
प्रवर्त्तते। सा तिथिः पितृपक्षे तु पूजनीया प्रयत्नतः। तिथिच्छेदो न कर्त्तव्यो विनाशो चंनिजेछया। पिंडश्राद्धं च क
र्त्तव्यं विधिच्छित्तिं नैव कारयेत्। अशक्तः पक्षमध्ये तु करोत्येकदिने यदा। निषिद्धेपि दिने कुर्यात्पिंडदानं यथा। विधी
ति कात्यायनोक्तेश्च। अत्र मूलं चिंत्यं। तथा पक्षश्राद्धकरणेपि नंदादिषु पिंडनिषेधः इत्याह। पराशरमाधवीये।
कार्ष्णाजिनिः। नभस्यस्यापरे पक्षे श्राद्धं कार्यं दिने दिने। नैव नंदादि वर्ज्यं स्यान्नैव निंद्या चतुर्दशीति। अत्र श्राद्धमि

एमः

त्येकवचनाद्दिनेद्दिनेइतिवीप्सावशाच्चसोमयागवदेकस्याभ्यासेनैकप्रयोगपरमिदं।ततःप्रतिपत्प्रभृतिष्वेकांवर्ज्जयित्वा
चतुर्द्दशीमितियाज्ञवल्कीयंप्रयोगभेदपरंनतुपंचम्यादिपक्षविषयं।पृथ्वीचंद्रोदयेमदनपारिजातेचैवं।अन्यकृत्स्नपक्ष
परंयाज्ञवल्कीयमेतत्परत्वे।नैवनिंद्याचतुर्द्दशीतिविरोधात्।तत्वंतुतिथिनक्षत्रवारादिनिषेधोपवादात्ततः।सश्राद्धे
तन्निमित्तेस्यान्नानुषंगकृतेष्वसौ।इति।देवोदासीयेबृहद्गार्ग्योक्तेः।तन्निमित्तेपक्षांतरेचज्ञेयः।सकृन्महालयेतुवच
नान्निषेधः।अन्यत्रनकोपिनिषेधः।कार्ष्णाजिनिस्मृतेरपि।अतोनंदादौसापिंडकश्राद्धेपुत्रवतोप्यधिकारः।अत्रिर
पि।महालयेक्षयाहेचदर्शेपुत्रस्यजन्मनि।तीर्थेपिनिर्वपेत्पिंडान्नरविवारादिकेष्वपि।पूर्वोक्तनिषेधस्तुमृताहाति
क्रमेपौर्णमास्यादिमृतश्राद्धेतन्निमित्तेचज्ञेयः।यत्तुस्मृत्यर्थसारे।विवाहव्रतचूडासुवर्षमर्द्धंतदर्द्धकं।पिंडदा
नंमृदास्नानंनकुर्यात्तिलतर्पणमिति।तस्यात्रापवादोदिवोदासीयेबृहस्पतिः।तीर्थेसंवत्सरेप्रेतेपितृयागे
महालये।पिंडदानंप्रकुर्वतयुगादिभरणीमघे।महालयेगयाश्राद्धेमातापित्रोःक्षयेहनि।कृतोद्वाहोपिकु
र्वतपिंडनिर्वपणंसदेति।निर्णयदीपेतुनंदादिनिषेधःप्रत्यहंभिन्नश्राद्धविषयं।षोडशाहव्यापिश्राद्धप्रयोगैक
त्वेतुप्रत्यहंपिंडदानंकार्यमेवेत्युक्तं।तदायमर्थः।संपन्नषोडशाहव्यापिश्राद्धेकोनपिंडनिषेधः।महालयेसकृन्म

हालयेपितथा। इतिकेचित्। प्रत्यहं श्राद्धभेदेपि व्यातीपातादौ तथा। अन्यत्र पिंडनिषेधः इति। संन्यासिनां तु द्वादश्यां श्राद्धंका
र्यं। यतीनां च वनस्थानां वैष्णवस्थानां विशेषतः। द्वादश्यां विहितं श्राद्धं कृष्णपक्षे विशेषतः इति पृथ्वीचंद्रोदये संग्रहोक्तेः
अत्र पक्षे श्राद्धाकरणे गौणकालमाह हेमाद्रौ यमः। हंसे वर्षासु कन्यास्थे शाकेनापि गृहे वसन्। पंचम्योरंतरे दद्यादु
भयोरपि पक्षयोः। आश्विनशुक्लपंचम्यो र्मध्ये इत्यर्थः। तत्राप्यभावे भविष्ये। येयं दीपान्विता राजन् ख्याता पंचदशी भु
वि तस्यां दद्यान्न चेद्दत्तं पितृभ्यो वै महालये। तत्राप्यसंभवे भारते। यावच्च कन्यातुलयोः क्रमादास्ते दिवाकरः। शून्यं
प्रेतपुरं तावद्यावद्वृश्चिकदर्शनं। ब्राह्मे। वृश्चिके समतिक्रांते पितरो दैवतैः सह। निःश्वस्य प्रतिगच्छंति शापं दत्वा सुदारु
णं प्पत्नुजातृकण्यैः। आकांक्षंति स्म पितरः पंचमं पक्षमाश्रिताः। तस्मात्तत्रैव दातव्यं दत्तमन्यत्र निःफलमिति। त
त्फलातिशयहानिपरं। कन्यां गच्छतु वा न वेति तुर्यपादे पाठः। तेन कन्यायोगः प्राशस्त्यमात्रं। अतः श्राद्धविवेको
क्तं श्राद्धद्वयं हेयं। इदं च श्राद्धमन्नेनैव कार्यं। नामान्नादिना। मृताहं च सपिंडं च यच्छ्राद्धं महालये। आपन्नोपि न कु
वत श्राद्धमामेन कर्हिचित्। इति स्मृतिदर्पणे गालवोक्तेः। अथात्र दैवताः संग्रहे। तातांबात्रितयं सपत्न्यजननी एमः
मातामहादित्रयं सस्त्रि स्त्रीतनयादि तातजननी स्वभ्रातरः सस्त्रियः। तातांबात्मभगिन्यपत्यधवयुग्जाया पितासद्गु

हरिष्याश्चापितरोमहालयविधौ तीर्थे तथा तर्प्पणे अस्यार्थः । तातत्रयी पितृत्रयी । अंबात्रयी च । स्मृत्यर्थसारेपि । महालये मातृश्राद्धं पृथक्कु प्रशस्तमिति । अत्र विशेषः स्मृतिदर्पणे गालवः । अनेका मातरो यस्य श्राद्धे चापरपक्षिके । अर्घे दानं पृथक्कुर्यात्पिंडमेकं तु निर्वपेत् । जीवन्मातृकस्तु सपत्नमातुरेकोद्दिष्टं कुर्यान्न पार्वणं ॥ श्राद्धदीपकलिकायां तु । पार्वणमुक्तं । आन्वष्टक्यं च यन्मातुर्गयाश्राद्धं महालयं । पितृपत्नीषु यच्छ्राद्धं कार्यं पार्वणवद्भवेदिति । बृहन्मनूक्तेः । सत्वीति मातामहानां सपत्नीकत्वमुक्तं । विभवे सति मातामहीनां पृथक्कार्यं महालये गयाश्राद्धे वृद्धौ चान्वष्टकासु च । ज्ञेयं द्वादशस्वेव तंत्रे तीर्थे प्रोष्ठे मघासु चेति निगमोक्तेः । हेमाद्रिमते । तत्र नवदैवत्यमेव । महालये गयाश्राद्धे वृद्धौ चान्वष्टकासु च ॥ नवदैवसमत्रे च शेषं षाड्दैवतं विदुरिति धर्मोक्तेः । तातभ्राता पितृव्यः । जननीभ्राता मातुलः । तत्स्त्रियः पितृव्यानी मातुलानी भ्रातृजायाः । पितृष्वसृमातृष्वसृभगिन्यः अपत्यभर्तृयुक्ताः । तेन सापत्न्यायै सभर्तृकायै इति प्रयोगो ज्ञेयः । एतासु मतीषु न तद्भर्तृहीनां द्वारलोपात् । जायापितामहस्तुः श्वश्रूरष्वत्रोपलक्ष्या । अत्र मूलं स्मृतिचंद्रिकायां ज्ञेयं । अत्र पार्वणैकोद्दिष्टव्यवस्थोक्ता हेमाद्रौ पुराणांते । उपाध्यायगुरुश्वशुरपितृव्याचार्यमातुलाः । श्वशुरभ्रातृतत्सुतर्त्विक्शिष्यपोषकाः । भगिनीस्वामिदौहित्रजामातृभगिनीसुताः । पितरोपितृपत्नीनां पितुर्मातु

८८ श्वयाश्वसो।सा विद्वन्मदशिष्याद्यास्तीर्थे चैव महालये। एकोद्दिष्टविधानेन पूजनीयाः प्रयत्नतः॥ इति। अन्येषांपित्रादीनांपा
र्वणामर्थतः सिद्धं। अत्र क्रमान्यत्वेप्याचाराद्व्यवस्था। अशक्तौ तु पृथ्वीचंद्रोदये चतुर्विंशतिमते। एकस्मिन्ब्राह्मणे सर्वा
नाचार्यादीन्प्रपूजयेत्। दशाहाद्दशवापिंडान्दद्यादकरणं न तु। एकोद्दिष्टस्वरूपं चाह याज्ञवल्क्यः। एकोद्दिष्टं दैवहीनं
मेकार्घैकपवित्रकं। आवाहनाग्नौकरणरहितं त्वपसव्यवत्। इति। अत्रैकःपाकः वैश्वदेवतंत्रं पिंडवर्हि। श्चैकं। इति स्मृ
त्यर्थसारे उक्तं। अत्र होमः पिंडश्च द्विजांतिके इत्याहुः प्रयोगपारिजाते आश्वलायनाः। काम्यमभ्युदयेऽष्टम्यामेकोद्दिष्टमथा
ष्टमं। चतुर्ष्वेषु करे होमः पिंडश्चात्र द्विजांतिके इति। पार्वणैकोद्दिष्टयोः समानतंत्रत्वे तु अग्निसमीप एव। अत्र धुरि
लोचनौ वैश्वदेवौ। आपिकन्यागते सूर्ये काम्ये चाधुरिलोचनौ इति हेमाद्रावादित्यपुराणात्। अत्र प्रतिदिनं भिन्नप्र
योगत्वाद्दक्षिणाभेदो वा प्रयोगैक्यादंते एव वा दक्षिणेति हेमाद्रावुक्तं। एतच्चसन्यस्तपितृकादीनां जीवत्पितृकेनापि
कार्यं॥ वृद्धौतीर्थे च सन्यस्ते ताते च पतिते सति। येभ्य एव पिता दद्यात्तेभ्यो दद्यात्स्वयं सुतः इति कात्यायनोक्तेः। यत्तु कौंडिन्यः
दर्शश्राद्धं गयाश्राद्धं श्राद्धं चापरपक्षिकं। न जीवत्पितृकः कुर्यात्तिलैस्तर्पणमेव च इति। तत्सन्यस्तपित्राद्यतिरिक्तविषयं॥ एम:
काम्यश्राद्धपरं वा॥ अत्र बह्वृचकृत्यं श्रीपितृकृतजीवत्पितृकनिर्णये ज्ञेयं॥ एतच्च जीवत्पितृकेन पिंडरहितं कार्यं मुंडनं पिंड

दानंचप्रेतकर्मचसर्वशः॥ नजीवत्पितृकःकुर्याद्गुर्विणीपतिरेवचेति। दक्षेणतस्यपिंडनिषेधात्। आन्वष्टक्यमात्रवार्षि-
कादौतुवचनाद्भवतीतिवक्ष्यामः। तथाछागलेयः। पिंडोमत्रनिवर्तेतमघादिषुकथंचन। सांकल्पंतुतदाकार्यंनियमाद्ब्र-
ह्मवादिभिः। सांकल्पस्वरूपंचवक्ष्यते। अत्रश्राद्धांगतर्पणंपक्षश्राद्धंप्रतिदिनं। श्राद्धोत्तरं। सकृन्महालयेतुपरेद्युःका-
र्यं। तदुक्तंनारदीये पक्षश्राद्धंयदाकुर्यात्तर्पणंतुदिनेदिने। सकृन्महालयेचैवपरेह्नितिलोदकं। गार्ग्योपिपक्षश्रा-
द्धेहिशरण्येचअनुव्रज्यतिलोदकमिति। तथाप्रयोगपारिजातेगार्ग्यः। कृष्णेभाद्रपदेमासि श्राद्धंप्रतिदिरण्येचअनु-
नंभवेत्। पितॄणांप्रत्यहंकार्यंनिषिद्धाहेपितर्प्पणं। सकृन्महालयेश्वःस्यादष्टकास्वंतएवहि। इदंनिषिद्धदिनेपि
कार्यं॥ तिथितीर्थविशेषेषुकार्यंप्रेतेचसर्वदेतिस्मृत्यर्थसारोक्तेः। तीर्थेति। तिथिविशेषेचगयायांप्रेतपक्षकोनिषि-
द्धेपिदिनेकुर्यात्। तर्प्पणंतिलमिश्रितमिति। स्मृतिरत्नावल्यां। वचनाच्च। एतच्चश्राद्धंमलमासेपिकार्यं। तदाह। भृगुः॥
वृद्धिश्राद्धंतथासोममग्न्याधेयंमहालयं॥ राज्याभिषेकंकाम्यंचनकुर्याद्भानुलंघिते। इति। हेमाद्रौनागरखंडेपि॥
नभोवाथनभस्योवामलमासोयदाभवेत्। सप्तमःपितृपक्षःस्यादन्यत्रैवतुपंचमः। एतच्चपित्रोर्मरणेप्रथमाब्देकृतमि-
तित्रिस्थलीसेतुभट्टाः। इदंनित्यंकाम्यंच। पुत्रानायुस्तथारोग्यमैश्वर्यमतुलंतथा। प्राप्नोतिपंचमेदत्वाश्राद्धंकामांश्च

पुष्कलान्नाद्इतिजाबाल्युक्तेः। वृश्चिके समतिक्रांते पितरो दैवतैः सह। निःश्वस्य प्रतिगच्छंति शापं दत्वा सुदा सुदारुणमिति का
र्ष्णाजिनिवचनाच्च तदतिक्रमे प्रायश्चित्तमुक्तं ऋग्विधाने। कुरो अश्वस्य मंत्रं च दशमासं द्विमासयोः। महालयं यदा न्यूनं त
दा संपूर्णमेति ततद्विमासोः कन्यातुलयोः महालयश्राद्धं परान्न्यूनमित्यर्थः। अत्र भरण्यां श्राद्धमतिप्रशस्तं। तदुक्तं पृ
थ्वीचंद्रोदये मात्स्ये। भरणी पितृपक्षे तु महती परिकीर्तिता। अस्यां श्राद्धं कृतं येन स गयाश्राद्धकृद्भवेत्। पृथ्वीचंद्रे श्री
धरीये बृहस्पतिः। नभस्यापरपक्षस्य द्वितीयायदि याम्यभे॥ तृतीया वाश्विनाराणिभिः सहिता प्रीतिदा पितुः। एतत्पक्षे
षष्ठी योगविशेषेण कपिलासंज्ञा। तदुक्तं वाराहे। नभस्य कृष्णपक्षे तु रोहिणीपातभूसुतैः। युक्ता षष्ठी पुराणज्ञैः क
पिला परिकीर्तिता। व्रतोपवासनियमैर्भास्करं तत्र पूजयेत्। कपिलां च द्विजाग्र्याय दत्वा क्रतुफलं लभेत्। पुराणस
मुच्चये॥ भाद्रमासस्य सिते पक्षे भानौ चैव करे स्थिते॥ पातो कुजे च रोहिण्यां सा षष्ठी कपिला भवेत्। अत्र दर्शांतत्वेन
महालयो भाद्रकृष्णपक्षो ज्ञेयः। इत्युक्तं निर्णयामृते। हेमाद्रौ च॥ हस्तार्कस्तफल्यातिशयार्थः। संयोगे तु चतुर्णां वैति
र्दिष्टापामे। ष्टिनो।ति तत्रैवोक्तेः। अत्र विशेषो हेमाद्रौ स्कांदे। देवदारुं तथोशीरं हुंकुमेलां मनःशिलां। पत्रकं पद्मकं
यष्टीमधु गव्येन पेषयेत्। शीरेणालोध्रकल्केन स्नानं कुर्यात्समंत्रकं॥ आपस्त्वमसि देवेश ज्योतिषांपतिरेव च। पापं न

शयमेदेववाङ्मनःकायकर्मजं॥पंचगव्यकृतस्नानःपंचभंगैस्तुमार्जयेत्।पंचभंगैःपंचपल्लवैः।तथा॥रत्नैर्नानाविधैर्यु
क्तंसौवर्णंकारयेद्वृषं॥शक्तितस्तुपलादूर्ध्वंतदर्द्धंकर्षतोपिवा॥सौवर्णामरुणांकुर्यान्नौकांचैवतथारथं॥य्या।अल्पवि
त्तोपियःकश्चित्सोपिकुर्यादिमंविधिं।प्रभातस्वंडे।स्थापयेदव्रणंकुंभंचंदनोदकपूरितं॥रक्तवस्त्रयुगच्छन्नंताम्रपा
त्रेणसंयुतं॥रथोरौक्मपलस्यैवएकचक्रः।सुचित्रितः।सुवर्णपलसंयुक्तांमूर्तिंसूर्यस्यकारयेत्।ततःसूर्यंकपि
लांचषोडशोपचारैःसंपूज्यदद्यात्।दिव्यमूर्तिर्जगच्चक्षुर्द्वादशात्मादिवाकरः॥कपिलासहितोदेवोमममुक्तिंप्रय
छ—यस्मात्त्वंकपिलेपुण्यासर्वलोकस्यपावनी।प्रदत्तासहसूर्येणमममुक्तिप्रदाभवेति।विशेषांतरंतत्रैवज्ञेयमि
तिदिक्वारयमेवचंद्रषष्ठी।साचंद्रोदयव्यापिनीग्राह्या।उभयत्रतथात्वेपूर्वा।तदुक्तंभविष्ये।तद्वद्भाद्रपदेमासिष
ष्ठ्यांपक्षेसितेतो।चंद्रषष्ठीव्रतंकुर्यात्सर्ववेधःप्रशस्यते॥चंद्रोदयेयतेनमाघाव्रदाषष्ठीपूर्वाह्नेचापरेहनि।चंद्रे
षष्ठ्यांसितेपक्षेसैवोपोष्याप्रयत्नतः।इति।अष्टम्यामाश्वलायनेनमाघावर्षसंज्ञंश्राद्धमुक्तं।एतेनमाघावर्षे
प्रोष्ठपद्याअपरपक्षेइतिहिदंसप्तम्यादिषुत्रिष्वहःसुकार्यमितिनारायणवृत्तिः।हरदत्तस्तुमघायुक्तवर्षासुभवंत्र
योदशीश्राद्धमिति।व्याचख्यौ॥पृथ्वीचंद्रोदयेब्राह्मे।आषाढ्याःपंचमेपक्षेऽयामध्याष्टमीस्मृता॥त्रयोदशीग

ज्छायागयातुल्यातुपैतृपैतृके। आश्विनकृष्णाष्टम्यां महालक्ष्मीव्रतं। तत्र निर्णयामृते पुराणसमुच्चये। श्रियोर्चेनं भा
द्रपदे सिताष्टमीं प्रारभ्य कन्यामगाते सूर्ये। समापयेत्तत्र तिथौ चयावत्सूर्यस्तु पूर्वार्द्धगतो भवत्याः इति तत्रैव। कन्यागाते
के प्रारभ्य कर्त्तव्यं तच्छ्रियोर्चनं। हस्तप्रांतदलस्थेर्केतद्व्रतं न समापयेत्। पूजनीयाष्टहस्थानामष्टमी प्राक्छिश्रियः॥
दोषैस्त्वतुभिः संत्यक्ता सर्वसंपत्करा तिथिः। तथा पुत्रसौभाग्यराज्यप्रपुर्णा। शिनी सा प्रकीर्त्तिता॥ तस्मात्सर्वप्रयत्ने
न त्याज्या कन्यागते रवौ॥ विशेषेणापरित्याज्या नवमीदूषिता यदीति। दोषचतुष्टयं तत्रैवोक्तं। त्रिदिने चावमे चैव त्र्य
ष्टमीं नोपवासयेत्। पुत्रहा नवमीविद्धा स्वघ्नी हस्तार्द्धगे रवौ। इति। त्रिदिनावमलक्षणं रत्नमालायां। यत्रैकः स्पृ
शति तिथिद्वयावसाने वारश्चेदवमस्मिंतदुक्तमार्यैः। यः स्पर्शाद्भवति तिथित्रयस्य चाह्नां त्रिद्युस्पृक्कथितमिदं
द्वयं च नेष्टं। एते च सर्वे निषेधाः प्रथमारंभविषयाः। मध्ये तु सति संभवे ज्ञेयाः। व्रतस्य षोडशाहसाध्यत्वे त्यागायो
गात्। इयं चंद्रोदयव्यापिनी ग्राह्या। तत्रैव पूजाद्युक्तेः। परदिने चंद्रोदयात्प्रागूर्ध्वं त्रिमुहूर्त्तव्यापित्वे परैव कार्या। अन्यथा पू
र्वैव। पूर्वा वा परविद्धा वा ग्राह्या चंद्रोदये सदा॥ त्रिमुहूर्त्तापि सा पूज्या परतश्चोर्ध्वगामिनी। इति मदनरत्ने निर्णयामृते च एमः
संग्रहोक्तेः। अर्द्धरात्रमतिक्रम्य वर्त्तते योत्र या तिथिः। तदा तस्यां तिथौ कार्यं महालक्ष्मीव्रतं सदेति वचनाच्चेति संक्षेपः॥

इतिमहालक्ष्मीव्रतनिर्णयः।अथनवम्यामन्वष्टकाश्राद्धं॥तत्रकात्यायनः।अन्वष्टकासुनवभिःपिंडैःश्राद्धमुदाहृतं॥
पित्रादिमातृमध्यंचततोमातामहांतकं।पृथ्वीचंद्रोदयेब्रह्मांडेपितॄणांप्रथमंदद्यान्मातॄणांतदनंतरं॥ततोमाता
महानांचअन्वष्टक्येक्रमःस्मृतः।श्राद्धहेमाद्रौछागलेयः।केवलास्तुस्त्रयेकार्यावृद्धावादौप्रकीर्त्तिताः।अन्वष्ट
कासुमध्यस्थानांस्यात्कार्याःस्वमातरः॥दीपिकायांतुमातृश्राद्धमादौकार्यमित्युक्तं।मातृयजनंत्वन्वष्टकाख्या
दितः।इति।हेमाद्रौब्राह्मेपि।अन्वष्टकासुक्रमशोमातृपूर्वंतदिष्यते।इति।अत्रशाखाभेदेनव्यवस्थेति।पृथ्वीचंद्रो
दयः।जीवत्पितृकविषयमितिनिर्णयदीपः।इदंचज्ञात्वाजीवत्पितृकेनापिकार्यं।तदुक्तंनिर्णयामृतेत्रायणीपप
रिशिष्टे।अन्वष्टक्यंगयाश्राद्धेसत्यांपच्चमृतेहनि।मातुःश्राद्धंसुतःकुर्यात्पितर्यपिचजीवति।यद्यपिजीवत्पितृक
स्यापेक्षान्वष्टकावश्यकर्तव्यास्तथाप्यशक्तस्येयमावश्यकी।योष्टपद्यष्टकाभूयःपितृलोकेभविष्यसीति
हेमाद्रौपाद्मोक्तेः।सर्वासामेवमातॄणांश्राद्धंकन्यागतेरवौ।नवम्यांहिप्रदातव्यंब्रह्मलब्धवरायतइतिसूतेना
वश्यकत्वोक्तेश्च।अत्रसर्वाषामित्युक्तेः।अत्रसर्वासामित्युक्तेः।स्वमातरिजीवंत्यामपिसपत्नमातृभ्योदद्यात्।त
न्मरणेसतितस्यैताभ्यश्चदद्यादित्युक्तंजीवत्पितृकनिर्णयेगुरुभिः।अत्रसर्वासांनामनिर्देशेनैकोब्राह्मणोर्घःपिं

भ

८१ इष्टवनोमेकेत्युह्विवचनादिप्रयोगस्तूक्तं नारायणवृत्तौ। अन्वाष्टकाश्राद्धं तत्त्यागश्च गोभिलीयानां मध्यमायामेव न सर्वासु।
अन्वष्टक्यं मध्यमायामिति गोभिलगोतमादिवितिछंदोगपरिशिष्टात्। अत्रैते मरणोत्तरं पूर्वं मृतमातृश्राद्धं न कार्यमिति
केचिदाहुः। पठंति च। श्राद्धं नवम्यां कुर्यात्तन्मृते भर्त्तरि लुप्यते। इति तदेतन्निर्मूलत्वान्मूर्खप्रतारणामात्रं। श्राद्धदीपिकायां
ब्राह्मे। पितृमातृकुलोत्पन्नाः याः काश्चित्तु मृताः स्त्रियः। श्राद्धार्हा मातरस्तेभ्यः श्राद्धं तत्र प्रदीयते। इति अत्र देशाचारो व्यव
स्थाः। इदं चानुपनीते नापि कार्यं। तदुक्तं श्राद्धमूलपाणौ मात्स्ये। अमावास्याष्टकाकृष्णपक्षेपंचदशीषु चेत्यभिधाय। ए
तच्चानुपनीतोपि कुर्यात्सर्वेषु पर्वसु। श्राद्धं साधारणं नाम सर्वकामफलप्रदं। भार्याविरहितोप्येतत्प्रवासस्थोपि नित्य
शः। शूद्रोप्यमंत्रवत्कुर्यादनेन विधिना बुधः। इति। तेन साग्नेरेवेदमिति परास्तं। अन्वष्टकाकालः। पृथग्गोवेदं मातुः श्रा
द्धमित्यपि परास्तं। लाघवेन मूलेक्वादष्टकपदाविशेषाच्च। तेनान्यत्रान्वष्टकाश्राद्धस्यांगस्याप्यत्र प्रधानत्ववचनात्।
अष्टकान्वष्टका। पूर्वानुरोधात्। तथाग्निपुराणे। अन्वष्टकासु वृद्धौ च गयायां च क्षयेहनि। अत्र मातुः पृथक् श्राद्धमन्य
त्र पतिना सह॥ आपस्तंबानां त्वष्टकासु च वृद्धौ चेति भाष्यकारैः पाठादष्टकायां मातृश्राद्धं छंदोगैस्तत्र मातामहा एमः
दिश्राद्धेन कार्यं त्रिपुरुषमेव। तयोर्विप्राः पृथग्गृह्याद्वमासानदिनाहृते कर्षूसमन्वितं मुक्त्वा तथाद्यं श्राद्धं षोडशं। प्रत्याब्दि

कंचशेषेषु पिंडाः स्युः षडितिच्छितिरिति छंदोगपरिशिष्टात्। अन्वष्टकास्तु तेषां कर्षूविधानादिति शूलपाणिः। यत्तूक्तमित्वपक्षे नवमी पुण्या भाद्रमदेहिष्या। चत्वारः पार्वणाः कार्याः पितृपक्षे मनीषिभिः इति। तद्देशाचारतो व्यवस्थितं ज्ञेयं। इदं जीवत्पितृके नापि सपिंडकं कार्यं। हेमाद्रौ विष्णुधर्मोत्तरे। अन्वष्टकासु च स्त्रीणां श्राद्धं कार्यं तथैव च। चेत्सुपक्रम्य। पिंडनिर्वपणं कार्यं तस्यामपि तृपोत्तमेति। क्वचन श्राद्धविधिनापि डंदाने प्राप्ते पुनस्तत्कीर्तनं यस्य जीवत्पितृगर्भिणीपतित्वादिना पिंडदाननिषिद्धं तस्य तत्प्राप्त्यर्थमिति। श्रीतातचरणाः। अत्र सुवासिनीभोजनमुक्तं मार्कंडेयपुराणे। मातुः। श्राद्धे तु संप्राप्ते ब्राह्मणैः सह भोजनं। सुवासिन्यै प्रदातव्यमिति शातातपोऽब्रवीत्। भर्तुरग्रे मृता नारी सहदाहेन वा मृता। तस्याः स्थाने नियुंजीत विप्रैः सह सुवासिनी। तत्रैव मदालसावाक्यं। स्त्रीश्राद्धे पुत्रदेयाः स्युरलंकाराश्च येषिते। मंजीरमेखलाद्दामकर्णिकाकंकणादयः इति। तत्राशक्तावनुकल्पमाहाश्वलायनः। अनडुहो यवसमाहरेदग्निना वा कक्षमुपोषे। एषामष्टकेति न त्वेवानष्टकः स्यादिति। हेमाद्रौ पितामहः। अमावास्याव्यतीपातपौर्णमास्यष्टकासु च। विद्वान्न श्राद्धमकुर्वाणो नरकं प्रतिपद्यते। अकरणे च प्रायश्चित्तमुक्तं स्मृतिविधाने। एभिर्द्युभिर्जपेन्मंत्रं शतवारं तु तद्दिने। आन्वष्टक्यं यदा शून्यं संपूर्णं याति सर्वथेति। एतत्पक्षे द्वादश्यां विशेषः। पृथ्वीचंद्रोदये वायवीये। संन्यासिनोऽप्या

ष्टिकादिपुत्रश्चकुर्यात्तथाविधि॥ महालयेतुयच्छ्राद्धंद्वादश्यांपार्वणंतुतत्॥ इति॥ अत्रत्रयोदशीश्राद्धं॥ तत्रचंद्रिका॥ त्रयोद
शीभाद्रपदेकृष्णामुख्यापितृप्रिया॥ तृप्यंतिपितरस्तस्यांखर्षपंचशतेसमाः॥ मघायुतायांतस्यांतुजलाद्यैरपितोषि
ताः॥ तृप्यंतिपितरस्तस्यवर्षाण्यमयुतायुतं॥ प्रयोगपारिजातेशंखः॥ प्रोष्ठपद्यामतीतायांमघायुक्तात्रयोदशी॥ प्रा
प्यश्राद्धंप्रकर्तव्यंमधुनापायसेनच॥ प्रजामिष्टांयशःस्वर्गमारोग्यंचधनंतथा॥ नृणांश्राद्धेसदाप्रीताःप्रयच्छंतिपित
महाः॥ एतन्नित्यमपि॥ पृथ्वीचंद्रेविष्णुधर्मे॥ प्रोष्ठपद्यामतीतायांतथाकृष्णत्रयोदशीमित्युक्त्वा॥ एतांस्तुश्राद्धकाला
न्वैनित्यानाहप्रजापतिः॥ श्राद्धमेतेष्वकुर्वाणोनरकंप्रतिपद्यतइत्युक्तेः॥ एतच्चाविभक्तैरपिपृथक्कार्यं॥ तथाचहेमाद्रौ॥ वि
भक्तावा॥ विभक्तावाकुर्युः॥ श्राद्धंपृथक्सुताः॥ मघायुक्तात्रयोदशीस्तुचततोऽन्यत्रनाधिकाः॥ पृथग्विनेति॥ अपरार्केवायवी
ये॥ हंसेहस्तस्थितेयातुमघायुक्तात्रयोदशी॥ तिथिर्वैवस्वतीनामसाछायाकुंजरस्यतु॥ अत्रचच॥ अपिनःसकुलेभूयाद्यो
नोदद्यात्त्रयोदशीं॥ पायसंमधुसर्पिर्भ्यांप्राक्छायेकुंजरस्यचेतिविष्णुमनुवचने॥ केवलत्रयोदशीश्रुतेर्मघागुणारति
कल्पतरुः॥ शूलपाणिस्तुकेवलवाक्यानामर्थवादत्वात्विधौचमघायोगश्रुतेःविधिलाघवात्तविशिष्टमेवनिमित्तमि एमः
त्याह॥ वस्तुतस्तुमधुमांसेश्चशाकेश्चपयसापायसेनच॥ एषनोदास्यतिश्राद्धंवर्षासुचमघासुचेतिवासिष्ठवचनेके

वलमघाकृते। विनिगमकाभावादुभयं भिन्नं तं निमित्तं। पूर्वोक्तवचनाच्च योगाधिक्ये फलाधिक्यं। अत एव याज्ञवल्क्यः।
तथा वर्षास्त्रयोदश्यां मघासा च विशेषतः। इति। त्रयोदशीश्राद्धं नित्यं। अन्यत्काम्यं। अत्र त्रयोदश्यां बहुपुत्रो पुत्रवमा
रिणश्च भवंतीत्यापस्तंबोक्तेः ध्रुवं मारितमपत्य ह्येवं सहिल्लोरपत्यमात्रार्थिनः स्मृत्यंतरोक्तश्च नार्थिनो वाधिका
र इति कल्पतरुः। अपत्यनिंद्यात्तदर्थिनोऽनधिकारात् फलांतरकामस्य वाधिकार इति हलायुधः। एतत्पिंडरहि
तं कार्यं। मघासु कृत्त्रयोदश्यां पिंडनिर्वपणं द्विजः। ससंतानो नैव कुर्यान्नित्यं तेकवयो विदुरिति। पृथ्वीचंद्रोदये बृ
हत्पराशरोक्तेः। इदं मलमासेपि कार्यं। मघात्रयोदशीश्राद्धस्योपस्थितिहेतुकं। अनन्यगतिकत्वेन कर्त्तव्यं स्यान्म
लिम्लुचे इति काठकगृह्योक्तेः। पानित्ता। अंगिराः। त्रयोदश्यां कृष्णपक्षे या श्राद्धं कुरुते नरः। पंचत्वं तस्य जानीयाज्ज्ये
ष्ठपुत्रस्य निश्चितं॥ वामनपुराणे। त्रयोदश्यां तु वै श्राद्धं न कुर्यात्पुत्रवान्गृही। इत्यादीनि वचनानि पुत्रवद्विषयाणि
वा महालयस्थभिन्नत्रयोदशीविषयाणि वा काम्यविषयाणि वा सपिंडकश्राद्धविषयाणि वेति केचित्। हेमाद्रि
प्रमुखास्त्वेकवर्गश्राद्धविषयाणि। श्राद्धं नैवैकवर्गस्य त्रयोदश्यामुपक्रमेत्। न तु शास्त्रत्रये यस्य प्रजां हिंसांति तस्य
ते इति कार्ष्णाजिनिस्मृतेः। यद्यपितरो यत्र पूज्यंते तत्र मातामहा अपीति। इति धौम्योक्तेः। न केवलं पितृवर्गस्य प्राप्तिस्त

९३

थापित्र्यामोहादिप्राप्तनिषेध्यमित्याहुः। वयंतुपश्यामः। पुत्रवद्विषयाण्येवेति। असंतानस्त्वपस्तस्य श्राद्धे प्रोक्तात्रयो
दशी॥ संतानयुक्तोयः कुर्यात्तस्यवंशक्षयोभवेत्॥ इतिहेमाद्रौनागरखंडे॥ पूर्ववाक्यमप्यसंतानस्यैवेकवर्गानिषेध
कैकमिति। अत्रमघात्रयोदशीमहालययुगादिश्राद्धानांतंत्रेणप्रयोगः। नतुप्रसंगसिद्धिरित्यत्रविस्तरः। अथच
तुर्दशी। एष्वीचंद्रोदयेप्रचेताः। हस्त्यारोहणलोहाद्यैर्विद्युज्वालाविषाग्निभिः। नखिदंष्ट्रिविपन्नानांतेषांशस्त्र
चतुर्दशी॥ ब्राह्मे। युवानःपितरोयस्यमृताःशस्त्रेणवाहताः। तेनकार्यंचतुर्दश्यांतेषांतृप्तिमभीप्सता॥ नागर
खंडे। अपमृत्युर्भवेद्येषांशस्त्रमृत्युरथापिवा॥ श्राद्धंतेषांप्रकर्त्तव्यंचतुर्दश्यांनराधिप। मरीचिः। विषशस्त्रश्वा
पदाहितिर्यग्ब्राह्मणघातिनां॥ चतुर्दश्यांक्रियाकार्या अन्येषांतुविगर्हिता॥ ब्राह्मणघाती तेनहतो नतुब्र
ह्महा। तस्यपतितत्वादितिशूलपाणिः। अत्रोद्देश्यविशेषणस्याविवक्षितत्वात्स्त्रीणामपिशस्त्रादिहतानामेकोदि
ष्टंकार्यंनपार्वणं। इतिश्रीदत्तोपाध्यायः। इदंविषादिहतानामेववनप्रसवादिमृतानामितिवाचस्पतिमिश्राः। यत्तुशा
कटायनः। जलाग्निभ्यांविपन्नानांसंन्यासेवागृहेपथि। श्राद्धंकुर्वततेषांवैवर्ज्जयित्वाचतुर्दशीमिति। तत्स्वायच्छि एमः
न्नार्थजलादिमृतविषयमित्याकरेउक्तं। अतएवैधत्वात्सहगमनेनकार्यमितिहेमाद्रिः। एतच्चदेवप्रकृतमेकोद्दिष्टं

कार्यमित्युक्तं प्रयोगपारिजाते। प्रेतपक्षे चतुर्द्दश्यामेकोद्दिष्टविधानतः। देवयुक्तं तु तच्छ्राद्धं पितृणामक्षय्यं भवेत। तच्छ्रा
द्धं दैवहीनं चैव सुतदाराधनक्षयः। एकोद्दिष्टं दैवयुक्तमित्येवं मनुरब्रवीत। भविष्येपि। समत्वमागतस्यापि पितुः शस्त्रह
तस्य च। चतुर्द्दश्यां तु कर्त्तव्यमेकोद्दिष्टं महालये। चतुर्द्दश्यां तस्य श्राद्धं सपिंडीकरणे कृते। एकोद्दिष्टविधानेन तत्का
र्यं शस्त्रघातिनः इति मत्स्यप्रदीपे हारीतः। विश्वेदेवांश्च तत्रापि पूजयित्वादितो मलान। ये वै शस्त्रहतास्तेषां श्रा
द्धं कुर्यादतंद्रितः। अत्रैकोद्दिष्टवचनानां निर्मूलत्वं। समूलत्वेपि पार्वणाशक्तपराणि। चिह्नादिवचनैः प्रकरणा
त्कल्पपक्षीयं पार्वणावगतेरिति शूलपाणिः। तच्च। प्रकरणस्य बाधात पित्रादीनां पार्वणं भ्रात्रादीनामेको
द्दिष्टमिति गौडार्वाचः। तन्न। पितुरित्यनेन विरोधात। विशेषवाक्यावैयर्थ्यापत्तेश्च। अत्र शस्त्रहतस्यैव चतुर्द्द
श्यामिति नियमो न चतुर्द्दश्यामेव शस्त्रहतस्येति। श्राद्धं शस्त्रहतस्यैव चतुर्द्दश्यां महालये। इति। का
लादर्शात। वार्षिकादीनामकरणपक्षे। तेन महालय एवद्दिनांते पार्वणं मातामहादित्रस्यार्थे कार्यमेव। पिताम
होपि शस्त्रहतश्चेदेकोद्दिष्टद्वयं कार्यं। तदुक्तं हेमाद्रौ। स्मृत्यंतरे। एकस्मिन्द्वयोर्वैकोद्दिष्टमिति त्रिषु शस्त्रहतेषु पा
र्वणमेव कार्यं। यत्तु देवस्वामिनोक्तं त्रिष्वपि शस्त्रहतेषु पृथगेकोद्दिष्टत्रयं कार्यं। ननु पार्वणमोहत्यवचनाभा

न तु श्राद्धद्वयं॥ प्रसंगासिद्धेरिति पृथ्वीचंद्रोदये अन्नश्राद्धाकरणेऽग्निमपक्षे दिनांतरे पार्वणेनैव का
र्यमिति + ५

वाताइति।तदयुक्तं।पित्रादयस्त्वपोयस्त्वत्रयोयातास्तत्तुन्तुमातः।सम्भूतेपार्वणंकुर्यादाह्निकानिपृथक्पृथक्।इतिवृह
त्पराशरोक्तेः।एकस्मिन्वाद्वयोर्वापिविद्युक्त्वेनाचाहृते।एकोद्दिष्टंसुतःकुर्यात्त्रयाणांदर्शवद्भवेदितिस्मृत्यंतरात्।इ
तिपृथ्वीचंद्रोदयेउक्तं।अपरार्केहेमाद्रौचैवं।यत्तत्रैवशस्त्रादिनाहतस्तस्यवार्षिकमेवपार्वणमेकोद्दिष्टंवाका
र्यमितितत्रैवोक्तं।यद्यपिशस्त्रविप्रहतानांचशृंगिदंष्ट्रिसरीसृपैः।आत्मनस्त्यागिनांचैवश्राद्धमेषांनकारयेत्।
इतिछागलेयादेः।शस्त्रादिहतानांचश्राद्धंनिषिद्धं।तथापिप्रमादमृतानांश्राद्धार्हणाकार्यं।बुद्ध्यादिभिन्नबुद्धि
पूर्वमृतानांतुकार्यं।यत्तुचतुर्दश्यांतर्पणीयालुप्तपिंडोदकक्रियाः।इतिब्रह्मांडपुराणमितिशूलपाणिः।लक्षणा
यांमाताभावात्पतितेनापिकर्तव्यंपतितस्यचेति।गयादिवृद्धिशेषविबलात्पतितानामपिकार्यं।इतिनव्यगौ
डः।तत्त्वंतुप्रमत्तमागतस्येत्यादिवशात्कृतक्रियाणांकार्यंनान्येषामितिवयंप्रतीमः।यत्तुमनुः।नपैतृयज्ञि
योहोमोलौकिकाग्नौविधीयते॥नदर्शेनविनाश्राद्धमाहिताग्नेर्विधीयते।इति।अत्रपूर्वार्द्धेहेतुत्वेनोक्तं।त
घ्याकृतमेवमन्वते।पृथ्वीचंद्रोदयादयः।आहिताग्नेःपिंडपितृयज्ञकल्पेनश्राद्धनिषेधार्थमिदं।नतुसंक एमः
ल्पादेरपीत्यस्मद्गुरवः।कृष्णपक्षश्राद्धमन्यदिनेषुप्राप्तमाहिताग्नेर्दर्शेनियम्यतइतितुवयं।दर्शेनपार्वणेनवि

नाम्श्राद्धं न तेन क्वापि वार्षिकादौ एकोद्दिष्टं नेति हारीतः। इति चतुर्दशी॥ अमायां विशेषमाहापरार्के यमः। हंसे करस्थिते
या तु अमावास्या करान्विता। सा ज्ञेया कुंजरछाया इति बौधायनोब्रवीत्। वनस्पतिगते सोमे छाया या प्राङ्मुखी भवे
त्। गजछाया तु सा प्रोक्ता तस्यां श्राद्धं प्रकल्पयेत्। भारते। अजेन सर्वलोहेन वर्षास्तु नियतव्रतः। हस्तिछायासु विधि
वत्कर्णव्यजनवीजिते॥ श्राद्धं दद्यादिति शेषः। आश्विन शुक्लप्रतिपदि दौहित्रस्य मातामहश्राद्धमुक्तं हेमा
द्रौ संग्रहे च। जातमात्रोपि दौहित्रो विद्यमानेपि मातुले। कुर्यान्मातामहश्राद्धं प्रतिपद्याश्विने सित इति। इयं सं
गवव्यापिनी ग्राह्येति निर्णयदीपे उक्तं। प्रतिपद्याश्विने शुक्ले दौहित्रस्त्वेकपार्वणं। श्राद्धं मातामहं कुर्यात्स
पिता संगवे सदा। जातमात्रो हि दौहित्रो जीवत्स्वपि च मातुले। प्रातः संगवयोर्मध्ये चार्यस्य प्रतिपद्भवेदिति वच
नात्। अत्र समूलत्वं विमृग्यं। इदं मलमासेन कार्यं। स्पष्टमासविशेषाख्याविहितं वर्जयेन्मले इति निषेधात्।
इदं च जीवत्पितृकेणैव कार्यमिति शिष्टाः। इदं च शिष्टाचारात्सपिंडकं कार्यमिति केचित्। पिंडरहितं तु युक्तं। जी
वत्पितृकस्य मुंडनं पिंडदानं च प्रेतकर्म च सर्वशः। न जीवत्पितृकः कुर्याद्गुर्विणीपतिरेव चेति। इत्नेणापिंडनिषेधात्।
अन्वष्टकावद्विशेषवचनाभावाच्चेति संक्षेपः। इति निर्णयसिंधौ महालयनिर्णयः। अथाश्विनशुक्लप्रतिपदि न

९५

वरात्रारंभः ।। तन्निर्णयः ।। तत्र भार्गवार्चनदीपिकायां देवीपुराणे । सुमेधा उवाच ।। शृणु राजन् प्रवक्ष्यामि चंडिकापूजनक्रमं
। आश्विनस्य सिते पक्षे प्रतिपत्सु शुभे दिने । इत्युपक्रम्योक्तं । शुद्धे तिथौ प्रकर्त्तव्यं प्रतिपच्चोर्ध्वगामिनी । आद्यास्तु ना
डिकास्त्यक्त्वा षोडश द्वादशापि वा ।। अपराह्णे च कर्त्तव्यं शुद्धं संततिकांक्षिभिः । इदं चापराह्णयोगिन्या आशहस्या द्विती
यदिने प्रतिपदोऽभावे ज्ञेयं । तथा तत्रैव उड्डामरतंत्रे च देवीवचः ।। अमायुक्ता न कर्त्तव्या प्रतिपत्पूजने मम । मुहूर्त्तमात्रा
कर्त्तव्या द्वितीयादिगुणान्विता ।। आद्याः षोडशनाडीस्तु लब्ध्वा यः कुरुते नरः ।। कलशस्थापनं तत्र ह्यरिष्टं जायते ध्रुवं । मा
र्कंडेयदेवीपुराणयोः ।। पूर्वविद्धा तु या शुक्ला भवेत्प्रतिपदाश्विनी । नवरात्रव्रतं तस्या न कार्यं शुभमिच्छता । देशभंगो
भवेत्तत्र दुर्भिक्षं चोपजायते । नंदायां दर्शयुक्तायां यत्र स्यान्मम पूजनमिति । स्कांदे । प्रतिपद्याश्विने मासि सिता शुभदा
भवेत् । भाद्रपंचदशी कृष्णा तया नैव युक्ता न शस्यते । विरुद्धफलदा सा हि पुत्रदारभयावहेति । तथा वर्ज्जनीया प्रयत्ने
न अमायुक्ता तु पार्थिव । द्वितीयादिगुणैर्युक्ता प्रतिपत्सर्वकामदा । तथा देवीपुराणे । यो मां पूजयते नित्यं द्वितीया
दिगुणान्वितां प्रतिपच्छारदीं ज्ञात्वा सोऽश्नुते सुखमव्ययं । यदि कुर्याद् अमायुक्तप्रतिपत्स्थापनं मम तस्य शापात्सुतं दत्वा
भस्मशेषं करोम्यहं । आग्रहात्कुरुते यस्तु कलशस्थापनं मम । तस्य संपद्विनाशः स्यात् ज्येष्ठः पुत्रो विनश्यति अमायुक्ता न

एमः

कर्त्तव्याप्रतिपच्चंडिकार्च्चने। धनार्थिभिर्विशेषेणवंशहानिश्चजायते। नदर्शकलयायुक्ताप्रतिपच्चंडिकार्च्चने। उदयेद्विमुहूर्त्तापिग्राह्यासोदयगामिनीति। देवीपुराणे। याचाश्वयुजिमासेस्यात्प्रतिपद्भद्रयान्विता। शुद्धाममार्चनंतस्यांशतयज्ञफलप्रदं। रुद्रयामले। अमायुक्तासदाचैवप्रतिपन्निंदितामता। तत्रचेत्स्थापयेत्कुंभंदुर्भिक्षंजायतेध्रुवं। प्रतिपत्सुद्वितीयातुकुंभारोपणकर्मणीति। यद्यपिरुद्रयामलेनिर्मूलं। तथाप्यविरोधात्प्रचाराच्चतद्वचनानिलिख्यंते। तिथितत्वेदेवीपुराणेपि। प्रातरावाहयेद्देवींप्रातरेवप्रवेशयेत्। प्रातःप्रातश्चसंपूज्यप्रातरेवविसर्ज्जयेत्। तत्रैव। शरत्कालेमहापूजाक्रियतेयाचवार्षिकी। साकार्योदयगामिन्यांनतत्रतिथियुग्मता। तथाकल्पतरुः। कुहूकाष्ठोपसंयुक्तांवर्ज्जयेत्प्रतिपत्तिथिं। राज्यनाशाययाप्रोक्तानिंदिताचाश्वपूजने। इति। एषुवचनेषुकलशस्थापनग्रहणात्तदेवप्रथमदिनेनिषिध्यतेनतूपवासादि। तस्यप्रतिपद्यप्यभावास्येतियुग्मवाक्यात्। शुक्लास्यात्प्रतिपत्तिथिः प्रथमतेइति दीपिकोक्तेः। शुक्लपक्षेदर्शवृद्धेतिमाधवोक्तेश्चपूर्वदिनेप्राप्तस्यबाधेमानाभावादितिकेचित्। वस्तुतस्तुपूर्वोक्तवाक्येषुचंडिकार्चनपूजनग्रहणात्। उपवासादेश्चांगत्वात्प्रधानदेवीपूजादावपिपरेतियुक्तं। कलशस्थापनग्रहणंतूपलक्षणं। अतएवदेवलः। व्रतोपवासनियमेघटिकैकापियाभवेत्। सातिथिस्तद्दिनेपूज्याविपरीतातु

९६ पेक्षकोऽपीति। अत्र घटिकामुहूर्त्तदति गौडाः। यस्मात्पूर्वदिने संपूर्णा शुद्धा च मूला परदिने वर्द्धते। तदा संपूर्णत्वाद् मायोगाभा
वाच्च पूर्वैव। यानि च द्वितीयायोगनिषेधकानि हवचनानि केचित्पठंति तान्यपि शुद्धाधिकनिषेधपराणि। परदिने प्रतिपदो सं
तास्त्वे दर्शयुतापि पूर्वैव ग्राह्या। स्यात तदाहलंध्वत्रः। तिथिः शरीरं तिथिरेव कारणं तिथिः प्रमाणं तिथिरेव साधनमिति। यानि
त्वमाउक्ताप्रकर्त्तव्येत्यादीनि नृसिंहप्रसादे वचनानि तानि समूलत्वे सत्येतद्विषयाणि। अत्रेदं तत्त्वं पूर्वोक्तसर्ववाक्या
नां हेमाद्याद्यलिखितत्वेन निर्मूलत्वात्तैश्चान्यनिर्णयानुक्तेः सामान्यनिर्णयात्सर्वत्र प्राप्तावपि गौडनिबंधे तु विशेष
निर्णयादौदयिकी ग्राह्या। तत्रापि घटिकैकस्य द्विमुहूर्त्तत्वस्मृतिवोक्तेः द्विमुहूर्त्ता ग्राह्या। उदिते दैवतं भानाविति यत्र
द्विमुहूर्त्ता त्रिमुहूर्त्ता चेति औदयिकाद्विमुहूर्त्तत्वनियमात्। तन्न उदये द्विमुहूर्त्तापीत्याद्यनुसारेऽपि। मुहूर्त्तमात्राक
र्त्तव्येति तद्द्विमुहूर्त्तस्तुतिः। अन्यथा द्विमुहूर्त्तविधिवैयर्थ्यात्। केचित्तु मुहूर्त्तमात्रेति वचनात्। ततोऽन्यूनत्वेऽप
राह्ने स्यादुः। गौडा अप्येवं। अत्र देवीपूजैव प्रधानं। उपवासादि त्वंगं। अष्टम्यां च नवम्यां च जगन्मातरमंबिकां। पूजयि
त्वाश्विने मासि विशोको जायते नरः। इति। हेमाद्रौ भविष्ये। तस्या एव फलसंबंधात्। नवमीतिथिपर्यंतं वृद्ध्या पूजाज एमः
पादिकमिति तत्रैव देवीपुराणाच्च। शरत्काले महापूजा क्रियते या च वार्षिकीति मार्कंडेयपुराणाच्चापूर्ववचनादष्टमीन

वमीपूजैवप्रधानमन्यत्सर्वमंगमितिगौडाः।एकाहपक्षोपिकालिकापुराणे।यस्त्वेकस्यामथाष्टम्यांनवम्यामथसाधकः।
पूजयेद्वरदांदेवींमहाविभवविस्तरैरितिरूपनारायणधृतदेवीपुराणेमहानवम्यांपूजेयंसर्वकामप्रदायिका।सर्वेषु
वत्सवर्गेषुतवभद्राप्रकीर्तिता।कृत्वाप्नोतियशोराज्यंपुत्रायुर्धनसंपदः।साचकाम्यानित्याच।एवमन्येऽपितथाकार्यं
देव्याःप्रपूजनंविभूतिमतुलांलब्धुंचतुर्वर्गप्रदायकमिति।योमोहादथवालस्याद्देवींदुर्गांमहोत्सवे।नपूजयतिदंभा
द्द्वेषाद्वाप्यथभैरव।क्रुद्धाभगवतीतस्यसर्वान्कामान्निहंतिवै।इतिकालिकापुराणेफलनिंदाश्रुतेः।वर्षेवर्षेविधात
व्यंस्थापनंचविसर्जनं॥इतितिथितत्त्वेदेवीपुराणाच्च।अत्रोपवासादिकमुक्तंहेमाद्रौभविष्ये।एवंचविंध्यवासिन्यां
नवरात्रोपवासतः।एकभक्तेननक्तेनतथैवायाचितेनच।पूजनीयाजनैर्देवीस्थानेस्थानेपुरेपुरे।गृहेगृहे
शक्तिपरैर्ग्रामेग्रामेवनेवने।स्नातैःप्रमुदितैर्हृष्टैर्ब्राह्मणैःक्षत्रियैर्नृपैः।वैश्यैः।शूद्रैर्भक्तियुक्तैर्म्लेच्छैरन्यैश्चमा
नवैरिति।यत्तुरूपनारायणीये।भविष्ये।एवंनानाम्लेच्छगणैःपूज्यतेसर्वदस्युभिरिति।तन्नामसपूजापरमिति।
विनामंत्रैस्तामसीस्यात्किरातानांतुसंमतेतितत्रैवोक्तेः।मदनरत्नेदेवीपुराणेपि।कन्यासंस्थेरवौशक्रशुक्लामार
भ्यनंदिकां।अयाचीत्वथवैकाशीनक्ताशीवाथवाब्ददः।भूशाय्यथवामंच्यकुमारीर्भोजयेन्मुदा।वस्त्रालंकारदानै

स्वसंतोष्याः प्रतिवासरां बलिं च प्रत्यहं दद्याद्दोदनं मांसमाषवत्। त्रिकालं पूजयेद्देवीं जपस्तोत्रपरायणा इति। नंदिकाः प्रतिप
दिति मैथिलाः षष्ठीति गौडाः। तच्च पूजनं रात्रौ कार्यं। आश्विने मासि मेघांते प्रतिपद्या तिथिर्भवेत्। तस्यां नक्तं प्रकुर्वीत रात्रौ
देवीं च पूजयेत्। रात्रिरूपा यतो देवी दिव्यरूपो महेश्वरः। रात्रिव्रतमिदं देवि सर्वपापप्रणाशनं। सर्वकामप्रदं नृणां सर्वश
त्रुनिबर्हणं। रात्रिव्रतमिदं तस्माद्रात्रौ कर्त्तव्यतेष्यते। नक्तव्रतमिदं यस्मादन्यथा नरके गतिरित्यादिवचनाच्च। रात्रिव्रत
त्वमेवाभिप्रेत्य माधवेनोक्तं। तस्य नक्तव्रतत्वादिति। न तु रात्रिभोजनात्। ननु। मासि चाश्वयुजे शुक्ले नवरात्रे विशेषतः।
संपूज्य नवदुर्गां च नक्तं कुर्यात्समाहितः। नवरात्राभिधं कर्म नक्तव्रतमिदं स्मृतं। आरंभे नवरात्रस्येत्यादि स्कांदात्। मा
धवोक्तेश्च नक्तमेव प्रधानमिति चेत्। न वा रात्रोपवासतः इत्यादेरनुपपत्तेः। तेन प्राह्निकनक्तानुवादोयं। ननु रात्रेः कर्म
कालत्वे तद्व्यापिनी पूर्वैव प्रतिपत्प्राप्नुयात्। मैवं। न्यायतः प्राप्तावपि पूर्वोक्तवचनैर्बाधात्। यथा पूर्वोक्ता कर्मका
लव्यापिनीमपि त्यक्त्वा स्वल्पापि रामनवमीति प्रागुक्तं यथा वा निशीथे सतामपि पूर्वां जन्माष्टमीं त्यक्त्वा स्वल्पापि रामन
वमीति प्रागुक्तं यथा वा निशीथे सतीमपि पूर्वां जन्माष्टमीं त्यक्त्वा रोहिणीयुक्ता परैवेति माधवेनोक्तात्। अत्रापि। वस्तुतस्तु रामः
रात्रेः कर्मकालत्ववचसी हेमाद्य्याद्यलिखनात्तन्मूलत्वं विमृश्यमेव। त्रिकालं पूजयेदित्यादि पूर्वविरोधाच्च। माधवोक्ति

स्तुपाक्षिकनक्तानुवाद इत्युक्तं। तस्मात्सर्वपक्षेषु परैव प्रतिपदिति सिद्धं। अत्र केचिन्नवरात्रशब्दो नवाहोरात्रपरः। वृद्धौ स
माप्तिर्वृध्यां ह्रासे माप्रतिपन्निशि। प्रारंभो नवचंड्यास्तु नवरात्रमतोर्थवत् इति देवीपुराणादित्याहुः। तन्न। अति
ह्रासवृद्ध्योन्न्यूनाधिकत्वापत्तेः। अत्र मूलाभावाच्च। तेन तिथिवाच्येवायं। तदुक्तं। तिथिवृद्धौ तिथिह्रासे नवरात्रमपार्थ
कं। अष्टरात्रे न दोषोयं नवरात्र तिथिक्षये। इति। स च नवरात्रशब्दः क्वचिल्लक्षणया कर्म्मवाची। यथा प्रारंभो नवरात्रस्येत्य
त्रेतिदिक्। प्रतिपद्विवैधृत्यादियोगनिषेधो भार्गवार्चनदीपिकायां देवीपुराणे। सा तु वैधृतिसंयुक्ता चेत्प्रतिपच्चण्डि
कार्चने। तयोरंते विधातव्यं कलशारोपणं गृहेति। चित्रावैधृतियुतापि द्वितीयायुता चेत्तेवर्ज्यास्येत्युक्तं दुर्गोत्सवे। भ
द्रान्विता चेत्प्रतिपन्न लभ्यते विरुद्धयोगैरपि संगता सती। सैवापराह्णे विबुधैर्विधेया श्रीपुत्रराज्यादिविवृद्धिहेतुरि
ति। यदा तु वैधृत्यादिपरिहारेण प्रतिपन्न लभ्यते तदोक्तं तत्रैव कात्यायनेन। प्रतिपद्याश्विने मासि भवो वैधृतिचि
त्रयोः। आद्यपादौ परित्यज्य प्रारभेन्नवरात्रकमिति। भविष्येपि चित्रावैधृतिसंपूर्णा प्रतिपच्चेद्भवेन्नृप। त्याज्या अं
शास्त्रयस्त्वाद्यास्तुरीयेंशे तु पूजनमिति। रुद्रयामलेपि। वैधृतौ पुत्रनाशः स्याच्चित्रायुक्ता यदा भवेत्। तावैधृत्यावपि यु
क्तास्यात्तदा मध्यंदिने रवौ। अभिजित्तु मुहूर्ते यत्तत्र स्थापनमिष्यते। इति चित्रादिनिषेधे मूलं चिंत्यं। इदं कलशस्थापनं रा

त्रौ न कार्यं न रात्रौ स्थापनमिष्यते॥ इति चित्रादिनिषेधमूलं चिंत्यं॥ रात्रौ स्थापनं कार्यं न च कुंभाभिषेचनमिति मात्स्योक्तेः॥ भास्करो
दयमारभ्य यावत्तु दश नाडिकाः। प्रातःकाल इति प्रोक्तः स्थापनारोपणादिषु इति विष्णुधर्मोक्तेः॥ रुद्रयामले स्नानं मांगलि
कं कृत्वा ततो देवीं प्रपूजयेत्। शुभाभिर्मृत्तिकाभिश्च पूर्वं कृत्वा तु वेदिकां। यवान्वै वापयेत्तत्र गोधूमैश्चापि संयुतान्। तत्र
संस्थापयेत्कुंभं विधिना मंत्रपूर्वकं। सौवर्णं राजतं वापि ताम्रं मृन्मयपज्ञं तं वेति॥ अथ पूजाविधिः। सा च जयंतीमंत्रेणान
वान्तरेण वा कार्या। तदुक्तं दुर्गाभक्तितरंगिण्यां देवीपुराणे। कुर्याद्देव्या स्तु मंत्रेण पूजां क्षीरघृतादिभिरित्युक्त्वा॥ जयंती
मंगला काली भद्रकाली कपालिनी॥ दुर्गा क्षमा शिवा धात्री स्वाहा स्वधा नमोस्तु ते। अनेनैव तु मंत्रेण जपहोमौ तु कारये
त्॥ इति। ॐ दुर्गे दुर्गरधात्री स्वाहा स्वधा नमोस्तु ते। अनेनैव तु मंत्रेण जपहोमौ तु कारयेत्॥ [illegible]णस्वाहेति नवार्णमंत्रः। त
त्र प्रतिपदि प्रातरभ्यंगं कृत्वा देशकालौ संकीर्त्य मम सेह जन्मनि दुर्गाप्रीतिद्वारा सर्वापच्छांतिपूर्वक दीर्घायुर्विपुलधन
विच्छिन्नसंततिवृद्धिस्थिरलक्ष्मीकीर्तिलाभशत्रुपराजयसदभीष्टसिद्ध्यर्थं शारदनवरात्रप्रतिपदि विहितकलशस्था
पनदुर्गापूजाकुमारीपूजादि करिष्ये। इति संकल्प्य मही द्यौरिति भूमिं स्पृष्ट्वा। ॐ ओषधयः समिति यवान्निक्षिप्य कलशे एमः
ष्विति कुंभं संस्थाप्य इमं मे गंगे इति जलेनापूर्य गंधद्वारामिति गंधं। या ओषधीरिति सर्वौषधीः काण्डात्काण्डादिति पूर्वा अश्व

च्छेवइति पंचपल्लवाः स्योनापृथिवीति सप्तमृदः। याः फलिनीरिति फलं। सहिरत्नानीति पंचरत्नानि हिरण्यं च क्षित्वा। युवा
सुवासाः इति वस्त्रेणावेष्ट्य पूर्णादर्वीति पूर्णपात्रं निधाय तत्र वरुणं संपूज्य जीर्णायां वा नूतनायां वा प्रतिमायां दुर्गामा
वाह्य पूजयेत्। तद्यथा। पूर्वोक्तमंत्रमुच्चार्य आगच्छ वरदे देवि दैत्यदर्पनिषूदनि। पूजां गृहाण सुमुखि नमस्ते शंकरप्रि
ये। सर्वतीर्थमयं वारि सर्वदेवसमन्वितं। इमं घटं समागच्छ तिष्ठ देवगणैः सह। दुर्गे देवि समागच्छ सांनिध्यमिह कल्प
य। बलिं पूजां गृहाण त्वं अष्टाभिः शक्तिभिः सह। इत्यावाह्य पूर्वोक्तमंत्रेण षोडशोपचारैः पूजयित्वा माषभक्तबलिं कू
ष्मांडं दधिबलिं वा निवेदयेत्। ततः कुमारीपूजा। तदुक्तं हेमाद्रौ स्कांदे एकैकां पूजयेत्कन्यामेकवृद्ध्याथवा द्विगुणं त्रि वचः
गुणं वा प्रत्येकं नवकं तु वा। तथा नवभिर्लभते भूमिमैश्वर्यं द्विगुणेन तु। एकवृद्ध्या लभेत्क्षेममेकैकेन श्रियं लभे
त्। एकवर्षा तु या कन्या पूजार्थे तां विवर्जयेत्। गंधपुष्पफलादीनां प्रीतिस्तस्या न विद्यते। तेन द्विवर्षामारभ्य द
शवर्षपर्यंता एव पूज्याः। नत्वन्याः। तासां च क्रमेण कुमारिका त्रिमूर्तिः कल्याणी रोहिणी काली चंडिका शांभवी दु
र्गा सुभद्रेति नामभिः। पूजा कार्या। आसां च प्रत्येकं पूजामंत्राः फलविशेषाश्च तत्रैव ज्ञेयाः। सामान्यतस्तु। मंत्राक्ष
रमयीं लक्ष्मीं मातृणां रूपधारिणीं। नवदुर्गात्मिकां साक्षात्कन्यामावाहयाम्यहं। एवमभ्यर्चनं कुर्यात्कुमारीणां पयत्न

तः कंचुकैश्चैव वस्त्रैश्च गंधपुष्पाक्षतादिभिः। नानाविधैर्भक्ष्यभोज्यैर्जपेत्पायसादिभिः। तथा। ग्रंथिस्फुटितशीर्षांगी रक्तपू
यव्रणांकिता। जात्यंधां केकरां काणीं कुरूपां तनुरोमशां। संत्यजेद्रोगिणीं कन्यां दासीगर्भसमुद्भवां। ब्राह्मणीं सर्वका
र्येषु जयार्थे नृपवंशजां। लाभार्थे वैश्यवंशोत्थां सुतार्थे शूद्रवंशजां। दारुणे चांत्यजातानां पूजयेद्विधिना नरः। इति।
अत्र वेदपारायणमप्युक्तं रुद्रयामले। एवं च तत्र वेदविदो विप्रान्सर्वान्प्रसादयेत्। तेषां च वरणं कार्यं वेदपारायणाय वै
इति। तथा। एकोत्तराभिवृद्ध्या तु नवमीयावदेव हि। चंडीपाठं जपेच्चैव जापयेद्वा विधानतः। तिथिवृत्तेवा गृहीतं त्रे।
प्रणवं चादितो जप्त्वा स्तोत्रं वा संहितां पठेत्। अंते च प्रणवं दद्यादित्युवाचादिपूरुषः। आधारे स्थापयित्वा तु
पुस्तके प्रजपेत्सुधीः। हस्तसंस्थापनादेव यस्माद्धि विफलं भवेत्। स्वयं च लिखितं यच्च शूद्रेणालिखितं भवेत्। अ
ब्राह्मणेन लिखितं तच्चापि विफलं भवेत्। ऋषिछंदादिकं न्यस्य पठेत्स्तोत्रं विचक्षणः। स्तोत्रेण दृश्यते यत्र प्रण
वे तत्र विन्यसेत्।। सर्वत्र पाठो दिज्ञेयस्त्वन्यथा विफलं भवेत्। एवं नवमीपर्यंतं प्रत्यहं कुर्यात्। अत्र विशेषो हेमाद्रौ दे
वीपुराणे। यदाद्येदिवसे कुर्याच्चंडिकापूजनादिकं। द्विगुणं तद्वितीयेह्नि त्रिगुणं तत्परेहनि। नवमीतिथिपर्यंतं
वृद्ध्या पूजा जपादिकमिति। एतेन नवरात्रे पूजैव प्रधानं। उपवासादिस्त्वंगमिति गम्यते। तिथिह्रासे तु तिथिद्वयनिमि

एमः

त्पूजादिमहालयश्राद्धवदेकदिने आरब्धव्याकार्यानंद्वोतद्द्वेधा वृत्तिः।ततोनवरात्रोपवासादिसंकल्पंकुर्यात।स्वस्याशक्तावन्येनका
रयेत्।स्वयंवाप्यन्यतोवापिपूजयेत्पूजयीतवेदितरंगिण्यांदेवीपुराणात।इदंचदेवीपूजनंशुक्रास्तादावपिकार्यं।तदुक्तंधर्म
प्रदीपे।नष्टेशुक्रेतथाजीवेसिंहस्थेचबृहस्पतौ।।कार्योचैवसदेव्यर्चाप्रत्यहंकुलधर्मतः।मलमासेतुवचनाभावान्नभवति।
अत्रत्वाश्वस्याश्वपूजनमुक्तंदेवीपुराणेमदनरत्ने।अश्वयुक्शुक्लप्रतिपत्स्वातियोगेशुभेदिने।पूर्वमुच्चैःश्रवानामप्रथमेऽश्वि
यमावहत।तस्मात्ताश्वेनरैस्तत्रपूज्योसौश्रद्धयासह।पूजनीयाश्चतुरानवमीयावदेवहि।शांतिःस्वस्त्ययनेकार्यंतदाते
षांदिनेदिने।।धान्यंभक्ष्यातकंकुष्ठंवचासिद्धार्थकास्तथा।पंचवर्णेनसूत्रेणग्रंथिंतेषांतुबंधयेत।वायव्येवारुणैःसौरै
शाक्रैर्मंत्रैःसवैष्णवैः।वैश्वदेवैस्तथाग्नेयैर्होमःकार्योदिनेदिने।कल्पतरौचैतदग्रेन्यदपि।ज्येष्ठायोगेपुरातत्रगजाश्चाष्टौ
वहाबलाः।पृथिवीमवहन्पूर्वंसशैलवनकाननां।।कुमुदैरावणोपद्मःपुष्पदंतोथवामनः।सुप्रतीकोंजनोनीलस्तस्मात्तां
स्तत्रपूजयेत।शाक्राद्दृष्टात्समारभ्यनवम्यंतंचपूर्ववत।अश्ववद्धोमादीत्यर्थः।अथप्रतिपदादिषुविशेषोदुर्गाभक्तित
रंगिण्यांभविष्ये।केशसंस्कारद्रव्याणिप्रदद्यात्प्रतिपद्दिने।पक्कंतैलंद्वितीयायांकेशसंयमहेतवे।पट्टडोरमितिगौडपाठः
दर्पणंचतृतीयायांसिंदूरालक्तकंतथा।।मधुपर्कंचतुर्थ्यांचतिलकंनेत्रमंडनं।पंचम्यामंगरागंचशक्त्यालंकरणानिच।

१०० षष्ठ्यांबिल्वतरौबोधंसायंसंध्यासुकारयेत।सप्तम्यांप्रातरानीयगृहमध्येप्रपूजयेत।उपोषणमथाष्टम्यामात्मशक्त्याचपूजने।न
वम्यामुग्रचंडायाःपूजांकुर्याद्बलिंतथा।।संपूज्यप्रेषणंकुर्याद्दशम्यांशारदोत्सवैः।अनेनविधिनायस्तुदेवींश्रीणयतेनरः।।स्कं
दवत्पालयेद्देवीतंपुत्रधनकीर्त्तिभिः।कृत्स्नपत्तवार्णावेलैंगे।कन्यायांकृष्णपक्षेतुपूजयित्वाद्रुमेपिच।नवम्यांबोधयेद्देवींमहा
विभवविस्तरैः।शुक्लपक्षेचतुर्थ्यांतुदेवीकेशविमोक्षणं।प्रातरेवतुपंचम्यांस्नापयित्वाशुभैर्जलैः।षष्ठ्यांसायंप्रकुर्वतबि
ल्ववृक्षेधिवासनं।सप्तम्यांपत्रिकापूजाअष्टम्यांचाप्युपोषणं।पूजाचजागरश्चैवनवम्यांविधिवद्बलिः।।विसर्जनंदशम्यां
तुक्रीडाकौतुकमंगलैः।।अत्रनवम्यांबोधनासामर्थ्येषष्ठ्यांबोधनमितिस्मार्त्ताः।फलभूमार्थिनःसमुच्चयइत्यन्ये।नव
म्यांमंत्रःकापुराणे।इषेमास्यसितेपक्षेनवम्यामाद्रुमेशिवा।।श्रीवृक्षेबोधयामित्वांयावत्पूजांकरोम्यहं।।अथस्त्रीव्रतेवि
शेषः।परिभाषायांज्ञेयः।अथाशौचेविशेषोनिर्णयामृतेविश्वरूपनिबंधे।आश्विनेशुक्लपक्षेतुप्रारब्धेनवरात्रके।शावा
शौचेसमुत्पन्नेक्रियाकार्याकथंबुधैः।सूतकेवर्त्तमानेचतत्रोत्पन्नेसदाबुधैः।देवीपूजाप्रकर्त्तव्यापशुयज्ञविधानतः
।सूतकेपूजनंप्रोक्तंदानंचैवविशेषतः।देवीमुद्दिश्यकर्त्तव्यंतत्रदोषोनविद्यते।इतिगौडनिबंधेतिथितत्वेपिउक्तं।आश्वि एमः
नकृष्णनवम्यादिशुक्लप्रतिपदादिषष्ठ्यादिसप्तम्यादिकंकर्मातत्स्वमध्येआशौचपातेपिनदोषः।संकल्पोव्रतसत्रयोरि

तिविष्णूक्तेरिति॥ आरब्धंस्वयमेवकार्यंअनारब्धंत्वन्येनकारयेतदितिदिवोदासः। रजस्वलात्वन्येनकारयेत। सूतकादि
वद्विशेषवचनाभावात स्त्रीणांचनक्तव्रतेतांबूलादिचर्वणंभवति। तदुक्तंव्रतहेमाद्रौगारुडे॥ गंधालंकारतांबूलपुष्पमा
लानुलेपनं। उपवासेनदुष्यंतिदंतधावनमंजनमिति। एतत्सभर्तृकोपवासविषयं॥ अन्यच्चात्रविशेषः परिभाषायामु
क्तः॥ आश्विनशुक्लपंचम्यामुपांगललिताव्रतंमहाराष्ट्रेषुप्रसिद्धं। तत्रयद्यपिकालविशेषोनोक्तस्तथापिरात्रौजागरणं
कुर्याद्गीतवादित्रनिस्वनैरितिरात्रौजागरोक्तेः शक्तिपूजायांरात्रौप्राशस्त्याच्चरात्रिव्यापिनीग्राह्येतिकेचित। व
स्तुतस्तुवचनंविनारात्रिपूजायांमानाभावात। जागरस्यचांगत्वात युग्मवाक्यात। भुक्त्वाजागरणेनक्तेचंद्रार्घ्यं
व्रतेतथा। ताराव्रतेषुसर्वेषुरात्रियोगोविशिष्यते। इतिकालहेमाद्रौवचनाच्चपूर्वविद्धाग्राह्या। रात्रिशब्दःपूर्वविद्धा
वचनः। इतिहेमाद्रिः। अस्यचभुक्त्वाजागरणरूपत्वात्तदितिसाधुप्रतीमः। भुक्त्वाजागरणंयच्चेत्येकंपदंतस्मिन्व्र
तेऽप्यर्थः। अन्यथाभुक्तेरसंगतेः। दिवोदासीयेप्येवं॥ आश्विनशुक्लपक्षेमूलनक्षत्रेसरस्वतीस्थापनं। यथोक्तं
निर्णयामृतेदेवीपुराणे। मूलेषुस्थापनंदेव्याः पूर्वाषाढासुपूजनं। उत्तरासुबलिंदद्याच्छ्रवणेनविसर्जयेतदिति। रु
द्रयामलेपि। मूलनक्षत्रेसुराधीशपूजनीयासरस्वती। पूजयेत्प्रत्यहंदेवींयावद्वैष्णवमृक्षकं। नाध्यापयेन्नचलिखेन्ना

॥कालिकापुराणे॥ त्रिमुहूर्तापिकर्तव्यापंचमीललिताव्रते॥ अन्यथाकुरुतेयस्तुपुत्रदारधनक्षयः॥ प्रातःस्नानादिकंकृत्वादिवारं
॥भोविधीयते॥ रात्रौस्नानंनिषिद्धंस्यात्स्नातांपरिवर्जयेत॥

धीयीतकराचनापुस्तके स्थापिते देवविद्याकामो द्विजोत्तमः। संग्रहे। आश्विनस्य सितपक्षे मेधाकामः सरस्वतीं। मूलेनावाहयेद्देवीं श्रवणेन विसर्ज्जयेत्। इति मूलस्याद्यपादे आवाहनमिति। शिष्टाः श्रवणाद्यपादे चावसर्ज्जयेत्। आद्रिभागो निशायां तु श्रवणस्य पदा भवेत्॥ संप्रेषणं तदा देव्या दशम्यां च महोत्सवः। इति चिंतामणौ ब्रह्मांडपुराणात्। अथ षष्ठीकृत्यं। गौडनिबंधे देवीपुराणे। ज्येष्ठानक्षत्रयुक्तायां षष्ठ्यां बिल्वाभिमंत्रणं। सप्तम्यां मूलयुक्तायां पत्रिकायाः प्रवेशनं। पूर्वाषाढायुताष्टम्यां पूजा होमाद्युपोषणं। उत्तरेणानवम्यां तु बलिभिः पूजयेच्छिवां। श्रवणेन दशम्यां तु प्रणिपत्य विसर्जयेत्। कालिकापुराणे। बोधयेद्बिल्वशाखायां षष्ठ्यां देवीं फलेषु च। सप्तम्यां बिल्वशाखायामाहृत्य प्रतिपूजयेत्। पुनः पूजां तथाष्टम्यां विशेषेण समाचरेत्। जागरं च स्वयं कुर्याद्बलिदानं महानिशि। प्रभूतबलिदानं तु नवम्यां विशेषेण समाचरेत्। जागरं च स्वयं कुर्याद्बलिदानं महानिधिवच्चरेत्। विसर्ज्जनं दशम्यां तु कुर्याद्वै शारदोत्सवैः। धूलीकर्दमनिक्षेपैः क्रीडाकौतुकमंगलैः॥ अत्र सर्वत्र तिथिनक्षत्रयोगादरो मुख्यकल्पः। तदभावे तु तिथिरेव ग्राह्या। तिथिः शरीरं देवस्य तिथौ नक्षत्रमाश्रितं। तस्मात्तिथिं प्रशंसंति नक्षत्रं न तिथिं विनेति विद्यापतिलिखितवचनात्। तिथिनक्षत्रयोर्योगे द्वयोरेवानुपालनं। योगाभावे तिथिर्ग्राह्या देव्याः पूजनकर्मणीति। तत्रैव रेवलो एमः

न्तेष्वा। अत्रचपत्रिकाप्रवेशात्पूर्वेद्युःसायंकालेषष्ठ्यपवेतत्पूर्वदिनेऽधिवासनंकार्यं। सायंकालेत्यंतामसेत्वधिवासनलो
पः। षष्ठ्यांसायंप्रकुर्वीतबिल्ववृक्षेऽधिवासनमितिपूर्ववचनादितिकल्पतरुः। सायंश्रुतिःफलातिशयमात्रार्था। ननु
कर्मलोपइत्यार्यचूडामणिः। अत्रक्रमः। बिल्वसमीपंगत्वाबिल्वंसंपूज्यप्रार्थयेत्। तत्रमंत्रः। रावणस्यवधार्थायरामस्या
नुग्रहायच। अकालेब्रह्मणाबोधोदेव्यास्त्वयिकृतःपुरा। अहमप्याश्विनेषष्ठ्यांसायाह्नेबोधयाम्यतः। श्रीशैलशिख
रेजातःश्रीफलश्रीनिकेतन। नेतव्योऽसिमयागच्छपूज्योदुर्गास्वरूपतः। इति। एवंदेवीमधिवास्यपरदिनेनिमंत्रितबि
ल्वशाखापत्रप्रवेशपूजांकुर्यात्। तदुक्तंहेमाद्रौलैंगेगोमूलाभावेतुसप्तम्यांकेवलांप्रवेशयेत्। युग्माभ्यांनवबिल्व
स्यफलाभ्यांशाखिकांतथा। तत्रैवप्रतिमांदेव्याःस्नात्वावासंप्रवेशयेत्। अत्रैवोपवासपूजादावौदयिकीसप्तमी
ग्राह्या। ननुयुग्मवाक्यात्पूर्वा। युगाद्यावर्षवृद्धिश्चसप्तमीपार्वतीप्रिया। रवेरुदयमीक्षंतेनतत्रतिथियुग्मते
ति। कृत्यतत्त्वार्णवोदाहृतवचनात्। भगवत्याःप्रवेशादिविसर्गांताश्चयाःक्रियाः। तिथावुदयगामिन्यांसर्वास्ताःकारये
द्बुधः। इतितिथितत्वेनंदिकेश्वरपुराणाच्चदुर्गाभक्तितरंगिण्यामप्येवं। अत्रापिघटिकातोन्यूनत्वेपरानकार्या। अतो
पवासनियमेघटिकैकापियाभवेदितिदेवलोक्तेरितिगौडाः। दाक्षिणात्यास्तुपूर्ववचनमदृष्ट्वायुग्मवाक्यात्पू

ति:॥

वीं कुर्वंति। पत्रिकापूजा च पूर्वाह्ण एव कार्या। ननु मूलानुरोधात् मध्याह्नादाविति कृत्यतत्वार्णवे उक्तं। पत्रिकास्तु। रंभाक
च्वी हरिद्रा च जयंती विल्व दाडिमौ। अशोको मानकश्चैव धान्यादि नवपत्रिकाः इति तत्रैवोक्ताः। अस्यामेव सप्तम्यां देवी
त्रिरात्रमुक्तं हेमाद्रौ। प्रतिपदादिनवतिथिषु उपवासादिकरणासामर्थ्ये सप्तम्यादिदिनत्रये वा कुर्यात्। तदाह धौ
म्यः। आश्विने मासि शुक्ले तु कर्त्तव्यं नवरात्रकं। प्रतिपदादिक्रमेणैव यावच्च नवमी भवेत्। त्रिरात्रं वापि कर्त्तव्यं सप्त
म्यादि यथाक्रमं। अत एव हेमाद्रौ देवीपुराणे मंगलाव्रते। आश्विने वाथवा माघे चैत्रे वा श्रावणेपि वा। कृत्वाष्टम्यादि
कर्त्तव्यं व्रतं शुक्लावधिं हरेः। पक्षच्छुक्लाष्टमीं शक्र उपोष्य तु विधानतः। स्नानं होमो जपः पूजा कन्याभोज्यास्तथान्वहं। म
हाभैरवरूपेण अस्थिमालाधराश्च ये। पूजनीया विशेषेण वैश्वयामपुराणेषु इति मासचतुष्टयेभिधाय। अथवा
नवरात्रं च सप्तपंचत्रिकं द्विवा। अ एकभक्तेन नक्तेनायाचितोपोषितैः क्रमादिति। पूजयीताश्विने शक्र यावच्छुक्ला
ष्टमी भवेत्। सर्वकार्याणि सिध्यंति शक्रमाहात्म्यवसेशपः। इत्युक्तं। दिवेस्मेकरात्रमुक्तं। देवीपुराणे। नवरात्रव्रते शक्र
त्रिरात्रं चैकरात्रकं। व्रतं चरति यो भक्त्या तस्मै दास्यामि वांछितमिति। तत्रापि सप्तम्याः पूर्वोक्तो निर्णयः। अत्र तिथियोग एमः
पद्येते त्रेणोपवासः तिथिद्वयनिमित्तं पूजादिकं तु भेदेन। अत्र विशेषो निर्णयामृते। भविष्ये। सप्तम्यां मवगेहानि सा

आनि नवानि च। एकं वा। चित्रभावेन कारयेत्तु समाहितः। दुर्गागृहं प्रकर्त्तव्यं चतुरस्रं सुशोभनं। तन्मध्ये वेदिकां कुर्या
च्चतुर्हस्तां समां शुभां। तस्यां सिंहासनं शोभनं कंबलाजिनसंयुतं। तत्र दुर्गां प्रतिष्ठाप्य सर्वलक्षणसंयुतां। भुजैः सुवृत्तभा रुचि
रैर्दशभिर्वा विभूषितां। नितंबबिंबसन्नद्धकिंकिणीक्वाणनादिनीं। शूलचक्रदंडशक्तिवज्रचापासिधारिणीं। घंटा
क्षमालाकरकपानपात्रलसत्करां। तदग्रे छिन्नशिरसं महिषं रुधिराप्लुतं। निःसृतार्द्धतनुं कंठनाले चर्मासिधारिणं। दे
वीधृतकरग्रीवं शूलेनोरसि ताडितं। नागपाशेन विक्षिप्तं हर्यक्षेणापि विद्रुतं॥ वमद्रुधिरवक्त्रेणाधुन्वतोर्द्ध्वसटां रुषा।
सर्वतो मातृचक्रेण सेव्यमानां सुरैस्तथा। तत्र देवी प्रकर्त्तव्या हेमी वा राजती तथा। मृद्दारुलवणोपेता खड्गशू
ले च पूजयेत्। वाक्षदावद्दारुमयी। देवीमूर्त्तिस्थापने विशेषो दुर्गाभक्तितरंगिण्यां देवीपुराणे। याम्यास्या सुभ
दा दुर्गा पूर्वास्या जयवर्द्धिनी। पश्चिमाभिमुखी नित्यं न स्थाप्या सौम्ये दिङ्मुखी। प्रतिमाभावे विशेषस्तत्रैव हेम
राजतमृद्धातुशैलचित्रार्पिता पि वा। खड्गशूलेर्चिता देवी सर्वकामफलप्रदा। यदप्यस्याः पृथक् प्रोक्तं तस्मिंस्तां प्रतिपू
जयेत्। देवी मन्त्रार्चिता पुंसां राज्यायुःसुतसौख्यदा। कृत्यतत्त्वार्णवे कालिकापुराणे। लिंगस्थां पूजयेद्देवीं मंडल
स्थां तथैव च। पुस्तकस्थां महादेवीं पावके प्रतिमासु च। चित्रे च त्रिशिखे खड्गे जलस्थां वापि पूजयेत्। बिल्वपत्रे यजे

१०३ देवीं तथाज्ञातीप्रसूनकैः। नानापिष्टकनैवेद्यैर्धूपदीपैर्मनोहरैः॥ भगलिंगाभिधानैश्च भगलिंगप्रणीतकैः। भगलिंगक्रियाभि
श्च प्रीणयेद्द चंडिका। परैर्नाक्षिप्यते यस्तु यः परान्नाक्षिपत्यपि। तस्य क्रुद्धा भगवती शापं दद्यात्सुदारुणं। चित्रमृन्म
य्यादौ स्नानाघसंभवतक्रः। अंतिकस्थापिते खड्गे स्नापयेद्दर्पणेपि वेति। अथ सप्तमीपूजाविधिः। प्रतिपद्युक्तविधि
नाफलसंकीर्तने। तेन च पत्रिकामृन्मयदुर्गापूजाबलिदानानि करिष्य इति संकल्प्य पूर्वं निमंत्रितबिल्वसमीपं गत्वा
संपूज्य आगच्छ सर्वकल्याणीति पूर्वोक्तमंत्रं पठित्वा॥ बिल्ववृक्ष महाभाग सदा त्वं शंकरप्रिय॥ गृहीत्वा तव शाखां च दे
वीपूजां करोम्यहं॥ शाखाच्छेदोद्भवं दुःखं न च कार्यं त्वया प्रभो। गृहीत्वा तव शाखां च पूज्या दुर्गेति च स्मृतिः। उत्तिष्ठ पत्रिके
देवि सर्वकल्याणहेतवे। पूजां गृहाण सकलामस्माकं वरदा भव। मेरुमंदरकैलासहिमवच्छिखरे गिरौ। जातः श्रीफल
वृक्ष त्वमंबिकायाः सदा प्रियः। इति संप्रार्थ्य ॐ छिंधि फट् हुँ ॐ फट् स्वाहेति छित्वा संपूज्य। ॐ चामुंडे चल चल इति वाद्य
घोषेण देवीं तां च गृहं प्रवेश्य। आरोपितासि दुर्गे त्वं मृन्मय्यां श्रीफलेपि च। स्थिरा नितांतं भक्त्या च गृहे त्वं कामदा भवेति राम:
स्थिरीकृत्य रंभादिपत्रिकाः पंचगव्येन पंचामृतेन च स्नापयित्वा वस्त्रेणावेष्ट्य स्थापयेत्। ततः पूर्ववत्संकल्पं कृत्वा अ
स्नातानादाय देवीमावाहयेत्। तत्र मंत्रः। आवाहयाम्यहं देवीं मृन्मय्यां श्रीफले तथा। कैलासशिखरे देवी विंध्याद्रेर्हिमपर्व

तात। आगत्य बिल्वशाखायां चंडिके कुरु संनिधिं। स्थापितासि मया दुर्गे पूजये मां प्रसीद मे। आयुरारोग्यमैश्वर्यं देहि देवि न
मोस्तु ते। दुर्गे दुर्गे स्वरूपासि सुरतेजोमयेर्चिते। सदानंदकरे देवि प्रसीद मम सिद्धये। एह्येहि भगवत्यंब शक्रपद्मजय
प्रदे। भक्तितः पूजयामि त्वां दुर्गे देवि सुरार्चिते। पत्रैर्वैश्च फलोपेतैः पुष्पैश्च सुमनोहरैः। पल्लवे संस्थिते देवि पूजये
त्वां प्रसीद मे। दुर्गे देवि इहागच्छ सान्निध्यमिह कल्पय। यज्ञभागान्गृहाण त्वं योगिनी कोटिभिः सहेति। ततो मूलमंत्रेण
पाद्यादिगंधांतोपचारैः संपूज्य। अमृतोद्भवं च श्रीवृक्षं शंकरस्य सदाप्रियं। बिल्वपत्रं प्रयच्छामि पवित्रं ते सुरेश्वरीति
बिल्वपत्रं। ब्रह्मविष्णुशिवादीनां द्रोणपुष्पं सदाप्रियं। तत्ते दुर्गे प्रयच्छामि सर्वकामार्थसिद्धये इति द्रोणपुष्पं निवे
द्य धूपादि दक्षिणांतां पूजां मूलेन कृत्वा प्रार्थयेत्। ॐ महिषघ्नि महामाये चामुंडे मुंडमालिनि। आयुरारोग्यमैश्व
र्यं देहि देवि नमोस्तु ते। कुंकुमेन समालब्धे चंदनेन विलेपिते। बिल्वपत्रकृतापीडे दुर्गेहं शरणं गतः। रूपं देहि यशो
देहि भाग्यं भगवति देहि मे। पुत्रान्देहि धनं देहि सर्वान्कामांश्च देहि मे। सर्वमंगलमंगल्ये इति च संप्रार्थ्य पत्रिकाः पू
जयेत्। कदल्यां ब्राह्मणीं। दाडिमे रक्तदंतिकां। धान्ये लक्ष्मीं। हरिद्रायां दुर्गां। माने चामुंडां। कचे कालिकां। बिल्वे
शिवां। अशोके शोकरहितां। जयंत्यां कार्त्तिकीं। चावास्य संपूज्य दुर्गायै बलिं दद्यात्। अत्र शत्र्वादिपूजा वक्ष्यते। ततः

स्तुतिं पठेत्॥ तदुक्तं शिवरहस्ये॥ दुर्गां शिवां शांतिकरीं ब्रह्माणीं ब्रह्मणः प्रियां। सर्वलोकप्रणेत्रीं च प्रणमामि सदा शिवां॥ मंगलां
शोभनां शुद्धां निःकलां परमां कलां॥ विश्वेश्वरीं विश्वमातां चंडिकां प्रणमाम्यहं। सर्वदेवमयीं देवीं सर्वरोगभयापहां॥
ब्रह्मेशविष्णुनमितां प्रणमामि सदा उमां॥ विंध्यस्थां विंध्यनिलयां दिव्यस्थाननिवासिनीं। योगिनीं योगमातां च चंडि
कां प्रणमाम्यहं ईशानमातरं देवीमीश्वरीमीश्वरप्रियां॥ प्रणतोस्मि सदा दुर्गां संसारार्णवतारिणीं। य इदं पठति स्तो
त्रं शृणुयाद्वापि यो नरः। स मुक्तः सर्वपापैस्तु मोदते दुर्गया सह॥ अथ महाष्टमी सा च परयुता॥ शुक्लपक्षेष्टमी चैव शु
क्लपक्षे चतुर्दशी। पूर्वविद्धा न कर्तव्या कर्तव्या परसंयुतेति ब्रह्मवैवर्त्तात्। मदनरत्ने स्मृतिसंग्रहे। शरन्महाष्टमी पू
ज्या नवमीसंयुता सदा॥ सप्तमीसंयुता नित्यं शोकसंतापकारिणी। जंभेन सप्तमीयुक्ता पूजिता तु महाष्टमी। इंद्रेण
निहतो जंभस्तस्माद्दानवपुंगवः। तस्मात्सर्वप्रयत्नेन सप्तमीमिश्रिताष्टमी॥ वर्जनीया प्रयत्नेन मनुजैः शुभकांक्षिभिः।
सप्तमीशल्यसंयुक्तां मोहादज्ञानतोपि वा। महाष्टमीं प्रकुर्वाणो नरकं प्रतिपद्यते। सप्तमीकलया यत्र परतश्चाष्टमी भ
वेत्। तेन शल्यमिदं प्रोक्तं पुत्रपौत्रक्षयप्रदं। तथा। पुत्रान्हंति पशून्हंति हंति राष्ट्रं सराजकं। हंति जातानजातांश्च सप्तमी एमः
सहिताष्टमी। तेनैत्रिमुहूर्त्तैर्वेधः। तदपि घटिकामात्राप्योदयिकी ग्राह्या। तत्रोपवासनियमे घटिकैकापि या भवेत्। इति
नं

देवलोक्तेः। गौडा अप्येवमेवाहुः। अतएवोक्तं भोजराजेन। नच सप्तमीशल्यसमोपेतेति। इयमेव मौमेतिप्रशस्ता। अष्टम्या
युदिते सूर्ये दिनांते नवमी भवेत्। कुजवारो भवेत्तत्र पूजनीया प्रयत्नतः। इति मदनरत्ने वचनात्। सप्तमीशल्यसंविद्धा
वर्जनीया सदाष्टमी। लोकापि सा महापुण्या यस्यां सूर्योदयो भवेत्। इति मदनरत्ने स्मृतिसमुच्चयवचनात्। अष्ट
मीनवमीयुक्ता नवमी चाष्टमीयुतेति पाद्मवचनाच्च। इयमेव मूलयुक्ता चेन्महानवमीसंज्ञा। अश्वयुक्शुक्लपक्षे
याऽष्टमी मूलेन संयुता। सा महानवमी प्रोक्ता त्रैलोक्येपि सुदुर्लभेति। हेमाद्रौ स्कांदात्। मूलयुक्तापि सप्तमीयुता च
त्याज्यैवेत्युक्तं। निर्णयामृते दुर्गोत्सवे। मूलेनापि हि संयुक्ता सदा त्याज्याष्टमी बुधैः। लेशमात्रेण सप्तम्या अपि स्याद्य
दि दूषितेति। महाष्टमी पूर्वेद्युः पूर्वाह्णव्यापित्वे पूर्वाऽन्यथा परैवेति निर्णयदीपे मतं। एतच्च तुच्छत्वादुपेक्ष्यं। रूपनारायण
धृते देवीपुराणे। सप्तमीवेधसंयुक्ता यैः कृता तु महाष्टमी। पुत्रदारधनैर्हीना भ्रमंतीह पिशाचवत्। यत्तु सप्तम्यामुदिते सू
र्ये परतो याष्टमी भवेत्। तत्र दुर्गोत्सवं कुर्यान्न कुर्यादपरेहनीति विश्वरूपनिबंधे वचनं। तदाश्विनकृष्णाष्टमीविष
यं। कन्यायां कृष्णपक्षे तु पूजयित्वाष्टमीदिने। नवम्यां बोधयेद्देवीं गीतवादित्रनिस्वनैरिति देवीपुराणे। तत्रापि पूजो
क्तेरिति हेमाद्रौ निर्णयामृते चोक्तं। यानि तु। भद्रया भद्रकाल्याश्वमध्येस्यादर्चनक्रिया। तस्माद्धि सप्तमीविद्धा कार्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१०५

दुर्गाष्टमी बुधैरिति। यच्च मोहचूलौत्तरे। ब्रह्मोवाच। आश्विनस्य सिताष्टम्यामर्द्धरात्रेषु पार्वती। भद्रकाली समुत्पन्ना पूर्वाषाढा
समायुतेति। तथा। तत्राष्टम्यां भद्रकाली दक्षयज्ञविनाशिनी। प्रादुर्भूता महाघोरा योगिनीकोटिभिः सहेति। यच्च मदनरत्ने
।महाष्टम्या।श्विने मासि शुक्ला कल्याणकारिणी। सन्नम्यापि युता कार्या मूलेन तु विशेषतः इति। तानि परदिने ष्टम्यभाव
विषयाणीति। मदनरत्ने उक्तं। यत्तु तत्रैव। परदिनेष्टमी सत्वेपि पूर्वविद्धा विधायकं वचनं। यदाष्टमी तु संप्राप्य ह्यस्तं याति
दिवाकरः। तत्र दुर्गोत्सवं कुर्यान्न कुर्यात् परेहनि। दुर्भिक्षं तत्र जानीयान्नवम्यां यत्र पूज्यते। इति। तत्परदिने दशम्यभाव
विषयं। यदात्स्यौदयेन स्यान्नवमी चापरेहनि। तदाष्टमी प्रकुवत सप्तम्यासहितां नृपेति तत्रैव। स्मृतिसंग्रहोक्तेः। उक्तए
क्तयचोमत्र दर्पं यांति नराधिप। पूर्वाष्टमी यत्तु। अहं भद्रा च भद्राहं नावयोरंतरं क्वचित्। सर्वां सिद्धिं प्रदास्यामि भद्रा
यामर्चिता ह्यहं मिति देवीपुराणे। तद्धि छिकरणामध्ये पूजाविधानार्थं। विशिंत्य स्कामहाष्टम्यां मम पूजां करोति यः।
तस्य पूजाफलेन स्यात्तेनाहमपमानिता। इति तत्रैवोक्तेरिति निर्णयामृते। तथा कालिकापुराणे। सप्तम्यां पत्रिका
पूजा अष्टम्यां चाप्युपोषणं। पूजा च जागरश्चैव नवम्यां विधिवद्वलिरिति। अष्टम्युपवासश्च पुत्रवता न कार्यः। उपवा
समहाष्टम्यां पुत्रवान्न समाचरेत्। यथा तथा वा पूतात्मा व्रती देवीं प्रपूजयेदिति। तत्रैवोक्तेः। नवम्यां पूजिता देवी ददा

एम:

स्वाभिमतंफलं।सापुण्यासापवित्राचसाधन्यासुखदायिनी॥रूपनारायणीयेब्राह्मे।अतोयपूजनीयासातस्मिन्नहनिमानवैः।उपोषितैर्वस्त्रधूपमाल्यरत्नानुलेपनैः।पशुभिःपानकैर्धूतेरात्रौजागरणेनचा दुर्गागृहेचशस्त्राणिपूजितव्यानिपंडितैः।वाद्यभांडानिचिह्नानिकवचान्यायुधानिच।अत्रविशेषोहेमाद्रौनिर्णयामृतेच।भविष्ये।कन्यागतेसवितरिशुक्लपक्षेष्टमीतुया।मूलनक्षत्रसंयुक्तासामहानवमीस्मृता।तस्यांसदापूजनीयाचामुंडामुंडमालिनी॥सदेयुक्तेनित्यतापितस्यांयेत्युपप्रज्यंतेप्राणिनोमहिषादयः।सर्वेतेस्वर्गतिंयांतिघ्नतांपापंनविद्यते।यावन्तश्चालयेद्गात्रंपशुस्तावन्नहन्यते।नतथाबलिदानेनपुष्पधूपविलेपनैः।यथासंतुष्यतेमेषैर्महिषैर्विंध्यवासिनी।एवंचविंध्यवासिन्यांनवरात्रोपवासतः।एकभक्तेननक्तेनस्वशक्त्यायाचितेनच॥पूजनीयाजनैर्देवीस्थानेस्थानेपुरेपुरे।गृहेशक्तिपरैर्ग्रामेग्रामेवनेवने।स्नातैःप्रमुदितैर्हृष्टैर्ब्राह्मणैःक्षत्रियैर्नृपैः।वैश्यैःशूद्रैर्भक्तियुक्तैर्म्लेच्छैरन्यैश्चमानवैः।स्त्रीभिश्चकुरुशार्दूलतद्विधानमिदंशृणु।जयाभिलाषीनृपतिःप्रतिपत्प्रभृतिक्रमात्।लोहाभिसारिकंकर्मकारयेद्यावदष्टमीमिति।लोहाभिसारिकंकर्मतंत्रेवोक्तं।प्रागुदक्प्रवणेदेशेबेताकाभिरलंकृतं।मंडपंकारयेद्दिव्यंनवसप्तकरेपराषोडशहस्तप्रमाणमित्यर्थः।आग्नेय्यांकारयेत्कुंडंहस्तमात्रंसुशोभनं।मेखलात्रयसंयुक्तंयोन्याश्चकु

दत्ताभया॥राजचिह्नानिसर्वाणिशस्त्राण्यस्त्राणियानिच॥आनीयमंडपेतानिसर्वाण्यत्राधिवासयेत॥ततस्तुब्राह्मणः
स्नातःशुक्लांबरधरःशुचिः॥ॐकारपूर्वकैर्मंत्रैस्तल्लिंगैर्जुहुयाद्धुतं।शस्त्रास्त्रमंत्रैर्होतव्यंपायसंघृतसंयुतं।हुतशे
षंतुरंगाणांराजानमुपहारयेत।लोहाभिसारिकंकर्मतेनैतदृषिभिःस्मृतं।कृतपत्ययनानश्वानागांश्चसमलंकृ
तान।भ्रामयेन्नगरेनित्यंनंदिघोषपुरस्सरं।प्रत्यहंनृपतिःस्नात्वासंपूज्यपितृदेवताः।पूजयेद्राजचिह्नानिफलमाल्य
विलेपनैः।तस्याभिसारणाद्राज्ञोविजयःसमुदाहृतः।पूजामंत्रानप्रवक्ष्यामिपुराणोक्तानहंतव।यैःपूजिताःप्रयछं
तिकीर्त्तिमायुर्यशोबलं।अत्रमंत्रौःछत्रस्य।यथांबुदश्छादयतिशिवायेमांवसुंधरां।तथाछादयराजानंविजया
रोग्यवृद्धये।चामरस्य।शशांककरसंकाशक्षीरडिंडीरपांडुर।प्रोत्सारयाशुदुरितंचामरामलडस्त्वभे।अथाश्वस्य।
गंधर्वकुलजातस्त्वंमाभूयाःकुलदूषकः।ब्रह्मणःसत्यवाक्येनसोमस्यवरुणस्यच।प्रभावाच्चहुताशस्यवर्द्धयत्वं
तुरंगमान।तेजसाचैवसूर्यस्यमुनीनांतपसातथा।रुद्रस्यब्रह्मचर्येणपवनस्यबलेनच।स्मरत्वंराजपुत्रत्वंकौस्तु
भंचमणिंस्मर।यांगतिंब्रह्महागच्छेन्मातृहापितृहातथा।भूमिहानृतवादीचक्षत्रियश्चपराङ्मुखः।सूर्याचेदमू एतः
सोगमुर्यावसस्यंतिदुष्कृतं।व्रजाश्वतांगतिःक्षिप्रंतच्चपापंभवेत्तवा।निःकृतोयदिवाछिन्नोयुधाश्वनितुरंगमारिपून्

जित्यसमरेसहमह्यासुखीभव।अथध्वजस्य।शक्रकेतोमहावीर्यश्यामवर्णार्चयाम्यहे।।पवित्रराजनमस्तेस्तुतथानाग
पणाध्वज।काश्यपेयाहरणश्चातर्नागारेविष्णुनासह।अप्रमेयदुराधर्षरणेदेवारिसूदन।।गरुत्मान्मारुतगतिस्त्वयिसंनि
हितोयतः।साश्वंसायुधान्यत्ररक्षत्वंचरिपून्दह।अथपताकायाः।हुतभुग्वसवोरुद्रावायुःसोमोमहर्षयः।नागकिं
नरगंधर्वयक्षभूतगणग्रहाः।प्रमथाश्चसहादित्यैर्भूतेशोमातृभिःसह।शक्रःसेनापतिःस्कंदोवरुणश्चाश्रितस्त्व
यि।प्रदहंतुरिपून्सर्वान्राजाविजयमृच्छतु।यानिप्रयुक्तान्यरिभिरायुधानिसमंततः।पतंतुपरिशत्रूणांहता
नितवतेजसा।।हिरण्यकशिपोर्युद्धेयुद्धेदेवासुरेतथा।।कालनेमिवधेयद्वद्यद्वत्त्रिपुरघातने।शोभितासितथै
वाद्यशोभयास्मांश्चसंस्मरीनीलान्वेतानिमान्दहदृष्ट्वानश्यत्वाशुनृपारयः।व्याधिभिर्विविधैर्घोरैःशस्त्रैश्चयुधि
निर्जिताः।पूतनारेवतीनाम्नाकालरात्रिश्चयाःस्मृताः।दहंत्वाशुरिपून्सर्वान्पताकेत्वंमयार्चिता।अथगजस्य।
कुमुदैरावणौपद्मःपुष्पदंतोथवामनः।सुप्रतीकोंजनोनीलएतेष्टौदेवयोनयः।तेषांपुत्राश्चपौत्राश्चवनान्य
ष्टौसमाश्रिताः।मंद्रोभद्रोमृगश्चैवगजःसंकीर्णएवच।।वनेवनेप्रसूतास्तेयूथानिसुमहांतिच।।पांतुत्वांवसवोरु
द्राआदित्याःसमरुद्गणाः।भर्तारंरक्षनागेंद्रस्वामिवत्प्रतिपाल्यतां।अवाप्नुहिजयंयुद्धेगमनेस्वास्तिनोव्रजेति।श्री

१०७ स्तेसोमाद्बलंविष्णोस्तेजःस्वरूपाल्लवोनिलात्त।छिंधंमेरीजैयंहस्ताघशोदेवासुरंदरातायुद्धेष्ठंतुनागास्त्वांदिशश्चमहद्दे
वतैः।आश्विनौसहगांधर्वैःपांतुत्वांसर्वतःसदेति।अथखड्गस्य।असिर्विशसनःखड्गस्तीक्ष्णधारोदुरासदः।श्रीगर्भोविज
यश्चैवधर्मधारस्तथैवच।एतानितवनामानिस्वयमुक्तानिवेधसा।नक्षत्रंकृत्तिकातेतुगुरुर्देवोमहेश्वरः।रोहिणप
श्चरीरंतेदैवतंचजनार्दनः।पितापितामहोदेवस्त्वंमांपालयसर्वदा।नीलजीमूतसंकाश।तीक्ष्णदंष्ट्रःकृशोदरः
भावशुद्धोमर्षणश्चअतितेजास्तथैवच।इयंयेनधृताक्षोणीहतश्चमहिषासुरः।तीक्ष्णधारायशुद्धायतस्मै
खड्गायतेनमः।अथछुरिकायाः।सर्वायुधानांप्रथमंनिर्मितासिपिनाकिना।शूलायुधाद्विनिष्कृष्यकृत्वामुष्टि
ग्रहंशुभं॥चंडिकायाःप्रदत्तासिसर्वदुष्टनिबर्हिणी।तयाविस्तारितासिचासिदेवानांप्रतिपादिता।सर्वसत्वांगभू
तासिसर्वाशुभनिबर्हिणी।छुरिकेरक्षमांनित्यंशांतिंयच्छनमोस्तुते।अथकट्टारिकायाः।रक्षांगानिगजान्
रक्षरक्षवाजिधनानिचीममदेहंसदारक्षकट्टारिकनमोस्तुते।कट्टारिकोमध्यदेशेकट्टारीतिप्रसिद्धा।अथध एमः
नुषः।सर्वायुधमहामात्रसर्ववैरिनिषूदन।चापमांसमरेरक्षसाकंशरवरैरिह।धृतंकृष्णेनरक्षार्थसंहारायह
रेणच।त्रपीमूर्तिंगतेदेवधनुरस्त्वंनमाम्यहं॥अथकुंतस्य।प्रासपातयशत्रूंस्त्वंमनयानाकमायय्या।गृहाणजी

वनंतेषांममसैन्यंचरक्ष्यतां।अथवर्मपूजा॥शर्मदस्त्वंचसमरेवर्मसैन्येयशोधमे।रक्षमांरक्षणीयोहंतापनीयन
मोस्तुते।अथकनकदंडः।स्यप्रोत्सारणायदुष्टानांसाधूनांरक्षणायच॥ब्रह्मणानिर्मितश्चासिव्यवहारप्रसिद्धये।
यशोदेहिसुखंदेहिजयदोभवभूपतेः॥ताडयस्वारिपून्सर्वान्हेमदंडनमोस्तुते।अथदुंदुभिमंत्रः।दुंदुभेत्वंसप
त्नानांघोषोहृदयवर्द्धनः॥भवभूमिपसैन्यानांतथाविजयवर्द्धनः।यथाजीमूतघोषेणप्रहृष्यंतिचबर्हिणः।त
थास्तुतवशब्देनहर्षोस्माकंमुदावहः॥यथाजीमूतशब्देनस्त्रीणांत्रासोभिजायते।तथाचतवशब्देनत्रस्यंत्वस्म
द्विषोरणे।अथशंखमंत्रः।पुण्यस्त्वंशंखपुण्यानांमंगलानांचमंगलं।विष्णुनाविधृतोनित्यमतःशांतिप्रदोभ
व।अथसिंहासनमंत्रः॥विजयोजयदोजेतारिपुघातीशुभंकरः।दुःसहोधर्मदःशांतःसर्वारिष्टविनाशनः।एतेवे
संनिधौयस्मात्त्वसिंहमहाबलाः॥तेनसिंहासनेतित्वंवेदैर्मंत्रैश्चगीयसे।त्वयिस्थितःशिवःशांतस्त्वयिशक्रःसुरे
श्वरः।नमस्तेसर्वतोभद्रभद्रदोभवभूपतेः।त्रैलोक्यजयसर्वस्वसिंहासननमोस्तुते।तथैवककर्मचिह्नानिस्वानिपूज्या
निशिल्पिभिः।लोहाभिसारिकंकर्मकुर्लैवंमंत्रपूर्वकं।नियमंचतथाष्टम्यांपूर्वाह्णेस्नानमाचरेत्।कुंकुमचंदनचंपक
चतुःसमैःशैलपिष्टैश्चचर्चितेगात्रींदेवींचैंकुसुमैरभ्यर्चयेद्बुड।भिः।कुमुदैःसपद्मपुष्पैःसदीपदीपैःसनैवेद्यैः॥मोसेर्वस्तुप

१०८

हारैर्मंगलशब्दैः समुच्छलितैः। विहितछत्रैर्यानैः स्यंदनशितशस्त्रधारिजनलोकैः। तुष्टैः पश्चत्त्वादित्तुनिवेघते सर्वमेवम
गवत्यै। दुर्गायाः पूजनीयाश्च। तद्दिने द्रोणपुष्पकैः। साच मान्या सुरेशान्यास्त्यस्याः रूढायतो ऽग्रतः। ततः खड्गेन मस्कृत्य श
त्रूणां वधसिद्धये। इच्छेत विजयं राज्ये सुभिक्षं चात्मनेनमः। पुनःपुनः प्रणाम्यार्यां संस्मरन्नत्वदर्पेशिवां। सर्वं वह्नेतितिको र
व्यत्रश्च सम्यां जागरं निशि। नटनर्त्तकगीतैश्च कारयेच्च महोत्सवं। एवं हृष्टैर्निशां नीत्वा प्रभाते ऽरुणोदये। घातयेन्महि
षान्मेषान्नरटतो नतकंधरान्। शतमष्टशतं वापि तदर्द्धं वाप यथेच्छया। सुरासवभृतैः कुंभैस्तर्पयेत्परमेश्वरीं। कपालि
केभ्यस्तद्देयं दासीदासजनेन तथा। ततोपराह्णसमये नवम्यां वै रथे स्थितां। भवानीं भ्रामयेद्राष्ट्रे स्वयं राजा सहूवान्। क
श्चिच्चो पोषितो वीरो विधृतो न्येन खड्गवान्। भूतेभ्यस्तु बलिं दद्यान्मंत्रेणानेन सामिषं। सरक्तं सजलं चान्यं गंधपुष्पा
द्यैर्युतं। श्रीह्वीर्ब्वारात्तमूलेन दिग्विदिग्विदिक्षु किरेद्बलिं। मंत्रश्च। बलिं गृह्णन्त्विमं देवा आदित्या वसवस्तथा। म
रुतश्चाश्विनौ रुद्राः सुपर्णाः पन्नगा ग्रहाः। असुरा यातुधानाश्च पिशाचोरगराक्षसाः। डाकिन्यो यक्षवेताला योगि
न्यः पूतनाः शिवाः। जृंभकाः सिद्धगंधर्वा माला विद्याधरा नगाः। दिक्पाला लोकपालाश्च ये च विघ्नविनायकाः। जग
तः शांतिकर्त्तारो ब्रह्माद्याश्च महर्षयः। मा विघ्नं मा च मे पापं मा संतु परिपंथिनः। सौम्या भवंतु तृप्ताश्च भूतप्रेताः सुखा

एमः

वहाः॥ इति महाष्टमी। अथ महानवमी। तु पूर्वयुता ग्राह्या। पूर्वोक्तवचनात्। तां नवमीं दुर्गाव्रते आवश्यीति दीपिकोक्तेः। आवश्यि दुर्गेनवमी ह्र्वाचिवद्धता। शिनी पूर्वविद्धा प्रकर्त्तव्या शिवरात्रिर्बलेर्दिनं। मिति हेमाद्रौ पाद्मोक्तेश्च भविष्येपि आश्वयुक्शुक्लपक्षे तु अष्टमी मूलसंयुता। सा महानवमी नाम त्रैलोकोपि सुदुर्लभेति मूलमुपलक्षणं। दुर्गापूजास्तु नवमी मूलाधृस्त्रयान्विता। मही(ती) कीर्त्तिता तस्यां दुर्गा महिषमर्द्दिनीमिति मदनरत्ने लैंगात्। अत्र पूजयेदित्यग्रे शेषः। यानि तु। सा कार्योदयगामिन्यां इत्यादि प्रागुक्तानि तानि नवमीभिन्नतिथिपराणि मनवम्या विशेषोक्तेः। वेधश्च मुहूर्त्तत्रयेणैव ज्ञेयः। यद्यपि हेमाद्रिमते मुहूर्त्तद्वयात्सापि वेधोक्ति तथापि सूर्योदयपरैव सा॥ सायं तु त्रिमुहूर्त्त एव। तदुक्तं दीपिकायां। त्रिमुहूर्त्तागा तु सकला साध्यमिति। माधवोपि। सायंतत्त्वरगा सद्वृता। न्यूनया तु न विध्यत इति तेन त्रिमुहूर्त्तयोगे पूर्वा नवमी। पूर्वोक्तवचनात्। न कुर्यान्नवमीं तात दशम्यां तु कदाचनेति। स्कांदे परान्निषेधाच्च त्रिमुहूर्त्तयोगाभावे तु निषिद्धापि परैव कार्येति निष्कर्षः। यत्तु नवम्यां च जपं होमं समाप्य श्रवणोपि वेति संग्रहोक्तेः। व्रतं च जागरश्चैव नवम्यां विधिवद्बलिरिति देवीपुराणाच्च। नवम्यां होमबल्यादि विहितं। तत्राश्वयुक्शुक्लनवमी। मुहूर्त्तं वा कला यदि। सा तिथिः सकला ज्ञेया लक्ष्मीविद्याजयार्थिभिरिति सौरपुराणात्। सूर्योदये परं

रिक्ताश्पूर्णास्यादपराग्यदि।बलिदानंप्रकर्त्तव्यंतत्रदेशेशुभावहं।बलिदानेकृतेष्टम्यांपुत्रभंगोभवेन्नृपेति।देवीपुराणेच
।बल्यादौपराकार्या।उपवासादौतुपूर्वेतिमदनरत्नेउक्तेः।प्रतापमार्त्तंडेप्येवं।यत्तु।अष्टम्यांबलिदानेनपुत्रनाशो
भवेद्ध्रुवमितिकालिकापुराणं।तत्संधिपूजापरं।अष्टमीनवमीसंधौतृतीयाखलुकश्यपतेः।इतितत्रैवोक्तेः।कामरूपनि
बंधे।अष्टम्याःशेषदंडश्चनवम्याःपूर्वएवच।तत्रयाक्रियतेपूजाविज्ञेयासामहाफला।अष्टमीमात्रेभवृ
त्येव।आश्विनेपूजयित्वातुअर्द्धरात्रेष्टमीषुच॥घातयंतिपशून्भक्त्या।तेभवंतिमहाफलाः।तथा।कन्यासं
स्थेरवावीशेशुक्लाष्टम्यांप्रपूजयेत्।सोपवासोनिशार्द्धेतुमहाविभवविस्तरैः।तथा।पशुघातश्चकर्त्तव्योग
वलान्नवधस्तथेतिरूपनारायणीयेदेवीपुराणात्।तत्रैवभविष्ये।तस्मादियंमहापुण्यानवमीपापनाशि
नीउपोष्यासुप्रयत्नेनसततंसर्वपार्थिवैः।निर्णयदीपेतुमहानवमीपरदिनेपराह्णव्यापित्वेपराकार्या।अन्य
थापूर्वा।आवर्त्तनात्पूर्वकालेनवमीस्यात्परेहनि।दुर्गार्च्चातत्रपूर्वेद्युःपूर्वाह्णेत्वष्टमीयदीतिधौम्यवचनादित्यु
क्तं।अस्यतुशारदनवनि।दुर्गार्च्चातत्रपूर्वेद्युःपूर्वाह्णेत्वष्टमीयदीतिधौम्यवचनादित्युक्तं।अस्यतुशारदनवमी एतः
विषयत्वंतन्मूलत्वंचविमृश्यं।यामितु।नंदायांज्वलतेवह्निःपूर्णायांपशुघातनं॥भद्रायांगोकुलक्षीबातत्रराज्यं

विनश्यातीति। नवम्यामपराह्णे तु बलिदानं प्रशस्यते दशमीं वर्जयेत्तत्र नात्र कार्या विचारणेति। नंदापादर्शने रक्षाबलि
दानं दशसु च। भद्रायां गोकुलक्रीडा देशनाशाय जायते। इति ब्रह्मवैवर्त्ते नारदादिवचनानि। अत्र ह्नाधिकनिषेधपराणी
ति मदनरत्ने। तथा कालिकापुराणे। नवम्यां बलिदानं तु कर्त्तव्यं तु यथाविधि। जपं होमं च विधिवत्कुर्यात्तत्र विभूतये। के
चित्तु पूर्वाषाढायुताष्टम्यां पूजाहोमाद्युपोषणमिति। पूर्वोक्तदेवीपुराणात्। अष्टम्यां होममाहुः। अन्ये तु त्रिविध
वाक्यवशात् अष्टम्यामारभ्य नवम्यां समापयंति। समुच्चयपक्ष युक्तः। रुद्रयामले तु विकल्प उक्तः। तत्तु निर्मूलं। दु
र्गाभक्तितरंगिण्यादिगौडग्रंथेष्वपि नवम्यां होम उक्तः। होमे च विशेष उक्तो डामरतंत्रे। पायसं सर्पिषा युक्तं तिलैर्युक्तं।
र्विमिश्रितं। होमयेद्विधिवद्भक्त्या दशांशेन नृपोत्तम। रुद्राध्यायेयथाहोमंत्रेणैकेन साधयेत्। तथा स्तोत्रजपे होमं
श्लोकेनैकेन साधयेत्। यद्वा सप्तशतीजप्या होममंत्रो नवार्णः। ऐं ह्रीं क्लीं चामुंडायै विच्चे इति नवार्ण इति केचित्।
पूजोक्तो ग्राह्य इति तु युक्तं। रुद्रयामलेपि प्रधानद्रव्यमुद्दिष्टं पायसान्नं तिलास्तथा॥ किंशुकैः सर्षग्गुलैश्च मनो
हरैः। प्रतिश्लोकं च जुहुयात्सर्वद्रव्याणि च क्रमात्। नवार्णेन वा कृत्वा नमो देव्या इतीवीति चेति। रहस्ये तु प्रति
श्लोकं तु जुहुयात्पायसं तिलसर्पिषीत्युक्तं दुर्गाभक्तितरंगिण्यां तु। तिलैर्जयंतीमंत्रेण होम उक्तः। पुरश्चरणकार्ये

बिल्वपत्रयुते क्षिप्ते इति कालिकापुराणात् बिल्वपत्रैश्चेति स्मार्त्ताः। तन्न। अत्र मानाभावात्। अथ बलिदानं। तत्राश्वमेषच्छा
गमहिषस्वमांसदानानामुत्तरोत्तरं प्राशस्त्यं फलविशेषश्चान्यतोऽवसेय इति दिक्। बलिप्रकारस्तु देवीपुराणे। कन्यासंस्थे
रवौ शक्र शुक्लाष्टम्यां प्रपूज्य च। द्रोणपुष्पैश्च बिल्वाम्रजातीपुंन्नागचंपकैः। पंचाहूं लवणोपेतं गंधपुष्पसमन्वितं।
विधिवत्कालिकालीति जप्त्वा खड्गेन घातयेत्। ॐ कालिकालि यज्ञेश्वरि लोहदंडायै नमः इति मंत्रः। तदुत्थं रुधिरं
मांसं गृहीत्वा पूतनादिषु आदिशब्दाच्चरकीविदारीपापराक्षस्यः। नैर्ऋतेभ्यः प्रदातव्यं महाकौशिकमंत्रितं।
मंत्रस्तु वक्ष्यते। तथा। तस्याग्रतो नृपः स्नात्वा कृत्वा शत्रुं तु पैष्टिकं। खड्गेन घातयित्वा तु दद्यात्स्कंदविशाखयोः। अ
शक्तो ब्राह्मणेन च कूष्मांडादिभिर्बलिदानं कार्यं। तदुक्तं कालिकापुराणे। कूष्मांडमिक्षुदंडं च मांसं सारसमेव च।
एते बलिसमाः प्रोक्तास्तृप्तौ छागसमाः सदा। मरुद्र्यामलेऽपि। छागाभावे तु कूष्मांडं श्रीफलं वा मनोहरं। वस्त्रसं
वेष्टितं कृत्वा छेदयेच्छुरिकादिना। तथा। ब्राह्मणेन सदा देयं कूष्मांडं बलिकर्मणि। श्रीफलं वा सुराधीश छेदं नैव
तु कारयेत्। छेदे विकल्पः। माषान्नेन बलिर्देयो ब्राह्मणेन विजानता। कालिकापुराणे। उत्तराभिमुखो भूत्वा बलिं पूर्व
मुखं तथा। निरीक्ष्य साधकः पश्चादिमं मंत्रमुदीरयेत्। पशुस्त्वं बलिरूपेण मम भाग्यादुपागतः। प्रणमामि ततः सर्वरूपि

णां बलिरूपिणां। चंडिकाप्रीतिदानेन दातुरापद्विनाशनं। चामुंडाबलिरूपाय बले तुभ्यं नमोस्तु ते। यज्ञार्थे पशवः सृष्टाः स्वय
मेव स्वयंभुवा॥ अतस्त्वां घातयाम्यद्य तस्माद्यज्ञे वधोऽवधः। ऐं ह्रीं श्रीमिति मंत्रेण बलिं च तत्स्वरूपिणां। चिंतयित्वा न्य
सेत्पुष्पं मूर्ध्नि तस्य तु भैरवा रस्यान्तां खं चंडिकायाः सुरलोकप्रसाधकः। ह्रूं ह्रीं खड्गेति मंत्रेणाध्यास्य खड्गं च पूजयेत्।
पूजयित्वा ततः खड्गं आं हुं फडिति मंत्रकैः। गृहीत्वा विमलं खड्गं छेदयेद्बलिमुत्तमं। ॐ ह्रीं ऐं ह्रीं कौशिकीति रुधिरेणा
प्यायतामिति। बलिदानेन तु दुर्गायाः सर्वत्रायं विधिः स्मृतः। मत्स्यसूक्ते। नवम्यां पूर्ववत्पूजा कर्त्तव्या भूतिमिच्छता। दक्षि
णां वस्त्रयुग्मं च आचार्याय निवेदयेत्। अथ प्रसंगाच्छतचंडीविधानमुच्यते। रुद्रयामले। शतचंडीविधानं च प्रोच्यमानं
मया शृणु। सर्वोपद्रवनाशार्थं शतचंडीं समारभेत्। षोडशस्तंभसंयुक्तं मंडपं पल्लवोज्ज्वलं॥ वस्त्रकोणसुतां वेदीम
ध्ये कुर्यात्त्रिभागतः। पक्वेष्टकाचितां रम्यां सुच्छायेहस्तसंमितां॥ पंचवर्णै रजोभिश्च कुर्यान्मंडलकं शुभं। पंचवर्ण
वितानं च किंकिणीजालमंडितं। आचार्येणासनं विप्रान्वरयेद्दशसुव्रतान्। ईशान्यां स्थापयेत्कुंभं पूर्वोक्तविधिना
हरो। वारुण्यां च प्रकर्त्तव्यं कुंडं लक्षणलक्षितं। मूर्त्तिं देव्याः प्रकुर्वत सुवर्णस्य पलेन वै॥ तदर्द्धेन तदर्द्धेन तदर्द्धेनम
हामते। अष्टादशभुजां देवीं कुर्याद्वाष्टकरामपि। पट्टकूलयुगाच्छन्नां देवीमग्रे निधापयेत्। देवीं संपूज्य विधिवज्जपं कु

२२२ षड्दशद्विजाःस्नातमाद्दौशतंचांतेजपेन्मंत्रंनवार्णंवाचंडीसप्तशतीमध्येसंपुटोयमुदाहृतः।एकंद्वेत्रीणिचत्वारिजपेद्दिनचतुष्टयं।रूपाणिक्रमशस्तद्वत्पूजनादिकमाचरेत्।पंचमेद्दिवसेप्रातर्होमंकुर्य्याद्विधानतः।गडूचीपायसंदूर्वातिलान्मुद्गान्यवानपि।चंडीपाठस्यहोमंतुप्रतिश्लोकंदशांशतः।होमंकुर्याद्ग्रहादिभ्यःसमिदाज्यचरून्क्रमात्।कृत्वापूर्णाहुतिंदद्याद्विप्रेभ्योदक्षिणांक्रमात्।कपिलांगांनीलमणिंश्वेताश्वंछत्रचामरौच।अभिषेकंततःकुर्य्याद्यजमानस्यऋत्विजः।एवंकृतेमहेशानसर्वसिद्धिप्रदायतइति।अथसहस्रचंडी।साचतंत्रेवोक्ता।सहस्रचंडीविधिंवक्ष्येणुजिह्नोमहामते।राज्यभ्रंशेमहोत्पातेजनमारेमहाभये।सहस्रचंडीविधिवगजमारेश्वमारेचपरचक्रभयेतथा।इत्यादिविविधेदुःखेव्ययरोगादिजेभये।सहस्रचंडिकापाठंकुर्याद्वाकारयेत्तथा।जापकास्तुशतंप्रोक्ताविंशद्धस्तश्चमंडपः।भोज्याःसहस्रंविप्रेंद्रागोशतंदक्षिणांदिशेत्।गुरवेद्विगुणंदेयंशय्यादानंतथैवच॥सप्तधान्यंचभूदानंश्वेताश्वंचमनोहरं।पंचनिष्कमितांमूर्त्तिंकर्त्तव्यावार्द्धमानतः।अष्टादशभुजादेवीसर्वायुधविभूषिता।अवारितान्नंदातव्यंसहस्रंप्रत्य एमः
हंविभो।शतंवानियताहाराःपयःपानेनवर्त्तयेत्।एवंयश्चंडिकापाठसहस्रंतुसमाचरेत्।तस्यस्यात्कार्यसिद्धिस्तुनात्रकार्याविचारणेति।एतद्द्वयंयद्यपिमहानिबंधेषुनास्तितथापिप्रचरद्रूपत्वादुक्तमितिदिक्।वाराहीतंत्रे।संकटेसमनुप्राप्तेदुर्भि

क्तिस्यामयेतथा वैरिवृद्धौ व्याधिवृद्धौ धननाशे तथा क्षये। कुर्याद्घृताक्ताह्वनं ततः संपद्यते शुभं। श्रेयोवृद्धिः शताहुत्वाद्धान्यवृद्धिस्तथा परा। मनसा चिंतितं देवि सिद्ध्येदष्टोत्तराच्छतात। सहस्रावर्तनाल्लक्ष्मीरावृणोति स्वयं स्थिरा। भुक्त्वा मनोरथान्कामान्नरो मोक्षमवाप्नुयात। चंड्याः शताहुत्रिपाठात्सर्वाः सिद्ध्यंति सिद्धयः। इति शतचंडीसहस्रचंडीविधिः। अथ नवरात्रपारणनिर्णयः। सा च दशम्यां कार्या। आश्विने मासि शुक्ले तु कर्तव्यं नवरात्रकं। प्रतिपदादिक्रमेणैव यावच्च नवमी भवेत। त्रिरात्रं वापि कर्तव्यं सप्तम्यादि यथाक्रममिति। हेमाद्रौ धौम्यवचनात। नवमीतिथिपर्यंतं वृद्ध्या पूजाजपादिकमिति प्रागुक्तवचनैर्नवमीपर्यंतं प्रधानभूतपूजाद्युक्तेरुपवासादेश्चांगत्वेन तत्पर्यंतत्वात। आदिशब्देनोपवासोक्तेः। पूर्वोक्तत्रिरात्रव्रतेन नवम्या अप्युपोष्यत्वाच्च। न च पारणं तस्येन त्रिरात्र। सं। विष्णुत्रिरात्रादौ तथाप्रसक्तेः। न चात्रोपवासे मानाभाव इति वाच्यं। एवं च विंध्यवासिन्यां नवरात्रोपवासतः। एकभक्तेन नक्तेन तथैवायाचितेन च। पूजनीया जनैर्देवी स्थाने स्थाने पुरे पुरे इति हेमाद्रौ भविष्योक्तेः। नवरात्रसमाप्त्यातो नवम्या अपिउपोष्यत्वाच्च। ननु तिथिह्रासे ष्टावुपवासा भवंतीति कथं समाप्त्यातेन कर्मविशेषे नवरात्रशब्दो रूढः। अत एवोक्तं देवीपुराणे। तिथिवृद्धौ तिथिह्रासे नवरात्रमपार्थकमिति। इति चेन्न। तिथिह्रासेपि नवतिथीनामुपोष्यत्वात

नवरात्रत्वक्षतेः एतेनरात्रीणांप्राधान्यात्। ह्रासेऽष्टमामादायनवरात्रत्वमितिमूर्खोक्तिःपरास्ता। यत्तुदेवीपुराणे। कन्यासंस्थेरवौशक्रशुक्लामारभ्यनंदिकां॥ अयाचीत्वथवैकाशीनक्ताशीत्वथवाप्यदः। इतिव्रतचतुष्टयमुक्तं। तल्लौहाभिसारिकविषयं। तस्य। जयाभिलाषीनृपतिप्रतिपत्प्रभृतिःक्रमात्। लौहाभिसारिकंकर्मकारयेद्यावदष्टमीमितिभविष्येऽष्टमीपर्यंतमेवोक्तंप्राक्नंदादिव्रतप्रयोगंपृथगेवोक्तात्तस्यनवम्यांपारणमुक्तं। यदपिनिर्णयदीपे। अश्विनेशुक्लपक्षेतुनवरात्रमुपोषितः। नवम्यांपारणंकुर्याद्दशमीमिश्रितानचेत्। दशमीमिश्रितायत्रपारणेनवमीभवेत्। दुःखदारिद्र्यदाज्ञेयातथाव्रतविनाशिनीतिब्रह्मनाम्नालिखितंवचनं। यच्चरुद्रयामलेइतिवदंति। अष्टम्यासहकार्यास्यान्नवमीपारणादिने। योमोहाद्दशमीवेधेनवम्यांचंडिकांयजेत्। पारणंचप्रकुर्याद्वैतस्यपुण्यंनिरर्थकं। नवम्यांपारितादेवीकुलवृद्धिंप्रयच्छति। दशम्यांपारितादेवीकुलनाशंकरोतिवै। तस्मात्तुपारणंकुर्यान्नवम्यांविबुधाधिपेत्यादीनितानियदिसमूलानितदालौहाभिसारिकविषयाणितस्याष्टमीपर्यंतमेवोक्तेरित्युक्तंप्राक्। पन्यथामहाष्टम्यांपर्वविद्धायांपारणविधानेपूर्वनिबंधैर्विरोधोदुर्वारःस्यात्। यानितुकैश्चिल्लिखितानिनवम्यांपारणविधायकानिवचनानितानिहेमाद्र्यादिविरुद्धत्वान्निर्मूलानि। समूलत्वेपिमहादिनद्वयेनवमीतद्वृद्धितीयदिनेउपोष्य

राम:

तिथ्यंतेपारणंन।।किंतु।नवमीमध्येकार्यैत्स्येवंनेयानिशिवरात्रिपारणावत्।।अत्रकेचित्पारणाहेसूतकादिप्राप्तौतदतिक्रम्यपारणंकुर्यादित्याहुः।तन्मंदं।काम्योपवासेप्रक्रांतेत्वंतरामृतसूतके।तत्रकाम्यंव्रतंकुर्याद्दानार्चनविवर्जितमितिमाधवीयेकौर्मोक्तेः।व्रतयज्ञविवाहेषुश्राद्धेहोमेर्चनेजपे।प्रारब्धेसूतकंनस्यादनारब्धेतुसूतकमितिविष्णुवचनाच्च।आशौचमध्येपितत्कर्त्तव्यतावगतेः।पारणांतत्वाद्व्रतस्य।प्रारंभस्तुतेनैवोक्तः।प्रारंभोवरणंयज्ञेसंकल्पोव्रतसत्रयोः।नांदीमुखंविवाहादौश्राद्धेपाकपरिक्रियेति।रुद्रयामलेपि।सूतकेपारणंकुर्यान्नवम्यांहोमपूर्वकं।तदंतेभोजयेद्विप्रान्दानंदद्याच्चशक्तितः।इति।तदंतेसूतकांते।एवंस्त्रीभिरपिरजोदर्शनमध्येपारणंकर्त्तव्यमेव।संप्रवृत्तेपिरजसिनत्याज्यद्वादशीव्रतमितिमाधवीये।ऋष्यशृंगवचनात्।द्वादशीव्रतमित्युपलक्षणं।प्रारब्धदीर्घतपसांनारीणांयद्रजोभवेत्।नतत्रापिव्रतस्यस्यादुपरोधःकदाचनेति।तत्रैवसत्यव्रतवचनात्।किंच।एकादश्यादौपंचषाशौचपातेमासांतेपारणापत्तिः।मासोपवासांतेपंचषाशौचपातेजीवनासंभवश्च।यत्तु।नियमस्थायदानारीप्रपश्येदेतरारजः।उपोष्येवतुतारात्रीस्नात्वाशेषंचरेद्व्रतमित्यंगिरोवचनं।यच्चहारीतवचनं।नियमस्थाव्रतस्थास्त्रीरजःपश्येत्कथंचन।त्रिरात्रंतुक्षिपेदूर्ध्वंव्रतशेषंसमापयेत्।

इति। तद्विधवोपवासविषयं। तासां तत्र भोजननिषेधात्। इति केचित्। वयं तु प्रागुक्तसत्यव्रतवचने दीर्घतपसामिति विशे
षणोपादानात्। द्वादशीव्यतिरिक्तसकलैकाहोपवासविषयोयं निषेधः। त्रिरात्रनवरात्रादिदीर्घव्रतेषु तु रजोमध्ये
एव पारणेति ब्रूमः। आशौचमध्ये तु सर्वापि पारणा भवति। प्रागुक्तकौर्मवचनादिति सिद्धं। अयं चोपवासपारणा
निर्णयः सर्वव्रतेषु बोद्धव्यः। त्यलं भूयसा। दशम्यां देवीं विसर्जयेत्। तदुक्तं दुर्गाभक्तितरंगिण्यां। देवीपुराणे। ततः प्रा
तः पूजयित्वा दशम्यां विधिपूर्वकं। संप्रेषणं तु कर्तव्यं गीतवादित्रनिःस्वनैः। रूपं देहि यशो देहि भगं भगवति देहि मे।
पुत्रान् देहि धनं देहि सर्वान्कामांश्च देहि मे। महिषघ्नि महामाये चामुंडे मुंडमालिनि। आयुरारोग्यमैश्वर्यं देहि दे
वि नमोस्तु ते। इति संप्रार्थ्य देवीं तु ततस्तु उच्छापयेद्बुधः। उत्तिष्ठ देवि चंडेशि शुभां पूजां प्रगृह्य च। कुरुष्व मम कल्याण
मष्टाभिः शक्तिभिः सह। गच्छ गच्छ परं स्थानं स्वस्थानं देवि चंडिके। व्रज स्रोतोजलं वृद्ध्यै स्थीयतां च जले त्विह। उच्छा
प्य जलं नीत्वा। दुर्गे देवि जगन्मातः स्वस्थानं गच्छ पूजिता। संवत्सरे व्यतीते तु पुनरागमनाय वै। इमां पूजां मया देवि यथा
शक्त्युपपादितां। रक्षार्थं त्वं समादाय व्रज स्वस्थानमुत्तमम्भिजि। जले प्रवाहयेत्। इयमेव विजयादशमी। सा च द्वितीय
दिने श्रवणयोगाभावे पूर्वैव ग्राह्या। तदुक्तं हेमाद्रौ स्कांदे। दशम्यां तु नरैः सम्यक् पूजनीयापराजिता। ऐशानीं दिशमाश्रित्य चाप

एमः

राजितां प्रपूजिता॥

ददातिविजयंदेवीपूजिताजयवर्द्धिनी ॥ तथा । आश्विनेशुक्लपक्षेतुदशम्यांपूजयेन्नरः । एकादश्यांनकुर्वीतपूजनंचापराजितं । यदातुपूर्वदिनेश्रवणायोगाभावःपरदिनेचाल्पापितद्योगिनीतदापरैव । तथाचहेमाद्रौव्रतकांडेकश्यपः उदयेदशमीकिंचित्संपूर्णैकादशीयदि । श्रवणर्क्षंयदाकालेसातिथिर्विजयाभिधा । श्रवणर्क्षेतुपूर्णायांकाकुत्स्थःप्रस्थितोयतः । उल्लंघयेयुःसीमानंतद्दिनर्क्षेततोनराः इतिकालेपराह्णे । परदिनेश्रवणाभावेतुसर्वपक्षेपूर्वैव मदनरत्नेप्येवं । ज्योतिर्निबंधेरत्नकोशेचनारदः । ईषत्संध्यामतिक्रांतःकिंचिदुद्भिन्नतारकः । विजयोनामकालोयंसर्वकार्यार्थसिद्धिदः । इषस्यदशमीशुक्लांपूर्वविद्धांनकारयेत् । श्रवणेनापिसंयुक्तांराज्ञांपट्टाभिषेचने । सूर्योदयेमहाराजनदृश्यतेदशमीतिथिः । आश्विनेमासिशुक्लेतुविजयांतांविदुर्बुधाः । अत्रायंनिर्गलितार्थः । अपराह्णोमुख्यःकालः । तत्रैवबहुवाक्योक्तेः । प्रदोषोगौणः । तत्रश्रवणयोगाभावेदिनद्वयेअपराह्णव्यापित्वेतदभावेवापूर्वाप्रदोषव्याप्तेराधिक्यात् । दिनद्वयेप्रदोषव्यापित्वेपरा । अपराह्णव्याप्तेराधिक्यात् । खंडतिथौ । अन्यकालेश्रवणर्क्षंरोहिणीवदप्रयोजकः । दिनद्वयेपराह्णस्पर्शेतद्व्याप्तौवाश्रवणयुतापूर्वा । तत्रापिपरदिनेपराह्णेश्रवणास्पर्शेस्वल्पापिपरैवेतिदिक् । अत्रविशेषोभार्गवार्चनदीपिकायां ॥ भविष्ये । शमीवृक्षेजगन्नाथंभक्तानामभयं

११५ कां।अर्चयित्वाशमीवृक्षंमचंयेचततःप्रमः।शमीमंत्रस्तुहेमाद्रौगोपथब्राह्मणे।अमंगलानांशमनीशमनीदुष्कृतस्य
च।दुःस्वप्नशमनीधन्यांप्रपद्येहंशमीशुभां।तथाभविष्ये।शमीशमयतेपापंशमीलोहितकंटकी।धारिण्यर्जुनबाणा
नांरामस्यप्रियवादिनी।करिष्यमाणयात्रायांयथाकालंसुखंमया।तत्रनिर्विघ्नकर्त्रीत्वंभवश्रीरामपूजिते।तथा।गृ
हीत्वासाक्षतामार्द्रांशमीमूलगतांमृदं॥गीतवादित्रनिर्घोषैरानयेत्स्वगृहंप्रति।ततोभूषणवस्त्रादिधारयेत्स्व
जनैःसहेति।अत्रचबलनीराजनमुक्तंकल्पतरौ।तत्रमंत्रः।चतुरंगबलंमह्यंनिरारिष्टंजयत्विहा।सर्वत्रविजयोमेस्तु
त्वत्प्रसादात्सुरेश्वरीति।गौडनिबंधेज्योतिषात्कलवा।नीराजनंराजाबलवृद्धौयथाक्रमं।शोभनंखंजनंपश्येज्जलगोगोष्ठ
संनिधौ।अस्यफलानिश्रभाष्यभट्टेशाश्वतंत्रेवज्ञेयाः।आश्विनपौर्णमासीपराग्राह्या।सावित्रीव्रतमंतरेणभवतोमापौ
र्णमास्योपरा इति दीपिकोक्तेः।अत्रविशेषस्तिथितत्त्वेलैंगे।आश्विन्यांपौर्णमास्यांतुचरेज्जागरणंनिशि।कौमुदीसा
समाख्याताकार्यालोकैर्विभूतये।कौमुद्यांपूजयेल्लक्ष्मीमिंद्रमैरावतस्थितं।सुगंधिर्निशिसद्वेषअक्षैर्जागरणंचरे
त्।तथा।निशीथेवरदालक्ष्मीःकोजागर्तीतिभाषिणी।तस्मैवित्तंप्रयच्छामिक्रीडामक्षैः।करोतियः।अत्रैवाश्वयुजीक एमः
र्मोक्तमाश्वलायनेन।अश्वयुज्यामाश्वयुजीकर्मेति।तच्छेषपर्वणिकार्यंविकृतित्वात्।आग्रयणांतपर्वणिकार्यं।शर

घाग्रयणंनामपर्वणिस्यात्तदुच्यतेइतिशौनकोक्तेः।तत्राविशेषपर्वणिकार्यमितिप्रागुक्तंतच्चदर्शपूर्णमासयोरेककर्म
त्वेनैकद्रव्यनियमात्।दर्शेष्ट्याःपरंपौर्णमासेष्ट्याश्चप्राग्भवति।इतिहेमाद्र्यादयः।दर्शेष्ट्याःपरमुक्तमाग्रयणकंप्राक्
पौर्णमासाच्चतदितिदीपिकोक्तेश्च।तच्चाग्रयणंत्रेधा।व्रीह्याग्रयणंयवाग्रयणंश्यामाकाग्रयणंचेति।एषांका
लःश्रुतौ।गृहमेधीव्रीहियवाभ्यांशरद्वसंतयोर्यजेतश्यामाकैर्नीवारैर्वर्षास्वापत्कालेनान्येनपुराणैर्वेति।आप
स्तंबोपि।वर्षासुश्यामाकैर्यजेतशरदिव्रीहिभिर्वसंतेयवैर्यथर्तुंप्यक्लृवेणुयवैरिति।तत्रापिश्यामाकाग्रयणम
नित्यमितरेतुअनाहिताग्नेर्नित्येप्याग्रयणंचकार्यमितिस्मार्त्तवृत्त्यादुक्तत्वात्।सत्त्वेव्रीहियवदेवतासंबद्धानामे
वमंत्राणामाम्नानाच्च।आहिताग्नेस्तुयवाग्रयणस्याप्यनित्यत्वं।अपिवाक्रियायवेष्विति सूत्रात्।यद्वाव्रीह्या
ग्रयणेनसमानतंत्रताश्यामाकेस्तुप्रस्तरंकुर्यान्नाग्रयणं।यदिवातदपिसमानतंत्रमित्याद्दिनाग्रयण
ष्टौपरिश्रमवतांसुलभमित्यलं।इदंचपर्वाभावेनक्षत्रेचकृत्तिकादिविशाखांतेकार्यमितिस्मृत्यर्थसारेउ
क्तं।बौधायनीयकेशवस्वामिनाप्येवमुक्तं।परिशिष्टेश्यामाकेव्रीहिभिश्चैवयवैश्चान्योन्यकालतः।पाकदृष्टे
सृज्यतेवश्यंनत्वत्राग्रयणात्ययः।त्रिकांडमंडनोप्येवं।यदालेतदाश्विनपौर्णमास्यांक्रियतेतदैककालत्वादाश्व

युजीकर्मणोस्यचसमानतंत्रेताभवतितादेतद्द्विहूत्ता।एकबर्हिरिध्मआज्येतिसूत्रेस्पष्टमुक्तं।अस्याकरणेप्राय।श्चि
त्तमुक्तंस्मृतिचंद्रिकायांकात्यायनेनपतितान्नस्यचरुर्वैश्वानरोभवेदिति।कारिकापि।अकृताग्रयणोऽश्नीयान्नवान्नं
दंपतिर्द्विजनरः।वैश्वानरायकर्तव्यश्चरुःपूर्णाहुतिस्तथेतिऋग्विधानेतु।समिंद्रणायामंत्रंचवर्षेवर्षेजपेच्छतं।आग्रय
णांपदान्नूनतदासंपूर्णमेतितदितिउक्तं॥बौधायनसूत्रेनवान्नेब्राह्मणेभ्योदत्वाप्राशनमेवपुष्पाणांफलानामन्ये
षांचनवानांब्राह्मणेभ्योदत्वाप्रयोगइति।एतच्चापदिमलमासेकार्यमन्यथानेतिप्रागुक्तं।अन्योप्याहिताग्न्या
दिविशेषःशौनकादेर्ज्ञेयः।इत्यलंभूयसा॥इतिश्रीभट्टकमलाकरकृतेनिर्णयसिंधौआश्विनःसमाप्तः।अथका
र्त्तिकः।तुलासंक्रमेप्रागपरादशघटिकाःपुण्याः।रात्रौतुनिशीथात्प्राक्चेत्तदासंक्रमेपूर्वोत्तरदिनार्द्धंपुण्यं।
निशीथेतुदिनद्वयंपुण्यमितिप्रागुक्तं।अथकार्त्तिकस्नानं।तत्रपृथ्वीचंद्रोदयेविष्णुस्मृतिपाद्मयोः।तुलामक
रमेषेषुप्रातःस्नानंविधीयते।हविष्यंब्रह्मचर्यंचमहापातकनाशनमिति।सौरमासउक्तः।प्राच्यास्त्वेतद्देवाद्रि एमः
यंते।दाक्षिणात्यास्तु।आश्विनस्यतुमासस्ययाशुक्लैकादशीभवेत्कार्त्तिकस्यव्रतानीहतस्यांवैप्रारभेत्सुधी
रितिपाद्मोक्तेः।भार्गवार्चने।मात्स्येकादशींशुक्लामाश्विनस्यतुमानवः।प्रातःस्नानंप्रकुर्वीतयावत्कार्त्तिकभास्करः

तिविष्णुरहस्योक्तेः॥ हेमाद्रौ चादित्यपुराणे। पूर्णाआश्वयुजे मासे सिपौर्णमास्यां समाहितः। इत्युक्त्वा मासं समग्रं
परयाच भक्त्यासमाप्यते कार्त्तिकपौर्णमास्यामित्यैतेः भिधानाद्वाश्विनशुक्लैकादश्या वारभ्य कार्त्तिकशुक्लद्वा
दश्यां पौर्णमास्यां वा समापयेदित्याहुः॥ मदनरत्ने पारिजाते विष्णुः। कार्त्तिकं सकलं मासं नित्यस्नायी जितेंद्रियः॥
जपन्हविष्यभुक्शांतः सर्वपापैः प्रमुच्यते। अत्र देशविशेषः। पाद्ये कार्त्तिकं प्रकम्य। कुरुक्षेत्रे कोटिगुणो गंगायामपि
तत्समः। ततोधिकः पुष्करे स्याद्द्वारकायां च भार्गव॥ पुण्याः पुपयत्वसमसे वमुनयोमथुराधिका। पुलभः कार्त्तिको विप्राम
थुरायां नृणामिहा यत्रार्चितः स्वकं रूपं भक्तेभ्यः संप्रयच्छतीति। इदं च स्नानं काशीस्थपंचनदेप्यतिप्रशस्तं। शतं समास्त
पस्तप्त्वा कृते यत्प्राप्यते फलं। तत्कार्त्तिके पंचनदे सकृत्स्नानेन लभ्यते। कार्त्तिके बिंदुतीर्थे यो ब्रह्मचर्यपरायणः।
स्नात्यस्य भुद्दिते भानौ भानुजातस्य भीः कुतः। इत्यादि काशीखंडोक्तेः॥ भानुजातो यमः। इदं च प्रातःस्नानं संध्यां च
कृत्वा कार्यं। तेन विनेतत्कर्मानधिकारात्। इति वर्द्धमानः। यद्यपि प्रातःसंध्यायाः सूर्योदये समाप्तिस्तथापि वच
नबलादनुदिते वह्नाविष्यति। स्नानमंत्रस्तत्रैव। कार्त्तिकेहं करिष्यामि प्रातःस्नानं जनार्दन। प्रीत्यर्थं तव देवेश
दामोदर मयासह। इमं मंत्रं समुच्चार्य मौनी स्नायाद्व्रती नरः। इति अर्घमंत्रोपि तत्रैव। व्रतिनः कार्त्तिके मासि स्नातस्य

११६ विधिवन्मम। गृहाणार्घं मया दत्तं दनुजेंद्रनिषूदन। नित्ये नैमित्तिके कृष्ण कार्त्तिके पापनाशन। गृहाणार्घ्यं मया दत्तं राधया सहि-
तो हरे। इमौ मंत्रौ समुच्चार्य योऽर्घं मत्यं प्रयच्छति। सुवर्णरत्नपुष्पांबुपूर्णाशंखेन पुण्यवान्। सुवर्णपूर्णापृथिवी तेन दत्ता
न संशय इति। एवं संपूर्णस्नानाशक्तो त्र्यहं स्नायात। वाराणस्यां पंचनदे त्र्यहं स्नातास्तु कार्त्तिके। अमी ते पुण्यवपुषः पु-
ण्यभाजो निर्मलाः इति काशीखंडोक्तेः। अथ मालाधारणं। तत्र स्कांदे द्वारकामाहात्म्ये। निवेद्य केशवे मालां तुलसीका-
ष्ठसंभवां। वहते यो नरो भक्त्या तस्य नैवास्ति पातकं॥ नत्यजेत्तुलसीमालां धात्रीमालां विशेषतः। महापातकसंहर्त्रीं
धर्मकामार्थदायिनीं॥ विष्णुधर्मोक्तेः। स्पृशेत्तु यानि लोमानि धात्रीमाला कलौ नृणां। तावद्वर्षसहस्राणि वैकुंठवसतिर्भ-
वेत। मालायुग्मं तु यो नित्यं धात्रीतुलसिसंभवां। वहते कंठदेशे तु कल्पकोटिं दिवं वसेत। तुलसीकाष्ठसंभूते माले कृष्णज-
नप्रिये। बिभर्मि त्वामहं कंठे कुरु मां कृष्णवल्लभं। एवं संप्रार्थ्य विधिवन्मालां कृष्णगलेर्पितां। धारयेत्कार्त्तिके यो वै स
गच्छेद्वैष्णवं पदमिति। अत्र मूलं चिंत्यं। तथा काशीखंडे। कार्त्तिकेप्यसिमे यात्रा यैः कृता भक्तितत्परैः। बिंदुतीर्थकृत-
स्नानैस्तेषां मुक्तिर्न दूरतः। भार्गवार्चनदीपिकायां नृसिंहपुराणे। आगस्तिकुसुमैर्देवं योर्चयेच्च जनार्द्दनं। दर्शनात्तस्य एमः
देवर्षे नरकं नाश्नुते नरः। विहाय सर्वपुष्पाणि मुनिपुष्पेण केशवं। कार्त्तिके योर्चयेद्भक्त्या वाजपेयफलं लभेत। स्कांदे

कार्त्तिकमाहात्म्ये।मालतीमालयाविष्णुःकेतक्याचैवपूजितः॥समाःसहस्रंसुप्रीतोभवेत्तुमधुसूदनः॥पृथ्वीचंद्रोदये
पाद्मे।कार्त्तिकेनार्चितोयैस्तुकमलैःकमलेक्षणः।जन्मकोटिषुविप्रेंद्रनतेषांकमलागृहे।तथा।कार्त्तिकेकेशवेपूजाये
षांनाम्नास्तुतैःकृता।तेनिर्मर्त्यखेःपुत्रैर्वसंतित्रिदिवेसदा।तुलसीदललक्षेणकार्त्तिकेयोर्च्चयेद्धरिं।तैपत्रेपत्रेमुनिश्रेष्ठ
मौक्तिकंलभतेफलं।तथास्कांदेकार्त्तिकमाहात्म्ये।धात्रीछायांतुयःकुर्यात्पिंडदानंमहामुने।मुक्तिंप्रयांतिपितरःप्र
सादान्माधवस्यतु।धात्रीफलविलिप्तांगोधात्रीफलविभूषितः।धात्रीफलकृताहारोनरोनारायणोभवेत्।धात्रीछा
यांसमाश्रित्ययोर्च्चयेच्चक्रपाणिनं।पुष्पेपुष्पेश्वमेधस्यफलंप्राप्नोतिमानवः॥तथास्कांदे।कार्त्तिकेमासिविप्रेंद्रधा
त्रीवृक्षोपशोभिते।वनेदामोदरंविष्णुंचित्रान्नैस्तोषयेद्विभुं।मूलेनपायसेनाथहोमंकुर्याद्विचक्षणः।ब्राह्मणा
न्भोजयेच्छक्त्यास्वयंभुंजीतबंधुभिरिति।तथाकार्त्तिकेद्विदलव्रतंप्रागुक्तं।कार्त्तिकेद्विदलंत्यजेदिति।पाद्मेकार्त्ति
कमाहात्म्ये।राजिकामाढकंचैहनैवाद्यात्कार्त्तिकेव्रती।द्विदलंतिलतैलंचतथान्यन्मतिदूषितं।स्कांदेपि।कार्त्ति
केवर्ज्जयेत्तद्वद्विदलबहुबीजकं।माषमुद्गमसूराश्चचणकाश्चकुलत्थकाः।निष्पावाराजमाषाश्चआढक्योद्विद
लंस्मृतं।नूतनान्यपिजीर्णानिसर्वाण्येतानिवर्ज्जयेत्।अत्रकेचिदुत्पत्तिसमयेदलद्वयंयस्यभवतिततभूतपूर्व

गत्याद्विदलमुच्यतइत्याहुः। उदाहरंतिच। बीजमेवसमुद्भूतंद्विदलंचांकुरंविना। दृश्यतेयत्रसस्येषुद्विदलंतन्निगद्यते। अन्ये
तुलक्षणायांमानाभावात्वचनस्यचनिर्मूलत्वात्द्विदलात्मकंयस्यस्वरूपंतदेववर्ज्जयेदित्याहुः। तथानारदीये। कार्त्ति-
केवर्ज्जयेत्तैलंकार्त्तिकेवर्ज्जयेन्मधु। कार्त्तिकेवर्ज्जयेत्कांस्यंकार्त्तिकेशुक्तसंधितं। कांस्यंतत्पात्रभोजनं। शुक्तंपर्युषितं।
संधितंलवणशाकः। तत्रैव। कार्त्तिकेविष्णुमूर्त्त्यग्रेदीपदानाद्दिवंव्रजेत। तथा। कार्त्तिकेतुकृतादीक्षानृणांजन्मविमो
चिनी तथा। कार्त्तिकेकृच्छ्रसेवीयः प्राजापत्यपरोथवा। एकांतरोपवासीवात्रिरात्रोपोषितोपिवा। षड्द्वादशपक्षं
वामासमथवावरवर्णिनी। एकभक्तेननक्तेनतथैवायाचितेनवा। उपवासेनभैक्षेणव्रजतेपरमंपदं। अन्येपिनियमाः
प्रोक्ताःस्वर्गमोक्षफलप्रदाः। काशीखंडे। ऊर्ज्जेयवान्नमश्नीयादेकान्नमथवापुनः। वृंताकंसूरणंचैवशूकशिंबीश्च
+ माद्यमुक्तंस्कांदे। व्रीहयोयवगोधूमाःप्रियंगुति— शालयः एतेहिसात्विकाःप्रोक्ताः + ॥ श्चवर्ज्जयेत। पृथ्वीचं
द्रोदयेपात्रे। नोर्ज्जेवंध्योविधातव्योव्रतिनाकेनचित्कचित। तथानारदीये। अव्रतेनक्षपेद्यस्तुमासंदामोदरप्रियं। एमः
तिर्यग्योनिमवाप्नोतिनात्रकार्याविचारणा। अन्यान्यपितांबूलतैलकेशकर्त्तनादिर्ज्जनसंकल्परूपाणिप्रागुक्ता
नि। तथाकार्त्तिकेआकाशदीपउक्तोनिर्णयामृतेपुष्करपुराणे। तुलायांतिलतैलेनसायंकालेसमागते। आकाश

दीपंयोदद्यान्मासमेकंहरींप्रति।महतींश्रियमाप्नोतिरूपसौभाग्यसंपदमिति।तद्विधिस्तुहेमाद्रौआदित्यपुराणे॥दिवाक
रेस्ताचलमौलिभूतेगृहाद्दूरेपुरुषप्रमाणं।यूपाकृतियज्ञियवृक्षदारुमारोप्यभूमावथतस्यमूर्ध्निकृत्वाचतस्रोष्टद
लाकृतिवर्त्तिकाभिर्भवेदष्टदिगानुसारी॥तत्कर्णिकायांतुमहाप्रकाशोदीपःप्रदेयोदलगास्ततोष्टौ।निवेद्यधर्माय
हरायभूम्यैदामोदरायाप्यथधर्मराज्ञे।प्रजापतिभ्यस्त्वथसत्पितृभ्यःप्रेतेभ्यएवाथतमःस्थितेभ्यः।इति।अपरा
र्केत्वन्योमंत्रउक्तः।दामोदरायनभसितुलायांलोलयासह।प्रदीपंतेप्रयच्छामिनमोनंतायवेधसे।इति।कार्त्ति
ककृष्णचतुर्थीकरकचतुर्थी॥साचंद्रोदयव्यापिनीग्राह्या।तत्रैवपूजाद्याम्नानात्।कार्त्तिककृष्णद्वादशीगो
वत्ससंज्ञा।साप्रदोषव्यापिनीग्राह्या।दिनद्वयेतत्त्वेपूर्वायुग्मवाक्यात्।वत्सपूजावटश्चैवकर्त्तव्याप्रथमेहनीति
निर्णयामृतेभिधानाच्च।अत्रविशेषोमदनरत्नेभविष्ये।सवत्सांतुल्यवर्णांचशालिनींगांपयस्विनीं।चंदनादिभिरालभ्य
पुष्पमालाभिरर्चयेत्।अर्घ्यंताम्रमयेपात्रेकृत्वापुष्पाक्षतैस्तिलैः।पादमूलेतुदद्याद्वैमंत्रेणानेनपांडव।क्षीरोदार्णव
संभूतेसुरासुरनमस्कृते।सर्वदेवमयेमातर्गृहाणार्घ्यंनमोस्तुते।ततोमाषादिसंसिद्धान्वटकान्विनिवेदयेत्।सु
रभित्वंजगन्मातर्देविविष्णुपदेस्थिता।सतोमाषादिसंसिद्धान्वटकान्विनिर्वदेवमयेग्रासंमयादत्तमिमंग्रस।ततःस

११८ र्वदेवमये देवि सर्वदेवैरलंकृते। मातर्ममाभिलषितं सफलं कुरु नंदिनि। इति प्रार्थयेत्। तथा। तद्दिने तैलपक्वं च स्थालीपक्वं यु
धिष्ठिर। गोक्षीरं गोघृतं चैव दधि तक्रं च वर्जयेत्। ज्योतिर्निबंधे। नारदः। आश्विने कृष्णपक्षे तु द्वादश्यादिषु पंचसु ति
थिषूक्तः पूर्वरात्रे नृणां नीराजनाविधिः। नीराजयेयुर्देवास्तु विप्रान् गाश्च तुरंगमान्। ज्येष्ठान् श्रेष्ठान् जघन्यांश्च मा
तृमुख्याश्च योषितः। इति निर्णयामृते स्कांदे। कार्त्तिकस्यासिते पक्षे त्रयोदश्यां निशामुखे। यमदीपं बहिर्दद्यादप
मृत्युर्विनश्यति। मंत्रस्तु। मृत्युना पाशदंडाभ्यां कालेन श्यामया सह। त्रयोदश्यां दीपदानात्सूर्यजः प्रीयतां ममेति।
कार्त्तिके कृष्णचतुर्दश्यां प्रभाते चंद्रोदयेऽभ्यंगं कुर्यात्। तदुक्तं हेमाद्रौ निर्णयामृते च भविष्योत्तरे। कार्त्तिके कृष्णप
न क्षे चैं तुर्दश्यामिनोदये। अवश्यमेव कर्त्तव्यं नरैर्नरकभीरुभिः। इनश्चंद्रः। पूर्वविद्धन्वतुर्दश्यां कार्त्तिकस्यासिते तरे।
पक्षे प्रत्यूषसमये स्नानं कुर्यात्प्रयत्नतः। इति मदनरत्ने कालादर्शे च विधूदय इति पाठः। दिनोदय इति पाठात्सूर्यो
दयोत्तरं त्रिमुहूर्ते स्नानं कुर्यात्प्रयत्नतः। इति स्मृतिदर्पणेपि। चतुर्दशी याश्वयुजस्य कृष्णा स्वात्यर्कयुक्ता च भवे एमः
त्प्रभाते। स्नानं समभ्यज्य नरैस्तु कार्यं सुगंधितैलेन विभूतिकामैः। इति। पृथ्वीचंद्रोदये ब्राह्मे। आश्वयुक्कृष्णपक्ष
स्य चतुर्दश्यां विधूदये। तिलतैलेन कर्त्तव्यं स्नानं नरकभीरुभिरिति कालादर्शे पाठः। उभयत्राश्वयुगित्यमावास्या

तमाममभिप्रेत्योक्तं। तथा तैले लक्ष्मीर्जले गंगा दीपावल्याश्चतुर्द्दशीं। प्राप्येति शेषः। प्रातःस्नानं तु यः कुर्याद्यमलोकं न
पश्यातीति। दिनद्वयेपि चंद्रोदये चतुर्द्दशीसत्वे तदभावेप्यरुणोदये सपूर्णेत्वंद्वेवा दिनद्वये चतुर्द्दशीसाम्ये च पूर्वदि
नेभ्यंगं कुर्यात्। पूर्वविद्धचतुर्द्दश्यामिति वचनात्। पूर्वदिने परदिने एव वाधिकव्याप्तिसत्वे सैव ग्राह्या। दिनद्वयेप्य
सत्वेरुणोदयमात्रव्यापिनी ग्राह्या पक्षे प्रत्यूषसमयपरत्वोक्तेः। वक्ष्यमाणवचनाच्च। तदभावे तु चतुर्द्दशीह्रासं पू
र्वेद्युः प्रवेश्य पूर्वेह्नि त्रयोदशीमध्ये एवाभ्यंगं कुर्यादिति दिवोदासः। केचिदत्र वचनं साधकं वदंति। तिथ्यादौ तु
भवेद्यावान्ह्रासो वृद्धिः परेहनि। तावान्ग्राह्यः स पूर्वेद्युरदृष्टोपि स्वकर्मणीति। तन्मंदं। नहीदं वचनं पूर्वदिनस्या
पूर्वग्राह्यत्वं विधत्ते नक्तैकभक्तजन्माष्टम्यादौ दिनद्वये कर्मकालव्याप्त्यभावे सर्वत्र पूर्वग्राह्यत्वप्रसंगात्। किंतु य
त्रैकभक्तादौ दिनद्वये कर्मकालव्याप्त्यभावे वाक्यांतरेण वा पूर्वदिनस्य ग्राह्यत्वमुक्तं। तत्र मुख्यकाले तत्तिथ्यभा
वेपि तत्रैवानुष्ठानबोधकमिदं। न चात्र तदस्तीति यत्किंचिदतत्तेन चतुर्थ्यामग्गा। मिनी ग्राह्या। अत एव सर्वज्ञ
नारायणः। तथा कृष्णचतुर्द्दश्यामाश्विनेर्कोदयात्पुरा। यामिन्याः पश्चिमे यामे तैलाभ्यंगो विशिष्यत इति। मृगां
कोदयवेलायां त्रयोदश्यां पदा भवेत्। दर्शे यामंगलस्नानं दुःखशोकभयप्रदमिति। कालादर्शे त्रयोदशीनिषेधाच्च। तेनाप

२२९

र्थः। यथाग्निहोत्रे यावज्जीवसायंकालेष्वव्याप्यकालस्य गुरुत्वात्तथात्र चतुर्दशी चतुर्थयामारुणोदयचंद्रोदयाभ्यामुत्तरोत्त
रस्य व्याप्यत्वाद्गुरुत्वमिति। यदपि त्रयोदशी यदा प्रातः स्वयं याति चतुर्दशी। एतद्विशेषे त्वमावास्या तदाभ्यंगे त्रयोदशीति
वचनं तद्धेमाद्रिनिर्णयामृताद्यलिखितत्वेन निर्मूलत्वं। समूलत्वेपि अरुणोदयाच्चतुर्थयामाद्यापदाङ्गस्नानस्य र
मिदं। अत एव सर्वज्ञनारायणेन तपाकृष्णचतुर्दश्यामिति चतुर्थयाममात्रे स्नानमुक्तं। ज्योतिर्निबंधे नारदो
पि। इषासितचतुर्दश्यामिंदुक्षयतिथावपि। ऊर्जादौ स्वातिसंयुक्ते तदा दीपावली भवेत्। कुर्यात्संलग्नमेतच्च दी त
पोत्सवदिनत्रयं। ये तु त्रयोदशीमध्ये स्नानमाहुस्तेषामाशयं न विद्मः। अरुणोदयतोन्यत्र रिक्तायां स्नाति
यो नरः। तस्याविकभवो धर्मो नश्यत्येव न संशयः। इति दिवोदासीये भविष्यवचनं। तन्मुख्यकालचतुर्दश्यभावेपि
ध तत्रैव स्नातव्यमित्येवं परमिति सर्वं शिवं। चतुर्घटिकात्मकोरुणोदय इति तत्रैवोक्तं। तथा पाद्मे। अपामार्गमथोतुं
बीप्रपुंनाटमथापरं। भ्रामयेत्स्नानमध्ये तु नरकस्य क्षयाय वै। प्रपुंनाटश्च क्रमर्द इति मंत्रस्तु। सीतालोष्ठसमायुक्त स एमः
कंटकदलान्वित। हर पापमपामार्ग भ्राम्यमाणः पुनः। अस्यामेव प्रदोषे दीपान्दद्यादित्युक्तं हेमाद्रौ स्कांदे। ततः
प्रदोषसमये दीपान्दद्यान्मनोरमान्। ब्रह्मविष्णुशिवादीनां भवनेषु मठेषु च इति दिवोदासीयेपि ब्राह्मे। अमावास्या चत

दृश्योः प्रदोषे दीपदानतः। यममार्गांधकारेभ्यो मुच्यते कार्त्तिके नरः॥ खंडतिथौ तु। पूर्वेह्नि प्रदोषे दीपान्दत्वा परेद्युः स्नायादि
ति दिवोदासीये उक्तं। अत्र नरकोद्देशेन चतुर्वर्तियुक्तं दीपदानं कार्यं। तत्र मंत्रः। दत्तो दीपो चतुर्दश्यां नरकप्री-ये मया॥
चतुर्वर्तिसमायुक्तः सर्वपापापनुत्तये। तत्रैव लैंगे। माषपत्रस्य शाकेक्तं मदनपारिजाते वृद्धमनुना। दीपोत्सवचतु
र्दश्यां सर्वपापैः प्रमुच्यते। अत्र यमतर्पणमुक्तं मदनपारिजाते वृद्धमनुना। दीपोत्सवचतुर्दश्यां कार्यं तु यमतर्प
णं। मदनरत्ने ब्राह्मे। अपामार्गस्य पत्राणि भ्रामयेशिरसोपरि। ततश्च तर्पणं कार्यं धर्मराजस्य नामभिः॥ यमा
य धर्मराजाय मृत्यवे चांतकाय च। वैवस्वताय कालाय सर्वभूतक्षयाय च॥ औदुंबराय दध्नाय नीलाय परमेष्ठि
ने। वृकोदराय चित्राय चित्रगुप्ताय ते नमः॥ इति। तथा। यज्ञोपवीतिना कार्यं प्राचीनावीतिनाथवा। इदं जीवत्पितृ
केनापि कार्यं। जीवत्पितापि कुर्वीत तर्पणं यमभीष्मयोरिति पाद्मोक्तेः। अत्र भीष्मतर्पणमप्युक्तं दिवोदासीये त
त्प्रकारस्तु माधवे वक्ष्यते। इति नरकचतुर्दशी॥ कार्त्तिकामावास्यायां प्रातरभ्यंगं कुर्यात्। तदुक्तं कालादर्शे। प्रत्यू
ष आश्वयुग्दर्शे कृताभ्यंगादिमंगलः। भक्त्या संपूजयेद्देवीमलक्ष्मीविनिवृत्तये। अत्र व्याख्याने। आदिशब्दोत्यं च
लगुदकस्नानादेरुपसंग्रहः। तदुक्तं पुष्करपुराणे। स्वातिस्थिते रवाविंदुर्यदि स्वातीगतो भवेत्। पंचत्वगुदकस्नायी कृ

१२० ताभ्यंगविधिर्नरैः। नीराजितो महालक्ष्मीमर्चयन्श्रियमश्नुते। अथ युग्दर्शे इति दर्शेशाहः प्रत्यूष स्वातीयुक्ततिथिपरः।
तदुक्तं ब्राह्मे। ऊर्ज्जे शुक्लद्वितीयांततिथिषु स्वातिसंस्थो। मानवो मंगलस्नायी नैव लक्ष्म्या वियुज्यते। तत्रैव। इषे
भूते च दर्शे च कार्त्तिकप्रथमे दिने। यदा स्वाती तदाभ्यंगस्नानं कुर्याद्दिनोदये। कश्यपसंहितायां तु दीपावलीद
र्शे प्रक्रम्य। इंदुक्षयेपि संक्रांतौ रवौ पाते दिनक्षये। तत्राभ्यंगो न दोषाय प्रातः पापापनुत्तये इति। स्वातीयोगं विना
प्यभ्यंग उक्तः मात्स्ये। दीपैर्नीराजनादत्र सैषा दीपावली स्मृता। अत्र विशेषो हेमाद्रौ भविष्ये। दिवा तत्र न भोक्त
व्यं ऋते बालातुराज्जनात्। प्रदोषसमये लक्ष्मीं पूजयित्वा ततः क्रमात्। दीपवृक्षाश्च दातव्याः शक्त्या देवालये
षु च। तत्रैवाभ्यंगमभिधाय। एवं प्रभातसमये त्वमावास्यां नराधिप। कृत्वा तु पार्वणश्राद्धं दधिक्षीरघृतादिभिः। दी
पान्दत्वा प्रदोषे तु लक्ष्मीं पूज्य यथाविधि। स्वलंकृतेन भोक्तव्यं सितवस्त्रोपशोभिना। अयं प्रदोषव्यापी ग्राह्यः
तुलासंस्थे सहस्रांशौ प्रदोषे भूतदर्शयोः। उल्काहस्ता नराः कुर्युः पितॄणां मार्ग्गदर्शनमिति ज्योतिषोक्तेः। दिन एनः
द्वयसत्त्वे परा। दंडैकरजनीयोगे दर्शः स्यात्तु परेहनि। तदा विहाय पूर्वेद्युः परेह्नि सुखरात्रिके इति तिथितत्त्वे ज्योतिर्वच
नात्। दिवोदासीये तु प्रदोषस्य कर्मकालत्वात्। अर्द्धरात्रे भ्रमत्येव लक्ष्मीराश्रयितुं गृहान्। अतः स्वलंकृता दीप्ता री

पङ्क्तीग्रन्तनोत्सवाः सुधाधवलिताः कार्याःपुष्पमालोपशोभिताः। इतिब्राह्मोक्तेः अत्रप्रदोषादिरात्रव्यापिनीमुख्या। ए
कैकव्याप्तौ परैव। प्रदोषस्य मुख्यत्वात् अर्द्धरात्रेऽनुष्ठेयाभावाच्च। यत्तु। अपराह्णे प्रकर्त्तव्यं श्राद्धं पितृपरायणैः। प्र
दोषसमये राजन् कर्त्तव्या दीपमालिकेतिक्रमः। संपूर्णातिथावेव। तत्तत्क रायणैः। प्रदोषसमये राजन् कर्त्तव्या दी
पमालिकेतिक्रमः। संपूर्णातिथावेव। तत्तत्कर्मकालव्याप्तेर्बलवत्त्वादित्युक्तं। अत्रैव दर्शे पररात्रौ लक्ष्मीनिःसारण
मुक्तं मदनरत्ने भविष्ये। एवं गते निशीथे तु जने निद्रार्द्धलोचने। तावन्नगरनारीभिः शूर्पडिंडिमवादनैः। निष्काश्यते प्र
त्कृष्टाभिरलक्ष्मीः स्वगृहांगणात्। कार्त्तिकशुक्लप्रतिपदि गोक्रीडनमुक्तं निर्णयामृते। अस्यामेव रात्रौ बलेः पूजो
क्ता हेमाद्रौ भविष्ये। कृत्वैतत्सर्वमेवेह रात्रौ दैत्यपतेर्बलेः। पूजां कुर्यान्नृपः साक्षाद्भूमौ मंडलके कृते। बलिमालि
ख्य दैत्येंद्रं वर्णकैः पंचरंगकैः। गृहस्य मध्ये शालायां विशालायां ततोऽर्चयेत्। लोकश्चापि गृहस्यांतः शय्यायां शु
क्लतंदुलैः। संस्थाप्य बलिराजानं फलैः पुष्पैश्च पूजयेत्। मंत्रस्तु पाद्मे। बलिराज नमस्तुभ्यं दैत्यदानववंदित। इंद्र
शत्रोऽमरारातेर्विष्णुसांनिध्यदो भवेति। तथा। बलिमुद्दिश्य दीयंते दानानि कुरुनंदन। यानि तान्यक्षयाण्याहुर्मयैवं सं
प्रदर्शितमिति। तदेतत्पूर्वविद्धप्रतिपदि कर्त्तव्यं। पूर्वविद्धा प्रकर्त्तव्या शिवरात्रिर्बलेर्दिनमिति हेमाद्रौ पाद्मोक्तेः। मा

१२१ भवोपिबाप्युत्सवं च पूर्वेद्युरुपवासं सदाचरेदिति ॥ निर्णयामृते ब्राया कुहूः प्रतिपन्मिश्रा तत्र गाः पूजयेन्नृप । पूजनात्त्री
णि वर्द्धंते प्रजा गावो मही पतिरि।ती तथा । भद्रायां गोकुलक्रीडा मद्देशो वै विनश्यतीति । भद्रायां द्वितीयायां । तथा
प्रतिपद्यग्निकरणं द्वितीयायां च गोर्चने । छत्रछेदं करिष्येते वित्तनाशे कुलक्षयमिति । तथा । प्रतिपद्दर्शसंयोगे क्रीड
नं तु गवां मतं । परविद्धेतु यः कुर्यात्सुतदाराधनक्षयमिति देवलवचनाच्च । एते च विधिप्रतिषेधाः पूर्वदिने प्रतिपदस्सा
याह्नव्यापित्वे द्वितीयदिने चंद्रदर्शनसंभवे च ज्ञेयाः । गवां क्रीडादिने यत्र रात्रौ दृश्येत चंद्रमाः । सोमो राजा पशून्हं
ति सुरभीः पूजकांस्तथेति पुराणसमुच्चयात् । दिनद्वये सायाह्नव्यापित्वे परैव त्वाज्या । वर्द्धमानतिथौ नंदा यदा सार्द्ध
त्रियामिका द्वितीया वृद्धिगामित्वादुक्तात्र तत्र चोच्यते ॥ इति । तथा । त्रियाममार्गादर्शतिथिर्भवेच्चेत्सार्द्धत्रियामा प्रतिप
द्विवृद्धौ । दीपोत्सवे ते मुनिभिः प्रदिष्टे अतोन्यथा पूर्वयुते विधेये इति पुराणसमुच्चयादिति निर्णयामृतकारः ॥ सा
र्द्धत्रियामिकेत्यनेन चंद्रदर्शनाभाव उक्तः । द्वितीयायाः पंचधा विभक्तदिनचतुर्थांशरूपापराह्णव्याप्तावेव च द्द
र्शनसंभवात् । वपलेतद्वचनद्वयं पूर्वविद्धासंभवे वदितव्यमिति भ्रमः । दिनद्वये प्रक्रियरः सायाह्नव्याप्त्यभावे तु पूर्वैव । रामः
रात्रौ बलिपूजाविधानेन कर्मकालव्यापित्वात् । परदिने च चंद्रोदये तन्निषेधादिति दिक् । मदनरत्ने तु पूर्वविद्धायां गो

क्रीडानीराजनमंगलमालिके तूत्तरत्र कार्ये। कार्त्तिकशुक्लपक्षे तु विधानद्वितयं भवेत्। नारीनीराजनं प्रातःसालिकै। यं मंगलमालिका। यदा च प्रतिपत्स्वल्पा नौरीनीराजनं भवेत्। द्वितीयायां तदा कुर्यात्सायंमंगलमालिकामिति ब्राह्मोक्तेः। लभ्यते यदि वा प्रातः प्रतिपद्घटिकाद्वयं। तस्यां नीराजनं कर्ये सायमंगालमालिकेति भविष्योक्तेः॥ प्रातर्वा यदि लभ्येत प्रतिपद्घटिका शुभा। द्वितीयायां तदा कुर्यात्सायंमंगलमालिकां। कार्त्तिके शुक्लपक्षादौ अमावास्याघटीद्वयं। देशभंगाम यात्रैव कुर्यान्मंगलमालिकामिति दैवीपुराणाच्चेत्युक्तं। अत्र विशेषो हेमाद्रौ ब्राह्मे। बलिप्रतिपदं प्रक्रम्य। तस्माद्यूतं प्रकर्तव्यं प्रभाते तत्र मानवैः। तस्मिन्द्यूते जयो यस्य तस्य संवत्सरं जयः। पराजयो विरुद्धश्च लाभनाशकरो भवेत्। दयितोभिश्च सहितैर्नेया सा च भवेन्निशेति। अत्र गोवर्द्धनपूजादि मार्गपालीपूजनादि चोक्तं हेमाद्रौ निर्णयामृते च स्कांदे। प्रातर्गोवर्द्धनं पूज्य द्यूतं चापि समाचरेत्। भूषणीयास्तथा गावः पूज्याश्चावाहदोहनाः। गोवर्द्धनश्च गोमयेन कार्यश्चित्रे वा। मंत्रस्तु। गोवर्द्धन धराधार गोकुलत्राणकारक। बहुबाहुकृतच्छाय गवां कोटिप्रदो भव। गोमंत्रस्तु। लक्ष्मीर्या लोकपालानां धेनुरूपेण संस्थिता। घृतं वहति यज्ञार्थे मम पापं व्यपोहतु। तत्रैव स्कांदे। ततोपराह्णसमये पूर्वस्यां दिशि भारत। मार्गपाली प्रब

१२२ धीपात्तुंगेस्तंभेथपादपे।कुशकाशमयींदिव्यांलंबकैर्बहुभिर्गुणैः।दर्शयित्वागजानश्वान्सायमस्यास्तलेनयेत्।कृतेहोमे
द्विजेंद्रैस्तुबध्नीयान्मार्गपालिकां।नमस्कारंततःकुर्यान्मंत्रेणानेनसुव्रत।मार्गपालिनमस्तेस्तुसर्वलोकसुखप्रदे।।वि
धेयैःपुत्रदाराद्यैःपुनरेहिव्रतस्यमे।नीराजनंचतत्रैवकार्यंराष्ट्रजयप्रदं।राजानोराजपुत्राश्चब्राह्मणाःशूद्रजातयः।
मार्गपालींसमुल्लंघ्यनीरुजःस्युःसुखान्विताः।तत्रैवादित्यपुराणे।कुशकाशमयींकुर्याद्यष्टिकांसुनवांदृढां।।तामे
कतोराजपुत्राहीनवर्णास्तथान्यतः।गृहीत्वाकर्षयेयुस्तांयथासारंमुहुर्मुहुः।जयेत्रहीनजातीनांजयोराज्ञस्तुवत्स
रमिति।यमद्वितीयातुप्रतिपद्युक्ताग्राह्येत्युक्तंनिर्णयामृतादौ।यमद्वितीयामध्याह्नव्यापिनीपूर्वविद्धाचेतिहेमा
द्रिः।अत्रविशेषोहेमाद्रौस्कांदे।ऊर्जेशुक्लद्वितीयायामपराह्णेर्चयेद्यमं।स्नानंकृत्वाभानुजायांयमलोकंनपश्यति।कु
र्जेशुक्लद्वितीयायांपूजितस्तर्पितोयमः।वेष्टितःकिंनरैर्हृष्टैस्तस्मैयच्छतिवांछितं।तथाभविष्ये।प्रथमाश्रावणेमा
र्पितोयमः।वेष्टितःकिंनसितथाभाद्रपदेपरा।तृतीयाश्वयुजेमासिचतुर्थीकार्तिकेभवेत्।श्रावणेकलुषानामतथा
द्रेचगीर्मला।आश्विनेप्रेतसंचाराकार्तिकेयाम्यकामतेतिउक्ता।प्रथमायांव्रतंद्वितीयायांसरस्वतीपूजा।तृती एमः
यायांश्राद्धमुक्ताचतुर्थ्योमुक्तं।कार्तिकेशुक्लपक्षेस्याद्द्वितीयायांयुधिष्ठिर।यमोयमुनयापूर्वंभोजितःस्वगृहेर्चितः।अतो

यमद्वितीयेयंत्रिषुलोकेषुविश्रुता। अस्यांनिजगृहेविप्रनभोक्तव्यंततोनरैः। स्नेहेनभगिनीहस्ताद्भोक्तव्यंपुष्टिवर्द्धनं।दानानिचप्रदेयानिभगिनीभ्योविधानतः॥ स्वर्णालंकारवस्त्रान्नपूजासत्कारभोजनैः॥ सर्वाभगिन्यःसंपूज्याअभावेप्रतिपन्नकाः। प्रतिपन्नामाताभगिन्यइतिहेमाद्रिः। पितृव्यभगिनीहस्तात्प्रथमायांयुधिष्ठिर। मातुलस्यसुताहस्ताद्द्वितीयायांतथानृप। पितुर्मातुःस्वसुःकन्येतृतीयायांतयोःकरात्। चतुर्थ्यांसहजायास्तुभगिन्याहस्ततःपरा। सर्वासुभगिनीहस्ताद्भोक्तव्यंपुष्टिवर्द्धनं। यस्यांतिथौयमुनयायमराजदेवःसंभोजितःप्रतिजगात्स्वसौहृदेन। तस्यांस्वसुःकरतलादिहयोभुनक्तिप्राप्नोतिरत्नसुखधान्यमनुत्तमंसः॥ गौडास्तु। यमंचचित्रगुप्तंचयमदूतांश्चपूजयेत्। अर्घश्चात्रप्रदातव्योयमायसहजद्वये॥ मंत्रस्तु। एह्येहिमार्तंडजपाशहस्तयमांतकालोकधरामरेश। भ्रातृद्वितीयाकृतदेवपूजांगृहाणचार्घ्यंभगवन्नमस्तोह्स्मन्नरानमित्यप्याहुः। ब्रह्मांडपुराणेपि। यातुर्भोजयतेनारीभ्रातरंयुग्मकेतिथौ। अर्चयेच्चापितांबूलैर्नसावैधव्यमाप्नुयात्। भ्रातुरायुःक्षयोराजन्नभवेत्तत्रकर्हिचिद्दिति। कार्त्तिकशुक्लानवमीयुगादिः। सापूर्वाह्णिकाग्राह्या। शुक्लपक्षस्थत्वात्। अत्रपिंडरहितंश्राद्धंकर्त्तव्यं। अन्यत्प्रागुक्तं। अत्रैवविष्णुत्रिरात्रमुक्तंहेमाद्रौपाद्मे। कार्त्तिकेशुक्लनवमीमवाप्यविजितेंद्रियः।हरिंवि

१२३ धामतोवर्णोत्तलस्यासहितंविभुं।पूजयेद्विधिवद्भक्त्याव्रतीतत्रदिनत्रयं।एवंयथोक्तविधिनाकुर्याद्दैवाहिकंविधिमिति।का
र्त्तिकशुक्लैकादश्यांभीष्मपंचकव्रतमुक्तंनारदीये।अतोनरैःप्रयत्नेनकर्त्तव्यंभीष्मपंचकं।कार्त्तिकस्यामलेपक्षेस्नात्वा
सम्यग्व्रतास्थितः।एकादश्यांतुगृह्णीयाद्व्रतंपंचदिनात्मकमिति।तद्विधिस्तु।गोमयेनस्नात्वा।मौनीपंचामृतैःपंचग
व्येर्विष्णुंसंस्नाप्यसंपूज्यपायसंनिवेद्यद्वादशाक्षरमष्टोत्तरशतेनहुत्वाॐनमोविष्णवेइतिषडक्षरेणघृताक्तान्यवान्
व्रीहींश्चाष्टोत्तरशतंहुत्वाभूमौस्वपेत्।एवंपंचदिनेषुकुर्यात्।विशेषस्त्वाद्येहनिहरेःपादौसंपूज्यत्रिःगोमयंप्राश्यं। कमलैः ५
द्वितीयेह्निबिल्वपत्रैर्जानुनीसंपूज्यगोमूत्रं।त्रयोदश्यांभृंगराजेननाभिंसंपूज्यक्षीरं।चतुर्दश्यांकरवीरैःस्कंधे
संपूज्यदधि।पौर्णमास्यांहोमांतेलोहींपापप्रतिमांखड्गहस्तांकृष्णवस्त्रवेष्टितांप्रस्थतिलोपरिस्थांकृत्वा
धर्मराजनामभिःकरवीरैःसंपूज्यदन्यजन्मनिकृतमिहजन्मनिवापुनः।तत्सर्वंप्रशमंयातुमत्पापंतवपूजनादि
तिपुष्पांजलिंक्षिप्त्वाकृष्णप्रतिमांवस्त्रंपूज्यविप्रायदत्वाविप्रान्संभोज्यदक्षिणांदत्वा।पंचगव्यंप्राश्यपौर्णमास्यां
नक्तंभुंजीतेतिलघुनारदीये।पंचगव्यप्राशनंषडक्षरेणेति।हेमाद्रिः।हेमाद्रौभविष्येतुमुन्यन्नैर्वीचिंचाहवर्त्तेनमु णमः
क्तं।पद्मेभीष्मपंचकमितिप्रथितंपृथिव्यामेकादशीप्रभृतिपंचदशीनिरुद्धे।मुन्यन्नभोजनपरस्यनरस्यतस्मिन्निःशेषपुलं

द्विशतिपांडुवंशार्द्धं घत्वेति। तथा पाद्मे। पंचाहं पंचगव्याशी भीष्मायार्घ्यं च पंच सु॥ अर्घं स्वपितृवद्दद्यान्मंत्रेणानेन सु
व्रत। सत्यव्रताय शुचये गांगेयाय महात्मने। भीष्मायैतं ददाम्यर्घमाजन्मब्रह्मचारिणे। वैयाघ्रपदगोत्रायेति च सा
र्व्वेनानेन मंत्रेण। सार्ववर्णिकमिति। कार्त्तिकशुक्लद्वादश्यां रेवतीनक्षत्रयोगरहितायां पारणं कार्यं। तदुक्तं। हे
माद्रौ। आभाकासितपक्षेषु मैत्रश्रवणरेवतीः। संगमे न हि भोक्तव्यं द्वादशद्वादशीर्हरेत्। इति। यदा तु रेवतीयोग
रहिता द्वादशी सर्वथा लभ्यते। तदा रेवत्यास्तुर्यपादं वर्ज्जयेत्। वचनं तु प्रागुक्तं। लघुनारदीये। कार्त्तिके शु
क्लपक्षस्य कृत्वा चैकादशीं नरः। प्रातर्दत्वा शुभान्कुंभान्प्रयाति हरिमंदिरं। मदनरत्ने वाराहे। एकादशी सोम
युता कार्त्तिके मासि भामिनि। उत्तराषाढसंयोगे अनंता सा प्रकीर्त्तिता। तस्यां प्रक्षिपते भद्रे सर्वमाने समस्कृते। अ
स्यामेव रात्रौ देवोत्थापनमुक्तं हेमाद्रौ ब्राह्मे। एकादश्यां च शुक्लायां कार्त्तिके मासि केशवं। प्रसुप्तं बोधयेद्रात्रौ श्र
द्धाभक्तिसमन्वितः। इति। मदनरत्नेपि भविष्ये। कार्त्तिके शुक्लपक्षे तु एकादश्यां प्रयास्तुता मंत्रेणानेन राजेंद्र देवमुत्था
पयेद्धरिं। रामार्चनचंद्रिकायां तु द्वादश्यामुक्तं। पारणाहे पूर्वरात्रे घंटादीन्वादयन्नुद्धरीति। अत्र देशाचारतो व्यव
स्था। तत्रैव देवदेवस्य स्नानपूर्वं महद्भवेत। महापूजां ततः कृत्वा देवमुत्थापयेत्सुधीः। मंत्रास्तु वाराहपुराणोक्ताः॥ ब्र

ह्येंद्ररुद्राग्निकुबेरसूर्यसोमादिभिर्वंदितवंदनीय। बुध्यस्व देवेश जगन्निवास मंत्रप्रभावेण सुखेन देव। इयं तु द्वादशी देव
बोधनार्थं विनिर्मिता। त्वयैव सर्वलोकानां हितार्थं शेषशायिना। उत्तिष्ठोत्तिष्ठ गोविंद त्यज निद्रां जगत्पते। त्वयि सुप्ते ज
गन्नाथ जगत्सुप्तं भवेदिदं। उत्थिते चेष्टते सर्वमुत्तिष्ठोत्तिष्ठ माधव। गता मेघा वियच्चैव निर्मलं निर्मला दिशः। शारदा
नि च पुष्पाणि गृहाण मम केशव। इदं विष्णुरिति प्रोक्तो मंत्र उच्छ्रयणे हरेरिति। एवं देवमुत्थाप्य तदग्रे चातुर्मास्यव्रतस
माप्तिं कुर्यात। तदुक्तं भारते। चतुर्ह्याग्रह्यवेचीर्णं चातुर्मास्यव्रतं नरः। कार्तिके शुक्लपक्षे तु द्वादश्यां तत्समापये
त्। लघुनारदीये। चातुर्मास्यव्रतानां च समाप्तिः कार्तिके स्मृता। मंत्रश्च तन्निर्णयामृते सनत्कुमारोक्तः। इदं व्र
तं मया देव कृतं प्रीत्यै तव प्रभो। न्यूनं संपूर्णतां यातु त्वत्प्रसादाज्जनार्दन। इति। अथ वाराहोक्तो बोधिनीविधिः
एकादश्यां रात्रौ कुंभे घृतपात्रोपरि हैमं माषमितं मत्स्यं पंचामृतेन संस्नाप्य कुंकुमपीतवस्त्रयुगपद्माद्यैः सं
पूज्य मत्स्यादिदशावतारान् संपूज्य जागरं कृत्वा प्रातर्देवमाचार्यं च वस्त्राद्यैः संपूज्य। जगदादिर्जगद्रूपो जगदादि
रनादिमान्। जगदाद्यो जगद्योनिः प्रीयतां मे जनार्दन इति दत्वा दक्षिणां दत्वा ब्राह्मणान्भोजयेदिति। तथा ब्राह्मे एमः
महातूर्यरवै रात्रौ भ्रामयेत्स्यंदने। स्थितं उच्छ्रितं देवदेवेशं नगरे पार्थिवः स्वयं। चतुरो वार्षिकान्मासान्नियमं यस्य यत्कृ

तं। कथयित्वा द्विजेभ्यस्तद्दद्याद्व्रतपासदक्षिणां। यस्यमस्यस्यनियमः कृतस्तद्द्रव्यं दद्यादित्यर्थः। इदं चाशक्तस्त्रिरात्रेपि
कार्यं। आशौचे तु पूजामन्येन कारयेत्। कार्तिकद्वादशी पौर्णमासी च मन्वादिः। सा पूर्वाह्णिकी ग्राह्या। शुक्लपक्षस्थ
त्वात्। अन्यत्प्रागेवोक्तं। कार्तिकशुक्लचतुर्दशी वैकुंठसंज्ञा। सा निशीथव्यापिनी ग्राह्या। दिनद्वये तद्व्याप्तौ निशीथ
प्रदोषोभयव्यापिनी ग्राह्या। तदुक्तं हेमाद्रौ भविष्ये। कार्तिकस्य सिते पक्षे चतुर्दश्यां नराधिप। सोपवासस्तु संपूज्य ह
रिशंभौ। जितेंद्रियः। इति। अस्यामेव विश्वेश्वरप्रतिष्ठादिनत्वात्तत्पूजास्यां यदोपवासः क्रियते तदारुणोदयव्यापिनी
ग्राह्या। तदुक्तं त्रिस्थलीसेतौ सनत्कुमारसंहितायां। वर्षे च हेमलंबाख्ये मासे श्रीमति कार्तिके। शुक्लपक्षे चतुर्दश्यां
मरुणाभ्युदयं प्रति॥ महादेवतिथौ ब्राह्मे मुहूर्ते मणिकर्णिको। स्नात्वा विश्वेश्वरो देव्या विश्वेश्वरमपूजयदिति।
तत्पूर्वदिने चोपवासः कार्यः। ततः प्रभाते विमले कृत्वा पूजां महाद्भुतां। दंडपाणेर्महाधाम्नि वने तस्मिन्नकृतपारणः। इति त
त्रैवोक्तेः। शिवरहस्येपि ज्ञानगणधुक्तोक्तं। तहाधाम्नि वने तस्मिन्नकृतपारणः। इति तत्रैवोक्तेः। शिवरहस्येपि ज्ञागणधुक्तो
क्तं। ततोरुणोदये जाते स्नात्वा स्नात्वा च भस्मना। संध्यां समाप्य विश्वेशं समभ्यर्च्यर्घ्यपद्यविधि। मद्भक्तान्भोजयामासु १
र्संषयो बुभुजेस्ततः इति। अत्र कार्तिकव्रतोद्यापनमुक्तं कार्तिकमाहात्म्ये पाद्मे। अथोर्जव्रतिनः सम्यगुद्यापनवि

१२५ धिं श्रृणूर्ज्जे शुक्लचतुर्द्दश्यां कुर्यादुद्यापनं व्रती। तुलस्या उपरिष्टात्तु कुर्यान्मंडपिकां शुभां। तुलसीमूलदेशे च सर्व-
तोभद्रमेव च। तस्योपरिष्टात्कलशं पंचरत्नसमन्वितं। पूजयेत्तत्र देवेशं सौवर्णं गुर्वनुज्ञया। एवं तु जागरणं कुर्याद्गी-
तवाद्यादिमंगलैः। ततस्तु पौर्णमास्यां वै सपत्नीकान् द्विजोत्तमान्। त्रिंशन्मितानथैकं वा स्वशक्त्या वा निमंत्रये-
त्। अतो देवा इति द्वाभ्यां जुहुयात्तिलपायसं। ततो गां कपिलां दद्यात्पूजयेद्विधिवद्गुरुमिति। कार्त्तिकपौर्णमासी प-
ण्याख्या। अमापौर्णमास्योः परे इति दीपिकोक्तेः। अत्र विशेषो हेमाद्रौ ब्राह्मे पुण्या महाकार्त्तिकी स्याज्जीवेंद्वोः कृ-
त्तिकास्तु चा तथा। आग्नेयं तु यदा ऋक्षं कार्त्तिक्यां भवति क्वचित्। महती सा तिथिर्ज्ञेया स्नानदानेषु चोत्तमा। यदा
तु याम्यं भवति ऋक्षं तस्यां तिथौ क्वचित्। तिथिः सापि महापुण्या मुनिभिः परिकीर्त्तिता। प्राजापत्यं यदा ऋक्षं ति-
थौ तस्यां नराधिप। सा महाकार्त्तिकी प्रोक्ता देवानामपि दुर्लभेति। पाद्मे विशाखासु यदा भानुः कृत्तिकासु च चंद्रमाः
स योगः पद्मको नाम पुष्करे स्वति दुर्लभः। पद्मकं पुष्करे प्राप्य कपिलां यः प्रयच्छति। स हित्वा सर्वपापानि वैष्णवं लभते
पदं। यमः। कार्त्तिक्यां पुष्करे स्नातः सर्वपापैः प्रमुच्यते। माघ्यां स्नातः प्रयागे तु मुच्यते सर्वकिल्बिषैः। अस्यामेव सायं एमः
काले मत्स्यावतारो जातः। इत्युक्तं पाद्मे कार्त्तिकमाहात्म्ये। वरान्दत्वा ततो विष्णुर्मत्स्यरूपमभवत्ततः। तस्यां दत्तं हुतं ज-

प्रतद्दश्यप्यफलंस्मृतमिति। अत्रत्रिपुरोत्सवश्चोक्तो मार्गवार्चनदीपिकायां पौर्णमास्यांतुसंध्यायांकर्त्तव्यस्त्रिपुरोत्सवः दद्यादनेनमंत्रेणप्रदीपांश्चसुरालये। कीटाःपतंगमशकाश्चवृक्षाजलेस्थलेयेविचरंतिजीवाः। दृष्ट्वाप्रदीपंनचजन्मभागिनोभवंतिनित्यंश्वपचाहिविप्राः। अत्रवृषोत्सर्गोपिप्रशस्तः। तदुक्तंमात्स्ये। कार्त्तिक्यांयोवृषोत्सर्गंकृत्वानक्तंसमाचरेत्। शैवंपदमवाप्नोतिशिवव्रतमिदंस्मृतमिति। अत्रकार्त्तिकेपदर्शनमुक्तंकाशीखंडे। कार्त्तिक्यांकृत्तिकायोगेयः कुर्यात्स्वामिदर्शनं। सप्तजन्मभवेद्विप्रोधनाढ्योवेदपारगः॥ इतिकमलाकरभट्टकृतेनिर्णयसिंधौकार्त्तिकःसमाप्तः। ॥ वृश्चिकेपूर्वाःषोडशघटिकाःपुण्याः। शेषंप्राग्वत्। मार्गशीर्षकृष्णाष्टमीकालाष्टमी। सारात्रिव्यापिनीग्राह्या। मार्गशीर्षसिताष्टम्यांकालभैरवसन्निधौ। उपोष्यजागरंकुर्वन्सर्वपापैःप्रमुच्यते। इतिकाशीखंडात्। रात्रिव्रतत्वावगतेः। कृष्णव्रतेषुसर्वेषुकर्त्तव्यास्तमुखीतिथिरिति ब्रह्मवैवर्त्तात्। दिनद्वयेंशतोरात्रिव्याप्तावुत्तरैवाभैरवोत्पत्तेः। प्रदोषकालीनत्वादितिकेचित्। तन्न। शिवरहस्येमध्याह्नेभैरवोत्पत्तेःश्रवणात्। तथाचातत्रैवनित्ययात्रादिकंकृत्वामध्याह्नेसंस्थितेरवावित्युपक्रम्यब्रह्मणाकृतेवज्ञातेउक्तं। तदीयरूपादनवद्यान्मत्तः श्रीकालभैरवः। आविरासीत्तदालोकान्भीषयन्निखिलानपीति। अत्रोपवासएवप्रधानमित्युक्तंतत्रैव। उपोषणस्यांगभूतम

र्धरात्रमिहस्मृतं।तथानागरखंडेत्रोपूजायामचतुष्टये।संध्यायामपिपूज्येचोक्ता।तेनमध्याह्नव्यापिनीमुख्या
दिनद्वयेंशतःपूर्णायांवातदभावेपूर्वैवा।पूर्वैव।पूर्वोक्तवचनात्।पारणंतुप्रातरेव।यामत्रयोर्ध्वगामिन्यांप्रातरेव
हिपारणमितिवचनात्।अत्रकालभैरवपूजोक्तात्रिस्थलीसेतौकृत्वाचविविधांपूजांमहासंभारविस्तरैः।नरो
रोमार्गसिताष्टम्यांवार्षिकविघ्नमुत्सृजेत्।तथा।तीर्थेकालोदकेस्नात्वाकृत्वातर्पणमत्वरः।विलोक्यकाल
राजानंनिरयादुद्धरेत्पितॄन्।इति।इयंचकार्त्तिकयनंतरगौणचांद्राभिप्रायेण।मार्गशीर्षशुक्लपंचम्यांनाग
पूजोक्ता।हेमाद्रौस्कांदे।शुक्लामार्गशिरेपुण्याश्रावणेयाचपंचमी।स्नानदानैर्बहुफलानागलोकप्रदायिनीति।
इयंनागपूजायांषष्ठीयुतेवग्राह्या।पंचमीनागपूजायांकार्याषष्ठीसमन्विता।तस्यांतुतोषितानागाइतरासच
तुर्थिकेतिमदनरत्नेवचनात्।मार्गशीर्षशुक्लपंचमीचेत्पाषष्ठीतिमहाराष्ट्रेषुप्रसिद्धा।साउत्तरायुताग्राह्या।षण्मु
खोरितियुग्मवाक्यात्।षष्ठ्यांहेतुर्दैविकंकुर्यादितिवचनात्।अस्यचदैवकर्मत्वात्।इयमेवयोगविशेषेणचंपेत्यु
च्यते।तदुक्तंब्रह्मांडपुराणेमल्लारिमाहात्म्ये।मार्गेभाद्रपदेशुक्लाषष्ठीवैधृतिसंयुता।रविवारेणसंयुक्तासाचंपेती एमः
हकीर्त्तितेति।विशाखाभौमयोगेनसाचंपेतीहविश्रुतेतिमदनरत्नेपाठः।मार्गशीर्षेमलेपक्षेषष्ठ्यांवारेशुमालिनः।

वसमाहरेदग्यिनाककल्पमुपोषेदेषामेष्टकेतिन लेवानष्टकः स्यादिति। मार्गशीर्षादिषु मलमासे सतितत्राष्टकानकार्या
चतुर्णामित्तिग्रहणादिसुक्तंनारायणवृत्तौ। तथाकाठकगृह्येपि। महालयाष्टकाश्राद्धेपाकर्माघपिकर्मयत्। स्पष्टमास
विशेषाख्याविहितंवर्ज्ज्येन्मलइति। मार्गादिरविवारेषुकाम्यंव्रतमुक्तंहेमाद्रौ। तत्रमत्स्याद्युक्तानिसंग्रहे॥ सौर
धर्मे। पत्रत्रिलंतुलस्याः त्रिपलमथघृतंमार्गशीर्षादिमस्संमुष्टीनांत्रि। तिलानांत्रिपलंदधितथादुग्धकंगोमयंचो
त्रिर्लतोयांजलीनांत्रिमरिचकमथोत्रिःपलाःसक्तवःस्युर्गोमूत्रंशर्करामधुविरितिविधिनामानुवारेक्रमेण। १॥
इतिश्रीकमलाकरभट्टकृतेनिर्णयसिंधौमार्गशीर्षः समाप्तः॥ धनुःसंक्रमेपराःषोडशघटिकाःपुण्यकालः
अन्यतप्राग्वत्। अत्रोत्सर्जननिर्णयोवक्तव्योप्युपाकर्मप्रसंगात्प्रागेवोक्तः। कल्पतरौभविष्ये। पौषेमासियदा
देविशुक्लाष्टम्यांबुधोभवेत्। तस्यांस्नानजपोहोमस्तर्पणंविप्रभोजनं। मत्प्रीतयेकृतंदेविशतसाहस्रिकंभवेत्। अ
त्रैवार्द्रारोहिणीयोगेपुण्यतमंज्ञेयं। पौषशुक्लैकादशीमन्वादिः। साचोक्ताप्राक्। पौषपौर्णमास्यनंतराःसप्तम्यष्टमी
नवम्योष्टकाद्याःप्रागुक्ताः। पौषामावास्यायामर्द्धोदयोयोगविशेषः। तदुक्तंमहाभारते। अमार्कपातश्रवणैर्युक्ता
चेत्पौषमाघयोः। अर्द्धोदयःसविज्ञेयः। कोटिसूर्यग्रहैःसमः। इतिपौषमाघयोर्मध्यवर्त्तिनीपौषीपूर्णिमास्तुतत्रामा

१२८ वास्येत्यर्थः॥ रतिमहाः॥ पुष्यस्य माघस्येत्यर्थः॥ उक्तो मदनरत्ने। तन्न। हेमाद्रिविरोधात्। तत्र हि माघ एवोक्तः॥ तथा॥ दिवैव यो
गः शक्तोपि न तु रात्रौ कदाचनेति। हेमाद्रौ मदनरत्ने च स्कांदे। माघामायां व्यतीपाते आदित्ये विष्णुदैवते। अर्द्धोदयं तदित्या
हुः सहस्रार्कग्रहैः समं। तत्रैव माघमासे कृष्णपक्षे पंचदश्यां रवेर्दिने। वैष्णवेन तऋक्षेण व्यतीपाते सुदुर्लभे। व्रतं कुर्या
दित्यग्रेन्वयः। तत्रैव। ब्रह्मविष्णुमहेशानां सौवर्णाः पलसंख्यया। प्रतिमास्तु प्रकर्तव्यास्तदर्द्धेन द्विजोत्तम॥ सार्धं शतत्र
यं शोभो द्रोणानां तिलपर्वतः। कर्तव्यो पर्वतौ विष्णुब्रह्मणोः पूर्वसंख्यया॥ शय्यात्रयं ततः कुर्यादुपस्करसमन्विते॥ ति
लैर्हैमं कृत्वा प्रतिमा दद्यादित्युक्तं। स्कांदे। अर्द्धोदये तु संप्राप्ते सर्वं गंगासमं जलं। शुद्धात्मानो द्विजाः सर्वे भवंति ब्रह्म
संमिताः। यत्किंचिद्दीयते दानं तद्दानं मेरुसन्निभमिति। अत्र दानविशेषो निर्णयामृते स्कांदे। चतुःषष्टिफलं मुख्यमम
त्रं तत्र कारयेत्। चत्वारिंशत्पलं वाथ पंचविंशतिरेव वा। अमत्रं पात्रं। तच्च कांस्यमयमित्युक्तं तत्रैव। एवं सुघटितं का
र्यं कांस्यभाजनमुत्तमं निधाय पायसं तत्र पद्ममष्टदलं लिखेत्। पद्मस्य कर्णिकायां तु कर्षमात्रं सुवर्णकं। तदभा
वे तदर्द्धं वा तदर्द्धं वापि कारयेत्। भूमौ तु तंडुलैः शुद्धैः कृत्वाष्टदलमुत्तमं। अमत्रं स्थापयेत्तत्र ब्रह्मणाय निवेदयेत् एमः
मंत्रस्तु। सुवर्णपायसामत्रं यस्मादेतत्त्रयीमयं। आपन्नस्तारकं यस्मात्तद्गृहाण द्विजोत्तम। समुद्रमेखलां पृथ्वीं स

स्यादातुष्यपत्फलं। तत्फलं लभते मर्त्यः कुले दद्यामसुत्तममिति॥ इति कमलाकरभट्टकृते निर्णयसिंधौ पौषमासः॥ अ
थ माघस्नानं। तत्र विष्णुः तुलामकरमेषेषु प्रातःस्नायी सदा भवेत्। हविष्यं ब्रह्मचर्यं च माघस्नाने महाफलमिति। सोऽयं मा
स उक्तः। ब्राह्मे तु सावनोक्तः। एकादश्यां शुक्लपक्षे पौषमासे समारभेत्। द्वादश्यां पौर्णमास्यां वा शुक्लपक्षे समापनमिति।
पाद्मेऽपि। पुष्यस्यैकादशीं शुक्लामारभ्य स्थंडिलेशयः। मासमात्रं निराहारस्त्रिकालं स्नानमाचरेत्। त्रिकालमर्चयेद्विष्णुं स
क्तभोगो जितेंद्रियः। माघस्यैकादशीं शुक्लांप्यावद्विद्याधरोत्तमेति। त्रिकालस्नानं मासोपवासविषयं। निराहारस्त्वशक्तः पृ
थ्वीचरोदये तस्य योक्तं। विष्णुः दर्शं वा पौर्णमासीं वा प्रारभ्य स्नानमाचरेत्। पुण्यान्यहानि त्रिंशच्च मकरस्थे दिवाक
रे इति। अत्र दर्शमिति शुक्लादिमुख्यचांद्राभिप्रायेण। अयं तु पक्षो नेदानीं प्रचरति। अत्राधिकारिणो भविष्ये ब्र
ह्मचारी गृहस्थो वा वानप्रस्थोथभिक्षुकः। बालवृद्धयुवानश्च नरनारीनपुंसकाः। स्नात्वा माघे शुभे तीर्थे प्राप्नुवंती
प्सितं फलं। पाद्मे। सर्वेधिकारिणो ह्यत्र विष्णुभक्तौ यथा नृप। ब्राह्मे। उष्णोदकेन वा स्नानं न शक्तो यति कुर्वतो दृ
ष्टेषु सर्वगात्रेषु हस्तोर्तन विशिष्यते। वैष्णवामृते गौडनिबंधे च स्कांदे। पौष्यां तु समतीतायां यावद्भवति पूर्णिमा। मा
सस्य तावद्धि पूजा विष्णोर्विधीयते। पितॄणां देवतानां च मूलकं नैव दापयेत्। ब्राह्मणो मूलकं भुक्त्वा चरेच्चांद्रायणत्र

१२९

तं॥अन्यथायातिनरकंसत्त्रविट्भूढएवचावर्ज्जनीयंप्रयत्नेनमूलकंमदिरोपमं।यदातुमाघोमलमासोभवतितदाकाम्यानां
तत्रसमाप्तिनिषेधात्मासद्वयंस्नानंतन्नियमाश्चकर्त्तव्याः।मासोपवासचांद्रायणादितुमलमासएवसमापयेत्।तदुक्तं
दीपिकायां।निपतत्त्रिंशदह्निस्ताच्छुभेमास्यारभ्यसमापयेतमलिनेमासोपवासव्रतमिति।स्नानारंभेचमंत्रोविष्णु
नोक्तः।तत्रचोक्तोयानियमंगृह्णीयाद्विधिपूर्वकं।माघमासमिमंपूर्णंस्नास्येहंदेवमाधव।तीर्थस्यास्यजलेनित्य
मितिसंकल्प्यचेतसीति।प्रत्यहंमंत्रश्चपाद्मे।दुःखदारिद्र्यनाशायश्रीविष्णोस्तोषणायच।प्रातःस्नानंकरोम्यद्यमा
घेपापविशोधनं।मकरस्थेरवौमाघेगोविंदाच्युतमाधव।स्नानेनानेनमेदेवयथोक्तफलदोभव।इमंमंत्रंसमुच्चा
र्यस्नायान्मौनसमन्वितः।इति।प्रत्यहंसूर्यार्घ्यमंत्रश्च।पृथ्वीचंद्रोदयेपाद्मे।सवित्रेप्रसवित्रेचपरंधामजलेमम।
त्वत्तेजसापरिभ्रष्टंपापंयातुसहस्रधेति।स्नानकालश्चसूर्योदयः।त्रिस्थलीसेतौ।मकरस्थेरवौयोहिनस्नात्य
भ्युदितेरवावितिचपाद्मवचनात्।संप्राप्तेमाघमासेतुतपस्विजनवल्लभे।कोष्णांतिसर्ववारीणिसमुद्गच्छतिभास्क एमः
रे।पुनीमःसर्वपापानित्रिविधानिनसंशयः।इतिनारदीयोक्तेः।योमाघमास्युषसिसूर्यकराभितप्तेस्नानंसमाचर
तिदेवनदीप्रवाहे।उद्धृत्यसप्तपुरुषान्पितृमातृवंश्यान्स्वर्गंप्रयात्यमरदेहधरोनरोसौ।इतिभविष्योत्तरवचनाच्च।ब्रह्मे

शततारागतेचंद्रेलिंगेस्याद्दृष्टिगोचरा।मिति।इयंयोगवशेनपूर्वावापरावाकार्या।पौषेषष्ठीसप्तमीयुतेतिदिवोदासः।रू
पमेवस्कंदषष्ठी।सापूर्वायुताकृष्णाष्टमीस्कंदषष्ठीशिवरात्रिचतुर्दशी।एताःपूर्वयुताःकार्यास्तिथ्यंतेपारणंभवे
दितिभृगूक्तेः।।परेद्युर्व्याप्तिएत्रावाधयाममध्येपारणासंभवेद्वं।अन्यथोत्तरैवेतिदिवोदासः।अत्रदृपर्यंतंषष्ठीयुसेनाविशा
रकस्कंदमहासेनमहाबल।रुद्रोमाग्निजषड्वक्त्रगंगागर्भनमोस्तुते।इतिएतंत्स्कंदंसंपूज्यविशोधापदघ्यादितिदिवो
दासः।मार्गशीर्षशुक्लचतुर्दश्यांपिशाचमोचनतीर्थेश्राद्धंत्रिस्थलीसेतौभट्टैरुक्तं।तस्यप्रायःपैशाच्यस्वापित्राधुद्दे
श्यकत्वेपार्वणत्वादपराह्णव्यापिनीग्राह्या।अज्ञातनामपिशाचाद्युद्देश्यत्वेत्वेकोद्दिष्टत्वान्मध्याह्नव्यापिनीति।
कुलधर्मव्रताद्दैतूत्तरैव।मार्गशीर्षपौर्णमास्यांदत्तात्रेयोत्पत्तिः।तदुक्तंस्कांदेसह्याद्रिखंडेमार्गशीर्षेतथामा
सिदशमे।ह्निस्तुनिर्मले।मार्गशीर्षयुतेपौर्णमास्यांतस्यचवासरे।जनयामासदेदीप्यमानंपुत्रंसतीशुभं।तंविष्णु
मागतंज्ञात्वाअत्रिर्नामाकरोत्स्वयं।दत्तवान्स्वस्यपुत्रत्वाद्दत्तात्रेयमितीश्वर।मिति।इयंप्रदोषव्यापिनीतिवृ
द्धाः।मार्गपौर्णिमानंतरष्टमीअष्टका।एवंपौषादिमासत्रयेपि।हेमंतशिशिरयोश्चतुर्णामपरपक्षाणामष्टमीष्व
ष्टका।एकस्यांवेति।आश्वलायनोक्तेः।एकस्यामष्टम्यांचैकाकार्येतिहरदत्तः।कश्चित्पंचम्युक्ता।भाद्रकृष्णाष्टमी

१२७ नाम्नाऽष्टकाहं भविष्यतीति पाद्मवचनात्। तत्पूर्वसप्तमीषु पूर्वेद्युः तत्परनवमीष्वन्वष्टकास्तु च श्राद्धमुक्तं कालादर्शे।
मार्गशीर्षे च पौषे च माघे प्रौष्ठे च फाल्गुने। कृष्णपक्षेषु पूर्वेद्युरन्वष्टकं तथाष्टका इति। यत्तु विष्णुः। अमावास्यास्तिस्रो
ऽष्टकास्तिस्रोऽन्वष्टका इति। यच्च कौर्मे। अमावास्याष्टकास्तिस्रः पौषमासादिषु त्रिष्विति तिस्रश्चतुर्थ्या अनावश्यक
त्वार्थं। या चाप्यन्या चतुर्थी स्यात्तां च कुर्यात्प्रयत्नतः। इति वायुब्रह्माण्डपुराणात्। श्राद्धमेतेषु कुर्वाणो नरकं प्र
तिपद्यते। इति विष्णूक्तेरिति शूलपाणिः। शाखाभेदाच्च व्यवस्थेति तत्त्वं। वायुब्रह्माण्डयोः। आद्या पूपैः सदा कार्या मां
सेऽन्या सदा भवेत्। शाकैः कार्या तृतीया स्यादेष द्रव्यगतो विधिः। पौषादिक्रमः। अन्वष्टका तु प्रागेव निर्णीता
। तत्राष्टम्यपराह्णव्यापिनी ग्राह्या। अथ छादनपर्यन्तं श्राद्धं पर्वणवत् भवेत्। इत्याश्वलायनकारिकोक्तेर
पराह्णकालत्वात्पार्वणस्य। पूर्वेद्युरन्वष्टकाश्राद्धयोक्तौ। अष्टम्यनुरोधेनानिर्णयः। अत एव सूत्रं। पूर्वेद्युः पितृभ्यो
दद्यात्। अपरेद्युरन्वष्टक्यमिति च। अत्र च कामकालौ विश्वेदेवौ। इष्टिश्राद्धे क्रतुदक्षावष्टम्यां कामकालकाविति
सायणीये शेखोक्तेः। अत्र श्राद्धाकरणे प्रायश्चित्तमुक्तं ऋग्विधाने। एभिर्द्युभिर्जपेन्मंत्रं शतमष्टां तु तद्दिने। आन्वष्टक्यं एमः
यदा शून्यं सपूर्णं पाति सर्वथेति। अशक्तौ त्वाश्वलायनः। अथ पश्वोऽभ्रतेष्टकायै पशुना स्थालीपाकेन वाऽप्यनडुहो य

लरुणोदयउक्तः। अरुणोदये तु संप्राप्ते स्नानकाले विचक्षणः॥ माधवांघ्रियुगं ध्यायन् यः स्नाति सुरपूजित इति। तथा। अरुणोदयमारभ्य प्रातःकालावधि प्रभो। माघस्नानवतां पुण्यं क्रमात्त्रावधारणा उत्तमं तु सनक्षत्रं लुप्ततारं तु मध्यमं। सवितर्युदिते भूप ततो हीनं प्रकीर्तितमिति। तिलेनात्र शक्त्यपेक्षया व्यवस्था। इदं च स्नानं प्रयागेतिप्रशस्तं। काश्याः शतगुणं प्रोक्तं गंगायमुनसंगमे। सहस्रगुणितं ~~स्मृत~~ माघे नृप दुर्लभमेति इत्यादिपाद्मादिवचोभ्यः। ~~विक्ष~~तो सा माघे नृता सापि भवेत्पश्चिमवाहिनी। पश्चिमाभिमुखी गंगा कालिंद्या सह संगता। हंति कल्पकृतं पापं सा माघे नृप दुर्लभेति इत्यादि पाद्मादिवचोभ्यः। विस्तरस्तु पितामहकृतप्रयागसेतौ ज्ञेयः। ब्राह्मे। यत्र कुत्रापि वा माघे प्रयागं स्मरणान्वितः। करोति मज्जनं तीर्थे स लभेद्गंगामज्जनं। तथा समुद्रेप्यतिप्रशस्तं। तदुक्तं पृथ्वीचंद्रोदये प्रभासखंडे। माघे मासि च यः स्नायान्नैरंतर्येण भावतः। पौंडरीकफलं तस्य दिवसे दिवसे भवेत्। माघस्नानं काम्यमेवेति मह्राः। विष्ण्वादिवाक्येषु दाक्ष्यपशब्दान्नित्यं काम्यमिति तु युक्तं। मासपर्यंतस्नानासंभवे त्र्यहमेकाहं वा स्नायात्। महामाघीं पुरस्कृत्य सत्वो तत्र दिनत्रयमिति लैंगात्। अस्मिन्योगे त्वशक्तोपि स्नायाद्दपि दिनत्रयं। प्रयागे माघमासे तु त्र्यहं स्नातस्य यत्फलं। नाश्वमेधसहस्रेण तत्फलं लभते भुवि इत्यादि पाद्मादिवचनात्। अत्र मकरसंक्रमरथसप्तमीमाघीति त्र्यहमिति केचित्। मा

१३०

घशुक्लदशम्यादीत्यन्ये। मकरादित्र्यहमित्यपरे। माघस्याद्यत्र्यहमिति केचित्। त्रयोदश्यादीति बहवः। एतस्यार्थवादत्वाद्य
त्किंचिद्दिनत्रयमिति भट्टाः। तत्त्वं तु संदिग्धेषु वाक्यशेषादिति न्यायात्त्रयोदश्याद्येवेति। प्रयागं विनापि पापघ्ने। अस्मिन्न्यो
गे त्वशक्तोपि स्नायादपि दिनत्रयं माघस्नाने नियतस्तु नारदीये। न वह्निं सेवयेत्स्नातोऽप्यस्नातोपि वरानने। हेमार्थं से
वयेद्वह्निं शीतार्थं न कदाचन। अहन्यहनि दातव्यास्तिलाः शर्करयान्विताः। त्रिभागस्तु तिलानां हि चतुर्थः शार्करा
न्वितः। अनभ्यंगी वरारोहे सर्वमासं नयेद्व्रती। ति। तथा। अप्रावृतशरीरस्तु यः कष्टं स्नानमाचरेत्। पदे पदेऽश्वमेधस्य फलं
प्राप्नोति मानवः। तथा। शंखचक्रधरं देवं माधवं नाम पूजयेत्। वह्निं कृत्वा विधानेन ततः स्वैकाशनो भवेत्। भूशय्या ब्र
ह्मचर्येणाशक्तः स्नानं समाचरेत्।। अशक्तो ब्रह्मचर्यादौ स्वेच्छा सर्वत्र कथ्यते। तिलस्नायी तिलोद्वर्ती तिलहोमी ति
पुक्तिलस लोदकी।। तिलदाता च षट्तिलाः पापनाशना इति। तथा प्रयागसंभवे काश्यां दशाश्वमेधोत्तरस्थप्रयागतीर्थे स्नान
मुक्तं काशीखंडे। काश्युद्भवे प्रयागे ये तपस्यि स्नांति मानवाः। दशाश्वमेधजनितं फलं तेषां भवेद्ध्रुवमिति। स्नानोत्तरं मद
नपारिजाते विष्णुः। कांस्यमौनान्नमश्नुत्य पूजयेत्पुरुषोत्तमं। अवश्यमेव कर्तव्यं माघस्नानमिति स्मृतिः। भविष्ये। ते एमः
नमामलकाश्चैव तीर्थे देयास्तु नित्यशः। ततः प्रज्वलयेद्वह्निं सेवनार्थं द्विजन्मनां। एवं स्नानावसाने तु देयं भोज्यमवारितं

माघस्नाने नियमास्तु नारदीये।। न वह्निं सेवयेत्स्नातो ह्यस्नातोपि वरानने।। होमार्थं सेवयेद्वह्निं शीता
र्थं न कदाचन।। अहन्यहनि दातव्यास्तिलाः शर्करयान्विताः।। त्रिभागस्तु तिलानां हि चतुर्थः शार्करान्वितः।। अनभ्यंगी वरारोहे सर्वमासं नयेद्व्रती तथा।। अप्रावृतशरीरस्तु यः कुर्यात्स्नानमाचरेत्।। पदेपदेऽश्वमेधस्य फलं प्राप्नोति मानवः ×× ७

घास्तु नित्यशः। ततः प्रज्वालयेद्वह्निं सेवनार्थं द्विजन्मनां॥ एवं स्नानावसाने तु देयं भोज्यमवारितं भोजयेद्द्विजदंपत्यं भू
षयेद्वस्त्रभूषणैः। कंबलाजिनरत्नानि वस्त्राणि विविधानि च॥ चोलकानि च देयानि प्रच्छादनपटांस्तथा॥ उपानहौ त
था गुह्यमोचकौ पापमोचकौ॥ अनेन विधिना दद्यान्माधवः प्रीयतामिति। पाद्मे। भूमौ शयीत होतव्यमाज्यं ति
लसमन्वितं। तथा। अन्नं चैव यथाशक्त्या देयं माघे नराधिप। सुवर्णं रक्तिकामात्रं दद्याद्वेदविदे तथा॥ माघे। ते तु
विशेषो नारदीये। माघावसाने तु भगोषडुसंभोजनं स्मृतं। सूर्यो मे प्रीयतां देवो विष्णुमूर्तिर्निरंजनः। दंपत्योर्वासमसी
स्तूलेसप्रधान्यसमन्विते। त्रिंशत्तु मोदका देयाः शर्करातिलसंयुताः। इति। अत्रैकादशीविधानेन व्रतस्योद्यापनं त
थेति। पाद्मवचनात्। पूर्वेह्नि उपवासपूजनादिकं कृत्वा परेह्नि तिलचर्वाज्यैरष्टोत्तरशतं होमं कृत्वा सवित्रे प्रसवित्रे चेति
पूर्वोक्तमंत्रमुक्त्वा दिवाकर जगन्नाथ प्रभाकर नमोस्तु ते। परिपूर्णं कुरुष्वेक माघस्नानमहर्प्पते। इति समापयेदि
ति संक्षेपः। मकरसंक्रांतौ हेमाद्रिमते परतश्चत्वारिंशद्घटिकाः पुण्याः। त्रिंशत्कर्कपूर्वा मकरे विंशतिः परे इति। वृद्ध
वसिष्ठोक्तेः। पश्चात्तु सत्यां स्ता सूर्यसंक्रांतिः भवति तद्दोषभयमते पूर्वमेव पुण्यकालः। रात्रौ तु प्रदोषे निशीथे वा मक
रसंक्रमे माधवमते द्वितीयदिनमेव पुण्यं। यद्यस्तमयवेलायां मकरं याति भास्करः। प्रदोषे वार्द्धरात्रे वा स्नानं दानं परेह

१३१ नीति। वृद्धगार्ग्यवचनात्। अस्तमयः प्रदोषः। प्रदोषे पूर्वरात्रे। कार्मुकं तु परित्यज्य झषं संक्रमते रविः। प्रदोषे वार्धरात्रे वा स्नानं
दानं परेहनीति भविष्योक्तेश्च। तथा भोगः परेहनीति हेमाद्रौ पाठः॥ कालादर्शनिर्णयामृतमदनपारिजातादयोप्येवमूचुः।
दाक्षिणात्यास्त्वेतदेवाद्रियंते। यत्तु हेमाद्रिणाद्यो वाशब्दः यथार्थे द्वितीयस्तथार्थे। यथा प्रदोषे पूर्वेद्युस्तथार्धरात्रे प
रेद्युरित्युक्तं। तस्मैनमोक्ता। तेन परेह्नि पुण्यं वक्तुं प्रदोषे इति। दिनद्वये पुण्यापार्थ्यमर्धरात्रग्रहणं। हेमाद्रिस्मृत्यर्थसारा
नंतभट्टादिमते तु निशीथात्पूर्वं पश्चाद्वा संक्रांतौ पूर्वदिने परदिने वा पुण्यं। धनुर्मीनावतिक्रम्य कन्यां च मिथुनं तथा
। पूर्वापरविभागेन रात्रौ संक्रमणं यदा। दिनांते पंचनाड्यस्तत्तदा पुण्यतमाः स्मृताः। उदयेपि तथा पंच दैवे पित्र्ये
च कर्मणीति स्कांदवचनात्। पूर्वापरविभागेनेति मकर्कभिन्नविषयं पूर्वोक्तवचोविरोधादिति मदनरत्ने उक्तं।
षडशीतिमुखेतीते अतीते चोत्तरायणे। इत्यादिविरोधाच्च। तेन पूर्वैकवाक्यतयायमर्थः। रात्रौ पूर्वभागे मकरसंक्रमे
परेह्न्युदये पंचनाड्यः पुण्याः। रात्रावपरभागे कर्कसंक्रमे पूर्वदिनांते पंचनाड्य इति। एवं सर्वेषामविरोधः। मकरे सामा एमः
न्येन परदिने पुण्यत्वेपि पुण्यातिशयार्थमिदं। यत्तु देवयज्ञपार्श्वे। आसन्नसंक्रमं पुण्यं दिनार्धं स्नानदानयोः। रा
त्रौ संक्रमणे भानोर्विषुवत्ययने दिवेति। अत्र माधवः। अयने दिवाज्ञाते तदर्धं पुण्यं। कर्के पूर्वं मकरेंत्यं। एतन्मध्यंदि

नायनपरमितिहेमाद्रिःस्करात्रौविषुवत्यासन्नदिनार्द्धंपुण्यमनेत्वासन्नदिनंदिनं।दिनेइतिपाठेउभयत्रदिनार्द्धंपुण्य
मित्याह।एतदेवोक्तंदीपिकायां।अयनमधःपश्चान्निशीथाद्भवेत्।पश्चात्सन्नमहस्तदर्द्धमथवापुण्यमिति।तत्वंतु
आसन्नसंक्रममित्यस्यविषुवस्येवान्वयः।अयनेरात्रौसतिदिनेपुण्यंकस्मिन्नित्यपेक्षायांकर्केपूर्वेह्निमकरेपरेह्नी
तिवाक्यांतरवशात्अर्थेअन्यमानेनकोपिविरोधः।यत्त्वनंतभट्टः।पथ्यसंक्रमणंभानोर्निशीथात्प्राग्यदाभवेत्।अ
यनेविषुवंतत्रप्राग्दिनांतिमनाडिकाःपंचपुण्यतमाःपश्चान्निशीथाच्चेद्भवेत्तथा।आद्याःपरदिनस्यापितद्वदित्ये
षनिर्णयपरइति।अपरार्केप्येवं।अस्तंगतेयदासूर्येऽरुषंप्यातिदिवाकरः।प्रदोषेवार्द्धरात्रेवातदापुण्यंदिनद्वयमि
ति।बौधायनवचनात्दिनद्वयंपुण्यकालः।तदापुण्यंदिनांतरमितिमदनरत्नेपाठः।गुर्जरामाध्योदीच्यास्त्विद
मेवाद्रियंते।तिथितत्वादिगौडग्रंथास्तुप्रदोषार्द्धरात्रेभिन्नेरात्रेःपूर्वभागेपूर्वदिनेपरभागेचपरदिनेपुण्यंचान्य
संक्रांतिवत्।विशिष्यतयोर्निर्देशात्।प्रदोषश्च।प्रदोषोस्तमयाद्रूर्ध्वंघटिकाद्वयमिष्यते।इतिवत्सोक्तरत्याङ्गः॥
तन्न।अस्तंगतेइतित्रितयवैयर्थ्यापत्तेः।अतःप्रदोषपदेनतद्भिन्नैवरात्रिरुच्यते।अतएवपावन्नोदयतेरविरिति
वृद्धगार्ग्यादिभिर्दक्षिणायनेपूर्वरात्रौसंक्रमेपूर्वदिनमुक्तं।वत्सोरप्यध्ययनादिपरा।रहतुत्रिमुहूर्त्तंप्रदोषः।मकरेदा

न विशेषो हेमाद्रौ स्कांदे। धेनुं तिलमयीं दद्याद्द्विजन्यश्चोत्तरायणे। सर्वान्कामानवाप्नोति विंदते परमं पदं। विष्णुधर्मेपि। उत्तरे त्वयने विप्रा वस्त्रदानं महाफलं। तिलपूर्णमनड्वाहं दत्वा रोगैः प्रमुच्यते इति। शिवरहस्येपि। तस्यां कृष्णतिलैः स्नानं कार्यं चोद्वर्तनं शुभैः। तिला देयाश्च विप्रेभ्यः सर्वं दैवोत्तरायणे। तिलतैलेन दीपाश्च देयाः शिवगृहे शुभाः। कल्पतरौ कालिकापुराणे। होमं तिलैः प्रकुर्वीत सर्वं दैवोत्तरायणे। तान्यो देवाय विप्रेभ्यो हाटकेन समं ददेत। उत्तरायणमासाद्य नरः कस्माच्च शोचति। तथा। मकरे रात्रावपि श्राद्धादि भवतीत्युक्तं प्राक्। माघामायां योगविशेषोर्द्धोदयः प्रागेवोक्तः। माघकृष्णचतुर्दश्यां यमतर्पणमुक्तं हेमाद्रौ यमेन। अनर्काभ्युदिते काले माघकृष्णचतुर्दशी। स्नातः संतर्प्य तु यमं सर्वपापैः प्रमुच्यते इति। माघशुक्लचतुर्थी तिलचतुर्थी सा प्रदोषव्यापिनी ग्राह्या। माघशुक्लचतुर्थ्यां तु नक्तव्रतपरायणाः। ये त्वां ढुंढेर्चयिष्यंति तेर्च्याः स्युरसुरद्रुहां। इति काशीखंडोक्तेः। माघमासे चतुर्थ्यां तु तस्मिन्काल उपोषितः। अर्चयित्वा तु यो देवि जागरं तत्र कारयेत्। इति त्रिस्थलीसेतौ। लैंगाच्च। इयमेव कुंदचतुर्थी। सा प्रदोषव्यापिनी ग्राह्या।। माघशुक्लचतुर्थ्यां तु कुंदपुष्पैः सदाशिवं संपूज्य यो हि नक्ताशी स प्राप्नोति श्रियं नर इति कालादर्शे कौर्मोक्तेः। माघशुक्लपंचमी श्रीपंचमी। तदुक्तं हेमाद्रौ वाराहे। माघशुक्लचतुर्थ्यां तु वरमाराध्य च श्रियः पंचम्यां कुंदकुसुमैः पूजां कुर्यात्समृद्ध

एमः

योऽयं माघवमते पूर्वा। हे माद्रि मते परा। माघशुक्लसप्तमी रथसप्तमी। सारुणोदयव्यापिनी ग्राह्या स्तूर्यग्रहणा तुल्यातु
शुक्ला माघस्य सप्तमी॥ प्रयागे यदि लभ्येत कोटिसूर्यग्रहैः समेति वचनाच्चायस्तु दिवोदासीये। अचला सप्तमी दुर्गा शि
वरात्रिर्महाजरः। द्वादशी वत्सपूजायां सुखदा प्राग्युता सदेति। षष्ठीयुतत्वमुक्तं। तच्च पूर्वे। द्विघटिकाद्यं षष्ठी सप्तमी य
परेद्युःत्र यवशात् चारुणोदयात्पूर्वे समाप्यते तस्यां ज्ञेयं। तत्र षष्ठ्यां सप्तमी स्वयं प्रवेशयारुणोदये स्नानं कार्यं। मदन
रत्ने भविष्योत्तरे। माघे मासि सिते पक्षे सप्तमी कोटिभास्करा। कुर्यात्स्नानार्घदानाभ्यां मायुरारोग्यसंपदः। अत्र विधिर्हेमा
द्रौ भविष्ये। कृत्वा षष्ठ्यामेकभक्तं सप्तम्यां निश्चलं जलं। रात्र्यंते चालयेथा स्वर्णं दत्वा शिरसि दीपकं। तथा जलं पक्रम्य
नकेन चाल्यते यावत्तावत्स्नानं समाचरेत्। सौवर्णे राजते पात्रे भक्त्या लाबुमयेऽथवा। तैलेन वर्त्तिर्दातव्या महा
रजनरंजिता। महारजनं कुसुंभं। समाहितमना भूत्वा दत्वा शिरसि दीपकं। भास्करं हृदये ध्यात्वा इमं मंत्रमुदीरये
त्। नमस्ते रुद्ररूपाय रसानां पतये नमः। वरुणाय नमस्तेऽस्तु हरिवास नमोऽस्तु ते। जले परिहरेद्दीपं ध्यात्वा संत
र्प्य देवताः। चंदनेन लिखेत्पद्मं अष्टपत्रं सकर्णिकं। मध्ये शिवं सपत्नीकं प्रणवेन च संयुतं। पूर्वादिदलेषु रविभानु
विवस्वद्भास्करसवितृअर्कसहस्रकिरणसर्वात्मकान् संपूज्य गृहं गच्छेत्। इति। मंत्रश्च काशीखंडे। यद्यज्जन्मकृतं पापं

इति दिवोदासीये तु॥ इक्षुदंडेन जलं चालयित्वा सप्तार्कपत्राणि बदरीपत्राणि च शिरसि निधाय पूर्वोक्तैः
वक्ष्यमाणैश्च मंत्रैः स्नात्वा तिलपिष्टमया रूपे हेमसूर्यं संपूज्य विप्राय दद्या

१३३ मयाजन्मसुसप्तसु।तन्मेरोगंचशोकंचमाकरीहंतुसप्तमी।एतज्जन्मकृतंपापंयच्चजन्मांतरार्जितं।मनोवाक्कायजंयच्च
ज्ञाताज्ञातेचयेपुनः।इतिसप्तविधंपापंस्नानान्मेसप्तसप्तिके।सप्तव्याधिसमायुक्तंहरमाकरिसप्तमि।एतन्मंत्रत्रयंज
प्त्वास्नात्वापादोदकेनरः।केशवादित्यमालोक्यक्षणान्निःकलुषोभवेत्।।दिवोदासीयेमदनरत्नेचाप्यस्तुदंडेनजलं
चालयित्वासप्तार्कपत्राणिबदरीपत्राणिचशिरसिनिधायपूर्वोक्तैर्मंत्रैःस्नात्वादिलपिष्टमयापूपैर्हैमंसूर्यंसं
पूज्यविप्रायदद्यादित्युक्तं।अर्घमंत्रोमदनरत्ने।सप्तसप्तिवहप्रीतसप्तलोकप्रदीपन।।सप्तमीसहितोदेव
गृहाणार्घंदिवाकर।ततः।जननीसर्वलोकानांसप्तमीसप्तसप्तिके।सप्तव्याहृतिकेदेविनमस्तेसूर्यमंडले।सौ
रागमे।अर्कपत्रैःसहस्रैर्दूर्वाशतसचंदनैः।अष्टांगाविधिनाचार्घंदद्यादादित्यतुष्टये।अत्रदानविशेषोमद
नरत्नेभविष्ये।ताम्रपात्रेयथाशक्तिमृन्मयेवाथभक्तिमान्।स्थापयेत्तिलपिष्टंचसघृतंसगुडंतथा।काचनं
तालकंकृत्वाअशक्तस्तिलपिष्टजं।संछाद्यरक्तवस्त्रेणपुष्पैर्धूपैर्यथार्चयेत्।दानमंत्रस्तु।आदित्यस्यप्रसादेनप्रा
तःस्नानफलेनच।दुष्टदौर्भाग्यदुःखघ्नंमयादत्तंतुतालकी।तालकंकर्णाभरणंतुतत्रैवोक्तं।दीपपात्रमितिहेमाद्रौ एमः
तत्रैवभविष्योत्तरे।एवंविधंरथवरंरथ्यवाजियुक्तंहैमंचहेमशतदीधितिनागसमेतं।दद्याच्चमाघसितसप्तमिवासरेयः

ष्ठे॥ संगच्छकागतिरेवमहीमुनक्ति। इयं मन्वादिरपि। इयं च शुक्लपक्षस्थत्वात्पूर्वाह्णिकी ग्राह्या॥ यदा माघो मलमासे
भवति तदा मासद्वये मन्वादिश्राद्धं कुर्यात्। मन्वादिकं तैर्थिकं च कुर्यान्मासद्वयेपि चेति स्मृतिचंद्रिकोक्तेः॥ माघशु
क्लाष्टमी भीष्माष्टमी। तदुक्तं हेमाद्रौ पाद्मे। माघे मासि सिताष्टम्यां सतिलं भीष्मतर्पणं श्राद्धं च ये नराः कुर्युस्ते स्युः सं
ततिभागिन इति। भारतेपि। शुक्लाष्टम्यां तु माघस्य दद्याद्भीष्माय यो जलं॥ संवत्सरकृतं पापं तत्क्षणादेव नश्यती
ति। धवलनिबंधस्मृतिः। अष्टम्यां तु सिते पक्षे भीष्माय तु तिलोदकं॥ अन्नं चापि विधिवद्दद्युः सर्वे वर्णा द्विजातयः॥ सर्व
वर्णोक्तेर्द्विजातय इति संबोधनं। तर्पणमंत्रस्तत्रैव। भीष्मः शांतनवो वीरः सत्यवादी जितेंद्रियः। आभिरद्भिरवाप्नो
तु पुत्रपौत्रोचितां क्रियां। वैयाघ्रपद्यगोत्राय सांकृत्यप्रवराय च। अपुत्राय ददाम्येतज्जलं भीष्माय वर्मणे। वसूना
मवताराय शंतनोरात्मजाय च। अर्घ्यं ददामि भीष्माय आबालब्रह्मचारिणे। इति। एतच्च जीवत्पितृकस्यापि भव
ति। जीवत्पितापि कुर्वीत तर्पणं यमभीष्मयोरिति पाद्मोक्तेरिति। जीवत्पितृततर्पणे पितृचरणैरुक्तं। एतच्चाप
सव्येन कार्यमिति दिवोदासीये। अत्र श्राद्धं काम्यं। तर्पणं तु नित्यं। ब्राह्मणाद्याश्च ये वर्णा दद्युर्भीष्माय नो जलं।
संवत्सरकृतं तेषां पुण्यं नश्यति सत्तमेति मदनरत्ने वचनात्। माघशुक्लद्वादशी भीमद्वादशी। त्वयाकृतमिदं वी

त्तवनाम्नाभविष्यति। माघी मद्वादशीख्येषा सर्वपापहराशुभेति। हेमाद्रौ पाद्मवचनात्। एवं पूर्वेषु तासु युग्मवाक्यात्। मा
घीपूर्णिमापरैवेत्युक्तं प्राक्। तथा हेमाद्रौ ब्राह्मे। मघास्थयोश्च जीवेंद्वोर्महामाघीति कथ्यते। तत्रैव। ज्योतिषे। मेषपृष्ठे य
दा सौरिः सिंहे च गुरुचंद्रमाः। भास्करः श्रवणर्क्षे च महामाघीति सा स्मृता। तथा भविष्ये। वैशाखी कार्त्तिकी माघी ति
थयोतीव पावनाः। स्नानदानविहीनास्ता न नेयाः पांडुनंदन। तथा तिलपात्राणि देयानि कैश्चुकाः कंबलास्तथेति
। माघपूर्णिमानंतरमष्टमी माघी अष्टका। तन्निर्णयः पूर्वमुक्तः। तथा च तसृष्टकास्वशक्त्या विषमावश्यकी। हे
मंतशिशिरयोश्चतुर्णामपरपक्षाणामष्टमीष्वष्टका एकस्यां वेत्याश्वलायनोक्तेः। तथा माघाष्टकां प्रक्रम्य तामे
काष्टकेत्याचक्षते इत्यापस्तंबोक्तेः। इत्यादि प्रयोगपारिजाते ज्ञेयं। इति कमलाकरभट्टकृते निर्णयसिंधौ माघः स
माप्तः॥ फाल्गुनकृष्णाष्टम्यां विशेषः कल्पतरौ। फाल्गुनस्य च मासस्य कृष्णाष्टम्यां महीपते। इत्युपक्रम्य। जा
ता दाशरथेः पत्नी तस्मिन्नहनि जानकी। उपोषितो रघुपतिः समुद्रस्य तटे तदा। रामपत्नीं च संपूज्या सीता जनक
नंदिनीति। फाल्गुनकृष्णचतुर्दशी शिवरात्रिः। सा च केषुचिद्वचनेषु प्रदोषव्यापिनी ग्राह्येत्युक्तं। केषुचिन्निशीथ
व्यापिनी। तत्राद्या माधवीये वायवीये। त्रयोदश्यस्तगे सूर्ये चतसृष्वेव नाडिषु। भूतविद्धा तु या तत्र शिवरात्रिव्रतं चरे

कुंभे: पूर्णाः षोडश घटिकाः पुण्याः॥ शेषं प्राग्वत्॥ ×८

एमः

ता।स्मृत्यंतरेपि प्रदोषव्यापिनीग्राह्या।शिवरात्रिचतुर्द्दशी।रात्रौजागरणंयस्मात्तस्मात्तांसमुपोषयेत्।अत्रप्रदोषोरात्रिःउ
त्तरार्द्धेतस्यहेतुत्वोक्तेः।कामिकेपि।आदित्यास्तमयेकालेअस्तिचेद्याचतुर्द्दशी।तद्रात्रिःशिवरात्रिःस्यात्साभवेदु
त्तमोत्तमेति।द्वितीयापितत्रैव।नारदसंहितायां।अर्द्धरात्रयुतायत्रमाघकृष्णचतुर्द्दशी।शिवरात्रिव्रतंतत्रसोश्वमेधफ
लंलभेत्।स्मृत्यंतरेपि।भवेद्यत्रत्रयोदश्यांभूतव्याप्तामहानिशा।शिवरात्रिव्रतंतत्रकुर्याज्जागरणंतथेति।ई
शानसंहितायां।माघकृष्णचतुर्द्दश्यामादिदेवोमहानिशि।शिवलिंगतयोद्भूतःकोटिसूर्यसमप्रभः।तत्काल
व्यापिनीग्राह्या।शिवरात्रिव्रतेतिथिः।अर्द्धरात्रादधश्चोर्ध्वंयुक्तायत्रचतुर्द्दशी।तत्तिथावेवकुर्वीतशिवरात्रिव्रतंव्र
ती।।नार्द्धरात्रादधश्चोर्ध्वंयुक्तायत्रचतुर्द्दशी।तत्तिथ्यावेवकुर्वीतशिवरात्रिनैवतत्रव्रतंकुर्यादायुरैश्वर्यहानितः।
अर्द्धरात्रश्चद्वितीययामांत्यतृतीययामाद्यघटीद्वयरूपइतिमाधवः।वचनंतूक्तंप्राक्।एवंसतिपूर्वेद्युरेवोभययव्या
प्तोपूर्वैव।त्रयोदशीयदादेविदिनभुक्तिप्रमाणतः।जागरेशिवरात्रिःस्यान्निशिपूर्णाचतुर्द्दशीतिस्कांदोक्तेः।दिनमु
क्तिरस्तमयः।जयंतीशिवरात्रिश्चकार्येभद्राजयान्विते।इतिस्कांदाच्च।दिनद्वयेनिशीथव्याप्तौतुहेमाद्रिमतेपूर्वा
।अर्द्धरात्रात्पुरस्ताच्चेज्जयायोगोयदाभवेत्।पूर्वविद्धैवकर्तव्याशिवरात्रिःशिवप्रियैरितिपाद्मवचनात्।मदनरत्ने

१३५ ष्येवंगौडा अप्येवमाहुः॥ निर्णयामृते सर्वापि शिवरात्रिः प्रदोषव्यापिन्येव। अर्द्धरात्रवाक्यानि कैमुतिकन्यायेन प्रदोषस्ताव
कानीत्युक्तं। तन्न। अर्द्धरात्रस्य पूर्वकर्मकाललोक्तेः। परदिने प्रदोषनिशीथोभयव्याप्तिमत्वात्सैवेति तु माधवः। इदमेव
च युक्तं प्रतीमः। परेद्युः प्रागुक्तार्द्धरात्रस्यैकदेशव्याप्तौ पूर्वेद्युः संपूर्णतद्व्याप्तौ च सत्यां परेद्युः प्रदोषनिशीथोभययोगे पू
र्वोक्तसंपूर्णव्याप्तेः पूर्वैव। यथार्द्धरात्रे यस्यां तु लभ्यते सा चतुर्दशी। तस्यामेव व्रतं कार्यं मत्प्रसादार्थिभिर्नरैः। तदूर्ध्वा
धोन्विता भूता सा कार्या व्रतिभिस्सदेति। माधवमतेशानसंहितोक्तेः। पूर्वेद्युर्निशीथस्य परेद्युः प्रदोषस्येत्येकैक
व्याप्तौ तु पूर्वैव जयायोगस्य प्राशस्त्यात्। तच्चोक्तं नागरखंडे। माघफाल्गुनयोर्मध्ये असिता या चतुर्दशी। अ
नंगेन समायुक्ता कर्त्तव्या सा सदा तिथिरिति पाद्मेपि। अर्द्धरात्रात्पुरस्ताच्चेज्जयायोगो यदा भवेत्। पूर्वविद्धैव
कर्त्तव्या शिवरात्रिः शिवप्रियैरिति। स्कांदेपि। भवेद्यत्र त्रयोदश्यां भूतव्याप्ता महानिशा॥ शिवरात्रिव्रतं तत्र कु
र्यात् जागरणं तथेति। महतामपि पापानां दृष्ट्वा वै निःकृतिः परा। न दृष्टा कुर्वतां पुंसां कुडुयुक्तां तिथिं शिवामि
ति स्कांदे दर्शयोगस्य निंदितत्वाच्च। यदा चतुर्दशी पूर्वेद्युर्निशीथादूर्ध्वं प्रवृत्ता परेद्युश्च निशीथादर्वाक्पवस एम:
माप्ता तदा परेद्युरेकव्याप्तिसत्वात्। परैव। माघासिते भूतदिने हि राजन्नुपैति योगं यदि पंचदश्या। जयाप्रयु

क्रांतलङ्घ्यात्तु कुर्याछिवस्य रात्रिं प्रियकृछिवस्येति वचनात्। एवं दिनद्वये प्रदोषव्याप्त्यभावे निशीथव्याप्तिसत्वात्
पूर्वैव। तेन दिनद्वये निशीथव्याप्तौ प्रदोषव्याप्त्या निर्णयः। दिनद्वये प्रदोषव्याप्तौ निशीथेन निर्णयः। एकैकव्या
प्तौ निशीथेन निर्णयः॥ इति। इयं च रविभौमसोमवारेषु शिवयोगे चातिप्रशस्ता। हेमाद्रौ तीर्थखंडे लैंगे। फाल्गुन
स्य चतुर्दश्यां कृष्णपक्षे समाहिताः। कृत्तिवासेश्वरं लिंगमर्चयंति शिवं शुभे। ते यांति परमं स्थानं महाशिवम
नामयं। शिवरात्रिपारणे तु विरुद्धवाक्यानि दृश्यंते स्कांदे। कृष्णाष्टमी स्कंदषष्ठी शिवरात्रिश्चतुर्दशी। एताः पूर्व
युताः कार्यास्तिथ्यंते पारणं भवेदिति। जन्माष्टमी रोहिणी च शिवरात्रिस्तथैव च। पूर्वविद्धैव कर्तव्या तिथिभां
ते च पारणं॥ इति। तिथिमध्येपि पारणं स्कांदे उक्तं। उपोषणं चतुर्दश्यां चतुर्दश्यां तु पारणं। कृतैः सुकृतलक्षै
श्च लभ्यते वा न वाथवा॥ ब्रह्मांडोदरमध्ये तु यानि तीर्थानि संति वै॥ संस्नातानि भवंतीह भूतायां पारणे
कृते। तिथीनामेव सर्वासामुपवासव्रतादिषु। तिथ्यंते पारणं कुर्याद्विना शिवचतुर्दशीमिति। अत्र यामत्रयाद
र्वाक्चतुर्दशीसमाप्तौ तदंते पारणं तदूर्ध्वगामिन्यां तु प्रातः। तिथिमध्य एवेति हेमाद्रिमाधव चतुर्दशीसमाप्तौ त
दंते पारणं तदूर्ध्वगामिन्यां तु प्रातस्तिथिमध्य एवेति हेमाद्रिमाधवादयो व्यवस्थामाहुः। तन्न॥ तिथ्यंते तिथिभां

तेवापारणायत्र चोदितं। यामत्रयोर्ध्वगामिन्यां प्रातरेव हि पारणं। इत्यादि सामान्यवचनैरेव व्यवस्थासिद्धेरुभयविरुद्धवाक्यं वैय्यर्थ्यस्य दुःपरिहरत्वात्। वयं तु तिथ्यंते पारणं भवेदिति कृष्णाष्टम्यादिविषयमवननुईशिवरात्रिविषयं। तदुपादानं तु पूर्वीयुतत्वमात्रकथनार्थं। कथमन्यथा स्कांदे एवमून्यत्वहृदयवाक्यवत्तिथिमध्ये पारणाविधानं घटते। तस्माद्दिना शिवचतुर्दशीमिति पर्युदस्तां शिवरात्र्याः सर्वप्रकारेषु तिथिमध्य एव पारणेति ब्रूमः। शिष्टाचारोप्येवमेव। दीपिकायां तु रात्रावपि तिथ्यंते एवोक्तं। व्रततिथ्यंते निशीथे पि वाश्रीयादिति। मंदनरत्नकालादर्शयोः कृत्साद्यस्तमयपर्यंतव्यापिनी चेत्परेहनि। दिवैव पारणं कुर्यात्पारणेनैव दोषभाक्। इत्युक्तं। तत्र तिथिमध्ये पारणाविधानान्निषिद्धफलयोगाच्च तिथ्यंतानपेक्षणाद्दोषाप्रसक्तेश्चतुर्थपादासंगतेः। तेनेदं शिवरात्रिभिन्नव्रतपरं ज्ञेयं। इदं च व्रतं संयोगपृथक्त्वन्यायेन नित्यं काम्यं च। तथा च माधवीये स्कांदे। परात्परतरं नास्ति शिवरात्रिः परात्परं। न पूजयं काम्यं च तत्यात्ति भक्त्येशं रुद्रं त्रिभुवनेश्वरं। जंतुर्जन्मसहस्रेषु भ्रमते ते नात्र संशयः। इति अकरणे प्रत्यवायश्रुतेः। वर्षे वर्षे महादेवि यौं व नरो नारी पतिव्रता। शिवरात्रौ महादेवं नित्यं भक्त्या प्रपूजयेदिति। वीप्साश्रुतेः। अर्णवो यदि वास्यपेक्षीयते हिमवानपि। चलेत्स्थेते करात्रिचिह्नो निश्चलं हि व्रतमिति वचनाच्च नित्यता। ममभक्तस्तु यो देवि शिवरात्रिमुपोषकः।

एमृः

गणत्वमक्षयंदिव्यंमक्षयंशिवशासनं। सर्वान्भुक्त्वामहाभोगानततोमोक्षमवाप्नुयात्॥ इतिस्कांदात्। द्वादशाब्दिकमेतत्स्याच्चतुर्विंशाब्दिकंतुवेति। तत्रैवेशानसंहितावचनात्। काम्यता तत्रैव। शिवरात्रिव्रतंनामसर्वपापप्रणाशनं। आचंडालमनुष्याणांभुक्तिमुक्तिप्रदायकं। अत्रजागरोपवासपूजाःसमुदिताःव्रतंनतुप्रत्येकं। समुदितानांफलसंबंधात्। यत्तु। अथवाशिवरात्रिंचपूजाजागरणैर्नयेत्। तथा। अखंडितव्रतोयोहिशिवरात्रिमुपोषयेत्। सर्वान्कामानवाप्नोतिशिवेनसहमोदते। कश्चित्पुण्यविशेषेणव्रतहीनोपियःपुमान्। जागरंकुरुतेतत्रसरुद्रसमतांव्रजेत्। इत्यादिस्कांदंतदनुकल्पत्वादशक्तपरं। माघेतरप्रतिमासशिवरात्रिस्तुशिवरात्रिशब्दस्यमाघकृष्णचतुर्दश्यामेवरूढत्वात्। माघमासस्यशेषेयाप्रथमेफाल्गुनस्यच। कृष्णाचतुर्दशीसातुशिवरात्रिःप्रकीर्तितेतिहेमाद्रिवचनाच्च। नायंनिर्णयस्तत्ररात्रौयामचतुष्टयेपूजाविधानात् यस्मिन्दिनेविकारात्रिव्याप्तिःसाग्राह्या। साम्येतुपूर्वेतिहेमाद्रिरूचिवान्। वस्तुतस्तुप्रतिमासकृष्णचतुर्दश्यामपिसर्वकामप्रदंकृष्णचतुर्दश्यांशिवव्रतमित्युपक्रम्यचतुर्दश्यांहंकर्तव्यंशिवरात्रिव्रतंशुभमिति। हेमाद्रौकालोत्तरेशिवरात्रिशब्दप्रयोगात्कौंडपायनाग्निहोत्रेनित्याग्निहोत्रधर्माइवतद्धर्मप्राप्तिःस्यादेव। अतःप्रदोषनिशीथोभयव्याप्त्यैवनिर्णयःइतिवयंप्रतीमः। अस्या

रंभो हेमाद्रौ स्कांदे। आद्यो मार्गशिरे मासि द्वीपोत्सवदिनेपि वा। गृह्णीयान्माघमासे वा द्वादशीवमुपोषयेत्। एवं द्वादशव-
र्षे तु द्वादशीव्रतपोषनान्। वक्ष्येदिति शेषः। चतुर्दश वा विप्रानाचार्यं च वृत्वा कुंभोपरिन्यसेद्देवमुमयासहितं शिवं।
सौवर्णेप्यथवा रौप्ये वृषभे संस्थितं शुभे। इत्युक्तं। हैमीं मूर्तिं संपूज्य स्थिरं चरं वा लिंगं पंचामृत सहस्रशततदर्द्धा-
न्यतरकुंभैः संस्नाप्य संपूज्य जागरणं कृत्वा परेद्युस्तिलान्सहस्रं शतं वा हुत्वा विप्रेभ्यो वस्त्राणि द्वादश गाश्च द-
त्वाचार्याय धेनुं शय्यां च दत्वा विप्रान्भोजयेदिति मदनरत्ने उक्तं। माघामावास्या युगादिः। तदुक्तं। माघमा-
से त्वमावास्येति। अन्यत्राप्यते। तथान्योपि विशेषो विष्णुपुराणे। माघासिते पंचदशी कदाचिदुपैति योगं य-
दि वारुणेन। ऋक्षेण कालः स परः पितॄणां न ह्यल्पपुण्यैर्नृप लभ्यते साविति। वारुणं शतभिषा। इदं च कुंभादि-
त्ये ज्ञेयमिति हेमाद्रिः। भारते। काले धनिष्ठा यदि नाम तस्मिन्भवेत्तु भूपाल तदा पितृभ्यः दत्तं तिलान्नं प्रददाति तृ-
प्तिं वर्षायुतं तत्कुलजैर्मनुष्यैरिति। फाल्गुनी पूर्णिमा होलिका। सा सायाह्नव्यापिनी ग्राह्या। सायाह्ने होलिकां कु-
र्यात्पूर्वाह्णे क्रीडनं गवामिति वचनादिति निर्णयामृते उक्तं। ज्योतिर्निबंधे तु प्रतिपद्भूतभद्रासु यार्चिता होलि-
का दिवा। संवत्सरं च तद्राष्ट्रं पुरं दहति साद्भुतं। प्रदोषव्यापिनी ग्राह्या पौर्णिमा फाल्गुनी सदा। तस्यां भद्रामुखं

दित्यर्थः॥ तदुक्तं भिन्नविषयमिति तत्रैवोक्तं॥ अन्ये तु॥ तस्यां भद्रामुखं त्यक्त्वेति॥ प्रदोषव्यापिनी नस्याद्यदा पूर्वदिने त
दा॥ भद्रामुखं वर्ज्जयित्वा होलिकायाः प्रदीपनमिति नारदवचनात्॥ निशामुखे प्रपूज्येत होलिका सर्वदा बुधैः॥ न
दिवा पूजयेद्ढुंढां पूजिता दुःखदा भवेत्॥ इति दिवोदासीयवचनात्॥ यामत्रयोर्ध्वयुक्ता चेत्प्रतिपत्तु भवेत्तिथिः॥ भ
द्रामुखं परित्यज्य कार्या होला मनीषिभिरिति विद्याविनोदाभिधानाच्च॥ भद्रामुखं विहाय पूर्वदिने एव कार्येत्याहुः॥
भद्रामुखं तु॥ नाड्यस्तु पंच वदनं गलकस्तथैकेति॥ तन्मालोके ज्ञेयं॥ शिष्टाचारोप्येवमेव॥ अत्र चेच्चंद्रग्रहणं त
दा सतो वाकि निशि भद्रावर्ज्जं पौर्णमास्यां होलिकादीपनं॥ अथ परेह्नि ग्रस्तोदयस्तदा पूर्वदिने भद्रावर्जं रात्रिचतु
र्थे यामे विष्टिपुच्छे वा होला कार्या॥ ग्रस्तोत्तरं प्रतिपत्सत्वात् पूर्वं च दिवा होलानिषेधात् इति॥ दिवोदासचंद्रप
काशे॥ वस्तुतस्तु परदिने प्रदोषे पौर्णमासीसत्वे कर्मकालस्पर्शे चतुर्थयामादिगौणकालग्रहणे मानाभावा
त् भद्राभावाच्च ग्रहणकाल एव होला कार्या॥ न च॥ सर्वेषामेव वर्णानां सूतकं राहुदर्शने॥ स्नात्वा कर्माणि कुर्वीत
शृतमन्नं विवर्ज्जयेत्॥ इति निषेधात्॥ कथं सूतके होलिकेति वाच्यं॥ तस्योत्तरार्द्धशेषत्वात्॥ पूजामंत्रस्तु॥ असृ एभः
क्पाभयसंत्रस्तैः कृता त्वं होलि बालिशैः॥ अतस्त्वां पूजयिष्यामि भूते भूतिप्रदा भवेति॥ यत्तु वार्त्तिककारैर्होलाका

त्यक्त्वा पूज्या होला निशामुखे। इति नारदवचनात्। प्रदोषव्यापिनीत्युक्तं। हेमाद्रौ मदनरत्ने च। भविष्ये। अस्यां निशागमे पार्थ संरक्ष्याः शिशवो गृहे। गोमयेनोपलिप्ते च सचतुष्के गृहांगणे। इत्यादिना तत्रैव तद्विधानाच्च। तेनेयं पूर्वविद्धा। श्रावणी दुर्गनवमी दूर्वा चैव हुताशनी। पूर्वविद्धैव कर्तव्या शिवरात्रिर्बलेर्दिनमिति बृहद्यमब्रह्मवैवर्तोक्तेस्यां दिनद्वये प्रदोषव्याप्तौ परैव। पूर्वदिने भद्रासत्वात्तत्र च होलिकानिषेधात्। तदुक्तं निर्णयामृते मदनरत्ने च। पुराणसमुच्चये। भद्रायां दीपिता होला राष्ट्रभंगं करोति वै। नगरस्य च नैवेष्टा तस्मात्तां परिवर्जयेत्। तथा। भद्रायां द्वे न कर्तव्ये श्रावणी फाल्गुनी तथा। श्रावणी नृपतिं हंति ग्रामं दहति फाल्गुनी। तथा। दिनार्धात्परतो यस्मात्फाल्गुनी पौर्णिमा यदि। रात्रौ भद्रावसाने तु होलिकां दीप्यते तदेति। यदा तु पूर्वदिने चतुर्दशी प्रदोषव्यापिनी परदिने पूर्णिमासी ह्रासवशात्सायाह्नात्प्रागेव समाप्यते। तदा पूर्वदिने संपूर्णरात्रौ भद्रासत्वात्तत्र च तन्निषेधात् परेह्नि प्रतिपद्येव कुर्यात्। सार्धयामत्रयं वास्या द्वितीयदिवसे यदा। प्रतिपद्वर्धमाना तु तदा सा होलिका स्मृतेति भविष्यवचनादिति निर्णयामृतकारः। मदनरत्नेप्येवं। यत्तु पक्षे वह्निं परित्यजेत् इति भविष्ये च। उक्तो होलिकार्था वह्निं प्रातिपदं वर्जये

आद्याप्राप्तेत्युक्तं। तत्र हेमाद्र्याद्युदाहृतभविष्यवचनान्यसिद्धानिकत्वाच्चिंताज्ञेया। अत्रार्थेधिकरणावत्। कृताशनीम
लमासेन भवति। इयं मन्वादिरपि। सा तु पूर्वाह्णिकी ग्राह्या। मलमासे सति मन्वादिश्राद्धं मासद्वये कार्यमित्युक्तं प्राक्।
कृत्यचिंतामणौ ब्राह्मे। नरो दोलागतं दृष्ट्वा गोविंदं पुरुषोत्तमं। फाल्गुन्यां संयतो भूत्वा गोविंदस्य पुरं व्रजेत्। चैत्र
कृष्णप्रतिपदि वसंतोत्सवः। सा चौदयिकी ग्राह्या। प्रवृत्ते मधुमासे तु प्रतिपद्युदिते रवाविति भविष्योक्तेः। दिनद्व
येतथात्वे पूर्वा वत्सरादौ वसंतादौ बलिराज्यदिने तथा। पूर्वविद्धैव कर्तव्या प्रतिपत्सर्वदा बुधैरिति। वृद्धवसिष्ठ
वचनात्। अत्र विशेषो हेमाद्रौ भविष्ये। चैत्रे मासि महाबाहो पुण्ये तु प्रतिपद्दिने। यस्तत्र श्वपचं स्पृष्ट्वा स्नानं कु
र्यान्नरोत्तमः। न तस्य दुरितं किंचिन्नाधयो व्याधयो नृप। इति। तथा। प्रवृत्ते मधुमासे तु प्रतिपद्युदिते रवौ। कृत्वा चा
वश्यकर्माणि संतर्प्य पितृदेवताः। वंदयेद्धोलिकाभूमिं सर्वदुःखप्रशांतये। मंत्रस्तु। वंदितासि सुरेंद्रेण ब्रह्मणा
शंकरेण च। अतस्त्वं पाहि नो देवि भूते भूतिप्रदा भव। अत्र चूतकुसुमप्राशनमुक्तं तत्रैव। पुराणसमुच्चये। वृत्ते तुषा
रसमये सितपंचदश्यां प्रातर्वसंतसमये समुपस्थिते च। संप्राश्य चूतकुसुमं सह चंदनेन सत्यं हि पार्थ पुरुषोथस
मास्तु खी स्यात्। मंत्रस्तु। चूतमग्र्यं वसंतस्य माकंदकुसुमं तव। सचंदनं पिबाम्यद्य सर्वकामार्थसिद्धये। इति। चैत्र

मावास्यामन्वादिः। सा चापराह्णव्यापिनी ग्राह्या। कल्पपञ्चस्थलात्॥ इति फाल्गुनः॥ एवं निरूपितमिदं गहनं तु कालतत्त्वं वि
चार्यवचनैश्चनयैश्चसम्यक्। तद्दोषदृष्टिमपहाय विवेचनीयं विद्वद्भिरित्यर्थितं प्रणतोस्मि तेषु॥ मया सह्यासह्यापदि
हृग्रादितं मंदमतिना। किमेतच्छक्यं वा व्यवसितुमपि स्वल्पमतिना। तदेवं यत्किंचिद्गदितमिह विख्यातमहिमा प्र
तापोयं सर्वो विकसति तु पित्रोश्चरणयोः॥२॥ यो भाहृतत्र गहनार्णवकर्णधारः शास्त्रांतरेषु निखिलेषु च मर्मभे
त्ता॥ योत्रश्रमः किल कृतः कमलाकरेण प्रीतौ सुनास्तमस्तकृता बुधरामकृष्णः॥३॥ इति श्रीमन्नारायणभट्टसूरिसू
नुरामकृष्णभट्टसुतकमलाकरकृते निर्णयसिंधौ संवत्सरकृत्यं नाम द्वितीयः परिच्छेदः॥ अथ प्रकीर्णकनिर्णयः॥
श्रीरामकृष्णतनयः कमलाकरसंज्ञितः। निरूप्यातिथिकृत्यं तु प्रकीर्णं वक्तुमुद्यतः। तत्रादौ संस्कारेषु गर्भाधानं।
तत्र प्रथमरजोदर्शने दुष्टमासतिथिनक्षत्रग्रहणसंक्रमादिफलं तत्र शांत्यादि च पितृकृतभट्टकृतप्रयोगरत्ने
ज्ञेयं। किंचित्तूच्यते। मदनरत्ने नारदः। अमारिक्ताष्टमी षष्ठी द्वादशी प्रतिपत्तथा। परिघस्य तु पूर्वार्द्धं व्यतीपाते
च वैधृते। संध्यासूपप्लवे विष्टामशुभं प्रथमार्तवं। रोगी पतिव्रता दुःखी पुत्रिणी भोगभागिनी। पतिव्रता क्लेशभा एमः
गी सूर्यवारादिषु क्रमात्। वैधव्यं सुतलाभश्च मैत्रशत्रुविवर्द्धने। मित्रलाभः शत्रुवृद्धिः कुलर्द्धिर्विभुमाशनं मरणं वै

शत्रुवृद्धिश्च निराहाराः कुलक्षयः। तेजश्च सुतनाशश्च कुलहानिस्त्रिधिका मता॥ गर्गः॥ सुभगा चैव बहुः शीलावंध्या पुत्रस
मन्विता॥ धर्मयुक्ता व्रतघ्नी च रूपा संतानमोदिनी॥ सुपुत्रा चैव बहुः पुत्रा पितृवेश्मरता सदा॥ दीना प्रज्ञावती चैव
पुत्राद्या चित्रकारिणी॥ साध्वी पतिप्रिया नित्यं सुपुत्रा कष्टचारिणी॥ स्वकर्मनिरता हिंस्रा पुण्यपुत्रादिसंयुता॥ नित्यं
धनचयासक्ता पुत्रधान्यसमन्विता॥ सर्वाचाराप्रपुण्यवती दस्रात्तादिः क्रमात्फलं॥ नारदः॥ कुलीरवृषचापांत्यनृ
युक्कन्यातुलाघटैः॥ राशयः शुभदा ज्ञेया॥ नारीणां प्रथमार्त्तवे॥ गर्गः॥ सुभगा श्वेतवस्त्रा स्याद्दृढवस्त्रा पतिव्रता॥ क्षौ
मवस्त्रा क्षितीशा स्यान्नववस्त्रा सुखान्विता॥ दुर्भगा जीर्णवस्त्रा स्याद्रोगिणी रक्तवाससा॥ नीलांबरधरा नारी
पुष्पिता विधवा ततः॥ वस्त्रे सुर्विषमा रक्तबिंदवः पुत्रमाप्नुयात्। समाश्चेत्कन्यका चेति फलं स्यात्प्रथमार्त्तवे॥ अत्रस्त्रि
संगवर्जनमाह वसिष्ठः॥ प्रभूतदोषे यदि दृश्यते तत्पुष्पं तदा शांतिककर्म कार्यं॥ विवर्जयेद्देवतदैकशय्यां याव
द्विजो दर्शनमुत्तमेह्नि॥ ज्योतिर्निबंधे वसिष्ठः॥ आद्यर्तौ पौषशुक्रोर्ज्जमधुशुचिनभस्याश्वयुक्चापवारा रिक्ताप
र्वाष्टषष्ठ्यः पितृपरसदमे रात्रिसंध्यापराह्णे॥ मिश्रोग्रा याम्यमूलतीक्ष्णां विवर्मनरुणाल्पाधिका स्वेचराष्ट्रीत्यात॥
पापस्थलग्नेन सत्कुणाजारान्नीलरक्तांबरं च॥ आद्यर्तौ दुर्भगा नारी विष्कुंभे चेद्रजस्वला॥ वध्या चैवातिगंजे च शू

स्तरये।तीर्थसलिलैः प्रतिकुंभं पृथक् पृथक्।

१५० लेशूलवतीभवेत्।गंडेतुपुंश्चलीनारीव्याघातेचात्मघातिनी।वज्रेचस्वैरिणीप्रोक्तापातेचपतिघातिनी।परिघेमृतवंध्या
चवैधृतौपतिमारिणी॥शेषाःशुभावहायोगायथानामफलप्रदाः।शांतिमाहप्रयोगपारिजातेशौनकः।सात्रैवानां
तुनारीणांशांतिंवक्ष्याम्यहंशौनकः।पंचमेह्निचतुर्थेवाग्रहातिथ्यपुरःसरां।द्रोणप्रमाणधान्येनव्रीहिराशिथित्रयंभवे
त्।कुंभंचपंन्यसेद्राशौतंतुवस्त्रादिवेष्टितं।सूक्तेनाप्यनवर्चेनप्रस्तवआपइत्यथ॥स्तिंचायाःप्रवतस्तद्वद्गायत्र्यायत के
तःक्रमात्।मध्यकुंभेक्षिपेद्रान्यमौषधानिचहेमच।उदुंबरःकुशादूर्वाराजीवंवटबिल्वकाः।विष्णुक्रांताचतुलसीब
र्हिषंशंखपुष्पिका॥शतावर्यश्वगंधाचनिर्गुंडीसर्षपद्वयं।अपामार्गःपलाशश्चपनसोजीवकस्तथा।प्रियंगवश्चगो
धूमाव्रीहयोम्लच्छएवचा।ह्रीरंदधिचसर्पिश्चपद्मपत्रंतथोत्पलं।कुरंटकत्रयंगुंजावचाभद्रकमुस्तकाः।द्वात्रिंशदौ
षधानीह्यथासंभवमाहरेत्।मृत्तिकाश्चौषधादीनितन्मंत्रेण।क्षिपेत्क्रमात्।कुंभोपरिन्यसेत्पात्रंकांस्यंमृद्वेणुताम्र
जंभुवनेश्वरींन्यसेत्तत्रइंद्राणींयपुरंदरं।जपेद्गायत्रीमाहोमाच्छ्रीसूक्तंचजपेत्ततः।स्पृशन्वैदक्षिणंकुंभमृत्विगेकोज
पेदथ।चत्वारिरुद्रसूक्तानिचतुर्मंत्रोत्तराणिच।तंस्पृशन्नुत्तरंकुंभंश्रीरुद्रंरुद्रसंख्यया।शन्नइंद्राग्निसूक्तंचतत्रैवंसं एम:
स्पृशन्नजपेत्।कुंभस्यपश्चिमेदेशेशांतिहोमंसमाचरेत्।दूर्वाभिस्तिलगोधूमैःपायसेनघृतेनचा।तिस्राभिश्चैवहु[illegible]

रैकैकाज्याहुतिर्भवेत। अष्टोत्तरसहस्रं वा शतमष्टोत्तरं तु वा॥ गायत्र्यैव तु होतव्यं हविरत्र चतुष्टयी ततः स्विष्टकृतं हुत्वा समु
द्रादूर्मिंसृक्ततः संततामाज्यधारां तां पूर्णाहुतिमथाचरेत। अथाभिषेकं कुर्वीत प्रतिकुंभस्थितोदकैः। आपोहिष्ठेति न
वभिः सूक्तेन च ततः परं इंद्रोऽग्निं ग ऋचेनैव पावमानैः क्रमेण तु। उभयं श्रावयेच्चन स्वाहितं। विशण एकया। त्र्यंबकेन
मंत्रेण जातवेदस एकया॥ समुद्रज्येष्ठा इत्यादि त्रापंतां च त्रिभिः क्रमात। इमा आपश्च ऋचेनैव देवस्य त्वेति मंत्रतः।
मंत्रेणाथ तमीशानं त्वमग्ने रुद्र इत्यथ। तमुष्टुहीति मंत्रेण भुवनस्य पितरं तथा। या ते रुद्रेति मंत्रेण शिवसंकल्पमंत्रतः
रुद्रं चैत्वा वृषभं पंचमंत्रैश्चैवाभिषेचयेत। धेनुं पयस्विनीं दद्यादाचार्याय च भूषणैः। सदक्षिणामनड्वाहं प्रदद्यादुद्गापिने।
महाशांतिं प्रजप्याथ ब्राह्मणान्भोजयेत्ततः। इति। नारदः। तत्र शांतिप्रकुर्वत घृतदूर्वातिलाक्षतैः। प्रत्येकाष्टशतं चैव
वाणापत्न्या जुहुयात्ततः। स्वर्णं गां भूतिलान्दद्यात्सर्वदोषापनुत्तये। प्रकारांतरं मदनरत्ने ज्ञेयं। विस्तरान्नोच्यते। ग्र
हणे रजोदर्शने तु जा। तकर्मप्रसवा। पेशांतिं वक्ष्यामः। प्रथमर्तौ पुष्पवत्या विधिविशेषः स्मृतिचंद्रिकायां। प्रथमर्तौ
तु पुष्पिण्याः पतिपुत्रान्विता स्त्रियः। अक्षतैरासनं कृत्वा तस्मिंस्तामुपवेशयेत्। हरिद्रागंधपुष्पादीन्दद्युस्तां बू
लकं स्रजं॥ दीपेन राजनं कुर्यात्सदीपे वासयेद्गृहे। लवणं फलमुद्गादि दद्यात्ताभ्यः स्वशक्तितः। इति। द्वितीयाद्यलषु

१४१ तन्नियममाह। प्रयोगपारिजाते दक्षः। अंजनाभ्यंजने स्नानं प्रवासं दंतधावनं॥ न कुर्यात्सार्तवा नारी ग्रहाणामीक्षणं तथा।
अत्रिरपि वर्जयेन्मधु मांसं च पात्रे खर्वे च भोजनं। गंधमाल्यं दिवास्वापं तांबूलं चास्यशोधनं। दग्धे शरावे भुंजीत पेयं वांजलि
नापि वेत्। मदनरत्ने हारीतः। रजःप्राप्ता चेदधःशयीत भूमौ कांस्यायसे पात्रे मृन्मये वाऽश्नीयात्। विष्णुधर्मोत्तरे। आहा
रं गोरसानां च पुष्पालंकारधारणं। अंजनं कंकतं गंधान् पीठशय्याधिरोहणं। अग्निसंस्पर्शनं चैव वर्ज्जयेद्दिनत्रयं। त
था प्रथमर्त्तौ पूर्वं स्त्रीगमनं न कार्यं। प्राग्रजोदर्शनात्पत्नीं नेयाद्गत्वा पतत्यधः। व्यर्थीकारेण शुक्रस्य ब्रह्महत्यामवा
प्नुयात्। इति। तत्रैव चाश्वलायनोक्तेः। तत्र स्त्रीगमनमाह याज्ञवल्क्यः। षोडशर्त्तुर्निशा स्त्रीणां तस्मिन्युग्मासु संविशेत्।
इति। अन्यताप्याह गौतमः। ऋतावुपेयात्सर्वत्र वा प्रतिषिद्धवर्ज्जमिति। मनुः। ऋतुः स्वाभाविकः स्त्रीणां रात्रयः षोडश
स्मृताः। तासामाद्याश्चतस्रस्तु निंदितैकादशी तु या। त्रयोदशी च शेषाः स्युः प्रशस्ता दश रात्रयः। मदनरत्ने देव
लः। तस्मात्त्रिरात्रं चांडालीपुष्पितां परिवर्ज्जयेत्। तत्र तिथ्यादीनाह श्रीधरः। षष्ठ्यष्टमी पंचदशी चतुर्थी च चतुर्द्दशी म
प्युभयत्र हित्वा॥ शेषाः शुभाः स्युस्तिथयो निषेके वाराः शशांकार्यसितेंदुजानां। उभयत्र पक्षद्वये। आर्यो गुरुः। असितः एमः
शुक्रः। इंदुजो बुधः। विष्णुप्रजेशारविमित्रसमीरपौष्णमूलोत्तरावरुणभानि निषेककार्ये। पूज्यानि पुष्यवसुशीत

धर्नं मुरुं।पें पं

कणाश्विचित्रादित्याश्च मध्यमफला विफलाः स्युरन्ये॥ विस्वादिदैवत्यनक्षत्राणि॥ रत्नमालायां॥ मेशाद्दस्त्रयमाग्निधातृशशिनः शर्वोदितिर्वाक्पतिः कद्रूजाः पितरो भगोर्यमरवीत्वष्टाङ्क्योमारुतः। शक्राग्नी त्वथ मित्र इंद्र निर्ऋतिस्तोयं पंच विश्वे विधिर्गोविंदो वसवोंबुपाजचरणाहिर्बुध्न्यमूषाभिधाः॥ अत्र एशब्देनोत्तरात्रयं॥ अत्र मूलस्याद्यत्यचलमुक्तं। याज्ञवल्क्येन तु। एवं गच्छन् स्त्रियं क्षामां मघां मूलं च वर्ज्जयेदित्युक्तं। तेनात्र विकल्पः। अत्र समासु पुत्रा विषमासु कन्येति ज्ञेयं। युग्मासु पुत्रा जायंते स्त्रियोऽयुग्मासु रात्रिषु॥ इति हेमाद्रौ शंखोक्तेः॥ तत्राप्युत्तरोत्तरा प्रशस्ता॥ तदाहापस्तंबः॥ तत्रैव व्यासः॥ रात्र्यां चतुर्थ्यां पुत्रः स्यादल्पायुर्द्धनवर्ज्जितः। पंचम्यां पुत्रिणी नारी षष्ठ्यां पुत्रस्तु मध्यमः॥ सप्तम्यामप्रजा योषिदष्टम्यामीश्वरः पुमान्॥ नवम्यां सुभगा नारी दशम्यां प्रवरः सुतः॥ एकादश्यामधर्म्या स्त्री द्वादश्यां पुरुषोत्तमः। त्रयोदश्यां सुता पापा वर्णसंकरकारिणी॥ धर्मज्ञश्च कृतज्ञश्च आत्मवेदी दृढव्रतः। प्रजायते वै चतुर्दश्यां पंचदश्यां पतिव्रता॥ आश्रयः सर्वभूतानां षोडश्यां जायते पुमानिति। अत्र चतुर्थदिननिषेधेपि। स्नातां चतुर्थे दिवसे रात्रौ गच्छेद्विचक्षणः॥ इति महाभारतोक्तेश्चतुर्थेहनि स्नाता यां युग्मासु वा गर्भं संदधातीति हारीतोक्तेर्विकल्पो ज्ञेयः। तत्रापि। स्नाने रजस्वला या स्याच्चतुर्थेहनि शस्यते॥ गम्यानिष्टः

प्रभासखंडे मरीचिः॥ ऋतुस्नाता चतुर्थेऽह्नि स्नानेन स्त्री रजस्वला॥ दैवे कर्मणि पित्र्ये च पंचमेऽहनि शुध्यति
भौतकर्मणि शुध्येत रजस्वला चेत् तत्र चतुर्थेऽहनि [illegible]॥ अथ यदा [illegible] श्रेणी स्याद्द्वये [illegible] आपस्तंबः
चतुर्थे [illegible] स्नाता [illegible] इति [illegible] एवं [illegible]

त्रेरजस्विनाभिवृत्तेकर्थ्यंचनेत्यापस्तंबोक्तेर्व्यवस्थाज्ञेया। अत्रसर्वास्तुयुग्मासुगमनमावश्यकंयुग्मास्वितिबहुवचननिर्दे
शात्इतिविज्ञानेश्वरः। तच्चैकस्यांरात्रौसकृदेवकार्यं। सुस्थइंदौसकृत्सुत्रलक्षण्यंजनयेत्पुमान्इतियाज्ञवल्क्योक्तेः
इदंचस्त्रीगमनमन्यकालेप्रतिबंधादिनागमनासंभवेश्राद्धैकादश्यादावपिकार्यं। ब्रह्मचार्येवपर्वण्याद्याश्चत
स्रश्चवर्ज्जयेत्इतियाज्ञवल्क्योक्तेः। व्याख्यातंचेदंमिताक्षरायां। यत्रश्राद्धेब्रह्मचर्यंविहितंतत्रापिऋतौगच्छेतोन
ब्रह्मचर्यस्खलनदोषइति। पर्वाणीतिबहुत्वेनाष्टमीचतुर्दश्योर्ग्रहणमिति। चा। मदनरत्नेप्येवं। यत्तुहेमाद्रौशिव
रहस्ये। द्विजजन्मदिनेचैवनकुर्यान्मैथुनंव्रती। श्राद्धंदत्वाचभुक्त्वाचषष्ठेपोषनचपर्वस्विति। तदनृतुविषयं। ब्रह्म
चार्यंवभवतियत्रतत्राश्रमेवसन्नितिमनूक्तेः। दर्शादौतुनभवत्येव। पर्वणांपर्युदस्तत्वात्। माधवीयेतुऋतुकाले
नियुक्तौयोनैवगच्छेत्स्त्रियंकश्चित। तत्रगच्छन्समाप्नोतिह्यनिष्टफलमेवतुइतिवृद्धमनूक्तेः। श्राद्धेब्रह्मचर्यंनियत
मित्युक्तं। पृथ्वीचंद्रोदयेप्येवं। एतत्सतिसंभवेज्ञेयं। अनेकभार्यस्यर्तुयौगपद्येहेमाद्रौकश्यपः। यौगपद्येतुतीर्थानां
विवाहक्रमशोव्रजेत्। रक्षणार्थमपुत्रांवाग्रहणाक्रमशोपिवेतिग्रहणास्थलग्रहणे। सन्निधाने। विष्णुर्योनिंजपेत्सू
क्तेऽयोनिंस्पृष्ट्वात्रिभिर्व्रती॥ गर्भाधानंततःकुर्यात्तत्पुत्रोजायतेध्रुवं। अगमनेदोषमाहपराशरः। ऋतुस्नातांतु

शुध्यति [illegible]
आपस्तंबे [illegible]
[illegible]
दृश्यः

एमः

योभार्यांसन्निधौनोपगच्छति। घोरायांभ्रूणहत्यायांपुज्यतेनात्रसंशयः॥ अस्यापवादमाह मदनरत्नेव्यासः व्याधि-
तोबंधनस्थोवाप्रवासेष्वप्यपर्वसु॥ ऋतुकालेपिनारीणांभ्रूणहत्याप्रमुच्यते। वृद्धांवंध्यामसद्वृत्तांमृतापत्यामपु-
ष्पिणीं॥ कन्यांचबहुपुत्रांचवर्जयन्मुच्यतेभयात्। वृद्धांमातरजस्कां। गर्भाधानांगहोमाकरणेप्रायश्चित्तमाहपा-
रिजाते आश्वलायनः। गर्भाधानाद्याकरणात्तस्यांजातस्तुदुष्यति। अकृत्वागांद्विजेदत्वाकुर्यात्पुंसवनंपतिः॥
गर्भाधानंचमलमासशुक्रास्तादावपिकार्यं। उत्सवेषुचसर्वेषुसीमंतस्तुजन्मसु। सुएतद्रेऽन्ययोज्ञेवमोद्युदो-
षोनविद्यते। इतिनिबंधेभृगूक्तेः ऋतौगमतेपरणः स्नातौतुगर्भशं। किंवास्नानंमैथुनिनःस्मृतं। अनृतौतुयदा
गच्छेच्छौचंमूत्रपुरीषवत्। स्त्रीणांतुनस्नानं। उभावप्यशुचीतावद्यावच्छयनसंगतौ। शयनादुत्थितानारी
शुचिःस्यादशुचिःपुमान्। इतिवृद्धशातातपोक्तेः। अथयत्किंचिद्विशेषउच्यते। तत्ररात्रौरजसिजननादौच
रात्रिंकृत्वात्रिभागंआद्यभागद्वयेचेत्पूर्वदिनंग्राह्यं। परतस्तूत्तरमितिमिताक्षरायां। यत्तुप्रागर्धरात्रात्प्रा-
ग्वासूर्योदयात्पूर्वदिनमित्युक्तं। तत्रदेशाचारात्व्यवस्थातथासप्तदशदिनपर्यंतंपुनारजोदृष्टौस्नानमात्रंअ-
ष्टादशदिनेएकरात्रं। ऊनविंशेद्व्यहः। विंशतिप्रभृतित्रिरात्रमिति। ततएवज्ञेयं। यत्तुचतुर्दशाहिनादर्वाकअ

शुचित्वं न विद्यते। इति तत्र स्नानप्रभृति त्वमाभिप्रेतं। एतच्च यस्या विंशतिदिनोत्तरं प्रायशो रजस्तत्रैव पक्ष्यात्त्वर्वाक्प्राय
शो रजस्तत्रोक्तं स्मृत्यर्थसारे। त्रयोदशदिनादूर्ध्वं प्रायो रजोवतीनामेकादशदिनात्प्राक् त्वशुचित्वं नास्ति। एकादश
दिने एकरात्रं द्वादशे द्विरात्रं ऊर्ध्वं त्रिरात्रमिति। प्रयोगपारिजातेप्येवं। रोगे तु तत्रैव विशेषः। संग्रहे। रोगेण यद्रजः
स्त्रीणां मन्वहं हि प्रवर्त्तते। नाशुचिस्तु भवेत्तेन यस्माद्वैकारिकं मतमिति। कर्माधिकारस्तु रजोनिवृत्तावेव। स्ना
ध्वाचारेण तावत्स्यात्स्नातापि स्त्री रजस्वला यावत्प्रवर्त्तमानं हि रजो नैव निवर्त्तते। तत्रापि स्वकाले शुचिर्वेत्या
हं। रोगजे वर्त्तमानेपि काले तिर्याति कालजा। तस्मात्काले प्रमाणं स्यादन्यथा संकरो भवेत्। तथा रजस्वलापार
जस्वलां तस्य स्पर्शे। कामतः स्नानं कामत उपवासः पंचगव्याशनं च। असवर्णानां तु ब्राह्मण्याः क्षत्रियादिस्पर्शे
क्रमेणाकृच्छ्रार्द्धपादोनकृच्छ्रातिकृच्छ्राः। क्षत्रियादीनां तु कृच्छ्रपाद एव। क्षत्रियादीनां हीनवर्णास्पर्शे त्रिरात्रमु
पवासः। वैश्याशूद्रयोः पूर्ववत्स्पर्शे अहोरात्रं द्विरात्रं च। एतच्च कामतः। अकामतस्तु प्राक्शुद्धेरनशनं। अकामत
श्चंडालादिस्पर्शेप्यनशनमेव प्राक्शुद्धेः। कामतस्तु प्रथमेह्नि त्र्यहः द्वितीये द्व्यहः तृतीय एकाहः। श्वस्पर्शे द्व्यह
एकाहो वा। भुंजानायाश्चंडाल्यादिस्पर्शे षड्रात्रं। उच्छिष्टयोस्तु स्पर्शे तु कृच्छ्रः स्यादिति मिताक्षरायां। स्मृत्यर्थसारे तु

ऋस्य रोगः

[illegible]

राम:

ग

सर्वत्रबालापत्यायाःस्पर्शेस्नानेकृतेशुद्धिः॥पश्चादनशनमप्यस्यास्त्र्यहमिति॥स्नानविधिंचाहपराशरः॥स्नानेनैमित्तिके
प्राप्तेनारीयदिरजस्वला॥पात्रांतरिततोयेनस्नानंकृत्वाव्रतंचरेत्॥सिक्तगात्राभवेदद्भिःसांगोपांगाकथंचन॥न
वस्त्रपीडनंकुर्यान्नान्यद्वासश्चधारयेत्॥अथरजस्वलास्नानं॥देवेज्यवह्नभः॥शह्नानुराधाश्विनसोमभेषुहस्तानि
लाखंडलवासवेषु॥विश्वार्यमज्योत्तरभाद्रभेषुवरांगनास्नानविधिःप्रशस्तः॥रोगेतूशनाः॥ज्वराभिभूतायानारीरजसा
चपरिप्लुता॥कथंतस्याभवेच्छौचंशुद्धिःस्यात्केनकर्मणा॥चतुर्थेह्निसंप्राप्तेस्पृशेदन्यातुतांस्त्रियं॥सासचैलाव
गाह्यापःस्नात्वास्नात्वास्पृशेत्पुनः॥दशद्वादशकृत्वोवाआचामेच्चपुनः॥अंतेचवाससांत्यागस्ततःशुद्धाभवेत्तुसे
ति॥इदंचातुरमात्रेज्ञेयं॥आतुरेस्नानउत्पन्नेदशकृत्वोस्यतौनातुरः॥इतिपराशरोक्तेः॥रजसोऽज्ञानेतुपराशरमा
धवीयेप्रजापतिः॥अविज्ञातेमलेस्नाचमलवद्दहनायदि॥कृतंगृहेषुदुष्टंस्याच्छुद्धिस्तस्यास्त्रिरात्रतः॥देवजानी
ये॥कारिकायां॥उच्छिष्टातुद्विजातीनांरजःस्त्रीयदिपश्यति॥उपवासमधोच्छिष्टेऊर्ध्वोच्छिष्टेत्र्यहेक्षिपेत्॥अथपुंस
वनंप्रयोगपारिजातेजातूकर्ण्यः॥द्वितीयेतृतीयेवामासिपुंसवनंभवेत्॥व्यक्तेगर्भेभवेत्कार्यंसीमंतेनसहाथवा॥
बृहस्पतिः॥तृतीयेमासिकर्तव्यंगृष्टेरन्यत्रशोभनं॥गृष्टेश्चतुर्थेमासेषष्ठेमास्यथवाष्टमे॥सकृत्प्रसूतागृष्टिः॥ए

तेनप्रतिगार्भमपिभवतीतिज्ञायते। बह्वृचकारिकापि। कर्त्तास्याद्देवरस्तस्या यस्याः पत्युरसंभवः। आवर्त्तेतद्दंकर्मप्रति
गर्भमिति। स्मृतिः।। ब्राह्मे। गर्भाधानादिसंस्कर्त्ता पिता श्रेष्ठतमः स्मृतः। अभावे स्वकुलीनः स्या[illegible]साक्रिया।। अत्रक
ले—प्रत्ययस्य स्मृते र्निषिद्धकालस्यैवापवादो न तु जीवत्पितृगर्भिणीपत्न्याशौचादिनिमित्तस्य प्रतिहोत्रेयावज्जी
वत्कालपरत्वाभावात्। निमित्तसंयोगस्य कालसंयोगाद्दैदेनापवादाभावादन्यथाशौचे निमित्तेपि गयायात्रा
श्राद्धं च स्यात्। अत्र तु निमित्ताशौचस्यापवादे यथाशौचेपि महालयादेः। यथावाजीवत्पितृकस्य मातृगयान्वष्ट
कादौ तदेव भवति नान्यदिति संक्षेपः। प्रयोगपारिजाते कश्यपः। गर्भिणी कुंजराश्वादिशैलहर्म्यादिरो
हणं। व्यायामं शीघ्रगमनं शकटारोहणं त्यजेत्। शोकं रक्तविमोक्षं च साध्वसं कुक्कुटासनं।। व्यवसायं दिवा
स्वापं रात्रौ जागरणं त्यजेत्। मदनरत्ने स्कांदे। हरिद्रां कुंकुमं चैव सिंदूरं कज्जलं तथा।। कूर्पास द्धाथ वेणान्यगो
त्रज्ञः। मदनरत्ने मत्स्यव्रतः। स्मृतौ देशांतरगतो भर्त्ता स्त्रीपुघसंस्कृता देवरो वा गुरुर्वा। पितृव्यो वापि समाचरेत्। हेमा
द्रौ यमः। प्रथमे मासि द्वितीये वा यदा पुंनक्षत्रेण चंद्रमा युक्तः स्यादिति वराहः। हस्तो मूलं श्रवणा पुनर्वसु मृग
शिरस्तथा पुष्यः। पुंसंज्ञकेषु कार्येषु एतानि शुभानि धिष्ण्यानि। अनुराधापि पुन्नक्षत्रं। अनुराधं हविषा वर्द्धयंत इति

एग्नः

ऋतेः। गर्गोपि। पुन्नामश्रवणः पुष्यो हस्तश्चैव पुनर्वसुः। अभिजित्प्रोष्ठपाच्चैव अनुराधा तथाश्विका। नृसिंहः। रि
क्तांपरवर्जनवमीत्यक्त्वा पुंसवने शुभाः। ज्योतिर्निबंधे वसिष्ठः। मलमृग्शिरोरेत्तनहाग्निरिंह्रोष्ठतप्रजापुंसवनेबुधस्य।
काकी च वंध्या भवतीह शुक्रे स्त्रीपुत्रलाभौ रविभौमजीवैः। अनवलोभनस्याप्ययमेव कालः। दीपिकायां। चतु
र्थेनवलोभनमित्युक्तं॥ अथ सीमंतः। हेमाद्रौ वैजवापः। अथ सीमंतोन्नयनं चतुर्थे पंचमे षष्ठे वेति वसिष्ठः।
पंचमेष्टमे मासि षष्ठे वाथ चतुर्थके। हेमाद्रौ शंखः। गर्भस्पंदनं सीमंतोन्नयनं यावद्वा न प्रसवः। कार्ष्णाजि
निः। गर्भलंभनमारभ्य यावन्न प्रसवस्तथा॥ सीमंतोन्नयनं कुर्याछंखस्य वचनं यथा॥ मासश्चात्र सौरः। सा
वनो वा। कालविधाने॥ सीमंते हस्ततिष्यादितिहरिशशभृत्पौष्णमूलविधुत्तराख्याः पक्षच्छिद्रे च रिक्तां पतितिथि
मपहायाप्यपराः स्युः प्रशस्ताः। चादित्तिः पुनर्वसुः। पक्षछिद्रं चाह वसिष्ठः। चतुर्दशी च तथ च अष्टमी नवमी त
था। षष्ठी च द्वादशी चैव पक्षछिद्राह्वयाः स्मृताः। क्रमादेतासु तिथिषु वर्ज्या नीयाश्च नाडिकाः। भूता५ष्ट८मनु१४
तत्वा२५ क९ दश१० शेषास्तु शोभनाः। कालनिर्णये। शुभसंस्थे निशानाथे चतुर्थं च चतुर्दशी॥ पौर्णमासी प्रशंसं
ति केचित्सीमंतकर्मणि। बृहस्पतिः। पूर्वपक्षः शुभः प्रोक्तः कृष्णश्चांत्यत्रिकं विना। चतुर्दशी चतुर्थ च शुक्लपक्षे

१४५ शुभप्रदे। नारदः॥ विप्रक्षत्रिययोः कुर्याद्धि वा सीमंतकर्म तत्। वैश्यशूद्रयोरेतद्द्विवा निश्ययि केचन। वाराः पूर्वोक्ता एव वा एत
च सकृदेव कार्यमिति विज्ञानेश्वरः॥ सकृच्च संस्कृता नारी सर्वगर्भेषु संस्कृतेति देवलोक्तेः॥ एतच्च सकृत्प्रतिगर्भे वा कार्यमि
ति हेमाद्रिः॥ सकृच्च कृतसंस्काराः सीमंतेन द्विजस्त्रियः॥ यंयं गर्भं प्रसूयेत स सर्वः संस्कृतो भवेत्। इति हारीतोक्तेः॥ सीमं
तोन्नयनकर्म न स्त्रीसंस्कार इष्यते। केचिद्गर्भस्य संस्कारात्प्रतिगर्भे प्रयुंजते। इति हेमाद्रौ विष्णुवचनाच्च। स एव। स्त्री
यद्यकृतसीमंता प्रसवेत्तु कथंचन। गृहीतपुत्रा विधिवत्पुनः संस्कारमर्हति। सीमंतभोजने प्रायश्चित्तमुक्तं परा
शरमाधवीये बौधायनेन। ब्रह्मौदने च सोमे च सीमंतोन्नयने तथा। जातकर्म नवश्राद्धे भुक्त्वा चांद्रायणं चरेत्। कुर्वि
धाने तु। आपद्वे जपेन्मंत्रं शतवारं न संशयः। सीमंते च पदभुक्ते मुच्यते किल्बिषात्तदेति। अथ गर्भिणीतत्पति
धर्माः। वराहः। सामिषमशनं यत्नात्प्रमदा परिवर्जयेत्। ततः प्रभृति गृह्यकारिकायां। अंगारभस्मास्थिकपा
लचुल्लीशूर्पादिके षूपविशेन्न नारी॥ सोलूखलाद्ये दृषदादिके वा पंज्ञेतु भाघेन तथोपविष्टा। नौ मार्जनीं गोम
यपिंडकादौ कुर्यान्न वारिण्यवगाहनं सा। अंगारभूत्या नखैर्न लिखेन्न मांकालिं वपुर्भंगमघोन कुर्यात्। नोमु
क्तकेशी विवशाथ वा स्यात् दुःखेन संध्यावसरे न शेते। नामंगलं वाक्यमुदीरयेत्ता शून्यालयं वृक्षतलेन यायात्॥

नो
एभः

विष्णुधर्मोत्तरे। कटुतीक्ष्णकषायाणि अत्युष्णलवणानि च। आयासं च व्यवायं च गर्भिणी परिवर्ज्जयेत्। हेमा
द्रौ कौशिन्यः। मुंडनं पिंडदानं च प्रेतकर्म च सर्वशः। न जीवत्पितृकः कुर्याद्गुर्विणीपतिरेव च। उदन्वतोंभसि स्नानं
नखकेशादिकर्त्तनं। अंतर्वत्न्याः पतिः कुर्वन्नप्रजा जायते ध्रुवं। पृथ्वीचंद्रोदये गारुडे। गयायां पिंडदानस्य न
कदाचिन्निर्णयक्रिया।। अत्र काले दा— प्रत्ययस्य स्मृतेर्निषिद्धकालस्यैवापवादो न तु जीवत्पितृगर्भिणीपत्या
शौचादिनिमित्तस्याग्निहोत्रे यावज्जीववत्कालपरत्वाभावात्। निमित्तसंयोगस्य कालसंयोगाद्भेदेनापवा
ग दाभावादन्यथाशौचेतिसिद्धे पि गयायात्राश्राद्धं च स्यात्। यत्र तु निमित्तेशौचस्यापवादोन्यथाशौचेऽग्निहोत्रादेः। म संयोग
ध्यावाज्जीवत्पितृकस्य मातृगयान्वष्टकादौ तदेव भवति नान्यदिति संक्षेपः। प्रयोगपारिजाते कश्यपः। गर्भिणी कुं
जराश्वादिशैलहर्म्यादिरोहणं। व्यायामं शीघ्रगमनं शकटारोहणं त्यजेत्। शोकं रक्तविमोक्षं च साध्वसं कुक्कु
टासनं। व्यवसायं दिवास्वापं रात्रौ जागरणं त्यजेत्। मदनरत्नेस्कांदे। हारिद्रां कुंकुमं चैव सिंदूरं कज्जलं तथा।।
कूर्पासकं च तांबूलं मंगल्याभरणं शुभं।। केशसंस्कारकबरीकरकर्णविभूषणं।। भर्त्तुरायुष्यमिच्छंती दूषयेद्ग
र्भिणी न हि। बृहस्पतिः चतुर्थे मासि षष्ठे वाप्यष्टमे गर्भिणी यदा।। यात्रा नित्यं विवर्ज्या स्यादाषाढे तु विशेषतः। या

ज्ञवल्क्यः॥दोहदस्याप्रदानेनगर्भोदोषमवाप्नुयात्।वैरूप्यंमरणंवापितस्मात्कार्यंप्रियास्त्रियाः॥दोहदंगर्भिणीप्रियंतत्रैवाश्वलायनः।वपनेमैथुनंतीर्थंवर्जयेद्गर्भिणीपतिः॥श्राद्धंचसप्तमान्मासादूर्ध्वंचान्यत्रवेदवित्।श्राद्धंतज्ज्ञोजन्मनीतिप्रयोगपारिजातः॥कालविधानेमुहूर्तदीपिकायांच॥क्षौरंशवानुगमनंनखकृंतनंचयुद्धादिवास्तुकरणंत्वतिदूरयानं॥उद्वाहमौपनयनंजलधेश्चगाहमायुःक्षयार्थमितिगर्भिणिकापतीनां॥रत्नसंग्रहेगालवः।दहनंवपनंचैवचौलंचगिरिरोहणं।नावआरोहणंचैववर्जयेद्गर्भिणीपतिः॥प्रव्यक्तगर्भापतिरब्धियानंमृतस्यवाहंक्षुरकर्मसंगं।तस्यानुयत्नेनायादितीर्थयागादिकंवात्तविधिंनकुर्यात्।प्रव्यक्तगर्भावनिताभवेन्मासत्रयात्परं।षण्मासात्परतःसूतिर्नवमेरिष्टवासिनी॥अथसूतिगृहप्रवेशः॥गार्ग्यः।रोहिण्यैंद्रवपौष्णेषुस्वातीवारुणयोरपि।पुनर्वसौपुष्यहस्तधनिष्ठाच्युतेष्वसुच॥मैत्रेत्वाष्ट्रेतथाश्विन्यांसूतिकागारवेशनं॥एतच्चसंभवे।प्रसूतिसंभवेकालेसद्यएवप्रवेशयेत्।इतिवासिष्ठोक्तेः।तच्चनैर्ऋत्यांकार्यं।वारुण्यांभोजनगृहंनैर्ऋत्यांसूतिकागृहमितिवसिष्ठोक्तेः।विष्णुधर्मोत्तरे।दशाहंसूतिकागारमायुधैश्चविशेषतः।वह्निनातिंदुकालातैःपूर्णकुंभैःप्रदीपकैः।मुशलेनतथावारिवर्णकैश्चित्रितेनच॥अथजातकर्म।पारिजातेवसिष्ठः।श्रुत्वाजातंपितापुत्रंसचैलंस्नानमाचरेत्।मनुः।प्राङ्नाभिवर्धनात्पुंसोजात

एभः

कर्म विधीयते। वर्द्धनं छेदनं। हेमाद्रौ बैजवापः। जन्मनोनंतरं कार्यं जातकर्म यथाविधि। दैवादतीतकालं चेदतीते सूतके भ
वेत्। पृथ्वीचंद्रोदये विष्णुधर्मो। अछिन्ननाभिकर्तव्यं श्राद्धं वै पुत्रजन्मनि। पुत्रपदे न कन्यापि गृह्यते। तथाह तत्रैव कार्ष्णा
जिनिः। प्रादुर्भवे पुत्रपुत्र्योर्ग्रहणे चंद्रसूर्ययोः। स्नात्वानंतरमात्मीयान् पितॄन् श्राद्धेन तर्पयेत्। एतच्च रात्रावपि कार्यं सु
त्रजन्मनि यात्रायां शर्वर्यां दत्तमक्षय्यमिति तत्रैव व्यासोक्तेः। बैजवापः। जातमात्रकुमारस्य जातकर्म विधीयते। स्तन
प्राशनतः पूर्वं नाभिकर्त्तनतोऽपि वा। एतेनानैमित्तिकमपीदं जातेष्विदं दाशौचांते कार्यमिति शंकापास्ता। जाते कुमारे
पितॄणामामोदात्पुण्यं तदहरिति हारीतोक्तेश्च। अत्र श्राद्धमामेन हेम्ना वा कार्यमिति उक्तं पृथ्वीचंद्रोदये। आ
दित्यपुराणे। जातश्राद्धे न दद्यात्तु पक्वान्नं ब्राह्मणेष्वपीति। हेमादित्स्का। पुत्रजन्मनि कुर्वीत श्राद्धं हेम्नैव बुद्धिमान्। न
पक्वेन न चामेन कल्याणान्यभिकामयन्। इति संवर्तोक्तेर्हेम्नैवेत्याहुः। एतच्च जननाशौचे मरणाशौचे च कार्यमित्याह
मिताक्षरायां प्रजापतिः। आशौचे तु समुत्पन्ने पुत्रजन्म यदा भवेत्। कर्तुस्तात्कालिकी शुद्धिः पूर्वाशौचेन शुध्यति। के
चित्तु मृताशौचस्य मध्ये तु पुत्रजन्म यदा भवेत्। आशौचापगमे कार्यं जातकर्म यथाविधीति स्मृतिसंग्रहोक्तेराशौ
चांते कार्यमित्याहुः। स्मृत्यर्थसारे विकल्प उक्तः। मृदुध्रुवचराक्षिप्रभेष्वेषामुदयेपि च॥ गुरौ शुक्रेऽथवा केन्द्रे जातकर्म च

१४७ नामचान्यद्वाद्विलक्षणमाह श्रीधरः रोहिणीपुत्रभं छिद्रं गिरिशमूलेंद्रोरगाहारुणं क्षिप्रं चाश्विनेशपुष्यमनलेंद्राग्नीतु सा
धारणं॥ उग्रं पूर्वमघांतकं मृदुगातित्वाष्ट्रं त्र्यमैत्रं चरं विष्णुस्वातिशतोडुवस्वादितयः कुर्युः स्वसंज्ञाफलं॥ अत्र सर्वत्र जा
तनामकर्मादावुक्तकालातिक्रमे नक्षत्रादिकं ज्ञेयं। देशकालोपघाताद्यैः कालापक्रमणं यदि। अनस्ते ज्येंदुसिते तत्का
र्ये चोत्तरायणे शुभे इति मदनरत्ने नारदोक्तेः। बृहस्पतिरपि। मुख्यकाले विघ्ने न विधिः प्रमादतः। नक्षत्रतिथिलग्नानां वि
चार्यैव पुनः पुनः॥ सूतके संध्ययोर्विशेषं वक्ष्यामः। अथ जन्मनि दुष्टकालाः॥ तत्र गंडांतः। ज्योतिर्निबंधे नारदः। पूर्णानं
दाख्ययोस्तिथ्योः संधिनाडीद्वयं तथा॥ गंडांतं मृत्युदं जन्मयात्रोद्वाहव्रतादिषु॥ कुलीरसिंहयोः कीटचापयोर्मीनमेष
योः॥ गंडांतमंतरालं स्याद्घटिकार्धं मृतिप्रदं। सार्पेंद्रपौष्णभेष्वंत्यषोडशांशो भसंधयः। तदग्रभेष्वाद्यपादा भानां गंडांत
संज्ञकाः। रत्नमालायां। पौष्णाश्विन्योः सार्पपित्र्यर्क्षयोश्च यच्च ज्येष्ठामूलयोरंतरालं। तद्गंडांतं स्याच्चतुर्नाडिकं हि या
त्राजन्मोद्वाहकाले ष्वनिष्टं॥ रत्नसंग्रहे नवनीतादिष्टे। सर्वेषां गंडजातानां परित्यागो विधीयते। वर्जयेद्दर्शनं श्चावंतज्ञ
षाण्मासिकं भवेत्॥ तिथ्यृक्षगंडे पितृमातृनाशो लग्ने तु संधौ तनयस्य नाशः। सर्वेषु नो जीवति हंति बंधून्न जीवन्पुनः स्या
द्बहुवारणाश्वः॥ अथैषां दानं॥ उत्तरगार्ग्ये। तिथिगंडे त्वनड्वाहं नक्षत्रे धेनुरुच्यते। कांचनं लग्नगंडे तु गंडदोषो विनश्यति। उ

गमः

त्नरेतिलपात्रंस्यांत्सुष्येगोदानमुच्यते। अन्नप्रदानं त्वाष्ट्रे स्यात्पूर्वाषाढे च कांचनं। उत्तरा तिष्य चित्रासु पूर्वाषाढोद्भव
स्य च। कुर्याच्छांतिं प्रयत्नेन नक्षत्राकाराजीबुधः। अथाश्लेषाफले॥ मूर्द्धास्यनेत्रगलकांसयुगं च बाहू हृज्जानुगुह्यपदमि
त्यहि देहभागाः। बाणाद्रिनेत्रकुहुतभुक्कृतिनागरुद्रषं[illegible]द पंच शिरसः क्रमशः स्तनाद्याः। एज्ज्येपितृस्त्रयोमातृ
नाशः कामक्रियारतिः। पितृभक्तो बली स्वघ्नस्त्यागी भोगी धनी क्रमात। ज्येष्ठाफलमुक्तं ब्रह्मयामले। ज्येष्ठादौ ज
ननी माता द्वितीये जननी पिता। तृतीये जननी भ्राता स्वयं माता चतुर्थके। आत्मानं पंचमे हंति षष्ठे गोत्रक्षयो भ
वेत। सप्तमे चोभयकुलं ज्येष्ठभ्रातरमष्टमे। नवमे श्वशुरं हंति सर्वं हंति दशांशके॥ इति॥ अथ मूलफलं॥ तद्वचः अ
भुक्तमूलसंभवं परित्यजेच्च बालकं समाष्टकं पिताथवा न तन्मुखं विलोकयेत॥ तदाद्यपादके पिता विपद्यते जन
न्यथ। तृतीयके धनक्षयश्चतुर्थकः शुभावहः। प्रतीपमेत्य पादतः फलं तदेव सा[illegible]पभे। अभुक्तमूलं त्वाह वसि
ष्ठः। ज्येष्ठांते घटिका चैका मूलादौ घटिकाद्वयं। अभुक्तमूलमित्याहुर्जातं तत्र विवर्जयेत॥ केचिज्ज्येष्ठांत्यमूला
द्यं च अभुक्तमूलमाहुः। कश्यपसंहितायां त्वन्यथोक्तं। मूलाद्यपादजो हंति पितरं तु द्वितीयकः। मातरं स्वां तृतीयोर्थो
न्सुहृदं तु तुरीयजः। फलं तदेव सार्पर्क्षे प्रतीपं तस्य पादतः। अथ मूलवृक्षः। जयार्णवे। मूलं स्तंभस्त्वचा शाखा पत्रं पु

ति

१४८ ष्यं फलं शिखा॥ वेदाश्च मुनयश्चैव दिशश्च वसवस्तथा॥ नंदा बाणाग्नयः सा रुद्रा मूलभागाः प्रकीर्तिताः॥ मूले मूलविनाशाय स्तंभे हा
नि र्धनक्षयः॥ त्वचि भ्रातृविनाशाय शाखा मातृविनाशकृत्॥ पत्रे सपरिवारः स्यात् पुष्पेषु नृपवल्लभः॥ फलेषु लभते राज्यं शिखा
यामल्पजीवितं॥ अन्यत्र त्वन्यथोक्तं॥ मूले सप्तघटीषु मूलहननं स्तंभे ष सु सौख्यक्षयं त्वग्द्विर्बंधुविनाशनं च विटपे रुद्रे हृते ती
मातुलः॥ पत्रे वैकैः सुकृती तु बाणा कुसुमे मंत्री फले सागरैः राजा वह्निशिखाल्पमायुरिति तन्मूलांघ्रिपे स्यात्फलं॥ भू
पालवल्लभः॥ वृषालिसिंहेषु घटेषु मूलं दिवि स्थितं युग्मतुलांगनांत्ये॥ पातालगं मेषधेनुकुलीरनक्रेषु मर्त्ये वसति संस्मरे
त्॥ स्वर्गेऽभ्रे मूले भवेद्राज्यं पाताले च धनागमं॥ मर्त्यलोके यदा मूलं तदा शून्यं समादिशेत्॥ वसिष्ठः॥ नैर्ऋत्यभोद्भूतसुतः सु
ता वाऽपि पादवश्यं श्वशुरं निहंति॥ तदंत्यपादेजनितो निहंति तस्योक्रमेणाहिभवे कलत्रं॥ सुरेशताराजनिता धवाग्रजं
द्विदैवताराजनिता तु देवरं॥ पुरंदरार्द्धे जनितः सुतस्तथा स्वस्याग्रजं हंति न पुत्रिका यदि॥ प्रयोगपारिजाते॥ मूलजा श्व
श्वशुरं हंति व्यालजा च तदंगनां॥ माहेंद्रजाग्रजं हंति देवरं तु द्विदैवजा॥ नृसिंहप्रासादे॥ धवाग्रजं हंति सुरेंद्रजाता तथैव प
त्न्या भगिनीं द्विमांश्च॥ द्विदैवजा देवरमाशु हन्यात् ज्ञार्यानुजामाश्वनिहंति स्वसुः॥ पत्यग्रजामघोत्थैग्रजं वा हंति त्वेष्ट्रजः पुमा एमः
न्॥ तथा भार्या स्वसारं वा श्यालकं वा द्विदैवजः॥ कन्यका देवरं हंति विशाखांत्यसमुद्भवा॥ आद्यपादत्रये नैव आद्यभे तु

पुमान्भवेत्।नहन्याद्देवरंकन्यातुला।मिश्रऋद्धिर्दैवज्ञा।।तद्धस्तांत्योद्भवावर्ज्यादुष्टावृश्चिकपुच्छवत्।चित्राद्यार्द्धपुष्यपादे
चमध्येपूर्वाषाढाधिष्ण्यपादेतृतीये।जातःपुत्रश्चोत्तराद्येविधत्तेमातापित्रोश्चतिरंबालनाशं।द्विमासंचोत्तराशेषपुष्ये
चैवत्रिमासिकः।पूर्वाषाढाष्टमेमासिचित्राषाण्मासिकंफलं।नवमासंतथाश्लेषामूलेचाष्टकवर्षकं।ज्येष्ठापंचद
शेमासिपुत्रदर्शनवर्ज्जिता।।वसिष्ठः।व्यतीपातेंगहानिःस्यात्परिघेमृत्युमादिशेत्।वैधृतौपितृहानिःस्यान्नषेंदा
वंधतांव्रजेत्।मूलेसमूलनाशःस्यात्कुलनाशोक्रतौभवेत्।वैधृतौपितृहानिःस्यान्नषेंदावंधतांव्रजेत्।मूलेसमू
लनाशःस्यात्कुलनाशोक्रतौभवेत्।विकृतांगेचहीनेचसंध्ययोरुभयोरपि।पर्वण्यपिप्रसूतौचसर्वारिष्टभयप्रदः।
तद्वत्सदंतजातश्चपादजातस्तथैवच।।तस्माच्छांतिंप्रकुर्वीतग्रहाणांक्रूरचेतसां।।गर्गः।।कृष्णांचतुर्द्दशींषोढा
कुर्यादादौशुभंस्मृतं।द्वितीयेपितरंहंतितृतीयेहंतिमातरं।चतुर्थेमातुलंहंतिपंचमेवंशनाशनं।षष्ठेतुधन
नाशःस्यादात्मनोवंशनाशनं।देवकीर्त्तिः।यद्येकस्मिन्नधिष्ण्येजायंतेदुहितरोथवापुत्राः।पितुरंतकरास्येतेयद्य
परेप्रीतिरतुलास्यात्।गर्गः।एकस्मिन्नेवनक्षत्रेभ्रात्रोर्वापितृपुत्रयोः।प्रसूतिश्चतयोर्मृत्युर्भवेदेकस्यनिश्चितं।शौ
नकः।ग्रहणेचंद्रसूर्यस्यप्रसूतिर्यदिजायते।व्याधिपीडातदास्त्रीणांमादौतुसुतदर्शनात्।स्वच्छंसंजायतेयस्यतस्य

मृत्युर्न संशयः ॥ शांतिस्तत्रतिहृक्षाधिपते रूपं स्ववर्णेन प्रकल्पयेत्। सूर्यग्रहे सूर्यरूपं हैमं चंद्रं तु राजतं। राहुरूपं प्रकुव
र्तनागेनैवं विचक्षणः ॥ नागः सीसं त्रयाणां चैव रूपाप्यां स्थापनं तत्र कारयेत्। आकृष्णेनाप्यायस्व स्वभानो ॥ इति पूजा
मंत्रः ॥ नक्षत्र देवतायास्तन्मंत्रेण। संपूज्य तु यजेत्सूर्यं समिद्भिश्चार्कसंभवैः ॥ चंद्रग्रहे तु पालाशैर्दूर्वाभी राहुमेव च ॥
समिद्भिर्ब्रह्मवृक्षस्य भेशाय तु कुर्याद्बुधः ॥ आज्येन चरुणा चैव तिलैश्च जुहुयात्ततः ॥ पंचगव्यैः पंचरत्नैः पंचत्वकं च
पल्लवैः जलैरौषधिफलैश्च अभिषेकं समारभेत्। मंत्रैर्वारुणैः संभूतैरापोहिष्ठादिभिर्हविभिः ॥ इमंमेगंगे परत्न स्तत्वा
यामीति मंत्रकैः ॥ यजमानस्ततो दद्याद्द्रत्वया प्रतिकृतित्रयं। मात्स्ये च अकालप्रसवा नार्यः कालातीतप्रजास्तथा ॥
विकृतप्रसवाश्चैव युग्मप्रसवकास्तथा। अमानुषा अमुंडाश्च अजातव्यंजनास्तथा ॥ हीनांग्या अधिकांग्या जायं
ते यदि वा स्त्रियः ॥ पशवः पक्षिणश्चैव तथैव च सरीसृपाः ॥ विनाशं तस्य देशस्य कुलस्य च विनिर्दिशेत् ॥ निर्वासये
त्तान्नगरात्ततः शांतिं समाचरेत् ॥ पाद्मे ॥ उपरि प्रथमं यस्य जायंते च शिशोर्द्विजाः ॥ दंतैर्वा सह यस्य स्याज्जन्म भार्गवस
त्तम ॥ द्वितीये च तृतीये चतुर्थे पंचमे तथा ॥ यदा दंताश्च जायंते मासे चैव महद्भयं ॥ मातरं पितरं चाथ खादेदात्मानमे एमः
व च ॥ अथोर्ध्वदंतजननशांतिः ॥ गजपृष्ठगतं बालं नौस्थं वा स्थापयेद्द्विजा तदभावे तु धर्मज्ञ कांचने तद्वणेसने ॥ सर्वौष

धैःसर्वगंधैर्बजैः।पुष्पैःफलैस्तथा॥पंचगव्येनरत्नैश्चमृत्तिकाभिश्चभार्गव॥स्नापयेद्दिव्यन्वयः।स्थालीपाकेनधातारंपू
जयेत्तदनंतरं।सम्राहचात्रकर्त्तव्यंतथाब्राह्मणभोजनं।अष्टमेहनिभद्रासनोपरिबालंनिवेश्य।भद्रासनेनिवेश्येनं
मृद्भिर्मूलैःफलैस्तथा।सर्वौषधैःसर्वगंधैःसर्वबीजैस्तथैवच।स्नापयेत्पूजयेच्चात्रवह्निंसोमंसमीरणं।पर्वतांश्चतथा
ख्यातानदेवदेवंचकेशवं।एतेषामेवजनुक्रयाहुतमयोयथाविधि।अष्टमेहनिविप्राणांतथादेयात्रदक्षिणा।कांचनं
रजतंगाश्चभुवंवाधनमेवच।दंतानामष्टमेमासिषष्टेमासिततःपुनः।दंतायस्यचजायंतेमातावाम्रियतेपिता।बा
लकोम्रियतेतत्रस्वयमेवनसंशयः।दधिक्षौद्रघृताक्तानामश्वत्थसमिधांततः।जुहुयादष्टशतंसमंत्रेणतुमंत्रवि धो
त्।धेनुंचदक्षिणांदद्यात्ततःसंपद्यतेसुखं।ज्योतिर्निबंधेतुअष्टमः।शुभदःस्मृतः।अष्टमादिषुदंतोत्थानंशुभावहमि
त्यतद्गुणसंविज्ञानबहुव्रीहिणावानवमासादिग्रहणं।ब्रह्मयामले।प्रथमंदंतनिर्मुक्तिरूर्ध्वंबालस्यचेद्भवेत्।क्ले
शायमातुलस्येहतदाप्रोक्तामहर्षिभिः।सौवर्णेराजतेवापिताम्रेकांस्यमयेपिवा।दध्योदनेनसंपूर्णेपात्रेदद्याच्छिशोः
करे।समंत्रंभाजनंदत्त्वासपश्येन्मातुलःशिशुं॥तालेकांस्यवद्द्वंचशिशुमालिंग्यसादरं॥तत्रमंत्रः।रक्षमांभागिनेय
त्वंरक्षमेसकलंकुलं।गृहीत्वाभाजनंसान्नंप्रसन्नोभवमेसदा॥निर्विघ्नंकुरुकल्याणंनिर्विघ्नंचस्वमातरंमध्यात्मा

१५० नमधिष्ठाप्याचिरंजीवभयासहेति।। ततोभिनंदयेद्दिघान्भगिनीं भगिनीपतिं। होमंकुर्यात्तिलाज्येन ब्राह्मणानपि पूजये
ताइल्पर्धदेतज्जननशांतिः। एवंकृते विधानेतु विघ्नःकोपिनजायते। अथत्रिकशांतिः। शांतिसर्वत्रेः सुतत्रये सुता
चेत्स्यात्त्रत्रयेवा सुतोयदि। मातापित्रोःकुलस्यापितदाकष्टंमहद्भवेत्। ज्येष्ठनाशोधनेहानिर्दुःखंवासुमहद्भवेत्।। त
त्रशांतिंप्रकुर्वत विन्नशाठ्यविवर्जितः। जातस्यैकादशाहेवाद्वादशाहे सुभेदिने। आचार्यमृत्विजोवृत्वाग्रहयज्ञपुरः
सरं। ब्रह्मविष्णुमहेशेंद्रप्रतिमाः स्वर्णतःकृताः। पूजयेद्धान्यराशिस्थाः कलशोपरिशाक्रिताः। पंचमे कलशे रुद्रं पूजये
द्रुद्रसंख्यया। रुद्रसूक्तानि चत्वारि शांतिसूक्तानि सर्वशः। आचार्योजुयात्तत्र समिदाज्यतिलांश्चरुं। अष्टोत्तरस
हस्रंवाशतंवाविंशतंतथा। देवताभ्यस्तुवर्कादिभ्योग्रहपुरःसरं। ब्रह्मादिमंत्रैरिंद्रस्य यतइंद्रभयामहे। ततः
स्विष्टकृतंहुत्वाबलिंपूर्णाहुतिंततः। अभिषेकं कुटुंबस्य कृत्वाचार्यं प्रपूजयेत्। हिरण्यंधेनुरेकाचवस्त्रत्विजांदक्षि
णाततः। आज्यस्यवीक्षणंकृत्वाशांतिपाठंतुकारयेदिति। ब्राह्मणान्भोजयेच्छक्त्यादीनानाथांश्चतर्पयेत्। कृत्वैवं
विधिनाशांतिंसर्वारिष्टाद्विमुच्यते। इतिगर्गसंहितोक्तात्रिकशांतिः। अन्येषुमूलादिऋक्षेषु शांत्यादिप्रयोगपारिजाते एमः
ज्ञेयं। मिताक्षरायांमार्कंडेयः। रक्षणीयातथाषष्ठीनिशातात्र विशेषतः। रात्रौजागरणंकार्यंजन्मदानांतथैवच। पुरु

शौनकोक्तं दत्तकाद्यादिपुत्रसंग्रहसूत्रं ८

घाः शस्त्रहस्ताश्च नृत्यगीतैश्च योषितः ॥ रात्रौ जागरणं कार्यं दशम्यां चैव सूतके ॥ व्यासः ॥ सूतिकावासनिलया जन्मदा ना
म देवताः ॥ तासां यागनिमित्तं तु शुद्धिर्जन्मनि कीर्तिता ॥ प्रथमे दिवसे षष्ठे दशमे चैव सर्वदा ॥ त्रिष्वेतेषु न कुर्वीत सूतकं पुत्र
जन्मनि ॥ अपरार्के ब्राह्मे ॥ कन्याश्चतस्तोरणकाद्या वातघ्नी चैव पंचमी ॥ क्रीडनार्था च बालानां षष्ठी च शिशुरक्षिणी ॥ एवं ह्येता
पूजनीया वै वैश्ये ब्रात्ये हि ज्ञातिभिः ॥ राकानुमतिः सिनीवाली कुहूरिति चतस्रः कन्यारस्पर्थेः ॥ अथ दत्तकपुत्रप
रिग्रहविधिः ॥ पारिजाते शौनकः ॥ अपुत्रो मृतपुत्रो वार्थं समुपोष्य च ॥ वाससी कुंडले दत्वा उष्णीषं चांगुलीयकं ॥ बंधूनन्ने
न संभोज्य ब्राह्मणांश्च विशेषतः ॥ अन्वाधानादियत्तंत्रं कृत्वाऽऽज्योत्पवनादिकं ॥ दातुः समक्षं गत्वा तु पुत्रं देहीति याचयेत ॥
दाने समर्थो दाता स्मै ये यज्ञेनेति पंचभिः ॥ देवस्येति मंत्रेणाहस्ताभ्यां परिगृह्य च ॥ अंगादंगेत्यृचं जप्त्वा आघ्राय शि
शुमूर्द्धनि ॥ गृहमध्ये तमाधाय चरुं हुत्वा विधानतः ॥ यस्त्वाहृदेत्यृचा चैव तुभ्यमग्रेत्यृचैकया ॥ सोमो दददित्येता
भिः प्रत्यृचं पंचभिस्तथा ॥ स्विष्टकृदादि होमं च कृत्वा शेषं समापयेत ॥ ब्राह्मणानां सपिंडेषु कर्तव्यः पुत्रसंग्रहः ॥ त
दभावे सपिंडे वा न्यत्र तु न कारयेत ॥ मिताक्षरा होतव्याहृतिभिरास्येन होम उक्तः ॥ तत्रैव वसिष्ठः ॥ न त्वेकं पुत्रं दद्यात्प्र
तिगृह्णीयाद्वा न स्त्री पुत्रं दद्यात्प्रतिगृह्णीयाद्वा अन्यत्रानुज्ञानाद्भर्तुरिति ॥ यत्तु समंत्रकहोमस्य प्रतिग्रहांगत्वाद्व्याहृत्या

स-त्तसह्रो भोजस्त पूर्वकंहे यः न ना भ्रात्रेण आहृति भिर्ईत्वा प्र.ति ग्र ह्णेपाद्दिनं सेष्ठोत्के: ॥ माता पिता
सहै मो द्दात्रेम रुआ: इति मात्रुके:
आतु १
इदं च मत्रसले अन्यथा माता दद्या पिता वायं

तु
पुत्रो वा

गोद्दयातां यमद्वैः पुत्रदापदि ॥ लद्दशां गोगि संकुले
कुशौदीनामत्स्याः । इति वसन्त्याम्लमचो विरोधस्या

१५१ दिमंत्रपाठेचस्त्रीशूद्रयोरनधिकारात्तयोर्दत्तकःपुत्रोनभवत्येवेतिशुद्धिविवेकेरुद्रधरेणोक्तं।तन्न।भर्त्रनुज्ञयाहिस्त्रियाअपिप्र
तिग्रहोक्तेः।यद्यपिमेधातिथिनाभार्यात्ववदूहदृष्टरूपंदत्तकत्वंहोमसाध्यत्वमुक्तं।स्त्रियाश्चहोमासंभवस्तथापिव्रतादिव
द्विप्रद्वाराहोमादिकारयेत।इतिहरिनाथादयः।संबंधतत्त्वेप्येवं।एवंशूद्रस्यापि।स्त्रीशूद्राश्चसधर्माणः इतिस्मृतेः।अत
एवशूद्रकर्तृकहोमोविप्रद्वारेतिपराशरेणोक्तः।दक्षिणार्थंतुयोविप्रःशूद्रस्यजुहुयाद्धविः।ब्राह्मणस्तुभवेच्छूद्रः शू
द्रस्तुब्राह्मणोभवेत।अत्रमाधवाचार्यः।योविप्रःशूद्राद्दक्षिणामादायतदीयंहविः शांतिपुष्ट्यादिसिद्ध्येवैदिकैर्मंत्रैर्जु
होतितस्यविप्रस्यैवदोषः।शूद्रस्तुहोमफलंलभेतैवेतिव्याचचक्षे।दत्तकेविशेषःकालिकापुराणे।पितुर्गोत्रेणयः
पुत्रःसंस्कृतःपृथिवीपते।आचूडांतेनपुत्रःस्यात्पुत्रतांयातिचान्यतः।चूडोपायनसंस्काराःनिजगोत्रेणवैकृताः।दत्ताद्यास्त
नयास्तेस्युरन्यथादासउच्यते।ऊर्ध्वंतुपंचमाद्वर्षान्नदत्ताद्याःसुतानृप।गृहीत्वापंचवर्षीयंपुत्रेष्टिंप्रथमंचरेदिति।पंच
मोर्ध्वंतुस्वदानेच्छोरेवदानंनान्यथा।विक्रयेचैवदानेचननेयाःस्युरनिच्छवः।दाराःपुत्राश्चसर्वस्वमात्मनेवतुयोजयेत।इ
तिहेमाद्रिमाधवधृतव्यासदक्षादिवचनात्।यच्चयाज्ञवल्क्यः।स्वकुटुंबाविरोधेनदेयंदारसुतादृतेइति।तदूर्ध्वंस्वदानानि
च्छुसंस्कृतपुत्रपरंतेनसर्वस्वदानेस्वदानेच्छुदारपुत्रदानंसिद्धं।यत्तुविश्वजितिह्यधिकरणोपदेशेतत्रपुत्रादीनांस्वशब्दवाच्यत्वा
याद्धिनग्रभायारणःसुशेवोन्योदर्योमनसामंतवाउ इतिश्रुतौदत्तकनिषेधः सोप्यौरससाजात्यार्थः।।अन्यथा
शुनःशेपादिप्रतिग्रहश्रौतलिंगविरोधापत्तेः।उपेयात्वपुत्रताम्रेकस्ये इदंश्रौतलिंगं।।स्वयंदत्तःक्रीत
श्चैधातारतेनसंस्कारोत्तरंदत्तकोनभवत्येवं ×३

मातुस्स्वयंदत्तः।।क्रीतः[illegible]श्चताभ्यांविक्रीतःइतियाज्ञवल्क्येनतयोर्दत्तकाद्भेदोक्तेः।।तयोश्चदत्तौ

तपुत्रत्वेनदानमाशंक्यनिराकृतं।अन्यपुंस्त्वस्यदानेनानिष्पत्तेः।दासत्वेनदानंभवत्येव।तस्माद्यथेष्टविनियोगार्हत्वं
भवत्येव।पुत्रेस्वत्वाभाववत्नशुनःशेपविक्रयादिश्रौतलिंगाद्दासविक्रयात्स्त्र्यवहाराणान्मूर्खएव।योपिपहिस्त्रमाया
राणास्तुशेवोन्योदत्त्योमिनसामंतवा।उ इतिश्रुतौदत्तकनिषेधः।सोप्येवो।सातिशयार्थःसंस्कृतपरश्च।अन्यथाशुनः
शेपादिप्रतिग्रहेश्रौतलिंगविरोधापत्तेः।उपेयांतवपुत्रतामित्युक्तेः।अथयमयोःसंस्कारक्रमार्थंज्येष्ठकनिष्ठभावनुच्यते।
पुत्रःकनिष्ठोज्येष्ठायांकनिष्ठायांचपूर्वजः।कथंतयोर्विभागःस्यादितिचेत्संशयोभवेत्।सहशस्त्वीप्रजातानांपुत्राणाम
विशेषतः।नमातृतोज्येष्ठ्यमस्तिजन्मतोज्येष्ठ्यमुच्यते।तेनकनिष्ठायांपूर्वजातएवज्येष्ठः।नज्येष्ठायांपश्चाज्जात
इत्यर्थः।सएवश्राद्धाधिकारी।मनुः।जन्मज्येष्ठेनचाह्वानंसुब्रह्मण्यास्वपिस्मृतं।यमयोश्चैवगर्भेषुजन्मतोज्येष्ठतास्मृ
ता।देवलोपि।यस्यजातस्ययमयोःपश्यंतिप्रथमंमुखं।संतानःपितरश्चैवतस्मिन्ज्येष्ठ्यंप्रतिष्ठितं।भागवतेतु
ग ह्रीतथाभवतोर्गर्भेसृतिवेशाद्विपर्ययात्।इत्युक्तेःपश्चाद्युत्पन्नंज्येष्ठ्यमुक्तं।अत्रदेशाचारतोव्यवस्था।अथसू
तिकास्नानं।ज्योतिषे।करेंद्रभाग्यानिलवासवांत्यमैत्रेस्वाश्विध्रुवभेह्निपुंसां।तिथावरिक्तेशुभमामनंतिप्रसूतिका
स्नानविधिंमुनींद्राः।अथनामकर्म।मदनरत्नेबृहस्पतिः।द्वादशेदशमेवापिजन्मतोपित्रयोदशे।षोडशेविंशतौचै
स्य

वद्धा विंशे वर्णितः क्रमात्। याज्ञवल्क्यः। अहन्येकादशे नाम। हेमाद्रौ भविष्ये। नामधेयं दशम्यां तु द्वादश्यां मासि केचन। अष्टादशेऽहनि तथा वदंत्यन्ये मनीषिणः। दशम्यामतीतायामिति ज्ञेयं। आशौचापगमे नामधेयमिति विज्ञानेश्वरस्य परिशिष्टेपि। जननाद्दशरात्रे व्युष्टे शतरात्रे संवत्सरे वा नामकरणं। व्युष्टे अतीते। ज्योतिर्निबंधे गर्गः। अमासंक्रांतिविष्ट्यादौ प्राप्तकालेपि नाचरेत्। श्रीधरः। मित्रादित्यमघोत्तराशतभिषक्स्वातीधनिष्ठाच्युतप्राजेशाश्विशशांकपौष्णदिनकृत्पुष्येषु राशौ स्थिरे। छिद्रां पंचदशीं विहाय जन्मभी शुद्धेष्टमे भार्गवज्ञाचार्यामृतपाद्भार्गदिवसे नामानि कुर्याच्छिशोः॥ मनुः॥ शर्मांतं ब्राह्मणस्य स्याद्वर्मांतं क्षत्रियस्य च॥ वैश्यस्य च॥ वैश्यस्य धनसंयुक्तं शूद्रस्य प्रेष्यसंयुतं। मदनरत्ने नारदीये। सूतकांते नामकर्म विधेयं स्वकुलोचितं। नामपूर्वं तु मासस्य मंगलं सुसमाहितैः। तत्रैव गार्ग्यः। मासनाम गुरोर्नाम दद्याद्बालस्य वै पिता। स्मृतिसंग्रहे कृष्णोनंतोच्युतश्चक्री वैकुंठोथ जनार्दनः। उपेंद्रो यज्ञपुरुषो वासुदेवस्तथा हरिः। योगीशः पुंडरीकाक्षो मासनामान्यनुक्रमात्। अत्र मार्गशीर्षादिचैत्रादिवाक्ये कः। क्रम इति मदनरत्ने। तन्मासानाम प्रथमं दद्यात्सं बुद्धिमेव च॥ देवालयगजाश्वानां हस्ताराणां वापिकूपयोः सर्वापणानां पण्यानां चिह्नार्थे योषितां नृणां॥ काव्यानां च कवीनायपश्वादीनां च सर्वशः। राजप्रासादवास्तूनां नाम कर्म विशिष्यते॥ नाक्षत्रमपि नाम कार्यं। अभिवाद

एमः

नीयँ चसमी सेत तन्मातापितरौ विद्यातामोपनयनादित्याश्वलायनोक्तेः। कुलदेवतानक्षत्रसंबंधं पिता नाम कु
र्यादिति मदनरत्ने शंखोक्तेः। तच्च नक्षत्रपादाक्षराद्यक्षरं कुर्यादित्युक्तं परिशिष्टे। तदक्षरादिकं नाम यस्मिन्धिष्ण्ये य
दक्षरमिति। सुदर्शनभाष्ये तु गोरेभ्रमृज्ये विषुवद्धिरादौ पुंस्त्ये च दांत्यश्चवशाश्च युक्तु। शेषेषु नाश्चोकपरः स्वरांत्यः
स्वाघोरवीरः सविसर्गात्तकः। इत्युक्तं तं त्यजेति। प्रोष्ठपदे त्वत्र द्वितीयाद्योश्च वृद्धिः प्रौष्ठपाद इति। अंत्यमपरशब्दः क्रता
वुक्तः। श्रवणादौ चवादिवृद्धिः। आपभरणाः। आपभरणास्त्वाहि। मदनरत्ने वसिष्ठः। जन्माहे द्वादशाहे वा दशाहे वा
विशेषतः। उत्तरा रेवती हस्त मूल पुष्याः सवारुणाः। श्रवणादितिमैत्रं च स्वाती मृगशिरस्तथा। प्राजापत्यं धनिष्ठा
च प्रशस्ता नामकर्मणि। अथ खट्वारोहः। पारिजाते बृहस्पतिः। खट्वारोहस्तु कर्तव्यो दशमे द्वादशेपि वा। षोडशे दि
वसे वापि द्वाविंशे दिवसे पि वा। ज्योतिर्निबंधे। करत्रये वैष्णवे रेवती पुष्यादितिद्वये चाश्विनकभेषु। कुर्याच्छिशूनां तु प
तेष्वतद्वदांदोलनं वै सुखिनो भवंति। तत्रैव। आंदोलाशयने पुंसो द्वादशो दिवसः शुभः। त्रयोदशस्तु कन्याया यान
न्तत्र विचारणा। अन्यस्मिन्दिवसे चेत्स्यात्तिर्यग्यास्ये प्रशस्यते। अथ पयुधपानं। नृसिंहः। एकत्रिंशद्दिने चैव पयः शं
खेन पाययेत्। अन्नप्राशननक्षत्रे दिवा होदयराशिषु। अथ कर्णवेधः। मदनरत्ने वसिष्ठश्रीधरौ। मासे षष्ठे सप्तमे वा

ष्टमे वा वेध्यौ कर्णौ द्वादशे षोडशेऽह्नि। मध्ये नाह्नः पूर्वभागे न एत्रौ नक्षत्रे हृद्दे तिथीर्वर्ज्जयित्वा। अत्र जन्ममासो वर्ज्यः। ज्यो
तिर्निबंधे गार्ग्यः। मासे षष्ठे सप्तमे वाप्यष्टमे मासि वत्सरे। कर्णवेधं प्रशंसंति पुष्ट्यायुःश्रीविवृद्धये॥ मदनरत्ने। प्रथमे सप्त
मे मासि अष्टमे दशमेऽथवा। द्वादशे च तथा कुर्यात्कर्णवेधं शुभावहं। हेमाद्रौ व्यासः। कार्त्तिके पौष मासे वा चैत्रे वा फा
ल्गुनेपि वा॥ कर्णवेधं प्रशंसंति शुक्लपक्षे शुभे दिने। श्रीधरः। हरिहरकाचित्रासौम्यपौष्णोत्तराण्यादितिवसुबुधघ
टाली। सिंहवर्ज्ये सुलग्ने। शशिगुरुबुधकाव्यानां दिने पर्वरिक्तारहिततिथिषु शुद्धे नैधने कर्णवेधः। मदनरत्ने बृहस्प
तिः। द्वितीया दशमी षष्ठी सप्तमी च त्रयोदशी॥ द्वादशी पंचमी शस्ता तृतीया कर्णवेधने। सौवर्णी राजपुत्रस्य राजती विप्र
वैश्ययोः। शूद्रस्य चायसी सूची मध्यमाष्टांगुलात्मिका। हेमाद्रौ देवलः। कर्णवेधे रवेश्छाया न विशेदग्रजन्मनः। तं दृष्ट्वा
विलयं यांति पुण्यौघाश्च पुरातनाः। शंखः। अंगुष्ठमात्रसुषिरौ कर्णौ न भवतो यदि तस्मै श्राद्धं न दातव्यं दत्तं चेदासुरं भवेत्।
अथ तांबूलभक्षणं। चंडेश्वरः। सार्द्धमासद्वये दद्यात्तांबूलं प्रथमेष्वप्ये च चिरायुषे॥ मार्कंडेयं नरो भक्त्या पूजयेत्प्र
यतस्तथा। ततो दीर्घायुषं व्यासं रामं द्रौणिं कृपं बलिं॥ प्रह्लादं च हनूमंतं बिभीषणमथार्चयेत्। स्वनक्षत्रे जन्मतिथिं एमः
प्राप्य संपूजयेन्नरः। षष्ठी च दधिभक्तेन वर्षे वर्षे पुनः पुनः। तिथितत्त्वे। एतन्नामभिस्तिलहोमोप्युक्तः। आदित्यपुराणे। सर्वै

शिशोः। कर्पूरादिकसंमिश्रंविलासायहितायच॥ मूलार्कचित्रकरातिष्यहरींद्रभेषु पौष्णेतथामृगशिरोदितिवासवेषु। अर्केंदु
जीवभृगुबोधनवासरेषुतांबूलभक्षणविधिर्मुनिभिः प्रदिष्टः। अथनिष्क्रमणं॥ ज्योतिर्निबंधे यमः। तृतीयेवा चतुर्थेवामा
सिनिष्क्रमणंभवेत्। यमः। ततस्तृतीयेकर्त्तव्यंमासिसूर्यस्यदर्शनं। चतुर्थेमासिकर्त्तव्यंशिशोश्चंद्रस्यदर्शनं। अथसू
र्येंद्वोःकर्मणीयेचतयोः श्राद्धंनविद्यतेइतिछंदोगपरिशिष्टात्छंदोगानांनिष्क्रमणेवृद्धिश्राद्धंनास्तीतिकल्पतरुः। व्यासः।
मैत्रेपुष्यपुनर्वसुप्रथमभेपौष्णेनुकूलेविधौहस्तेचैववसुरेश्वरेचमृगभेताराप्रशस्तासु च। कुर्यान्निष्क्रमणंशिशोर्बुधगु
रोशुक्रेघरिक्तेतिथौकन्याकुंभतुलामृगारिभवनेसौम्यग्रहालोकितेमदनरते। अन्नप्राशनकालेवा कुर्यान्निष्क्रम रा
णंक्रियां॥ अथोपवेशनं। प्रयोगपारिजाते। पंचमेनवमेमासिभूमौतमुपवेशयेत्। ततःसर्वग्रहाःशस्ताभौमोप्यत्रविशे
षतः। उत्तरात्रितयंसौम्यंपुष्यर्क्षंशक्रदैवतं। प्राजापत्यंचहस्तश्चशस्तमा। श्विनमित्रभं। वाराहंपूजयेद्देवंपृथिवींचतत्
याद्विजाः। रक्षैनंवसुधेदेविसदासर्वगतेशुभे। आयुःप्रमाणंसकलंनिक्षिपस्वहरिप्रिये। अचिरादायुषस्तस्ययेकेचित्प
रिपंथिनः। जीवितारोग्यवित्तेषुनिर्दहस्वाचिरेणतान्। धारेण्याशेषभूतानांमातात्वमसिकामधुक्। अजरावाप्रमेयाच
सर्वभूतनमस्कृता। चराचराणांभूतानांप्रतिष्ठानाव्ययाह्यसि। कुमारंपाहिपातस्त्वंब्रह्मातदनुमन्यतां॥ अन्नप्राशनंपारि

दंतेषु

जातेनारदः॥जन्मतोमासिषष्ठेस्यात्सौरेणान्नाशनंपरं।तदभावेष्टमेमासिनवमेदशमेपिवा।द्वादशेवापिकुवतप्रथमान्नाशनं
परं।संवत्सरेवासंपूर्णेकेचिदिच्छंतिपंडिताः॥ मदनरत्नेलौगाक्षिः॥षष्ठेन्नप्राशनंजातेषुचेति।शंखः॥ संवत्सरेन्नप्राशनमर्द्धसंवत्स
रेपिवेति।नारदः॥षष्ठेवाप्यष्टमेमासिपुंसांस्त्रीणांतुपंचमे।सप्तमेमासिवाकार्यंनवान्नप्राशनंशुभं।रिक्तादिनत्रयंनंदांद्वाद
शीमष्टमीममां।त्यक्त्वान्यतिथयःप्रोक्ताःसितजीवज्ञवासराः॥चंद्रवारंप्रशंसंतिकृष्णेचांत्यत्रिकंविना।श्रीधरः॥आदित्य
तिध्रुवसुसौम्यकराभिलाश्विचित्राजविष्णुवरुणोत्तरापौष्णमित्राः॥वालान्नभोजनविधौदशमेविशुद्धेछिद्रांविहाय।पनव
मीतिथयःशुभाःस्युः॥वसिष्ठः॥बालान्नभुक्तौव्रतबंधनेचराज्ञाभिषेकेखलुजन्मधिष्ण्यं।शुभंत्वनिष्टंमततंविवाहेसीमं
तयात्रादिषुमंगलेषु॥मार्कंडेयेविष्णुधर्मेषु॥देवतापुरतस्तस्यधात्र्युत्संगगतस्यच।अलंकृतस्यदातव्यमन्नंपात्रेसकां
यनं।मध्वाज्यदधिसंयुक्तंप्राशयेत्पायसंतुवेति।अथाब्दपूर्तिः॥व्यवहारनिर्णये।नवीबरधरोभूत्वापूजयेच्चिरायुषं।मा
र्कंडेयंनरोभक्त्यापूजयेत्प्रयतस्तथा।ततोदीर्घायुषंव्यासंरामंद्रौणिंकृपंबलिं॥प्रह्लादंचहनूमंतंबिभीषणमथार्चयेत्।
स्वनक्षत्रंजन्मतिथिंप्राप्यसंपूजयेन्नरः।षष्ठींचदधिभक्तेनवर्षेवर्षेपुनःपुनः॥तिथितत्त्वे।एतन्नाममभिस्तिलहोमोप्युक्तः॥आदि एभः
त्यपुराणे।सवैश्चजन्मदिवसेस्नातोमंगलवारिभिः।गुरुदेवाग्निविप्रांश्चपूजनीयाःप्रयत्नतः।स्वनक्षत्रेचपितरौतथादेवःप्रजाप
२४ श्रेणां सां कुरं पि छुं चं दा कौं च दिगी श्च रानू ॥ दिवं दि नि श्च संहू ष्यं तु ला च नौ त था च रं ॥४

वर्षे २

तिः। प्रतिसंवत्सरं पत्नात्कर्त्तव्यश्च महोत्सवः। कृत्यचिंतामणौ गुडदुग्धतिलान्दद्यात्सूत्रेग्रंथींश्च बंधयेत्। गुग्गुलं निंबसिद्धा
र्थं दूर्वा गोरोचनादिकं। संपूज्य भानुविघ्नेशौ महर्षिं प्रार्थयेदिदं। चिरजीवी यथा त्वं भो भविष्यामि तथा मुने। रूपवान्वित्त
वांश्चैव श्रिया युक्तश्च सर्वदा। मार्कंडेय नमस्तेस्तु सप्तकल्पांतजीवन। आयुरारोग्यसिद्ध्यर्थं प्रसीद भगवन्मुने चिरजीवी य
था त्वं तु मुनीनां प्रवर द्विज॥ कुरुष्व मुनिशार्दूल तथा मां चिरजीविनं। मार्क्कंडेय महाभाग सप्तकल्पांतजीवन॥ आयुरा
रोग्यसिद्ध्यर्थं अस्माकं वरदो भव। सतिलं गुडसंमिश्रं अंजल्यर्द्धमितं पयः। मार्कंडेयवरं लब्ध्वा पिबाम्यायुर्विवृद्धये॥ इति या द
पयः पिबेत्। तिथितत्त्वे स्कांदे। खंडनं नखकेशानां मैथुनाध्वगमौ तथा॥ आमिषं कलहं हिंसां वर्षवृद्धौ विवर्ज्जयेत्। तथैव दी
पिकायां॥ कृतांतकुजयोर्वारे यस्य जन्मतिथिर्भवेत्। अनर्हयोगसंप्राप्तो विघ्नस्तस्य पदे पदे। कृतांतः शनिः। तस्य सर्वौ
षधिस्नानगुरुदेवाग्निपूजनं॥ वृद्धमनुः। मृते जन्मनि संक्रांतौ श्राद्धे जन्मदिने तथा॥ अस्पृश्यस्पर्शने चैव न स्नायादुष्ण
वारिणा॥ अत्र जन्मतिथिरौदयिकी ग्राह्या। युगाद्या वर्षवृद्धिश्च सप्तमी पार्वतीप्रिया॥ रवेरुदयमीक्षंते न तत्र तिथियु
ग्मतेति कृत्यतत्त्वार्णवे वचनात्। विशेषो मत्कृतशूद्रधर्मे ज्ञेयः। अथ कटिसूत्रं प्रयोगपारिजाते ब्राह्मे। अथ चौलं प्र
योगपारिजाते। जाताधिकारे जन्मादित्तृतीयब्दे तु चौलकं। आद्येब्दे कुर्वते केचित्पंचमेब्दे द्वितीयके। उपवीत्या सहैवेति

१५५ विकल्पाः कुलधर्मतः॥ बृहस्पतिः॥ तृतीये हि शिशोर्गर्भाज्जन्मतो वा विशेषतः॥ पंचमे सप्तमे वापि स्त्रियाः पुंसोपि वा समं त
त्रैव नारदः॥ जन्मतस्तु तृतीयेब्दे श्रेष्ठमिच्छंति पंडिताः॥ पंचमे सप्तमे वापि जन्मतो मध्यमं भवेत्। अधमं गर्भतः स्यात्तु न
वमेकादशेपि वेति। पारिजाते। बृहस्पतिः॥ उत्तरायणगे सूर्ये विशेषात्सौम्यगोलके॥ शुक्लपक्षे शुभं प्रोक्तं कृष्णपक्षे
शुभेतरत्। अशुभोंत्यत्रिभागः स्यात्कृष्णपक्षे त्रिधाकृते। तत्रैव यसिष्ठः॥ द्वित्रिपंचमसप्तम्यामेकादश्यां तथैव च॥ दश
म्यां च त्रयोदश्यां कार्यं क्षौरं विजानता। नृसिंहीये। षष्ठ्यष्टमी चतुर्थी च नवमी च चतुर्दशी॥ द्वादशी दर्शपूर्णे द्वे प्रतिपच्चै
व निंदिताः। वसिष्ठः॥ रवेरंगारकस्यैव सूर्यपुत्रस्य चैव हि। निंदिता दिवसाः क्षौरे शेषाः कार्यकराः शुभाः॥ ज्योतिर्निबंधे बृ
हस्पतिः। पापग्रहाणां वाराः दोषो विप्राणां शुभदा रवेः। क्षत्रियाणां तु मासस्नोर्विट्शूद्राणां दानो शुभं॥ हस्ताश्विविधु
पौष्णाश्च श्रविष्ठादितिपुष्यभं। सौम्याचित्रे न वक्षौरे उत्तमा नवतारकाः॥ त्रीण्युत्तराणि वायव्यं रोहिणी वारुणं त
थ्या। क्षौरे षण्मध्यमाः प्रोक्ताः शेषा द्वादश गर्हिताः॥ निधने जन्मनक्षत्रे वैनाशे चंद्रमोष्टमे॥ विपत्करे वधे क्षौरं प्रत्य
७ रे च विवर्जयेत्। अत्र लग्नशुद्धिरन्ये च योगा ज्योतिर्विद्भ्यो ज्ञेयाः॥ अन्ये च विशेषाः श्मश्रुकर्मनिर्णये वक्ष्यते। एतच्च रामः
शिशोर्मातरि गर्भिण्यां न कार्यं। तदाह ज्योतिर्निबंधे मदरत्ने च गार्ग्यः॥ पुत्रचूडाकृतौ माता यदि सा गर्भिणी भवेत्।

शस्त्रेणमृत्युमाप्नोतितस्मात्क्षौरंविवर्ज्जयेत। अस्यापवादमाहतत्रैवनारदः॥ सूनोर्मातरिगर्भिण्यांचूडाकर्मन
कारयेत। पंचमाद्ब्दात्प्रागथोर्द्ध्वंगर्भिण्यामपिकारयेत। यदिगर्भविपत्तिःस्याच्छिशोर्वामरणंयदि। सहोपनीत्यात
त्वेतस्मान्नदोषोनविद्यते। बृहस्पतिः। गर्भिण्यांमातरिशिशोःक्षौरकर्मनकारयेत। व्रताभिषेकेप्येवंस्यात्कालो
वेदव्रतेष्वपि। गर्भिण्यामपिपंचमासपर्यंतंनदोषइत्युक्तं। मुहूर्त्तदीपिकायां॥ गर्गेण। पंचमासादूर्द्ध्वंमातुर्वागर्भ
स्यजायतेमृत्युरितिज्योतिर्निबंधेगार्ग्यः। पुत्रचूडाकृतौमातागर्भिणीयदिवाभवेत। विपद्यतेगुरुस्तत्रदंपतीशि
शुर्हतः। गर्भेमातुःकुमारस्यनकुर्याच्चौलकर्मतु। पंचमासादधःकुर्यादतऊर्द्ध्वंनकारयेत। गर्गः। ज्वरस्योत्यादनं
यस्यत्वयंतस्मान्नकारयेत। शस्त्रेणमृत्युमाप्नोतितस्मात्क्षौरंविवर्ज्जयेत। अस्यापवादमाहतत्रैव। नारदः। सूनोर्मा
तरीति। दोषकृद्गर्भमुक्तायस्याःस्वच्छोधर्मसमाचरेत। लग्नमितिमेगालोपलक्षणं॥ ज्योतिर्गर्गः। विवाहोत्सवयज्ञेषु
मातायदिरजस्वला॥ अंईतदेवातत्रैवबृहस्पतिः। प्रासमभ्युदयश्राद्धंपुत्रसंस्कारकर्मणि। पत्नीरजस्वलाचेत्स्यान्न
कुर्यात्तत्पितातदा। पितेतिकर्तमात्रोपलक्षणं। संकटेतथाकपसारेउक्तं। अलाभेसुमुहूर्त्तस्यरजोदोषेप्युपस्थिते। श्रियंसं
पूज्यविधिवत्ततोमंगलमाचरेत। एतच्चमुंडनोत्तरंनकार्यं। नमुंडमात्रापिहिमुंडनंचगोत्रैकतायांमस्त्रिनाबुभेदः। इति॥

७ तदा मृत्युमवाप्नोति पंच मंगं हिवसंविना॥ वसिष्ठः। यस्य मांगल्यिकं कार्यं तस्य माता र

मदनरत्नेवसिष्ठोक्तेः॥ तत्रैवकात्यायनः॥ कुलेऋतुत्रयादर्वाङ्मडनान्नतुमुंडनंप्रवेशान्निर्गमोनेष्टोनकुर्यान्मंगलत्रयमिति॥ तथावृद्धमनुः॥ एकमातृजयोरेकवत्सरेपुरुषस्त्रियोः॥ नसमानक्रियांकुर्यान्मातृभेदेविधीयते॥ आशौचेतुसंग्रहे॥ संकटेसमनुप्राप्तेसूतकेसमुपागते॥ कूष्मांडीभिर्घृतंहुत्वागांचदद्यात्पयस्विनीं॥ चूडोपनयनोद्वाहप्रतिष्ठादिकमाचरेत्॥ इतिज्योतिर्निबंधे॥ षष्ठेवैषोडशेवर्षेविवाहाद्वेतथैवच॥ आर्तवत्यांचजायायांनेष्यतेमुंडनंक्वचित्॥ अन्योपिविशेषोविवाहप्रकरणेवक्ष्यतेदीपिकायां॥ नचूडाजन्ममासेपराह्णेबुधशनौकुजे॥ प्रतिपद्राद्वरिक्तासुविद्यारंभस्तुपंचमे॥ प्रयोगरत्नेमध्येशिरसिचूडास्याद्वसिष्ठानांतुदक्षिणे॥ उभयोःपार्श्वयोरत्रिकश्यपानांशिखामता॥ माधवीयेप्येवं॥ आपस्तंबस्त्वाह॥ तत्स्त्रीकेशान्विनीययथर्षिशिखानिदधाति॥ यथर्षिप्रवरसंख्यया॥ तासांमध्यशिखावर्ज्यमुपनयनेवपनंकार्यमितिदिक्॥ प्रवपतीत्युपनयनेलेनैवोक्तेः॥ रिक्तोवाएषयोनपिहितोयन्मुंडस्तस्यैतदपिधानंयच्छिखेतिश्रु एम: तेः॥ विशिखोव्युपवीतश्चयत्करोतिनतत्कृतमितिनिषेधाच्चौलोपरं॥ अपरार्केमदनरत्नेचलौगाक्षिः॥ दक्षिणतःकमुं आ वसिष्ठानामुभयतोत्रिकश्यप + सूत्रेतद्वचनात्सशिखंवपनमितिसुदर्शनभाष्येयुक्तं॥ यद्वाकुमाराविशिखाइवेतिलिंगात्छंदो + पानांमुंडाभृगवःपंचचूडाआंगिरसोवाजिनमेकेमंगलार्थेशिखिनोन्येयथाकुलधर्मंवेति॥ कमुंडाःशिखावाजिःकेशपंक्तिः॥

आ

स्मृतिदर्पणे। एकशिखास्त्रिशिखातो वसिष्ठगोत्रस्य पंचांगिरसां भृगोस्त्वनैकशिखाः कश्यपगोत्रजानां शिखोभयत्रापि
यथाकुलं वा। एतच्चूडातिरिक्तविषय। शूद्रस्यानियताः केशवेषाः इति वसिष्ठोक्तेः। यत्तु पाद्मे। नशिखीनोपवीती स्यान्नो
च्चारेत्संस्कृतां गिरं इति शूद्रमुपक्रम्योक्तं। तत्र सच्छूद्रस्येति केचित्। विकल्प इति त्वयुक्तं। अत एव हारीतः। स्त्रीशूद्रेतु शि
खां छित्वा क्रोधाद्वैराग्यतोपि वा। प्राजापत्यं प्रकुर्वीत निष्कृतिर्नान्यथा भवेत्। एतत्सारिम्नहृपक्षे। अत्र देशभेदाद्व
स्थेति दिक्। ज्योतिर्निबंधे। नर्मदोत्तरदेशे तु सिंहस्थे देवमंत्रिणि। शुभकर्म न कुर्वीत निषेधो नास्ति दक्षिणे। अत्र भो
जने प्रायश्चित्तमुक्तं। एतत्कालमाधवीये। निवृत्ते चूडहोमे तु प्राङ्नामकरणात्तथा। चरेत्सांतपनं भुक्त्वा जातकर्मणि चै
व हि। अतोन्येषु तु संस्कारेषु प्रवासे न शुध्यतीति। एते संस्काराः स्त्रीणाममंत्रकाः कार्याः होमस्तु समंत्रक इति। प्र
योगपारिजाते। आश्वलायनोपि। होमकृत्यं तु सर्वं स्यात्स्त्रीणां चूडाकृतावपीति मनुरपि। अमंत्रिका तु कार्येयं
स्त्रीणामावृदशेषतः इति। होमोप्यमंत्रक इत्येके। संस्काराः स्त्रीणां महोमकाः स्युरिति। स्मृत्यर्थसारे। होमो नेति
हत्रिकृत। अथ विद्यारंभः। मदनरत्ने महोमकाः स्युरिति। स्मृत्यर्थसारे। होमो नेति हत्रिकृत। अथ विद्यारंभः। मदनरत्ने
नृसिंहः। अक्षरस्वीकृतिं कुर्यात्प्राप्ते पंचमहायने। उत्तरायणगे सूर्ये कुंभमासं विवर्जयेत्। दीपिकायां। वर्षे पञ्चेन्यके का

दे
१५७ षष्ठीरिक्तांशनिकुजं।अनध्यायान्विनानत्वाद्देवंग्रंथकृतंगुरुं।।श्रीधरः।हस्तादित्यसमीरमित्रपुरजित्सोमज्ञाश्विचित्राच्यु
तेष्वारार्कांशदिनोदयादिरहितेराशौस्थिरेचोभयो।।पक्षेपूर्णनिशाकरेप्रतिपदंरिक्तांविहायाष्टमीषष्ठीमष्टमशुद्धभा
ङ्गिभवनेप्रोक्ताऽक्षरस्वीकृतिः।विष्णुधर्मोत्तरे।पूजयित्वाहरिंलक्ष्मींतथादेवींसरस्वतीं।।स्वविद्यासूत्रकारांश्चस्वांविद्यांच
विशेषतः।एतासांदेवतानांतुनाम्नावैजुहुयाद्धृतं।।दक्षिणाभिर्द्विजेंद्राणांकर्त्तव्यंचात्रजनं।अथधनुर्विद्या।।दीपिका
यां।।आर्द्रादितिगुरुयमार्कस्वातिचित्राभिपित्र्यश्रवहरिवसुमूलेष्विंद्रभाग्यांत्यभेषु।शनिशशिबुधवारेविष्णुबोधेविपो
षेसुसमयतिथियोगेचापविद्याप्रदानं।।अथानुपनीतस्यविशेषः।गौतमः।प्रागुपनयनात्कामचारवदभक्ष्याः।इति।भ
रणेलघुनादेरपीतिहरदत्तः।अपरार्केदक्षशातातपः।शिशोरभ्युक्षणंप्रोक्तंबालस्याचमनंस्मृतं।रजस्वलादिसंस्प
र्शेस्नानमेवकुमारके।प्राक्चूडाकरणाद्बालःप्रागन्नप्राशनाच्छिशुः।कुमारस्तुसविज्ञेयोयावन्मौंजीनिबंधनं।आ
पस्तंबोपि।अन्नप्राशनात्प्रयतोभवत्यासंवत्सरादित्येके।इति।गौतमोपि।नतदुपस्पर्शनादाशौचं।तस्यानुपनीतस्य
चंडालादिस्पृष्टस्यापिस्पर्शोन्नस्नानं।इदंचषष्ठवर्षात्प्राक्।ऊर्ध्वंतुस्नानंभवत्येव।बालस्यपंचमाद्वर्षादूर्ध्वंस्नानं।इदंच एमः
षष्ठवर्षात्प्राक्।ऊर्ध्वंतुस्नानंभवत्येव।बालस्यपंचमाद्वर्षादूर्ध्वंस्नानमाचरेत्।इतिस्मृतेः।कामचारादित्येके।अन्यत्रा
प्येवं

ष्येवं ऊनैकादशवर्षस्य पंचवर्षात्परस्य च। चरेद्गुरुः सुहृच्चैव प्रायश्चित्तं विशुद्धये। अतो बालतरस्यास्य नापराधो न पातकमिति स्मृतेरिति हरदत्तः। स्मृत्यर्थसारेप्येवं॥ अथोपनयनं। आश्वलायनः। गर्भाष्टमेष्टमे वाब्दे पंचमे सप्तमेपि वा॥ द्विजत्वं प्राप्नुयाद्विप्रो वर्षे त्वेकादशे नृपः। मनुः। ब्रह्मवर्चसकामस्य कार्यं विप्रस्य पंचमे। राज्ञो बलार्थिनः षष्ठे वैश्यस्यार्थार्थिनोष्टमे॥ विष्णुः। षष्ठे तु धनकामस्य विद्याकामस्य सप्तमे। अष्टमे सर्वकामस्य नवमे कांतिमिच्छतः। आपस्तंबः। गर्भाष्टमेषु ब्राह्मणमुपनयीत। बहुवचनं गर्भषष्ठगर्भसप्तमयोः प्राप्त्यर्थमिति सुदर्शनभाष्ये। केचित्तु षष्ठं न मन्यते। आपस्तंबः। अथ काम्यानि सप्तमे ब्रह्मवर्चसकाममष्टम आयुःकामं नवमे तेजस्कामं दशमेन्नाद्यकाममेकादश इंद्रियकामं द्वादशे पशुकाममुपनयेत। गौणकालमाह गौतमः। आषोडशाद्ब्राह्मणस्य सावित्री नातिवर्त्तते। आद्वाविंशात्क्षत्रबंधोरा चतुर्विंशतेर्विशः। ज्योतिर्निबंधे। अपक्षत्रा ब्राह्मणा वैश्याः स्वावधेरूर्ध्वमंततः। अकृतोपनयनाः सर्वे वृषला एव ते स्मृताः। गार्ग्यः। विप्रं वसंते क्षितिपं निदाघे वैश्यं घनांते व्रतिनं विदध्यात। माघादिशुक्लांतिकपंचमासाः साधारणा वा सकलद्विजानां। हेमाद्रौ ज्योतिषे। माघादिषु च मासेषु मौंजी पंचसु शस्यते। कालादर्शे वृद्धगार्ग्यः। माघादिमासषट्के तु मेखलाबंधनं हितं। चूडाकरणमन्त्रं च श्रावणादौ विवर्ज्जयेत। मैत्रेयसूत्रेपि। वसंतो ग्रीष्मः शरदि

१५८ त्यृतवो वर्णानुपूर्वेणा माघादिषण्मासा वा सर्ववर्णानामेतदुदगायनमनन्यो विकल्प इति। अत्रेदं तत्वं। नात्र वसंते नोत्तरा
यणस्य संकोचः। आद्ये दर्शस्यापराह्णविधिनेवाधानेव संतादेः कृत्तिकादेनेव साप्यं प्रातर्विधिना यावज्जीवविधेरिव सु
क्रः। आद्ययोः परस्य रव्याभिचारान्नियमः। अंत्ये निमित्ते सांगकर्मोक्तेः कालापेक्षा। इह तूत्तरायणं विना वसंतस्याभावा
त्तन्नियमः। न वा निमित्तत्वं। न चैकं हायनिरति वर्षस्यानुवादः। तद्वद्वाक्यभेदापरिहारात्। उत्तरायणविधिवैयर्थ्या
च्चानुकल्पोयमिति। माद्य आदिर्येषां पंचानामिति सेयवषट्। पारिजातेप्येवं बृहस्पतिः। अपि चापकुलीरस्थो जीवो जन्मां
त्यमृत्युगः। अतिशोभनतां दद्याद्विवाहोपनयादिषु। रत्नकोशे। न जन्मधिष्ण्ये न च जन्ममासे न जन्मकालीयदिने विदध्या
त्। ज्येष्ठे न मासि प्रथमस्य हस्तेनोक्तधात्रस्तताया अपि मंगलानि। राजमार्तंडः। ज्ञातं दिनं दूषयते वसिष्ठो ह्यष्टौ च गर्गो नियं
तं दशात्रिः। जातस्य पक्षे किल भागुरिश्च शेषाः प्रशस्ताः खलु जन्ममासि। जन्ममासि तिथौ भे च विपरीतदले सति। कार्यं मंग
लमित्याहुर्गर्गभार्गवशौनकाः। जन्ममासनिषेधेपि दिनानि दश वर्जयेत्। आरभ्य जन्मदिवसाच्छुभाः स्युस्तिथयोपरे। ग्रंथां
तरे। व्रते जन्मत्रिकालीस्थो जीवोपीष्टोर्चनात्सकृत्। शुभो तिकौले तु पंचष्टव्ययषष्ठो द्विगुणार्चनात्॥ शुद्धिर्नैव गुरोः सूर्यस्य व एमः
र्षे प्राप्ते ष्टमे यदि। चैत्रे मीनगते भानौ तस्योपनयनं शुभं॥ जन्मभाद्दष्टमे सिंहे नीचे वा शत्रुभे गुरौ। मौंजीबंधः शुभः प्रोक्तश्चैत्रे

मीनगते रवौ॥ नारदः॥ बालस्य बलहीनोपि शांत्याजीवो बलप्रदः॥ यथोक्तवत्सरे कार्यमनुक्ते चोपनायनं॥ शांतिश्चात्रैव वक्ष्यते॥
ज्योतिर्निबंधे नृसिंहः॥ तृतीया पंचमी षष्ठी द्वितीया वापि सप्तमी॥ पक्षयोरुभयोश्चैव विशेषेणास्तु पूजिताः॥ धर्मकामौ सितेप
क्षे कृष्णे च प्रथमा तथा॥ शुक्ल त्रयोदशीं केचिदिच्छंति मुनयस्तथा॥ टोडरानंदे वसिष्ठः॥ नैमित्तिकमनध्यायं कृष्णे च प्रति
पद्दिनं॥ मेखलाबंधने शस्तं चौलवेदव्रतेष्वपि॥ प्रशस्ता प्रतिपत्कृष्णे न पूर्वापरसंयुता॥ एतदतीतकालस्यार्हस्य बटोरुप
नयनविषयं॥ प्रशस्य प्रतिपत्कृष्णैकदेशे। चित्रकुंभगे विधौ॥ चैत्रे बलयुते तस्मिन्नेव वर्षाणामतिलंघने रात्रिव्यासोक्तेः। स्यादु
एवं तत्सम्यपि॥ तस्याग्रलग्नहलोक्तेः॥ बृहस्पतिः॥ शुक्लपक्षः शुभः प्रोक्तः कृष्णश्चांत्यत्रिकविना॥ तथा॥ मिथुने सं
स्थिते भानौ ज्येष्ठमासो न दोषकृत॥ मदनरत्ने नारदः॥ विनर्तुनावसंतेन कृष्णपक्षे गलग्रहे॥ अपराह्णे चोपनीतः पुनः सं
स्कारमर्हति॥ वसंते गलग्रहे न दोषापेत्यर्थः॥ अपराह्णस्त्रेधा विभक्तदिनतृतीयांश इत्युक्तं॥ तत्रैव नारदः॥ कृष्णपक्षे चतुर्थ
च सप्तम्यादिदिनत्रयं॥ त्रयोदशीचतुष्कं च अष्टावेते गलग्रहाः॥ वसिष्ठः॥ पापांशकगते चंद्रे अरिभीचास्थितेपि वा॥ अ
नध्याये चोपनीतः पुनः संस्कारमर्हति॥ अनध्यायस्य पूर्वेद्युरनध्याये परेहनि॥ व्रतबंधं विसर्गं च विद्यारंभं न कारयेत॥
गुरुमार्तंडः॥ आरंभानंतरं यत्र प्रत्यारंभो न सिध्यति॥ गर्गादिमुनयः सर्वे तमेवाहुर्गलहं॥ ज्योतिर्निबंधे॥ अष्टकासु

१५९
चसर्वासु युगमन्वंतरादिषु ॥ अनध्यायं प्रकुर्वीत तथा सोपपदास्वपि ॥ सोपपदास्तु स्मृत्यर्थसारे ॥ सिता ज्येष्ठे द्वितीया
च आश्विने दशमी सिता ॥ चतुर्थ्य द्वादशी माघे एताः सोपपदाः स्मृताः ॥ एवं प्रदोषादिनं वर्ज्यं ॥ प्रदोषस्वरूपमाह गोभि
लः षष्ठी च द्वादशी चैव अर्द्धरात्रोनमनाडिका ॥ प्रदोषमिह कुर्वीत तृतीयातूननाडिका ॥ ज्योतिर्निबंधे व्यासः ॥ पा
चैत्रे वैशाखसितातृतीया माघस्य सप्तम्यफाल्गुनस्य ॥ कृष्णे तृतीयोपनये प्रशस्ताः प्रोक्ता भरद्वाजमुनींद्रमुख्यैः ॥
अत्रापि कृष्णप्रतिपद्द्वेयं ॥ यत्तु वृद्धगार्ग्यः ॥ अनध्यायं प्रकुर्वीत यत्र नैमित्तिको भवेत् ॥ सप्तमी माघशुक्ला तु तृती
या चोक्ता यातथा ॥ बुधत्रये तु वा ॥ अप्रशस्ता व्रतबंधने ॥ इति ॥ तन्न्यायाश्चित्रार्थोपनयनविषयं ॥ स्वाध्यायविधिप्रयुक्तो घस्त्रा
कृष्णप्रतिपदादयः ॥ प्रायश्चित्तनिमित्ते तु मेखलाबंधने मताः ॥ इति तेनैवोक्तेरिति निर्णयामृतकालादर्शौ ॥ यद्यप्यथोपे
तत्पूर्वस्येत्युक्ता ॥ बाब्रधने मताः ॥ इति तेनैवोक्तेरिति निर्णयामृतकालादर्शौ अनिरुक्तं पारिजाते कालश्चेत्याश्वलायनेन पु
नरुपनयने कालानियम उक्तस्तथापि निमित्तानंतरमेव सः ॥ तदानीमकरणे तु पूर्वोक्तकालो ज्ञेयः ॥ प्रतिवेदमुपनयने एमः
कालानियम इति तु युक्तं ॥ गार्ग्यः ॥ ग्रहे रवींद्वोः स्वनिपकंपे केतूद्गमोल्कापतनादिदोषे ॥ व्रते दशाहानि वदंति तज्ज्ञास्त्र
योदशाहानि वदंति केचित् ॥ संकटे तु चंडेश्वरः ॥ दाहे दिशां चैव धराप्रकंपे वज्रप्रपाते च विदारणे च ॥ केतौ तथोल्कासु

काणप्रपातेत्र्यहंनकुर्याद्धृतमंगलानि॥ तत्रैव॥ वेदव्रतोपनयने व्रतोपनयनेतथा॥ नदोषोयजुषांसोपपदास्वध्ययनेपि
च॥ हेमाद्रौ ज्योतिषे॥ हस्तत्रयेपुष्यधनिष्ठयोश्चपौष्णाश्विसौम्यादितिविष्णुभेषु॥ शस्तेतिथौचेद्गुबलेनयुक्तेकार्यौद्विजा
नांव्रतबंधमोक्षौ॥ ज्योतिर्निबंधेनारदः॥ श्रेष्ठान्यर्कत्रयांत्येज्यचंद्रादित्सुत्तराणिच॥ विष्णुत्रया॥श्विमित्राब्जयोनिभान्युपना
यने॥ बृहस्पतिः॥ त्रिषूत्तरेषुरोहिण्यांहस्तेमैत्रेचवासवे॥ त्वाष्ट्रेसौम्यपुनर्वस्वोरुत्तमत्सुपनायनं॥ ज्योतिर्निबंधे॥ पूर्वाह्
स्तत्रयेसार्पश्रुतिमूलेषुबह्वृचां॥ यजुषांपौष्णमैत्रार्कादित्यपुष्यमृगध्रुवैः॥ सामगानांहरिशार्कवसुपुष्योत्तराश्विभिः॥ ध
निष्ठादितिमैत्रार्कैर्विष्णुपौष्णेष्वथर्वणां॥ राजमार्तंडे॥ मुक्त्वाब्राह्मणस्यपुनर्वसुनिषेधात्॥ ताराचंद्रानुकूलेषुग्रहार्केषुशु
भेष्वपि॥ पुनर्वसौकृतोविप्रः पुनःसंस्कारमर्हति॥ ज्योतिर्निबंधेनारदः॥ सर्वेषांजीवशुक्रज्ञवाराः प्रोक्ताव्रतेशुभाः॥ चंद्रा
र्कौमध्यमौज्ञेयौसामबाहुजयोःकुजः॥ शाखाधिपतिवारश्चशाखाधिपबलंतथा॥ शाखाधिपतिलग्नंचतुर्द्धंभवितव्यं
भवेत्॥ शाखाधिपास्तु॥ ऋग्यथर्वसामयजुषामधिपागुरुसौम्यभौमसिताः॥ जीवसितौविप्राणांक्षत्रस्यारोह्लगूविशांचं
द्रः इति पारिजाते॥ बृहस्पतिः॥ बह्वृचानांगुरोर्वारोयजुर्वेदजुषांबुधो॥ सामगानांधरासूनोरथर्वविदुषांरवेः॥ अत्रलग्नशुद्ध्या
दिर्दैवज्ञेभ्योज्ञेयं॥ विस्तरभयान्नोच्यते॥ लल्लः॥ व्रतेहिपूर्वसंध्यायांवाप्रदोषेयदिगर्ज्जति॥ तद्दिनेस्यादनध्यायोव्रतंतत्रविवर्ज्जं

१६० येत॥ ज्योतिर्निबंधे नांदीश्राद्धं कृतं चेत्स्यादनध्यायस्त्रैकालिकः। तदोपनयनं कार्यं वेदारंभं न कारयेत। एतद्ब्रह्मचातिरिक्तानां ते
षां तद्दिने वेदारंभाभावात्। अतस्तेषां उपनयनं न भवत्येव। एतरेयोपनिषदि। अपर्त्तुवर्षे त्रिरात्रमिति मृगाद्दिपेष्वां तवर्षत्रृतुं वि
नावर्षो दौ त्रिरात्रमनध्यायइति वेदभाष्येउक्तं। एतच्च प्रातः स्नानिते सायंस्नानिते तु दिवैव च चरुं श्रपयित्वा सायं संध्योत्तरं होमं
कुर्यात्। न संध्यागर्जिते काले नवृष्ट्युस्यात दूषिते। ब्रह्मौदनं पचेदग्नौ पक्वं चेन्न निवर्त्तते। ब्रह्मौदनं पचेदग्नौ पक्वमन्नं न दुष्य
तीति। प्रयोगरत्ने भट्टचरणाः। अत्र शांतिरप्युक्ता नृसिंहप्रासादे। ब्रह्मौदनविधेः पूर्वं प्रदोषे गर्जितं यदि। तदा विघ्नकरं ज्ञेयं
बहोरध्ययनस्य तत॥ तस्य शांतिप्रकारं तु वक्ष्ये शास्त्रानुसारतः। प्रधानं पायसं साज्यं द्रव्यं शांतिमखे भवेत॥ सूक्तं बृहस्प
तेर्विद्वान् पठेत्प्रज्ञाविवृद्धये। गायत्री चैव मंत्रः स्यात्। प्रायश्चित्तं तु सर्पिषा॥ धेनुं सवत्सकां दद्यादाचार्याय पयस्विनीं॥ ब्रा
ह्मणान् भोजयेत्पश्चात् ततो ब्रह्मौदनं चरेत। उपनयने चाधिकारिणः। माधवीये बृद्धमनुनोक्ताः। पिता पितामहो भ्राता ज्ञा
तयो गोत्रजाग्रजाः। उपायनेधिकारी स्यात्पूर्वाभावे परः परः। प्रयोगरत्ने। पितैवोपनयेत्पुत्रं तदभावे पितुः पिता। तदभावे पि एमः
तुर्भ्राता तदभावे पि सोदरः। पितेति विप्रपरं न क्षत्रियादेः। तेषां पुरोहित एव उपनयनस्य दृष्टार्थत्वात्। तेषां चाध्यापनेऽनधिका
रात्। अत्र पितृव्यस्य ज्येष्ठभ्रातृभेधिकारः। असंस्कृतास्तु संस्कार्या भ्रातृभिः पूर्वसंस्कृतैः। इति याज्ञवल्क्योक्तेः मातुरज्ञोदोषे

भावे

विवाहितास्त्री
नि नास्त्येषां विधिः स्मृतः॥ इति वचनात्
नू ६

तुमागुक्तं। अथ षंढमूकादीनां विशेषः प्रयोगपारिजाते॥ ब्राह्मे च॥ ब्राह्मण्यां ब्राह्मणाज्जातो ब्राह्मणः स इति श्रुतिः। तस्माच्च षंढबधिरकुब्जवामनपंगुषु। जडगद्गदरोगार्त्तशुष्कांगविकलांगिषु॥ मत्तोन्मत्तेषु मूकेषु शयनस्थे निरिंद्रिये। ध्वस्तपुंस्त्वेषु चैतेषु संस्काराः स्युर्यथोचितं॥ मत्तोन्मत्तौ न संस्कार्याविति केचित्प्रचक्षते। कर्मस्वनधिकाराच्च पातित्यं नास्ति चैतयोः। तदपत्यं च संस्कार्यमपरे त्वाहुरन्यथा॥ संस्कारमंत्रहोमादीन् करोत्याचार्य एव तु। उपनेयांश्च विधिवदाचार्यः स्वसमीपतः। आनीयाग्निसमीपं वा सावित्रीं स्पृश्य वा जपेत्। कन्या स्वीकरणादन्यत्सर्वं विप्रेण कारयेत्। एवमेव द्विजैर्जातौ संस्कार्यौ कुंडगोलकौ॥ इति। स्मृत्यर्थसारेऽप्येवं। कुंडगोलकयोः संस्कार्यत्वं श्राद्धनिषेधश्च क्षेत्रजपुत्रविषयः। अन्यस्यां ब्राह्मणेनोत्पन्नाघप्राशी स्यात्पराकैः। उपनयनं च कुमारं भोजयित्वा कार्यं। प्रागेवैनं तदहर्भोजयंतीति मदनपारिजाते गोभिलोक्तेः। गायत्र्युपदेशश्चोत्तरतोऽग्नेः कार्यः। उत्तरेणाग्निमुपविशतः। प्राङ्मुख आचार्यः। प्रत्यङ्मुख इतरोऽधीहि भो इति शांखायनसूत्रोक्तेः। यद्यपि कात्यायनेनाप्यग्नेः सावित्रीमन्वाहोत्तरतोऽग्नेः प्रत्यङ्मुखायेत्युक्त्वा दक्षिणतस्तिष्ठत आसीनाय चैके इति विकल्प उक्तः। तथापि कातीयानामेवसः। बह्वृचानां तूत्तरत एव। केदैकयातभिन्नायां विशेषमाहुः। मातरमेवाग्रे भिक्षेत। पराशरमाधवीये॥ मातरं वा स्वसारं वा मातुर्वा भगिनीं निजां॥ भिक्षेत भिक्षां प्रथमं या चैनं विमानयेत्॥ अथ संस्कारलोपे

ग्नि

न य

न

शौनकः। आरभ्याधानमाचौलात्कालेतीते तु कर्मणां। व्याहृत्यात्यंस्तु संस्कृत्य कृत्वा कर्म यथाक्रमं॥ प्र॰ एतेष्वेकैकलोपे तु
पादकृच्छ्रं समाचरेत्। चूडायां अर्द्धकृच्छ्रः स्यादापदीत्येवमीरितं। अनापदि तु सर्वत्र द्विगुणं द्विगुणं चरेत्। पारिजाते का
त्यायनः। लुप्ते कर्मणि सर्वत्र प्रायश्चित्तं विधीयते। प्रायश्चित्ते कृते पश्चात् लुप्तं कर्म समाचरेत्। स्मृत्यर्थसारे चैवं। कारि
कायां। प्रायश्चित्ते कृते ऽतीते कर्म कृताकृतमित्युक्तं। प्रायश्चित्ते कृते पश्चादतीतमपि कर्म वै। कौर्यमित्येक आचार्या नेत्य
न्ये तु विपश्चितः। इति त्रिकांडमंडने तु। कालातीतेषु कार्येषु प्राप्तवत्स्वपरेषु च॥ कालातीतानि कृत्वैव विदध्यादुत्तरा
णि तु॥ इत्युक्तं॥ तत्रैव सर्वेषां तंत्रेणानांदीश्राद्धं कुर्यात्। देशकालकर्त्रैक्यात्। गणशः क्रियमाणानां मातॄणां पूजनं
सकृत्। सकृदेव भवेच्छ्राद्धमादौ न पृथगादिष्विति छंदोगपरिशिष्टात्। एतद्वहूनामपत्यानां युगपत्संस्कारकरणविष
यमिति वोपदेवः। अतीतसंस्काराणां युगपत्करणे ऽत्यन्ये। तत्रापि चौलस्य ऽपनीत्या सहेति पक्षे ऽपनीतिदिने एवा
नुष्ठानं न पूर्वदिने। सह त्वस्या दिवसैकोपसन्निकृष्टतरत्वात्। [illegible]ह्मचारोप्येवं। उपनीतिदिने मध्याह्नसंध्या माह पारिजाते एमः
जैमिनिः। यावद्ब्रह्मोपदेशः कृतः तावत्संध्याह्निकं न च। ततो मध्याह्नसंध्यादि सर्वं कर्म समाचरेत्। इति ब्रह्म गायत्री। यत्तु व
चनं। उपायने तु कर्तव्यं सायंसंध्योपासनं। आरभेद्ब्रह्मयज्ञं तु मध्याह्ने तु परेऽहनीति। तच्छाखांतरविषयमिति पारिजा

बोधायनसूत्रे तु सहाधारणमप्युक्तं उपनयनादिरग्निस्तमोपासनमित्याचक्षते।। पाणिग्रहणादित्येके नियो धायीनु
नुगलेनिमैथ्य इति।। इदं जातारणिपक्षे अन्यथा मंथनासंभवात् ×१॥

उ

तत्राविकल्प इति युक्तं पश्यामः। उपनयनाग्निस्त्रिरात्रं धार्यः। त्र्यहमेव तमग्निं धारयंतीत्यापस्तंबोक्तेः। ब्रह्मयज्ञे विशेषमा
हा तत्रैव जैमिनिः। अनुपाकृतवेदस्य कर्तव्यो ब्रह्मयज्ञकः। वेदस्थाने तु सावित्री गृह्यते तत्समाप्ततः। इति। येषां तद्दिने
एव वेदारंभस्तेषां नेदमिति दिक्। अथ ब्रह्मचारिधर्माः। याज्ञवल्क्यः। मधुमांसांजनोच्छिष्टं शुक्तं स्त्रीप्राणिहिंसनं।। भास्क
रालोकनाश्लीलपरिवादांश्च वर्जयेत्। मनुः। अभ्यंगमंजनं चाक्ष्णोरुपानच्छत्रधारणं।। वर्जयेदिति प्रकृतं। पारिजाते कौ
र्मे।। नादर्शं चैव वीक्षेत नाचरेद्दंतधावनं। गुरूच्छिष्टं भेषजार्थं प्रयुंजीत न तु कामतः। एतन्निषिद्धं मध्वादिविषयं।। अन्यस्य
गुरूच्छिष्टस्य सर्वदा प्राप्तेः।। स चेद्व्याधीयीत कामं गुरोरुच्छिष्टं भेषजार्थं सर्वं प्राश्नीयादिति वासिष्ठोक्तेः। ज्येष्ठभ्रातुरित्यपि
ज्ञेयं। पितुर्ज्येष्ठस्य च भ्रातुरुच्छिष्टं भोज्यमिति आपस्तंबोक्तेः। गुरुपुत्रे तु स्मृत्यंतरे उक्तं। गुरुवद्गुरुपुत्रः स्यादन्यत्रो
च्छिष्टभोजनात्। प्रचेताः। तांबूलाभ्यंजनं चैव कांस्यपात्रे च भोजनं। यतिश्च ब्रह्मचारी च विधवा च विवर्जयेत्। यमः।
मेखलामजिनं दंडमुपवीतं च नित्यशः। कौपीनं कटिसूत्रं च ब्रह्मचारी तु धारयेत्। अग्नींधनं भैक्ष्यचर्यामधः शय्यां।
गुरोर्हितं।। कुर्यादिति शेषः। मेखलामाह आश्वलायनः। तेषां मेखला मौंजी ब्राह्मणस्य धनुर्ज्या क्षत्रियस्य मौर्वी वैश्य
स्येति। आचार्यः। त्रिवृता मेखला कार्या त्रिवारं स्यात्समावृता। तद्ग्रंथयस्त्रयः कार्याः पंच वा सप्त वा पुनः। अत्र प्रवरसंख्य
मौंजी त्रिवृत्समा श्लक्ष्णा कार्या विप्रस्य मेखला।। त्रिवृता ग्रंथिनैकेन त्रिभिः पंचभिरेव वा।। मौंज्या भावे कु

रसांजनादि
स्त्रीभिः ७

कुशाश्मंतकबल्वजैः ७

मनुः

१६२ यानियमरतिरिद्गाः॥ अथदंडः॥ ब्राह्मणोबैल्वपालाशौक्षत्रियोवाटखादिरौ। पैप्पलौदुंबरौवैश्योदंडानर्हंतिधर्मतः॥ एषामभा
वेगौतमः॥ यज्ञियोवामूर्धललाटनासाग्रमाणाइति। अजिनमाहाश्वलायनः॥ अहतेनवाससासंवीतमैणेयेनवाजिनेनब्रा
ह्मणंरौरवेणक्षत्रियमाजेनवैश्यमिति यद्यप्यैणेयशब्देनमृगीचर्मैवोच्यते। एण्याढञितिप्राप्तेर्निस्मृतेः॥ हैणेयमेणा
श्चर्मौघमेणास्यैणमुभेत्रिषुइत्यमरकोशाच्च। तथापिकल्पतरुरुबस्तान्याजिनानि। तिशेखे। केः॥ सर्वेषांचारौरवमिति
यमोक्त्केश्चमृगच्चर्मणासहविकल्पोऽस्येयः॥ वस्त्राजिनयोस्तुविकल्पः। कार्पासंवौविकृतमितिगौतमोक्तेः॥ अथयज्ञो
पवीतं। मनुः। कार्पासमुपवीतंस्याद्विप्रस्योर्ध्ववृतंत्रिवृत्। प्राशिज्ञातेदेवलः। कार्पासक्षौमगोवालशणवल्कतृणादि
कं॥ यथासंभवतोधार्यमुपवीतंद्विजातिभिः॥ शुचौदेशेशुचिःसूत्रंसंहतांगुलिमूलके। आवर्त्यषण्णवत्यातत्त्रिगुणी
कृत्ययत्नतः॥ अब्लिंगकैस्त्रिभिःसम्यक्प्रक्षाल्योर्ध्ववृतंत्रिवृत्। अप्रदक्षिणावृत्यगायत्र्यात्रिगुणीकृत॥ ततःप्रद
क्षिणावर्तंसामंस्यान्नवसूत्रकं। त्रिरावृत्यप्रदंबध्वाब्रह्मविष्णीश्वरान्नमेत॥ तन्नवर्तंतुकार्यं॥ सावित्र्यात्रिगुणंका एमः
र्येनवसूत्रंततइष्वेदितितेनैवोक्तेः॥ भृगुः त्रिवृदूर्ध्ववृतंकार्यंतंतुमधोवृतं॥ त्रिवृतंचोपवीतंस्यात्तस्यैकोग्रन्थिरिष्य
ते॥ ऊर्ध्ववृतंदक्षिणंकरमूर्ध्वकृतावलंबितं। कात्यायनः॥ एष्टदेशेषनाभ्यांचवृतंयद्धिंदतेकटिं। तद्धार्यमुपवीतंस्यान्ना

वामावर्तंयत्तितंत्रिगुणंकृत्वादक्षिणावर्तंयत्तितंत्रैगुणंकार्यंसत्यकस्तंतुः
एवंत्रितंतुकमिसर्थः ९

तिलंबं न चोछ्रितं वसिष्ठः। नाभेरूर्ध्वमनायुष्यमधो नाभेस्तपःक्षयः। तस्मान्नाभिसमं कुर्यादुपवीतं विचक्षणः। पारिजा
ते देवलः। उपवीतं वटोरेकं द्वे तथेतरयोः स्मृते। एकमेव यतीनां स्यादिति शास्त्रस्य निश्चयः। स एव। बहूनि चायुष्कमस्या
तत्र मंत्रमाह स एव। यज्ञोपवीतमिति वा व्याहृत्या वापि धारयेत्। हेमाद्रौ। यज्ञोपवीते द्वे धार्ये श्रौते स्मार्ते च कर्मणि। तृतीयमु
त्तरीयार्थे वस्त्राभावे तदिष्यते। देवलः। सावित्र्या दशकृत्वोऽद्भिर्मंत्रिताभिस्तदुक्षयेत्। विच्छिन्नं वाप्यधो यातं भुक्त्वा निर्मित
मुत्सृजेत्। मनुः। मेखलामजिनं दंडमुपवीतं कमंडलुं। अप्सु प्रास्य विनष्टानि गृह्णीतान्यानि मंत्रतः। अथैतल्लोपेप्रा
यश्चित्तं। मनुः। अकृत्वा भैक्षचरणमसमिध्य च पावकं। अनातुरः सप्तरात्रमवकीर्णिव्रतं चरेत्। अमत्या आपदि त्यागे तु
याज्ञवल्क्यः। भैक्ष्याग्निकार्ये त्यक्त्वा तु सप्तरात्रमनातुरः। कामावकीर्ण इत्याभ्यां जुहुयादाहुतिद्वयं। उपस्थानं ततः
कुर्यात्सं मा सिंचंत्वनेन तु॥ मंत्रास्तु मिताक्षरायां ज्ञेयाः। सकृल्लोपे तु स्नानविधाने। मानस्तोके जपेन्मंत्रं शतसंख्यं शिवाल
ये॥ आग्निकार्यं विना भुंक्ते नं पापं ब्रह्मचारिणः। स्मृत्यर्थसारे तु संध्याग्निकार्यलोपे स्नात्वाष्टसहस्रजपः। अभिस्नालोपे ष्ट
शतं। अभ्यासे द्विगुणं पुनः संस्कारश्चेत्युक्तं। आशार्के संवर्त्तः। यः संध्यां चैव नोपास्ते अग्निकार्यं यथाविधि। गायत्र्य
ष्टसहस्रं तु जपेत्स्नात्वा समाहितः। पारिजाते शातातपः। ब्रह्मचारी तु योऽश्नीयान्मधु मांसं तथैव च। प्राजापत्यं चरेत्कृ
अग्निकार्यं संध्याद्येकार्यं। अग्निकार्यं ततः कुर्यात्संध्ययोरुभयोरपीति याज्ञव

ध्नोह्रे: सायमेपवास्नायमेयाग्नेमिद्धं पीलेसेफ
इतिश्रीगाक्षीणोक्तेः

छ्रं व्रतशेषं समापयेत्। कृच्छ्रविधाने। तं बोधियाज्जपेन्मंत्रं लक्षं चैव शिवालये। ब्रह्मचारी स्वधर्मेषु न्यूने चेत्स्मृतिमेति ततः। स्त्रीसं
गे तु मनुः। अवकीर्णिकाणोतु गर्दभेन चतुष्पथे। स्थालीपाकविधानेन यजेद्दैवं नैर्ऋतं निशि। विस्तरस्तु मिताक्षरादौ ज्ञेयः।
उपवीतनाशे हारीतः। मनोव्रतपतीभिश्चतस्त्र आहुतीर्हुत्वा पुनः प्रतीयात्। तत्रैव मरीचिः। ब्रह्मसूत्रं विना भुंक्ते विण्मू
त्रं कुरुतेथवा। गायत्र्यष्टसहस्रेण प्राणायामेन शुध्यति। मनुः। भोशब्दं कीर्तयेदंते स्वस्य नाम्नोभिवादने। आयुष्मा
न्भव सौम्येति वाच्यो विप्रोभिवादने। अकारश्चास्य नाम्नोंते वाच्यः पूर्वाक्षरः प्लुतः। शर्मन्निति नकारात्पूर्वं इत्यर्थः। अ
भिवादनप्रत्यभिवादनादौ विशेषः स्मृत्यर्थसारपारिजातादौ ज्ञेयः॥ यमः। ज्यायानपि कनीयांसं संध्यायामभिवाद
येत्। विना शिष्यं च पुत्रं च दोहित्रं डुहितुःपतिं। अथ पुनरुपनयनं॥ पारिजाते शातातपः। लशुनं गृंजनं जग्ध्वा
पलांडुं च तथा शुनं। उष्ट्रमानुषकेभाश्वरासभीक्षीरभोजनात्। उपायनं पुनः कुर्यात्तप्तकृच्छ्रं चरेन्मुहुः इति हेमाद्रौ
तत्रैव मनुः। जीवन्यदि समागच्छेद्धृतकुंभे निमज्य च। उद्धृत्य स्नापयित्वास्य जातकर्मादिकारयेत्। तत्रैव पाद्मे प्रे
तशय्याप्रतिग्राही पुनः संस्कारमर्हति। चंद्रिकायां बोधायनः। सिंधुसौवीरसौराष्ट्रान्तथा प्रत्यंतवासिनः। अंगवंगक एम
लिंगांश्च गत्वा संस्कारमर्हति। हेमाद्रौ प्रायश्चित्तकांडे वृद्धगौतमः। खरमुष्ट्रं च महिषमनड्वाहमजं तथा॥ बस्तमारुह्य मुत्र

जक्रोशे चांद्रं विनिर्दिशेत्॥ मार्कंडेयः॥ खरमारुह्य विप्रस्तु योऽज्ञानं यदि गच्छति। तस्य कृच्छ्रत्रयं प्रोक्तं शरीरस्य विशोधनं॥ पुन
र्जन्म प्रकुर्वत घृत्या गर्भविधानतः॥ मदनरत्ने मिताक्षरायां च स्नानमात्रमुक्तं॥ मनुः॥ अज्ञानात्प्राश्य विण्मूत्रं सुरासंसृ
ष्टमेव च॥ पुनः संस्कारमर्हंति त्रयो वर्णा द्विजातयः॥ मिताक्षरायां पराशरः॥ यः प्रत्यवसितो विप्रः प्रव्रज्यातो विनिर्गतः॥
अनाशकनिवृत्तश्च गार्हस्थ्यं मिताक्षरायां पराशरः॥ यः प्रत्यवसितो विप्रश्चेच्चिकीर्षति। स चरेत् त्रीणि कृच्छ्राणि त्री
णि चांद्रायणानि च। जातकर्मादिभिः सर्वैः संस्कृतः शुद्धिमाप्नुयात्। अथोपनीतस्य अब्रह्मान्नेनाभ्यस्योच्छिष्टं भुं
जी। तान्यत्र पितृज्येष्ठाभ्यां न स्त्रिया सह भुंजीत मधुमांसश्राद्धसूतकान्नानि निर्दशाहं संधिनीक्षीरं छत्राकं निर्यासो
विलयनं गणान्नं गणिकान्नं इत्येतेषु पुनःसंस्कारः॥ प्रतिषिद्धदेशगमनमित्येके। एषामथाप्युदाहरंति। सुराष्ट्रं सिंधु
सौवीरमवंतीदक्षिणापथं। एतानि ब्राह्मणो गत्वा पुनःसंस्कारमर्हति। अथ पुनःसंस्कारव्याख्यास्यामो देवयज्ञ
न प्रमुत्य अग्निमुखात्कृत्वा पालाशीं समिधमाज्येनाभ्याधाय ग्राचयति पुनस्त्वादित्या वसवः कामाः स्वाहेत्यथाज्ये
न जुहोति येन देवाः पवित्रेणेति तिसृभिरनुच्छंदसं स्विष्टकृत्प्रभृदानादथ परमापरीद्धमाकृत्वा पालाशीं समिधमाधा
याथाव्रत्य प्रायश्चित्तं जुहोति अथव्याहृतीर्जुहोति। अथ यमः॥ सावित्र्याः शतकृत्वो घृतमभिमंत्र्य प्राश्य कृतप्रायश्चित्तो भव

भ वं ति

रू क्रा

१६४ तिगुरोर्वोच्छिष्टं भुंजीत। यामुदाहरंति। वपनं दक्षिणादानं मेखलां दंडमजिनं भैक्ष्यचर्याव्रतानि च निवर्तंते पुनः संस्कारकर्म
णीति आश्वलायनगृह्येप्ययोपेतपूर्वस्येत्यादिना पुनः संस्कार उक्तः। तथापित्रादिव्यतिरेकेण ब्रह्मचारिणः प्रेतकर्मकरणे
पुनरुपनयनमित्यपरार्के। हस्यपत्रिस्थलीसेतो। कर्मनाशाजलस्पर्शात् करतोयाविलंघनात्। गंडकीबाहुतरणात्पुनः
संस्कारमर्हति। गौडास्तु। करतोयाजलस्पर्शात् कर्मनाशाविलंघनात्। इतिपठंति। तन्न। दानधर्मे करतोयास्नाने प्राशस्त्या उ
क्तेः। करतोये सदानीरे सरिच्छ्रेष्ठे विश्रुते। आज्ञावयसि पौण्ड्राणां पापं हर करोद्भवे। इति स्मृतिदर्पणलिखितस्नानमंत्रा
च्चापराशरः। अजिनं मेखला दंडो भैक्ष्यचर्याव्रतानि च। निवर्तंते द्विजातीनां पुनःसंस्कारकर्मणि। हारदत्तस्तु। य एकवेद
मधीत्यान्यं वेदमध्येतुमिच्छति तस्य पुनरुपनयनं। तेन प्रतिवेदमुपनयनं कर्तव्यमित्याह। अन्ये नेतन्मन्यंते। सर्वेभ्यो
श्रे वेदेभ्यो सावित्र्यनूच्यत इत्यापस्तंबोक्तेः। तद्विधिः कारिकायां। वेदांतरमधीत्यैवं ऋग्वेदं येत्वधीयंते। उपनीतिरियं ते
षां मलंकरणवर्जिता। यद्वैतदुपनीतस्य प्रायश्चित्तं यदा भवेत्। कृताकृतं च वपनं मेधाजननमेव च। मेधाजननसद्भा
वे व्रतचर्या भवेदिह। अनुप्रवचनीयश्च तदभावे द्वयं न हि। परिदानं न वै कार्यं निमित्तानंतरं त्विदं। पूर्वस्यावाचयेत्स्थाने तत एम्नः
त्सवितुर्वृणीमह इति। यत्तु हारीतः। द्विविधाः स्त्रियः ब्रह्मवादिन्यः सद्योवध्वश्च। तत्र ब्रह्मवादिनीनामुपनयनमग्नीन्धनं वे

दाध्ययनंस्वगृहेचभैक्षचर्येति।सद्योवधूनामुपनयनंकृत्वाविवाहःकार्यइति।तद्युगांतरविषयं।पुराकल्पेषुनारीणांमौंजीबंधनमिष्यते।अध्यापनंचवेदानांसावित्रीवाचनंतथेतियमोक्तेः।अथानध्यायाः।पारिजातेहारीतः।प्रतिपत्सुचतुर्दश्यामष्टम्यांपर्वण्योर्द्वयोः।श्वोनध्यायेद्यशर्वर्यांनाधीयीतकदाचन।नारदः।अयनेविषुवेचैवशयनेबोधनेहरेः।अनध्यायस्तुकर्तव्योमन्वादिषुयुगादिषु।निर्णयामृते।चातुर्मास्यद्वितीयासुमन्वादिषुयुगादिषु॥अनध्यायस्तुकर्तव्योयाचसोपपदातिथिः।गार्ग्यः।शुचावूर्जेतपस्येसयाद्वितीयाविधुक्षये।चातुर्मास्यद्वितीयास्ताःप्रवदंतिमनीषिणः।स्मृत्यर्थसारेपि।आषाढीफाल्गुनीकार्त्तिकार्त्तिकीसमीपस्थद्वितीयास्त्वेतिवै।मनुः।उपाकर्मणिचोत्सर्गेत्रिरात्रंक्षपणंस्मृतं।अष्टकासुत्वहोरात्रंऋत्वंतासुचरात्रिष्विति।उत्सर्गेतुमनूक्तपक्षिण्यहोरात्राभ्यांत्र्यहस्यविकल्पःइतिविज्ञानेश्वरः।अष्टकाशब्देनसप्तम्यादित्रयंज्ञेयं।तिस्रोष्टकास्त्रिरात्रमंत्यामेकेइतिगौतमोक्तेः।ऋत्वंतावितिसौरऋत्वंतास्तुचांद्रस्यपर्वपर्वत्वेनैवनिषेधसिद्धेरितिसर्वत्रनारायणः।एतेनित्याः।नैमित्तिकानप्याहयाज्ञवल्क्यः।त्र्यहंप्रेतेष्वनध्यायःशिष्यर्त्विग्गुरुबंधुषु।उपाकर्मणिचोत्सर्गेस्वशाखाश्रोत्रियेतथा।संध्यागर्जितनिर्घातभूकंपोल्कानिपातने।समाप्यवेदंद्युनिशमारण्यकमधीत्यच।पंचदश्यांचतुर्दश्यामष्टम्यांराहुसूतके।ऋतुसंधिषुभुक्त्वावाश्राद्धिकप्रतिगृह्यच।पशुमंडूकन

१६५ कुलश्वाहिमार्ज्जारमूषकैः॥ कृतेंतरेत्वहोरात्रं शक्रपातेतथोच्छ्रये। ग्रहणोषुचै। पश्चमेऽनिशोक्तावपियत्रत्यास्तेत्र्यहमित्युक्तं प्राक्।
स्मृत्यर्थसारेतुरात्रोग्रहेतित्वोरात्रीः द्विहैगाचत्र्यहइत्युक्तं [illegible]तुः सौम्यः मुक्तेत्युत्सवविषयं। ऊर्ध्वंभोजनादुत्सवेइतिगौत
मोक्तेः। आह्निकमिहैकोद्दिष्टमिन्द्रां। तत्रतत्र्यहइतिमनुः। स्मृत्यर्थसारेचैवं। यत्तुपश्वाद्यंतरायेत्र्यहमुपवासोविप्रवास
श्चेतिगौतमोक्तं। तत्प्रथमाध्यापने। याज्ञवल्क्यः। श्वक्रोष्टृगर्दभोलूकसामबाणार्त्तनिःस्वने। अमेध्यशवशूद्रान्त्यश्मशान
पतितांतिके। देशेशुचावात्मनिचाविद्युत्स्तनितसप्लवे। भुक्त्वार्द्रपाणिरंभोंतरर्द्धरात्रेतिमारुते। पांसुवर्षेदिग्दाहे संध्या
नीहारभीतिषु॥ धावतः पूतिगंधेच। शिष्टेचगृहमागते॥ खरोष्ट्रयानहस्त्यश्वनौवृक्षेरिणरोहणे। सप्तत्रिंशदनध्यायानेतां
स्तात्कालिकान्विदुः। बाणोवंशः। शततंतुवीणामितिहारदत्तः। अमेध्याःसूतिकादयः। स्तनितंगर्जितं। वर्षर्तोन्यत्रगर्जे
वृष्टिविद्युतांयौगपद्येत्वाकालिकः। वर्षासुतात्कालिकः। इतिनारायणः। संध्यागर्जितेतुहारीतः। सायंसंध्यास्तनितेरात्रिः
प्रातःसंध्यास्तनितेहोरात्रं। रात्रौविद्युत्परारात्र्यवधिः। विद्युतिनक्तंचापररात्रादितिगौतमोक्तेः। दिनतृतीयांशोन्तरंतु
विद्युतिसर्वरात्रमित्याहसएवात्रिभागादिप्रवृत्तौसर्वमिति। अर्द्धरात्रेमध्ययामद्वयेरात्रिविज्ञानेश्वरः। मध्येदंडचतुष्टयेर रामः
तितिस्मर्यामृते। मनुः। नविवादेनकलहेनसेनायांनसंगरे। नभुक्तमात्रेनाजीर्णेनवमित्वानसूतके। रुधिरेचस्रुतेगात्राच्छ

होरा च परिस्रुते कौर्मे। श्लेष्मांतकस्य छायायां शाल्मलेर्मधुकस्य च। कदाचिदपि नाध्येयं कोविदारकपित्थयोः। मनुः। शयानः
प्रौढपादश्च कृत्वा चैवावसक्थिकां। नाधीयीतामिषं जग्ध्वा सूतकान्नाद्यमेव च। प्रौढपादः पादोपरि पादं दत्वा। आसनारूढ
पादो वेति हरदत्तः। सोपपदास्वपि प्रागुक्तं॥ स्मृत्यर्थसारे। श्रवणद्वादशी मघाभरण्योः प्रेतद्वितीयायां। यमस्मृत्यां। आका
शे शवदर्शने वाहोरात्रं। अस्तंपिंडे गुरौ त्रिरात्रं। आचार्य उपाध्याये च पक्षिणी। आचार्यभार्यापुत्रशिष्येष्वहोरात्रं। अनुसा
ते गो विप्रमृत्यौ त्रिरात्रं अयने विषुवे च पक्षिणी। अकालवृष्टौ च। अरण्ये मार्जारनकुलपंचनखादेरंतरागमे त्रिरात्रं। आरण्य
श्वशृगालादिवानररजकादौ द्वादशरात्रं। खरवराहोष्टुस्तिकोटकाश्मशाने मासं। गोश्वपाजामार्त्तिकादौ त्रिमासं। शश
मेषश्वपाकादौ षण्मासं। गजगंडसारससिंहव्याघ्रमहापापिकृतघ्नादावब्दमनध्यायः। शोभनदिने चानध्यायः। विवाहप्र
तिष्ठोद्यापनादिहष्टासमाप्तेः। स्मार्तोत्राणामनध्यायः। उदये त्वस्तमये चापि मुहूर्त्तत्रयगामि यत्। तद्दिनं तदहोरात्रं चानध्या
यविदो विदुः। केचिदाहुः। क्वचिद्देशे यावद्दिननाडिकाः। तावदेव त्वनध्यायो न तन्मिश्रे दिनांतरे। प्रदोषे त्वाह प्रजापतिः।
षष्ठी च द्वादशी चैव अर्द्धरात्रोननाडिकाः। प्रदोषे न त्वधीयीत तत्तृतीया नवनाडिका॥ निर्णयामृते गार्ग्यः। रात्रौ यामत्रयादर्वा
क्सप्तमी च त्रयो च त्रयोदशी॥ प्रदोषः स तु विज्ञेयः सर्वविद्याविगर्हितः। रात्रौ नवसु नाडीषु चतुर्थ्यपि हि दृश्यते। प्रदोषः

नै ३

१६६

सतुविज्ञेयोवेदाध्ययनत्याहितिः॥ कौर्मे॥ अनध्यायस्तुनांगेषुनेतिहासपुराणयोःपिच। नानध्यायोस्तिवेदाणयोः॥ नधर्म
शास्त्रेष्वन्येषुपर्वण्येतानिवर्ज्जयेत्। शौनकः॥ नित्येजपेचकाम्येचक्रतौपारायणेपिच। नानध्यायोस्तिवेदानांग्रहणे
ग्रहणेस्मृताः॥ इत्यनध्यायाः॥ अथमहानाम्न्यादिव्रते। श्रीधरः॥ तिथिनक्षत्रवारांशवर्गोदयनिरीक्षणंचौलवत्स
र्वेमाख्यातंसगोदानव्रतेषुच। एतेषांलोपेशौनकः॥ व्रतानिविधिनाकृत्वास्वशाखाध्ययनंचरेत्। अकृत्वाभ्यसते
येनसपापीविधिघातकः। प्रत्येककृच्छ्रमेकैकंचरित्वाज्याहुतीःशतं। हुत्वाचैवतुगायत्र्यास्नाय्यादित्याहशौनकः।
स्मृत्यर्थसारेतुत्रीन्षड्द्वादशवाकृच्छ्रान्कृत्वापुनर्व्रतंचरेदित्युक्तं। अथसमावर्त्तनं। हरेस्वाः॥ भौमभानुजयोर्वारे
नक्षत्रेचन्द्रतोदिते। ताराचंद्रविशुद्धौचस्यात्समावर्त्तनक्रिया। वसिष्ठः॥ स्नानंमध्याह्नकालेतुहोरायांकारयेद्बु
धं। पूर्वाह्णेतदभावेतुकुर्यात्स्नानंयथाविधि। सर्वज्ञतवोविवाहस्योतिस्नातपदादक्षिणायनेविवाहस्तदासमा
वर्त्तनम। पितत्रैव। अन्यथोदगयनेसमावर्त्तनेनाश्रमीनतिष्ठेतेतिविरोधः। यादित्युक्तंसुदर्शनभाष्ये। एतच्चब्र
ह्मचारिव्रतलोपेप्रायश्चित्तंकृत्वाकार्यं॥ तदाहबौधायनः॥ शौचंसंध्यादर्भभिक्षाग्निकार्यंशौच्यकौपीनोपवीत
मेखलादंडजिनानामवधारणंदिवास्वापच्छत्रपादुकास्त्रग्विधारणोद्वर्त्तनानुलेपनांजनद्यूतनृत्यगीतवाद्याभिरतो
बोधायनसूत्रेतु॥ रोहिण्यांतिष्यउत्तरयोःफाल्गुण्योःहस्ते। चित्रायांतेद्वे। विशाखायांस्वाधार॥

रामः

४॥ तत्राविशिष्टकल्पः॥ पितर्यपि मृते नैषां दोषो भवति कर्हिचित्॥ आशौचं कर्मणो लोपः स्वाध्यायस्य वा ब्रह्मचारिणः इति छंदोगपरिशिष्टे

ब्रह्मचारिणि कृच्छ्रत्रयं चोक्तं व्याहृतिहोमं पाहि त्रयोदशहोमं कुर्यात्॥ समावर्तनोत्तरं पूर्वमृतानां त्रिरात्रमाशौचं कार्यं॥ आ
दिष्टी नोदकं कुर्यादाव्रतस्य समापनात्॥ समाप्ते तूदकं दत्वा त्रिरात्रमशुचिर्भवेत्॥ इति मनूक्तेः॥ आदिष्टी ब्रह्मचारीति वि
ज्ञानेश्वरः॥ ब्रह्मचर्यमध्ये कश्चिन्मृतस्तदा त्रिरात्रमध्ये विवाहः कार्यो न्यथा नेति सिद्धांतितं जननेप्येवं न त्रिरात्रं॥ तत्रा
पि क्रांताशौचाभावादुदकं दत्वेति वचनाच्चेति दिक्॥ स्नातकव्रतान्याह व्यासः॥ यज्ञोपवीते द्वितयं सोदकं च कमंडलुं॥ छत्रं
चोष्णीषममलं पादुके चाप्युपानहौ॥ रौक्मे च कुंडले वेदः कृत्तकेशनखः शुचिः॥ वैणवं दंडः॥ मनुः॥ उपानहौ च वासश्च धृत
मन्यैर्न धारयेत्॥ उपवीतमलंकारमलंकरणमेव च॥ अन्यान्यपि बहूनि गृह्यसंग्रहादिभ्यो ज्ञेयानि॥ अथ मौंजिकाबंधः॥
मौंजिकाबंधनं वस्त्रेण नृपाणां प्रकारयेत्॥ विवाहोक्तेषु मासेषु शुक्ले पक्षेप्यनस्तगे॥ जीवे शुक्रे च भूपत्रे चंद्रताराबलान्वि
ते मौंजिबंधः शस्तः इति॥ विष्णुमासेषु शुक्ले च पक्षेप्यनस्तगे॥ जीवे शुक्रे च भूकुजवर्जितवासरे॥ सेयहे॥ शूद्राणां राजपुत्राणां
मौंज्यभावे तु बंधनं॥ मौंजीबंधोक्तिथ्यादौ कार्यं भौमदिनं विना॥ अथ विवाहः॥ याज्ञवल्क्यः॥ अविप्लुतब्रह्मचर्यो ल
क्षण्यां स्त्रियमुद्वहेत्॥ अनन्यपूर्विकां कांतामसपिंडां यवीयसीं॥ अरोगिणीं भ्रातृमतीमसमानार्षगोत्रजां॥ लक्षण्यां
बाह्यांतरलक्षणैर्युक्तां॥ बाह्यानि काशीखंडादौ प्रसिद्धानि॥ आंतराणि अष्टौ पिंडान्कृत्वोपाश्वलायनोक्तानि॥ असपि
मनुः॥ असपिंडा च या मातुरसगोत्रा च या पितुः॥ सा प्रशस्ता द्विजातीनां दारकर्मणि मैथुने॥ इत्यत्र मातुर्गो
त्रिणा असपिंडापि सा [illegible]ः गोत्रः॥ तत्कुलजनिः॥ ये च मातुरसगोत्रा इत्यत्र मातुः पितुर्जनक [illegible] पितु

स्वगोत्रादिसपिंडत्वान्निवृत्तिस्तत्रयकारः

अस्थिभिरसृङ्मीतिस्तिं गा०१।२   श्री

श्रुतिरपि रतस्था द्दकौ त्रीकं सरीरे त्रीणि पितृतस्त्रीणि मातृ
तो स्थीस्नायुमज्जानः पितृतः त्वङ्मांसरुधिराणि
मातृत इति प्रजामनु प्रजायसेति

१६७ डां सापिंड्यरहितां॥ तच्चैकशरीरान्वयेन भवति। एकस्य हि पितुर्मातुर्वा शरीरस्यावयवाः पुत्रपौत्रादिषु संक्रांताः परंपरया वा
शुक्रशोणितादिरूपेणानुस्यूताः। यद्यपि पत्न्याः पत्या सह भ्रातृपत्नीनां च परस्परं नैतत्संभवति तथाप्याधारत्वेनैक
शरीरावयवान्वयोस्त्येव। एकस्य हि पितृशरीरस्यावयवाः पुत्रद्वारा तास्वाहिताः इति विज्ञानेश्वरादयः। चंद्रिकापरार्कमे
धातिथिमाधवादयस्तु एकपिंडदानक्रियान्वयित्वं सापिंड्यं। लेपभाजश्चतुर्थाद्याः पित्राद्याः पिंडभागिनः। पिंडदः स
प्तमस्तेषां सापिंड्यं साप्तपौरुषं। इति मात्स्योक्तेः। न च पितृव्यादिष्वेतन्नास्तीति वाच्यं। तत्कर्तृकश्राद्धे देवदत्तैकोनतत्स
त्वात्। देवदत्तकर्तृकश्राद्धे हि ये देवताभूतास्तेषां मध्ये यः कश्चिदन्यकर्तृकश्राद्धेनु प्रविशति तेषां सापिंड्यं तद्भार्या
णामपि भर्तृकर्तृश्राद्धे सहाधिकारित्वेन तदन्वयात्। किं बहुना सर्वाभावे तु नृपतिः कारयेत्तत्स्वरिक्थतः इति मा
र्कंडेयपुराणात्। राज्ञोपि श्राद्धकर्तृत्वात् सापिंड्यप्रसंगः। सत्यं। पंचमात्सप्तमादूर्ध्वं मातृतः पितृतस्तथेति। याज्ञवल्क्ये
वचनेन मातृपितृसंबंध एव तत्सत्वात्। ऊर्ध्वं सापिंड्यं निवर्त्ततइति शेषः। ननु पंचमत्वाद्यत्र निमम्यते मातृतः इत्या
दिवाक्यभेदात्। मैवं। मातृकुले पंचमत्वस्य पितृकुले सप्तमत्वस्य बोधनेन तुल्यत्वात्। पौरुषे पदेलदोषइति चेत्। तुल्य
मन्यत्रापि। किंच। अवयवान्वयपक्षेपि पश्चायोगरूढ्यापरिहारस्तथेहापि। तेन मातृकुले चैकपिंडदानक्रियान्वयित्वमपि त्वंसापिं
न च मातुलत्वादिष्वेतन्नास्तीति वाच्यं मातामहरूपदेवतैकत्वात् ननु गुरुशिष्यादेरपि श्राद्धे देवतात्वात्सपिंड
त्वं स्यात्॥ ८४ अन्यकर्तृके राजत। पितृणां चादेवतात्वाभावाच्च ×१ पितृकुले

न
एमः
त्या

संयोगपदद्वयनिरूप्यत्वात्

ध्यमित्याहुः। तेनैकस्य पित्रादयः षट् पुत्रादयः षट् च सपिंडा भवंति। अत्र केचिदुभयतः सापिंड्यनिवृत्तावेवोद्वाहो नान्य
थेत्याहुः। हारदत्तादयस्तु सगोत्रत्ववत्सापिंड्यस्य संप्रतियोगिकत्वेन एकतो निवृत्तावैमतो निवृत्तेरावश्यकत्वान्मू
लपुरुषमारभ्याष्टमो वरः मूलपुरुषमारभ्य द्वितीयात्तृतीयादिकामुद्वहेदित्याहुः। शिष्टास्तु नववधूवरयोः स्वतः सा
पिंड्यं। किंतु कूटस्थसंततित्वात्तत्सापिंड्ये नैवत्रंष्टोष्टमवरं प्रति कन्यायाः कूटस्थेन सापिंड्यात् तत्संततिस्थत्वात् असापिंड्ये पि कन्यायाः
वरस्तां प्रति सापिंड्य एवेत्यविवाहः। सापिंड्यासापिंड्ययोः प्रतियोगिभेदेनाविरोधादित्याहुः। इदमेव युक्तं। आशौचेप्ये
सा पि वं सापिंड्यं ज्ञेयं। यत्र तु मध्ये विच्छिन्नमपि मंडूकप्लुतिवत्तदनुवर्तते। यथा कूटस्थात्पंचम्योः कन्ययोः पुत्रौ तन्
तौ निवृत्तिः। तदपत्ययोस्त्वनुवृत्तिः। तत्रापि न दोषः संबंधिभेदात् तेन तत्र न विवाहः। अत्र कूटस्थमारभ्य गण
ना कार्या। तदुक्तं। बध्वा वरस्य वा तातः कूटस्थाद्यदि सप्तमः। पंचमी चेत्तयोर्माता तत्सापिंड्यं निवर्तते। इति। कूट
स्थो मूलपुरुषः। विश्वरूपनिबंधे। एवमुक्तप्रकारेणापि तु बंधुषु सप्तमात् ऊर्ध्वमेव विवाहस्त्वे पंचमान्मातृबंधुतः।
संतानो भिद्यते यस्मात्पूर्वजादुभयत्र च। तमारभ्य गणेद्धीमान् वरं यावच्च कन्यकां॥ स्मृतितत्त्वे नारदः। आसप्तमात्पं
चमाच्च बंधुभ्यः पितृमातृतः। अविवाह्यौ सगोत्रा च समानप्रवरा तथा। अत्र बंधुभ्यः इति पंचमीनिर्देशात् पितृपितृ
स्या

ष्वसृपुत्रात् सप्तमीं॥ मातुः पितृष्वसृपुत्राच्च पंचमीमपि त्यजेत। एवमन्यबंधुषु ज्ञेयं। तत्रापि त्रिगोत्रात्परेपि वर्गापि वि
वाहं कुर्यात। वक्ष्यमाणवचनात्। त्रिगोत्रगणनाचा मातामहगोत्रापेक्षया। अन्यथा पितुः पितामहदुहितुः दौ हित्री
परिणेयास्यात्। वस्तुमातामहगोत्रापेक्षयातु त्रिगोत्रांतर्गतेन विवाहप्रसंगापत्तिसंबंधत्वादयोगोऽयं यथाः संबंध
विवेके शूलपाणिराप्याह। पंचमात्सप्तमाद्वार्वागपि त्रिगोत्रांतरिता विवाह्याश्च यंति। बृहन्मनूक्तेः। संनिकर्षेपि क
र्त्तव्यं त्रिगोत्रात्परतो यदीति। देवलोक्तेश्चेति। एतच्चदाक्षिणात्यानमन्यंते। यत्तु वशिष्टः। पंचमीं सप्तमीं चैव मातृतः
पितृतस्तथेति। यच्चविष्णुपुराणं। पंचमीं मातृपक्षाच्चपितृपक्षाच्चसप्तमीं। गृहस्थ उद्वहेत्कन्यां न्यायेन विधिनानृ
पेति। तत्पंचमींसप्तमीमतीत्येति व्याख्येयं। पंचमे सप्तमे चैव येषां वैवाहिकी क्रिया॥ क्रियापरा अपि हि ते पतिताः
शूद्रतां गताः। इत्यपरार्के मरीचिवचनात्। हारलतायां शंखलिखितौ॥ सपिंडत्यात्तु सर्वेषां गोत्रतः साप्तपौरुषी। पिंडश्चो
दकदानं च आशौचं तदनुगं। पंचमीं मातृतः परिहरेत्सप्तमीं पितृतः त्रीन्मातृतः पंच पितृतो वेति पैठीनसिस्मृतोत्री
नित्यतत्कल्प इति माधवोक्तेः। यत्तु। पंचमीं सप्तमीं चैव मातृतः पितृतस्तथा। दशभिः पुरुषैः ख्याता श्रोत्रियाणां महाकु एमः
लात्। उद्वहेत्सप्तमादूर्ध्वं तदभावे तु सप्तमीं। पंचमीं तदभावे तु पितृपक्षेप्ययं विधिः। सप्तमी च तथा षष्ठी पंचमी च तथैव च।

एवमुद्वाहयेत्कन्यां न दोषः शाकटायनः। तृतीयां वा चतुर्थीं वा पक्षयोरुभयोरपि। विवाहयेत्मनुः प्राह पाराशर्योंगिरा यमः।
यस्तु देशानुरूपेण कुलमार्गेण चोद्वहेत्। नित्यं संव्यवहार्य्यः स्याद्वेताच्चैतन्न दृश्यते। इति चतुर्विंशतिमतात्। चतुर्थ-
मुद्वहेत्कन्यां चतुर्थः पंचमोपि वा। पराशरमते षष्ठीं पंचमो न तु पंचमीं। पराशरोक्तेश्चानुकल्पत्वेनापदि पंचम्यादिपरि-
णा। यत्नं कार्यमिति प्रतीयते। अत्र हितद्भावे इति स्पष्टमेवानुकल्पत्वमुक्तं। तन्न यथाश्रुतं ज्ञेयं पूर्वोक्तमरीचिवचन-
विरोधात्। वक्तानि विकल्पासंभवात्। पंचमात्सप्तमाद्धीनां यः कन्यामुद्वहेद्द्विजः। गुरुतल्पी स विज्ञेयः सगोत्रां
चैवमुद्वहन्। इति विष्णूक्तेश्च। तस्मात्मदनपारिजाताद्युक्तदिशा दत्तकसापत्नसंबंधाद्यनुप्रवेशे ब्राह्मणादा-
नां क्षत्रियादिसपिंडविषये वा पूर्वोक्तानि नेयानि। न त्वनुकल्प इति भ्रमितव्यं। यत्तु स्मृतिचंद्रिकामाधवादय आहुः।
तृतीये संगच्छावहै चतुर्थे संगच्छावहौ इति शतपथश्रुतेः। मातृपक्षस्तु तां केचित्। पितृपक्षस्तु तां तथा॥ विवहंति
क्वचिद्देशे संकोच्यापि सपिंडतामिति। शातातपोक्तेश्च मातुलकन्योद्वाहः कार्यः। यद्यपि पितृपक्षकन्योद्वाहः प्रा-
प्तस्तथाप्यस्वर्ग्यं लोकविद्विष्टमिति निषेधान्न कार्यः। अयं तु दाक्षिणात्यशिष्टाचारात्कार्य इति। न च पूर्वोक्तस्मृती-
नामर्थवादमात्रता मानांतरेणाप्रसिद्धोपरि दृष्टेभ्योधारयतीतिवदनुवादाद्युपपत्त्या विकल्पनात्। यत्तु शातातपः

१६९ मातुलस्यसुतामूढ्वामातृगोत्रांतथैवच।समानप्रवरांचैवत्यक्त्वाचांद्रायणंचरेत्।यच्चमनुः।पैतृष्वस्रेयींभगिनींस्वस्री
यांमातुरेवच।मातुश्चभ्रातुराप्तस्यगत्वाचांद्रायणंचरेत्।एतास्तिस्रस्तुभार्यार्थेनोपयच्छेत्तुबुद्धिमान्।यच्चव्यासः।मा
तुःसपिंडायत्नेनवर्ज्जनीयाद्विजातिभिरिति।तद्गांधर्वादिविवाहोढमातृविषयं।तत्रपितृगोत्रानिवृत्तेः।अतएवमार्कं
डेयपुराणे।गांधर्वादिविवाहेषुपितृगोत्रेणधर्मविदिति।ब्राह्मादिविवाहेतुपरिणीयैवेतिभट्टसोमेश्वरोपिमातुलकन्यो
द्वाहमुदाहृत्यस्मृतिविरोधेपिपूर्वोक्तश्रौतलिंगबलीयस्त्वादस्यकर्तव्यतामाह।तदेवदत्तकस्यपालककृचिममातृसो
दरकन्याविषयत्वेनासवर्णमातुलकन्याविषयत्वेनचोपपन्नमप्यविचारितरमणीयंयथातथास्तु।तथास्तु।त
थापिकलौतावन्निषिद्धमेवगोत्रान्मातुःसपिंडाच्चविघस्तथेति।आदित्यपुराणात्।माधवीयेबौधायनोप्यस्यनिं
दामाह।पंचधाविप्रतिपत्तिर्दक्षिणतस्तथोत्तरतः।क्रमशोविक्रयोऽनुपेतेनस्त्रियाचसहभोजनंपर्युषितभोजनंमातु
लपितृष्वसृदुहितृगमनंभट्टसोमेश्वरेणापिस्मृतिविरुद्धानांमातुलकन्योद्वाहादीनामस्मद्वचनादप्रामाण्यमिति।बृ
हस्पतिरपि।उह्यतेदाक्षिणात्यैर्मातुलस्यसुताद्विजैः।मत्स्यादाश्चनराःपूर्वेव्यभिचाररताःस्त्रियः।उत्तरेमद्यपाश्चै एमः
वस्पृश्यानृणांरजस्वलाः।इत्यनाचारत्वमाह।अतएवहेमाद्रौमात्स्ये।कर्णाटकादीनांतत्कारिणांश्राद्धनिषेधः।बोपदेवे

नापिलिखितं। ब्राह्मणाय च मातुलज्ञो हाही यत्र वै वृषलीपतिः। श्राद्धं न गच्छेत्तु द्विप्राः कृतं यच्च निरामिषमिति। तस्मान्मातृतः
पंचपितृतस्सप्तमश्चस्य क्रोद्वहेदिति सिद्धं। संबंधविवेके स्मृतेतुः। ब्राह्मणानामेकपिंडस्वधानामादशमाद्धर्मविच्छित्तिर्भ
वति। आसप्तमाद्रिक्थविच्छित्तिर्भवति। आतृतीयात्पिंडविच्छित्तिर्भवति। अन्यथाशौचक्रियाविच्छेदाद्ब्रह्महत्तुल्यो भ
वति। अस्यार्थमाह शूलपाणिः। जीवत्पित्रादिकस्य वृद्धप्रपितामहादयस्त्रयः श्राद्धदेवतास्पिंडभाजो भवंति।
तदूर्ध्वं नवपुरुषपर्यंता लेपभाजः। श्राद्धकर्त्ता च दशमः इति दशमादूर्ध्वं सापिंड्यनिवृत्तिः। दशमादिस्तु पलहरांतिन
पितृपितामहजीवते नवपुरुषपर्यंतं पितृजीवने चाष्टपुरुषपर्यंतं सापिंड्यमिति ज्ञेयं। अपुत्रधनग्रहणे सन्निहि
ताभावे सप्तपुरुषपर्यंतमधिकारः। धनग्राहिणामास्यतृतीयः। तदूर्ध्वं श्राद्धविच्छेदः। अन्यथा धनहारीत्वेः पुत्रश्रा
द्धकरणे ब्रह्महेत्यर्थः। आतृतीयादित्यनूढकन्याविषयं। अप्रत्तानां स्त्रीणां त्रिपुरुषी विज्ञायते इति वसिष्ठो
क्तो। एतच्चाशौचविषयसापिंड्यं न तु विवाहादौ। तत्र पूर्वोक्तवचनैः पंचमसप्तमवर्जनियमादिति दाक्षिणात्याः। वा
ग्दानोत्तरमेतदिति शुद्धिविवेकः। मातृकुलविषयं कानीनकन्याविषयं चैतत्। अन्यथा। अप्रत्तानां तथा स्त्रीणां
सापिंड्यं साप्तपौरुषं। प्रत्तानां भर्तृसापिंड्यं प्राह देवः प्रजापतिरिति कौर्मेण विरोधः स्यादिति रत्नाकरस्मृतितत्त्वादि गौड

१७०

ग्रंथाः।युक्तं चैतत्। अन्यथा कन्यकोत्पन्नो पुरुषत्रयपर्यंतमेव सूतकं स्यान्नोर्ध्वं सापत्नमातामहमिताक्षरायां शंखः। पयेकजा
ताबहवः पृथक्क्षेत्राः पृथक्कजनाः एकपिंडाः पृथक्शौचाः पिंडस्त्वावर्त्तते त्रिषु। पृथक्क्षेत्रा भिन्नजातीयस्त्रीषु जाताः पृथ
ग्जनाः सजातीयभिन्नमातृषु जाताः अत्र त्रिपुरुषसापिंड्यमिति विज्ञानेश्वरो व्याचख्यौ। पृथ्वीचंद्रोदये सापिंड्यदीपिका
यां चैवं। मदनपारिजाते तु पृथक्क्षेत्राः भिन्नमातृजाः पृथक्कजनाः। भिन्नजातीयाः एतद्विजातीयसापत्नमातृकुलविष
यं। सवर्णासापत्नमातृकुले च त्रिपुरुषं सापिंड्यं। पंचमीसप्तमीं चैव मातृतः पितृतस्तथेति वसिष्ठोक्तेः। सप्तमीति ब्राह्मणादी
नां क्षत्रियादिदारोत्पन्ने पितृकुलविषयं चेत्युक्तं। तत्त्वकपोलकल्पितत्वात् ग्रंथांतरविरोधाच्च निर्मूलं। अत एव तेन स्मृति
कौमुद्यां सवर्णासापत्नमातामहकुलत्वेन तथैव शंखवचनं व्याख्यातं। तेन वासिष्ठं पंचमीसप्तमीमतीत्येति व्याख्येयं। तस्मी
त्याच्चेव व्याख्या युक्ता॥ प्रयोगरत्ने भट्टैः। स्मृतितत्त्वादिगौडग्रंथेषु च सपत्नमातामहकुले यावदुक्तं वाचनिकमेव सापिंड्यमु
क्तं। यथाह सुमंतुः। मातृपितृसंबंधा आसप्तमाद्विवाह्याः भवंति। आपंचमादन्येषां। पितृपत्न्यः सर्वा मातरः तद्भ्रातरो मा
तुलाः तद्भगिन्यो मातृष्वसारः तद्दुहितरश्च भगिन्यः तदपत्यानि भागिनेयानि। अन्यथा संकरकारिण्यः स्युः तथाध्यापयि एतः
तुरेतद्देवेति। आपंचमादिति मातृकुले त्रिगोत्रांतरितमिति प्राच्याः। मात्स्ये समानप्रवरैश्चैव शिष्यसंततिरेव च। ब्रह्मदातुर्

रोश्चैव संततिः प्रतिषिध्यते। तद्भगिन्यो मातृष्वसारः इति तु आकरेण पठितं। क्वचिद्वचनाद्विवाहः। यथा गृत्स्यपरिशिष्टे विरु
द्धसंबंधामुपयच्छते स्फुटा विरुद्धसंबंधः स्वयमेवोक्तः। यथा भार्यास्वसुर्दुहिता पितृव्यपत्नी स्वसा चेति। बौधायनः। मातुः
सपत्न्या भगिनीं च तत्सुतां यविवर्ज्जयेत्। पितृव्यपत्न्या भगिनीं तत्सुतां चा विवर्ज्जयेत्। अतो मातृष्वसुः सापत्नपुत्रक
न्याप्यविवाह्या। सापत्नमातृकुलजामिति मदनपारिजातोक्ते रिति केचित्। किंचित्तु ज्येष्ठो भ्राता पितुः समः। इति मंनूक्ते
स्तस्या मातृत्वात्तत्सिलमां तामहस्याज्येष्ठभ्रातृपत्नी भगिनी न विवाह्या॥ तथा च स्पास्कब्रह्मदात्तोगौरीयान ब्रह्मदः पि
तेति मनूक्तेर्गुरुणा त्रिपुरुषं सापिंड्यं महस्यापि निर्वाप्यः। अतस्तेषां कन्या नोद्वाह्याः। गा पच्यालपदेषुः स्तककन्यां नैवो
द्वहेद्द्विजः। गुरोश्च कन्यां शिष्यो वा तत्त्वं तत्यापि नेष्यते। गुरुत्रयपर्यंतं भ्रात्रादेर्नैतदिष्यते। वाक्यं बंध कृतानां तु स्नेह
संबंधभागिनां॥ विवाहो त्वनकर्त्तव्यो लोकगर्हा प्रसज्यत इत्याहुः। तच्चित्यं। दत्तकविषये तूच्यते। तत्र गोतमः। ऊर्ध्वं
सप्तमात्पितृबंधुभ्यो बीजिनश्च मातृबंधुभ्यः पंचमादिति। अत्र स्मृतिचंद्रिका। नियोगाद्य उत्पादयति। तस्माद्बीजिने।
ष्यूर्ध्वं सप्तमादित्यर्थः। इति दत्तकस्य जनकविषयमेतदिति सापिंड्यमीमांसायां। तेन दत्तस्य जनककुले साप्तपौरुषं जननी
कुले पांचपौरुषं सापिंड्यं। दत्तक्रीतादिपुत्राणां बीजवप्तुः सापिंडता। सप्तमी पंचमी चैव गोत्रित्वं पालकस्य चेति। बृह

९२१ न्मनूक्तेः। बीजिनश्चेति गौतमोक्तेश्च। पालकपितृकुले तु पंचमपुरुषं पालकमातृकुले त्रिपुरुषं तथा चापरार्के पैठीनसिः।
त्रीन्मातृतः पंच पितृतः पुरुषानतीत्योद्वहेदिति। एतत्त एव व्याचख्यौ। दत्तकादीन् पुत्रान्पितृपक्षतो निवृत्तपिंडगोत्रार्षे
यान्प्रत्येतदुच्यते। पंचमः पितृतस्त इति नान्यान्प्रतीति। यत्तु गौतमः। स्वगोत्रे पुत्रकृता ये स्युर्दत्तक्रीतादयः सुताः। विधिना गो
त्रमायांति न सापिंड्यं विधीयते॥ यच्च वसिष्ठः। अनन्यशाखोद्भवो दत्तपुत्रश्चैवोपनायितः। स्वगोत्रेण स्वशाखोक्तविधिना स्या
त्स्वशाखभागिति। यच्च नारदः। धर्मार्थवर्द्धिताः पुत्रास्तत्तद्गोत्रेण पुत्रवत्। अंशपिंडविभागिति। यच्च नारदः। धर्मार्थवर्द्धि
ताः पुत्रास्तत्तद्गोत्रेण पुत्रवत्। अंशपिंडविभागित्वं तेषु केवलमीरितं इति। तत्पालककुले साप्तपौरुषं सापिंड्यं नेत्येवं प
रं न तु सर्वथा सापिंड्यनिषेधपरमिति। सापिंड्यमीमांसायां मदनपारिजातादपि दत्तकानुप्रवेशोऽल्पं सापिंड्यं प्रतिभाति।
तथाहि तेन त्रीनतीत्येत्युदाहृत्य। यस्य माता दत्तपुत्रीप्रतिग्रहीत्रा पुत्रीकृता तस्याः प्रतिग्रहीतृकुले त्रीनतीत्येति। पंच
पितृत इति। यस्य दत्तपुत्रोऽपि तातस्य दत्तस्य यज्जनककुलं तद्विषयमित्युक्तं। वस्तुतस्तु पूर्ववच्चैषां महानुबंधेषु कल्प्य एमः
नुपलंभात्। तत्रापरार्कादिलिखनाभावात् पूर्वोक्तव्यवस्थायाश्च प्रातिभज्ञानतुल्यत्वाद्धीरैस्तद्विचिंत्यतां। तेषामेव शोभते। म
मतं तु पालककुल एकपिंडदानक्रियान्वयित्वेरूपं साप्तपौरुषमेव सापिंड्यं। बीजिनश्चेति गौतमोक्तेर्जनककुले पिता

वरेवेति। त्रीन्मातृत इत्यादि पुत्रवर्गो सापत्नमातृकुलपरः॥ यद्येकजाता बहवः इति शाखैकशक्त्वादिति युक्तं प्रतिभाति।
अत एवास्य व्याख्यायणावेहे माद्विप्रवरमंजर्यान्त्विति कन्नारायणादिभिरुक्तं। भट्टसोमेश्वरेणापि पृथायाः कुंतिभोज
राज्ञास्यपालककन्यात्वेपि कुर्ध्वसप्तमात्पितृबंधुभ्यो बीजिनश्चेति गौतमोक्तेर्दत्रिमायाः पृथायाः जनकस्य शूरसे
नस्य कुलेपि साप्तपौरुषं सापिंड्यं। पालकमातृकुले त्रिपुरुषं॥ पिंडनिर्वापान्निर्वाप्यलक्षणं त्रिपुरुषं सापिंड्यं। पाल
कगोत्रेणोपनयनेन तत्कुले साप्तपौरुषमित्युक्तं। तन्न। चूडोपनयनसंस्कारा निजगोत्रेण वै कृताः॥ दत्ताद्यास्तनया
स्ते स्युरन्यथा दास उच्यते। इति कालिकापुराणात्। उपनयनोत्तरं दत्तकनिषेधात्॥ त्रैपुरुषमित्यपि चामूलं मृग्यं
। इत्यलं बहुना॥ मातापितृभ्यामेकसापिंड्यवतीनां कन्यकान्यमियं संख्या। उद्वोढुः पितरौ पितुश्च पितरौ तज्जन्मकृद्दं
पती द्वंद्वं तस्य चतुष्कमष्ट च ततोप्यस्य क्रमात् षोडश। वंशारंभकदंपतीप्रतिरित्यासप्तकद्वंद्वाः एकैकान्वयकन्य
काः पितृकुले त्वासप्तकद्वंद्वे। यद्यप्येकस्य बहवः सुताः स्युस्तदपीह। तुः। संबंधसाम्यादेकैव गणितेत्यवधा
र्यतां॥ एकस्मान्मिथुनात्सुतोथ दुहिता द्वंद्वं द्वयं तद्द्वयात्तस्माद्द्वंद्वचतुष्कमष्ट च ततोतः षोडशांतोद्वाः॥ यावत्सप्तम
कद्वंद्वमभिज्ञस्तवः कन्या इहैकान्वये तादृंते गुणिता रसैकरवद्वंशोवंशे सपिंडाः पितुः। मातुर्जन्मकृद्दंपती च मिथुनं द्वंद्वं

१७२ तयोः साम्यात्तस्याः पंचमः। कश्चिद्दशो वंशो यद्विंशत्तमस्त्वमिति। इत्येकान्वयः पुंसुते। द्वंद्वाद्वंद्वयुगं ततोथ परतोशेषे पंचकद्वं
शस्तो णपः सप्तगुणाः शुणश्च विधवो मातुः सपिंडाः कुले। कुलद्वयस्य कन्यकासुता मिथः सपिंडकाः। हिमांशुदृग्धवा
द्दशो विवाहकर्मवर्जिताः इति एतच्च सर्ववर्णसाधारणं। सर्वत्र सापिंड्यं सप्तमाद्वादिति विज्ञानेश्वरोक्तेः। पंचमात्सप्त
मादूर्ध्वं मातृतः पितृतस्तथा। सपिंडता निवर्तेत सर्ववर्णेष्वयं विधिरिति ह नाप्यपृतद्वलवचनाच्च। असंबंधतत्वे सु
मंतुः पितृष्वसृसुतां मातृष्वसृसुतां मातुलसुतां मातृसगोत्रां समानार्षेयीं विवाह्य चांद्रायणं चरेत्। परित्यक्त्वैनां
मातृवद्बिभृयादिति दिक्। ऋषेरिदमार्षं प्रवरः। गोत्रं प्रसिद्धं। समाने आर्षगोत्रे यस्य तस्माज्जाता या न भवति तां। अ
यं संक्षेपेण गोत्रप्रवरनिर्णयः। तौ चाभिन्नौ निषेधे निमित्तं। सगोत्राय दुहितरं न प्रयच्छेत्। इत्यापस्तंबोक्तेः। असमा
नप्रवरैर्विवाहः इति गौतमोक्तेश्च। तत्र गोत्रलक्षणमाह प्रवरमंजर्यां बौधायनः। विश्वामित्रो जमदग्निर्भरद्वाजोथ गौ
तमः। अत्रिर्वसिष्ठः कश्यपः सप्तैते ऋषयः स्मृताः। सप्तानामृषीणामगस्त्याष्टमानां यदपत्यं तद्गोत्रमिति। यद्यपि के
वलभार्गवेष्वार्ष्टिषेणादिषु केवलांगिरसेषु च हरितादिषु नैतत्। भृग्वंगिरसोरुक्तेष्वनंतर्गतः। तथाप्यत्रेष्टापत्तिरे एम्नः
वेति केचित्। अत एव स्मृत्यर्थसारे प्रवरैक्यादेवात्राविवाह उक्तः। यद्यपि वसिष्ठादीनां न गोत्रत्वं युक्तं। तेषां सप्तर्षित्वेन

तदपत्यत्वाभावात्।तथापितत्पूर्वभाविवसिष्ठाद्यपत्यत्वेनगोत्रत्वंयुक्तं।अतएवपूर्वेषांपरेषांचैतद्गोत्रं।अत्रविशेषो
स्मृतेःप्रवरदर्पणेज्ञेयः।प्रवरास्तुप्रवरणानिप्रवराः।कल्पकाराद्विवासिष्ठेतिहोता।वसिष्ठवदित्यध्वर्युरित्यादि
नायेषांवरणमामनंतितेप्रवराः।तच्चरणंयद्यपिगोत्रभूतस्यापिक्वचिद्दृश्यतेतथापिपूर्ववदृषिभेदोद्रष्टव्यः।अ
न्यथातेषांत्र्यार्षेयएकार्षेयइत्यादिनिर्देशानुपपत्तेः।अन्येतुतद्गोत्राणांत्र्यार्षेयइतिभेदमाहुरितिदिक्।सम
त्ययमाः।त्रियमाणातयावापिमन्त्रयावानुवर्त्तनं।एकस्यदृश्यतेयत्रतद्गोत्रंतस्यकथ्यते।अत्रविशेषमाह
बौधायनः।एकएवऋषिर्यावत्प्रवरेष्वनुवर्त्तते।तावत्समानगोत्रत्वमृतेभृग्वंगिरोगणात्।भृग्वंगिरोगणेषुतुमा
धवीयेभ्यंतरे।पंचानांत्रिषुसामान्यादविवाहः।त्रिषुद्वयोः।भृग्वंगिरोगणेष्वेवंशेषेष्वेकोपिवारयेत्।बौधायनो
पि।भृग्वंगिरसावधिकृत्य।द्व्यार्षेयसंनिपाते।विवाहस्त्र्यार्षेयाणां।त्र्यार्षेयसंनिपातेऽविवाहःपंचार्षेयाणामि
ति।केचिदेवंवदंति।भृग्वंगिरोगणेष्वपिजमदग्निभरद्वाजगौतमेष्वेकप्रवरसाम्येसर्वेषामप्यसाम्येवासगोत्र
त्वादेवाविवाहइतिदिक्।अथगोत्राणिप्रवराश्चोच्यंते।बौधायनः।गोत्राणांचसहस्राणिप्रयुतान्यर्बुदानिच।
ऊनपंचाशदेवैषांप्रवराऋषिदर्शनात्।तत्रसप्तभृगवः।वत्साविदाआर्ष्टिषेणायास्कामित्रयुवावैन्याःशुनकाः

१७३

ति।वत्सानांभार्गवच्यवनाप्नवानौर्वजामदग्न्येति।भार्गवौर्वजामदग्न्येतिवा।विदानांभार्गवच्यवनाप्नवानौर्ववैदेति।भार्ग
वौर्वजामदग्न्येतिवा।एतौद्वौजामदग्न्यसंज्ञौ॥ आर्ष्टिषेणानां।भार्गवच्यवनार्ष्टिषेणानूपेति।भार्गवार्ष्टिषेणानूपेति।
वा॥एषात्रयाणापरस्यामविवाहः।वत्स्यानांभार्गवच्यवनाप्नवानेति।वत्सपुरोधसयोःपंच।भार्गवच्यवनाप्नवान
वात्सपौरोधसेति।बैजवानिमथितयोःपंच।भार्गवच्यवनाप्नवानवैजनेमाथितेति।एतेत्रयःक्वचित्।एषामपिपूर्वे
रविवाहः।अत्रतत्त्वद्रष्टाच्छास्त्रषयोन्यश्चविशेषोमन्त्रकृतेप्रवरदर्षणोज्ञेयः।यास्कानां।भार्गववैतहव्यसावेतसे
ति।मित्रयुवानांभार्गववाध्र्यश्वदिवोदासेति।भार्गवच्यवनदैवोदासेतिवा।वाध्र्यश्वेत्येकोवा।वैन्यानांभार्गव
वैध्र्यश्वदिवोदान्यपार्थेति।एतेएवश्येताः।शुनकानांशुनकेतिवा।गार्त्समदेतिवा।भार्गवगार्त्समदेतिद्वौवा।
भार्गवशौनहोत्रगार्त्समदेतित्रयोवा।वेदविश्वज्योतिषां।भार्गववेदवैश्वज्योतिषेति।शाठमाठराणां।भार्गव
शाठमाठरेति।एतौद्वौक्वचित्।यास्कानांस्वगणांत्यस्कासर्वैविवाहः।तदुक्तंस्मृत्यर्थसारे।यास्कामित्रयुवौ
वैन्याःशुनकाःप्रवरैक्यतः।स्वस्वंहिगणागणासर्वैविवहेयुःपरावौरीति।अथांगिरसः।तेगोतमाः।भरद्वाजाःकेवलां एमः
गिरसश्चेतित्रिधा।तत्रगोतमाःदश।आयास्याःशारद्वताःकौमंडाःदीर्घतमसःऔशनसाःकारेणपालयः।राहू

गणाः सोमराजकाः वामदेवाः वृहदुक्थाश्चेति। तत्रायास्यानां। आंगिरसायास्यगौतमेति। शरद्वतानामांगिरसगौतम।
शारद्वतेति। कौमंडनानां आंगिरसौतथ्यकाक्षीवतगौतमकौमंडेतिवा। आंगिरसायास्यौशिजगौतमकाक्षीवतेतिवा।
आंगिरसौतथ्यगौतमौशिजकाक्षीवतेति त्रयो वा दीर्घतमसां आंगिरसौतथ्यकाक्षीवतगौतमदैर्घतमसेति।
आंगिरसौतथ्यदैर्घतमसेति त्र्यो वा औशनसामांगिरसगौतमौशनसेति त्र्ये करेणुपालानामांगिरसगौतम
कारेणुपालेति त्र्यः राहूगणानामांगिरसराहूगणगौतमेति। सोमराजकानामांगिरससोमराजगौतमेति। वाम
देवानामांगिरसवामदेव्यगौतमेति। बृहदुक्थानामांगिरसबार्हदुक्थ्यगौतमेति। आंगिरसवामदेववार्हदुक्थे
तिवा। उतथ्यानामांगिरसौतथ्यगौतमेति। राघुवानामांगिरसराघुवगौतमेति। एतौ द्वौ क्वचित्। एषां सर्वेषां गौ
तमेति। राघुवानामांगिरसराघुवगौतमेति। एतौ द्वौ क्वचित्। एषां सर्वेषां गौतमानामविवाहः। अथ भरद्वाजाः। ते च
त्वारः भरद्वाजाः। गर्गाः। ऋक्षाः। कपयः इति। भरद्वाजानामांगिरसबार्हस्पत्यभारद्वाजेति त्र्यृषः। गर्गाणामांगिरसबा
र्हस्पत्यभारद्वाजसैन्यगार्ग्येति पंच। आंगिरससैन्यगार्ग्येति वा। अंत्ययोर्व्यत्ययः भारद्वाजगार्ग्यसैन्येति वा। गर्गभे
दानां। आंगिरसतैत्तिरिकापिभुवेति। गर्गा आंगिरससैन्येति त्र्यृषश्चेति। तस्मिन्पक्षे आंगिरसस्छभरद्वाजगर्गयोर्विवाहः।

ऋक्षाणां कपिलानां चांगिरसबार्हस्पत्यभारद्वाजवांदनमातवचसेति पंच। आंगिरसवांदनमातवचसेति त्रयो वा। कपिलानां
मांगिरसामहीयवौरुक्षयसेति। आत्मभुवामांगिरसभारद्वाजबार्हस्पत्यसमैत्रवएत्मभवेति पंच वा। अयं कश्चित्। भरद्वाजानां
सर्वेषां भृग्वंगिरोगणात पंचानां त्रिषु साम्यात त्रिषु द्वयोः साम्याच्च परस्परमविवाहः। नहि एक साम्यात। इतरेषु एकोपि
वारयेदिति। अविवाहः। अथ केवलांगिरसः। हरितानामांगिरसांबरीषयौवनाश्वेति। आद्यो माधाता वा। कुत्सानामांगि
रसमांधातकौत्सेति। कण्वानामांगिरसाजमीढकाण्वेति। आंगिरसघोरकाण्वेति वा। रथीतराणामांगिरसवैरूपपा
र्षीतरेति। आंगिरसवैरूपपार्षदश्वेति वा। अष्टादंष्ट्रपार्श्वदश्ववैरूपेति वा। अंत्ययोर्व्यत्ययो वा। मुद्गलानामांगिरसभा
र्म्यश्वमौद्गल्येति। आद्यः तार्क्ष्यो वा। आंगिरसाविमौद्गल्येति वा। विष्णुवृद्धानामांगिरसपौरुकुत्सत्रासदस्यवेति। ए
षां स्वगणं विहाय सर्वैर्विवाहो भवति। हरितकुत्सयोस्तु न भवति। अथात्रयः। ते चत्वारः। आत्रेया वाद्भुतकाः। ग
विष्ठिराः। मुद्गला इति। आद्यानामात्रेयार्चनानशश्यावाश्वेति। वा। अद्भुतकानामात्रेयार्चनानशश्यावाद्भुतकेति।
धनंजयानामात्रेयार्चनानशधानंजयेति क्वचित्। गविष्ठिराणां आत्रेयार्चनानशगाविष्ठिरेति। आत्रेयगाविष्ठिरपौ
र्वातिथेति वा। मुद्गलानामात्रेयार्चनानशपौर्वातिथेति। वामरथ्यसुमंगलवैजवापानामात्रेयार्चनानशातिथेयेति।

रामः

आत्रेयार्चनानसगाविष्टिरेति वा। मुद्गलानामत्रिमुद्गलश्यावाश्वेति केचित्। अत्रेः पुत्रिकापुत्राणामात्रेयवामरथ्यपौ-
त्रिकेति। अत्रीणां सर्वेषामविवाहः अथ विश्वामित्राः ते दश। कुशिकाः। लोहिताः। रौक्षकाः। कामकायनाः। अजाः कताः
धनंजयाः। अघमर्षणाः पूरणाः इंद्रकौशिकाः इति। कुशिकानां वैश्वामित्रदेवरातौदलेति। लोहितानां विश्वामित्राष्टक-
लौहितेति। अत्यपोर्व्यत्यपो वा। वैश्वामित्रमाधुच्छंदसाष्टकेति वा। विश्वामित्राष्टकेति वा। रौक्षकाणां वैश्वामित्रगाथि-
नरैवणेति। वैश्वामित्रौक्षकरैवणेति वा। कामकायनानां वैश्वामित्रदेवश्रवसदेवतरसेति। अजानां वैश्वामित्रमाधु-
च्छंदसाजेति। वैश्वामित्राश्मरथ्यवाधूलेति वा। अघमर्षणानां विश्वामित्राघमर्षणकौशिकेति। पूरणानां विश्वामि-
त्रपैरणेति द्वौ। वैश्वामित्रदेवरातपूरणेति वा। इंद्रकौशिकानां विश्वामित्रेंद्रकौशिकेति द्वौ। धनंजयानां विश्वामित्र-
माधुच्छंदसधानंजयेति। वैश्वामित्रमाधुच्छंदसाघमर्षणेति वा। कतानां वैश्वामित्रकातात्कीलेति। एते बौधायनो-
क्ताः। रोहिणानां वैश्वामित्रमाधुच्छंदसरौहिणेति। रेणूनां वैश्वामित्रगाथिनरैवणेति। जह्नूनां वैश्वामित्रशालंकाय-
नकौशिकेति। आश्मरथ्यानां वैश्वामित्राश्मरथ्यवाधूलेति। उदवेणूनां वैश्वामित्रगाथिनरैणवेति। एते आश्वलायन-
मात्स्योक्ताः। अन्ये त्वन्येपि षड्गणा उक्ताः। तेन्येत्रमत्कृतौ ज्ञेयाः। एषां विश्वामित्राणामविवाहः। अथ कश्यपाः। ते पंच।

१७५ निध्रुवाः कश्यपाः शांडिल्याः रेभाः लौगाक्षयश्च। निध्रुवाणां काश्यपावत्सारनैध्रुवेति। कश्यपानां काश्यपावत्सारा
सितेति। रेभाणां काश्यपावत्साररैभेति। शांडिल्यानां काश्यपावत्सारशांडिल्येति। अंत्यस्थाने देवलो वाऽसितो वा। शां
डिल्यासितदेवलेति वा। काश्यपावत्सासितदेवलेति। अंत्ययोर्व्यत्ययो वा। देवलासितेति वा। लौगाक्षीन्वक्ष्यामः। एषां कश्यपा
नामविवाहः। अथ वासिष्ठाः। ते पंचधा। वासिष्ठाः कुंडिनः उपमन्यवः पराशराः जातूकर्ण्याश्चेति। वासिष्ठानां वासिष्ठेंद्रप्रम
द्वाभरद्वस्विति वासिष्ठेत्येको वा। कुंडिनानां वासिष्ठमैत्रावरुणकौंडिन्येति। उपमन्यूनां वासिष्ठेंद्रप्रमदाभरद्वस्विति। वा
सिष्ठाभरद्वस्विंद्रप्रमदेति वा। आद्ययोर्व्यत्ययो वा। पराशराणां वासिष्ठशक्तिपराशरेति। जातूकर्ण्यानां वासिष्ठात्रेयजातू
कर्ण्येति। वासिष्ठानां सर्वेषां अविवाहः। अंत्यं स्यात्रिभिश्च। अथागस्त्याः। ते चत्वारः। इध्मवाहाः सोमवाहाः सांबवा
हाः यज्ञवाहाश्चेति। आद्यानामागस्त्यदार्ढ्यच्युतैध्मवाहेति। आगस्त्येत्येको वा। सोमवाहानामागस्त्यदार्ढ्यच्युतसो
मवाहेति। सांभवाहानां सांभवाहोऽन्त्यः। यज्ञवाहानां यज्ञवाहोऽन्त्यः। आद्यौ पूर्वौ क्रमादेव। सासाहामातहंतास्त्रयपः। दर्भवाहा
नांतदंतास्त्रयः। अगस्तीनामागस्त्यमायोभुवेति। पूर्णमासानामागस्त्यपौर्णमासपारणेति। हिमोदकानामागस्त्यहै एमः
मवर्चिहैमोदकेति। पाणिकानामागस्त्यपैनायकपाणिकेति। एते षट् क्वचित्। अगस्तीनां सर्वेषामविवाहः। अथ द्विगो

त्राः शौंगशैशिरीणां आंगिरसबार्हस्पत्यभारद्वाजकात्याक्षीलेति पंच। कात्याक्षीलयोः स्थाने शौंगशैशिरी वा। आं
गिरसकात्याक्षीलेति त्र्यो वा। एषां भरद्वाजैर्विश्वामित्रैश्चाविवाहः। एवं कपिलानां कतानां च। संकृतिप्रतिमाषादी
नां आंगिरसगौरिवीतसांकृत्येति। शाक्त्यगौरिवीतसांकृत्येति वा। एषां स्वगणस्थैर्वसिष्ठैः शौंगशैशिरैर्लौगाक्षि
भिश्चाविवाहः। कश्यपैरपीति प्रयोगपारिजाते। लौगाक्षीणां काश्यपावत्सारवासिष्ठेति। काश्यपावत्सारासितेति
वा। एते ह्यर्वसिष्ठानन्तःकश्यपाः। एषां वसिष्ठैः कश्यपैः सांकृत्यादिभिश्चाविवाहः। देवरातस्य जामदग्न्यैर्विश्वामित्रैः
श्चाविवाहः। इति प्रयोगपारिजाते। तदयुक्तं बह्वृचश्रुतौ यथैवांगिरसः सन्नुपेयात्तव पुत्रतामिति बह्वृचशौंगिरे
गणस्थत्वोक्त्या भार्गवजामदग्न्यत्वस्य तेबोधात्। तेन प्रत्यक्षस्याहरिवंशादिस्मृतेरपि बाधः। तेन द्वौ देवरातौ
। एक आंगिरसः अन्यो भार्गवः। तयोः कल्पभेदेप्यांगिरसेन देवरातेन भार्गवजमदग्नेर्भवत्येव विवाहः। भार्गवेण
देवरातेन तु नेति तत्त्वं। धनंजयानां विश्वामित्रैरत्रिभिश्चाविवाहः। जातूकर्ण्यानां वसिष्ठैरत्रिभिश्चाविवाहः। एवं
दत्तकक्रीतकृत्रिमस्वयंदत्तपुत्रिकापुत्रादीनां उत्पादकपालकयोरपि पित्रोर्गोत्रप्रवरा वर्ज्या इति प्रवरमंजर्यादयः।
अत्र सर्वत्रोपपत्तयः मूले च मत्कृते प्रवरदर्पणे ज्ञेयमिति दिक्। क्षत्रियवैश्ययोस्तु पुरोहितगोत्रप्रवरा एवेति सर्वं। इति द्वांतः

१७६

यद्यपिबह्वृचपरिशिष्टेकपिभरद्वाजयोर्विवाहउक्तस्तथापि।भरद्वाजाश्वकपयोगार्ग्यरौक्षायणाइति।चत्वारोपिभरद्वाजा
गोत्रैक्यान्नान्वायुर्मिथः।भारद्वाजाश्चकपयोगार्ग्यारौक्षायणाद्विजाः।नोद्वहेयुःस्वगोत्रत्वात्प्रवरैक्याच्चकुत्रचित्।इति
स्मृत्यर्थसाराद्युक्तोविवाहस्तावत्तयोरपिप्रवरमंजर्य्यांयद्यपीदमुक्तं।तथापिभृग्वंगिरोगणोक्तभक्त्यैव।तथाबह्वृच
परिशिष्टेबौधायनः।एकएवऋषिर्यावत्प्रवरेष्वनुवर्त्तते।तावत्समानगोत्रत्वमृतेभृतेभृग्वंगिरोगणात्।माधवीयेस्मृ
त्यंतरे।पंचानांत्रिषुसामान्यादविवाहस्त्रिषुद्वयोः।भृग्वंगिरोगणेष्वेवंशेषेष्वेकोपिवारयेत्।इतिदेशाचाराच्चोसोपि
आभीरदेशेप्रसिद्धः।चतुर्विंशतिमते।यस्तुदेशानुरूपेणकुलमार्गेणचोद्वहेत्।नित्यंसंव्यवहार्यःस्याद्वेदाच्चैत
त्प्रदृश्यतइतिदिक्।तथाचभृगुः।यस्मिन्देशेपुरेग्रामेत्रैविद्येनगरेपिवा।योयत्रविहितोधर्मस्तंधर्मंनविचालयेदि
ति।पुनश्चतुर्विंशतिमतं।यस्मिन्देशेयआचारपारंपर्यक्रमागतः।वर्णानांकिलसर्वेषांससदाचारउच्यते।सगो
त्राघस्नानेप्रसत्याषाढः।अथाज्ञातबंधोःपुरोहितप्रवरेणाचार्यप्रवरेणवेति।आचार्यगोत्रप्रवरानभिज्ञस्तुद्विजःस्व
यं।दत्वात्मानंतुकस्मैचित्तद्गोत्रप्रवरोभवेत्।यद्वास्वगोत्रप्रवराविष्णुरोजमदग्निजः।विवाहंचनतेनैवगोत्रेणतुस एमः
माचरेत्तइतिकश्चित्।अथमातृगोत्रनिर्णयः।शातातपः।मातुलस्यसुतामूढ्वामातृगोत्रांतथैवच।समानप्रवरांचै

वरगत्वाच्चांद्रायणंचरेत्। यद्यपिसगोत्रांमातुरप्येकनेच्छंत्युद्वाहकर्मणि। जन्मनाम्नोरविज्ञाने पुद्वहेद्विशंकितः इतिव्या
सोक्तेरज्ञातनामत्वेन सगोत्रत्वदोषस्तथापिनेदंकलौप्रवर्त्तते। गोत्रान्मातुःसपिंडाच्चविवाहोगोवधस्तथेति। कलिव
र्ज्येषूक्तेः। इदंमातृगोत्रवर्ज्जनंमाध्यंदिनीयानामेव। मातृगोत्रंमाध्यंदिनीयानामपुत्रायाश्चेतिसत्याषाढोक्तेरिति
कश्चित्। तन्निर्मूलं। अन्यथागुर्ज्जरादेःकातीयस्यकुतोननिषेधः। अतएवोद्वाहप्रवरमंजरीकारः दोषस्यातिगुरुत्वा
त्सर्वेषांमातृगोत्रंवर्ज्यमिति। यत्तु। एकस्मिन्प्रवरेतुल्येमातृगोत्रेवरस्यच। तमुद्वाहंनकुर्वीतसाकन्याभगिनीस्मृते
ति। मातृकुलेप्रवराचिंतनमुक्तं। तदासुरादिविवाहोढापरमितिदिक्। विस्तरस्तुग्रंथांतरेभ्योज्ञेयः। सगोत्रादिवि
वाहेप्रायश्चित्तंस्मृत्यर्थसारे। इत्थंसगोत्रसंबंधविवाहविषयेस्थिते। यदिकश्चित्ज्ञानतस्तांकन्यामूढोपगच्छति। गु
रुतल्पव्रताच्छुद्धोगर्भस्तज्जोन्त्यतांव्रजेत्। भोगतस्तांपरित्यज्यपालयेज्जननीमिव। अज्ञानादैंदवैःशुध्येत्त्रिभि
र्गर्भस्त्वकस्यपः। एवंमातृसपिंडायामपिसपिंडापत्यदारेषुप्राणत्यागोविधीयते। इतिबृहद्यमोक्तेः। इति। यत्तुबौधायनः। स
पिंडांसगोत्रांचेदमंत्रोपयच्छेन्मातृवदेनांबिभृयादिति। कन्याविवाहकालउक्तोज्योतिर्निबंधे। षडब्देमध्येनोद्वाह्याक
न्यावर्षद्वयंयतः। सोमोभुंक्तेततस्तद्वद्गंधर्वश्चतथानलः। [illegible]मान्तेऽः। अयुग्मेदुर्भगानारीयुग्मेतुविधवाभवेत्। तस्मा

ज

१७७ द्रुर्भान्वितेयुग्मेविवाहेत्साप्रतिक्रता।।मासत्रयादूर्ध्वमयुग्मवर्षेयुग्मेतुमासत्रयमेवयावत्।विवाहशुद्धिंप्रवदंतिसंतोवात्स्याद
येःस्त्रीजनिजन्ममासात्।पराशरमाधवीयेतु।जन्मतोगर्भाधानाद्वापंचमाब्दात्परंशुभं।कुमारीवरणंदानंमेखलाबंधनं
तथेसुक्तं।संबंधतत्वेयमः।कन्याद्वादशवर्षाणियाप्रदत्तावसेद्गृहे।ब्रह्महत्यापितुस्तस्याःसाकन्यावरयेत्स्वयं।।भार
ते।त्रिंशद्वर्षःशोडशाब्दांभार्यांविंदेतनग्निकां।दशवर्षोष्टवर्षोवाधर्मेसीदतिसत्वरः।अतोःप्रवृत्तेरजसिकन्यांदद्यात्पिता
सकृत्।तत्रैव।सप्तसंवत्सरादूर्ध्वंविवाहःसार्ववर्णिकः।कन्यायाःशस्यतेराजन्नान्यथाधर्मगर्हितः।यावन्नलज्जयां
गानिकन्यापुरुषसंनिधौ।योन्यादीन्यवगूहेततावद्भवतिनग्निका।अमरकोशस्तु।नग्निकानागतार्तवेति।राजमा
र्तंडः।एडूयस्तेतथाशुद्धेपितृणांप्राणसंशये।अतिप्रौढाचयाकन्याचंद्रलग्नबलेनतु।मनुः।त्रिंशद्वर्षोवहेत्कन्यांद्वा
दशवार्षिकींत्र्यष्टवर्षोष्टवर्षांवाधर्मेसीदतिसत्वरः।यद्यपि।विवाहस्त्वष्टवर्षायाःकन्यायाःशस्यतेबुधैरितिसंवर्त्तो
क्तेः।अतऊर्ध्वंरजस्वलेत्यादेश्चदशवर्षादूर्ध्वंविवाहोनिषिद्धस्तथापिदातुरभावेद्वादशषोडशाब्देज्ञेये।त्रीणिवर्षा
ण्यृतुमतीकांक्षेतपितृशासनमितिपराशरमाधवीयेबौधायनोक्तेश्च।मनुः।नर्क्षवृक्षनदीनाम्नींनांत्यपर्वतनामि एपः
कां।नपक्ष्यहिप्रेष्यनाम्नींनचभीषणनामिकां।यमः।यस्मादुद्वाहयेत्कन्यांयावन्नर्तुमतीभवेत्।तथामूलादीनांफ

त्वं मा गुरुक्रं गतथा वर्स्म वश्यग्रहे मे त्यादि घदितविचारो ज्योतिर्विद्भ्यो ज्ञेयः॥ विस्तरभयान्नु नोच्यते। अथ गुर्वर्कबलं ज्योतिर्निबंधे गार्ग्यः॥ स्त्रीणां गुरुबलं श्रेष्ठं पुरुषाणां रवेर्बलं। तयोश्चंद्रबलं श्रेष्ठमिति गर्गेण भाषितं॥ जन्मत्रिदशमारिस्थः पूजया शुभदो गुरुः॥ विवाहे थ चतुर्थाष्टद्वादशस्थो मृतिप्रदः॥ देवलः॥ नष्टात्मजा धनवंती विधवा कुसीला पुत्रान्विता हतधवा सुभगा विपुत्रा स्वामिप्रिया विगतपुत्रधवा धनाढ्या बंमृत्युगः अतिशोभनतां दद्यात विवाहे बंध्या भवेत्सुरगुरौ क्रमशो जनेर्भात्॥ मेषचापकुलीरस्थो जीवो जन्मांत्यमृत्युगः अतिशोभनतां दद्यात विवाहोपनयादिषु॥ लल्लः॥ द्वादशदशमचतुर्थे जन्मनि षष्ठाष्टमे तृतीये च। प्राप्ते पाणिग्रहणे जीवे वैधव्यमाप्नोति॥ गार्ग्यः॥ सर्वत्रापि शुभं दद्यात्॥ द्वादश्याद्वात्परं गुरुः॥ पंचषष्ठाष्टयोरेव शुभगोचरता मता॥ स्वजन्ममासं च वर्षेषु सोच्चस्वर्क्षगतो यदि। अशुभोपि शुभं दद्यात् शुभदस्तैषु किं पुनः॥ रत्नमालायां॥ कन्यायां गुरुशुद्धिं न चिंतयेत्॥ अष्टमेपि प्रकर्तव्यो विवाहः॥ त्रिगुणार्चनात्। अर्कगुर्वोर्बलं गौर्यां रोहिण्यर्कबला स्मृता॥ कन्या चंद्रबला प्रोक्ता वृषली लग्नतो बला॥ अथ बृहस्पतिशांतिः॥ शौनकः॥ कन्यकोद्वाहकाले तु ह्यानुकूल्यं न विद्यते ब्राह्मणस्योपनयने गुरोर्विधिरिहाहृतः॥ सुवर्णेन गुरुं कृत्वा पीतवस्त्रेण वेष्टयेत्॥ ईशान्यां धवलं कुंभे धान्योपरि निधापयेत्॥ दमनं मधुपुष्पं च पलाशं चैव सर्षपान्॥ मां

हीरगुडूच्यपामार्गविडंगांशंखिनीवचां॥ सहदेवीहरिक्रांतांसर्वौषधीशतावरीं॥ बलांचसहदेवींचनिशाद्वितयमेवच॥ कलाद्य
भागपर्यंतस्वशाखोक्तविधानतः॥ ग्रहोक्तमंडलेभ्यर्च्यपीतपुष्पाक्षतादिभिः॥ देवपूजोक्तकालेचततः कुंभानुमंत्रणं॥ अ
श्वचसमिधश्चाज्यंपायसंसर्पिषायुतं॥ पवश्रीहितिलासान्यामंत्रेणैवबृहस्पतेः॥ अष्टोत्तरशतंसर्वंहोममशेषंसमापयेत
॥पुत्रदारसमेतस्यअभिषेकंसमाचरेत॥ कुंभाभिमंत्रणोक्तैश्चसमुद्रज्येष्ठमंत्रतः॥ प्रतिमांकुंभंवस्त्रंचआचार्यायनिवे
दयेत॥ ब्राह्मणान्भोजयेत्पश्चाच्छुभदःस्यान्नसंशयः॥ इतिबृहस्पतिशांतिः॥ शौनकः॥ गुर्वादित्येव्यतीपातेवक्रातीचा
रगेगुरौ॥ नष्टेशशिनिशुक्रेवाबालेवृद्धेतथागुरौ॥ पौषेचैत्रेचवषोस्मृशाद्याधिकमासके॥ केतूद्गमेनिरंशेर्केसिंहस्थेम
रमंत्रिणि॥ विवाहव्रतयात्रादिपुरहर्म्येगृहादिकं॥ क्षौरंविद्योपविद्यांचयत्नतःपरिवर्जयेत॥ मदनपारिजातेज्योतिःसा
गरे॥ बालेशुक्रेवृद्धेशुक्रेनीचेवृद्धेनष्टेजीवे॥ बालेजीवेसिंहेजीवेसिंहादित्येजीवादित्ये॥ तथामलिम्लुचेमासिलुप्तेचा
र्येतिचारगे॥ वापीकूपविवाहादिक्रियाःप्रागुदिताःस्त्यजेत॥ सिंहस्थंमकरस्थंचगुरुंयत्नेनवर्जयेत॥ लल्लः॥ अतिचा
रगतोजीवस्तंराशिंनैतिचेत्पुनः॥ लुप्तसंवत्सरोज्ञेयःसर्वकर्मबहिःकृतः॥ सिंहस्थगुरोरपवादमाहपराशरः॥ गोदा एमः
भागीरथ्योर्मध्येनोद्वाहःसिंहगेगुरौ॥ मघास्थेसर्वदेशेषुतथामीनगतेगुरौ॥ वसिष्ठोपि॥ विवाहोदाक्षिणेकूलेगोत

म्यानेतरत्र तु मागीस्यपुत्ररेतौ रौतौ तस्या दाक्षिणात्या। विवाहे व्रतबंधश्च सिंहस्थेऽस्येन दुष्यति। कन्यादातृक्रममाह
याज्ञवल्क्यः। पिता पितामहो भ्राता सकुल्यो जननी तथा। कन्याप्रदः पूर्वनाशे प्रकृतिस्थः परः परः। अप्रयच्छन्समा
प्नोति भ्रूणहत्यामृतावृतौ। गम्यं त्वभावे दातॄणां कन्या कुर्यात्स्वयंवरं। भ्रातॄणां संस्कृतानामेवाधिकारमाह स
एव। असंस्कृतास्तु संस्कार्या भ्रातृभिः पूर्वसंस्कृतैः। भगिन्यश्च निजादंशाद्दत्वांशं तु तुरीयकं। अत्र चकारेण पूर्वसंस्कृतै
रित्यस्यानुवृत्तेर्विवाहपर्याप्तद्रव्यदाने न च स्वांशसमांशश्चतुर्भागदाने वा संस्कृतग्रहणं व्यर्थं स्यात्। अतः कर्तृनि
यमोऽयं। तेनानुपनीतभ्रातृमात्रादिसत्त्वे मात्रादेरेवाधिकारो न भ्रातुरित्युक्तं संबंधतत्त्वादौ। कन्यास्वयंवरे मातुर्दा
तृत्वे च तस्यामेव नांदीश्राद्धं कार्यं। तत्र च स्वयं प्रधानसंकल्पमात्रं कृत्वाऽन्यब्राह्मणद्वारा कारयेदिति प्रयो
गपारिजाते। वरस्त्वसंस्कृतभ्रात्राद्यभावे स्वयमेव नांदीश्राद्धं कुर्यान्न माता। पुत्रेषु विद्यमानेषु नान्यं वै कारयेत्स्व
धामिति निषेधादुपनयनेन कर्माधिकारस्य जातत्वाच्चेति पृथ्वीचंद्रोदये। माधवीये पराशरेण नारदः। पिता दद्यात्स्व
यं कन्यां भ्राता वानुमते पितुः। मातामहो मातुलश्च सकुल्यो बांधवस्तथा। माता त्वभावे सर्वेषां प्रकृतौ यदि वर्तते। त
स्यामप्रकृतिस्थायां कन्यां दद्युः स्वजातयः। सकुल्याः पितृपक्षीयाः बांधवी मातृवंश्यकाः। मदनपारिजाते कात्यायनः।

१७९
स्वयमेवौरसींदद्यात्पित्रभावेस्वबांधवाः॥मातामहस्ततोन्यां।हिमातावाधर्मज्ञांसुतां॥ततोन्यामौरसीं।भिन्नांधर्मज्ञांनियोगा
त्रैचज्ञांमातामहोमातामातुलोवादद्यात्।औरसीदानेपितृबंधुषुसत्सुमातामहादीनांनाधिकारः।अस्यापवादस्तत्रैव।
दीर्घप्रवासयुक्तेषुयोगंडेषुचबंधुषु॥मातातुसमयेद्दद्यादौरसीमपिकन्यकां॥मनुः।यस्यात्तुनैवकश्चित्स्यात्कन्याराजानं
माव्रजेत्।परकीयकन्यादानेविशेषोमदनरत्नेस्कांदे।आत्मीकृतसुवर्णेनपरकीयांतुकन्यकां।धर्मेणविधिनादान
मसगोत्रेपियुज्यते।अत्रप्रकृतिस्थग्रहणादप्रकृतिस्थेनकृतमकृतमेव।स्वतंत्रोयद्धितत्कार्यंकुर्यादप्रकृतिंगतः।
तदप्यकृतमेवस्यादस्वातंत्र्यस्यहेतुतइत्यपरार्केनारदोक्तेः।यदितुसप्तपदीविवाहहोमादिप्रधानंजातंतदंगवैक
ल्येपिनावृत्तिर्विवाहस्य।गौड।अप्येवमाहुः।तत्रैवमरीचिः।गौरींददन्नाकपृष्ठेवैकुंठंरोहिणींददत्।कन्यांददद्ब्रह्म
लोकेरौरवंतुरजस्वलां।अथमासनिर्णयः।तत्रजन्ममासेविशेषःप्रागुक्तः।ज्योतिःप्रकाशेव्यासः।माघफाल्गुन
वैशाखेपघूढामार्गशीर्षके।ज्येष्ठेचाषाढमासेचशुभगावित्तसंयुता।श्रावणेवापिपौषेवाकन्याभाद्रपदेतथा। एमः
चैत्राश्वयुक्कार्तिकेषुयातिवैधव्यतांलघु।नारदः।माघफाल्गुनवैशाखज्येष्ठमासाःशुभावहाः।कार्त्तिकोमार्गशीर्ष
श्चमध्यमौनिंदिताःपरे।अत्रसौरमासाग्राह्याः।सौरोमासोविवाहादौयज्ञादौसावनःस्मृतइत्युक्तेः।तत्रापवादमाहवसि

ष्टः॥ अषीना निंद्यो यदि फाल्गुने स्याद्दस्रर्क्षे वैशाखगतो न निंद्यः॥ वसिष्ठः॥ पौषेपि कुर्यान्मकरस्थिते र्के चैत्रे भवेन्मेषगतेय
दा स्यात्। प्रशस्तमाषाढकृतं विवाहं वदंति गर्गा मिथुनस्थिते र्के। आचार्यचूडामणौ ज्योतिषे चैत्रपौषविवर्ज्जिताः॥ आप
र्गा॥ रत्नमार्त्तंडे॥ मांगल्येषु विवाहेषु कन्यासंवरणेषु च। दशमासाः प्रशस्यंते चैत्रपौषविवर्ज्जिताः॥ आपस्तंबः॥ सर्वऋ
तवो विवाहस्य शैशिरौ मासौ परिहाप्योत्तमं च नैदाघं। अत्र माघफाल्गुनाषाढवर्ज्जं नव मासा मुख्यः कालः। इति सुदर्शन
भाष्ये। कलायां ब्रह्मविद्यातीर्थैश्चोक्तं। बोधायनसूत्रे। सर्वे मासा विवाहस्य शुचितपस्तपस्यवर्ज्जं। तेन शैशिरसंबंधिनौ
पूर्वापरौ मासौ पौषचैत्राविति निर्णयामृतव्याख्यानं। मौर्ख्यकृतमित्युपेक्षणीयं। निशि चेद्वादशस्वपि मासेषूद्वहेयु
रिति कालादर्शः। ये तु ज्योतिषे माघादिविषयस्ते गृह्यसूत्राणां द्विजपरत्वेन प्राबल्याच्छूद्रादिपराः। ज्योतिषे। वात्स्यो
वर्षमनूनमिच्छति तथौरभ्यो यवनश्चोत्तरं श्रीवासंतमृतुं विहाय मुनयो मांडव्यशिष्या जगुः। चैत्रं प्रोह्य पराशरः परिणये
त्पौषं च दौर्भाग्यदं त्वाषाढादिचतुष्टयं न हि तदा केचित्प्रदिष्टं बुधैः। चंडेश्वरस्य मार्गं मणित्थस्तथा ज्येष्ठे। होरं परिणयं त्व
तौऽज्येष्ठपुत्रदुहित्रोस्तु यत्नेन परिवर्ज्जयेत्। कृत्तिकास्थं रविं त्यक्त्वा ज्येष्ठपुत्रस्य कारयेत्। उत्सवादिषु कार्येषु दिना
नि दशवर्ज्जोपेतः। रत्नकोशे। जन्मर्क्षे जन्मदिवसे जन्ममासे शुभं त्यजेत्। ज्येष्ठमास्याद्यगर्भस्य शुभं वर्ज्यं त्रिपात्रपि परा

१८०

श॥ अज्येष्ठां कन्यकां यत्र ज्येष्ठपुत्रो वरो यदि। व्यत्ययो वा तयोस्तत्र ज्येष्ठो मासः शुभप्रदः॥ मिहिरः। ज्येष्ठस्य ज्येष्ठकन्याया यावि
वाहो न प्रदृश्यते। तयोरन्यतरे ज्येष्ठे ज्येष्ठो मासः प्रशस्यते॥ द्वौ ज्येष्ठौ मध्यमौ प्रोक्तौ एकं ज्येष्ठं सुखावहं॥ ज्येष्ठत्रयं न कु
वत विवाहे सर्वसंमतं। यत्तु सार्वकालमेके विवाहमिच्छंति। तद्दासुरादिविवाहविषये। धर्म्येषु विवाहेषु कालपरीक्षणं ता
धर्म्येष्विति गृह्यपरिशिष्टात्। रत्नमालायामप्येवं। अथ दशदोषाः। व्यवहारोच्चये। वेधश्च लत्ता च तथैव पातः खार्जूरवे
धो दशयोगचक्रं॥ सतिथ्युज्जामित्रमुपग्रहश्च बाणाख्यवंज्ञे च दशैव दोषाः एषां लक्षणं ज्योतिषे ज्ञेयं। अतीचारगे गु
रौ लवमिष्टः। अतिचारगते जीवे वर्ज्यये त्रैदनंतरं॥ विवाहादिषु कार्येषु अष्टाविंशतिवासरान्। रत्नमालायां। एकपं
चनवयुग्मषड्दशत्री गोमस्त्रचतुरष्टला भदः। द्वादशाष्टिति रजादिराशितो घातचंद्र इति कीर्तितो बुधैः। नारदः। मू
बाणाग्निवह्नस्ताश्वरसादिग्वह्निशैलजाः। वेदावसुशिवादित्या घातचंद्रो यथाक्रमं॥ यात्रायां युद्धकार्येषु घात
चंद्रं विवर्जयेत॥ विवाहे सर्वमांगल्ये चौलादौ व्रतबंधने। घातचंद्रो नैव चिंत्य इति पाराशरोब्रवीत॥ ज्योतिर्निबं
धे। विवाहचौलव्रतबंधयज्ञे महाभिषेके च तथैव राज्ञां॥ सीमंतयात्रासु तथैव याने नो चिंतनीयः खलु घातचं
द्रः। नारदः। अकालजा भवेयुश्चेद्विद्युन्नीहारवृष्टयः। प्रत्यर्कपरिवेषेंद्रचापाभ्रध्वनयो यदि। दोषापमंगले नूनमदो

९०:

षायेवकालजाः। अकालवृष्टिस्वरूपमाह लल्लः। स्मृतिरपि। अपर्त्तुवर्षे त्रिरात्रमिति। पौषादि चतुरो मासान्प्रोक्ता वृष्टि
रकालजेति। शार्ङ्गधरः। निर्घाते क्षितिचलने ग्रहयुद्धे राहुदर्शने चैव। आपंचदिनात्कन्यापरिणीता नाशमुपयाति। उल्का
पातेंद्रचापप्रबलघनजे। धूमनिर्घातविद्युद्दृष्टिप्रत्यर्कदोषादिषु सकलवुधैस्त्याज्यमेव। ज्योतिःप्रकाशे। अवकि षो
डशनाड्यः संक्रांतेः पुण्यदाः परतः। उपनयनव्रतयात्रापरिणयनादौ विवर्ज्यास्ताः। गर्गः। दिग्दाहे दिनमेकं च ग्रहे सप्त
दिनानि तु। भूकंपे च समुत्पन्ने त्र्यहमेव तु वर्ज्जयेत्॥ उल्कापाते त्रिदिवसं धूमे पंचदिनानि च। वज्रपाते चैकदिनं वर्ज्ज
येत्सर्वकर्मसु। दर्शनादर्शनाद्राहुकेत्वोः सप्तदिनं त्यजेत्। यावत्केतूद्गमस्तावदशुभः समयो भवेत्। अस्यापवादो
द्भुतसागरे। अथ यद्दिवसत्रयमध्ये मृडपानीयं यस्या भवति। उत्पातदोषशमनं तदैवशं प्राहुराचार्याः। संवंधतत्त्वे। भूकं
पादेर्न दोषोस्ति वृद्धिश्राद्धे कृते सति। अथापरिहार्यकन्याया वैधव्ययोगविशेष उच्यते। मार्कंडेयपुराणे। बालवैधव्य
योगे तु कुंभद्रुप्रतिमादिभिः। कृत्वा लग्नं ततः पश्चात्कन्योद्वाह्येति चापरे। तत्र पुनर्भूदोषाभाव उक्तो विधानखंडे। स्वर्णां
बु पिप्पलानां च प्रतिमा विष्णुरूपिणी। तया सह विवाहे तु पुनर्भूत्वं न जायते। सर्यौरुणासवादे। विवाहात्पूर्वकाले च चंद्रता
राबलान्विते। विवाहोक्ते च समये कन्या कुंभेन सह चोद्वहेत्। सूत्रेणावेष्टयेत्सम्यग्दशतंतुविधानतः। कुंकुमालंकृतं देहं

तयोरेकांतमंदिरे॥ ततः कुंभं च निःसार्य प्रमज्य सलिलाशये। ततोभिषेचनं कुर्यात्पंचपल्लववारिभिः॥ कुंभप्रार्थना तत्रैव॥ वरुणांगस्वरूपाय जीवनानां समाश्रय। पतिं जीवय कन्यायाश्चिरं पुत्रसुखं कुरु॥ देहि विष्णो वरं देव कन्यां पालय दुःखतः॥ ततोलंकारवस्त्राद्यं वराय प्रतिपादयेत्॥ इति कुंभविवाहः॥ मूर्तिदानमपि तत्रैवोक्तं॥ ब्राह्मणं साधुमामंत्र्य संपूज्य विविधार्हणैः॥ तस्मै दद्याद्विधानेन विष्णोर्मूर्तिं चतुर्भुजां॥ शुद्धवर्णसुवर्णेन वित्तशक्त्याथवा पुनः॥ निर्मितां रुचिरां शंखगदाचक्राब्जसंयुतां। दद्यात्तां वा समीपीते कुमुदोत्पलमालिनीं॥ सदक्षिणां च तां दद्यान्मंत्रमेनमुदीरयेत्। यन्मया प्राचिजनुषि घ्नत्या पतिसमागमः। विषोपविषशस्त्राद्यैर्हतो वातिविरक्तया॥ प्राप्यमानं महाघोरं यशःसौख्यधनापहं। वैधव्याद्यतिदुःखौघनाशाय सुखलब्धये। बहुसौभाग्यलब्ध्यै च महाविष्णोरिमां तनुं। सौवर्णां निर्मितां शक्त्या तुभ्यं संप्रददेहि द्विज। अनघाद्याहमस्मीति त्रिवारं प्रजपेदिति। एवमाह्वितितस्योक्तं गृहीत्वा स्वगृहं विशेत्। ततो वैवाहिकं कुर्याद्विधिं दृष्टां मृगीदृशः। अन्येप्यश्वत्थविवाहहरिद्रासेचनादयस्तत्रैव ज्ञेयाः॥ विस्तरभयान्नोच्यंते। अथ प्रतिकूलादि॥ ज्योतिर्निबंधे गार्ग्यः। कृते तु निश्चये पश्चान्मृत्युर्भवति कस्यचित्। तदा न मंगलकार्यं कृते वैधव्यमाप्नुयात्। ज्योतिर्मेधातिथिः। वधूवरार्थे घटिते सुनिश्चिते वरस्य गेहेप्यथ कन्यकायाः। मृत्युर्यदि स्यान्मनुजस्य कस्यचित्तदा न कार्यं खलु एमः

मंगालं बुधैः॥ मंगलं विवाहः॥ स्मृतिचंद्रिकायां॥ कृते वाङ्निश्चये पश्चान्मृत्युर्मर्त्यस्य गोत्रिणः॥ तदा न मंगालं कार्यं नारीवैध
धव्यदं ध्रुवं॥ भृगुः॥ वाग्दानानंतरं यत्र कुलयोः कस्यचिन्मृतिः॥ तदोद्वाहो नैव कार्यः स्ववंशक्षयदो यतः॥ शौनकः॥ व
रवध्वोः पिता माता पितृव्यश्च सहोदरः॥ एतेषां प्रतिकूलं च महाविघ्नप्रदं भवेत्॥ पिता पितामहश्चैव माता चैव पिता
मही॥ पितृव्यः स्त्रीसुतो भ्राता भगिनी चाविवाहिता॥ एभिरत्र विपन्नैश्च प्रतिकूलं बुधैः स्मृतं॥ अन्येष्वपि विपन्नेषु
केचिदूचुर्न तद्भवेत्॥ मांडव्यः॥ वाग्दानानंतरं माता पिता भ्राता विपद्यते॥ विवाहो नैव कर्त्तव्यः स्ववंशहितमिच्छ
ता॥ संकटे तु मेधातिथिः॥ वाग्दानानंतरं यत्र कुलयोः कस्यचिन्मृतिः॥ तदा संवत्सरादूर्ध्वं विवाहः शुभदो भवेत्॥ स्मृ
तिरत्नावल्यां॥ पितुरब्दमशौचं स्यात्तदर्धं मातुरेव च॥ मासत्रयं तु भार्याया तदर्धं भ्रातृपुत्रयोः॥ अन्येषां तु सपि
ण्डानामाशौचं मासमीरितं॥ तदंते शांतिकं कृत्वा ततो लग्नं विधीयते॥ ज्योतिःप्रकाशे॥ प्रतिकूलेऽपि कर्त्तव्यो विवाहो
मासतः परः॥ शांतिं विधाय गां दत्वा वाग्दानादि चरेत्पुनः॥ शांतिं विनायकशांतिं॥ तथा च मेधातिथिः॥ संकटे समनु
प्राप्ते याज्ञवल्क्येन योगिना॥ शांतिरुक्ता गणेशस्य कृत्वा तां शुभमाचरेत्॥ इति॥ प्रतिकूले न कर्त्तव्यो गच्छेद्यावदृतुत्र
यं॥ प्रतिकूलेऽपि कर्त्तव्यमित्याहुर्बहुविप्लवे॥ प्रतिकूले सपिंडस्य मासमेकं विवर्जयेत्॥ ज्योतिःसागरे॥ दुर्भिक्षे राष्ट्रभंगे च

१८२

पित्रोर्वाप्राणसंशये।प्रौढायामपिकन्यायांनानुकूल्यंप्रतीक्षते।मेधातिथिः।पुरुषत्रयपर्यंतप्रतिकूलंस्वगोत्रिणां।
प्रवेशान्निर्गमस्तद्वद्यथामृते।प्रेतकर्माण्यनिर्वर्त्यचरेन्नाभ्युदयक्रियां।आचतुर्थंततःपुंसिपंचमेशुभदंभवेत्।अ
थरजोदोषनिर्णयःमाधवीये।प्रारंभात्प्राग्विवाहस्यमातायदिरजस्वला।निवृत्तिस्तस्यकर्तव्यासहस्रेश्रुतिचोदना
त।प्रारंभान्नांदीश्राद्धात्।नांदीमुखंविवाहादौक्रियादिनात्तस्यैवप्रारंभोक्तेः।मेधातिथिः।चौलेचव्रतबंधेचविवा
हेयज्ञकर्माणि।भार्यारजस्वलायस्यप्रायस्तस्यनशोभनं।वधूवरान्यतमयोर्जननीचेद्रजस्वला।तस्याःशुद्धेःप
रंकार्यंमांगल्यंमनुरब्रवीत्।वृद्धमनुः।विवाहव्रतचूडासुमातायदिरजस्वला।तदानमंगलंकार्यंशुद्धौकार्यंशुभे
प्सुभिः।गार्ग्यः।यस्योद्वाहादिमांगल्येमातायदिरजस्वला।तदानतत्प्रकर्तव्यमायुःक्षयकरंयतः।नांदीश्राद्धो
त्तरंरजोदोषेतुकपर्दिकारिकासु।सूतिकोदक्ययोःशुद्ध्यैगांदद्याद्धोमपूर्वकं।प्राप्तेकर्मणिशुद्धिःस्यादितरस्मि
न्नशुद्ध्यति।अलाभेसुमुहूर्तस्यरजोदोषेचसंगते।श्रियंसंपूज्यतत्कुर्यात्साग्निग्रहणमंगले।हैमींमाषमितांपद्मांश्री
सूक्तविधिनार्चयेत्।प्रत्यृचंपायसंहुत्वाअभिषेकंसमाचरेत्।इति।अथैकक्रियानिर्णयः।ज्योतिर्निबंधेवृद्धमनुः। एमः
एकमातृजयोरेकवत्सरेपुरुषस्त्रियोः।नसमानक्रियांकुर्यान्मातृभेदेविधीयते।एतेनकस्यपुंसोविवाहद्वयमेकस्मि

नद्दिने निषिद्धं मातृभेदाभावात्। नारदः। पुत्रोद्वाहात्परं पुत्रीविवाहो नऋतुत्रयं। न तयोर्व्रतमुद्वाहात् मंडनादपि मुं-
डनवएहः। विवाहस्त्वेकजातानां षण्मासाभ्यंतरे यदि। असंशयं त्रिभिर्वर्षैस्तत्रैका विधवा भवेत्। मदनरत्ने वसिष्ठः।
न पुंविवाहोर्ध्वमृतुत्रयोर्ध्वे विवाहकार्ये दुहितुः प्रकुर्यात्। न मंडनाच्चापि हि मुंडनं च गोत्रैकतायां यदि नाब्दभेदः।
एकोदरभ्रातृविवाहकृत्ये स्वसुर्न मौंजीग्रहणं विधेयं। षण्मासमध्ये मुनयः समूचुर्न मुंडनं मंडनतोपि कार्यं।
एतदपवादस्तत्रैव ऋतुत्रयस्य मध्ये चेदन्याब्दस्य प्रवेशनं तदा स्यादेकोदरस्यापि विवाहस्तु प्रशस्यते। साराव-
ल्यां। फाल्गुने चैत्रमासे तु पुत्रोद्वाहोपनायने। भेदादब्दस्य कुवत नर्तुत्रयविलंबनं। संहिताप्रदीपे। ऊर्ध्वं विवा-
हात्तनयस्य नैव कार्यो विवाहो दुहितुः समाब्दे। अप्राप्य कन्यां श्वशुरालयं च वधूः प्रवेश्या स्वगृहं न चादौ। मद-
नरत्ने वसिष्ठः। द्विशोभनं त्वेकगृहेपि नेष्टं शुभं तु पश्चान्नवभिर्दिनैस्तु। आवश्यकं शोभनमुत्सवो वा द्वारेथवा-
चार्यविभेदतो वा। एकोदरप्रसूतानां नेति शातातपोऽब्रवीत्। ज्योतिर्निबंधे कात्यायनः। कुले ऋतुत्रयादर्वाङ्मं-
डनान्न तु मुंडनं। प्रवेशान्निर्गमो नेष्टो न कुर्यान्मंगलत्रयं। कुर्वंति मुंमयः केचिदन्यास्मिन्वत्सरे लघु। लघु वा गुरु
वा कार्यं प्राप्तं नैमित्तिकं तु मतं। पुत्रोद्वाहः प्रवेशाख्यः कन्योद्वाहस्तु निर्गमः। मुंडनं चौलमित्युक्तं व्रतोद्वाहो तु मं-

१८३ गलं चौलं मुंडनमेवोक्तं वर्जयेन्मंडनात्परं। मौंजी चोभयतः कार्या यतो मौंजी न मुंडनं। अभिन्नेवत्सरोपि स्यात्तदहस्तत्र भे
दयेत्। अभेदे तु विनाशः स्यान्न कुर्यादेकमंडपे। संकटे तु कपर्दिकारिकाल। वराहमिहरश्च। उद्वाह्य पुत्रीं न पिता विद
ध्यात्सुत्यंतरस्योद्वहनं कदाचित्। यावच्चतुर्थं दिनमत्र पूर्वं समाप्य चान्योद्वहनं विदध्यात्। कश्यपः। मौंजीबंधस्तथो
द्वाहः षण्मासाभ्यंतरेपि वा। पुत्र्युद्वाहं न कुर्वीत विभक्तानां न दोषकृत्। ज्योतिर्निबंधे। विवाहमारभ्य चतुर्थिमध्ये
श्राद्धं दिने दर्शदिनं यदि स्यात्। वैधव्यमाप्नोति तदा तु कन्या जीवेत्पतिश्चेदनपत्यता स्यात्। तथा। विवाहमध्ये य
दि स्यात्। वैधव्यमाप्नोति तदा तु कन्या जीवेत्पतिश्चेदनपत्यता स्यात्। तथा। विवाहमध्ये यदि चेत्क्षयाहस्तत्र स्वमुख्याः
पितरो न यांति। वृत्ते विवाहे परतस्तु कुर्याच्छ्राद्धं स्वधाभिर्न च हर्षयेत्तान्। यो वा भद्रं हर्षयति स्वधाभिरिति श्रुतेश्च। मासि
कविषये हेमाद्रौ शाट्यायनिः। प्रेतश्राद्धानि सर्वाणि सपिंडीकरणं तथा। अपकृष्यापि कुर्वीत कर्तुं नांदीमुखं द्विजः
वृद्धिं विनापकर्षे दोषमाह तत्रैवोशनाः। वृद्धिश्राद्धविहीनस्तु प्रेतश्राद्धानि यश्चरेत्। स श्राद्धी नरके घोरे पितृभिः सह
मज्जतीति। मेधातिथिः। प्रेतकर्माण्यनिर्वर्त्य चरेन्नाभ्युदयं। क्रियां। आचतुर्थं ततः पुंसि पंचमे शुभदं भवेत्। स्मृत्यं एमः
तरे। सपिंडीकरणादर्वागपकृष्य कृतान्यपि। पुनरप्यपकृष्यंते वृद्ध्युत्तरनिषेधनात्। स्मृतिसारे कन्यां। भ्रातृयुगे स

स्त्रयुगेभ्रातृस्वस्त्रयुगेतथा। एकस्मिन्मंडपेचैवनकुर्यान्मंडनद्वयं। सोदरविषयमेतत्। यमः। एकोदरप्रसूतानामेक
स्मिन्वासरेपुनः। विवाहंनैवकुर्वीतमंडनोपरिमुंडनं। गार्ग्यः। भ्रातृयुगेस्वसृयुगेभ्रातृस्वसृयुगेतथा। ननुयन्म
गलंकिंचिदेकस्मिन्मंडपेहनि। एकस्मिन्वासरेमासेकुर्याद्यमलजातयोः। क्षौरंचैवविवाहंचमौंजीबंधनमेवच।
ज्योतिर्विवरणे। एकोदरयोर्द्वयोरेकदिनोद्वहनेभवेन्नाशः। नघंतरे एकदिनेकेप्याहुः संकटेचशुभं। ऊर्ध्वंविवा
हाच्छुभदोनरस्यनारीविवाहोनकृतस्त्रयंप्राक्। नारीविवाहात्त्वदहेपिशस्तंनरस्यपाणिग्रहमाहुरार्याः। भि
न्नमातृजयोस्तुएकवासरेविवाहमाहमेधातिथिः। पृथङ्मातृजयोर्ह्येकार्योविवाहस्त्वेकवासरे। एकस्मिन्मंड
पेकार्यः पृथग्वेदिकयोस्तथा। पुष्पपट्टिकयोःकार्यंदर्शनंनशिरःस्थयोः। भगिनीभ्यामुभाभ्यांचयावत्स
प्तपदीभवेत्। यमयोस्तुविशेषः। महत्कारिकायां। एकस्मिन्वत्सरेचैववासरेमंडपेतथा। कर्तव्यंमंगलंस्वस्रोर्भ्रा
त्रोर्यमलजातयोः। ज्योतिर्निबंधेनारदः। प्रत्युद्वाहोनैवकार्योनैकस्मैदुहितृद्वयं। नैवैकजन्ययोःपुंसोर्नैकज
न्येतुकन्यके। नैवंकदाचिदुद्वाहोनैकदामंडनद्वयं। नैकजन्येतुकन्येद्वेपुत्रयोर्नैकजन्ययोः। नपुत्रीद्वय
मेकस्मैप्रदद्यात्तुकदाचनेति। कन्यायारजोदर्शनेतु अपरार्केसंवर्तः। माताचैवपिताचैवज्येष्ठभ्रातातथैवच।

१८४ त्रयस्तेनरकंयाति दृष्ट्वाकन्यांरजस्वलां। हारीतः। पितुर्गेहे तु याकन्यारजः पश्यत्यसंस्कृता। साकन्यावृषलीज्ञेयातत्प
तिर्वृषलीपतिः। देवलात्रिकश्यपाः। पूर्वार्द्धं तत्र देव। भ्रूणहत्यापितुस्तस्याः साकन्यावृषलीस्मृता। यस्तासमुद्वहेत्क
न्यांब्राह्मणोज्ञानदुर्बलः। अश्राद्धेयमपांक्तेयंतंविद्याद्वृषलीपतिं। इदं योग्यवरालाभे। अन्यथातुनदोषः। कामम
मरणात्तिष्ठेद्गृहेकन्यर्तुमत्यपि। नचैवैनांप्रयच्छेतगुणहीनायकर्हिचित्। इतिमनूक्तेः। माधवीयेबौधायनः। त्रीणि
वर्षाण्यृतुमतीकांक्षेत पितृशासनं। विष्णुः। ऋतुत्रयमुपास्यैवकन्याकुर्यात्स्वयंवरं। अत्रवरस्यदोषाभावमाहयमः।
कन्याद्वादशवर्षाणियाप्रदत्तावसेद्गृहे। भ्रूणहत्यापितुस्तस्यात्साकन्यावरयेत्स्वयं। एवंचोपनतांपत्नीनावमन्ये
त्कदाचनीननु तां बंधकीं विंद्यान्मनुःस्वायंभुवोऽब्रवीत्। मनुः। अलंकारंनाददीतपित्र्यंदत्तंस्वयंवरे। पितृदत्तमा
तृदत्तंस्तेयीस्याद्यदितंहरेत्। नांप्रतिबोधनात्। अत्रवरप्रत्याह। पित्रेनदद्याच्छुल्कंतुकन्यामृतुमतींहरन्। स
हि स्वाम्यादतिक्रामेदृतूनांप्रतिबोधनात्। अत्रप्रायश्चित्तमुक्तमाश्वलायनेन। कन्यामृतुमतीं शुद्धांकृत्वानि
ष्कृतिमात्मनः। शुद्धिंचकार। पित्वातामुद्वहेदानशेस्मधीः। पिताज्ञनूत्वपुन्यास्तकगणायेद्दादितःसुधीः। दानाबाधि एणः
गृहेयत्नात्पालयेच्चारजोवंती। दद्यात्रदत्तुसंख्यानाः शक्तःकन्यापितायदि। दातव्यैकापिनिःस्वेनदानेतस्याययथावि

धि। दद्याद्वाद्ब्राह्मणे घन्नमतिनिःस्वः सदक्षिणां तस्याशीतं तन्तु संख्येषु वरमप्रतिपादयेत्। उपोष्य त्रिदिनं कन्या रात्रौ पीत्वा गवां पयः। अदृष्टरजसे दद्यात्कन्यायै रत्नभूषणां। तामुद्वहन्वरश्चापि कूष्मांडैर्जुहुयाद्धि श इति मदनपारिजाते यत्तु पार्श्वः। विवाहे वितते यज्ञे होमकाल उपस्थिते। कन्यामृतुमतीं दृष्ट्वा कथं कुर्वंति याज्ञिकाः। स्नापयित्वा तु तां कन्यामर्चयित्वा यथाविधि। युंजानां चाहुतिं हुत्वा ततस्तंत्रं प्रवर्तयेत्। बोधायनसूत्रे। अथ यदि कन्योपसाद्यमाना वोह्यमाना वा रजस्वला स्यात्तामनुमंत्रयेत। पुमांसौ मित्रावरुणौ पुमांसावश्विनावुभौ। पुमानिंद्रश्च सूर्यश्च पुमांसं वर्द्धतामियमिति। अंन्यद्वादशरात्रमलंकृत्य प्राशयेत्संचगव्यमथ मुहूर्तं कृत्वा विवहेत। अत्र गांधर्वाद्यष्टौ विवाहास्तत्र व्यवस्था चाकारे ज्ञेया। संकटे त्वत्रिपरपैशाचमाह माधवीये वत्सः। सर्वोपायैरसाध्या स्यात्तु कन्या पुरुषस्य पी चौर्येणातु विवाहेन सा विवाह्या रहःस्थिता॥ गांधर्वादिविवाहेष्वप्युदकपूर्वकं दानमाह तत्रैव यमः। नोदकेन न वा वाचा कन्यायाः पतिरुच्यते। पाणिग्रहणसंस्कारात्पतित्वं सप्तमे पदे। पराशरमाधवीये देवलोपि। गांधर्वादिविवाहेषु पुनर्वैवाहिको विधिः। कर्तव्यश्च त्रिभिर्वर्णैः समर्थेनाग्निसाक्षिकः। त्रिवर्णोक्तेर्गांधर्वादौ विप्रवर्जमधिकार उक्तः। तत्रैव पारिशिष्टे गांधर्वासुरपैशाचा विवाहा राक्षसश्च यः। पूर्वं परिणयस्ते

१८५ षापश्चाद्धोमोविधीयते। अतोहोमादावकृतेभार्यात्वाभावाद्वरांतरायदेया। तथाचतत्रैववसिष्ठबौधायनौ। बलादपहृता
कन्यामंत्रैर्यदिनसंस्कृता। अन्यस्मैविधिवद्देयायथाकन्यातथैवसेति। बलादपहृतेतिराक्षसपैशाचपरं। तयोरेवबला
पहारात्। यद्यपिमंत्रसंस्काराभावेऽन्यस्मैदानेसर्वविवाहेषुतुल्यमितिततयोर्वचनंव्यर्थं। तथापिमंत्रैर्यदिनसंस्कृ
तायदिसंस्कृतेतियदिशब्दादूढ्यासंस्कृताप्येतयोर्देयेतिव्याख्येयं। अन्यथावैयर्थ्यात्। अपहृताकन्यामनुष
त्येतिशेषः। अनुमत्यभावेतुसमंत्रहोमेप्यन्यस्मैदेया। अश्वरत्नमनुष्यस्त्रीभूधेनुहरणंतथेतियाज्ञवल्क्येन
मनुष्यस्त्रीयेमहापातकसाम्योक्तेः। मनुरपि। शुल्कंदद्यात्सेवमानःसमामिच्छेत्पितायदि। समांसवर्णांयोऽकामां
दूषयेद्यस्तुकन्यांससद्योवधमर्हति। दूषयेद्भोगेनसंस्कारेणवा। सकामांदूषयंस्तुल्योनवधंप्राप्नुयान्नरः। तेनस
कामापाहरणेसंस्कारेचतस्माएवदेया। अकामांखलाभाभावात्संस्कारेपिवरस्यवधः। पुनर्विवाहश्चेत्यर्थः। पुन
र्विवाहाभावेहिकथंसवर्णवरस्यवधंब्रूयात्। अक्षताचक्षताचैवपुनर्भूःसंस्कृतापुनरितिस्मृतेर्भोगसंस्कारस्व
द्वैधात्कन्यादूषणंज्ञेयं। मदनपारिजातेनारदः। पाणिग्रहणिकामंत्रानियतंदारलक्षणं। तेषांनिष्ठाचविज्ञेयावि एमः
द्वद्भिःसप्तमेपदे। स्मृतिचंद्रिकायामपरार्केचैवं। आशौचेतुयाज्ञवल्क्यः। दानविवाहेयज्ञेचसंग्रामेदेशविप्लवे। आप

घपिचकष्टायांमघाःशौचंविधीयते।केचित्त्वपेक्षितेब्रह्मपुराणेप्युक्तंदातुःप्रतिगृहीतुश्चकन्यादानेचनोभवेत्।विवा
हपित्र्योःकन्यायालाजाहोमादिकर्मणीति।व्रतयज्ञविवाहेषुश्राद्धेहोमेर्चनेजपे।आरब्धेसूतकंनस्यादनारब्धेतुसू
तकमितिविष्णुवचनाच्च।प्रारंभस्तेनैवोक्तः।प्रारंभोवरणंयज्ञेसंकल्पोव्रतसत्रयोः।नांदीमुखंविवाहादौश्राद्धेपाक
परिक्रियेति।वरणमितिमधुपर्कपरं।गृहीतमधुपर्कस्ययजमानाच्चऋत्विजः।पश्चादशौचेपतितेनभवेदितिनि
श्चयः।इतिब्राह्मोक्तेः।मधुपर्कात्पूर्वंतुभवत्येवाशौचमितिशुद्धिविवेकः।रामांडारभाष्येप्येवं।नांदीमुखावधि
श्चस्मृत्यंतरे।एकविंशत्यहर्यज्ञेविवाहेदशवासराः।त्रिषड्दौलोपनयनेनांदीश्राद्धंविधीयते।आरंभाभा
वेऽपिलग्नांतराभावेयश्चविष्णुः।नदेवप्रतिष्ठाविवाहयोःपूर्वसंभृतयोरपीति।तत्रप्रायश्चित्तमाहमदनपारि
जातेविष्णुः।अनारब्धविशुद्ध्यर्थंकूष्मांडैर्जुहुयाद्घृतं।गांदद्यात्पंचगव्याशीततःशुध्यतिसूतकी।संग्रहेपि।
संकटसमनुप्राप्तेसूतकेसमुपागते।कूष्मांडीभिर्घृतंहुत्वागांचदद्यात्पयस्विनीं।चूडोपनयनोद्वाहप्रतिष्ठादिक
माचरेत्।यदैवसूतकप्राप्तिस्तदैवाभ्युदयक्रिया।अन्नादिषुविशेषः।षट्त्रिंशन्मते।विवाहोत्सवयज्ञेषुत्वंतरा
मृतसूतके।परैरन्नंप्रदातव्यंभोक्तव्यंचद्विजोत्तमैः।परैरसगोत्रैः।भुंजानेषुतुविप्रेषुत्वंतरामृतसूतके।अन्य

गेहोदकाचांताः सर्वेते शुचयः स्मृताः। एतदाशौचात्पूर्वमध्यकृतान्नविषयं। तत्रशेषमन्नंत्याज्यमित्यर्थः। वृहत्कृते
तुवृहस्पतिराह। विवाहोत्सवयज्ञेषुत्वंतरामृतके। पूर्वंसंकल्पितान्नेषुनदोषः परिकीर्तितः। इतिधर्मार्थविवाहक
रणेफलमुक्तंमहाभारते। ज्ञात्वास्ववित्तसामर्थ्यादेकंचोद्वाहयेद्द्विजं धर्मार्थविवाहकरणेफलमुक्तंमहाभारते। ज्ञा
त्वास्ववित्तसामर्थ्यादेकंचोद्वाहयेद्द्विजं। तेनाप्नोतितत्स्थानंशिवभक्तेनरेध्रुवं। अपरार्केदक्षः। मातापितृ
विहीनंतुसंस्कारोद्वाहनादिभिः। यःस्थापयतितस्येहपुण्यसंख्यानविद्यते। मदनरत्नेभविष्ये। विवाहादिक्रि
याकालेतत्क्रियासिद्धिकारणं। यच्छतिधर्मज्ञः सोश्वमेधफलंलभेत्। कन्यागृहेभोजननिषेधोपितत्रैव। अ
प्रजायांतुकन्यायांनभुंजीतकदाचन। दौहित्रस्यमुखंदृष्ट्वाकिमर्थमनुशोचति। अपरार्केआदित्यपुराणे।
विष्णुंजामातरंमन्येकोपंतस्यनकारयेत्। अप्रजायांतुकन्यायांनाश्नीयात्तस्यवैगृहे। ब्रह्मदेयांनवैकन्यांद
त्वाश्नीयात्कदाचन। अथभुंजीतमोहाच्चेत्पूयाशेनरकेवसेत्। ब्रह्मदेयांनवैकन्यांदत्वाश्नीयात्। तत्रैवकश्यपः।
अहतैर्यत्रनिर्मुक्तंवासःप्रोक्तैःस्वयंभुवा। शस्तंतन्मांगलिक्येषुतावत्कालंनसर्वदा। यत्रनिर्मुक्तंनूतनं। विवाहमध्ये एमः
त्रिपासहभोजनेपिनदोषइत्याह। हेमाद्रौप्रायश्चित्तकांडेगालवः। विवाहकालेयात्रायांपथिघोरसमाकुले। अ

होमवेदिप्रमस्तहाकांर्येद्विजन्मभिः। एकयानसमारोहएकपात्रेषुभोजनं। विवाहेपथिमात्रायांकृत्वाविप्रोनदोषभा
क्। अन्यथादोषमाप्नोतिपश्चाच्चांद्रायणंचरेत्॥ मिताक्षरायामप्येवं। रत्नमालायां। मूलमैत्रमृगरोहिणीकरैः।
पौष्णमारुतमघोत्तरान्वितैः। भौमसौरिरविवारवर्जितेपाणिपीडनविधिर्विधीयते। अत्रानिष्टनक्षत्रादौदान
मुक्तंज्योतिषे। विपत्तारेगुडंदद्यान्नैधनेतिलकांचनं। प्रत्यरेलवणंदद्याच्छागंदद्याद्विजन्मसु॥ चंद्रेचशंखंलवणं
चतारेतिथौविरुद्धेतथतंडुलांश्चधान्यंचदद्यात्करणेचवारेयोगेविरुद्धेकनकंप्रदेयं। विवाहेमंडपमाहवसिष्ठः।
षोडशारत्निकंकुर्याच्चतुर्द्वारोपशोभितं। मंडपंतोरणैर्युक्तंतत्रवेदिंप्रकल्पयेत्। अष्टहस्तंतुरपयेन्मंडपंवाद्विष
ड्करंदैवज्ञमनोहरः। चित्राविशाखाशततारकाश्विनीज्येष्ठाभरण्योशिवभाच्चतुष्टयं। हित्वाप्रशस्तंफलतैलवेदि
कापटदानकंकंकणमंडनादिकं। हेमाद्रौव्यासः। कंडुनदलनपवाएकमंडपगृहेद्विवस्त्रकाद्याखिलं। तास्संबंधिगता
गतमृत्तेवैवाहिकेकुर्यात्॥ ~~कंडुनदलनपवाएकमंडपगृहेद्विवस्त्रकाद्याखिलं~~पवा। कःचीकरा इति प्रसिद्धः। वैवा
हिकेथदिवसेशुभेचाथतिथौशुभे। चतुर्थीकंप्रकुर्वीतविधिदृष्टेनकर्मणा। वेदीमाहनारदः। हस्तोच्छ्रितांचतुर्हस्तै
श्चतुरस्रांसमंततः। स्तंभैश्चतुर्भिःसुश्लक्ष्णांवामभागेतुसद्मनि। समांतथाचतुर्दिक्षुसोपानेप्रतिशोभितां॥ प्रागुद

१८७ वत्रवरागारमीस्तंभहंसशुकादिभिः॥ एवंविधामारुरुह्येन्मिथुनं साग्निवेदिकामिति सप्तर्षिमते॥ मंगलेषु च सर्वेषु मंडपो
गृहमानतः॥ कार्यः षोडशहस्तो वा ह्यूनहस्तो दशावधि॥ स्तंभैश्चतुर्भिरेवात्र वेदिर्मध्ये प्रतिष्ठिता॥ हस्तोवध्वाः॥ सोपानं
पश्चिमतः उपरि भागेउक्रमपरिमाणाद्भिन्नं॥ अथ मृदाहरणं॥ ज्योतिर्निबंधे नारदः॥ कर्तव्यं मंगलेष्वादौ मंगलायांकु
रार्पणं॥ नवमे सप्तमे वापि पंचमे दिवसेपि वा॥ तृतीये बीजनक्षत्रे शुभवारे शुभोदये॥ सम्यग्गृहाणपलंकृत्य वितान
ध्वजतोरणैः॥ सहवादित्रनृत्याद्यैर्गत्वा प्रागुत्तरे दिशि॥ तत्र मृत्तिकतांश्लक्ष्णां गृहीत्वा पुनराव्रजेत॥ मृन्मयेष्वथवा वै
णवेषु पात्रेषु योजयेत॥ तत्र मृक्षि अनेकबीजसंयुक्तां तोयपुष्पोपशोभितां॥ शौनकः॥ आधानं गर्भसंस्कारं जा
तकर्म च नाम च॥ हित्वान्यत्र विधातव्यं मंगलेकुरवापनं॥ बृहस्पतिः॥ आत्यंतिकेषु कार्येषु कार्यः सद्योंकुरार्पणं॥
अत्रैव वाग्दानं हरिद्रावंदनं च कार्यं॥ ज्योतिःप्रकाशे॥ चतुर्थो मंडपः श्रेष्ठः सप्तमः पंचमस्तथा॥ नवमैकादशः श्रे
ष्ठो न षष्ठो षष्ठतृतीयकौ॥ विवाहमेखोद्ये वा कन्यावरणमाचरेत॥ वरस्यापि वरणमाह चंडेश्वरः॥ उपवीतं फलं पुष्पं
वासांसि विविधानि च॥ देयं वराय वरणे कन्याभ्रात्रा द्विजेन वेति॥ वाग्दानोत्तरं वरमरणे स्मृतिचंद्रिकायां च वसिष्ठः॥ अ एमः
द्भिर्वाचा च दत्तायां म्रियेतादौ वरो यदि॥ न च मंत्रोपनीता स्यात्कुमारी पितुरेव सा॥ यत्तु नारदः॥ उद्वाहितापि सा कन्या न चे

ॐ

त्संप्राप्तमैथुना।पुनःसंस्कारमर्हैवयथाकन्यातथैवसेति।यच्चकात्यायनः।वरोयद्यन्यजातीयःपतितःक्लीबएव
च।विकर्मस्थःसगोत्रोवादासोदीर्घामयोपिवा।ऊढापिदेयासान्यस्मैसहावरणभूषणा।इति।इदंकलौनिषिद्धं।
देवरेणसुतोत्पत्तिर्दत्ताकन्यानदीयते।इत्यादित्यपुराणोक्तकलौनिषेधात्।दत्ताशब्दऊढापरः।ऊढायाःपुनरुद्वाह
मितिहेमाद्र्युक्तेः।अतएवसगोत्रासपिंडादिविवाहेऽपिभोगस्तत्तांपरित्यज्यपालयेज्जननीमिवेत्युक्तं।नतुका
पिपुनर्विवाहउक्तः।येतुभ्रांताधर्मतोयोंप्रयच्छंतिर्पाचकीर्णा।तभारत।बंधुभिःसमनुज्ञातेमंत्रहोमौप्रयोज
येतां।तथासिध्यंतितेमंत्रानादत्तायाःकथंचनेतिभारतीयमुक्तापिदानंविनाभार्यात्वेनेत्याहुः।तन्न।व्यासो
हिगांधर्वादिषुतुबलादपहारेचदानंविनापिभार्यात्वंवदन्सहानेनैवकार्थेभार्थ्यात्वंशून्यहृदयोवदेत।तेने
दंभारतनाम्नापूर्वकल्पितवचनमित्युपेक्ष्यं।महानिबंधविरुद्धं।देशांतरगमनेतुकात्यायनः।वरयित्वातुयःक
श्चित्प्रणश्येत्पुरुषोयदृत्वागमांस्त्रीनतीत्यकन्यान्यंवरयेत्पतिं।अपरार्केनारदोपि।प्रतिगृह्यतुयःकन्यांव
रोदेशांतरंव्रजेत।त्रीनृतून्समतिक्रम्यकन्यान्यंवरयेद्वरं।शुल्कदानेतुमनुवसिष्ठौ।कन्यायांदत्तशुल्कायां
म्रियेतयदिशुल्कदः।देवरायप्रदातव्यायदिकन्यानुमन्यते।चंद्रिकायांकात्यायनः।प्रदायशुल्कंगच्छेद्यःक

१८८

न्यायाः स्त्रीधनं तथा। धार्या सा वर्षमेकं तु देयान्यस्मै विधानतः। अनेकेभ्यो हि दत्तायामनूढायां तु तत्रैव पूर्वागतश्च स
र्वेषां लभेताधवरश्चतां। पश्चाद्वरो गायन्न दत्ते तस्याः प्रतिलभेत सः। अथागच्छेन्न वोढा यां दत्तां पूर्ववरो हरेत्। मनुः। नानु
शुश्रुम जात्वेतत्पूर्वेष्वपि हि जन्मसु। शुल्कसंज्ञेन मूल्येन छन्नं दुहितृविक्रयं। अन्यां च दर्शयित्वान्या वोढुर्मर्दे घ
कन्या प्रदीयते। ते उभे एकशुल्केन वहेदित्यब्रवीन्मनुः। मनुः। न दत्वा कस्यचित्कन्यां पुनर्दद्याद्विचक्षणः। दत्वा पुनः प्र
यच्छन्हि प्राप्नोति पुरुषानृतं। पंचपश्वानृते हंतीत्यस्का सह स्वपुरुषानृतं। सएव। एतत्तु न परे चक्रुर्नापरे
जातु साधवः। यदन्यस्याभ्यनुज्ञाय पुनरन्यस्य दीयते। सकृदंशो निपतति सकृत्प्रदीयते कन्या प्रदीयते। स
कृदाह ददामीति त्रीण्येतानि सकृत्सकृत्। भास्तेप्येवं याज्ञवल्क्यः। सकृत्प्रदीयते कन्या हरंस्तां चोरदंडभाक्।
याज्ञवल्क्यः। दत्तामपि हरेत्प्राज्ञः श्रेयांश्चेद्वर आव्रजेत्। पूर्वस्य दोषसत्वे इदमिति विज्ञानेश्वरः। संबंधतत्वे वसिष्ठः।
कुलशीलविहीनस्य षण्ढादिपतितस्य च। अपस्मारिविधर्मस्य रोगिणां वेषधारिणां। दत्तामपि हरेत्कन्यां सगोत्रो
ढां तथैव च। मनुः। षंढांधबधिरादीनां विवाहोस्मिन्यथोचितं। विवाहात्संभवे तेषां कनिष्ठो विवहेत्तदा। पितृव्यपु एमः
त्रे सापत्न्ये पारदारासुतेषु च। विवाहाधानयज्ञादौ परिवेदो न दूषणं। अन्यदक्तव्यं विस्तरभीतेर्नोच्यते इति दिक्।

अत्र नांदीश्राद्धे विशेषं तदधिकारविशेषं चाग्रे वक्ष्यामः। इदं चाद्यविवाहे पिता कुर्यात। द्वितीयादौ वर एव कुर्यात। नांदी
श्राद्धं पिता कुर्याद्दारोपाणिग्रहे पुनः। अत ऊर्ध्वं प्रकुर्वन्स्वयमेव तु नांदिकमिति स्मृतेः। त्रिकांडमंडनोपि। पित्रोः सतो जी
वतोः कुर्यात्सुनः पाणिग्रहं यदा। पितृनांदीमुखं श्राद्धं नोत्क्रांतस्य मनीषिभिः इति रेणुकाकारिका। उक्ते काले विवा
हांगं कुर्यान्नांदीमुखं पिता। देशांतरे विवाहश्चेत्तत्र गत्वा भवेदिदं। लग्नघटीस्थापनमाह नारदः। षडंगुलमितो
छेधे द्वादशांगुलमायते। कुर्यात्पातालवत्ताम्रपात्रं तद्दशभिः पलैः। ताम्रपात्रे जलैः पूर्णे मृत्पात्रे वाथवा शुभे।
मंडलार्धोदयं वीक्ष्य रवेस्तत्र विनिक्षिपेत्। तत्र मंत्रः। मुख्यं त्वमसि यंत्राणां ब्रह्मणा निर्मितं पुरा। भावाभावाय
दंपत्योः कालसाधनकारणमिति। वरस्य मधुपर्कमाह याज्ञवल्क्यः। प्रतिसंवत्सरं त्वर्घ्याः स्नातकाचार्यपार्थि
वाः। प्रियो विवाह्यश्च तथा यज्ञं प्रत्यृत्विजः पुनः। अत्र विशेषो गृह्यपरिशिष्टे। वरस्य या भवेच्छाखा तच्छाखा गृ
ह्यचोदितः। मधुपर्कः प्रदातव्यो ह्यन्यशाखे पि दातरि। अत्र वद्दातृशब्दोऽस्त्रलिंगाद्युपलक्षणं तदाह। अर्घ्यशा
खया मधुपर्क इति। अर्घ्यस्य यच्छाखीयं कर्म तच्छाखया मधुपर्क इति याज्ञिकाः। जपं तत्क्षवाणवत्सर्वत्र यज्ञमा
नशाखयैव मधुपर्क इत्याहातत्तु नाद्रियंते वृद्धाः। अत्र पंचाशता भवेद्ब्रह्मा तदर्द्धं विष्टरः स्मृतः। इत्यादि गृह्यपरि

शिष्टादेर्विशिष्टादिलक्षणां मधुपर्कादि विधिश्च स्वगृह्याद्बोध्यः। कन्यादाने प्रपितामहपूर्वकत्वमुक्तं। स्मृत्यर्थसारे। नांदी
मुखे विवाहे च प्रपितामहपूर्वकं। नामसंकीर्त्तयेद्विद्वानन्यत्र पितृपूर्वकं। नांदीमुखे इति बह्वृचाद्यतिरिक्तविषयं
गृह्यपरिशिष्टे पित्राद्यानुलोम्यास्नानात्। व्यासः। भुक्त्वा समुद्वहेत्तुन्यां सावित्रीग्रहणां तथा। उपोषितः स्नुतां द
द्यादर्चिताय वरायतु। भुक्त्वेति मधुपर्के वैधभोजनपरं। गृह्यपरिशिष्टे। कन्यां वारयमाणानामेषधर्मो विधीयते।
प्रत्यङ्मुखां वा यंति प्रतिगृह्णाति प्राङ्मुखः। मदनरत्ने संग्रहः। वरगोत्रं समुच्चार्य प्रपितामहपूर्वकं। नामसंकी
र्त्तयेद्विद्वान्कन्यायाश्चैवमेव हि। तिष्ठन्पूर्वमुखो दाता वरः प्रत्यङ्मुखो भवेत्। मधुपर्कार्चितायैनां तस्मै दद्या
त्सदक्षिणां। उदपात्रं ततो गृह्य मंत्रेणानेन दापयेत्। गौरीं कन्यामिमां विप्र यथाशक्ति विभूषितां। गोत्रा
यशर्मणे तुभ्यं दत्तां विप्र समाश्रय। भूमिं गाश्चैव दासीश्च वासांसि च स्वशक्तितः। महिषीर्वाजिनश्चैव दद्यात्स्व
र्णमणीनपि। ततः स्वगृह्यविधिना होमाद्यं कर्म कारयेत्। यथाचारं विधेयानि मंगल्यकुतुकानि च। एत
त्कन्यादानं त्रिः कार्यमिति शौनकः। गृहप्रवेशनीयहोमे विशेषमाहाश्वलायनः। अर्द्धरात्रे व्यतीते तु परेद्युः
प्रातरेव हि। गृहप्रवेशनीयः स्यादिति यज्ञविदो विदुः। औपासनहोमे विशेषमाह शौनकः। यदि रात्रौ विवाहा

एमः

श्रिहृतमन्नः स्यात्त्रयामतिः। उपक्रम्योत्तरस्याङ्कः सायंपरिचरेदमुं। यदि रात्रौ नवनाडीमध्ये स्युस्त्यात्तिस्तदा तद्दैवहोमा
रंभः। तदुत्तरं चेत्परदिने सायमारंभ इति स्मृदर्शनभाष्ये उक्तं। अथ देवकोच्छापने। समे च द्दिवसे कुर्याद्देवकोच्छापनं
बुधः। षष्ठं च विषमे नेष्टं मुक्त्वा पंचमसप्तमौ। निर्णयदीपिकागार्ग्यः। नांदीश्राद्धे कृते पश्चाद्यावन्मातृविसर्ज्जनं। दर्श
श्राद्धं क्षयश्राद्धं स्नानं शीतोदकेन च। अपसव्यं स्वधाकारं नित्यश्राद्धं तथैव च। ब्रह्मयज्ञं चाध्ययनं नदीसीमा
तिलंघनं। उपवासव्रतं चैव श्राद्धभोजनमेव च। नैव कुर्युः सपिंडाश्च मंडपोद्वासनावधि। बृहस्पतिः। तीर्थे विवा
हे यात्रायां संग्रामे देशविप्लवे। नगरग्रामदाहे च स्पृष्टास्पृष्टं न दुष्यति। योगयाज्ञवल्क्यः। न स्नायादुत्सवे तीते मं
गलं विनिवर्त्य च। अनुव्रज्य सुहृद्बंधूनर्चयित्वेष्टदेवतां। ज्योतिषे। स्नानं सचैलं तिलमिश्रकर्मप्रेतानुपानं कल
शप्रदानं। अपूर्वतीर्थामरदर्शनं च विवर्ज्जयेन्मंगलतो हि मेकं। मासषट्कं विवाहाद्यै व्रतप्रारंभणे तच। जीर्णभां
डादि न त्याज्यं गृहसंमार्ज्जनं तथा॥ ऊर्ध्वं विवाहात्सुतस्य तथा च व्रतबंधनात्। आत्मनो मुंडनं चैव वर्षं वर्षार्द्ध
मेव च। अभ्यंगो सूतके चैव विवाहे पुत्रजन्मनि। मांगल्येषु च सर्वेषु न धार्यं गोपिचंदनं। ज्योतिर्निबंधे। उद्वाहात्प्र
थमे शुचौ यदि वसेद्भर्तुर्गृहे कन्यका हन्यात्तज्जननीं क्षये निजतपुं ज्येष्ठे पतिं ज्येष्ठकं। पौषे च श्वशुरं पतिं च मलि

नेचैत्रेस्वपित्रालयेतिष्ठंती पित्तांनिहंतिनमपंतेषामभावाद्भवेत्॥ निबंधे॥ विवाहात्प्रथमेपौषेआषाढेचाधिमासके॥ नसा
भर्तुर्गृहेतिष्ठेच्चैत्रेपितृगृहेतथा॥ हेमाद्रौस्मृत्यंतरे॥ विवाहव्रतचूडासुवर्षमर्द्धंतदर्द्धकं॥ पिंडदानंमृदास्नानंनकुर्यात्ति
लतर्प्पणं॥ अथवधूप्रवेशः॥ समतुंगो॥ मार्गशीर्षेतथामाघेमाधवेज्येष्ठसंज्ञके॥ सुप्रशस्तेभवेद्देहेश्वप्रवेशोनवयोषि
तां॥ नारदः॥ आरभ्योद्वाहदिवसात्षष्ठेवाप्यष्टमेदिने॥ वधूप्रवेशःसंपत्त्यैदशमेथसमेदिने॥ संग्रहे॥ विवाहमारभ्यवधूप्रवेशो
युग्मेतिथौषोडशवासरांतः॥ ऊर्ध्वंततोहेयुजिपंचमाब्दात्ततःपरस्तान्नियमोनचास्ति॥ नारदः॥ समेवर्षेसमेमासेयदि
नारीगृहंव्रजेत्॥ आयुष्यंहरतेभर्तुःसानारीमरणंव्रजेत्॥ प्रयोगरत्नेतु॥ वधूप्रवेशःप्रथमेतृतीयेशुभवःप्रदःपचम
केथवाह्नि॥ द्वितीयकेवाथचतुर्थकेवाषष्ठेवियोगामयदुःखदःस्यात्॥ उक्तंतत्रमूलंचिंत्यं॥ इहतुवसिष्ठोपिष
ष्ठाष्टमेवादशमेदिनेवाविवाहमारभ्यवधूप्रवेशः॥ पंचांगसंस्था॥ दूरदिनंविनापिविधायवसद्रोचरगोपिकार्यः॥ लल्लः॥ स्वभ
वनपुरप्रवेशेदेशानांविप्लवेतथोद्वाहे॥ नववध्वागृहगमनेप्रतिशुक्रविचारणानास्ति॥ मांडव्यः॥ नित्ययानेगृहे
जीर्णेप्राशनांतेषुसप्तसु॥ वधूप्रवेशमांगल्येनमौढ्यंगुरुशुक्रयोः॥ ज्योतिःप्रकाशे॥ वामेशुक्रोनवोढायाःसुखंहानि एमः
श्चदक्षिणेधनंधान्यंचपृष्ठस्थेसर्वनाशःपुरःस्थिते॥ नवोढायाःस्त्रीवैधव्ययदुक्तंसन्मुखेभृगौ॥ तद्देवविबुधैर्ज्ञेय

केवलंतुद्विरागमे। पूर्वतोभ्युदिते शुक्रे प्रयायाद्द्विरागमे। पश्चादभ्युदिते चैवयायात्पूर्वोत्तरे दिशौ। व्यवहार
तत्वेपौष्णात्कराच्चश्रवणाच्चयुग्मेहस्तत्रयेमूलमघोत्तरासु पुष्येचमैत्रेचवधूप्रवेशोरिक्तेतरेव्यर्ककुजेचश
स्तः। गर्गः। व्यतीपातेचसंक्रांतौग्रहणेवैधृतावपि। आब्दंविनाशुभंनैवप्राप्तकालेपिमानवः। तथा। अमासं
क्रांतिविष्ट्यादौप्राप्तकालेपिनाचरेत्। इति। अथद्विरागमनं। रत्नोच्चये। माघफाल्गुनवैशाखेषुशुक्लपक्षेशु
भेह्नि। गुर्वादित्यविशुद्धौस्यान्नित्यंपत्नीद्विरागमः। बादरायणः। नीहारांशुदिनेत्वाष्ट्रादितिगुरुब्रह्मानुराधा
श्विनीशाक्रेभोत्का। वासुविष्णुवरुणाख्याक्षेप्रशस्तेतिथौ। कुंभाजालिगतेरवौशुभकरेप्राप्तोदयेभार्गवेस्त्री
वर्ज्यास्फुजितांदिनेनववधूवेश्मप्रवेशःशुभः। अथपुनर्विवाहः। श्रीधरीये। पुनर्विवाहंवक्ष्यामिदंपत्योः
शुभवृद्धिदं। लग्नेदुर्लग्नयोर्दोषेग्रहतारादिसंभवे। अन्येषुशुभकालेदुष्टयोगादिसंभवे। विवाहेवापि
दंपत्योराशौचादिसमुद्भवे। तस्यदोषस्यशांत्यर्थंपुनर्वैवाह्यमिष्यते। याज्ञवल्क्यः। सुरापीव्याधिताधूर्ता
वंध्यार्थघ्न्यप्रियंवदा। स्त्रीप्रसूश्चाधिवेत्तव्यापुरुषद्वेषिणीतथा। मनुः। वंध्याष्टमेधिवेत्तव्यादशमेतुमृतप्र
जाः। एकादशेस्त्रीजननीसद्यस्त्वप्रियवादिनी। इति। संग्रहेतु। अप्रजांदशमेवर्षेस्त्रीप्रजांद्वादशेत्यजेत्। मृतप्रजांपंच

१८१ दशो सद्यस्त्वप्रियवादिनी। एकामुत्क्रम्य कामार्थमन्यां लब्धुं य इच्छति। समर्थस्तोषयित्वार्थैः पूर्वोढामपरां वहेत्। याज्ञ-
वल्क्यः। आज्ञासंपादिनीं दक्षां वीरसूं प्रियवादिनीं। त्यजन्दाप्यस्तृतीयांशमद्रव्यो भरणं स्त्रियाः। मनुः। अधिविन्ना
तु या नारी निर्गच्छेद्रोषिता गृहात्। सा सद्यः सन्निरोद्धव्या त्याज्या वा कुलसन्निधाविति। हेमाद्रौ कात्यायनः। अ-
ग्निशिष्टादिशुश्रूषां बहुभार्यः सवर्णया। कारयेत्तद्बहुत्वे चेज्ज्येष्ठया गर्हिता न चेत्। इति याज्ञवल्क्यः। सत्यामसत्यां सव-
र्णायां धर्मकार्यं न कारयेत्। सवर्णासु विधौ धर्म्ये ज्येष्ठया न विनेतरा। द्वितीयविवाहहोमेऽग्निमाह कात्यायनः। स-
दारोऽन्यान्पुनर्दारानुद्वोढुं कारणान्तरात्। यदीच्छेदग्निमान्कर्तुं क्व होमोऽस्य विधीयते। स्वेऽग्नावेव भवेद्धोमो लोकिके
न कदाचन। त्रिकाण्डमण्डनोऽपि। आद्यायां विद्यमानायां द्वितीयामुद्वहेद्यदि। तदा वैवाहिकं कर्म कुर्यादावसथेऽग्नि-
मानस्तुनदर्शनभाष्ये तु द्वितीयविवाहहोमो लोकिक एव न पूर्वौपासन इत्युक्तं। इदं चासंभवे। तत्र चाग्निद्वयसंस-
र्गः कार्यः। तदाह शौनकः। अथाग्न्योर्गृह्ययोर्योगं सपत्नीभेदजातयोः। सहाधिकारसिद्ध्यर्थमहं वक्ष्यामि शौनकः।
सिद्धमाधेनुदानादथाग्रेणाग्निं दर्भस्तंबे हुतशेषं निदधाति ब्रह्मजज्ञानं पिता विराजमिति द्वाभ्यां हुतं। चतुर्गृही-
तमेताभिर्ऋग्भिः षड्भिर्यथाक्रमं। अग्नावग्निश्चरतीत्यग्निनाग्निः समिध्यते। अग्नीदग्निमिति तिसृभिः पाहि नो अग्न एक-

एमः

ग्याततः स्विष्टकृदाद्यन्यहोमंशेषं समापयेत्। गोयुगं दक्षिणादेया श्रोत्रियायापाहिताग्नये। पत्न्योरेकायदि मृता दग्ध्वा
तेनैव तां पुनः। आदधीतान्यया सार्द्धमाधानविधिना गृही।ति। बौधायनसूत्रे तु। अथ यदि गृहस्थो द्वे भार्ये विंदेत क
थतत्र कुर्यात्। इति यस्मिन्काले विंदेतो भावग्नी परिचरेद् परान्ग्नीमुपसमाधाय परिस्तीर्याज्यं विलाप्य स्रुचि चतुर्गृ
हीतं गृहीत्वान्वारब्धायां जुहोति। नमस्ते रूपेणाधाम्ने त्वा मानं द्रा। भिमतत्त्वहृष्टारिष्टां सपरब्रह्मणान्नवेद सुखा
हेत्स्यथायं ते योनिर्ऋ।त्विय इति समिधि समारोपयेत्सर्वाग्निमुपसमाधाय जुहुयान उद्बुध्यस्वाग्न इति समिधमा
धाय परिस्तीर्य स्रुचि चतुर्गृहीत्वा द्वयोर्भार्ययोरन्वारब्धयोर्यजमानोभिमृशति यो ब्रह्मा ब्रह्मण इत्येतेन मन्
त्रेनैकं चतुर्गृहीतं जुहोत्याग्निमुखात्कृत्वाथ प्रजुहोत्यामितं संकल्पेथामिति पुरोनुवाक्यामनूच्याग्नेपु
रीष्येति याज्यया जुहोत्यथाज्याहुतीरुपजुहोति पुरीष्यमस्तामित्यनुवाकस्यांता स्वनुवाकस्य स्विष्टकृत्प्रभृति
द्वितीयादि विवाहे काल उक्तः। संग्रहे। प्रमदामृतिवासरादितः पुनरुद्वाहविधिर्वरस्य च। विषमे युग्मवत्सरेष्वु मा
युगले चापि मृतिप्रदो भवेत्। तृतीयादि विवाहनिषेधो मात्स्ये। उद्वहेद् इति सिद्ध्यर्थं तृतीयां न कदाचन। मोहा
दज्ञानतो वापि यदि गच्छेत्तु मानुषोमात्स्ये। उद्वहेद्द्राषी। नश्यत्येव न संदेहो गर्गस्य वचनं यथेति। संग्रहे। तृतीयां

यदि चोद्वाहे तर्हि सा विधवा भवेत्। चतुर्थ्यादिविवाहार्थं तृतीयेर्कं समुद्वहेत्। तद्विधिरुक्ता। रविशन्योर्हस्ते वा वारः संक
ल्प्य नंदत्वाव स्त्रेणा तंतुभिरावेष्ट्य। त्रिलोकवासिन्सप्ताश्वछायया सहितो रवे। तृतीयोद्वाहजं दोषं निवारय सुखं कु
रु इति संप्रार्थ्य जलेन त्रिः सिंचेत्। मम प्रीतिकरा येयं मया सृष्टा पुरातनी। अर्कजा ब्रह्मणा सृष्टा अस्माकं प्रतिर
तु। नमस्ते मंगले देवि नमः सवितुरात्मजे। त्राहि मां कृपया देवि पत्नीत्वं ममेहागता। अर्के त्वं ब्रह्मणा सृष्टः सर्वप्रा
णिहिता प्रभो। वृक्षाणामादिभूतस्त्वं देवानां प्रीतिवर्द्धनः। तृतीयोद्वाहजं पापं मृत्युं चाशु विनाशयेति। ततः आचार्यः
काश्यपगोत्रामादित्यप्रपौत्रीं सवितुः पौत्रीं मम पुत्रीमर्ककन्याममुकगोत्राय वराय दास्ये इति वाग्दानं कृत्वा
वरस्य मधुपर्कं कृत्वा ततः पटे धृत्वा स्वस्ति न इति सूक्तं जप्त्वा पूर्ववत्कन्यादत्वार्ककन्यामिमां त्वमूद्वहेन कन्यादानम
त्रमुक्त्वा दक्षिणां दद्यात्। ततो गायत्र्यावेष्टितमंत्रेण वृहत्सामेति मंत्रेणा कंकणं बध्वार्कस्य चतुर्दिक्षु कुंभेषु
विष्णुं संपूज्याग्निं प्रतिष्ठाप्याघारांते संगोभिरिति बृहस्पतये यस्मै त्वा कामकामाय स्वाहा चाग्नये व्यस्तसमस्त एताः
व्याहृतिभिराज्यं हुत्वाचार्याय गोयुग्मं दत्वा भयाकृतमिदं कर्म स्थावरेषु जरायुणा। अर्कोपत्यानि नो देहि
तत्सर्वं ह्यं तमहे सी। तिन मेरितिहिका॥ इति निर्णयसिंधौ विवाहः। अथ धाधाभं। रत्नमालायां। प्राजापत्ये रूषभे सहि

देवेपुष्येऽप्येष्टासैंद्वैकृत्तिकास्तु।अग्न्याधानंत्वुत्तरायणंत्रयोपेचित्रादिस्येकीर्त्तितंगर्गमुख्यैः।आश्वलायनः।
अग्न्याधेयंकृत्तिकासुरोहिण्यांमृगशिरसिफाल्गुनीषुविशाखयोरुत्तरयोःप्रोष्ठपदयोरेतेषांकस्मिंश्चिद्व
संतेपर्वणि।ब्राह्मणआदधीत।ग्रीष्मवर्षाशरत्सुक्षत्रियवैश्योपकृष्टायस्मिन्कस्मिंश्चिदृतावादधीतसोमे
नयक्ष्यमाणोनर्तुंपृच्छेन्ननक्षत्रं।सोमाधानेसर्वथानालोचनमार्त्तंपरं।सोमेनयक्ष्यमाणोनर्तुंपृच्छेन्नन
क्षत्रंतदेतदार्त्तस्यापातिवेलंवाश्रद्धायुक्तस्यभवतीतिबौधायनोक्तेरिति।मदनरत्नेहृद्गार्ग्यः।पुष्याग्नेययुत
रादित्यपौष्णज्येष्ठाचित्राकहिर्दैवेंद्रभेषु।कुर्याद्वह्न्याधानमाद्यंवसंतग्रीष्मोष्मांतेष्वेवाविप्रादिवर्णैः।कालाद
र्शे।अग्निहोत्रंदर्शपूर्णमासावप्युत्तरायणे।उपक्रम्यंयथाकालमुपासीरन्नहिजातयः।सोमंचपशुबंधंचस
र्वाश्चविकृतीरपि।सौम्यापग्नेयथाकालंविदध्युर्गृहमेधिनः।अत्रविशेषःपूर्वमुक्तः।अग्निहोत्रकालउक्तश्छं
दोगपरिशिष्टे।उदितेनुदितेचैवसमयाध्युषितेतथा।सर्वथावर्त्ततेयज्ञइतीयंवैदिकीश्रुतिः।एषांस्वरूपंत
त्रैवरात्रेस्तुषोडशेभागोयैग्रहनक्षत्रभूषिते।कालंत्वनुदितंज्ञात्वाहोमंकुर्याद्द्विजसत्तमः।तथा।प्रभातसमयेन
ष्टेग्रहनक्षत्रमंडले।रविर्यावन्नदृश्येतसमयाध्युषितंचतत्।रेखामात्रंप्रदृश्येतरश्मिभिश्चसमन्वितः।उदितंतद्वि

१९३

ज्ञानीयात्तत्र होमं प्रकल्पयेत्। आश्वलायनः। उपोदयं व्युषित उदिते वा। सायं तु स एव। अस्तमिते होम इति। स एव प्रदोषांतो होमकालः संगवांतः प्रातरिति। छंदोगपरिशिष्टे। यावत्सम्यङ्न भाव्यंते नभस्यृक्षाणि सर्वतः। न च लोहितिमापैति तावत्सायं तु हूयंते। उपासनेप्येवं। तस्याग्निहोत्रेण प्रादुष्करणहोमकालौ व्याख्यातौ। इत्याश्वलायनोक्तेः। अथावसथ्याधानं पारस्करः। आवसथ्याधानं दारकाले दायाद्यकाले एकेषामिति। दायाद्यकालो विभागकालः। मदनरत्ने भामसः। अग्निर्वैवाहिको येन न गृहीतः अमादिना पितर्युपरते तेन ग्रहीतव्यः। अयं पत्न्यंतः। यो गृहीतो विवाहाग्निं गृहस्थ इति मन्यते। अन्नं तस्य न भोक्तव्यं वृथा पाको हि स स्मृतः। ज्येष्ठभ्रातरि पितरि वा साग्नौ कनिष्ठस्य पुत्रस्य वाग्न्यभावेपि न दोषः। तदा तत्रैव गार्ग्यः। पितृपाकोपजीवी वा भ्रातृपाकोपजीवकः। ज्ञानाध्ययननिष्ठो वा न दुष्येताग्निना विना। गृहस्थस्याप्यध्ययनमाह मत्स्यसूक्तः। अनधीत्य द्विजो वेदं स्नात्वोद्वाह्य यथातथा॥ अधीते ब्रह्मचर्येणासंगं वेदं गुरोर्गृहे। इदं चाधानं ज्येष्ठे कृताधानेन कार्यं। दाराग्निहोत्रसंयोगं कुरुते योऽग्रजे स्थिते। परिवेत्ता स विज्ञेयः परिवित्तिस्तु पूर्वजः। इति मनुशातातपोक्तेः। स्मार्तेप्येवं। सोदर्ये तिष्ठति ज्येष्ठे न कुर्याद्दारसंग्रहं। आवसथ्यं तथाधानं पतितस्तु तथा भवेत्। इति तत्रैव गार्ग्योक्तेः। आज्ञायांल दोषमाह सुमंतुः। ज्येष्ठो भ्राता यदा तिष्ठेदाधा

एमः

नैनैवज्याश्रयेत्। अनुज्ञातस्य कुर्वतः शं स्वस्य वचनं यथा। वृद्धवसिष्ठः। अग्रजस्तु यदानग्निरादध्यादनुजः कथं। अग्रजा
नुमतः कुर्यादग्निहोत्रं यथाविधि। सोदराणां तु सर्वेषां परिवेत्ता कथं भवेत्। दारैस्तु परिविद्यंते नाग्निहोत्रेण नेज्यया।
अधिकारिणोपि भ्रातुरनुज्ञया कुर्यादिति मदनपारिजातः। अनुज्ञया विवाहस्तु नेत्यर्थः। असोदराणां सापत्नं
दत्तकादीनां न दोषः। दत्तकस्यापि सोदरविवाहाभावे दोष एव। तदाह हेमाद्रौ वसिष्ठः। पितृव्यपुत्रान्सापत्नान्पर
नारीसुतांस्तथा। दाराग्निहोत्रसंयोगेन दोषः परिवेदने। परनारीसुता दत्तकादयः। देशांतरे विशेषमाह सए
वा। अष्टौ दश द्वादश वर्षाणि ज्येष्ठं भ्रातरमनिर्विष्टमप्रतीक्षमाणः प्रायश्चित्ती भवतीति। क्लीबादावप्यदोषमा
ह कात्यायनः। देशांतरस्थक्लीबैकवृषणानसहोदरान्। वेश्यानिष्टांश्च पतितशूद्रतुल्यातिरोगिणः। जडमू
कांधबधिरकुब्जवामनखंजकान्। अतिवृद्धानभार्यांश्च कृषिसक्तान्नृपस्य च। धनवृद्धिप्रसक्तांश्च कामतोका
रिणस्तथा। कुटिलोन्मत्तचोरांश्च परिविंदन्न दुष्यति। एकं ज्येष्ठे छिन्नहस्तादावपि न परिवेतृत्वं तदाह त्रिकांड
मंडनः। दर्शेष्टिं पौर्णमासेष्टिं सोमेज्यामग्निसंग्रहं। अग्निहोत्रं विवाहं च प्रयोगे प्रथमे स्थितं। न कुर्यात्तन कज्ये
ष्ठे सोदरे चाप्यकुर्वति। क्षेत्रजारावतीजाने विद्यमानेपि सोदरे। नाधिकारविघातोस्ति भिन्नोदर्येपि चौरसे। एवं धभ्र

कबधिरपतितोन्मादहूषणो। सन्यस्तछिन्नहस्तादीयद्धाषदादिदूषणोः॥ जनके सोऽहं रेत्येषेकुपीदेवेतरः॥ क्रियामिति।
आऐहतुंदशजंशक्रीमेमेत्याधाने मंत्रवर्णाछाशक्कीरं कुली॥ तंत्ररत्नेप्युक्तं। अंगावैकल्यात्सूर्वमाहिताग्निलेचा
।धिक्रियेतैवनित्येषु। आधानंत्वनकुर्यात्त। तस्यनैमित्तिकत्वात्॥ इति। एवंचतुरंगुलोपिषडंगुलकरणाविकर्णा
देस्तस्यैवाधिकारः॥ एकादश्यस्तुदशांतंगमः॥ शरीरकार्श्यंचाविप्रतिषिद्धमितिहि। एपकोशिस्त्रैकर्माशक्तिहे
तोरेवांगवैकल्यस्यानिषेधात्। अतएवद्वाह्यापणात्सूत्रेयाऽन्यप्रथमैर्द्विभिर्गुप्तोरिति। न्यूनांगस्याप्यधिकार
उक्तः॥ अपरार्केउशनाः॥ पितापितामहोयस्यअग्रजोवाधकस्य। वितातपोग्निहोत्रमंत्रेषुनदोषःपरिदेवने॥ प
तुरज्ञायामप्यदोषमाहमदनरत्नेसुमंतुः॥ पित्रापस्यतुनाधानंकथंपुत्रस्तुकारयेत। अग्निहोत्रेधिकारो
स्तिशंखस्यवचनंयथेति। नाधानंकृतमित्यर्थः॥ एतदाज्ञायामेवेतिहेमाद्रिः॥ यत्तुपितुःस्त्वयप्यनुज्ञातेना
दधीतकदाचनेतितत्स्यप्यधिकारेज्ञेयं। अथशूद्रस्यसंस्काराः॥ यमः॥ शूद्रोप्येवंविधःकार्योविनामंत्रेणसंस्
स्कृतः॥ नकेनचित्समसृजच्छंदसातंप्रजापतिः॥ वंरसामंत्रेण। व्यासोपि॥ गर्भाधानंपुंसवनंसीमंतोजातकर्मच। एम
नामक्रियानिष्क्रमोन्नप्राशनंवपनक्रिया। कर्णवेधोव्रतादेशोवेदारंभक्रियाविधिः। केशांतःस्नानमुद्वाहो

विवाहाग्निपरिग्रहः। त्रेताग्निसंग्रहश्चैव संस्काराः षोडश स्मृताः। इत्युक्त्वाह। नवैता कार्या वैधांतामंत्रवर्ज्जं क्रिया स्त्रियाः
विवाहो मंत्रतस्तस्याः शूद्रस्यामंत्रतो दशेति। मदनरत्ने हिरण्यगर्भदाने तु। गर्भाधानं पुंसवनं सीमंतोन्नयनं तथा
कुर्युर्हिरण्यगर्भस्य ततस्ते द्विजपुंगवा इत्युपस्का जातकाः कुर्या क्रियाः षोडशापराः। इत्यत्र स्त्रिया जातकर्मनाम
करणनिष्क्रमान्नप्राशनचूडाविवाहाः षट्। शूद्राणां तु षडेते पंचमहायज्ञाश्चेत्येकादशेत्युक्तं। रूपनारायणह
रिहरभाष्ययोरेवं। शार्ङ्गधरस्तु। द्विजानां षोडशैव स्युः शूद्राणां द्वादशैव हि। पंचैव मिश्रजातीनां संस्काराः कुल
धर्मतः॥ वेदव्रतोपनयनमहानाम्नीमहाव्रतं॥ विवाहाद्वादश शूद्राणां संस्कारा नाममंत्रत इत्याह। अपरार्के
त्तु। गर्भाधानमृतौ पुंस इत्यत्राह। एतच्चातुर्वर्ण्यपरं। न द्विजातिमात्रपरं। तथा सत्युपनयनं विधायवाच्यं
स्यादिति। तेन तन्मतेष्टौ भवेतिवंति। ब्राह्मे तु। विवाहमात्रं संस्कारं शूद्रोपि लभतां सदेत्युक्तं। अत्र सदस
च्छूद्रगोचरत्वेन देशभेदाद्व्यवस्था। यत्तु मनुः। न शूद्रे पातकं किंचिन्न च संस्कारमर्हतीति तदर्थमाह मेधाति
थिः। मत्स्यामात्यतो निषिद्धं स्तेयानृतादि। न तदतिक्रमे स्य पापं यथा द्विजानां॥ उपनयनरूपं संस्कारं च नार्ह
तीति। तेन तत्स्त्री कार्याः। शूद्रो वर्णश्चतुर्थोपि वर्णत्वाद्धर्ममर्हति। वेदमंत्रस्वधास्वाहावषट्कारादिभिर्विना इति

१८५
स्मातोक्तेः। अमंत्रस्य तु शूद्रस्य विप्रो मंत्रेण गृह्यते इति मरीच्युक्तेश्चायं परिभाषा सर्वार्था। तेन शूद्रधर्मेषु सर्वत्र विप्रे
ण मंत्रः पठनीयः। सोपि पौराण एवेति शूलपाणिः। एवं स्त्रीणामपीति दिक्॥ इति श्रीमत्कृष्णभट्टात्मजकमलाकरभट्ट
कृते निर्णयसिंधौ संस्कारनिर्णयः। अथ पूर्त्तकालाः। तत्र जलाशयस्य। वराहः। हस्तो मघानुराधा पुष्यधनिष्ठोत्तरा
णि रोहिण्यः शतभिगित्यारंभे कूपानां शस्यते भगणः। हेमाद्रौ भविष्ये। तस्मिन्सलिलसंपूर्णे कार्त्तिके तु विशेषतः।
मुनयः केचिदिच्छंति व्यतीते चोत्तरायणे। न कालनियमस्तत्र सलिलं तत्र कारणं। दीपिकायां। मार्त्तंडे रुद्रपु
ह्वौ मुनिदिशयने माघशुक्लस्य पद्दे मूलाषाढोत्तराश्विश्रवणगुरुकरे पौष्णशक्रान्त्यचंद्रे मित्रे ब्राह्मे च पूर्वे
मदनरवितिथौ १२ सद्वितीयात्तृतीये कार्यातोयप्रतिष्ठा गुरुसितदिने कालशुद्धे सुलग्ने वराहः। आग्नेय
दिक्कोणे ग्रामस्य पुरस्य वा यदि भवति कूपः। नित्यं स करोति भयं दाहं च समानसंप्रायः। नैर्ऋत्ये बालभयं वनिता
क्षयं च वायव्ये। दिक्त्रयमेतत्त्यक्त्वा शेषाः शुभावहाः कूपाः। वास्तुवाक्ये। भूतिं पुष्टिं पुत्रहानिं पुरंध्रीनाशं मृत्युं
संपदं शस्त्रबाधां। किंचित्सौख्यं शंभुकोणादि कुर्याल्लूपो मध्ये गेहमर्थंत्रयं च। उत्सर्गविधिश्चोक्तो बह्वृचपरिशिष्टे एनः
अथातो वापीकूपतडागयज्ञं व्याख्यास्यामः। पुण्ये ह्युदकसमीपेग्निसमाधाय वारुणं चरुं श्रपयित्वाज्यभागाते

आज्याहुतीर्जुहुयात्।समुद्रज्येष्ठेतिप्रत्यृचंततोहविषाशेषेतत्वाम्यामी।तिपंचत्वन्नोअग्नेइतिद्वेइमम्मेवरुणेतिचाविष्ट
कृतेनवमंमार्ज्जनांतेधेनुंतारयेत्तामनुमंत्रयेदिदंसलिलंपवित्रंकुरुष्वशुद्धाःपूताअमृताभवंतुनित्यं।मांतारयंती
कुरुतीर्थाभिषेकंलोकांश्चोकंतरतेतीयंतेचेतिपुच्छायेन्वारब्धेउत्तीर्यापोअस्मानित्यथापराजितायांदिश्पुच्छ
पयेत्तद्रूपवसाइगावती।तिहिंकृतंचेद्धिंकृणवतीत्यलंकृतांविप्रायदद्यात्ततएवाशक्रमाद्दक्षिणांततउत्सृजेद्देवपितृम
नुष्याःप्रीयंतामितिब्राह्मणान्भोजयित्वास्वस्त्ययनंवाचयीत।विस्तरस्तुमात्स्योक्तोस्मत्कृतजलाशयोत्सर्गविधौहे
यः।कूपादेरुत्सर्गाकरणेजलंनस्पृश्यमसंस्कृतं।तथा।वापीकूपतडागादेरोपजलंस्यादसंस्कृतं।।अपेयंतद्भवेत्स
र्वंपीत्वाचांद्रायणंचरेत्।अथवृक्षारोपणं।।चंडेश्वरः।आदित्यचांद्रपित्र्यतिष्यविशाखपौष्णमूलोत्तरात्रयहस्तंग
मवारुणाश्व।एतेषुतारकगणेषुहितंनराणांवृक्षादिरोपणमिहोपदिशंतिधीराः।अथमूर्तिप्रतिष्ठा।।वसिष्ठः।ह
स्तत्रयेमित्रहरित्रयेचपौष्णद्वयादित्यसुरेज्यभेषु।तिस्रोत्तराधातृशशांकभेषुसर्वामरस्थापनमुत्तमंस्यात्।मा
त्स्ये।चैत्रेवाफाल्गुनेवापिज्येष्ठेवामाधवेतथा।माघेवासर्वदेवानांप्रतिष्ठाशुभदाभवेत्।नारदस्तुचैत्रंनिषेधति।
विचैत्रेष्वेवमासेषुमाघादिषुचपंचसु।इति।तेनात्रविकल्पः।अत्रमाघमासोविष्णुप्रतिष्ठाव्यतिरिक्तविषयः।माघे

कर्त्तुर्विनाशायफाल्गुनेशुभदाभवेदितिविष्णुधर्मोक्तेरितिहेमाद्रिः॥मात्स्ये।प्रतिपत्सुद्वितीयायांतृतीयायांधनप्रदा।
चतुर्थ्यांनाशमाप्नोतियमस्यासुखदावहा॥विनायकस्यतथातत्रकर्त्तुर्बहुहितप्रदा।पंचम्यांश्रीयुताकर्त्तुर्वरदा
चतथाभवेत्।षष्ठ्यांलक्ष्मीयुतानित्यंसप्तम्यांरोगनाशिनी।अष्टम्यांधान्यबहुलानवम्यांचविनश्यति।भद्रकाल्याः
कृतातत्रकर्त्तुर्भवतितुष्टये।धर्मवृद्धिकरीज्ञेयादशम्यांतुतथातिथौ।एकादश्यांतथायुक्ताद्वादश्यांसर्वकाम
दात्रयोदश्यांतथाज्ञेयाचतुर्दश्यांविनश्यति।कृष्णपक्षेपंचदश्यांकर्त्तुःक्षयकरीभवेत्।पंचदश्यांतथाशुक्ले
सर्वकामकरीभवेत्।आषाढेद्वेतथामूलमुत्तरात्रयमेवच।ज्येष्ठाःश्रवणरोहिण्यःपूर्वाभाद्रपदातथा।हस्तो
श्विनीरेवतीचपुष्योमृगशिरस्तथा।अनुराधातथास्वातीप्रतिष्ठासुप्रशस्यते।श्रीपतिः।रोहिण्युत्तरपौष्णवक
रादित्याश्विनीवासवाराधेंद्वजीवभेष्वादितेर्विष्णोःप्रतिष्ठापनं।पुष्यश्रुत्यभिजित्सुरेश्वरकयोर्विघ्नाधिपस्कंदयो
मैत्रेतिग्मरुचेःकरेनिरृतिभेदुर्गादिकानांशुभं।गणपरिवृढरक्षोयक्षभूतासुराणांप्रथमफणिसरस्वत्यादिकानां एमः
चपौष्णे।श्रवसिसुगतनाम्नोवासवेलोकपानांनिगदितमखिलानांस्थापनंचस्थिरेषु।तेजस्विनीक्षेमकृदग्निदाहवि
धायिनीस्याद्धनदादृढाच।आनंदकृत्कल्पविनाशिनीचसूर्यादिवारेषुभवेत्प्रतिष्ठा।माधवीयेवैखानसः।मात्स्ये

ववाराहनरसिंहत्रिविक्रमाग्रमहिषासुरहंत्र्यश्च स्थाप्या वै दक्षिणायने। वैशाखेऽप्यथो। लिंगप्रतिष्ठायां विशेषः। हेमा
द्रौ लक्ष्मणसमुह्ले। स्वगृहेस्थाप्र मुच्चये। उत्तरायणगते भानौ लिंगस्थापनमुत्तमं। दक्षिणायने वृत्यात्रिवर्षाद्वै भया
वहं। स्वगृहे स्थापनं नेष्टं तस्माद्वै दक्षिणायने। स्थापनं तु प्रकर्तव्यं शिशिरादौ ऋतुत्रये। प्रावृषि स्थापितं लिंगं भ
वेद्धृद्योगदं। हेमंते ज्ञानदं चैव लिंगस्यारोपणं मते॥ रत्नावल्यां। माघफाल्गुनवैशाखज्येष्ठाषाढेषु पंचसु। मा
सेषु शुक्लपक्षेषु लिंगस्थापनमुत्तमं। विष्णोः प्राह तत्रैव वैखानसः। मार्गशीर्षादिमासौ द्वौ निंदितौ ब्रह्मणा पुरा।
मासेषु फाल्गुनः श्रेष्ठश्चैत्रो वैशाख एव च। वृषो वाप्याश्वयुग्मासे श्रावणो मासि वा भवेत्। बौधायनसूत्रे वि
ष्णुप्रतिष्ठामुपक्रम्य। द्वादश्यां श्रोणायां वा यानि चान्यानि पुण्यनक्षत्राणीति। कार्त्तिकादिविशाखांतेष्वि
त्यर्थः। सर्वदेवेषु मासविशेषो हेमाद्रौ विष्णुधर्मे। माघे कर्त्तुर्विनाशः स्यात्फाल्गुने शुभदा भवेत्। लोकानंदकरी
चैत्रे वैशाखे वरसंपुता। आज्ञापुता सदा ज्येष्ठे आषाढे धर्मवृद्धिदा। श्रावणे धनहीना स्यात्प्रोष्ठपादे विनश्य
ति। आश्विने नाशमाप्नोति वह्निना कार्त्तिके तथा। सौम्ये सौभाग्यमतुलं पौषे पुष्टिरनुत्तमा। दोषान्विता धि
मासे स्यात्कर्त्तुरात्मन एव चेति। अत्र श्रावणाश्विनयोर्निषेधः। मार्गशीर्षविधिस्तु विष्णुव्यतिरिक्तविषयः। पू

१९७

वीक्षवचनादितिहेमाद्रिः॥माघश्रावणभाद्रपदनिषेधः॥शिवव्यतिरिक्तविषयः॥तत्रतस्योक्तेः॥देवीस्थापनेतत्रैवविशे
षोदेवीपुराणे॥देव्यामाघेश्विनेमासेचैत्रेमासर्वकामदा॥तथा॥नतिथिर्नचनक्षत्रंनोपवासोत्रकारणं॥सर्वकालं
प्रकर्त्तव्यंकृष्णपक्षेविशेषतः॥अन्यश्चात्रविचारोहेमाद्रौज्ञेयः॥नारदः॥हंसार्थहीनाकर्त्तारंमंत्रहीनातुऋत्विजं॥
स्त्रियंलक्षणहीनातुनप्रतिष्ठासमोरिपुः॥तत्राधि~~ब्रह्मातुब्राह्मणैःस्थाप्योगायत्रीसहितःप्रभुः~~कारिणउक्ता॥॥कृत्य
कल्पतरौदेवीपुराणे॥वर्णाश्रमविभेदेनदेवांस्थाप्याःस्वकंनान्यथाः ब्रह्मातुब्राह्मणैःस्थाप्योगायत्रीसहितःप्रभुः॥
चतुर्वर्णैस्तथाविष्णुःप्रतिष्ठाप्यःसुखार्थिभिः॥भैरवोपिचतुर्वर्णैरंत्यजानांतथामतः॥मातरःसर्वलोकैस्तुस्थाप्याः
पूज्याःसुरोत्तमाः॥लिंगंगृहीयतिर्वापिसंस्थाप्यतुयजेत्सदा॥शिवसर्वस्वेभविष्ये॥यस्तुपूजयतेलिंगंदेवादिमंज
गत्पतिं॥ब्राह्मणःक्षत्रियोवैश्यःशूद्रोवामत्परायणः॥तस्यप्रीतःप्रदास्यामिशुभांल्लोकाननुत्तमान्॥तिथितत्वे
स्कांदे॥शूद्रःकर्माणियोनित्यंहवीष्याणिकुरुतेप्रिये॥तस्याहमर्द्धगृह्णामिचंद्रखंडविभूषिते॥ब्रह्मचारीगृहस्थोवा
वानप्रस्थश्चसुव्रतः॥एवंदिनेदिनेदेवंपूजयेदंबिकापतिं॥सन्यासीदेवदेवेशंप्रणवेनैवपूजयेत्॥नमोतेनाशिवेनैवस्त्री णमः
णांपूजाविधीयते॥एतच्चप्रणामप्राणिद्वजीर्णलिंगपूजाविषयं॥यानितुत्रिस्थलीसेतौनारदीये॥यैःशूद्रेणार्चितंलिंगंवि

ष्णुं वा प्रणमेन्नरः। न तस्य निष्कृतिर्दृष्टा प्रायश्चित्तायुतैरपि। न मेद्यः शूद्रसंस्पृष्टं लिंगं वा हरिमेव वा। स सर्वयातनाभो
गी भवेदाचंद्रतारकं। पाखंडपूजितं लिंगं नत्वा पाखंडतां व्रजेत्। आभीरपूजितं लिंगं नत्वा नरकमश्नुते। यो विड्भिः पू
जितं लिंगं विष्णुं वापि नमेन्नृपः। स कोटिकुलसंयुक्त आकल्पं रौरवे वसेत्। रत्नादीनि तानि नूतनस्थापितलिंगा
दिविषयाणि। यद्वा प्रतिष्ठितं लिंगं मंत्रविद्भिर्यथाविधि। तदा प्रभृति शूद्रश्च योषिद्वापि न संस्पृशेत्। इति तत्रैवो
क्तेः। प्रतिष्ठायां तु शूद्रादीनां नाधिकारः। स्त्रीणामनुपनीतानां शूद्राणां च नरेश्वर। स्थापने नाधिकारोऽस्ति विष्णो
र्वा शंकरस्य वा। यः शूद्रसंस्कृतं लिंगं विष्णुं वापि नमेन्नरः। इहैवासंतदुःखानि पश्यत्यामुष्मिके किमु। शूद्रो वा
नुपनीतो वा स्त्रियो वा पतितोऽपि वा। केशवं वा शिवं वापि स्पृष्ट्वा नरकमश्नुते। इति स्कांदोक्तेरिति त्रिस्थलीसेतौ
पितामहचरणाः। चतुर्वर्णैरिति पूर्वोक्तवचनाविरोधादप्रतिष्ठायां शूद्रस्य विकल्प इति युक्तं पश्यामः। तत्रै
व गौतमः। शिवार्चनं सदाप्येवं शुचिः कुर्यादुदङ्मुखः। वाचस्पतिमते। प्राक् चाग्नेरुदगास्यस्तु प्रातः सायं नि
शासु चेति। प्रयोगपारिजाते गृह्यपरिशिष्टे। प्रतिमाः प्राङ्मुखा रुद्रदङ्मुखो यजेत्। अन्यत्र प्राङ्मुखः। एतच्च स्थिरप्रतिमा
विषयं। अन्यच्चलार्चा तु। अथ प्रतिमाः। भार्गवार्चनदीपिकायां भविष्ये। सौवर्णी राजती ताम्री मृन्मयी च तथा भ

१९९ सर्वत्रैवप्रशस्तोब्रू:शिवसूर्योचतंविना॥ तत्रैववाराहपद्मयो:॥ गृहेलिंगद्वयंनार्च्यंशालग्रामद्वयंतथा॥ द्विचक्रेद्वारकाया
स्तुनार्च्येसूर्यद्वयंतथा॥ शक्तित्रयंतथानार्च्यंगणेशत्रयमेवच॥ द्वौशंखौनार्चयेद्वेवभग्नांचप्रतिमांतथा॥ नार्चयेच्च
तथामत्स्यकूर्मादिदशकंतथा॥ गृहेग्निदग्धाभग्नाश्चनार्चा:पूज्यावसुंधरे॥ एतासांपूजनान्नित्यमुद्वेगंप्राप्नुयाद्गृही
सालग्रामा:समा:पूज्या:समेषुद्वितयंन॥ही॥ विषमानैवपूज्या॥स्तुविषमेष्वेकमेवहि॥ शालग्रामशिलाभग्नापूजनी
यासचक्रका॥ खंडितास्फुटितावापिशालग्रामशिलाशुभा॥ वाराहे॥ दद्याद्वारकायपोटेविशालग्रामशिलांनर:॥
सुवर्णसहितांदिव्यांपृथ्वीदानफलंलभेत॥ अत्रैव॥ य:पुन:पूजयेद्भक्त्याशालग्रामशिलाशतं॥ तत्फलं
नैवशक्तोहंवक्तुंवर्षशतैरपि॥ विष्णुपुराणे॥ ब्राह्मण:क्षत्रियोवैश्य॥ शूद्रश्चपृथिवीपते॥ स्वधर्मतत्परोवि
ष्णुमाराधयतिनान्यथा॥ अविभक्तानामपिपृथग्देवपूजामाहप्रयोगपारिजाते आश्वलायन:॥ पृथगपाकेक
पाकानांब्रह्मयज्ञोद्विजन्मनां॥ अग्निहोत्रंसुरार्चाचसंध्यानित्यंभवेत्पृथक॥ तत्रैवविष्णुधर्मे॥ शालग्रामशि राम:
लांवापिचक्रांकितशिलांतथा॥ ब्राह्मणा:पूजयेन्नित्यंक्षत्रियादिर्नपूजयेत॥ इदंस्पर्शपूजादिविषयं॥ शूद्रा
वानुपनीतोवास्त्रियोवापतितोपिवा॥ केशवंवाशिवंवापिस्पृष्ट्वानरकमश्नुते॥ ब्राह्मणोपिहरंविष्णुंनस्पृशेच्छूये

ऋच्छती॥ सनाथा मृतनाथा वा तस्या नास्तीह निष्कृतिः। स्त्रीणामनुपनीतानां शूद्राणां च जनेश्वर। स्पर्शने नाधिका
रोस्ति विष्णोर्वा शंकरस्य चेति स्कांदात्। स्पर्शरहितां तु तयोर्भवत्येव। शालग्रामं न स्पृशेत्तु हीनवर्णो वसुंधरे। स्त्रीशू
द्रकरसंस्पर्शो वज्रस्पर्शाधिको मतः। मोहाद्यः संस्पृशेच्छूद्रो योषिद्वापि कदाचन। स पतेन्नरके घोरे यावदाभूत
संप्लवं। यदि भक्तिर्भवेत्तस्य स्त्रीणां वापि वसुंधरे। दूरादेवास्पर्शनपूजां कारयेत्सुसमाहितः इति वाराहोक्तेः। शा
लग्राममात्रे निर्बंधो न प्रतिमादौ। सर्ववर्णैस्तु संपूज्याः प्रतिमाः सर्वदेवताः। लिंगान्यपि च पूज्यानि माणिभिः
कल्पितानि चेति तत्रैवोक्तेः। चत्वारो ब्राह्मणैः पूज्यास्त्रयो राजन्यजातिभिः। वैश्यैर्द्वावेव संपूज्यौ तथैकः शू
द्रजातिभिरिति स्कांदात्। अन्ये तु दीक्षितादीक्षितविषयेन व्यवस्थामाहुः॥ विष्णुधर्मे। तयोरसंभवे चार्चा वै सा
येह नवधा स्मृता॥ रत्नजा हेमजा चैव राजती ताम्रजा तथा। रैति कचर्चा तथा लौही शैलजा द्रुमजा तथा। अध
माधमा च विज्ञेया मृन्मया प्रतिमा च या। एषां फलानि तत्रैव ज्ञेयानि। तत्रैव पाद्मे शालग्रामं प्रक्रम्य। तत्राप्या
मलकीतुल्या पूज्या सूक्ष्मैव या भवेत्। यथा यथा शिला सूक्ष्मा स्तथा स्यात्तु महत्फलं। तथा। यवमात्रं तु
गर्त्तं स्याद्यवार्द्धं लिंगमुच्यते। शिवनाभिरिति ख्याता त्रिलोकेषु सुदुर्लभः। तत्रैव। शालग्राममयी मुद्रा संस्थिता

यत्र कुत्रचित्। वाराणस्यायवाधिकं समंतात् योजनत्रयं। ये मृतो वानीयतेंतिके। सर्वो मोक्षमवाप्नोति सत्यं सत्यं च नान्य
था। तत्रैव च चक्रांकमिथुनं पूज्यं नैकं च चक्रांकमुर्चयेत्। चक्रांकोह्नुनानांतथा त्रीणि कमिथुनात्तद्वै शालग्रामं प्रपू
जयेत्। म्लेछदेशेषु चौवापि चक्रांको यत्र तिष्ठति। योजनानां तथा त्रीणि मम क्षेत्रं वसुंधरे। तत्रैव शालग्रामं प्रक्र
म्य। तत्राप्यामलकीतुल्या पूज्या सूक्ष्मैव या भवेत्। यथा२शिला सूक्ष्मा तथा स्यात्तु महत्फलं। इदं पूर्वं लिखितं।
क्रयक्रीता परिज्ञेया मध्यमा याचिताधमा। प्रयोगपारिजाते वाराहे। एवं लक्षणसंपन्ना पारंपर्यक्रमागता।
उत्तमा सा तु विज्ञेया गुरुदत्तापि तत्तमा।। अथ पार्थिवपूजा। नंदिपुराणे। आयुष्मान् बलवान् श्रीमान् पु
त्रवान् धनवान् सुखी। वरमिष्टं लभेल्लिंगं पार्थिवं यः समर्चयेत्। तस्मात्तु पार्थिवं लिंगं ज्ञेयं सर्वार्थसाधकः। त
त्रैव। गोभूहिरण्यवस्त्रादि बलिपुष्पाणि वेदनो। ज्ञेयो नमः शिवायेति मंत्रः सर्वार्थसाधकः। सर्वमंत्राधिकश्चा
यमोंकाराद्यः षडक्षरः। भविष्ये। मुर्त्तयोष्टौ शिवस्यैताः पूर्वादिक्रमयोगतः।। आग्नेय्यंताः प्रपूज्यास्तु वेद्यां लिं
गे शिवयजेत्। अत्र न प्राचीमग्रतः शंभोरिति रुद्रयामले निषेधात् नांतराले प्राची किंतु प्रसिद्धैवातिथितत्वे एप
देवीपुराणे। मृदाहरणसंघट्टप्रतिष्ठाह्वानमेव च। स्नपनं पूजनं चैव विसर्ज्जनमतः परं। हरो महेश्वरश्चैव शूलपा

णिः पिनाकहस्तकः। पशुपतिः शिवश्चैव महादेव इति क्रमात्। स्कांदे। शुष्काण्यपि च पत्राणि श्रीवृक्षस्य निवेदयेत्। तत्रैव
भविष्ये। धत्तूरकेण यो लिंगं सकृत्पूजयते नरः। स गोलक्षफलं प्राप्य शिवलोके महीयते। योगिनीतंत्रे॥ शिवागारे
झल्लकं च सूर्यागारे च शंखकं। दुर्गागारे वंशवाद्यं मधुरीं च न वादयेत्। आह्निके माद्यो स्कांदे। स्पृष्ट्वा रुद्रस्य निर्माल्यं
सवासा आप्लुतशुचिः। प्रयोगपारिजाते क्रियासारे। मध्यमानामिकामध्ये पुष्पं संगृह्य पूजयेत्। अंगुष्ठतर्जन्य
ग्राभ्यां निर्माल्यमपनोदयेत्। अपनीतं च निर्माल्यं चंडेशाय निवेदयेत्। अशून्यमस्तकं लिंगं सदा कुर्वत पूजकः।
शूलपाणोर्लैंगे। चरणाग्रपार्श्वत्यागः शिरसो वापि कर्तनं। न चैवापूज्य भुंजीत शिवलिंगे महेश्वरं। सूतके मृतके
चैव न त्याज्यं शिवपूजनं॥ तिथितत्त्वे। लैंगे। विना भस्मत्रिपुंड्रेण विना रुद्राक्षमालया। पूजितोपि महादेवो न स्या
त्तस्य फलप्रदः। तस्मान्मृदापि कर्तव्यं ललाटे वै त्रिपुंड्रकं। रुद्राक्षधारणे विशेषः शिवरहस्ये। एकवक्त्रः शिवः सा
क्षाद्ब्रह्महत्यां व्यपोहति। अवध्यत्वं प्रतिष्ठोतो वह्निस्तंभं करोति च। द्विवक्त्रो हरगौरी स्याद्गोवधाद्यघनाशकृत्।
त्रिवक्त्रो ह्यग्निजन्माद्यपापराशिं प्रणाशयेत्। चतुर्वक्त्रः स्वयं ब्रह्मा नरहत्यां व्यपोहति। पंचवक्त्रः स्वयं कालाग्निर
गम्याभक्ष्यपापनुत्। षड्वक्त्रस्तु गुहो ज्ञेयो भ्रूणहत्यादि नाशयेत्। सप्तवक्त्रस्त्वनंतः स्यात्स्वर्णस्तेयादिपापहृत्।

२०१ विनायकोष्टवक्त्रःस्यात्सर्वानृतविनाशकृत।भैरवोनववक्त्रस्तुशिवसायुज्यकारकः।दशवक्त्रःस्मृतोविष्णुर्भूत
प्रेतभयापहः।एकादशमुखोरुद्रोनानायज्ञफलप्रदः।द्वादशास्यस्तथादित्यःसर्वरोगनिबर्हणः।त्रयोदशमु
खःकामःसर्वकामफलप्रदः।चतुर्दशास्यःश्रीकंठोवंशोद्धारकरःइति।तथा।विनामंत्रेणयोधत्तेरुद्राक्षंभुवि
मानवः।सयातिनरकान्घोरान्यावदिंद्राश्चतुर्दश।पंचामृतपंचगव्यंस्नानकालेप्रयोजयेत्।रुद्राक्षस्यप्रति
ष्ठायांमंत्रंपंचाक्षरंतथा।त्र्यंबकादिमंत्रंचतथात्रप्रयोजयेत्।यद्वा।ॐअघोरेह्रींह्रींअघोरतरेह्रींह्रींह्रूं
नमस्तेरुद्ररूपेह्रैंस्वाहा।अनेनाभिमंत्र्यधारयेत्।तथा।अष्टोत्तरशतंकार्याचतुःपंचाशदेववा।सप्तविं
शतिमप्यावात्तोहीनाधमास्मृता।प्रजापतिः।मोक्षायपंचतुःपंचाशदेववा।सप्ता।विंशत्याधनाथत्रिंशता
जपेत्।पुष्ट्यर्थंपंचविंशत्यापंचदश्या।भिचारके।सप्तविंशतिरुद्राक्षमालयादेहसंस्थया।यत्करोतिनरःपु
ण्यंसर्वंकोटिगुणंभवेत्।योददातिद्विजेभ्यश्चरुद्राक्षंभुविसन्मुखं।तस्यप्रीतोभवेद्रुद्रःस्वपदंचप्रयच्छति। एम:
पदार्थादर्शेवोपरेवः।रुद्राक्षान्कंठदेशेदशनपरिमितान्मस्तकेविंशतीद्वेषट्षट्कर्णप्रदेशेकरयुगलपुते
द्वादशद्वादशैव।बाह्वोरिंदोःकलाभिनयनयुगकृतेएकमेकंशिखायां।वक्षस्यष्टाधिकंयकलयतिशतकंसस्व

यंनीलकंठः।तत्रैव।शिवधर्मेहेमाद्रौ।स्नानंपलशतंज्ञेयंमभ्यंगःपंचविंशतिः।पलानांद्वेसहस्रेतुमहास्नानंप्रकी
र्त्तितं।पंच।विंशत्पलंलिंगेत्वभ्यंगंकारयेद्बुधः॥शिवस्यसर्पिषास्नानंप्रोक्तंपलशतेनचं।रसेनकारयेत्स्नानमभक्त्या
चोक्षांभुनाततः।विष्ण्वादौतुस्कांदे।क्षीराद्दशगुणंदध्नाघृतेनैवदशोत्तरं।घृताद्दशगुणं।क्षौद्रंक्षौद्राच्चैवेक्षवत
ध्या।ब्राह्मे।देवानांप्रतिमायत्रघृताभ्यंगश्चमाभवेत्।पलानितत्रदेयानिप्रद्युम्नापंचविंशतिः।दशकोटीकृताभिप्राये
ण।तत्रैवसंग्रहे।दिव्यवक्तेनायदातव्यंनैवेद्यस्यशतांशकं।पादोदकंप्रसादंचलिंगेचंडेश्वरायतु।पंचायतनसं
निवेशमाहबोपदेवः।शंभोर्मध्यगतेहरीनहरभूदेव्योहरौशंकरेभास्येनागसुतारवौहरगणेशाजांबिकाः
स्थापिताः।देव्यांविष्णुहरैकदंतरवयोलंबोदरेजेश्वरेनोबाः।शंकरभागतोतिशुभदाव्यस्तास्तुतेहानिदाः
शकरभागतःईशानकोणादाभ्यप्रदक्षिणमित्यर्थः।अत्रदिक्स्वरूपमुक्तंप्रयोगपारिजातोदेवस्यमुख
मारभ्यदिशंप्राचींप्रकल्पयेत्।तदाशिपाखारणांमंगाधावरणस्थितिः।अत्रक्रमःपाद्मे।रविर्विनायकश्चंडी
ईशोविष्णुस्तुपंचमः।अनुक्रमेणपूज्यंतेव्युत्क्रमेतुमहद्भयं।तथा।पूज्यपूजकयोर्मध्येतत्रप्राचींप्रकल्पयेत्।
अथकेशवादिमूर्त्तयः।बोपदेवः।केविघ्नोवादापुहूपेप्रज्ञाव्युत्क्रममान्विताः।वाधो।नृहसनिश्रीपशाच्चगोविग

गदापद्मे २

२०२ पेचपे। अत्र केविइत्याद्यैः केशवविष्ण्वादि चतुर्विंशति मूर्त्तयोभिधीयंते। शगतशंखात चक्रेचक्र गदेद्ले पेइत्यर्थः। शिष्टे
मुद्रेपद्मंतर्यत्तः। सिद्धं। अत्रदाक्षिणाधःकारक्रमेणाज्ञेयं। दक्षिणाधःकरक्रमादितिहेमाद्रिवचनात्। विशद्वेनविप
रीतं। गचेइत्यर्थः। अत्रापिशादित्यनुवृत्तिः। गपेइत्यत्र ~~[illegible]~~ शादित्यनुवर्त्तते। शंखात्तौ ~~पद्मचक्रे~~ इत्यर्थः। वि
सर्थः।अ परीतिपद्मगदे आपिशंखात् द्वये। चपेचक्रपद्मे शंखात् चक्रपद्मे इत्यर्थः। वि~~[illegible]~~। तेनशंखा
~~त्चक्रपद्मे इत्यर्थः~~। तेनगपेइत्यष्टौ मूर्त्तयः। चपेइत्यत्र च अत्रमूलंहेमाद्रौज्ञेयं। अत्रबोधायनसूत्रं। त्रैविक्रमी
चानुसूत्यालिंगार्चाप्रतिष्ठोच्यते। यजमानः पूर्वाह्णकाले पूर्वेद्युः दशाह्नादशषोडशान्यतमहस्तं मंडपं कृत्वा
ग्रेपेहस्तमात्रं चतुरस्रं कुंडं स्थंडिलंवापूर्वतो हस्तमात्रां वेदिं निर्वर्तते वा स्तृ मंडलं मध्ये वेदीत दुपरि सर्वतोभ
द्रं च कृत्वा प्राणानायम्यास्यां मूर्तौ देवस्य सांनिध्यसिध्यर्थं दीर्घायुर्लक्ष्मी सर्वकाम समृद्ध्यर्थं स्तुवका मो
मुकमूर्त्तिं प्रतिष्ठां करिष्य इति संकल्प्य गणेशपूजनपुण्याहवाचनमातृकापूजननांदीश्राद्धानि कृत्वा चा
र्यं चतुरोहत्विजश्च वृत्वा वस्त्राद्यैः पूजयेत्। अथवाचार्योपि दत्तसंस्थितमिति सर्षपान्विकीर्यापोहिष्ठेति कुशो एमः
दकेन भूमिं प्रोक्ष्य देवा आयांतु यातुधाना अपयांतु विष्णो देवयजनं रक्षस्वेति भूमौ प्रादेशं कृत्वा समकृत तंडुला

पद्धतिमार्गेणमंडपं प्रतिष्ठांकृत्वा वा पंचगव्यहिरण्ययवदूर्वाश्वत्थपलाशमर्णैरापोहिष्ठेति तिसृभिर्हिरण्यवर्णा इति
चतसृभिः पवमानः सुवर्जन इत्यनुवाकेनाभिषिच्य व्याहृतिभिरिदं विष्णुरिति फलपवढर्णैः समर्प्य रक्षोह
णामिति हस्ते कंकणं च बध्वाचार्यमाछाद्य श्चतेहेऽष्ठत्रममिति जलेधिवासयेत्॥ इदं बौधायनोक्तं ततश्चलिंगे
र्चायां चात्राग्निं प्रतिष्ठाप्य गोक्षीरेणोर्वचरुं कृत्वा आज्यभागौ नेयपलाशोदुंबराश्वत्थशम्यपामार्गसमिद्भिरा
ज्येन चरुणा तिलैर्वा प्रत्येकमष्टाविंशति मष्टोवाहुती लोकपालग्रहांस्त्रिंमूर्तिंपतिभ्यो हुत्वास्थाप्यदेचमंत्रेण
पूर्वोक्तसमित्तिलनैवारचर्वाज्यैरष्टसहस्रमष्टशतमष्टाविंशतिं वा हुत्वा ग्निर्पञ्जुभिरित्यनुवाकेन दशाहुती
र्जुहुयात्॥ प्रतिद्रव्यं होमांते देवे पादनाभिशिरःस्पृशेत्॥ आज्यहोममेवोत्तरतः सजलं कुंभे संपातानवपेत्॥ ते
षां मंत्राः॥ ईड्ड्रायै शेरतीद्रस्य॥ स्योनेति पृथिवीमूर्त्तेः॥ अघोरेभ्य इति तत्सते सर्वस्य॥ यमग्नाआपाहोस्ययेः॥ अग्नि
हूंतमित्यग्निमूर्त्तेः॥ नमः शर्वाय च पशुपतये चेति पशुपतेः॥ पमापपहोमंपमस्य॥ आसिहेवारेति [illegible]स्य॥ इमंमेचरुः
शंनोदेवाः जलः नमोभवाय यजमानमूर्त्तेः॥ स्तोहिश्रुतेतत्यतेहृग्रस्य॥ आसत्वंतमिति निर्ऋतेः॥ आकृ[illegible]न सूर्यस्य॥
पोरुद्रोअग्नोरतिरुद्रस्य॥ इमंमेचरुः॥ शंनोदेवाः जलः नमोभवायेति भवस्य॥ आनोनियुद्भिरिति वा[illegible]॥ कृतश्चाव

तच्चार्थाः। तमीशानं रशातस्या। आप्यायस्व कुबेरस्य। वयं सोमस्य। ततत्सुरुषायेति महद्धाः अभित्वा ईशानस्य। आदित्यत्वेने
त्याकाशस्य। नम उग्राय चेति भीमस्य। ततो देवस्य पाद्दोस्पर्शो।। एवं द्वितीयेनाभिं। ततीयेमध्यं। चतुर्थे उरः। पंचमे शि
रः स्पृष्ट्वा पातिपर्यायेसंपात जलेन देवमभिषिंचेत्। ततः। स्विष्टकृदादिशेषं समाप्यार्चाशोषयेत्। स्थिरलिंगार्चांस्थै
तुनेशानी अग्निस्थापन होमादिकार्यं ततो देवं नत्वा स्वागतं देवदेवेश विश्वरूप नमोस्तुते। मुद्वेपिलदाधिष्टाने मु
द्विकुपः सहस्वतांमिति संप्रार्थ्यरुद्रिष्ट्रब्रह्मणास्ततरति सज्ज्ञलिंगस्थाप्यपर्वमक्रतेम्फत्वा रसोधुना कार्यं। अग्नि
सप्तिरिति सूक्तं आग्नेयं पदहीनं पठित्वा तत्सहितं पुनः पठेत्। एवं अष्टसहस्रम ष्टशतम ष्टाविंशतिं वा पठ जलं पात
येत्। ततोर्चां द्वादशवारं मृदाजलेन च प्रस्तात्यमंत्रवत्सेचमच्यकृत्वा पयः पृथिव्यामावाहज्ञानमिति च संस्ना
प्य आप्यायस्व दधिक्राशास्ते ज्जोसि मधूवाताभ्या पंगौरीति पंचामृतैः संस्नाप्य लिंगं चेन्नमस्ते हद्रमत्यवरस्य
षाभिः संस्नाप्य घृतेनाभ्यज्योद्वर्तनेनोद्वर्त्योष्णोदकेन प्रक्षाल्य गंधदत्वा संपातोदकेनाभिषिच्य सपल्लवैः स्व
तुर्भिः कुंभैरापोहिष्ठेति त्रिभिरा कलशेष्विति प्रत्येकं समुद्रज्येष्ठा इति चतसृभिरा कलशेष्विति च मिलितैः संस्ना एमः
प्योदुंबरादिपीठेर्चामुपवेश्य परितोष्टदिक्षु सजलकुंभान्संस्थाप्य तेषु गंधपुष्पदूर्वाः क्षिप्त्वाघैः पंचमद्रः द्वितीयेपु

छरपर्णशमीविकंकतान्नमंतकलचः पल्लवांश्चतत्तीमादिषु सर्वधान्यपंचरत्नफलपुष्पाणिकुशदूर्वागोरोचनाः संपातोद
कसर्वैषधाः। स्नित्वाक्रमेण आपोहिष्ठेति त्रिभिः हिरण्येति चतुर्भिः पवमानानुवाकेन चांच अभिषिच्यैककुंभेशमाप
लाशवटखदिरबिल्वाश्वत्थविकंकतपनसाम्रशिरीषोदुंबराणां पल्लवान्कषांपोष्णन्निक्षिप्वाप्स्येचरत्नमभिषिच्यपंच
रत्नोदकेन हिरण्यवर्णाइति संस्नाप्य वासंसीदत्वोपवीतादि दीपांतं कृत्वा हिरण्यगर्भः प आत्मदाः पः प्राणतः पश्येमे
येनद्यौः पंक्रंदसी आपोहप्तपान्विदापोहस्मैपिष्टदीपान्दत्वा स्तुवशालाकपातैजसपात्रस्थांमधुघृतंचगृहीत्वा
चित्रंदेवानामितेजोसीतिमंत्राभ्यां ॐनमोभगवतेतुभ्यंशिवायपद्मरूपेनमः। हिरण्यरेत्नसे विष्णोविश्वरूपायतेनमइति
चदक्षिणस्यनेत्रेदेवनेत्रेमेत्राहसालिखेत। अंजनेतिलेसंजनेनमधुनाचाक्ताद्देवस्यलेतिमधान्यशर्कराभिरंजयते
नैवाजनेनपुनरंजयेत। अत्रानन्मीतिशेषः। स्थिरलिंगेतुस्वर्णहृच्यागंचेनं ॐनमोभगवतेरुद्रायपहिरण्यरेतसेपरायप
रमात्मनेविश्वरूपायोमात्रिपापनमरत्संडाजनातिमांजयेत। ततआदर्शभस्मादिदर्शयेत। ततः कर्त्ता आचार्यायप
गामृत्विग्भ्यश्चदक्षिणांदद्यात्। अथाचार्यः प्रत्स्रच आदौमणावेवदन्नपुरुषसूक्तेन स्तुत्वावंशपात्रेयेवचर्णोदनेन
देवस्यनीराजनंकार्शपलाद्रुद्रापचतुष्पथ्योदद्यात्। मंत्रस्तु ॐनमोसमवसर्वभूताधिपतयेदीप्तशूलधराययोमादपिता

२०४ विश्वाधिपतये रुद्राय वैनमोनमः शिवर्मगार्हितंकर्मास्तुस्वाहेति। अस्वरस्य पर्योमि भूतेभ्योनम इति केचिदेतद्रात्रौ स्थिरप्र
तिष्ठापामिछंति। अथाचार्यः सर्वतोभद्रे देवानावाहयेत। मध्ये ब्रह्माणं। पूर्वादिदिक्षु इंद्रादिलोकपालान्। ईशानेंद्राद्यं
तरालेषु वसून्रुद्रान् आदित्यान् अश्विनौ विश्वान्देवान्। पितॄन्नागान्। स्कंदं वृषं॥ ब्रह्मेशानाद्यंतराले पुदक्षविष्णु
दुर्गां स्वधाकारं मृत्युरोगान्। समुद्रान्सरितः मरुतः गणपतिं चेति। मध्य एव हाधिचीमेहं स्थाप्यदेवं चाचार्य। आग्ना
शिवत्वं शक्तिं दंडं खड्गं पाशं अंकुशं गदां शूलं। तद्बाह्ये गौतमं भरद्वाजं विश्वामित्रं कश्यपं जमदग्निं वसिष्ठं अत्रिं अरुंध
तीं च। तद्बाह्येन वग्रहान्। तद्बाह्येन वग्रहान्। तद्बाह्येन च ग्रहान्। तद्बाह्ये ऐंद्रीं कौमारीं ब्राह्मीं वाराहीं चामुंडां वैष्ण
वीं माहेश्वरीं चैनापकीति। एतानामभिरावाह्य संपूज्याचार्यो देवं तन्मंत्रेण वास्तुमंडलमध्ये चौपांसुप्रतिष्ठो
भवेति निवेश्य संपूज्य वह्नौ मंडलदेवतानां नामभिस्तिलैर्ध्येन दशदशाहुतीर्हुत्वा शय्यायां देवमारोप्य पुरुषसूक्तो
त्तरनारायणाभ्यां प्रीत्कलादेवे न्यासं कुर्यात्। यथा। पुरुषात्मने नमः। प्राणात्म प्रतितत्त्वाय। बुद्धितत्त्वायः अहंका
रतत्त्वाय मनस्तत्त्व इति सर्वांगे। प्रकृतितत्त्वं बुद्धितत्त्वं हृदि। शब्दतत्त्वं शिरसि। स्पर्शतत्त्वं त्वचि। रूपतत्त्वं हृदि। एवं रसगंध एमः
श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणवाक्पाणिपादपायूपस्थपृथिव्यप्तेजोवाय्वाकाशमनस्तत्त्वमोदेहतत्त्वानि विन्यसेत्। त

तःपुरुषसूक्तस्याद्यमृग्द्वयं करयोः तदुत्तरं जानुनोः तदुत्तरं कट्योः तं यज्ञमिति तिसृकः नाभिहृत्कंठेषु तस्मादश्वेति
द्वयं बाह्वोः ब्राह्मणोस्येति द्वयं नासयोः। नाभ्या इति द्वयं चक्षुःश्रवणोः। अंत्यं शिरसि। केचित्त्वन्यासमन्यथाहुः। पुरुषप्र
कृतिमहदहंकारतत्त्वानि शब्दस्पर्शरूपरसगंधतन्मात्राणि। आकाशवायुतेजोपृथिव्यः श्रोत्रत्वक्चक्षूरसन
घ्राणवाक्पाणिपादपायूपस्थमनस्तत्त्वानीति। केचिदेतानि स्थिरलेगादावेवेच्छंति। ततः सुवेशापामवेतिश
प्यायां देवस्यापपित्वा मंडलशष्पयोः तत्राले नगं तच्चमिति त्रिपेषं दत्वा मंडलदेवताभ्यो नामभिः पायसेन वरुणा
चावलीन्दद्यात। नीवारश्च हस्तोबेणाद्विगवत्विंनेदेः स्थिरप्रतिष्ठायां। स्थिरलिंगार्चादौ तत्र विशेषः। अग्निस्थापनहोम
वर्जं सर्वं पूर्ववत्कृत्वा इदानीमग्निस्थापनं कृत्वा पूर्वोक्तहोमं कुर्यात्। नात्र नैवारश्चरुः। विष्णुश्चेत्सूक्तोक्तहोमं कृत्वा पु
रुषसूक्तेन प्रत्यृचमाज्यं हुत्वेदं विष्णुरिति पादौ स्पृष्ट्वा पुनस्त्या एवं हुत्वा। अतो देवेति शिरः स्पृष्ट्वा पुनस्त्या एवं हुत्वा पुरुषसू
क्तेन सर्वांगं स्पृशेत्। स्थिरलिंगे चेदग्निस्थापनादि पूर्वोक्तसमिदाज्यतिलान्हुत्वा ईं हुत्वा पात इषुरिस्पञुचाकांते इषप स
हस्राणामनुवाकाभ्यां प्रत्यृचमाज्यं हुत्वा सर्वो वै रुद्र इति सकलं स्पृशेत्। ततो धापतरा इति पूर्णाहुतिं जुहुयान्न्वा। एवमधि
वासनं कृत्वा परेद्युः सद्यो वा पीठिकां स्थापयित्वा महीमूषुमाचाज्यादितिर्द्योरिति सूक्तं त्वाह्नीनमराति संपूज्यते नैवपूर्णा

२०५ कृतिंकृत्वोत्तिष्ठब्रह्मणस्पतऽइदेवमुत्थाप्यपुष्पांजलिंदत्वापुरुषसूक्तेनस्तुत्वोदुत्यमित्यस्थाप्यकनिक्रददितिसू
क्तेनविष्णुंसद्योजातमितिपंचानुवाकेलिंगगृहंप्रवेश्यपाठिकार्यामिंद्रादीनामभिघारलानिक्षित्वासप्तधान्य
रूप्यहषापनमःशिलाः।क्षित्वापायसेनसंलिप्यप्रणवेनाग्न्यासंकृत्वासुवर्णशलाकामंतरितांकृत्वाऽग्नेसु
लयेप्रतितिष्ठपरमेश्वरोत्स्यकत्वातीदेवेतिविष्णुरुद्रेणाचलिंगंस्थाप्यपेत।ततःप्राणप्रतिष्ठा।चलाचलोदेवोलधिवा
मनांतेमरेक्षकृत्तिष्ठब्रह्मणस्पतेइतिदेवमुत्थाप्यपुरुषसूक्तेनोत्तरनारायणाभ्यांस्तुत्वाघृतेश्रीहिचरुंश्रपयित्वा
तद्देवतामंत्रेणादशाहुतीर्हुत्वानामभिर्जुहुयात्।अग्नयेस्वाहा।सोमायःधन्वंतरयेकुह्वैःअनुमत्यैःप्रजापत
येपरमेष्ठिनेब्रह्मणे·अग्नयेसोमायःअग्नयेन्नपतयेप्रजापतये·विश्वेभ्योदेवेभ्यः।सर्वेभ्योदेवेभ्यः।भूर्भुवःस्वः
अग्नयेस्विष्टकृतइति।ततःसप्ततेपुनस्त्वेत्याभ्यांपूर्णाहुतिः।ततआचार्योयाओषधीरितिसर्वौषधीःसमर्प्य
संपातोदकंदेवामंत्रेणाशतवारमभिमंत्र्यतेनैवाभिषिंचेत्।ततउत्तिष्ठेतिदेवमुत्थाप्याविश्वतश्चक्षुरित्यस्थाप
देवंध्यात्वाजपेत्।ब्रह्मणेनमः।एवंविष्णुंचेरुद्रापरंद्रादीनष्टौ।वसुभ्योरुद्रेभ्यआदित्येभ्यो।अश्विभ्यांमरुद्भ्यःकुबेराय एम०
गंगादिमहानदीभ्यो।श्रीयोमाभ्यामिंद्राग्निभ्यांद्यावापृथिवीभ्यांधन्वंतरयेसर्वेशायविश्वेभ्योदेवेभ्योब्रह्मणइति।

ततः संपातोदकेन पूज्यमानमभिषिच्य देवं ध्यात्वा प्रतिष्ठ परमेश्वरेति पुष्पांजलिं निक्षिप्य सन्निधानं दं ब्रह्मैव भक्तानुग्र
हापगृहीतविग्रहं करुणार्णव पवित्रं शंखचक्राद्यायुधवंतं निजवाहनाद्युपेतं निजहृत्कमलेव स्थितं। सर्वलोक
साक्षिणमक्षरीयां संपरमेश्वरासि परमां श्रियं गमयेति मंत्रेण पुष्पांजलिं दत्वा चागतं संभाव्यार्घ्यादौ विन्यस्य प्राणप्रतिष्ठा
कुर्यात्तां यथा॥ प्राणप्रतिष्ठामंत्रस्य ब्रह्मविष्णुरुद्राऋषयः ऋग्यजुःसामानि छंदांसि क्रियामयवपुः प्राणाख्या देव
ता आं बीजं क्रों शक्तिः प्राणप्रतिष्ठायां विनियोगः। ततो ऋष्यादीन् क्रमेण शिरोमुखेहृदयगुह्यपादेषु विन्यस्य आं
खं गं घं ङं पृथिव्याप्तेजोवाय्वाकाशात्मने आं हृदयाय नमः। ॐ चं छं॰ शब्दस्पर्शरूपरसगंधात्मने ईं शिरसे स्वाहा॥ ॐ
टं॰ श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणात्मने ॐ शिखायै ॐ तं॰ वाक्पाणिपादपायूपस्थात्मने ऐं कवचाय हुं॥ ॐ पं॰ ॐ व
चनादानविहरणोत्सर्गात्मने नं दत्वा देवं स्पृष्ट्वा जपेत्॥ आं ह्रीं क्रों यं रं लं वं शं षं सं हं सः। देवस्य प्राणा इह प्राणाः।
ॐ आं हंसः। देवस्य जीव इह स्थितः। ॐ आं॥ हंसः देवस्य सर्वेंद्रियाणि॥ ॐ आं हंसः देवस्य वाङ्मनश्चक्षुःश्रो
त्रघ्राणप्राणा इहागत्य स्वस्तये सुखेन सुचिरं तिष्ठंतु स्वाहेति॥ ततोर्चाहृदयेंगुष्ठं दत्वा जपेत्॥ अस्यै प्राणाः प्रतिष्ठं
तु अस्यै प्राणाः क्षरंतु च॥ अस्यै देवत्वमर्चायै मामहेति च कश्चनेति। ततः प्रणवेन संरुध्य सजीवं ध्यात्वाक्षवाघोरि

तितं चैतत्स्याकर्णे गायत्री देवमंत्रं च जत्प्या पुरुषसूक्तेनोपस्थापपाद्यानि शिरस्तु पृष्ठाद्दृहे वैधीति त्रिर्जपेत ॥ ततः क
र्त्तास्वागतं देवदेवेश पभ्राग्यात्वमिहागतः ॥ प्राकृतत्वमदृष्ट्वां मां बालवत्सरिपालय ॥ धर्मार्थकामसिध्यर्थं स्थि ॥ एभ
व शुभाय नः ॥ सान्निध्यं तु महादेव स्यार्चायां परिकल्पय ॥ पावच्चंद्राचनीसूर्यो ॥ स्ति ष्ठंत्यप्रतिष्ठातिनः ॥ तावत्त्वयात्र
देवेशस्थेयं भक्त्या उकंपया ॥ भगावं० देवदेवशर्वं पितामर्वदेहिनां ॥ येन रूपेण भगवं त्वया व्याप्तं चराचरं ॥ तेन
रूपेण देवेश स्वार्चायां सन्निधीभवेतिमर्मेत ॥ एतदंतसं र्वदेवानां समानं ॥ देवमंत्रश्च मूलमंत्रो वैदिकोवाग्यात्यः
आपा वायं कर्त्तव्यालिंग मर्चायां ॐ भूः पुरुषमावाहयामि ॐ भुवः ॐ स्वः ॐ भूर्भुवः स्वःयामित्याचास्य प्रणाचे
नासनं दत्वा ते नैव दूर्वाश्यामाका विष्णुक्रांतापद्ममिश्रं पा ॥ इमा आपः शिवतमाः पूताः पूततमा मेध्या मेध्यत
मा अमृत अमृतरसाः पाद्यास्ताजुषंतां प्रतिगृह्यतां प्रतिगृह्णातु भगवान्महाविष्णुर्विष्वचेनमः इति पाद्यं ॥
भगवान्महादेवो रुद्रापनमः इति लिंगे ॥ इमा आपः आचमनीयास्ताजुषतां मिसाचमनीयः अर्घ्यार्थस्य घं ॥ ततो
चेदमंत्रैः संस्नाप्येदं विष्णुरितिविष्णोनमो अस्तकनीलग्रीवायेति लिंगे प्रतिसरं विस्त्रस्य इमे गंधाः शुभा दिव्याः सर्वदे
वैरलंकृताः पूजाव्रस्त्रपवित्रेण पूता सूर्यस्य रश्मिलिप्त पूता इत्यादि पूर्ववत् ॥ इति गंधं ॥ इमे माल्याः शुभा दिव्याः सर्वे

एमः

माल्यैरलंकृता॥ धृतामाल्या॥ इमेपुष्पाइतिपुष्पै॥ वनस्पातेरसोद्भुपोगंधोयोधूउत्तमः॥ आघ्रेयः सर्वदेवानांधुपोयंप्रति
गृह्यतांमितिदीपंदत्वाविष्णोमंकर्षणावासुदेवप्रद्युम्नानिरुद्धपु॥ रुषोत्तमाधोक्षजनरसिंहाच्युतजनार्दनोपेंद्रहरि
कृष्णेतिद्वादशनामभिःपुष्पाणिसमर्प्यतेरेवतर्पणंकृत्वापायसगुडोदनचित्रौदनादिपवित्रंतेवितमितिनिवेद्यकृ
त्वाटंपूर्वोक्तमामनिर्वृत्तातेनेवशार्ङ्गिणोश्रियेसरस्वत्यैविष्वक्सेनायेतिकृत्वाविष्णोर्नुकं॥ तदस्यप्रियंतद्विष्णुःपरोमा
त्रपाविचक्रमेत्रिर्देवइतिजुहुयात॥ लिंगेतुदीयंतंकृत्वाभवायदेवायईशः॥ सर्वायईशानायपशुपतयेरुद्रायउ
ग्रायभीमायमहादेवायनमइतिपुष्पाणिदत्वातैरेवतर्पणंकृत्वापवित्रंतेइतिपायसंगुडोदनंचनिवेद्यपूर्वोक्त
नामभिःकृसरंकृत्वाभवस्यदेवस्यपत्न्यैस्वाहेत्याद्यष्टभिःगुडोदनंकृत्वाभवस्यदेवस्यसुतायस्वाहेत्याद्यैर्हारिद्रो
दनंकृत्वात्र्यंबकंमानोमहांतमानोतोकेआरातेगोघ्नंविकिहितविलोहितसहस्राणिसहस्रशइतिद्वादश॥
एतैर्दत्वाशिवायशंकरायसहमानायशितिकंठायकपर्दिनेताम्रायअरुणायअपगुरमाणायहिरण्यबाहवेसा
ष्पिंजरायबभ्लुशायहिरण्यायपतिचतुर्द्रुयात॥ ततःस्विष्टकृदादिशेषंसमाप्यंपूर्वोक्तसर्वंहविर्निर्विष्णवेलिंगाय
वावलिंदद्यात॥ मंत्रस्तुतामेकमाद्यंपुरुषंपुराणनंनामसपर्णंविश्वसृजंपामहे॥ त्वमेवयज्ञाविहिताविधेयस्त्व

मात्मनोंत्मरूपप्रतिग्रहं कृत्वा ध्यरूच्यामिति । लिंगेनुनाग पग्गमपदेहद्रुं शिवमिति वदत ॥ ततोघ्र छपयोर्भिर्मुंचः । स्वएमिति
डुतशेषांतेधाय पघदक्षिणीकृत्य । विश्वभुजे । सर्वभुजे आत्मनेपरमात्मनेनमः इति नत्वाचार्योपशततदर्धतदर्धं द्वादश
वशातिस्त्र एकीवाग्यां दत्वाकलिल्पो विप्राद्दक्षिणां दत्वाशतं द्वादशविधमेव कुर्यात ॥ प्राच्योजयेदितिसंक्षेपः । प्रासा
दमात्रेततनेसमात्स्योक्तमात्स्योक्तजलाशयप्रतिष्ठाविधिमेव कुर्यात ॥ गोरुत्वा रणापाचीपक्षे प्यादित्तुनभवतिद्वा
रलोपात ॥ वारुणहोमस्थानेवास्तुहोमः । अन्यत्रतत्तु इदंव ॥ इति भट्टकमलाकरकृतो लिंगार्चाप्रतिष्ठाविधिः ॥ अ
थ पुनःप्रतिष्ठा ॥ तामधिकृत्य हयशीर्षपंचरात्रे ॥ चंडालमद्यमस्पर्शदूषितावह्निनाथवा । अपुण्यजनसंस्प
ष्टाविप्रस्त्रजनदूषिता ॥ संस्कार्येतिशेषः । ब्राह्मो खंडितेस्फुटितेदग्धेनष्टेमानविवर्जिते ॥ पात्रहीनेपशुस्पृष्टे
पतितेदुष्टभूमिषु ॥ अन्यमंत्रार्चिते चैव पतितस्पर्शदूषिते । दशस्वेतेषु नो चक्रुः सन्निधानं दिवौकसः ॥ अ
व्यंगाः पूज्याः । पशुगर्दभादि । पंचरात्रे । खंडितास्फुटितादग्धाश्च स्मार्च्चाभग्नावहा ॥ तस्मात्समुद्धरेत्तांत
पूर्वोक्तविधिनानरः ॥ सिद्धांतशेखरे । चोस्वांडालपतितश्वोदक्याः स्पर्शनेसतिशिवाधुपहतौ चैव प्रतिष्ठांपुन
राचरेत । पंचरात्रे । अंगाद्गातिसंधानेप्रतिष्ठांपुनराचरेत । जलाधिवासविहितनेत्रोन्मीलनवर्जितां । शुद्धिं ॥

विवेके विष्णुः। द्रव्यवत्कृतशौचानां देवतार्चानां भूयः प्रतिष्ठापनेन शुद्धिरिति। अर्चाः प्रतिमाः। द्रव्यस्य ताम्रादेरुक्तवत् शौचं कृ
त्वा पुनः प्रतिष्ठां कुर्यादित्यर्थः। स्मृतिसारेप्येवं। तद्विधिर्बौधायनसूत्रे। पूर्वप्रतिष्ठितस्याबुद्धिपूर्वमेकरात्रं द्विरा
त्रमेकमासं द्विमासं वार्चनादिविच्छेदे शूद्राजस्वलाद्युपस्पर्शे तत्ताधिवासं कृत्वा कलशेन स्नपयेत्। ततः पंचग
व्येन परं शुद्धोदकेन स्नपयेदष्टसहस्राष्टशताष्टाविंशतिसंख्याकैर्वा कलशैः पुरुषसूक्तेन ततः पुष्पाणि
दत्वा गुडोदनं निवेदयेदिति। बुद्धिपूर्वं तु विच्छेदे पूर्वोक्तां प्रतिष्ठां पुनः कुर्यात्। पूर्वोक्तविष्णुवचनात्। इदं मल
मासशुक्रास्तादावपि कार्यमिति ह मदनरत्ने हेमाद्रौ च। देवार्चाप्रासादभेदने तु मूलपाणौ काश्यपः। चापी
कूपारामसेतुसभातडागवप्रदेवतायतनभेदने प्रायश्चित्ते। चतस्र आहुतीर्जुहुयात्। इदं विष्णुर्मानस्तोके विष्णोः
कर्माणि पाहोस्येति। यां देवतामुत्सादयति तस्यै देवतायै ब्राह्मणान् भोजयेदिति शंखलिखितौ। प्रतिमारामकू
पसंक्रमध्वजसेतुनिपातभंगेषु तत्समुच्छानं प्रतिसंस्कारोऽष्टशतं च निपातितानामिति। समुच्छानं प्रतिक्रियाप्र
तिसंस्कारः पुनः प्रतिष्ठा। अष्टशतं दंडश्चेत्यर्थः। अथ जीर्णोद्धारः। स च लिंगादेरंगभग्ने चलिते वा कार्यः। अ
यं चानादिसिद्धप्रतिष्ठितलिंगादौ भंगादिदुष्टे न कार्यः। तत्र तु महाभिषेकं कुर्यादिति त्रिविक्रमः। कर्ता मुक

देवस्यजीर्णोद्धारंकरिष्यन्सुक्तापुण्याहंवाचयित्वाचार्यमृत्विजश्चवृत्वा।घोरमंत्रंशतंजप्त्वाग्निंप्रतिष्ठाप्याघोरेणैव
सर्षपैःसहस्वकृत्वैर्द्वारिभ्योनाम्नाबलिंदत्वाजीर्णदेवंप्रणवेनसंपूज्यब्रह्मादिमंडलदेवानांहोमंपूर्वोक्तंकृत्वा।
देवंप्रार्थयेत्।जीर्णभग्नमिदंचैवसर्वदोषावहंनृणाम्।अस्योद्धारेकृतेशांतिःशास्त्रेस्मिन्कथितात्वया।जीर्णो
द्धारविधानंचनृपराष्ट्रहितावहं।तदधितिष्ठतांदेवप्रहणमितेवाज्ञयेति।ततःक्षीराज्यमधुदूर्वाभिःसमसमिद्भिश्चाष्टो
त्तरशतंदेवमंत्रेणाहुत्वासहस्रंचहुत्वापायसेनशतंहुत्वालिंगंप्रार्थयेत्।लिंगरूपंसमागत्ययेनेदंसमधिष्ठितं।याया
त्वंसंमितंस्थानंसंत्यज्यैवशिवाज्ञया।अत्रस्थानेचयाविद्यासर्वविद्येश्वरैर्युता।शिवेनसहसंतितिष्ठेतिमंत्रि
तजलेनाभिषिच्यविसर्जयेत्।ततोस्त्रमंत्रितेनखनित्रेणखात्वालिंगमादायनद्यादौवामदेवेवलिंगंप्रण
वेनमूर्तिंक्षिपेत्।दारुजंतुमधुनाभ्यज्याघोरेणदहेत्।हेमरत्नादिमयंचलितंदग्धंवापुनस्तत्रैवस्थाप
येत्।ततःशांत्यैअघोरेणतिलैःसहस्रंहुत्वाप्रार्थयेत्।भगवन्भूतभव्येशलोकनाथजगत्पते।जीर्णलिं
गसमुद्धारःकृतस्त्वाज्ञयामया।अग्निनादारुजंदग्धंक्षिप्तंशैलादिकंजले।प्रायश्चित्तायदेवेशअघोरेणह्वेण एमः
तर्पितं।ज्ञानतोज्ञानतोवापियच्चोक्तंनकृतंमदि।तत्सर्वंपूर्णमेवास्तुत्वत्प्रसादान्महेश्वरेति।ततोयजमानःप्रार्थ

येत्। गोविप्रशिल्पिमूर्त्तीनामाचार्यस्य च यत्नतः॥ शीतिमं यत्तदेवेशत्राष्टिद्रं ज्ञायतामिलमूर्त्तौ तु विशेषः॥ स्वल्पसादेनानिर्विघ्नं देहं निर्मापये यत्नतो। वासं कुरु सुरश्रेष्ठ तावत्त्वं बाल्यकेशव हे। वसनं क्लेशं सहि ल्वेह मूर्त्तिर्वैतव पूर्ववत्। यावत्कारयते भक्तः कुरु तस्य च वाञ्छितं मिति। ततो नवां मूर्त्तिलिंगं वा लो विधिना स्थापयेत्। मूले त्वपि पुराणेस्पष्टं॥ इति जीर्णोद्धारः॥ अथ तुलसीग्रहणं॥ देवयाज्ञिककृते स्मृतिसारे वैधृतौ च व्यतीपाते भौमभार्गवभानुषु। पर्वद्वये च संक्रांतौ द्वादश्यां सूतकद्वये। तुलसीं ये विचिन्वंति ते छिंदंति हरेः शिरः॥ विष्णुधर्मोत्तरे। रविवारं विना दूर्वां तुलसीं द्वादशीं विना। जीवितस्याविनाशाय न प्रविचिन्वीत धर्मवित्। तथा॥ संक्रांतावर्कपक्षांते द्वादश्यां निशि संध्ययोः। ये छिन्नं तुलसीपत्रं तैश्छिन्नं हरिमस्तकं। पाद्मे। द्वादश्यां तुलसीपत्रं धात्रीपत्रं च कार्त्तिके। लुनाति स नरो गच्छेन्निरयानतिगर्हितान्। रुद्रयामले। द्वादश्यां च दिवास्वापस्तुलस्यवचयस्तथा। विष्णोश्चैव दिवा स्नानं वर्ज्जनीयं सदा बुधैः॥ विष्णुधर्मे। नाच्छिंद्यात्तुलसीं विप्रो द्वादश्यां वैष्णवः क्वचित्। देवार्थे तुलसीच्छेदो होमार्थे समिधां तथा॥ इदं त्वयेन तुष्येत गवार्थे तु तृणस्य च। ग्रहणमंत्रश्च पाद्मे। तुलस्यमृतनामासि सदा त्वं केशवप्रिया। केशवार्थे विचिन्वामि वरदा भव शोभने।

२०९

पारिजातेदक्षः॥ समित्पुष्पकुशादीनांद्वितीयः प्रहरोमतः॥ अथपुष्पादेः पर्युषितत्वं।मार्गवार्चनेभविष्ये।प्रहरंतिष्ठ
तेजातीकरवीरंमहर्न्निशं।तुलस्यां।बिल्वपत्रेषुसर्वेषुजलजेषुच।नपर्युषितदोषोस्तिमालाकारगृहेपिच।ब्रह्मना
रदीये।वर्ज्यंपर्युषितंपुष्पंवर्ज्यंपर्युषितंजलंनवर्ज्यंतुलसीपत्रंनवर्ज्यंजाह्नवीजलं।तत्रैवपाद्मे।तुलसीपर्यु
षितानैवबिल्वंतुत्रिदिनावधि।पद्मंपंचदिनान्यन्यशेषंपर्युषितंविदुः॥स्कांदे।पालाशंदिनमेकंतुपंकजं
तुदिनत्रयं।पंचाहंबिल्वपत्रंतुदशाहंतुलसीदलं।बोपदेवस्त्वन्यथाह।बिल्वापामार्गजातीतुलसि
शमिशताकेतकीभृंगदूर्वामंदारांभोजाहिदर्भामुनितिलकतगरब्रह्मकल्हारमल्लीचंपाम्लानातिकुंभीद
मनमरुबकाबिल्वतोह्ना।निशांतात्रिंशत्र्येकार्यरीशोदधिनिधिवसुभ्यःपूपमाभूयएवं।अस्यार्थः।शता
शवरी।मंदः मंदारः।अहिःनागकेसरः।मुनिरगस्त्यः।अम्लानातिःकरवीरः।कुंभीपाटलेति।कैदेवनिघं
टः।अर्यःषट्।ईशाएकादश।उदधयश्चत्वारः।निधयोनव।वसवोष्टौ।भूरेका।यमौद्वौ।बिल्वमारभ्यआदि
पर्यंतंगणयित्वादर्भमारभ्यपुनात्रिंशदादिगणयेत्यर्थः॥एतद्दिनोत्तरांपर्युषितानीत्यर्थः।टोडरानंदेस्कां एमः
देदमनमुपक्रम्यातस्यमालयाभगवतःप्रीतिकारिणी।शुष्कापर्युषितावापिनदुष्टाभवतिकर्हिचित्॥ति

षितं त्वे मास्ये। बिल्वपत्रं च माध्यं च तमालामलकीदलं। कल्हारं तुलसी चैव पद्मं च मुनिपत्रकं। एतत्पर्युषितं न
स्यात् कुशाश्च कलिकास्तथा। स्मृतिसारावल्यां। जलजानां य सर्वेषां पत्राणां महतस्य च। कुशपुष्पस्य जात
स्तुवर्सीकृतयोरपि। न पर्युषितदोषोस्ति तीर्थतोयस्य चैव हि। मुकुलैर्नार्चदेवं पकैर्जलजैर्विना॥ अथ
शिवनिर्माल्यनिर्णयः। सिद्धांतशेखरे। धराहिरण्यगोरत्नताम्ररौप्यांशुकादिकान्। विहाय शेषं निर्माल्यं चं
डेशाय निवेदयेत्। अन्यद्रत्नादिपानीयं तांबूलं गंधपुष्पकं। दद्याच्चंडाय निर्माल्यं शिवभुक्तं च सर्वशः। आ
चार्यशिवचंडानामाज्ञाभंगे तु लक्षकं। धनस्य भक्षणे तेषां पादोनं लक्षमीरितं। निर्माल्ये भक्षिते तेलक्षपादतः
शुद्धिरीरिता। दानं च भक्षणासमं तदर्द्धं तदुपेक्षणे। अकामाद्भक्षणे यद्वा निर्माल्यस्य जपेत्सुधीः॥ ब्रह्मपं च
कसाहस्रमर्द्धेन सहितं ततः। कामतो भक्षणे दीक्षा प्रायश्चित्तं तु नान्यतः॥ निर्माल्यलंघने घोरं प्रजपेद
युतं ततः। स्पर्शश्च लंघनसमो विक्रयो भक्षणेन च। स्मृत्यर्थसारेपि। शिवस्वोर्निर्माल्यभक्षणे चांद्रं। अभ्या
सेद्द्विगुणं। मत्यांभ्यासे पतनं। अन्यनिर्माल्येप्यनापद्येवमिति। इदं च ज्योतिर्लिंगाद्यतिरिक्तविषयं। तथा च
पुरुषार्थप्रबोधे भविष्ये। ज्योतिर्लिंगं विना लिंगे घः पूजयति सत्तमः। तस्य नैवेद्यनिर्माल्यानक्षणा तप्तकृच्छ्

कं।शालग्रामोद्भवेलिंगेबाणलिंगेस्वयंभुवि।रसलिंगेतथार्षेचस्तुतेसिद्धप्रतिष्ठिते हृदयेचंद्रकांतेचस्वर्णरूप्यादि
निर्मिते।शिवदीक्षावताभक्तेनेदंभस्मामितीर्यते।तथा।बाणलिंगेस्वयंभूतेचंद्रकांतेहृदिस्थिते।चांद्रायणस
मंज्ञेयंशंभोर्नैवेद्यभक्षणं।लिंगेस्वयंभुवेबाणेरत्नजेरसनिर्मिते।।सिद्धप्रतिष्ठितेचैवनचंडाधिकृतिर्भवेत्।
यत्रचंडाधिकारोस्तितद्भोक्तव्यंनमानवैः।चंडाधिकारोनोयत्रतद्भोक्तव्यंचभक्तितः।त्रैविक्रम्यां।।बाणलिं
गेचलोहेचसिद्धलिंगेस्वयंभुवि।प्रतिमासुचसर्वासुनचंडोधिकृतोभवेत्।अत्रब्रह्महापिशुचिर्भूत्वानिर्मा
ल्यंयस्तुधारयेत्।तस्यपापंमहच्छीघ्रंनाशयिष्यामहाव्रते।इतिस्कांदादशुचिनानग्राह्यंशिवनिर्माल्यंकिंतु
स्नात्वेतिस्मार्ताः।अनुपनीतेनग्राह्यमितिश्रीदत्तः।शिवदीक्षाहीनैर्नग्राह्यमितिशैवाः।इतिध्येतत्वेपरिशिष्टे।
अग्राह्यंशिवनैवेद्यंपत्रपुष्पफलंजलं।शालग्रामशिलासंगात्सर्वंयातिपवित्रतां।पंक्त्यांचापतनपूजायांतं
त्रैरागतिवेदितमित्यर्थः।शिवपुराणे।येवीरभद्रशापिताःशिवभक्तिपराङ्मुखाः।शंभोरन्यत्रदेवेषुयेभक्तायेन:
नदीक्षिताः।तेषामनर्हमीशस्यतत्प्रसादस्वतद्भये।।काशीखंडे।जलस्यधारणंमूर्ध्निविश्वेशस्नानजन्मनः।ए
वज्रालंधरणेबंधःसमस्तास्तुरवेत्रभः।तथा।स्नापयित्वाविधानेनयोलिंगस्नपनोदकं।त्रिःपिबेत्रिविधंपापंत

स्येहाप्यविनश्यति। लिंगस्नपनवार्भिर्यः कुर्यान्मूर्ध्न्यभिषेचनं। गंगास्नान—लं तस्यजायतेत्र्यविपाप्मनः। इदं पू
र्ववशात् विश्वेश्वरविषयमिति केचित्। काशीख्यपुराणे—सिद्ध सर्वलिंगविषयं। काशीखंडे रत्नेश्वराख्याने
तथैव दर्शनादित्यन्ये। अथ कृषि— — राजमार्तंडः। हस्ते पूत्तरपौष्णवैष्णवमघामूलानुराधाश्विनीप्राजा
पत्यकरुद्रदैवतगुरुप्रालेयपादेषु च। निर्दोषैर्वृषभैर्हलैश्च सुमनोमालाभिरभ्यर्चितैर्दत्त्वा क्षेत्रपतेर्बलिं
हलधरः क्षेत्रं ततः कर्षयेत्। प्राजेशश्रवणोत्तरादितिमघामार्तंडतिष्याश्विनीपौष्णानुराधमणीच यः शत
भिषक् स्वाती विशाखा तथा। जीवार्केंदुसितेंदुनंदनदिने लग्ने च सौम्योदये सस्यानां वपने तथैव दलवनेश
स्यास्तथारोपणे। चंडेश्वरः। हस्तचित्रादितिस्वातीरेवत्यां श्रवणत्रये। स्थिरलग्ने गुरोर्वारे बीजं धार्यं त्वमु
क्रमोः ॐ धनदाय सर्वलोकहिताय देहि मे धान्यं स्वाहा। लेखयित्वा इमं मंत्रं धान्यागारे निधापयेत्। सस्य
वृद्धिं परां कुर्यात्सुपूजितां प्रतिपूजयेत्। दक्षिणादिङ्मुखगमने गमनमभिनवास्तु नारीषु। व्ययमपि सस्यधनानां
बुधाबुधवासरे कुर्युः॥ शनिवासरे च नो कार्यो धनधान्यव्ययो बुधैः। अथ वस्त्रं॥ ॥ रोहिणीपुष्यकरपंचकेश्वि
धेन्युत्तराश्च पुनर्वसुद्वये। रेवतीपुष्यवसुदैवते च भे नव्यवस्त्रपरिधानमिष्यते। जीर्णं रवौ सततमिदुभिरार्द्रमिं

२११ दौर्मीमेमुचेबुधदिनेतुभवेद्धनाय।ज्ञानायमंत्रिणिभृगौप्रियदर्शनाय मंदेमलायचनवांबरधारणंस्यात्॥ रोहिणी
गृहपुनर्वसूत्तरेष्वा बिभर्त्तिनववस्त्रभूषणं॥ स्नान योषिदवलंबते पतिं स्नानमाचरति वारुणेपिया॥ अथालंका
रवलयादिदैवज्ञवल्लभः॥ नासत्यपूषवसुभिःकरपंचकेनमार्त्तंडभौमगुरुदानवमंत्रिवारे।मुक्तासुवर्णमणि
विद्रुमशंखदंतरक्तांबराणिविधृ — निभवंतिसिद्ध्यै।ज्योतिर्निबंधेहस्तानुराधामृगपूषधनिष्ठयुक्चित्रो
त्राश्चपु र्वसुरोहिणीषु।ज्ञेमेछिरेरविसुतेउडुजजीववारेहेमादिधारणविधिःकथितोनराणां।तत्रैवश्रीपतिः॥
पौष्णाश्विनीवसुकरादिषुपंचभेषुकौजेभहेममणिविद्रुमकाचशंखाः।नार्याधृताःसुतसुखार्थकराभवंतिब्रा
ह्मोत्तरादितियुगंलसुखायभर्त्तुः।तत्रैव।शंखादिवररत्नानिपुष्पादिस्वुत्तरासुचरोहिण्यांचैवगर्ज्ञायाहूर्त्ते
ज्जीवितकांक्षिणी॥ अथसूचीकर्म॥ वासवादितिभत्वाष्ट्रमैत्रचंद्राश्विनीषुचासूचीकर्मतनुत्राणमेभिर्ऋक्षैः
प्रशस्यते॥ अथशय्या॥ हस्तादितित्र्यह्मगुरूत्तराणिपौष्णाश्विमूलेंदुभचित्रभानि।वारेषुजीवेंदुसितेंदुजानां शय्या
समारंभणमुत्तमंस्यात्॥ अथशस्त्रधारणं॥ पुष्येचादितिचित्रपद्मतनयेशक्रोत्तरारेवतीस्वातीवाजिविशाखमि
त्रसहितोभानौगुरौभार्गवौकुंभेकीटमृगेहदषेमृगापतौऽन्वंद्रेशुभैर्वक्षितेसन्नाहःशरवज्रकुंतछुरिकाधार्योनृपाणांहि रामः

ताः॥ अथ स्वामिसेवा॥ चंडेश्वरः॥ रोहिणपुनर्वपौष्णेषु वातु वारुणयोऽपि सेवेत स्वामिनं भृत्यः शुभवारोदये तथा॥ ज्योति
र्निबंधे। दासीदासादिभृत्यानां कुर्यात्संग्रहणं बुधो क्षिप्रलग्ने शुभे दृष्टे मंदवारे विशेषतः॥ अथ गजाश्वदोलाः॥ स ए
व॥ पौष्णप्रजेशादितिभद्वयानि हस्तादिषट्कं श्रवणे त्रयाणि। दोलादिमातंगतुरंगमाणामारोहणे भीष्टफलप्रदा
नि॥ अथ नृत्यं॥ हस्तः पुष्यो वासवे रोहिणी च ज्येष्ठा पौष्णं वारुणं चोत्तराश्च। पूर्वाचार्यैः कीर्तितश्चकवक्तनृत्यारंभे
शोभनोयं भवर्गः॥ अथ राजदर्शनं॥ श्रीपतिः॥ मृगाश्विनितिष्यश्रवणाश्रविष्ठाहस्तध्रुवत्वाष्ट्रभपूषभानि। मैत्रेण
युक्तानि नरेश्वराणां विलोकने भानि शुभप्रदानि॥ अथ क्रयविक्रयौ॥ भाद्रत्रयत्रिदशभं त्रिदिवाकरेषु मूलाश्विने
लोत्तरतुरंगमरेवतीषु। सारंगपाणिजलनीकरमैत्रभेषु लाभः सदै। भवति क्रयविक्रयाभ्यां॥ वह्नेतः चित्राश
तभिषास्वातीरेवतीचाश्विनी शुभा॥ श्रवणाश्च तथा प्रोक्तो वस्त्राणां क्रयणे शुभः॥ अथ सेतुः॥ स्वातीपुष्ये मं
दवारे वृषलग्ने शुभे दिने। सेतूनां बंधनं कार्यं ध्रुवभे चार्कजीवयोः॥ अथ पशुकृत्यं॥ श्रीपतिः॥ चित्रोत्तरा वैश्व
वरोहिणीषु चतुर्दशीदर्शदिनाष्टमीषु। ग्रामे न प्रवेशं गमनं विदध्यात्सुमान् पशूनां न कदाचिदेव॥ चंडेश्वरः॥
हस्तमूलविशाखादास्ररेवत्यां श्रवणे तथा। मैत्रे च वारुणे श्रेष्ठं पशुविक्रयमुच्यते। पूर्वात्रयामृतपूषहुताशनेषु

इंद्राग्निवाजिवसुवारुणा॥शंकरोष्णएतेषुगोमहिषदंतितुरंगमादिनानाप्रकारपशुजातिगतिः प्रशस्ता॥ अथगजदंतछे
दः॥ ज्योतिर्निबंधे॥ त्वष्ट्रमैत्रवैष्णवेश्विन्यामादित्येवसुदैवते। दंतिनांशुभदंकर्मपुष्येहस्तेचकीर्तितं॥ अथनिक्षेपः
भरणीत्रीणिपूर्वाणिआर्द्राश्लेषामघातथा॥ चित्राज्येष्ठाविशाखाचमूलंमृगपुनर्वसू॥ एभिर्दत्तंप्रयुक्तंचयद्यन्नि
क्षिप्यतेधनं॥ दृष्टतोधावमानस्यधनिनोनोपपद्यते॥ अथऋणमोक्षः॥ श्रीधरः॥ वागीशमंददिवसांशकलग्नयु
क्तैरिक्तासुमंददिवसेकुलिकोदयेचामेत्राह्वितीयपदमेत्रमुहूर्तयुक्तेरात्रुद्रमेचऋणमोक्षमुशंतिसंतः॥ अ
थराजमुद्रा॥ मृदुध्रुवक्षिप्रचरेषुमेषुयोगेप्रशस्तेशनिचंद्रवर्ज्येवारेतिथौपूर्णजयाह्वयेचमुद्राप्रतिष्ठाशुभदा
हिराज्ञां॥ अथनौका॥ चंडेश्वरः॥ पौष्णाश्विनीतुरगवारुणामित्रचित्राशीतोस्रराशिवसवोनलवेत्यमूनि। वारेच
जीवभृगुनंदनकेप्रशस्तंनौकादिसंघटनवाहनमेषुकुर्यात॥ अथभोगाः॥ गुरुभरविभानुराधाविधातृपौष्णाश्वि
रोहिणीषुस्यात॥ स्वात्युत्तराहस्तकुयोद्वयनासनभोगभोगादीनां॥ अथश्मश्रुकर्म॥ श्रीपतिः॥ पुष्येपौष्णेचाश्विनीषुदं
वेचशाक्रेहस्ताद्येत्रिकेभप्रादिष्टाः क्षौरकार्येवैष्णवादित्रयेचमुक्त्वाभौमादित्यपातंगिवाणन्॥ नस्नातभुक्तोत्क रामः
टभूषितानामभ्यंगयात्रासमरोत्सुकानां॥ क्षौरंविदध्यान्निशिसंध्ययोर्वाजितीविपूर्णानवमेनचाह्नि॥ त्रिस्थली

सेतौ ह्यद्य गार्ग्यः।। रव्यारसौरिवारेषु रात्रौ पाते व्रताहनि। श्राद्धाहप्रतिपद्रिक्ताभद्राः क्षौरेषु विवर्ज्जयेत्। गार्ग्यः। षष्ठ्या
मापूर्णिमापातचतुर्दश्यष्टमीतथा।। आसु संनिहितं पापं त्रिषु तैले भगे क्षुरे। राजमार्त्तंडेः। देवकार्ये पितुः श्राद्धे र
वेरंशपरिक्षये। क्षौरकर्म न कुर्वीत जन्ममासे च जन्मभे। बृहस्पतिः। राजकार्ये नियुक्तानां नराणां भूपजीविनां। श्म
श्रुलोमनखच्छेदे नास्ति कालविशोधनं। तथा। क्षौरं नैमित्तिकं कार्यं निषेधे सत्यपि ध्रुवं।। पित्रादिमृतिदीक्षासु
प्रप्य। शुद्धे पितीर्थके। केचित्तु तत्रेदमन्यथा पठंति। मुंडनस्य निषेधेपि कर्त्तनं तु विधीयते। इति। नारदः। नृपवि
प्राज्ञया यज्ञे मरणे बंधमोक्षणे। उद्वाहे खिलवार्क्षतिथिषु क्षौरमिष्टं। भारते। प्राङ्मुखः श्मश्रुकर्माणि कारयीत
समाहितः। उदङ्मुखोथवा भूत्वा तथायुर्विंदते महत्। अपरार्के। उदङ्मुखः प्राङ्मुखो वा वपनं कारयेत्सुधीः। केशश्मश्रु
लोमनखान्युदक्संस्थानि वापयेत्।। दक्षिणं कर्णमारभ्य धर्मार्थे पापसंचये।। शिखाद्यं नवसंस्कारे शिखाघंतं शिरोव
पेत्। यतीनां तु विशेषो निगमे कक्षोपस्थशिखावर्ज्जं कुलसंधिषु वापयेत्। इत्यन्ये।। विधिनिषेधाः प्रागुक्ताः। अथेंधन
संग्रहः। अस्त्यानिलाकमघमूलत्रिपूर्वारौद्रपौष्णानुराधगुरुविष्णुविशाखमुक्ते। वारे कुजार्कभृगुनंदनसोमजानां षे
धिक्षनस्य करणं भवति प्रशस्तं।। अथ नवान्नं।। श्रीपतिः। रेवतीश्रुतिपुनर्वसुहस्तब्रह्मतः एष्यगपिहितयेपि। अयुत्त

२१२ रास्तुकथितंरथकानांप्राशनंचसनवान्नविधानं।अथनवभोजनपात्रं।ज्योतिर्निबंधे।भोज्यपात्रंसुधासिद्धौघटयेद्वास
माहरेत्।तत्रान्नप्राशनप्रोक्तेकालेभोजनमाचरेत॥अथनवपर्णफलादिभक्षणं॥चंडेश्वरः।मूलाश्विनितिष्यहंरौद्र
भेषुपौष्णोत्तरेंदवपुनर्वसुवासवेषु।वारेषुभूमितनयार्कजवारवर्ज्येतांबूलनूतनफलाद्यशनंहितायः।अथहो
मेआहुतिपातः।ज्योतिषे।तराशिविद्गुभास्करिचंद्रमःकुजस्तुरेज्यविधुंतुदकेतवः।रविभतोदिनभंगणयेत्क्र
मात्त्रितिखगंत्रितयंत्रितयंन्यसेत॥दिनकरार्कितमःकुजकेतवोहुतभुजःशुभनाशकराःस्मृताः।इहनचक्रमिदं
प्रविलोक्यतांहवनकर्मणिसर्वसमृद्धय॥अथशांतिरुक्ताविष्णुधर्मे।क्रूरस्यहमुखेचैवसंज्ञातेहवनेशुभे।शांतिंवि
धापयेद्द्याद्ब्राह्मणायकुटुंबिने।आपंसीप्रतिमांकृत्वानिक्षिपेत्तामधोमुखीं।गोमूत्रमधुगंधाद्यैरर्चितांप्रति
मांततः।स्वस्थंनिधायसंपूज्यतत्रहोमोविधीयते।अत्रापवादः।क्रियासारे।नित्येनैमित्तिकेदुर्गाहोमाद्देनवि
चारयेत्।अथज्वरादौफले॥श्रीपतिः।स्वात्यश्लेषारौद्रपूर्वासुशाक्रेरोगोत्पत्तिर्जायतेयस्यपुंसः।तद्भैषज्यप्या एम०
प्ततोनिश्चयतःस्याद्दुग्धाद्यैर्लंबजन्माषिपेघः।व्याध्युत्पत्तिर्यस्यमैत्रेसपौष्णेप्राणत्राणंजायतेतस्यकृच्छ्रात्॥
स्थवैसौम्येरोगमुक्तिस्तमासाद्दिंशत्यामाद्वासराणांमघासु।पक्षाद्धस्तेवासवेसद्विदेवमूलाश्विन्योरग्निधिष्ण्येनवा

हस्तायाम्यैत्वाष्ट्रे वैश्वे वा रुग्णोत्र नैरुज्यं स्यान्नूनमेकादशाहात् । आहिर्बुध्न्ये तिष्यसंज्ञे यमाख्ये प्राजापत्यादित्ययोः स
प्तरात्रात् । ज्योतिषे । एकाहो निधनं दशाहमनिलावारुणावियत्सर्वताः सर्पाकाविलपक्षमासप्तगलेमासोमृतिः पञ्चकः ।
द्वौ मासावथ विंशतिर्दश निशाः पक्षांत पक्षान्खमासो पक्षदशांत पक्षकुंभः पीडादिनान्यश्विभात् । दैवज्ञः । उरग्यावरु
णारौद्रावायुभेंद्रत्रिपूर्वायमदहनविशाखापापवारे ग्युक्ताः । तिथिषु नवमि षष्ठी द्वादशी वा चतुर्थी भवति मरण
योगो रोगिणां कालहेतुः । अत्र कुंभे हेमीनक्षत्रप्रतिमां पूज्य द्वादशदलेषु संकर्षणादि द्वादशमंत्रैर्द्वादशादित्या
न्वा संपूज्य दूर्वासमित्तिलक्षीराज्यैर्गायत्र्या तद्देवतायै अष्टोत्तरशतं हुत्वा दध्योदनं बलिं दत्त्वाचार्याय तां प्रतिमां द
त्त्वा विप्रान् भोजयेदिति संक्षेपः । विशेषस्तु व्रतहेमाद्रौ पदार्थादर्शे च ज्ञेयः । अथ भैषज्यं ॥ चंडेश्वरः ॥ मूलानुरा
धमृगातिष्यपुनर्वसौ च पौष्णाश्विनीश्रवणशाक्रकरत्रये च ॥ वारेषु वाक्पतिसितेंदुदिने प्रशस्तौ भैषज्यकर्म ह्रणाम
मीषु हितं नराणां ॥ अथारोग्यस्नानं ॥ श्रीपतिः ॥ इंदोर्वारे भार्गवे च ध्रुवेषु सार्पादित्यस्वातियुक्तेषु भेषु पैत्र्ये चान्येवा
पि कुर्यात्कदाचिन्नैव स्नानं रोगान्निर्मुक्तजंतोः ॥ चरे विलग्ने । विभौमवारे रिक्ते तिथौ स्याद्बलक्षे च पक्षे ॥ धिष्ण्ये चरे रोगनिपी
डितानां स्नानं नराणां निरुजत्वकारि ॥ अथ दंतधावनं ॥ पृथ्वीचंद्रोदये विष्णुः ॥ प्रतिपद्दर्शषष्ठीषु चतुर्दश्यष्टमीषु

२२४ चानवम्यां भानुवारे च दंतकाष्टं विवर्ज्जयेत् । नारदः । चतुर्द्दश्यष्टमी पौर्ण्णमासी संक्रमणेषु च । नंदासु च नवम्यां च दंतकाष्टं
विवर्ज्जयेत् । श्राद्धे यज्ञे च नियमे तथा प्रोषितभर्तृका । व्यतीपाते च संक्रांत्यां नंदाभूताष्टपर्वसु । तैलं स्त्रीरतिमासं दं
तकाष्टं च वर्ज्जयेत् । वसिष्ठः । शन्यर्कशुक्रवारेषु कृत्वाहे व्रतवासरे । जन्माहे श्राद्धदिवसे दंतकाष्टं विवर्ज्जयेत् । हेमाद्रौ
स्कांदे । अभ्यंगे जलाधि स्नाने दंतधावन मैथुने । जाते च निधने चैव तत्कालव्यापिनी तिथिः । संवर्त्तः । रवौ विवाह आशौ
चे वर्ज्जयेद्दंतधावनं । व्यासः । अलाभे दंतकाष्टानां निषिद्धायां तथा तिथौ । अपां द्वादशगंडूषैर्विदध्याद्दंतधाव
नं ॥ अथामलकस्नानं ॥ व्यासः । श्रीकामः सर्वदा स्नानं कुर्वता मलकैर्नरः । सप्तमीं नवमीं चैव सर्वकालं विव
र्ज्जयेत् । चंद्रसूर्योपरागे च स्नानमामलकैस्त्यजेत् । क्रतुः । षष्ठी च सप्तमी चैव नवमी च त्रयोदशी संक्रांतौ र
विवारे च स्नानमामलकैस्त्यजेत् । पद्मे । नवमी दशमी चैव तृतीया च त्रयोदशी ॥ प्रतिपद्द्वादशी कृष्णा स्नानं तासु
विवर्ज्जयेत् । पद्मे । दर्शे स्नानं न कुर्वीत मातापित्रोस्तु जीवतोः । पुत्रः कुर्वन्निराचष्टे पित्रोर्हन्नति जीवतेः इति कालादय
एमः
माद्यैः स्नानमात्रं निषिद्धं । तद्रोगार्थं स्नानपरं न नित्यनैमित्तिकपरमिति हेमाद्रिः ॥ अथ तैलनिषेधः । कात्याय
नः । पक्षादौ च रवौ षष्ठ्यां रिक्तायां च तथा तिथौ ॥ तैलेनाभ्यज्यमानस्तु चतुर्भिः परिहीयते । गार्ग्यः । पंचदश्यां चतु

द्दश्यामष्टम्यां रविसंक्रमे। द्वादश्यां सप्तमीषष्ठ्योस्तैलस्पर्शो विवर्ज्जयेत्। नचकुर्यात्तृतीयायां त्रयोदश्यां तिथौ
तथा। शाश्वतीं गतिमन्विच्छन् दशम्यामपि पंडितः। तत्रैवायुर्वेदे। षष्ठ्यां दिनक्षयेष्टम्यामेकादश्यांच पर्वसु। द्वा
दश्यांच चतुल्गुनीषु व्यतीप्रा द्दश्यां पंचम्यां प्रतिपत्तिथौ। व्रते श्राद्धदिने जन्मत्रितये श्रवणार्द्रयोः। ज्येष्ठोत्त
राफाल्गुनीषु व्यतीपाते च वैधृतौ॥ वेष्टियोगे च संक्रांतौ मन्वादिषु युगादिषु नाभ्यंगस्तत्र बालानां वृद्धानां तु
न दोषकृत्। व्यवहारतत्वे। संक्रांतिभद्राव्यतिपातवैधृतीषष्ठ्यष्टमीकेपुनार्कभूसुते। स्नाने द्वितीयादश
मी च गर्हिताः षष्ठ्यादिमाघादष्टावनेषमाः। अस्यापवादमाह तत्रैव प्रचेताः। सार्षपं गंधतैलं च यत्तैलं पुष्प
वासितं। अन्यद्द्रव्ययुतं तैलं न दुष्यति कदाचन। आयुर्वेदे निषिद्धातिथिः॥ निषिद्धतिथिवारर्क्षग्रहणेष्वपि
त्रिषु॥ किंचिद्गोघृतयुक्तं वा विप्रपादरजोन्वितं। भानौ इर्वान्वितं भौमे मूत्रयुक्तं पुष्पयुग्गुरौ। सर्वेषां सर्वदा तैल
मभ्यंगेषु न दोषुचा। मंगलेष्वप्यदोषः। मंगल्यं विद्यते स्नानं वृद्धिपूर्वोत्सवेषु च। स्नेहमात्रसमायुक्तं मध्यात्प्रा
क्कृतमिष्यते। इति मदनपारिजाते कात्यायनोक्तेः। हेमाद्रौ बृहन्मनुः। तैलाभ्यंगो नार्कवारे न भौमे नो संक्रांतौ
वैधृतौ विष्टिषष्ठ्योः। पर्वस्वष्टम्यां न चेष्टः स्पृष्टः प्रोक्तोन्मुक्ताचामरैः सूर्यसूनोः। तिलस्नाननिषेधस्तु षट्त्रिंशन्म

तौ तथा॥ सप्तम्यष्टम्यमावास्यासंक्रांतिग्रहजन्मसु॥ धनपुत्रकलत्रार्थी तिलपिष्टं न संस्पृशेत्॥ अथ गृहारंभः॥ ज्यो
तिनिबंधे बादरायणः॥ वैशाखे फाल्गुने पौषे श्रावणे मार्गशीर्षके॥ गृहारंभः शिलान्यासः स्तंभारंभः प्रशस्यते॥ नार
दः॥ सौम्यफाल्गुनवैशाखमाघश्रावणकार्त्तिकोनामासाः स्युर्गृहनिर्माणे पुत्रारोग्यधनप्रदाः॥ अत्र वृषसिंहवृश्चि
कः॥ वैशाखश्रावणकार्त्तिकाः सौराज्ञेयाः॥ इति कालादर्शः॥ तत्रैव कारणांतरे॥ स्थिरमासे स्थिरे राशौ स्थिरेंशे न
ववेश्मनां॥ कुर्वत स्थापनं शंकोः शंभुस्थापनमेव वा॥ कार्त्तिकनिषेधस्तु कलापरः॥ कुंभे माघेपि सर्वेषां मंदिराणा
मुपक्रमं॥ महर्षयः प्रशंसंति धान्यागारे विहाय च॥ निषेधो धान्यगृहपरः॥ पाकभाजनशालादौ मार्गशीर्षश्च फाल्गु
नः॥ यथा गेहमठादौ च सतहस्यः शुचिरेव च॥ पौषाषाढनिषेधस्तु प्रधानगृहपरः॥ न प्रधानगृहारंभं कुर्यात्पौषशुचौ चा
वपीषि तंत्रोक्तेः॥ ज्योतिस्तत्वे॥ पूर्वापरास्यं तुलनभौं त्यपौषे याम्योत्तरास्यं मृगहरिद्वितीये॥ कार्यं गृहं ज्ञाबबुधस्व
गार्कनीचास्तगौ जीवसितौ च हित्वा॥ रत्नमालायां॥ कर्कमैनक्रहरिकुंभगतेर्के पूर्वपश्चिममुखानि गृहाणि
॥ तौलिमेषवृषवृश्चिकयाते दक्षिणोत्तरमुखानि च कुर्यात्॥ दैवज्ञवल्लभः॥ शोकं धान्यं पंचतां निःपशुत्वं स्वा
मित्रैर्वैरं संगरे भृत्यनाशं॥ सश्रीमार्षिं वह्निभीतिं चलस्त्रीं कुर्युश्चैत्राद्या गृहारंभकाले॥ गर्गः॥ त्र्युत्तरामृगरोहिण्यं

पुष्ये मैत्रे करात्रये। धनिष्टाद्वितये पौष्णे गृहारंभः प्रशस्यते। रोहिण्यां श्रवणात्रये दितिपुरोहस्तत्रये मूलभे रेवत्युत्त
रफाल्गुनीतुरगभे मैत्रोत्तराषाटयोः॥ शस्तं वास्तुकुजार्किविर्जितारे नेगोकुंभसिंहे स्तुषे कन्यायां मिथुनेन
भःशुचिसहो रोधोऽञ्जके फाल्गुने। व्यवहारसारे। शिलान्यासः प्रकर्तव्यो गृहाणां श्रवणे मृगे पौष्णे हस्ते च रो
हिण्यां पुष्याश्विन्युत्तरात्रये। वास्तुप्रदीपे। अधोमुखैर्भैर्विदधीत खातं शिलास्तथैवोर्ध्वमुखैश्च पट्ट॥ तिर्यङ्मु
खैर्द्वारकपाटयानं गृहप्रवेशो मृदुभिर्ध्रुवैश्च। लल्लः। खातं चपाकं शयनं च भोज्यं जलाशयं वाजिगृहं धनस्य।
देवेश्म पूर्वादिदिशः क्रमेण ग्राममध्ये सभाभूपनिवेशनानाम्॥ शिल्पिशास्त्रे। कन्यासिंहे तुलायां भुजगपतिमुखं शंभु
कोणेग्निखातं। वायव्ये स्यात्तदास्यं त्वलिधनुषिमृगे ईशखातवद्दंति। कुंभे मीने च मेषे नैर्ऋतिदिशिमुखं वायु
कोणे च खातं वह्नेः कोणेमुखं वै वृषमिथुनगते कर्कटे यातु खातं। तत्वचिंतामणौ। यत्र दैर्घ्यं गृहादीनां ह्रास्वं
शस्तं ततोधिकं। न तत्र चिंतयेद्धीमान् गुणान्यायव्ययादिकान्। राजमार्तंडे। आयव्ययौ मासशुद्धिं तृणागा
रे न चिंतयेत्। शिलान्यासादिनो कुर्यात्तथागारे तृणात्मने। व्यवहारतत्वे। निषिद्धेपि काले ऽतानुकूले शुभेऽहिने
तृणाकाष्टगृहारंभे मासदोषो न विद्यते। चंडेश्वरः। पूर्णादितः कृमीपावसूर्वे। स्यं वर्जयेद्गृहं। उत्तरास्यं न कुर्वतन

२१६ वम्यादि चतुर्द्दशी॥ अमावास्याष्टमी यावत्पश्चिमास्यं विवर्ज्जयेत्॥ नवम्यादौ तथा याम्यां यावत्कृष्णा चतुर्द्दशी। एवं दृष्ट्वा
थवा मृत्स्याक त्रेष्यं वा स्तुरोपणं॥ सायाह्नवर्ज्जे दिवसे एवोत्यस्का महानिशां॥ वराहः॥ दक्षिणपूर्वे कोणे कृत्वा पूजां॥ शि
लांन्यसेत्॥ प्रथमांशे वा प्रदक्षिणेन स्तंभाश्चैवं समुच्छ्राप्याः॥ अथ गृहप्रवेशः॥ बृहस्पतिः॥ नंद्यायां दक्षिणद्वारं भद्रा
यां पश्चिमेन तु॥ जयायामुत्तरद्वारं पूर्णायां पूर्वतो विशेत्॥ वसिष्ठः॥ कृत्वाग्र कुंभं पृष्ठतो वामतोर्के विप्रान्पूज्यानग्रतः
पूर्णकुंभं॥ हर्म्यं रम्यं तोरणं स्रग्वितानैः स्त्रीभिः स्रग्वी गीतवाद्यैर्विशेच्च॥ व्यवहारतत्त्वे॥ सौम्यायने श्रावणमार्गपौ
षे जन्मर्क्षे लग्नोपचयोदयांशे॥ वामं गतेर्के गृहवास्तुपूजां कृत्वा विशेद्वेश्म भकूटशुद्धौ॥ वास्तुशास्त्रे॥ लग्नाद्यागारदि
तो दिक्स्थं द्वौ द्वौ राशी नियोजयेत्॥ एकमेकं न्यसेत्कोणे रूपवामे विचिंतयेत्॥ वसिष्ठः॥ चंद्रज्ञार्य्यसितवासरेषु तु
श्रीकांतमहार्थलाभदं॥ सूर्यसूनुदिवसे स्थिरप्रदं किं तु चौरभयमत्र निर्दिशेत्॥ रत्नकोशे॥ पुष्ये धनिष्ठा मृ
दुवारुणेषु स्वातोयं भवन्नेति रूपूत्तराख्यासु॥ अग्नीशार्चन्द्रे शुभदो नृपस्य तिष्या वरिक्ते च गृहप्रवेशः॥ नारदः॥ प्रवेशो म
ध्यमो ज्ञेयः सौम्यकार्त्तिकमासयोः॥ माघफाल्गुनवैशाखज्येष्ठमासेषु शोभनः॥ अकपाटमनाच्छन्नमदत्तबलिभोजनं॥ राम:
गृहं न प्रविशेद्धीमानापदामाकरं हि तत्॥ प्रवेशश्च वास्तुपूजां कृत्वा कार्यः॥ जीर्णोद्धारे तथोद्याने तथा गृहनिवेशने॥

वप्रासादभवनेप्रासादपरिवर्त्तेनो।ह्याणभिवर्त्ततेतद्वत्प्रासादेषुगृहेषुच॥वास्तूपशमनंकार्यंपूर्वमेवविचक्षणै।रितिमा
त्स्योक्तेः।तत्रैव।कृत्वाग्रतो।द्विजवराननथपूर्णकुंभंदध्यक्षताम्रदलपुष्पफलोपशोभं।दत्वा।हिरण्यवसनानितथा।
द्विजेभ्योमंगल्यशांतिनिलयंस्वगृहंविशेच्च।गृह्योक्तहोमविधिनाबलिकर्मकुर्यात्प्रासादवास्तुशमनेचविधिर्यउ
क्तः।संतर्पयेद्द्विजवरानथभक्ष्यभोज्यैःशुक्लांबरःस्वभवनंप्रविशेत्ततनृपः॥ अथकालिवर्ज्यानि॥ बृहन्नारदीये।समु
द्रयातुःस्वीकारःकमंडलुविधारणं॥द्विजानामसवर्णासुकन्यासूपयमस्तथा।देवराच्चसुतोत्पत्तिर्मधुपर्केपशो
वधः।मांसदानंतथाश्राद्धे वानप्रस्थाश्रमस्तथा।दत्ताक्षतायाःकन्यायाःपुनर्दानंपरस्यच।दीर्घकालेब
ह्मचर्यंनरमेधाश्वमेधकौ।महाप्रस्थानगमनंगोमेधश्चतथामखः।इमान्धर्मान्कलियुगेवर्ज्यानाहुर्मनी
षिणः।कमंडलुः।पोटकंचकमुंडलुमित्युक्तः।मृन्मयोवा।दत्ता।ऊढा।ऊढायाःपुनरुद्वाहंज्येष्ठांशंगोवधंतथा॥
कलौपंचनकुर्वीतभ्रातृजायांकमंडलुमिति।हेमाद्रौवचनात्।ऊढायाःपुनःपुरुषसंयोगातमृतेदेयेतिके
चनेत्यादिभिर्विवाह्यतोक्ता।हेमाद्रौब्राह्मे।गोत्रान्मातुःसपिंडाच्चविवाहोगोवधस्तथा॥नराश्वमेधौमद्यं
चकलौवर्ज्यंद्विजातिभिः।गोत्रात।गोत्रजायाःपितृष्वसुःमातुःसपिंडातमातुलात्तत्कन्यायाविवाहःकलौ

२९ नकार्यः॥तेनतानितद्विधायकानितानियुगांतरविषयाणि॥तथाचव्यासः॥तृतीयांमातृतः कन्यांतृतीयांपितृतस्त
थाशुल्केनचोद्वहिष्यंतिविप्राःपापविमोहिताः॥इतिकलौनिंदामाह॥मातृतस्तृतीयांमातुलकन्यामित्यर्थः॥उ
क्तंचैतत्प्राक्॥मद्यंस्त्रीभ्यःशूद्राणांचाममित्यादिनाविहितमपिवर्ज्यं॥हेमाद्रौआदित्यपुराणे॥विधवायांप्रजो
त्पत्तौदेवरस्यनियोजनं॥बालायाःक्षतयोन्याश्चवरेणान्येनसंस्कृतिः॥कन्यानामसवर्णानांविवाहश्चद्विजन्म
भिः॥आततायिद्विजाग्र्याणांधर्मयुद्धेनहिंसनं॥द्विजस्याब्धौतुनौयातुः॥शोधितस्यापिसंग्रहः॥सत्रदीक्षाच
सर्वेषां॰कमंडलविधारणं॥महाप्रस्थानगमनंगोसंज्ञप्तिश्चगोसवे॥सौत्रामण्यामपिसुराग्रहणस्यचसं
ग्रहः॥अग्निहोत्रहवण्याश्चलेहोलीढेपरिग्रहः॥वृत्तस्वाध्यायसापेक्षमघसंकोचनंतथा॥प्रायश्चित्तविधा
नंचविप्राणांमरणांतिकं॥संसर्गदोषस्तेयाद्यैर्महापातकिनिष्कृतिः॥वरातिथिपितृभ्यश्चपशूपाकरण
क्रिया॥दत्तौरसेतरेषांचपुत्रत्वेनपरिग्रहः॥सवर्णान्यांगनादुष्टैःसंसर्गःशोधितैरपि॥अयोनौसंग्रहेवृत्तेपरित्या एगः
गोगुरुस्त्रियाः॥परोद्देशात्मसंत्यागउच्छिष्टस्यापिवर्जनं॥प्रतिमाभ्यर्चनार्थायसंकल्पश्चसधर्मकः॥अस्थिसंच
यनादूर्ध्वमंगस्पर्शनमेवच॥शामित्रंचैवविप्राणांसोमविक्रयणंतथा॥षड्भक्तानशनेचान्नहरणंहीनकर्मणः॥

माधवीये पृथ्वीचंद्रोदये। शूद्रेषु दासगोपालकुलमित्रार्धसीरिणां। भोज्यान्नता गृहस्थस्य तीर्थसेवातिदूरतः। शिष्यस्य गुरुदारेषु गुरुवद्वृत्तिशीलता॥ आपद्वृत्तिर्द्विजाग्र्याणामश्वस्तनिकता तथा प्रजार्थे तु द्विजाग्र्याणां प्रजारणिपरिग्रहः। ब्राह्मणानां प्रवासित्वं मुखाग्निधमनक्रिया॥ बलात्कारादिदुष्टास्त्रीसंग्रहो विधिनोदितः। यतेश्च सर्ववर्णेषु भिक्षाचर्याविधानतः। नवोदके दशाहं च दक्षिणा गुरुनोदिता। ब्राह्मणादिषु शूद्रस्य पचनादिक्रियापि च॥ भृग्वग्निपतनैश्चैव वृद्धादिमरणं तथा। गोतृप्तिशिष्टे पयसि शिष्टैराचमनक्रिया। पितापुत्रविरोधेषु साक्षिणां दंडकल्पनं। यतेः सायंगृहत्वं च सूरिभिस्तत्वदर्शिभिः। एतानि लोकगुप्त्यर्थं कलेरादौ महात्मभिः। निवर्त्तितानि विद्वद्भिर्व्यवस्थापूर्वकं बुधैः। सुराग्रहणस्य तत्कर्त्तुः संग्रहो व्यवहारः कः। न च मद्यं चेति सामान्ये न निषिद्धस्यानेनोपसंहार इति वाच्यं। निषेधस्य निवृत्तिफलत्वेन विशेषानपेक्षत्वात्। न हिंस्यादित्यस्य न ब्राह्मणं हन्यादित्यनेनोपसंहारे हिंसांतरस्यादोषापत्तेश्चानिरूपितं चैतद्धेमाद्रिणान्यत्रेत्युपरम्यते। एकाहाद्ब्राह्मणः शुद्धे योग्निवेदसमन्वितः। इत्युक्तेः। अघस्य आशौचस्य संकोचः। तस्या निष्कृतिर्दृष्टा भृग्वग्निपातनाहत इत्युक्तस्य प्रायश्चित्तस्य विधान उपदेशः कलौ कर्त्तैव लिप्यत इति व्यासोक्तेः। पतितसंसर्गदोषस्सर्वेपि पातित्यं नेत्यर्थः। केचि

३१८ दृष्टात्ते मूर्खाः मानाभावात्। तेनायमर्थः। तत्संसर्गी तु पंचमः। स्तेयेचा। तदन्यानि महापातकानि। ब्रह्मवध सुरापान
गुरुतल्पानि त्रीणि। तेषां कामाकृतानां प्रायश्चित्तं कलौ न। तेषु कामतो मरणांतस्यैवोक्तेः। तत्स्थाने द्वादशाब्दं द्वैगु
ण्ये आत्मनो ब्रह्मवधनिमित्ते च चतुर्विंशत्यब्दमिति चतुर्गुणद्वादशाब्दापत्तेस्तस्य च चतुर्थे नास्ति निष्कृतिरिति नि
षेधात्समर्गिणो व्रतस्यैवोक्तेः। स्तेये च राज्ञो वधकर्तृत्वान्नात्मब्रह्मवधापत्तिः। अतो वैगुण्ये युक्तोधिकारः। न च वि
धिना निषेधबाधात्। आत्मवधदोषापवादेपि ब्रह्मवधाभावात् युगांतरदोषसाम्येपि कलौ दोषाधिक्यात्। एत
द्विप्रपरं। असवर्णान्या असवर्णास्त्रियां यादि स्तयादुष्टैः अयोनौ। शिष्यादौ। चतमुस्तु परित्याज्याः। शिष्यगागु
रुगा च येत्युक्ते स्त्यागः। परोद्देशेन ब्राह्मणाद्यर्थं आत्मत्यागः। पद्धा। परोद्देशान्मात्याग्योदानं मनसापात्रमुद्दि
श्येत्युक्तं। उद्दिष्टस्य त्यक्तस्य वर्जनं। प्रतिग्रहसमर्थोपीत्युक्तं। वेतनग्रहणेन प्रतिमापूजा। स्वाशौचकालादि
ज्ञेयं स्पर्शनं तु त्रिभागतः इत्युक्तः स्पर्शः। षडिति। उपोषितस्य प्रहां स्थित्वा धान्यमब्राह्मणाद्वोरदित्यक्ते मन्त्रचौर्यं
आपद्दिशात्रादि हन्तिर्मुखेनैव धमेदग्निमित्युक्तं धमनं। दशाहेनैव शुद्ध्येत भूमिष्ठं च नवोदकमित्युक्तो दशाहः। एमः
गुरवे तु वरं दत्वा ह्युस्कादग्निहिणा। शूद्रेषु दासगोपालेति। कंदूपक्वं स्नेहपक्वं यच्च दुग्धेन पाचितं। एतान्यशूद्रान्नभुजो

मोल्यानिमनुरब्रवीत। इत्यपरार्के। सुमंतूक्तौ शूद्रस्य पाकक्रिया। पिता। पुत्रैर्विवादे तु साक्षिणां त्रिपणो दमः। इत्युक्तः। सायंगृहत्वं। विधूमे सन्नमुशले इत्युक्तेः। पृथ्वीचंद्रेणात्तु। अटंति वसुधा विप्राः पृथिवीदर्शनाय च। अनिकेता निराहारा यत्र सायंगृहास्तु ते। इति पुराणोक्तो निषिद्धः। तेनाज्ञातशीलपांथादेः श्राद्धादौ विनियोगो न कार्यः। कलौ एतानि वर्ज्यानीत्यर्थः। निगमः। अग्निहोत्रं गवालंभं संन्यासं पलपैतृकं। देवराच्च सुतोत्पत्तिः कलौ पंच विवर्जयेत। अग्निहोत्रं तदर्थमाधानं। एतच्च सर्वाधानपरं। अर्धाधानं स्मृतं श्रौतस्मार्ताग्न्योः पृथक्कृतिः। सर्वाधानं तयोरैक्यकृतिः पूर्वयुगाश्रितेति लोगाक्षिवचनादिति स्मृतिचंद्रिकायां। एतेन च सार्धं द्विसहस्राणि च सार्धं द्विशतानि च। कलेर्यदा गमिष्यंति तदा त्रेतापरिग्रहः। संन्यासश्च न कर्तव्यो ब्राह्मणेन विजानतेति। व्यासवचनं व्याख्यातं। सर्वाधानेपि विशेषमाह देवलः। यावद्वर्णविभागोस्ति यावद्वेदः प्रवर्तते। संन्यासं चाग्निहोत्रं च तावत्कुर्यात्कलौ युगे। इति संन्यासस्त्रिदंडः।।

इति श्रीमन्नारायणभट्टसूरिसूनुरामकृष्णभट्टात्मजदिनकरभट्टानुजकमलाकरभट्टकृते निर्णयसिंधौ तृतीयपरिच्छेदे कलिवर्ज्यानि।। नानानिबंधबंधेमत्यभ्रांतचित्तो हृद्धीषर्या।। कमलाकरसंज्ञेनाक्रियते श्राद्धनिर्णयः। तत्स्वरूपमाह पृथ्वीचंद्रोदये मरीचिः। प्रेतं पितृंश्च निर्दिश्य भोज्यं

पत्नियमात्मनः।श्रद्धयादीयतेयत्रतैच्छ्राद्धंपरिकीर्त्तितं।ब्राह्मणस्वीकारांतःचतुर्थ्यंतपदोपत्तपित्राद्युद्देश्यकत्यागः
श्राद्धमित्यर्थः।तत्रयद्यपिहोमपिंडभोजनानिप्रधानमितिहेमाद्रिः।होमश्चपिंडदानंतथाब्राह्मणभोजनं।।श्राद्धशब्दा
भिधेयंस्यादेकस्मिन्नौपचारिकमितिश्रीधरस्त्वातथापिकश्चिद्विशेषंवक्ष्यामः।निमित्तभेदेनभोजनस्यपिंडानावा
स्यनिषेधोनप्राधान्यंविरुणद्धि।असोमयाजिनोऽधिपयोयागवत।यच्चशूलपाणिः।।नित्यश्राद्धभेदैवंस्या
दर्घ्यपिंडविवर्जितमितिहारीतीये।नित्यश्राद्धमघादौपिंडनिषेधोऽस्तिनचप्राप्तिविनाशः।नचातिदेशंवि
नाप्राप्तिः।नचांगत्वेनविंनातिदेशः।प्रधानस्यानतिदेशात।सप्तमेऽपकारकत्वेनातिदेशोक्तेः।तेनभोज
नंप्रधानंपिंडोंगो।पिंडदानमात्रविधित्वेंगभूताह्कर्मातरमेव।प्रकरणांतन्न्यायादिति।तच्च।ज्ञातश्राद्धेनदद्या
त्तुपक्वान्नंब्राह्मणेष्वपि।नपक्वभोज्ययेद्विप्रान्सश्रूद्रोपिकदाचनेत्यादौज्ञातश्राद्धशूद्रश्राद्धादौभोजनस्यनिषेधे
नांगत्वापत्तेः।नतोपशोकरोतीतिवद्दुपदीव्यविरोधेनविकल्पापत्तेश्च।तेनश्राद्धशब्दाभिधेयत्वेनोभयप्राप्तौनि एमः
षेधःपर्युदासोवा।दीक्षितोनददातिनजुहोतिनाहोमयाजीसत्रंयोदवत।इतितत्त्वबोधधर्मप्रदीपेपि।यत्तुषांपिंड
दानंतुबहूनांद्विजार्चनं।श्राद्धशब्दाभिधेयंस्यादुभयंसामवेदिनो।तच्च।।पितृन्यजतेऽपितृभ्योदद्यादित्युभयप्र

योगदर्शनात्यागदानोभयात्मकं। पितरोदेवताइति। पित्रुद्देश्यकत्वाद्यागत्वं विप्रापेक्षयाचदानत्वमित्यविरुद्धं। एतेननायंयागः। देवतोद्देशेनत्यागोयागः। त्यागोद्देश्याचदेवतेत्यात्माश्रयादितिगौडमतमपास्तं। वैधशब्दविशेषोद्देश्यकत्वस्य। तस्येदमितिस्वत्वत्यागरूपप्रतियोगित्वस्यवादेवतात्वात्॥ तत्रैवसुमंतुः आत्परतरंनान्यच्छ्रेयस्करमुदाहृतं। आदित्यपुराणे। नसंतिपितरश्चेतिकृत्वामनसियोनरः। श्राद्धंनकुरुतेतत्रतस्यरक्तंपिबतिते। तद्भेदानाह विश्वामित्रः। नित्यंनैमित्तिकंकाम्यंवृद्धिश्राद्धंसपिंडनं। पार्वणंचेतिविज्ञेयंगोष्ठ्यांशुद्ध्यर्थमष्टमं। कर्मांगंनवमंप्रोक्तंदैविकंदशमंस्मृतं। यात्रास्वेकादशंप्रोक्तंपुष्ट्यर्थंद्वादशंस्मृतमिति। एषांलक्षणानिभविष्ये। अहन्यहनियच्छ्राद्धंतन्नित्यमितिकीर्तितं। वैश्वदेवविहीनंतदशक्तावुदकेनतु। एकोद्दिष्टंतुयच्छ्राद्धंतन्नैमित्तिकमुच्यते। तदप्यदैवंकर्तव्यमयुग्मानभोजयेद्द्विजान्॥ कामायविहितंकाम्यमभिप्रेतार्थसिद्धये। वृद्धौयत्क्रियतेश्राद्धंवृद्धिश्राद्धंतदुच्यते। गंधोदकतिलैर्युक्तंकुर्यात्पात्रचतुष्टयं। अर्घ्यार्थंपितृपात्रेषुप्रेतपात्रंप्रसिंचयेत्। येसमानाइतिद्वाभ्यामेतद्द्वयंसपिंडनं। नित्येनतुल्यंशेषंस्यादेकोद्दिष्टंस्त्रियाअपि। एतदुभयमप्येवस्त्रियाः। तेनस्त्रीकर्तृकंस्त्रीसंप्रदानकंचेत्युभयनियमइतिकल्पतरुः। अमावास्यायांयत्क्रियतेतत्पार्वणमितिस्मृ

तं क्रियते पर्वणि यद्धि तत्पार्वणमिति स्थितिः॥ अत्र पर्वाश्चतुर्दश्यष्टमी चैव अमावास्या च पूर्णिमा॥ पर्वाण्येतानि राजेंद्र
रविसंक्रमणं तथेति॥ विष्णुपुराणोक्तं॥ संक्रांत्यादि॥ गोष्ठ्यां यत्क्रियते श्राद्धं गोष्ठीश्राद्धं तदुच्यते॥ बहूनां विदुषां संपत
सुखार्थं पितृतृप्तये॥ क्रियते शुद्धये यत्तु ब्राह्मणानां तु भोजनं॥ शुद्ध्यर्थमिति तत्प्रोक्तं वैनतेय मनीषिभिः॥ निषेक
काले सोमे च सीमंतोन्नयने तथा॥ ज्ञेयं पुंसवने चैव श्राद्धं कर्मांगमुच्यते॥ देवानुद्दिश्य यच्छ्राद्धं तत्तु दैविकमुच्य
ते॥ गच्छन्देशांतरं यस्तु श्राद्धं कुर्यात्तु सर्पिषा॥ यात्रार्थमिति तत्प्रोक्तं प्रवेशे च न संशयः॥ शरीरोपचये श्राद्धमर्थोप
चय एव च॥ पुष्ट्यर्थमेतद्विज्ञेयमौपचारिकमुच्यते॥ गोष्ठ्यां श्राद्धकर्तृसमुदाये संभूय सामग्रीसंपादनेन युगपत्ती
र्थप्राप्तो विदुषां श्राद्धं तत्परास्तु खार्थं भिन्नपाकाशक्तौ बहुपितृकः श्राद्धमेकः कुर्यादिति कल्पतरुः॥ शंखधर
श्चाशुद्धिश्राद्धं प्रायश्चित्तांगमिति मैथिलाः॥ अत्र पार्वणैकोद्दिष्टवृद्धिसपिंडीकरणात्मकं चतुर्विधमेव मुख्यं॥
तस्यैवार्यमर्यं च॥ अथ श्राद्धदेशाः॥ मनुः॥ शुचिदेशं विविक्तं तु गोमयेनोपलेपयेत्॥ दक्षिणाप्रवणं चैव प्रयत्ने
नोपपादयेत्॥ एखी चंद्रोदये विष्णुधर्मे॥ दक्षिणाप्रवणे देशे तीर्थादौ च गृहेऽपि वा॥ भूसंस्कारादिसंयुक्ते श्राद्धं कु
र्यात्प्रयत्नतः॥ तत्रैव प्रभासखंडे॥ तीर्थादष्टगुणं पुण्यं स्वगृहे ददतः शुभे॥ भारते॥ तस्य देशाः कुरुक्षेत्रं गया गंगा स

एम:

रेवती। प्रभासं पुष्करं चेति तेषु श्राद्धं महाफलं। कौंदे। तुलसीकाननछाया यत्र यत्र भवेद्द्विज। तत्र श्राद्धं प्र
दातव्यं पितृणां तृप्तिहेतवे। माधवीये श्राद्धोपक्रमे व्यासः। महोदधौ प्रयागे च काश्यां च कुरुजांगले।। शंखः। गंगा
यमुनयोस्तीरे पयोष्ण्यमरकंटके। नर्मदाबाहुदातीरे भृगुलिंगे हिमालये। गंगाद्वारे प्रयागे च नैमिषे पुष्करे तथा। सन्नि
हत्यां गयायां च दत्तमक्षय्यतां व्रजेत्। अपि जायेत सोस्माकं कुले कश्चिन्नरोत्तमः। गयाशीर्षवटे श्राद्धं यो नो दद्या
त्समाहितः। एष्टव्या बहवः पुत्रा यद्येकोपि गयां व्रजेत्। यजेत वाश्वमेधेन नीलं वा वृषमुत्सृजेत्। आदित्यपुराणे
पंचक्रोशं गयाक्षेत्रं क्रोशमेकं गयाशिरः। महानद्याः पश्चिमेन यावद्गृध्रेश्वरो गिरिः। उत्तरे ब्रह्मयूपस्य यावद्दक्षि
णमानसं। एतद्गयाशिरो नाम विष्णुलोके प्रविश्रुतमिति।। मूलपौराणे बृहस्पतिः। गयायां धर्मपृष्ठे च सदसि
ब्रह्मणस्तथा।। गयाशीर्षेक्षयवटे पितॄणां दत्तमक्षयं। धर्मारण्यं धर्मपृष्ठं धेनुकारण्यमेव च। दृष्ट्वैतानि पि
तृंश्चार्च्य वंशान्विंशतिमुद्धरेत्। त्रिस्थलीसेतौ वायवीये। शमीपत्रप्रमाणेन पिंडं दद्याद्गयाशिरे। उद्धरेत्सप्त
गोत्राणि कुलमेकोत्तरं शतं। सप्तगोत्राणि तु।। पिता माता च भार्या च भगिनी दुहिता तथा। पितृमातृष्वसा चैव स
प्तगोत्राणि वै विदुः। इति। एवं गोत्राणां एकोत्तरशतं कुलं पुरुषा इत्यर्थः। तिस्रोक्तास्तत्रैव। तत्स्थानि विशति नरपाद्य

दशैकादशदश। ज्ञातातिविंशतिचगोत्राणांकुलमेकोत्तरंशतं॥ तत्स्थानिचतुर्विंशतिः॥ तेचद्वादशपूर्वाद्वादशापरः॥
एवमग्रेपि। प्रयोगपारिजातेपाद्मे। शालग्राममयीमुद्रासंस्थितायत्रकुत्रचित्। वाराणस्यायवाधिकंसमंताद्यो
जनत्रयंतथा॥ यत्किंचित्सेत्तकंकुर्यात्सपिंडंवातदंतिके। विष्णुलोकंसगच्छेत्तुलभतेशाश्वतंपदं। तत्रैववाराहे। चक्रां
कस्यतुसान्निध्येयत्कर्मक्रियतेनरैः। स्नानंदानंतपःश्राद्धंसर्वमक्षयतांव्रजेत्। अथनिषिद्धदेशाः। पृथ्वीचंद्रोद
येस्कांदे। त्रिशंकोर्वर्जयेद्देशंसर्वंद्वादशयोजनं। उत्तरेणमहानद्यादक्षिणेनतुकीकटात्। देशस्त्रैशंकवोना
मश्राद्धकर्मणिवर्जितः। वायवीये। प्रणष्टाश्रमधर्मोष्टदेशावर्ज्याःप्रयत्नतः। कृष्णंकृमिहतंक्लिन्नंसंकीर्णा
निष्टगंधिकं। देशंत्वनिष्टशब्दंचवर्जयेच्छ्राद्धकर्मणि। तत्रैवशंखः। गोगजाश्वादिपृष्ठेषुकृत्रिमायांतथाभु
वि। नकुर्याच्छ्राद्धमेतेषुपारक्यासुचभूमिषु। यमः। परकीयप्रदेशेषुपितॄणांनिर्वपेत्तुयः। तद्भूमिस्वामिपितृ
भिःश्राद्धकर्मविहन्यते। ब्राह्मभारतयोरपि। परकीयगृहेयस्तुस्वान्पितॄंस्तर्पयेद्यदि। तद्भूमिस्वामिनस्तस्यह एम
रंतिपितरोबलात्। अग्रभागंततस्तेभ्योदद्यान्मूल्यंचजीवने॥ श्राद्धार्हाणाममयभागं। श्राद्धंतदनर्हाणां। शूद्रा
णांतुमूल्यमितिकेचित्। षोडशपिंडेबांधवानामपिपिंडोक्तेः॥ येबांधवाअबांधवावेत्यादितर्पणबाधापत्तेश्च। ना

मगोत्रपूर्वं श्राद्धनिषेधो नान्यत्रेति गौडाः ॥ विप्रास्तु तस्य भूद्वापुत्रश्राद्धनिषेधो नान्यत्र अग्रहणं चान्यस्यागात्पूर्वं कार्यमिति मैथिलाः। तन्न। अयभाग्यस्य श्राद्धपरत्वे मानाभावात्। अन्नदाने च निषेधाभावात्। त्यागात्पूर्वं करणे अनंगेन व्यवधानपत्तेः। अंगत्वे च मानाभावात्। इदं च स्वाम्यनुज्ञाभावे। तदुक्तं तत्रैव ब्राह्मे। स्वनुलिप्तेषु गेहेषु स्वाम्यनुज्ञापितेषु च। श्राद्धमेतेषु दातव्यं वर्ज्यमेतेषु नोच्यते। किरातेषु कलिंगेषु कोंकणेषु च। सिंधोरुत्तरकूलेषु नर्मदायाश्च दक्षिणे। पूर्वेण करतोयाया न देयं श्राद्धमुच्यते॥ इदं काम्यविषयं। अन्यथा तत्रस्थानां श्राद्धाकरणापत्तेः। नर्मदादक्षिणोपवादः स्कांदे सह्यस्य चोद्भवो यत्र यत्र गोदावरी नदी। पृथिव्यामपि कृत्स्नायां स प्रदेशोऽतिपावनः। परकीयत्वापवादस्त्वादित्यपुराणे। अटवीपर्वताः पुण्या नदीतीराणि यानि च। सर्वाण्यस्वामिकान्याहुर्न हि तेषु परिग्रहः। वनानि गिरयो नद्यस्तीर्थान्यायतनानि च। देवखाताश्च गर्ताश्च न स्वाम्यं तेषु विद्यते। स्मृतिसारे। नैकवासा न च द्वीपे नांतराले कदाचन। ते च संक्रांतिपुण्यादिमहालयादयः। प्रोपणापूर्वपरिच्छेदद्वये उक्ता एव केचित्तूच्यंते। पृथ्वीचंद्रोइंवीयंरये वृद्धपाराशरः। चरेद्विद्वान्न चाकाशे कथंचन। अथ श्राद्धकालाः। श्रुतिस्मृत्युदितं कर्म न कुर्यादशुचिः क्वचित्। दिवोदासीये। म्लेच्छदेशे तथा रात्रौ संध्यायां विप्रवर्जिते न श्राद्धमाश्राद्धं ह्वा वचं

द्रेमच्छायाग्रहणासंक्रमोनवोदकेनवान्नेचनवच्छन्नेतथ्यागृहे।नवोदकेनवकूपादावितिकेचित्।वर्षोपक्रमेआर्द्राप्रवे
शेइतिगौडाः।नवान्नश्राद्धेविशेषोऽप्योतिषे।ज्येष्ठाशेषार्द्रगेसूर्येमृगानेत्रातिशातमके।नवान्नेर्भोजनश्राद्धेजन्मचं
द्रतिथ्योनच।अश्लेषाकृत्तिकात्येषामूलाजपदकेषुच।भृगुभौमदिनेरिक्तेतिथ्योनाद्यान्नवोदनं।तत्रैववृश्चिकेशु
क्लपक्षेतुनवान्नंशस्यते।बुधैः।अतःकृष्णपक्षेनेतिगौडाः।मैथिलास्तु।आकृताग्रयणंचैवधान्यजातंनवान्न
मेतिवाराहोक्तेः।प्रतिधान्यश्राद्धमाहुः।तन्न।ज्ञातपदस्यश्राद्धयोग्यत्वमहृपरत्वात्।हेमाद्रौजातूकर्ण्यः।शंखं
प्राङ्क्रमावास्यांक्षीणाचंद्रांद्विजोत्तमाः।अष्टकांतुभवेत्पश्चात्तत्स्योक्तंमयतश्चचतुर्गुणं।याज्ञवल्क्यः।अमावस्
स्यांक्षीणचंद्रांद्विजोत्तमाः।अष्टकांतुभवेत्पश्चमदत्तंतथाक्षयं।तत्रैवशंखः।यदाविष्टिर्व्यतीपातोभानुवारस्तथै
वचापष्ठकंनामतत्सोक्तंमयतश्चचतुर्गुणं।याज्ञवल्क्यः।अमावास्याष्टकावृद्धिकृष्णपक्षोऽयनद्वयं।द्रव्यंब्राह्म
णासंपत्तिर्विषुवत्सूर्यसंक्रमः।व्यतीपातोगजच्छायाग्रहणंचंद्रसूर्ययोः।श्राद्धंप्रतिरुचिश्चैवश्राद्धकालाःप्रकी
र्तिताः।कृष्णपक्षःसर्वोऽपि।शाकेनाप्यपरपक्षंनातिक्रामेत्।मासिमासिवोऽशनमितिश्रुतेः।ऊर्ध्वंवाचतुष्पराङ्कः एयाः
श्रेयान्।इत्यापस्तंबोक्तेश्चाश्वीस्ययासर्वकृष्णपक्षेषुनित्यं।तेनोपसंहाराण्महालयपरत्वंपरास्तं।अत्रप्रत्यहंपं

चम्पादि। यदहः संपत्तिर्वैतित्रयः पक्षः। यदेकदिने श्राद्धं तदा दार्शं पृथग्गेवा याज्ञवल्क्येनामावास्यायाः पृथगुद्देशा
त्॥ एतेन कृष्णपक्षे यदहः संपद्यते अमावास्यायां तु विशेषेणेति निगमोक्तेश्च। गुणोपरपक्षश्राद्धस्यामावास्येति शू
लपाणिमतमप्यपास्तं। अशक्तौ दर्शेनापि मासि श्राद्धसिद्धिरिति। तेना एतस्याहृत्तिः। निरग्नीनां काश्चिद्दिने आहि
ताग्नेस्तु दर्श एव। न दर्शेन विना श्राद्धमाहिताग्नेर्द्विजन्मनः। इति मनूक्तेः। सर्वं कृष्णापक्षाशक्तौ मात्स्ये। अनेन वि
धिना श्राद्धं त्रिरब्दस्येह निर्वपेत्। कन्याकुंभवृषस्थेर्के कृष्णपक्षे च सर्वदा। कर्कोपि। आहिताग्नेः संवत्सरोक्तिः श्रा
द्धनियमः इति देवलः। अनेन विधिना श्राद्धं कुर्यात्संवत्सरं सकृत्। द्विस्त्वतुर्वा यथाश्राद्धं मासे दिने दिने। कृष्ण
पक्षेष्वपि महालयस्य श्रेष्ठत्वं तच्चोक्तं प्राक्। व्यतीपाते विशेषमाह हेमाद्रौ शंखः। फलं लक्षघ्नमुत्सह्रौ अय
णे कोटिरुच्यते। पतने शतकोट्यस्तु पतिते दत्तमक्षयं। ज्योतिःशास्त्रे। द्वाविशति स्तथ्यो सह्रौ ष्मणो चैकविं
शतिः। पतने दशनाड्यस्तु पतिते सप्तनाडिकाः। हेमाद्रौ मार्कंडेयः। यदा च श्रोत्रियोऽभ्येति गृहं वेदविदाग्निचित्।
तेनैकेनापि कर्त्तव्यं श्राद्धं वाविधुवच्छुभं। इदं चापिदे कार्यमिति हेमाद्रिः। एतज्जीवपितृकोपि कुर्यात्। ग्रहाहे
पुत्रजननेपि वेष्यांसोमिके मखे। तीर्थे ब्राह्मण आयाते षडेते जीवतः पितुरिति मैत्रायणीयपरिशिष्टोक्तेः॥

२२३ तिथिविशेषेफलविशेषः याज्ञवल्क्योक्तः। कन्यांकन्यावेदिनश्चपशून्वैसत्सुतानपि। द्यूतंकृषिंचवाणिज्यं। द्विशफैकशफां
स्तथा। ब्रह्मवर्चस्विनःपुत्रान्स्वर्णरूप्येसकुप्यके। ज्ञातिश्रैष्ठ्यंसर्वकामानाप्नोतिश्राद्धदःसदा। प्रतिपत्प्रभृतिष्वेकांव
र्ज्जयित्वाचतुर्द्दशीं। एताःकृष्णपक्षस्थाएव। महालयेतुफलभूमेतिपृथ्वीचंद्रः। पौर्णमास्यांहेमाद्रौपितामहः। अमा
वास्याव्यतीपातपौर्णमास्यष्टकासुच। विद्वान्श्राद्धमकुर्वाणोनरकंप्रतिपद्यते। एतन्माघ्यादिपरं। व्रीहिपाकेचक
र्त्तव्यंयवपाकेचपार्थिव। पौर्णमासीतथामाघीश्रावणीचनृपोत्तम। प्रौष्ठपद्यामतीतायांतथाकृष्णात्रयोदशी। ए
तांस्तुश्राद्धकालान्वैनित्यानाहप्रजापतिः। इतिविष्णुधर्मोक्तेः। विष्णुः। माघीप्रोष्ठपद्यूर्ध्वंकृष्णात्रयोदशीति। अ
त्रमाघीपौर्णमेति। कल्पतरुः। श्रावणपूर्व्वमपिमघायोगाद्भवात्रयोदशी। विशेषणामिति गौडाः। नक्षत्रेष्वपि
याज्ञवल्क्यः। स्वर्गंह्यपत्यमोजश्चशौर्यंक्षेत्रंबलंतथा। पुत्रान्श्रैष्ठ्यंचसौभाग्यंसमृद्धिंमुख्यतांशुभं। प्रवृत्तंच
क्रतांचापिवाणिज्यप्रभृतीनपि। अरोगित्वंयशोवीतशोकतांपरमांगतिं। धनंवेदान्भिषक्सिद्धिंकुप्यंगामप्य
जाविकं। अश्वानायुश्चविधिवद्यःश्राद्धंसंप्रयच्छति। कृत्तिकादिभरण्यंतंसकामान्प्राप्नुयादिमान्। फलांतराण्यपि एनः
भारतव्योनोर्देर्ज्ञेयानि। माधवीयेमरीचिः। कृत्तिकादिषुऋक्षेषुश्राद्धेयत्फलमीरितं। विष्कुंभादिषुयोगेषुतदेवफल

मिष्यते। बृहस्पतिः। आरोग्यचैवसौभाग्यंशत्रूणांचपराजयं। सर्वान्कामान्श्रियंविद्यांधनमायुर्यथाक्रमं। सूर्यादि
दिवसेष्वेतच्छ्राद्धकृत्स्नमतेफलं। बवादिकरणेष्वेतच्छ्राद्धंकृत्स्नमतेफलं। अन्यानिचषण्णवतिश्राद्धानिप्रागुक्तानि। मा
र्कंडेयपुराणे। श्राद्धार्हद्रव्यसंपत्तौतथादुःस्वप्नदर्शने। जन्मर्क्षेग्रहपीडासुश्राद्धंकुर्वतस्वेच्छया। अथश्राद्धाधिकारि
णः। चंद्रिकायांसुमंतुः। मातुःपितुःप्रकुर्वीतसंस्थितस्यौरसःसुतः। पैतृमेधिकसंस्कारंमंत्रपूर्वकमादृतः। तत्रैवहेमा
द्रौशंखः। पितुःपुत्रेणकर्त्तव्यापिंडदानोदकक्रिया। पुत्राभावेतुपत्नीस्यात्तदभावेतुसोदरः॥ अत्रपुत्रपदंक्षेत्रजा
दिद्वादशविधपुत्रपरं। तेचद्वादशपुत्रायाज्ञवल्क्येनोक्ताः। औरसोधर्मपत्नीजस्तत्समःपुत्रिकासुतः। क्षेत्रजःक्षेत्र
जातस्तुसगोत्रेणेतरेणवा। गृहेप्रच्छन्नउत्पन्नोगूढजस्तुसुतःस्मृतः। कानीनःकन्यकाजातोमातामहसुतः।
स्मृतः। अक्षतायांक्षतायांवाजातःपौनर्भवःस्मृतः। दद्यान्मातापितावायंसपुत्रोदत्तकोभवेत्। क्रीतश्चताभ्यांवि
क्रीतःकृत्रिमःस्यात्स्वयंकृतः। दत्तात्मातुस्वयंदत्तोगर्भेविन्नःसहोढजः। उत्सृष्टोगृह्यतेयस्तुसोपविद्धोभवेत्सुतः।
पिंडदोंशहरश्चैषांपूर्वाभावेपरःपरः। इतितथापिदत्तौरसेतरेषांतुपुत्रत्वेनपरिग्रहः। इतिहेमाद्रावादित्यपुराणे
कलावितरेषांपुत्रत्वनिषेधादौरसदत्तपरमेव। यद्यपिपिंडदोंशहरश्चैषांपूर्वाभावेपरःपरइतियाज्ञवल्क्योक्ते

गौरसाभावे दत्तकप्राप्तिस्तथा पौरस्याभावे पौत्रः प्रपौत्रस्तदभावे दत्तकादय इति ज्ञेयं इति। पुत्रेण लोकाञ्जयति पौत्रे
णानंत्यमश्नुते इति। अथ पुत्रेण पौत्रेण ब्रध्नस्याप्नोति विष्टपमिति। जीमूतवाहनधृतहारीतवसिष्ठशंखलिखितो
क्तेः। लोकानंत्यं दिवः प्राप्तिः पुत्रपौत्रप्रपौत्रकैरिति याज्ञवल्क्योक्तेश्च। पुत्रः पौत्रश्च तत्पुत्रः पुत्रिकापुत्र एव च। पत्नी
भ्राता च तज्जश्च पिता माता स्नुषा तथा॥ भगिनी भागिनेयश्च सपिंडः सोदकस्तथा॥ असन्निधाने पूर्वेषामुत्तरे पिंडदाः
स्मृताः॥ इति स्मृतिसंग्रहे। प्रपौत्रानंतरं पुत्रिकापुत्रोक्तेस्तत्समत्वाद्दत्तकस्यापि ग्रहः। बृहस्पतिना पौत्रश्च पुत्रि
कापुत्रः स्वर्गप्राप्तिकरावुभौ॥ रिक्थे च पिंडदाने च समौ तौ परिकीर्तितावित्ति। पौत्रसाम्यमुक्तं। याज्ञवल्क्येन च औ
रसो धर्मपत्नीजस्तत्समः पुत्रिकासुतः। इत्यौरससाम्यं तथापि लोके राजसमो मंत्रीत्यादौ किंचिन्न्यूने समशब्द
प्रयोगाद्द्वौ तामुख्ययोः। साम्यप्रयोगाच्च स्वल्पत्वार्थं ततेन तु समं विकल्प इति भ्रमितव्यं। पुत्रः पौत्रः प्रपौत्रो वा
भ्राता वा भ्रातृसंततिः। सपिंडसंततिर्वापि क्रियार्हा नृप जायते॥ तेषामभावे सर्वेषां समानोदकसंततिः॥ मा एम्मः
तृपक्षसपिंडेन संबद्धो योजलेन वा। कुलद्वयेपि चोच्छिन्ने स्त्रीभिः कार्याः क्रिया नृप। तत्संघातंगतैर्वापि तद्रिक्था
त्कारयेन्नृप। इति विष्णुपुराणाच्च प्रपौत्रानंतरं दत्तकादयः इति पृथ्वीचंद्रमदनरत्नकालादर्शादयः। मदनपारिजा

तेष्वेवं बोपदेवरुद्रधरादयस्तत्पुत्रेषु विद्यमानेषु नान्यदेव कारयेत्स्वधा इति सुमंतूक्तेः। पितामहः पितुः पश्चात्पंचत्वं यदि गच्छति। पौत्रेणैकादशाहादि कर्त्तव्यं श्राद्धषोडशं॥ नैतत्पौत्रेण कर्त्तव्यं पुत्रवांश्चेत्पितामह इति छंदोगपरिशिष्टे च पुत्रशब्दस्य द्वादशविधसुतपरत्वात्पूर्वाभावे परः परस्य स्थानन्यपरत्वाच्च दत्तकाद्यभावे पौत्रादीनामधिकारः स्यादिति। अत एव निषेधादुपनीतपौत्रसत्त्वेप्यनुपनीतपुत्रस्यैवाधिकारः। ॐ। सर्वथाप्यनुपनीतोपि कुर्यादित्याह पृथ्वीचंद्रोदये सुमंतुः। श्राद्धं कुर्यादवश्यं तु प्रमीतपितृको द्विजः॥ व्रतस्थो वाव्रतस्थो वा एक एव भवेद्यदि। इति वृद्धमनुः। कुर्यादनुपनीतोपि श्राद्धमेको हि यः सुतः। पितृयज्ञाहुतिं पाणौ तु कुर्याद्ब्राह्मणास्य सः। मनुः। न ह्यस्मिन्युज्यते कर्म किंचिदामौंजिबंधनात्॥ नाभिव्याहारयेद्ब्रह्म स्वधानिनयनादृते। ब्रह्म वेदः। सुमंतुरपि। नाभिव्याहारयेद्ब्रह्म यावन्मौंजी निबध्यते। मंत्राननुपनीतोपि पठेद्वैकत्रौरसः। अयमंत्रपाठस्त्रिवर्षकृतचूडस्यैव। अनुपेतोपि कुर्वीत मंत्रवत्पितृमेधिकं। यद्यसौ कृतचूडः स्याद्यदि स्याच्च त्रिवत्सरः। इति सुमंतूक्तेः। यत्तु व्याघ्रः। कृतचूडस्तु कुर्वीत उदकं पिंडमेव च। स्वधाकारं प्रयुंजीत वेदोच्चारं न कारयेदिति। यच्च स्मृतिसंग्रहे। कृतचूडोनुपेतश्च पित्रोः श्राद्धं समाचरेत्। उदाहरेत्स्वधाकारं न तु वेदाक्षराण्यसाविति। तत्प्रथमवर्षचूडा

२२५ विषयमिति माधवमदनरत्नपृथ्वीचंद्राः। त्रिवर्षोर्ध्वं मंत्रवत्त्वस्य विकल्पः इति चंद्रिका बोपदेवश्च मदनरत्ने स्कांदे। यज्ञेषु
मंत्रवत्कर्म पत्नी कुर्याद्यथान्नृप। तथोर्ध्वदैहिकं कर्म कुर्यात्सा धर्मसंस्कृता। अशक्तौ तु कात्यायनः। असंस्कृतेन पत्न्या
च स्वग्निदानं समंत्रकं। कर्तव्यमितरत्सर्वं कारयेदन्यमेव हि। पुत्रश्च न जन्मतोधिकारी किंतु वर्षे त्रिरमिति कालादर्शः
चौलादाद्याह्निकादर्वाक्न कुर्यात्पैतृमेधिकं। मदनरत्नेस्तु मंतुरपि। पुत्रश्चोपनीतिमात्रेण संस्कुर्यादृणमोचनात्।
पितरं नाह्निकाच्चौलात्। पैतृमेधेन कर्मणा। एतच्चौरसस्यैव दत्तकादीनां तूपनीतानामेवाधिकारः इति काला
दर्शः। पृथ्वीचंद्रोदये स्कांदे। पित्रोरनुपनीतोपि विदध्यादौरसः सुतः। ऊर्ध्वदैहिकमन्ये तु संस्कृताः श्राद्धका
रिण इति। अन्यत्रापि दर्शमहालयादावनुपनीतस्याधिकारोस्माभिः पूर्वमुक्तः। प्रपौत्राभावे दत्तकादयो
द्वादश पुत्राः तदभावे भर्तुः पत्नी तस्याश्च सः। अपुत्रा शयनं भर्तुः पालयंती व्रते स्थिता। पत्न्येव दद्यात्तत्
पिंडं कृत्स्नमंशं लभेत चेति। वृद्धमनूक्तेः। भार्या पिंडं पतिर्दद्याद्भर्तुर्भार्या तथैव च। श्वश्र्वादेश्च स्नुषा चैव तदभा
वे सपिंडकाः इति। पुत्राभावे तु पत्नी स्यात्पत्न्यभावे सहोदरः इति च हेमाद्रौ शंखोक्तेः। दैवयाज्ञिकस्तु। कानीनगू एपः
ढसहजपुनर्भूतनयाश्च ये। पत्न्यभावधि कुर्युस्ते अप्रशस्ताः स्मृता हि ते। इति स्मृतिसंग्रहात् पत्न्यभावे कानीना

दयस्त्याह। पत्युरपि सपत्नीपुत्रे सति नाधिकारः। पितृपत्न्यः सर्वा मातरः इति सुमंतूक्तेः। विरुध्यादौरसः पुत्रोऽनन्या
कुर्ध्वदेहिकं। तदभावे सपत्नीजः क्षेत्रजाद्यास्तथाहृताः। तेषामभावे तु पतिस्तदभावे सपिंडकाः इति मदनरत्ने। का
त्यायनोक्तेश्च। बह्वीनामेकपत्नीनामेष एव विधिः स्मृतः। एका चेत्पुत्रिणी तासां सर्वासां पिंडदः स्मृतः इति बृहस्प
तिवचनाच्च। अपरार्केप्येवं। तेन पक्षद्विविवेकोऽयुक्तः। सत्यपि सपत्नीपुत्रे पत्युरेवाधिकार इति निरस्तं। यच्चात
त्रैव कात्यायनः। सभार्यायाः पतिर्दद्यादपुत्रायाश्चपि क्वचित्। यच्च विष्णुपुराणं। कुलद्वयेपि चोच्छिन्ने स्त्री
भिः कार्या क्रिया नृपेति। यच्च मार्कंडेयपुराणं। सर्वाभावे स्त्रियः कुर्युः स्वभर्तॄणाममंत्रकमिति। तदासुरादिवि
वाहोढाविषयं। धर्म्ये विवाहेहूढाया सा पत्नी परिकीर्तिता। क्रयक्रीता तु या नारी न सा पत्न्यभिधीयते। न सा
दैवे न सा पित्र्ये दासीं तां मुनयो विदुरिति माधवीये शातातपोक्तेः। यत्तु शुद्धिरत्नाकरः। शूलपाणिश्च। अपुत्रस्य
च या पुत्री सा च पिंडप्रदा भवेत्। तस्य पिंडान्दशैकं वा एकाहेनैव निःक्षिपेत्। इति जाबालोक्तेः। भर्तुर्धनहरा
पत्नी तां विना दुहिता स्मृता। अंगादंगात्संभवति पुत्रवद्दुहिता नृणामिति बृहस्पतिना दुहितुर्धनहारित्वोक्तेश्च
पुत्राभावे कन्या तदभावे सपत्नीपुत्र इत्याहतुः। तत्सर्वं विरोधात्। मातुर्दुहितरः शेषमृणात्ताभ्य ऋतेऽन्वयः इति

दुहितुर्मातृधनहारित्वेन पुत्रस्य तच्छ्राद्धानधिकार। पक्षे श्चोपेक्ष्यं वचनं भ्रातृपुत्राद्यभावविषयं। पत्न्यभावे ऽविभक्तस्य
सोदरः। पूर्वोक्तशंखवचनात्। विभक्तस्य तु दुहिता। धनहारित्वात् पूर्वोक्तजाबालिवचनाच्च। तत्राप्यूढानूढासमवा-
ये ऽनूढैव। दुहिता पुत्रवत्कुर्यान्मातापित्रोः सुतसत्कृता। आशौचमुदकं पिंडमेकोद्दिष्टं सदा तयोरिति तद्ब्रह्माण्डो-
क्तेः। तदभावे दौहित्रः। धनहारित्वात्। मातापित्रोरुपाध्यायाचार्ययोरूर्ध्वदैहिकं। कुर्वन्मातामहस्यापि व्रती न
भ्रश्यते व्रतादिति। चंद्रिकायां वृद्धमनूक्तेः। यथा व्रतस्थोऽपि सुतः पितुः कुर्यात्क्रियां नृप। उदकाद्यं महाबा-
हो दौहित्रो दुहिताऽर्हतीति अपरार्के भविष्योक्तेश्च। एतद्धनहारिणः। आवश्यकं नान्यस्येत्याह तत्रैव स्कंदः।
श्राद्धं मातामहानां तु अवश्यं धनहारिणा। दौहित्रेणार्थनिष्कृत्यै कर्तव्यं पूर्वमुत्तरोमिति। तेन दौहित्रोऽत्र पु-
त्रीकृत इति देवयाज्ञिकोक्तिः परास्ता। अत्र पत्नीदौहित्रसमवाये शंहरत्नात्पत्न्येव कुर्यात्। दौहित्रे भ्रातृपु-
त्रसत्त्वे ऽविभक्तस्य दौहित्रः। अविभागे भ्रातृपुत्रः। भ्रातृतत्सुतसत्त्वे कनिष्ठश्चेद्भ्रातैव। ज्येष्ठश्चेत्तत्सुतः। कुर्यादिति
दाक्षिणात्यग्रंथाः। हारलतादौ तु भ्रातुर्भ्राता स्वयं चक्रे तद्भार्या चेन्न विद्यते। तस्य भ्रातृसुतश्चक्रे यस्य नास्ति स- एकः
होदरः इति ब्राह्मोक्तेः। पत्नी कुर्यात्सुताभावे पत्न्यभावे सहोदर इति कौर्माच्च। ज्येष्ठभ्रातैव कुर्यान्न तत्सुतः। पुत्रकना

नुजस्य तथाग्रजः इति लक्ष्मीनिः भ्रातृसत्त्वविपर्यायश्च मन्तुः। सर्वेषामेकजातानामेकश्चेत्पुत्रवान् भवेत् सर्वास्तां-
स्तेन पुत्रेण पुत्रिणो मनुरब्रवीत्। इति तत्सोदराभावविषयमित्युक्तेः। एतेन पुत्रत्वातिदेशोयं। अतस्तस्मिन्स-
त्येकादशपुत्राः प्रतिनिधयो न कार्याः स एव पिण्डदोंशहारश्चेति। अत्रापीति वाचस्पतिमनुटीकाकल्पतरुर-
त्नाकरादयः परास्ताः। मस्करात्वे स्मृतिसंग्रहे। पुत्रकुर्यात्पितुः श्राद्धं पत्नी च तदसंनिधौ। धनहार्यप्यदौहि-
त्रस्ततो भ्राता च तत्सुतः। भ्रात्रोः सहोदरो भ्राता कुर्याद्यद्यस्ति तत्सुतः। ततस्त्वसोदरो भ्राता तदभावे च तत्सुतः।
इति भ्रातृपुत्राभावक्रमेण। पितृभ्रातृस्नुषास्वसृतत्सुतादयः। धनहारित्वात्। भगिनी तत्सुतयोर्विशेषमाह मद-
नरत्ने कात्यायनः। अनुजा अग्रजा वापि भ्रातुः कुर्वतसं।क्रियां। ततस्त्वसोदराः तद्वत्क्रमेणात पनस्तयोः। अप-
रार्के कार्ष्णाजिनिः। पुत्रः शिष्योपि वा पत्नी। पिता भ्राता। स्नुषा गुरुः। स्त्रीहारी धनहारीपि कुर्यात्पिंडोदकक्रियां। मार्कं-
डेयपुराणे। पुत्रो भ्राता च तत्सुतः पत्नी माता तथा पिता। नित्राभावे तु शिष्यस्तु कुर्वन्नौर्ध्वदेहिकं। तेन धनहारी
एतद्भिन्न इति कालादर्शः। अत्र पाठक्रमो न विवक्षितः। पूर्ववाक्ये पुत्रथय ततः शङ्खादिभिः श्रौतक्रमोक्तेः। अथस्नि-
ह्रायां अथवक्तस इति वता। पृथ्वीचंद्रोदये बृहन्मनुः। स्नुषा स्वस्त्रीयतत्सुतज्ञातिसंबंधिबांधवाः। पुत्राभावे तु कु-

बरन्सपिंडांते यथा। विधि। मार्कंडेयपुराणे। सत्राघुछिन्न बंधोश्च सखापि श्वशुरस्य च। जामाता स्नेहवत्कुर्यात् खिलं पे
तमेधिकं। चंद्रिकायां वृद्धशातातपः। मातुलो भागिनेयस्य स्वस्त्रीयो मातुलस्य च। श्वशुरस्य गुरोश्चैव सख्युर्मातामहस्य च। एतेषां चैव भार्याणां स्वसुर्मातुः पितुस्तथा॥ श्राद्धमेषां तु कर्तव्यमिति वेदविदो विदुः। शुद्धिविवेके ब्राह्मे।
दत्तानां वाप्यदत्तानां कन्यानां कुरुते पिता। चतुर्थेहनि तास्तेषां कुर्वन्तु समाहिताः। दत्ता वाग्दत्ताः। मातामहानां
दौहित्राः कुर्वंत्यहनि चापरे। तेपि तेषां प्रकुर्वंति द्वितीयेहनि सर्वदा। जामातुः श्वशुराश्चक्रुस्तेषां तेपि च संपताः॥
मित्राणां तदपत्यानां श्रोत्रियाणां गुरोस्तथा। भागिनेयसुतानां च सर्वेषां त्वपरेहनि। राज्ञोमृतिसपिंडे तु निरपत्येषु
पुरोहितः मंत्री वा तद्दशौचं तु पराचीत्वा करोति सः॥ अत्र द्वितीयाहादौ श्राद्धविधानमस्थिसंचयनपरं। कालादर्शे।
चं तु पराचीर्त्वा करोति सः। अत्र द्वितीयाहादौ श्राद्धविधानमस्थिसंचयनपरं। कालादर्शे। दाहादिमंत्रवत्पित्रोर्वि
दध्याद्दौरसः सुतः। तदभावे तु पौत्रश्च प्रपौत्रः पुत्रिकासुतः। दौहित्रो धनहारी च भ्राता तत्सुत एव च। पिता माता स्नु
षा चैव स्वसा तत्पुत्र एव च। सपिंडः सोदको मातुः सपिंडश्च सहोदकः। स्त्री चाशिष्यर्त्विगाचार्यो जामाता च सखापि च। एम:
उच्छिन्नबंधोरिच्छेन कारयेदवनीपतिः। गौतमः। पुत्राभावे सपिंडाः। मातृसपिंडाः। शिष्याश्च दद्युस्तदभावे ऋत्विगाचा

यौ। यत्तु चंद्रिकायां वृद्धशातातपः। प्रीत्या श्राद्धं प्रकर्त्तव्यं सर्वेषां वर्णलिंगिनामिति तत्सर्ववर्णविषयं। ब्राह्मणस्त्वन्य
वर्णानां न कुर्यात्कर्म किंचन। कामाल्लोभाद्भयान्मोहात्कृत्वा तज्जातितां व्रजेत। इति ब्राह्मोक्तेः। न ब्राह्मणेन कर्त्तव्यं शू
द्रस्याप्यौर्ध्वदैहिकं। शूद्रेण वा ब्राह्मणस्य विना पारसवात्क्वचित। इति पारस्करोक्तेश्च। पारसवः ऊढशूद्रापुत्रः। अत्रेदं
तत्वं सर्वत्र पुत्रादेः पूर्वस्याभावे पत्न्यादेरधिकार उक्तः। तत्राभावोः सन्निधिः नाशश्चोच्यते। अतएव पूर्वत्रा। असान्निधाने पू
र्वेषामित्युक्तं। तत्रासन्निधौ पत्न्यादेः सर्वत्राधिकारे प्राप्ते। प्रोषितावसितेपुत्रेः कालादृतिश्चिरादपि। एकादशाद्याः क्र
मशोऽन्येषस्य विधिवत्क्रियाः। ज्येष्ठेनैव यत्कृतः मिस्याद्यैर्देशांतरोपवादात्पुत्रनाश एव पत्न्यादेः सपिंडनादावधिकारः
असन्निधौ तत्सर्वमेव नोर्ध्वं अतोनधिकारिणा भ्रात्रादिना कृतमप्यकृतमेवेति। पुनरावर्त्तनीयं। मासिकाकर्षो
प्यावर्त्तनीयः। एकादशाहमासिकानि वावर्त्तेते। तत्त्यापमतापि कर्त्तव्यं सपिंडीकरणं पुनरिति वद्धावृत्तिविधानाभा
वादिति केचित्। तन्न। अस्य निर्मूलत्वात्। अतस्तदपि कनिष्ठकृतमावर्त्तते। वृद्धिश्रौतपिंडपितृयज्ञार्थं तत्कृतं नावर्त्त
ते। नासपिंड्याग्निमान्पुत्रः पितृयज्ञं समाचरेत। न पार्वणं नाभ्युदयिकं कुर्वन्नलभते फलमिति। वृद्धमनुनानिषेधनादिति
भ्राता वा भ्रातृपुत्रो वेत्यादिहारीतादिवचोभ्याः कनिष्ठादेरप्यधिकारात यथात्र ज्येष्ठकर्तृकत्वबाधः। सापिंडने तु बहुवक्त

२२८ व्यंतन्निर्णयेवक्ष्यामः। अधिकारिविशेषेणक्रियाव्यवस्थोक्ताविष्णुपुराणे। पूर्वाःक्रियामध्यमाश्चमासिमास्येकोद्दिष्टसंज्ञिताः
प्रेतेपितृत्वमापन्नेसपिंडीकरणादनु। क्रियंतेयाःक्रियापुत्रैःप्रोच्यंतेतानृपोत्तराः। पितृसपिंडैश्चसमानसलिलैस्तथा। त
त्संघातगतैश्चैवराज्ञावाधनहारिणा। पूर्वामध्याश्चकर्तव्याःपुत्राद्यैरेवचोत्तराः। दौहित्रैर्वानरश्रेष्ठकार्यास्तत्तनयैस्तथा
मृताहनिचकर्तव्याःस्त्रीणामप्युत्तराःक्रियाः। दौहित्रतत्सुतयोर्द्धनहारिणोरिदं। एवमन्यस्यधनहर्तुः। यश्चार्थहरःसपिंड
दायीस्यापक्षंबोक्तेः। प्रेतस्यप्रेतकार्याणिअकृत्वाधनहारकः। वर्णानांयद्वधेप्रोक्तंतद्व्रतंप्रयतश्चरेदितिपृथ्वीचंद्रोद
येव्याघ्रपादोक्तेः। मदनरत्नेस्कांदेपि। मलमेतन्मनुष्याणांद्रविणंतत्प्रकीर्त्तितमित्युक्त्वा। ऋषिभिस्तस्यनिर्दिष्टानिष्कृ
तिःपावनीपरा। आदेहपतनात्तस्यकुर्यात्पिंडोदकक्रियामित्युक्तेः। क्रियानिबंधेचंद्रोदयेबोधायनः। पित्राश्राद्धंनक
र्तव्यंपुत्राणांतुकथंचन। भ्रात्राचैवनकर्तव्यंभ्रातॄणांचकनीयसां। यदिस्नेहेनकुर्यात्तंसपिंडीकरणंविना। गयायां
तुविशेषेणज्यायानपिसमाचरेत्। अन्याभावेपित्रादिरपिकुर्यात्। उच्छिन्नबांधवंप्रेतंपिताभ्राताथवाग्रजः। जननीवा
पिसंकुर्यान्महदेनोन्यथाभवेदितिस्मृत्यंतरोक्तेः। ब्रह्मचारिणांतुशुद्धिविवेकेब्राह्मे। असमाप्तव्रतस्यापिकर्तव्यंब्रह्म एम
+ कात्यायनः। नचमातानचपिताकुर्यात्पुत्रस्यपैतृकं। नाग्रजश्चतथाभ्राताभ्रातॄणांतुकनीयसां। पृथ्वी +५ चारिणः

श्राद्धन्तु मातापितृभ्यामेर्न तु तेषां करोति सः। श्राद्धं मासिकाब्दिकादि सर्वं कार्यमित्यर्थः। न त्विति निषेधोन्यसत्वे। यत्तु। छंदो
गपरिशिष्टे। न त्यजेत्सूतके कर्म ब्रह्मचारी स्वयं क्वचित्। न दीक्षणात्परं यज्ञे न कृच्छ्रादितपश्चरन्। पितर्यपि मृते नैषां दो
षो भवति कर्हिचित्। आशौचं कर्मणान स्यात्र्यहं वा ब्रह्मचारिणां। यच्च याज्ञवल्क्यः। न ब्रह्मचारिणः कुर्युरुदकं पति
तास्तथेति। तदप्यन्यसत्वे। अन्याभावे तु ब्रह्मचारिणापि कार्यं। पूर्वोक्तमुद्धमनुवचनात्। आचार्यपित्रुपाध्यायान्
निर्हृत्यापि व्रती व्रती। सकटान्नं च नाश्नीयान्न च तैः सह संवसेदिति तेनैवोक्तेः। ब्रह्मचारिणः शवकर्मणो व्र
तान्निवृत्तिः। अन्यत्र मातापित्रापिगुरोरिति वसिष्ठोक्तेः। अत्राशौचमेकाहं वक्ष्यामः। प्रागुपनयनात्तु पयवर्षोत्तरं स
पिंडीकरणवर्ज्जं षोडशश्राद्धादि सर्वं कार्यमित्युक्तं देवजानीये। असंस्कृतानां भूम्यो पिंडं दद्यात्संस्कृतानां कु
शेष्विति प्रचेतोवचनाच्च। एतच्चाग्रे वक्ष्यामः। अविभक्तानां विशेषमाह पृथ्वीचंद्रोदये मरीचिः। बहवः स्युर्यदा
पुत्राः पितुरेकत्र वासिनः। सर्वेषां तु मतं कृत्वा ज्येष्ठेनैव तु यत्कृतं। द्रव्येण चाविभक्तेन सर्वैरेव कृतं भवेत्। ज्येष्ठस्य
कर्तृत्वेपि सर्वे फलभागिन इत्यर्थः। तेन ये ब्रह्मचर्यपरान्नवर्जनादयः कलितसंस्कारास्ते सर्वेषां भवंती। तिसिद्धौ सं
सृष्टिनामप्येवं। तुल्पसाता। विभक्तानां विशेषमाहोशनाः। न वश्राद्धं सपिंडत्वं श्राद्धान्यपि च षोडश। एकेनैव तु

२२९ कार्याणि सांविभक्तधनेष्वपि लघुहारीतः । सपिंडीकरणांतानि यानि श्राद्धानि षोडश । पृथग्नैव सुताः कुर्युः पृथग्द्रव्या अपि
क्वचित् । ऊर्ध्वं सपिंडीकरणात् सर्वे कुर्युः पृथक् पृथक् । मदनरत्ने । विभक्तास्तु पृथक्कुर्युः प्रतिसंवत्सरादिकं । एकेनैव वा
विभक्तेषु कृते सर्वैः कृतं कृतं । एतेनाह्निकादिष्वविभक्ता नाम नियम इति वदन् शूलपाणिः परास्तः । दत्तकस्तु जनन
कस्य पुत्राद्यभावे दद्यान्न तत्सत्त्वे । गोत्ररिक्थे जनयितुर्न भजेद्दत्रिमः सुतः । गोत्ररिक्थानुगः पिंडो व्यपैति दत्तकः स्वधे
ति मनूक्तेः ॥ इदं जनकस्य पुत्रसत्त्वविषयं । एतच्च प्रवरमंजर्यां कात्यायनलौगाक्षिभ्यां स्पष्टमुक्तं । अथ ये दत्तक्रीतकृ
त्रिमपुत्रिकापुत्राः परपरिग्रहेणानार्षेया जातास्ते द्व्यामुष्यायणा भवंति । यथा शौंगशैशिरीणां यानि चान्या
न्येवं समुत्पन्नानि कुलानि भवंतीत्यादिना द्वयोः पित्रोः प्रवरानुक्तोक्तं । अथ यद्येषां स्वासु भार्यास्वपत्यं न स्याद्रि
क्थं हरेयुः पिंडं चैभ्यः । द्विपुरुषं दद्युः यद्युभयोर्न स्यादुभाभ्यामेव दद्युरेकस्मिन् श्राद्धे पृथगुद्दिश्यैकपिंडे द्वावनुकी
र्तयेत् परिगृहीतारं चोत्पादयितारं चातृतीयात्पुरुषादिति हेमाद्रौ कार्ष्णाजिनिः । यावंतः पितृवर्ग्योः स्युस्तावद्भिर्दत्त एमः
कादयः प्रेतानां योजनं कुर्युः स्वकीयैः पितृभिः सह । द्वाभ्यां तथा यतस्पुत्राः पौत्रास्ते केन तत्समं चतुर्थे पुरुषे छेद
स्तस्माद्देयास्त्रिपूरुषी । साधारणेषु कालेषु विशेषो नास्ति वीरिणां ॥ अस्यार्थमाह हेमाद्रिः । दत्तकादयः जनके पालके

योःकुलेमृतानांस्ववर्गैःसपिंडनंकुर्युः।दत्तकानांपुत्रास्तत्पितुर्दत्तकस्यपितृभ्यांजनकपालकाभ्यांस्वपितामहाभ्यांसपि
डनंकुर्युः।तेषांपौत्राःस्वपितरंदत्तकेनपितामहेनतज्जनकेनसपिंडयेयुः।चतुर्थोपितृकुलषष्ठएवा।तेषांप्रपौत्रस्तद्दत्तक
स्यप्रपितामहस्यपालककुलस्थंचतुर्थंयोजयेन्नवा।छद्दरष्ठात्दर्शमहालयादौतद्द्वयोः।पित्रोःपितामहयोः।प्रपितामह
योरयमितिपरिभाष्ययोर्दत्तस्तस्येदंद्वयोःपित्रोःश्राद्धं।यस्त्वपरिभाष्यदत्तःसतुग्रहीतुरेव।सपालकायैवदद्यादित्याहुः।अत्र
त्रमूलंततएवप्रष्टव्याःकस्तुतस्तुतस्तुजनकस्यपुत्रपत्न्याद्यभावेदत्तकोद्वयोर्दद्यादन्यथापालकायैव।प्रागुक्तकात्या
यनवचनात्।मानवीयमप्येतद्विषयमेव।गोत्रंतुश्राद्धंपालकस्यैव।विवाहादौतूभयोरितिमत्कृतप्रवरदर्पणेज्ञेयं।प
स्तुमूल्यक्रीतायांपरभार्यायांदास्यांचोत्पन्नःसबीजिनेएवदद्यात्।मूल्यंविनास्वयमुपनतायांतुक्षेत्रिणएव।एतदुक्तं
पृथ्वीचंद्रोदयेकौर्मे।अनियोगोत्सुतोयस्तुशुल्कतोजायंतेतौविहाप्रदद्या।बीजिनेपिंडंक्षेत्रिणोतुततोन्यथेति।क्षेत्र
जादेर्विशेषस्तुकलौतदभावान्नोच्यते।इतिदिक्।जारजातानांविशेषमाहापरार्केनारदः।जायंतेत्वनियुक्तायामेके
नबहुभिस्तथा।अरिक्थभाजस्तेसर्वेबीजिनामेवतेसुताः।दद्युस्तेबीजिनेपिंडंमाताचेच्छुल्कतोहृता।अशुल्कोपहृ
तायांतुपिंडदावोढुरेवते॥धर्मार्थश्राद्धकरणेफलमाह।चंद्रिकायांशातातपः।प्रीत्याश्राद्धंतुकर्तव्यंसर्वेषांवर्ण

२३० लिंगिनां। एवं कुर्वन्नरः सम्यक महतीं श्रियमाप्नुयात्। गयायामपि तत्रैव। ब्रह्मकैवर्त्ते। आत्मजो वाथ वान्यो पि गयाशीर्षे यदा
तदा। यन्नाम्ना पातयेत्पिंडं तं नयेद्ब्रह्म शाश्वतं। एतच्च पराफल्गुभूमार्थिना हि। द्विर्वा। क्रियते तदा प्रेतशिलाश्राद्धवर्ज्जं कुर्या
त्तस्य प्रेतत्वविमोक्षार्थत्वात्तस्य च ज्ञातत्वादिति केचित्। वस्तुतस्तु तन्यामिश्राद्धवदत्रापि सर्वं कार्यं। सांगे धिकारादि
ति युक्तं प्रतीमः। सन्यस्तपित्रादिस्तु पितुः पित्रादिभ्यः सर्वश्राद्धेषु दद्यादित्युक्तं त्वाकांवस्यते च जावयित्तक श्राद्धे। अ
त्र स्त्रीशूद्राणां श्राद्धं मंत्रवर्ज्जितं तूष्णींभवति। स्त्रीणाममंत्रकं श्राद्धं तथा शूद्रास्तु तस्य च। प्राग्द्विजाश्च व्रतादेशात्ते च कुर्यु
स्तथैव तादिति हेमाद्रौ मरीचिवचनात्। अयमेव विधिः प्रोक्तः शूद्राणां मंत्रवर्ज्जितः। अमंत्रस्य तु शूद्रस्य विप्रो मंत्र
ण गृह्यते। इति ब्राह्मोक्तेश्च। गृह्यते इत्संबध्यते। अस्य श्राद्धस्य प्रकरणपाठे पि परिभाषात्वान्न प्रकरणेन संकोच इत्युक्तः।
तेन शूद्रस्य स्नानदानादावपि विप्रेण मंत्रपाठः कार्यः। अमंत्रस्येति विशेषणात्स्त्रियामपीति शूलपाणिः। यत्तु
तेनैवोक्तं मंत्रवत्तन्यानियमादृष्टसिद्धिस्तु नमस्कारेण। अनुमतो स्य नमस्कारो मंत्र इति गौतमोक्तेरिति तन्नादृष्टद्वा एषः
रतत्त्रात्रिर्दस्वातंत्र्येणान्यथा वोते दृ ते प्यवघाते तन्यादृष्टार्थसो पि क्रियते यात्केंचिदेततात्र त्रकेचित्। वैदिक
मंत्रो विप्रस्य पौराणः शूद्रस्य पठनीयः। न हि वेदे ष्वधिकारः कश्चिच्छूद्रस्य विद्यते। पुराणे ष्वधिकारो मे ब्राह्मणैः दर्शितो।

रिहेतितत्रैवपाद्मोक्तेरित्याहुः।गौडा अप्येवं।तन्न।नाध्येतव्यमिदं शास्त्रं वृषलस्य तु सन्निधाविति।कौर्मे पुराणे निषेधे वेदस्य दूरापास्तत्वात्।अध्येतव्यं ब्राह्मणेन वैश्येन क्षत्रियेण च।श्रोतव्यमेव शूद्रेण नाध्येतव्यं कदाचन।श्रौतस्मार्ते च वैधर्मप्रोक्तमस्मिन्नृपोत्तम।तस्माच्छूद्रैर्विना विप्रं न श्रोतव्यं कदाचनेति।तत्रैव पुराणाधिकारो भविष्योक्तेश्च।एतेन नाध्येतव्यमिति निषेधो मंत्रेतरपुराणपर इति श्रीदत्तादिमतमपास्तं।तेन पौराणमंत्राणामेव विप्रेण पाठो न वैदिकानामिति सिद्धं।द्विजस्त्रियस्तु संकल्पमात्रं स्वयं कृत्वा वैदिकमंत्रयुक्तं सर्वं ब्राह्मणद्वारा कारयेयुरिति प्रयोगपारिजातः।अत एव स्त्रीणामित्यकृतविवाहस्त्रीपरमिति हेमाद्रिराह।अनुपनीतं वैदिकमंत्रयुक्तं सर्वं स्वयमेव कुर्यादित्युक्तं प्राक्।यत्र।प्राग्द्विजश्च व्रतादेशादिति तदशक्तविषयं अचूडविषयं चेति दिक्।शूद्रस्य तु सदामश्राद्धमेव।सदा चैव तु शूद्राणामामश्राद्धं विधीयते।इति सुमंतूक्तेः।पृथ्वीचंद्रोदये मात्स्येपि।एवं शूद्रोपि सामान्यं तु द्विश्राद्धं च सर्वदा।नमस्कारेण मंत्रेण कुर्यादामान्नवत्सदा।तत्रैव वृद्धपराशरः।आमान्नेन तु शूद्रस्य तूष्णीं तु द्विजपूजनं।कृत्वा श्राद्धं तु निर्वाप्य सजातीन्नाशयेद्यथा।स एव।आमं शूद्रस्य पक्वान्नं पक्वमुच्छिष्टमुच्यते।हेमाद्रौ भविष्ये।धर्मेप्सवस्तु धर्मज्ञा यदि शूद्राः प्रकुर्वते।अग्नौकरणमंत्रश्च न नमस्कारो विधीयते।आवाहनादिकर्तव्यं

२३१ यथा शूद्रेणातच्छृणु देवानां देवताभ्यस्तु पितृणां नामगोत्रतः॥ पित्रादीन्निर्वपेद्धीमान्नामतो गोत्रतस्तथा। शूद्राणां गो-
त्राभावेपि काश्यपगोत्रं ज्ञेयं। तस्मादाहुः सर्वाः प्रजाः काश्यप्य इति श्रुतेः॥ गोत्रनाशे तु काश्यप इति व्याघ्रपादोक्तेश्च
ति हेमाद्रिः। एवमन्यत्र गोत्राज्ञाने। एवं तर्पणादिषु ज्ञेयं। तत्रैव भविष्ये। शूद्रस्तु गृह्यपाके न तु पिंडान्निर्वपेत्तथा। सक्तुमू
लं फलं तस्य पायसं वा भवेत्स्मृतं गोतमः। अनुमतोस्य नमस्कारो मंत्र इति देवताभ्यः॥ पितृभ्यश्चेत्यर्थं नमस्कारमंत्र इति
केचित्। विज्ञानेश्वरोप्येवमाह। हेमाद्रिस्तु शूद्रोप्यमंत्रवत्कुर्यादनेन विधिना बुध इति मात्स्ये निषेधान्नामगोत्रेणेत्या
ह। पृथ्वीचंद्रोदये स्कांदे। राजकार्ये नियुक्तस्य बंधनिग्रहवर्तिनः। व्यसनेषु नः। व्यसनेषु च सर्वेषु श्राद्धं विप्रेण का
रयेत्। पत्तु भारते राजधर्मेषु। यवनाः किराता गांधाराश्चीनाः शबरबर्बराः। शकास्तुषाराः कंकाश्च पह्लवाश्चां
ध्रमद्रकाः। इत्युक्ताः। ब्रह्मक्षत्रप्रसूताश्च वैश्याः शूद्राश्च मानवाः। कथं धर्मांश्चरिष्यंति सर्वे विषयवासिनः॥ इति चोक्त्वा
वेदधर्मक्रियाश्चैव तेषां धर्मो विधीयते। पितृयज्ञास्तथा कूपाः प्रपाश्च शयनानि च। दानानि च यथाकालं द्विजेभ्यो वि
सृजेत्सदा तथा। दक्षिणा सर्वयज्ञानां दातव्या भूतिमिच्छता। पाकयज्ञा महार्हाश्च कर्तव्याः सर्वदस्युभिः। इति म्लेच्छा
दीनां श्राद्धविधानं तदपि सजातीयद्रव्यदानादिपरं। नतु श्राद्धपरमिति॥ इति श्रीजगद्गुरुनारायणभट्टसूरिसूनुराम

एम:

सूरिभट्टात्मजकमलाकरभट्टकृते निर्णयसिंधौ श्राधिकारिनिर्णयः॥ अथ पितरः। हेमाद्रौ मात्स्यदेवलौ॥ नामगोत्रं
पितृणां तु प्रापकं हव्यकव्ययोः। अग्निष्वात्तादयस्तेषामाधिपत्ये व्यवस्थिताः। नाममंत्रास्तदादेशा भवांतरगतानपि
प्राणिनः प्रीणयंत्येव तदाहारत्वमागतान्। देवो यदि पिता जातः शुभकर्मानुयोगतः। तस्यान्नममृतं भूत्वा देवत्वेप्य
नुगच्छति। गांधर्वे भोग्यरूपेण पशुत्वे च तृणं भवेत्। श्राद्धान्नं वायुरूपेण नागत्वेप्युपतिष्ठति। पानं भवति यक्षत्वे राक्षस
त्वे तथामिषं। दनुजत्वे तथा मद्यं प्रेतत्वे रुधिरोदकं। मनुष्यत्वेन्नपानादि नानाभोगवरं भवेत्। अथ पित्रादिशब्दैर्जन
कादीनामेव देवतात्वमुच्यते न वस्वादीनां। अमावेतन्न इति यजमानस्य पित्रे इति शेपथ्यश्रुतेः। यस्य पिता प्रेतः
स्यात्स पित्रे पिंडं निधायेति विष्ण्वादिस्मृतेश्च यत्तु मनुदेवलौ। वसवः पितरो ज्ञेयाः रुद्राज्ञेयाः पितामहाः। प्रपितामहा
स्तथादित्याः श्रुतिरेषा सनातनी। यच्च याज्ञवल्क्यः। वसुरुद्रादितिसुताः पितरः श्राद्धदेवता इति। तदभेदध्यानार्थं
यानि तु हेमाद्रौ नंदिपुराणे। विष्णुः पितास्य जगतो दिव्यो यज्ञः स एव च। ब्रह्मा पितामहो ज्ञेयो ह्यहं च प्रपितामहः इति
यच्च भविष्ये। अनिरुद्धः स्वयं ज्ञेयः प्रद्युम्नश्च पितामहः। संकर्षणस्तु जनको वासुदेवस्तु तत्पिता। स्वयं कर्त्ता। यत्तु
तत्रैव। यथ्यामो वरुणो ज्ञेयः प्राजापत्यस्तथापरः। तृतीयोग्निः स्मृतः पिंडे एषा पिंडविधिः स्मृतः। यच्चादित्यपुराणे।

मासाश्च पितरो ज्ञेया ऋतवश्च पितामहाः॥ संवत्सरः प्रजानां च वसुर्मे प्रपितामहः। यच्च नंदिपुराणे। अग्निष्वात्ता ब्राह्मणानां पित
रः॥ परिकीर्त्तिताः। राज्ञां बर्हिषदो नाम विशां काव्याः प्रकीर्त्तिताः। सुकालिनश्शूद्राणां व्यामाम्लेच्छांत्यजातिषु इति। अत्रा
वाहनादिषु पित्रादयः समुच्चयन विकल्पेन वा यथाचारं तत्तद्देवतारूपेण वाच्या इति हेमाद्र्यादयः। हेमाद्रौ ब्राह्मे। पार्वणं
कुरुते यस्तु केवलं पितृहेतुकं। मातामहस्य न कुरुते पितृहा स प्रजायते। धौम्यः। पितरो यत्र पूज्यंते तत्र मातामहा अपि।
अविशेषेण कर्त्तव्यं विशेषान्नरकं व्रजेत्। अस्यापवादमाह कात्यायनः। कर्षूसमन्वितं मुक्त्वा तथाद्यश्राद्धं षोडशं।
प्रत्याब्दिकं च शेषेषु पिंडाः स्युः षडिति स्थितिः। दर्शादौ सपत्नीकानामेव देवतात्वं स्वेन भर्त्रा समं श्राद्धं माता भुंक्ते सु
धासमं। पितामही च स्वेनैव तथैव प्रपितामहीति तत्रैवोक्तेः। चंद्रिकायां चतुर्विंशतिमते। ज्ञयाहेवर्त्ते पित्र्यैकं स्त्रीणां ना
स्ति पृथक् क्रिया। केचिदिच्छंति नारीणां पृथक् श्राद्धं महर्षयः। अन्वष्टक्ये तु वृद्धौ च गयायां च क्षयेहनि। अत्र मातुः पृथक्
श्राद्धमन्यत्र पतिभिः सहेति कात्यायनोक्तेश्च। अस्य निर्मूलतां वदंतो गौडास्त्वज्ञा एव। अत्र मातर इत्यध्याहारः। अन्यथा एमः
सपतिकायै मात्रे इति प्रयोगापत्तेः। अत्र मातृशब्दो जनन्यामेव मुख्यः तेन सपत्नमातृभ्यो न दद्यात्। एवं पितामह्या
दिशब्दोऽपि पितृजनन्यादय एवोच्यंते। इति तत्सपत्नीभ्यो न देयमिति हेमाद्रिः। कारुण्येन नु महालयादौ देयमिति स एव॥

अथविश्वेदेवाः।हेमाद्रौशंखबृहस्पती।इष्टिश्राद्धेक्रतुदक्षौसत्यानांदीमुखेवसू।नैमित्तिकेकामकालौकाम्येचधुरिलो
चनौ।पुरूरवश्चार्द्रवश्चपार्वणेसमुदाहृतौ।तत्रैव।उत्पत्तिंनामचैतेषांनविदुर्येद्विजातयः।अयमुच्चारणीयस्तैःश्लो
कः।श्रद्धासमन्वितैः।आगच्छंतुमहाभागाविश्वेदेवामहाबलाः।येयत्रविहिताःश्राद्धेसावधानाभवंतुते।इति।इष्टिश्रा
द्धंप्रतिरुचिरित्युक्तंकल्पतरौ।आधानादिकर्मांगमित्यन्ये।नैमित्तिकमेकोद्दिष्टं।एकोद्दिष्टंतुयच्छ्राद्धंतन्नैमित्तिकमु
च्यतेइतिभविष्योक्तेः।यद्यपिएकोद्दिष्टंदैवहीनमितितत्रविश्वेदेवनिषेधस्तथापिनवश्राद्धेद्वादशमासिकेकामका
लौज्ञेयौ।नवश्राद्धंदशाहानिनवमिश्रंतुषड्ऋतून्।अतःपरंपुराणंचत्रिविधंश्राद्धमुच्यते।यस्मिन्नेवपुराणेवाविश्वेदेवा
नलेभिरे।आसुरंतद्भवेच्छ्राद्धंवृषलैर्मंत्रवर्जितं।इतिबह्वृचपरिशिष्टात्।एतच्चबह्वृचानामेव।तेषामेवोक्तेः।अन्येषां
तुनात्रविश्वेदेवाइतिकात्यायनोक्तेस्तन्निषेधएवेतिपृथ्वीचंद्रोदयः।अन्येतुनैमित्तिकंसपिंडीकरणमाहुः।भवि
ष्येयद्यप्येकोद्दिष्टंतच्छ्राद्धेनोक्तं।तथापितरप्यस्यैवंकर्त्तव्यमयुग्मान्भोजयेद्द्विजान्।इतितत्रैववैश्वदेवनिषेधात्।
यद्यपिसपिंडीकरणेंऽशतएकोद्दिष्टंतथापिसपिंडीकरणंश्राद्धंदैवपूर्वंनियोजयेदितिवचनात्तत्परत्वे।हेमाद्रावा
दित्यपुराणे।विश्वेदेवौक्रतुदक्षौसर्वास्विष्टिषुकीर्तितौ।नित्यंनांदीमुखेश्राद्धेवसुसत्यौचपैतृकेनवान्नलंभनेदेवौ

कालकामौ सदेवहि। अपि कन्यागते सूर्ये काम्ये च धुरिलोचनौ। पुरूरवार्द्रवौ चैव विश्वेदेवौ च पार्वणे। क्वचिद्विश्वेदेवापवा
दं माह हेमाद्रौ शातातपः। नित्यश्राद्धमदैवं स्यादेकोद्दिष्टं तथैव च। मातृश्राद्धं च युग्मैः स्याद्दैवं प्राङ्मुखैः पृथक्। योजये
द्दैवपूर्वाणि श्राद्धान्यन्यानि यत्नतः। नान्दीश्राद्धे भिन्नप्रयोगे पक्षे मातृश्राद्धमदैवमिति हेमाद्रिः। अथ विप्राः। ते चोत्तम
मध्यमाधमभेदेन त्रिविधाः। अत्र मदीयाः श्लोकाः। त्रिणाचिकेतस्त्रिमधुश्च बह्वृचोप्याथर्वणो याजुषसामगौ चाषडं
गविच्च त्रिसुपर्णो वेदाप्यथर्वशीर्षाध्ययने रतश्च। शतापुवेदार्थविदोप्रवक्ता स्याद्ब्रह्मचारी च तथाग्निचिच्च सीदहत्रिः
सत्यवाक् पूरुषैः स्वैर्मातापित्रोः पञ्चभिः ख्यातवंशः। पत्नीपुत्रो ज्येष्ठसामा पुराणवेत्ता पुत्री चेतिहासश्च भिक्षुः। योगी भि
क्षुः सामगो ब्रह्मवेत्ता पंचाग्निश्च श्रोत्रियस्तत्सुतो वा। शंभुध्यायी श्रीशपादाब्जसेवी पांक्त्यश्चैते तूत्तमाः संप्रदिष्टाः॥
भिक्षुयोगी पांथ एते त्वलभ्या भाव्याध्व श्राद्धे तत्राभोजनीयाः। श्राद्धे विप्रेषूपविष्टेषु पश्चात्संप्राप्तश्चेद्भिक्षुः पंक्तौ तु
भोज्याः। एतन्मूलं हेमाद्रौ ज्ञेयं। तत्रैव नारदः। यो वै यतीननादृत्य भोजयेदितरान्द्विजान्। विजानन्वसतो ग्रामे कव्यं
तद्याति राक्षसान्। दीपकलिकायां दक्षः। विना मांसेन मधुना विना दक्षिणयाशिषा। परिपूर्णं भवेच्छ्राद्धं यतिषु श्राद्ध
भोजिषु। एतच्च ज्ञानिविषयं। त्रिणाचिकेतत्रिसुपर्णौ यजुर्वेदैकदेशौ तद्व्रतेन तदध्यायिनौ। यस्य समस्तपूर्वे सोमपाः

मसुपर्णो इति बोपदेवः। त्रिमधुः ऋग्वेदैकदेशः तदध्यायी। केचित्त्रिनाचिकेत चयनं त्रिः कृतवानित्यर्थमाहुस्तद्धेमा
द्रिविरुद्धं। हेमाद्रौ गौतमः। पुत्रभ्योद्दानं प्रथमं पितृवयस इत्येके। मत्स्यमन्त्रौ। यश्च व्याकुरुते वाचं यश्च मीमांसते ध्वरं। मा
मस्वरा विधिज्ञश्च पंक्तिपावनपावनाः। कौर्मे। असमानप्रवरको न्यसगोत्रस्तथैव च। असंबंधी च विज्ञेया ब्राह्मणाः
श्राद्धसिद्धये। गारुडे। श्राद्धेषु विनियोज्याः स्युस्ते ब्राह्मणा ब्रह्मवित्तमाः। ये योनिगोत्रमंत्रांतेवासिसंबंधवर्जिताः। म
नुः। न मित्रं भोजयेच्छ्राद्धे धनैः कार्योस्य संग्रहः। नारिं न मित्रं यं विद्यात्तं श्राद्धे निमंत्रयेत। द्वयोर्भ्रात्रोः श्राद्धेषु परि
वर्जयेत। इति श्राद्धदीपिकायां। जातूकर्ण्योक्तः। अथ मध्यमः। हेमाद्रौ कौर्मगार्ग्यौ। नैकगोत्रे हवि अभावत्व
गोत्राणामेकगोत्रांश्च भोजयेत। अत्र केचित्स्वशाखीयान्मुख्यानाहुः। पठंति च। निमंत्रयीत पूर्वेद्युः स्वशाखीया
न्द्विजोत्तमान्। स्वशाखीयद्विजाभावे द्विजानन्यान्निमंत्रयेत। इदं निर्मूलत्वाद्धेमाद्रिणा दूषितत्वाच्चोपेक्ष्यं। अत्र माम
कश्लोकः। मातामहो मातुलभागिनेयदौहित्रजामातृगुरुस्वशिष्याः। ऋत्विक्कन्याऽस्पत्युसुशैलबंधुश्यालानुगुण्याढ्या
स्त्वनुकल्पभूताः। बंधवो मातृष्वसृपितृष्वसृमातुलपुत्राः इति बोपदेवः। अत्र मूलं हेमाद्रौ ज्ञेयं। सगुणावलीयाद्य
तिक्रमे दोष एव। सप्तपूर्वान्सप्तपरान्पुरुषानात्मना सह। अतिक्रम्य द्विजानेतान्नरके पातयेत्वग। संबंधिनस्तथा

सर्वान्दौहित्रं विट्पतिं तथा॥ भागिनेयं विशेषेण तथा बंधुं खगाधिपेति मदनरत्ने भविष्योक्तेः॥ अपरार्केऽत्रिः॥ षड्भ्यस्तु पुरुषेभ्योर्वाग॥ आह्वेपास्तगोत्रिणः॥ षड्भ्यस्तु परतो भोज्याः श्रोह्वेस्पुगोत्रजा अपि॥ एतच्च ब्राह्मणालाभे॥ अपि शङ्खात्॥ असंभवे हेमाद्रौ गौतमः॥ शिष्यांश्चैके सगोत्रांश्च भोजयेदूर्ध्वं त्रिभ्यो गुणवतः॥ आपस्तंबः॥ ब्राह्मणान्भोजयेद्योनिगोत्रमंत्रांतेवास्यसंबंधान्गुणहान्यां तु परेषां समुदितः सोदर्योप्येभोजयितव्य एतेनांतेवासिनो व्याख्याता इति॥ अत्र विशेषमाहात्रिः॥ पितापितामहो भ्राता पुत्रो वाथ सपिंडकः॥ न परस्परमर्घ्याः स्युर्न श्राद्धे ऋत्विजस्तथा॥ ज्ञालिकपुत्राद योप्येते सकुल्या ब्राह्मणास्ततः॥ वैश्वदेवे नियोक्तव्या यद्येते गुणवत्तराः॥ सगोत्रा न नियोक्तव्याः पित्र्ये चैव विशेषतः॥ अथ वर्ज्याः॥ अत्र मामकाः श्लोकाः॥ वर्ज्यान्प्रवक्ष्ये त्वथ योगिवैरिहीनाधिकांगान्नकितवान्कृतघ्नान्॥ नग्नत्रशास्त्रेणा च नावमानान्भैषज्यवृत्त्यापि च शास्त्रभस्मा नासंगीतकापण्यकुशीदवृत्त्या वेदक्रयेणापि कविलवृत्त्या॥ देवार्चनेनापि च जीवमानान्स्वाध्यायपराणांत्रिस्ततोस्मकाणान्॥ दुर्वालखल्वाटकुनख्यधर्मिनटांश्च पौनर्भवकृष्णदंतान्॥ अगारदाही गरदः समुद्रयायी चक्रंडाश्यश्च कूटकारी॥ बालांश्च योध्यापयते स्वपुत्राद्वा ह्रविघस्वघकुंडगोलौ॥ अग्रेदिधिषाः पतिरत्र कर्ता सोमक्रयी तैलिककेकराक्षौ॥ मुद्राचार्यः पशिशालांपोषकश्च स्रोतोभेत्ताश्रुतं संएपकश्च॥

एमः

मेषाणांचामाहिषाणांचपुष्याखीयस्त्रीषुप्रहितैर्यश्वजारैः।जीवत्यपध्येतुश्चदत्त्वानुयोगाद्द्रव्यप्राप्त्येवेदमुद्घाटयंतः॥
ग्रामयाजिपशुकेशविक्रयिस्तेनशिल्पिपितृवादकारकान्।अर्थकामरतशूद्रयाजकश्मश्रुहीनजटिमुंडिनिर्घृणान्।
यस्यचैवगृहिणीरजस्वलासार्धपाकरतशापहायकान्।क्लीबकुष्ठितिहिलोहितेक्षणान्कुब्जवामनमृषाभिशापि
नः।पुत्रहीनमथकूटसाक्षिणांप्रातिहारिकमयाज्ययाजकं।स्वात्मदारपरिवेत्तृपरिवेत्तृयाजकस्तेनहिंस्रकमुखान्वि
वर्ज्जयेत्।अत्रमूलेहेमाद्रौपृथ्वीचंद्रोदयेचज्ञेयं।भारतेदानधर्मेषुश्राद्धेवर्ज्यविप्राधिकारे॥केतवोम्रूगाहायस्मी
पशुपालोनिराकृतिः।ग्रामप्रेष्योवार्द्धुषिकोगायकःसर्वविक्रयी।सामुद्रिकोराजभृत्यस्तैलिकःकूटकारकः।पित्रावि
वदमानश्चयस्यचोपपतिर्गृहे।अभिशस्तस्तथास्तेन।शिल्पंयश्चोपजीवति।पर्वकारश्चसूचीचमित्रध्रुक्पारदारि
कः।अव्रतानामुपाध्यायःकांडपृष्ठस्तथैवच।श्वभिश्चयःपरिक्रामेद्यःशुनादष्टएवच।परिवित्तिस्तथास्तेनोदुश्चर्मा
गुरुतल्पगः।कुशीलवोदेवलकोनक्षत्रैर्यश्चजीवति।ईदृशाब्राह्मणाज्ञेयाअपांक्तेयायुधिष्ठिर॥ह्मणकर्त्रीचयोरा
जन्पश्चवार्द्धुषिकोनरः।अन्येपिहेमाद्रौमात्स्ये।त्रिपंकून्बर्बरानंध्रान्चीनद्रविणकोंकणान्।कर्णाटकांस्त
थाभीरान्कालिंगांश्चविवर्ज्जयेत्॥तत्रैवसोरपुराणे।अंगवंगकलिंगांश्चसोराष्ट्रान्गुर्ज्जरांस्तथा।आभीरान्कौ

कणांश्चैवद्राविडानरस्त्रिणायनान्। आवंत्यान्मागधांश्चैवब्राह्मणांस्त्कानविवर्ज्जयेत। चंद्रिकायां यमः। काणाः कुब्जाश्च षंढाश्च कृत
घ्नागुरुतल्पगाः। मानकूटाह्नकविवर्ज्जयेत। चंद्रिकायां यमः। काणाः स्त्राकूटाः शिल्पिनोग्रामयाजकाः। राजभृत्यांधबधिरमूक
खल्वाटपंगवः। वणिजोमधुहर्त्तारोगारहाक्नदाहकाः। समयानांचभेत्तारः प्रदानेयेनिवारकाः। प्रवृज्यापतिहृन्ताश्चहृथाप्रव्र
जिताश्चये। यश्चप्रव्रजिताज्जातः प्रव्रत्याकसितश्चयः। अषकीसमचवीरघ्नोगुरुघ्नः पितृदूषकः। श्राद्धकाशिकायांकात्या
यनः। द्विर्नग्नः क्लीबकुश्चमीभुक्तोतिकपिलंतथा॥ छिन्नोशृश्चिन्नलिंगश्चनैवकेतनमर्हति। द्विर्नग्नः। पित्रोर्विशेत्रिपुरुषं
विच्छिन्नवेदाग्निः हेमाद्रौमरीचिः। अविद्धकर्णः कुष्ठश्चलंबकर्णस्तथैवच। वर्ज्जनीयाः प्रयत्नेनब्राह्मणाः श्राद्धकर्मणि॥
ब्राह्मे। मूकश्चपूतिनासश्चछिन्नांगश्चाधिकांगुलिः। गलरोगीचांडमालीस्फुटितांगश्चसर्व्वदः। षंढतुंबरमंदाश्चश्राद्धेष
तान्विवर्ज्जयेत्। लंबकर्णश्चाहतत्रैवागो भिन्नमहतुमूलादधः कर्णौलंबौतुपाकीर्त्तितौ। अंगुलोभ्यंगुलोश्चत्याविति शा
तातपोब्रवीत्। चंद्रिकायां यमः। अंगुल्यातीतकर्म्मस्वभुजते पितरोनतु। षंढश्चात्रचंद्रिकोक्तसप्तविधोज्ञातव्यः। यथा। षंढ
कोवातजः षंढः पंडः क्लीबोनपुंसकः। कोलश्चवृत्तिसश्चैवक्लीबभेदाः प्रकीर्त्तिताः। पराशरमाधवीयेतु चतुर्द्दशविधउ एमः
क्तः। तेषांस्वरूपाणितत्रैवद्रष्टव्यानि। चंद्रिकायांशातातपः। अग्निष्टोमादिभिर्यज्ञैर्येयजंतेस्वल्पदक्षिणैः। तेषामन्नंनभोक्त

व्यमपांक्त्यास्तेप्रकीर्त्तिताः॥ एतच्चशक्तौसत्यांच्चपणर्कैभाणतो। अव्रतीकितवःस्तेनःप्राणिविक्रयकोपिवापश्चाच्चेत्पी
तवान्सोमंसोपिकेतनमर्हति। आहृदीपकलिकायांयमः। अपत्नीकश्चवर्ज्यःस्यात्तपत्नीकोप्यनग्निकः। तत्रैवाश्वलाय
नः। प्रतिमाविक्रयंयोवैकरोतिपतितस्तुसः। जीवनार्थंपरास्त्रीभिर्धृत्वातीर्थंप्रयातियः। मातापित्रोर्विनासोपिपतितः
परिकीर्त्तितः। तत्रैवजातूकर्ण्यः। यत्रमातुलजोद्वाहीयत्रवावृषलीपतिः। आश्वलायनः। प्रतिमाविक्रयंयोवैकरोतिपति
तस्तुसः। जीवनार्थंपरास्त्रीभिर्हृत्वातीर्थंप्रयातियः। मातापित्रोर्विनासोपिपतितःपरिकीर्त्तितः। तत्रैवजातूकर्ण्यः। यत्र
मातुलजोद्वाहीयत्रवावृषलीपतिः। आहूंनगच्छेत्तद्विप्रःकृतंयत्रनिरामिषं। पितृपुत्रौभ्रातरौद्वौनिरग्निंगुर्विणीपतिं। स
गोत्रप्रवरंचैवआहेषुपरिवर्जयेत्। बृहन्नारदीये। शंखचक्रंमृदायस्तुकुर्यात्तसायसेनवा॥ सशूद्रवद्बहिःकार्यःसर्वस्मा
द्द्विजकर्मणः। शंखचक्राद्यंकनंचगीतनृत्यादिकंतथा। एकजातेरयंधर्मोनजातुस्याद्द्विजन्मनः। तेनयत्तप्तमुद्रादिवि
धयस्तेशूद्रविषयाइतिपृथ्वीचंद्रादयः। शिवकेशवयोरंकान्शूलचक्रादिकान्द्विजः। नधारयेतमतिमानवैदिकेव
र्त्मनिस्थितः। इतिआश्वलायनोक्तेश्चायसांचोदणाघर्षंनिषिद्धमितिश्रीधरस्वामी। अन्येपिनिषिद्धानिवंधेषुज्ञेयाः
इतिदिक्। अत्रविशीर्णाग्राह्यत्वोक्तेरेवतद्धार्याणांनिषेधेसिद्धेपुनर्वर्ज्यपरिगणनंनिषिद्धवर्ज्यनिर्गुणाग्राह्यर्थमिति

विज्ञानेश्वरः। कुहिकाण्डे रपवादो हेमाद्रौ वसिष्ठः। अपि चेन्मंत्रविद्युक्तः शारीरैः पंक्तिदूषणैः। अदूष्यं तं यमः प्राह पंक्तिपाव
न एव सः। क्वचिद्विप्राणां जातिभावेनाप्यपात्रत्वमुक्तं। चंद्रिकायामाग्नेये। यस्तु पुत्रो गयां गच्छेत्कदाचित्कालपर्ययात्। तानेव भो
जयेद्विप्रान्ब्रह्मणा ये प्रकल्पिताः। ब्रह्मणा कृतसंख्याता विप्रा ब्रह्मसमाः स्मृताः। अमानुषा गया विप्रा ब्रह्मणा ये प्रकल्पि
ताः। तेषु तुष्टेषु संतुष्टाः पितृभिः सह देवताः। तत्रैव। न विचार्यं कुलं शीलं विद्या च तप एव च। पूजितैस्तैस्तु संतुष्टा देवाः सपि
तृगुह्यकाः। गयायां निर्गुणा अपि त एव भोज्या इति हेमाद्रिः। ब्रह्मण्यवटश्राद्धे तन्नियमो नान्यत्रेति त्रिस्थलीसेतौ पिता
महचरणाः। पृथ्वीचंद्रोदये पाद्मे। तीर्थेषु ब्राह्मणं नैव परीक्षेत कदाचन। अन्नार्थिनमनुप्राप्तं भोज्यं तं मनुरब्रवी
त्। स्कांदेपि। ब्राह्मणान्न परीक्षेत तीर्थक्षेत्रनिवासिनः। मनुः। ब्राह्मणं न परीक्षेत दैवे कर्मणि धर्मवित्। पित्र्ये कर्म।
णि तु प्राप्ते परीक्षेत प्रयत्नतः। असंभवपरमेतदिति मेधातिथिः। हेमाद्रौ व्यासः। गायत्रीसारमात्रोपि वरं विप्रः सुयं
त्रितः। नायंत्रितश्चतुर्वेदी सर्वाशी सर्वविक्रयी। काणाः कुंडाश्च कुनखाश्च दरिद्रा व्याधितास्तथा। सर्वे श्राद्धे नियोक्त
व्या मिश्रिता वेदपारगैः। अथ विप्रनिमंत्रणं। चंद्रिकायां वाराहे। वस्त्रशौचादिकर्तव्यं श्वः कर्तास्मीति जानता। स्था
नोपलेपनं कृत्वा ततो विप्रान्निमंत्रयेत्। दंतकाष्ठं च विसृजेद्ब्रह्मचारी शुचिर्भवेत्। तत्रैव प्रचेताः। दक्षिणाचरणं विप्रः

सव्यं वैक्षत्रियस्तथा। पाराशवादायवैश्योद्वौ भृङ्गः प्राणातिपूर्वकं। बृहस्पतिः। उपवीती ततो भूत्वा देवार्थे तु द्विजोत्तमान्। अपस
व्येन पित्र्येथ सव्यं शिष्योथवा स्तुतः। प्रचेताः। सवर्ण्णे प्रेषयेद्दाक्षं द्विजानां तु निमंत्रणे। पृथ्वीचंद्रोदये स्कांदे। राजकार्ये नि
युक्तस्य बंधनिग्रहवर्त्तिनः। व्यसनेषु च सर्वेषु श्राद्धं विप्रेण कारयेत्। चंद्रिकायां यमः। अभोज्यं ब्राह्मणस्यान्नं वृषलेन नि
मंत्रितं। तथैव वृषलस्यान्नं ब्राह्मणेन निमंत्रितं। तत्रैव पैठीनसिः। सप्तपंचत्रयो द्वौ वा श्रोत्रियान्वा निमंत्रयेत्। आश्व
लायनसूत्रे। एकैकमेकैकस्य द्वौ द्वौ त्रींस्त्रीन्वा वृद्धौ फलभूयस्त्वं। द्वाविति वृद्धिश्राद्धे। गौतमः। नवावरान्भोजये
दयुजो वा यथोत्साहं। याज्ञवल्क्यः। द्वौ दैवे प्राक्त्रयः पित्र्ये उदगेकैकमेव वा। मातामहानामप्येवं तंत्रं वा वैश्वदेवि
कं। दीपकलिकायां पराशरः। संपन्नावथपात्राणामेकैकस्य त्रयपह्वयः। पित्रादेर्ब्राह्मणाः प्रोक्ताश्वलाणे वैश्वदेवि
के। वृद्धयाज्ञवल्क्यः। दशैकं पंचत्र्याविप्रान्पार्वणे विनियोजयेत्। अत्र वैश्वदेवे द्वौ चतुरो वोपवेश्य पित्रादीनामेकै
कैकस्य स्थाने एकं त्रीन्पंच वा सप्त नव वोपवेशयेदिति स्मार्त्ताः। मनुः। द्वौ दैवे पितृकृत्ये त्रीनेकैकमुभयत्र वा। भोजये
त्सुसमृद्धोपि न प्रसज्येत विस्तरे। सत्क्रियां देशकालौ च शौचं ब्राह्मणसंपदं। पंचैतान्विस्तरो हंति तस्मान्नेहेत विस्तरं।
पृथ्वीचंद्रोदये शातातपः। द्वौ दैवे पार्वणे विप्रौ प्राङ्मुखावुपवेशयेत्। पित्र्ये तूदङ्मुखांस्त्रींश्च बह्वृचाध्वर्युसाम

गाना। अत्यशक्तो हेमाद्रौ देवलः। एकेनापिहि विप्रेण षड्विधं श्राद्धमाचरेत्। षडर्घान्स्थापयेत्तत्र षड्भ्यो दद्यात्तथा हविः। गोभि
लः। प्रत्येकं भोजयेच्छ्राद्धे छंदोगं तत्र भोजयेत्। ऋचो यजूंषि सामानि त्रितयं तत्र विद्यते। अत्र वैश्वदेवे विशेषमाह। तत्रैव
वसिष्ठः। प्रत्येकं भोजयेच्छ्राद्धे दैवं तत्र कथं भवेत्। अन्नं पात्रे समुद्धृत्य सर्वस्य प्रकृतस्य च। देवतायतने कृत्वा ततः श्रा
द्धं समाचरेत्। प्रास्येदग्नौ तदन्नं तु दद्याद्वा ब्रह्मचारिणे। एतच्च सपिंडीकरणवर्ज्जं ज्ञेयं। न त्वेवैकं सर्वेषां काममनाधि
रत्याश्वलायनोक्तेः। अस्यार्थ उक्तो नारायणवृत्तौ। आद्यं सपिंडीकरणं तदूर्द्ध्वेषु सर्वश्राद्धेषु कामं त्रयाणामेकं भोज
येत्। सपिंडीकरणे तु त्रिभिर्भवितव्यमिति। अनाद्ये पार्वणे वर्जिते। वा अभोजने आमहेमश्राद्धादौ। अन्नाभावेति
चेव्याख्यातं तत्रैव ज्ञेयं। कारिकापि। दैवे पित्र्येऽथवैकैकं सपिंडीकरणं विनेति। अत्रैकविप्रे साग्नेर्विशेषमाह
पृथ्वीचंद्रोदये प्रचेताः। एकस्मिन्ब्राह्मणे दैवे साग्नेरग्निर्भवेत्सदा। अनग्नेः कुशमुष्टिः स्याच्छ्राद्धकर्मणि सर्वतः।
सर्वथा विप्रालाभे तत्रैव हेमाद्रौ सत्यव्रतः। निधाय दर्भनिचयमासनेषु समाहितः। प्रैषानुप्रैषसंयुक्तं सर्वं श्राद्धं प्रक
ल्पयेत्। अत्रानन्यभावात्तत्रैतत्कालिकार्यं यजमानविधौ मदक्षिणोक्तिः केचित्। तत्र। अदृष्टायाः प्राप्तेः। सर्वं तद्द्विजदे
तम्यं पद्व श्राद्धमरहितमिति पाप्मात्। विदध्याद्धोत्रमन्यश्चेद्दक्षिणार्द्धहरो भवेत्। स्वयं चेदुभयं कुर्यादन्यस्मै प्रति

एमः

पादयोरितिछंदोगपरिशिष्टाच्च॥ एवंपतिश्राद्धेपिकात्यायनः॥ यज्ञवस्तुनिपुष्टैच स्तंबेदर्भेबर्हैतथ्या॥ दर्भसंख्यानविहिता
विष्टरास्तरणेषुच॥ मातुःश्राद्धेतुविप्रालाभेसुवासिन्योभोजनीयाः॥ स्महाशार्के वृद्धवासिष्ठः॥ मातुःश्राद्धेतुविप्राणाम
लाभेपूजयेदपि॥ पतिपुत्रान्विताभव्यायोषितोष्टौकुलोद्भवाः॥ इति॥ अष्टावितिवृद्धिश्राद्धविषयं॥ पाद्मे उत्तरखंडे॥ सकृ
दभ्यर्चितंलिंगंशालग्रामशिलांचयः॥ पीठेसंस्थापयित्वातुश्राद्धंचकुरुतेनरः॥ पतरत्तस्यपितृघंतिकल्पकोटिशतं
दिवि॥ चंद्रिकायांमात्स्ये॥ पठन्निमंमन्त्रनियमात्श्रावयेत्स्मैतकानबुधः॥ अक्रोधनैःशौचपरैःसततंब्रह्मचारिभिः
भवितव्यंभवद्भिश्चमयाचश्राद्धकारिणा॥ यत्तुमनुः॥ सर्वायासविनिर्मुक्तैःकामक्रोधविवर्जितैः॥ भवितव्यंभवद्भि
र्नःश्वोभूतेश्राद्धकर्मणीति॥ पूर्वेद्युर्निमंत्रणपरं॥ नतदहः॥ तत्रैवदेवलः॥ असंभवेपरेद्युर्वाब्राह्मणांस्तान्निमंत्रये
त्॥ अज्ञातीनसमानार्षानयुग्मानात्मशक्तितः॥ कात्यायनः॥ अनिंद्यामंत्रितौनेतत्केतनंगृह्यशक्तितः॥ अथश्राद्ध
कर्तृभोक्तृनियमाः॥ तत्रनिमंत्रितविप्रस्यापरार्केयमः॥ केतनंकारयित्वातुयोतिपातयतिद्विजं॥ ब्रह्महत्यामवाप्नोति
शूद्रयोनौचजायते॥ आमंत्र्यब्राह्मणंयस्तुयथान्यायंनपूजयेत्॥ अतिकृच्छ्रासुघोरासुतिर्यग्योनिषुजायते॥ प्रमाद
त्यागात्तुहारीतः॥ प्रमादाद्विस्मृतंज्ञात्वाप्रसाद्यैनंप्रयत्नतः॥ तर्पयित्वायथान्यायंसर्वंतत्फलमश्नुते॥ प्रमादाभावेतु

नारायणः। एतस्मिन्नेनसि प्राप्ते ब्राह्मणो निपतंतं क्षुधितं पतितं वा दृष्ट्वा जातां कृत्वा तस्मात्पापात्प्रमुच्यते। यमः। आमंत्रितस्तु यो वि
प्रो भोक्तुमन्यत्र गच्छति। नरकाणां शतं गत्वा चंडालेष्वभिजायते। तत्रैव देवलः। पूर्वं निमंत्रितोन्येन कुर्यादन्यप्रतिग्रहं। भुक्त्वा
हारेथ वा भुंक्ते सुकृतं तस्य नश्यति। यदि विलंबेत सोकमादित्यपुराणे। आमंत्रितश्चिरं नैव कुर्याद्विप्रः कदाचन। देव
तानां पितॄणां च तथा हरत्यस्य चैव हि। चिरकारी भवेद्द्रोही पच्यते नरकाग्निना। पृथ्वीचंद्रोदये यमः। निमंत्रितस्तु यो
विप्रो ध्यवायं यातिः। भवंति पितरस्तस्य तं मासं पांसुभोजनाः। आमंत्रितस्तु ०ह्नं सां वै कुरुते द्विजः। तं मासं पितरस्त
स्य भवंति रुधिराशनाः। शंखः। निमंत्रितस्तु यः श्राद्धे मैथुनं सेवते द्विजः। श्राद्धं दत्वा च भुक्त्वा च पुरुषपतते महते
नरके। मैथुनं कृतावपि निषिद्धं जलकालं नियुक्तो वा नैव गच्छेत्। तत्त्विपंक्ता। तच्चितया। तत्र गच्छन्नवाप्नोति स्वनिष्ठा निफला
निखिला। तत्रैव माधवीये दूमनुक्तेः। श्राद्धं करिष्यन्नकृत्वा वा भुक्त्वा वापि निमंत्रितः। उपोष्य च तथा भुक्त्वा नोपेया
दृतावपि। भोक्ष्यन्नकरिकृत्वा वा भुक्त्वा वाप्यनस्त्वः। श्राद्धं पूर्वरात्रौ प्रयत्नतः। व्यवायं भोजनं वापि ऋतावपि विवर्ज्ज
येत्। इति तत्रैवाश्वलायनोक्तेः। विज्ञानेश्वरेणात्र श्राद्धे ऋतौ गच्छतोपि न दोष इत्युक्तं। तत्सगतिकसे ज्ञेयं। बृहस्पतिः। एमः
द्विनिशं ब्रह्मचारी स्याच्छ्राद्धकृद्ब्राह्मणैः सह। अन्यथा वर्तमानौ तु स्यातां निरयगामिनौ। पुनर्भोजनमध्वानं भा॥

ध्ययनं भाराध्ययनं मैथुनं। श्राद्धकृच्छ्राद्धभुक्चैव सर्वमेतद्विवर्ज्जयेत्। स्वाध्यायं कलहं चैव दिवास्वापं तथैव च। यत्तु श्राद्धका
शिकायां पुराणसमुच्चये। कृत्वा तु रुधिरस्रावं न विद्वान्न श्राद्धमाचरेत्। एकं द्वौ त्रीणि वा विद्वान् दिनानि परिवर्ज्जयेत्।
इति। तन्निर्मूलं पृथ्वीचंद्रोदये यमः। पुनर्भोजनमध्वानं भाराध्ययनमैथुनं। संध्यां प्रतिग्रहं होमं श्राद्धभोक्ताष्ट वर्ज्ज
येत्। संध्यानिषेधः प्रायश्चित्तात्पूर्वं ज्ञेयः। यथाहोशनाः। दशकृत्वः पिबेदापो गायत्र्या श्राद्धभुग्द्विजः। ततः संध्या
मुपासीत जपेच्च तु कुर्यादपि गोदोहकं। सायं संध्या पराह्णं च च्छेदनं च वनस्पतेः। अमाघ्यां नैच कुवर्ज्जयेत्। इति काम
धेनौ वराहाद्युक्तेः। कर्त्तुरपि सायं संध्यानिषेधमाहुः। शिष्टास्तु तन्निर्मूलत्वमाहुः। होमनिषेधस्तु स्वविषयः। सूत
के च प्रवासे च अशक्तौ श्राद्धभोजने। एवमादिनिमित्तेषु हावयेन्न तु हापयेत्। इतिच्छंदोगपरिशिष्टात्। तथैव वा
दित्यपुराणे। निमंत्रितस्तु नः श्राद्धे कुर्याद्भार्याविताडनं। चंद्रिकायां प्रचेताः। श्राद्धभुक् प्रातरुत्थाय प्रकुर्याद्दंतधा
वनं। श्राद्धकर्त्ता न कुर्वीत दंतानां धावनं बुधः। हेमाद्रौ जाबालिः। दंतधावनतांबूलं तैलाभ्यंगमभोजनं। रत्यौषध
प परान्नं च श्राद्धकृत्सप्त वर्ज्जयेत्। विष्णुरहस्ये। श्राद्धोपवासदिवसे खादित्वा दंतधावनं। गायत्र्याशतसंपूतमंबु प्राश्य
विशुध्यति। पुनर्भोजनमध्वानं यानमायासमैथुनं। दानं प्रतिग्रहो होमः श्राद्धभुक्त्वष्ट वर्ज्जयेत्। सोमोत्सवतौ। वनस

२३९ तिगतेसोमेयस्तोहिंस्याद्वनस्पतिं॥ घोरायांभ्रूणहत्यायांमुत्पतेनात्रसंशयः॥ एतद्विहितेध्मादिव्यतिरेकेण॥ वनस्पतिगतेसो
मेनदुहीयस्तुवाहेयेत॥ नाश्रंतिपितरस्तस्यदशवर्षाणिपंचच॥ वनस्पति॰मंथानंयस्तुकारयेत॥ गावस्तस्यप्रणश्यंति
चिरकालमुपस्थिताः॥ वनस्पतिमितस्वरूपमाह पृथ्वीचंद्रोदये व्यासः॥ त्रिमुहूर्त्तंवसेदर्केत्रिमुहूर्त्तंजलेवसेत॥ त्रिमुहू
र्त्तंवसेद्रोषुत्रिमुहूर्त्तंवनस्पतौ॥ कलिकायांवृद्धमनुः॥ निमंत्र्यविप्रांस्तदहर्वर्ज्जयेन्मैथुनंक्षुरं॥ प्रमत्ततांचवाध्या
यंक्रोधाशौचेतथानृतं॥ केचिन्निमंत्रणात्पूर्वंमुख्यार्थंपूर्वेद्युःक्षौरंकुर्वंति॥ तत्रमूलंमृग्यं॥ मरीचिः॥ षष्ठ्यांप
र्वसुपक्षादौरिक्ताभद्रातिथिष्वपि॥ पातेश्राद्धेव्रतोद्वाहेचक्षौरंवर्ज्यंनिशासुच॥ यदाकर्त्तुरशक्ष्मा तत्पुत्रशिष्यादिः
श्राद्धंकरोतितदाकर्त्राप्रतिनिधिनाचप्राग्युक्तानियमाःकार्याः॥ नशक्नोतियदाकर्त्तुंस्वयंत्वनवकाशतः॥ श्राद्धंशि
ष्येणपुत्रेणतदान्येनापिकारयेत॥ नियमानाचरेत्सोपिनियतांश्चवसुंधरे॥ यजमानोपितान्सर्वानाचरेत्तुसमा
हितः॥ इतिहेमाद्रौवाराहोक्ते॥ स्त्रियास्तुपाद्मे॥ मुक्तकक्षातुयानारीमुक्तकेशीतथैवच॥ हसतेवदतेचैवनिराशाः
पितरोगताः॥ आश्वलायनः॥ श्राद्धेद्विभोजयेद्ब्राह्मणोनबालानपियत्नतः॥ प्राक्पिंडदानाद्गंधाद्यैर्नालंकुर्यात्स्ववि
ग्रहं॥ वास्तौगृहे॥ अथश्राद्धवस्तूनि॥ तत्रादौकुशाः॥ पृथ्वीचंद्रोदयेदक्षः॥ समित्पुष्पकुशादीनांद्वितीयःपरिकी

एम.

त्रिते॥ अघृष्टाम्रके दिने द्वितीयो भाग इत्यर्थः। तत्र प्रथमः। समूलस्तु भवेद्दर्भः पितॄणां श्राद्धकर्मणि। मूलेन लोकान् जय
ति शक्रस्य सुमहात्मनः॥ व्यासः। तर्पणादीनि कार्याणि पितॄणां यानि कानि चित्। तानि स्युर्द्विगुणैर्दर्भैः साग्रपत्रैर्वि
शेषतः॥ शालंकायनः। सपिंडीकरणं साग्रं कौशं द्विदलमेव च। प्रादेशमात्रं विज्ञेयं पवित्रं यत्र कुत्रचित्॥ हारीतः। पवि
त्रं ब्राह्मणस्यैव चतुर्भिर्दर्भपिंजुलैः। एकैकन्यूनमुद्दिष्टं वर्णे वर्णे यथाक्रमं॥ स्मृत्यर्थसारे। सर्वेषां वा भवेद्द्वाभ्यां
पवित्रं ग्रथितं न वा॥ रत्नमालायां। हृष्योस्तु पर्वणोर्मध्ये पवित्रं धारयेद्बुधः॥ हेमाद्रौ स्कांदे। अनामिकाधृतो दर्भो ह्ये
कानामिकयापि वा। द्वाभ्यामनामिकाभ्यां तु धार्ये दर्भपवित्रके॥ पवित्राभावे तत्रैव सुमंतुः। समूलाग्रो विगर्भोस्तु
कुशो द्वौ द। क्षिणे करे। सव्ये चैव तथा त्रीन्वै बिभृयात्सर्वकर्मसु॥ बोधायनः। हस्तयोरुभयोर्द्वौ द्वौ वासने पित्र्ये
व चा। दर्भग्रहणे मंत्रमाह शंखः। विरंचिना सहोत्पन्न परमेष्ठिनिसर्गज। नुद सर्वाणि पापानि दर्भ स्वस्तिकरो भव॥
स्मृत्यर्थसारे। हुंफट्कारेण संकृत्तच्छिन्नाः समुद्धृताः। भरद्वाजः। कुशाभावे पार्के सुमंतुः। कुशः काशः शरो मुंजो य
वा दूर्वा यवबल्वजाः। गोकेशा मुंजकुंदाश्च पूर्वाभावे परः परः। काशादौ विशेषमाह। शंखः। काशहस्तस्तु नाचामे
+ प्रेताक्रियार्थं पित्रर्थमभिचारार्थमेव च। दक्षिणाभिमुखश्छिंद्यात्प्राचीनावीतिको द्विजः॥ + कदाचिद्द्विधि॥

शंकया। प्रायश्चित्तेन युज्येत दूर्वाहस्तैर्वैव च। पृथ्वीचंद्रोदये यमः। मासि मासि तु हृता दर्भा मासि मास्येव तो हिताः। षट्त्रिंशन्मते।
मासे नस्यादमावास्या दर्भो ग्राह्यो नवः स्मृतः। गृह्यपरिशिष्टे। ये च पिंडाश्रिता दर्भा यैः कृतं पितृतर्पणं। अमेध्याशुचिलि
प्ता ये तेषां त्यागो विधीयते। लघुहारीतः। पथि दर्भाश्चितौ दर्भा ये दर्भा यज्ञभूमिषु। स्तरणासनपिंडेषु षट्कुशान्प
रिवर्जयेत्। ब्रह्मयज्ञे च ये दर्भा ये दर्भाः पितृतर्पणे। हता मूत्रपुरीषाभ्यां तेषां त्यागो विधीयते। हेमाद्रौ॥ अन्यानि च प
वित्राणि कुशदूर्वात्मकानि च। हेमात्मकपवित्रस्यप्येकांनार्हीतिवेकलां॥ अथ हविः। हेमाद्रौ प्रचेताः। कृष्णमाषास्ति
लाश्चैव श्रेष्ठाः स्युर्यवशालयः। महायवाव्रीहियवास्तथैव च मधूलिकाः। कृष्णाः श्वेताश्च लोहाश्च ग्राह्याः स्युः श्रा
द्धकर्मणि। महायवो वेणुबीजं मधूलिका यावनालाः इति हेमाद्रिः। कल्पतरुश्च। भारते वर्द्धमानतिलं श्राद्धमक्ष
य्यं मनुरब्रवीत्। सर्वकामैः स यजनैर्यास्तिलैर्यजते पितॄन्। चंद्रिकायां देवलः। इष्टापूर्तैर्मृता हे च दर्शे हृष्टस्य का
स्य च॥ पात्रेष्वन्येषु कालेषु देयं नैव कुभोजनं। सायणीये। अगोधूमं च यच्छ्राद्धं माषमुद्गविवर्जितं। तैलपक्केन
रहितं कृतमप्यकृतं भवेत्। हेमाद्रावपि। अगोधूमं च यच्छ्राद्धं कृतमप्यकृतं भवेत्। तत्रैव ब्राह्मे। यवैर्व्रीहितिलैर्माषै एमः
र्गोधूमैश्चणकैस्तथा। संतर्प्पयेत्पितॄन्मुद्गैः श्यामाकैः सर्षपद्रवैः। नीवारैर्हरिश्यामाकैः प्रियंगुभिरथार्चयेत्। दे

माद्वीकाम्भा॥ त्रिभिः॥ यदि एवं जीवतस्त्वासीत् तदृधान्तस्यपत्नतः। सत्क्षोदस्तं एमार्गेत तोयाति न संशयः॥ कलिकायामामाध्व
लायनः॥ कदल्यादिफलैः शस्तैर्मूलैरार्द्रकादिकैः। पिप्पोरसैर्मधुना दध्ना श्राद्धे संतर्प्पयेत् पितॄन्। कदल्याम्रफलादि॥ नि
श्राद्धे संपादयेत् सुधीः॥ हे माद्वी पृथ्वी चंद्रोदये मार्कंडेयः। गोधूमैरिक्षुभिर्मुद्गैः सतीनैश्चणकैरपि। श्राद्धे दत्तैः प्री
यंते मासमेकं पितामहाः॥ विदार्या च भरुंडै रुंडैश्च तिलैः शृंगाटकैस्तथा। केचुकैश्च तथा कंदैः कर्कंधुबदरैरपि। पा
लवमैरारुकैश्चाप्य त्रोटैः पनसैस्तथा॥ काकोल्या क्षीरकाकोल्या तथा पिंडालकैः शुभैः। लाजाभिश्च सधानाभिस्त्र
पुसैर्वा हरिचिर्भटैः। सर्षपाराजशाकाभ्यामिंगुदै राजजंबुभिः। प्रियालामलकैर्मुख्यैः फल्गुभिश्च तिलंटकैः। वेत्रांकु
रैस्तालकंदैश्चक्रिकाक्षीरिकावचैः। लोचैः समोचैर्लकुचैस्तथा वै बीजपूरकैः। मुंजातकैः पद्मफलैर्भक्ष्यभोज्यै
श्च संस्कृतैः। रागखांडवचोष्यैश्च त्रिजातकसमन्वितैः। दत्तैस्तु मासं प्रीयंते श्राद्धेषु पितरो नृणां॥ एषां कोशादे
माध्याद्विख्याताख्या वैद्यकाद्यनुसारेण मध्यदेशभाषया नामान्युच्यंते। सतीनैः कलायैः। कलायस्तु सतीनक इत्यम
रः। वट्टुरिति प्रसिद्धैः। विदार्या तर्कंदेन। भरुंडं जलजं मखाण्णा इति प्रसिद्धं। इति श्राद्धमंजर्यां भूकूष्मांडमित्यन्ये। शृंगा
टकं। सिंघाडा। केचुकः कंचनारः। कंदः सूरणः। अर्शोघ्नः सूरणः कंदः इत्यमरः। कर्कंधूर्बदरं सूक्ष्मबदरं। पालेवतं कोशा

तकी अकर्ई। अक्षोटकं। आखोटः। काकोलीक्षीरकाकोल्यौ गौडेषु प्रसिद्धे। पिंडालकं ह्लुपनी। महाराष्ट्राणां मोहलुकं इति
प्रसिद्धं। त्रपुसाद्युपस्त्रपुसः कर्कटीभेदाः सर्षपेति दीर्घश्छांदसः। प्रियालं चिरौंजी। फल्गु उडंबरं। तिलंतकं पटोलं। ताल
कंदः कंदविशेषः चक्रिका। तिंतिणीबिंबीवा। क्षीरिका क्षीरिणी। मोचं। कदलीफलं। लकुचं बडहर। मुंजातं गौडदेशे।
पद्मफलं गाट्टा। रागखांडवः पानविशेषः। पिप्पलीशुंठिपुक्तस्तमुद्गयूपस्तु खांडवः। रागखांडवतां यातिशर्करासंयु
तंलुततं। त्रिजातं लवंगैलापत्रकाणि। मदनात्त्रैकौर्मैं। कालशाकं चवालसूकं मूलकं कृष्णमालिका। प्रशस्तानीति
शेशेष। हेमाद्रौ पृथ्वीचंद्रोदये च वायुपुराणे। कालशाकं महाशाकं द्रोणशाकं तथार्द्रकं। बिल्वामलकमृद्वीका
पनसाम्रातदाडिमं। चव्यं पालिवताक्षोटरिं च कसेरुकं। कोविदारश्च कंदश्च पटोलं बृहतीफलं। पिप्पलीमरिचं चै
व एलाशुंटी च सैंधवं। शर्करागुरुकर्पूरबदरीद्रोणपत्रकं। तथा। मधुकं रामठं चैव कर्पूरं गुडमेव च। श्राद्धकर्मणि शस्ता
नि सैंधवं त्रपुसं तथा। रामठं हिंगुः। कसेरुः। कोविदारश्च तालकंदस्तथा विसं। तमालं शतकंदश्च तथा वेशीतकं रकं। का
लेयं कालशाकं च सुतिषसं सुवर्चलं। मांसं शाकं दधिक्षीरं चाबुवेत्रांकुरस्तथा। कट्फलं कौकाणिद्राक्षा लकुटकष एम:
रूपकं। पिप्पचं मोचमेव च। अलाबुयीवकं चारेकर्कंधु मधुसाह्वयां कंकतं नालिकेरं शृंगाटकषरूपकं। पिप्पलीमरिचं

चैव पटोलं बृहती कलां एव माघ्यानि गान्धानि स्वादूनि मधुराणि च। नागरं चार्द्रकं देयं दीर्घमूलकमेव चेति। शर्करा क्षीरसंपुक्षारयुक्तानि त्यमस्त्रयाः। द्रोणाशाकं कुंबा इति प्रसिद्धं। मृद्विका द्राक्षा। आम्रातकं आंबाडा इति प्रसिद्धं। हस्त्रः। तत्फलं। पालीवतं जंबीरं कसेरु जलकंदः। कोविदारः कंचाबाडा इति प्रसिद्धं। हस्त्रः। तत्फलं। पालेवतं जंबीरं। तालकंदः तालमूली। बिसं भसिंडा। शतकंदः शतावरी। शीतकंदः शालूकं। सेरुकी इति प्रसिद्धं। कालेयं कएल संज्ञः शाकः दारुहरिद्रा चेति पृथ्वीचंद्रः। स्नुनिष स्पंक कर्कटी सदृशं। सुवर्चलं शाकविशेषः। कट्फलं श्रीपर्ण्या हस्त्र फलं। कोकणी अम्लरणा। इस्ता। तिंदुकं टिंडिसमिति कैकदेवः। तिंदुफलं वा। जीवकं फलविशेषः। चारं ह्नुडतालं। मधुसाह्वयं मधूकपुष्पं फलं च। परूषकं। फरुसमिति प्रसिद्धं। नागरं सुंठी। पृथ्वीचंद्रोदये ब्राह्मे। आम्रमाम्रातकं बिल्वं दाडिमं बीजपूरकं। प्राचीनामलकं क्षीरं नालिकेरं परूषकं। नारंगकं च खर्जूरं द्राक्षा नीलकपित्थकं। एतानि फलजातानि श्राद्धे देयानि यत्नतः। मात्स्ये। अन्नं तु सदधि क्षीरं गोघृतं शर्करान्वितं। मासं प्रीणाति सर्वान्वै पितॄनित्याह केशवः। याज्ञवल्क्यः। हविष्यान्नेन वै मासं पायसेन तु वत्सरं। मात्स्यहारिणकौरभ्रशाकुनच्छागपार्षतैः। ऐणरौरववाराहशाशैर्मांसैर्यथाक्रमं। मासवृद्ध्याभितृप्यंति दत्तैरिह पितामहाः। खड्गामिषं महाशल्कं मधु मुन्यन्नमेव च। लोहामिषं कालशाकं मांसं वाध्रीणसस्य च। निगमः।

२४२ त्रिःपिबंचेंद्रियक्षीणंवृद्धमजापतिं। वाध्रीणसं तु तं प्राहुर्याज्ञिकाः श्राद्धकर्मणि॥ वाध्रीणसो जरच्छागः इति मेधातिथिः॥ का
त्यायनः॥ छागोस्रमेषानालभ्य शेषाणि क्रीत्वा लब्ध्वा वा स्वयंमृतानां वाहृत्य पचेत्। कौर्म्ये। क्रीत्वा लब्ध्वा स्वयं वाथ मृता
नाहृत्य वै द्विजः। दद्याच्छ्राद्धे प्रयत्नेन तदस्याक्षयमक्षते। श्राद्धे दत्तस्य मांसस्याभक्षणे दोषमाह मनुः॥ नियुक्तस्तु य
थान्यायं यो मांसं नात्ति मानवः। स प्रेत्य पशुतां याति संभवानेकविंशतिं। अत्र बहुवचनेषु श्राद्धे मांसमधुनोः प्राश
स्त्योक्तेः॥ विना मांसेन यच्छ्राद्धं कृतमप्यकृतं भवेदिति हेमाद्रौ देवलोक्तेः॥ यच्छ्राद्धं मधुना हीनं तद्रसैः सकलैरपि॥ पि
ष्टान्नैः सर्पिसंयुक्तं पितॄणां नैव तृप्तये। अणुमात्रमपि श्राद्धे यदि न स्याच्च माक्षिकं। नाम्नापि कीर्त्तनीयं स्यात्पि
तॄणां प्रीतये ततः इति हेमाद्रौ ब्राह्मोक्तेश्च मांसमधुनोर्नियतत्वं गम्यते। गौडनिबंधे मत्स्यसुमंतूक्तेः। मध्वभावे गुडो
देयः क्षीरस्य च तथा दधि। न लभ्यते घृतं यत्र कुर्यात् हुतक्षीरजं। श्राद्धकलिकायां नागरखंडे कथंचिद्यदि विप्रेभ्यो
न दत्तं भोजने मधु। पितरस्तु ते नैव दातव्याः कदाचिन्मधुना विना। बृहत्पराशरस्तु मांसं निषेधति। यत्तस्या। एव ध एम:
कृत्वा मांसैस्तर्पयते पितॄन्। स विद्वांश्चंदनं दग्ध्वा कुर्यादंगारविक्रयं॥ क्षिप्त्वा कूपे यथा किंचिद्बाल आदातुमिच्छति।
एतदृशानतः सोपि मांसेन श्राद्धकृत्तथा स एव। सर्वथात्र यदा न स्यात्तदैवामिषमाश्रयेत। ब्राह्मणाश्च स्वयं नाद्या

तच्चस्वादिहतमप्रिज्ञाभगवतेपितदद्यादामिषंश्राद्धेनचाद्याद्धर्मतत्त्ववित्। मुन्यन्नैःस्यात्सदाप्रीतिर्यथानपशुहिंसया
तथेतिशेषः अत्रकेचित्। मुन्यन्नंब्राह्मणस्योक्तंमांसंक्षत्रियवैश्ययोः। मधुप्रधानंशूद्रस्यसर्वेषांचाविरोधियत्। इति
हेमाद्रौपुलस्त्योक्त्याव्यवस्थामाहुः। पृथ्वीचंद्रोदयस्तु। अक्षतागोपशुश्चैवश्राद्धेमांसंतथामधु। देवराच्चसुतोत्पत्तिः
कलौपंचविवर्जयेत्। इतिनिगमोक्तेः। वशातिथिपशुभ्यश्चपशुपाकरणक्रियेतिकलिवर्ज्येषुहेमाद्रौआदित्य
पुराणात्। मांसदानंतथाश्राद्धेवानप्रस्थाश्रमस्तथेत्युक्त्वा। इमान्धर्मान्कलियुगेवर्ज्यानाहुर्मनीषिणः। इति
बृहन्नारदीयेश्राद्धप्रकरणे। कलिव्यतिरिक्तविषयः। कलौमांसनिषेधानांचदेशाचाराद्व्यवस्था। तथाचबृहन्ना
रदीयेश्राद्धप्रकरणे। यथाचारंप्रदेयंतुमधुमांसादिकंबुधैः॥ देशाचारःपरिग्राह्यस्तत्तद्देशीयजैर्नरैः। अन्यथा
चारात्प्रपतितोज्ञेयःसर्वधर्मबहिष्कृतः इति। यस्मिन्देशेपुरेग्रामेत्रैविद्येनगरेपिवा। योयत्रविहितोधर्मस्तंधर्मंन
विचालयेत्। इतिभृगूक्तेश्चेत्याहुः। तन्न। होलाकादिकरणन्यायेनदेशविशेषव्यवस्थापकपदकल्पनायोगात्।
निरूपितंचैतत्पितामहचरणैर्मांसमीमांसायामितिदिक्। मनुः। संवत्सरंतुगव्येनपयसापायसेनच॥ वार्ध्रीणस
स्यमांसेनतृप्तिर्द्वादशवार्षिकी। त्रिपिबंत्विंद्रियक्षीणंश्वेतंवृद्धमजापतिं। वार्ध्रीणसंतुतंप्राहुर्याज्ञिकाःश्रा

द्धकर्मणि क्षीरादौ विशेषमाह हेमाद्रौ सुमंतुः पयो दधि घृतं चैव गवां श्राद्धेषु पावनं माहिषाणां घृतं प्राहुः श्रेष्ठं न तु पयः
क्वचित्। याज्ञवल्क्यः। संधिन्यनिर्दशावत्सागोपयः परिवर्जयेत्। औष्ट्रमैकशफं स्त्रैणमारण्यकमथाविकं। हेमाद्रौ
हारितः। नवसूतायाः सप्तरात्राद्द्विस्त्यके। दशरात्रौद्द्विस्त्यपरे। मासेनोपेयुष भवतीति धर्मविदः। एतद्गोमावपरं देवलः
अजाविमहिषीणां तु पयः श्राद्धेषु वर्जयेत्। विकारान्यपयसश्चैवमाहिषं तु घृतं। तत्रैव ब्राह्मे। माहिषं चामरं मार्गं आ
विकैकशफोद्भवं। स्त्रैणमौष्ट्रं याचितं च दधिक्षीरं त्यजेद्घृतं। सगुडं मरीचोक्तं तु तथा पर्युषितं दधि। दीसतिक्रमपेतं च
नष्टास्वादं च फेनवत्। माहिषावचादोषपराकें ब्राह्मे। आरण्यमहिषीक्षीरं शर्करा शुंठिसंयुतं। मधुकं तु हिनं चैव दद्यात्तद्
घृतं पयः। स्मृतिसीरशरः श्राद्धकौमुद्यां चैवं। यद्यपि याज्ञवल्क्येन अन्नं पर्युषितं भोज्यं स्नेहाक्तं चिरसंचितं। अस्नेहा
अपि गोधूमयवगोरसविक्रियाः। इति पर्युषितं दध्यादि भोज्यमुक्तं। तथापि गुडमरीचाक्तस्य पर्युषितं दध्यादिभोज्यमु
क्तं। तथापि गुडमरीचाक्तस्य पर्युषितदोषोनोच्यते। इति हेमाद्रिः। तत्रैव ब्राह्मे। कालशाकं तंडुलीयं वास्तूकं मूलकं
तथा॥ शाकमारण्यकं चैव दद्याच्छ्राद्धेषु नित्यशः। तंडुलीयं सूक्ष्मपत्रमिति हेमाद्रिः। तत्रैव ब्राह्मे। कालशाकं तंडुली एमः
यं वा महाराष्ट्राणां माट इति प्रसिद्धं। आरण्यकं फांजी चूवारि। तत्रैव। दाडिमं मागधी चैव नागरार्द्रकतिंतिणी। आम्रा

तकंजीरकंचकुबेरंचैवप्रोज्झयेत।मागधीपिप्पलीनागरमुंडी।कुबेरंकुस्तुंबरा।धनीयाइतिप्रसिद्धं।वायवीये।आग
स्त्यस्याशिखास्ताम्राःकषायाःसर्वएवचाशिवाःनवपल्लवाः।प्रभासखंडे।आरामस्यतुलसीमंताःकलायाःसर्वएवच।सीमं
तानवपल्लवाः।कौर्मे।तमालंशतकंदंचमध्यालुंशीतकंदलीं।मध्यालुःमोहालकंदः।शीतकंदलीरतालुइतिप्रसिद्धः।अ
यवली॥मार्कंडेयपुराणे।यच्चोत्कोचादिनाप्राप्तंपतिताघदुपार्जितं।अन्यायकन्याशुल्कार्थंद्रव्यंयच्चविगर्हितं।
पित्रर्थेमेप्रैयच्चणुपाहृतं।चंद्रोदयेशंखः।भूस्तृणांसुरसाशिग्रुपालेक्यासूचकंतथा।कूष्मांडालाबुवार्त्ताककोविदा
रांश्चवर्जयेत।पिप्पलीमरीचेचैवतथावैपिंडमूलकं।कृतंचलवणंसर्वंवंशाग्रंचविवर्जयेत।राजमाषान्मसूरांश्चको
द्रवान्कोरदूषकान।लोहितान्वृक्षनिर्यासानश्राद्धकर्मणिवर्जयेत।भूस्तृणंकाशीदेशेप्रसिद्धं।सुरसानिर्गुंडी
तिमाधवः।तुलसीतिंपृथ्वीचंद्रः।सोचभक्षत्वेननिषिद्धानुपुष्पत्वेनेतिगौडाः।पालकीपालइतिप्रसिद्धा।सूचंजल
लजःशाकःसूचकमितिपाठेखदिरशाकइतिहेमाद्रिः।कृतंलवणंसामाराभिन्नं।सैंधवंलवणंचैवतथामानससंभ
वं।यच्चसामुद्रिकंभवेदितिशूलपाणिः।पवित्रेपरमेह्येतेप्रत्यक्षइतिनित्यशः।इतिवायवीयोक्तेः।यत्तुभविष्ये।
तर्ज्ञेन्यार्द्रंतकाष्ठंचपत्यक्षंलवणंतथा।तत्रखालवणंखारीतिप्रसिद्धं।मुक्कालस्तालवणांत्रिएत्वेतलवनेवसे

ताइतिब्राह्मोक्तोरीति शूलपाणिः। क्षीरलवणमितिपाठात्। क्षीरमिश्रितं लवणं निषिद्धं इतिवाचस्पतिः। मरीचान्याद्रीणीति हे
माद्रिः। राजमाषा रक्तराइतिप्रसिद्धाः। कोरदूषकः वनकोद्रवः। चंद्रिकायां शंखः। पिंडालकं चतुंडीरं करमर्दं च नालिकां। कूष्मांड
बहुबीजा निश्राद्धे दत्त्वा व्रजत्यधः। पिंडालकं महाराष्ट्रेषु पेंढाळु इति प्रसिद्धं। तुंडीरं बिंबीफलमिति केदेवः। करमर्दं कारवंदा इति
प्रसिद्धं। तत्रैव बीबिडालोच्छिष्टमाघ्रातं श्वा द्धेयपत्वेन वर्ज्जयेत। कूष्मांडं महिषीक्षीरमाढक्यो राजसर्षपाः। चणका राजमाषा
श्च घ्नंति श्राद्धं न संशयः। वृद्धपराशरः। करीरफलपुष्पाणि विडंगा मरीचानि च जंभारिकास्तु जंबीरास्तुपक्वं बीजपूरकं। जं
बुलाबूनि पिप्पल्यः पटोलं पिंडमूलकं। मसूरांजनपुष्पं च श्राद्धे दत्त्वा व्रजत्यधः। जंबुमसूरां माधवीये चतुर्विंशतिमते।
यावनालान् कुलत्थांश्च वर्ज्जयंति विपश्चितः। यावनाला जोंधला इति। अत्र चणकादीनि विहितानि निषिद्धानि तेषां
विकल्पः। अन्यथा श्यामाकैश्च गणकैः शाकैर्नवारैश्च प्रियंगुभिः। गोधूमैश्च तिलैर्मुद्गैर्मासं प्रीणयते पितृनिति। गो
धूमैरिक्षुभिर्मुद्गैः सतीनैश्चणकैरपीति च हेमाद्रौ कौर्मे विष्णुधर्मादिविरोधः स्यात्। पिप्पलीमरीच्यादेरुक्त प्रत्यक्षस्य नि
षेधो न तन्यद्रव्यमिश्रस्य सौवीरतिक्तैर्लवणादिभिस्तत्पाकस्य सिद्धिर्महतीहयेक्ता। तद्वीजपूरान्मरीचाद्देयो ग्रासि राम.
दृष्टदेयं ननु दुष्यतीहेभवेघत्रयतत्रदीयमाने श्राद्धेषु देयं विधिवत्तद्देवस्तन्मङ्गपंमितिब्रुवंति। एतन्निषेधेतरविषयी चंद्र

कार्यां। कृष्णधान्यानि सर्वाणि वर्ज्ज्येच्छ्राद्धकर्मणि॥ न वर्ज्ज्येत्तिलांश्चैव मुद्गमाषांस्तथैव च॥ मत्स्ये। मसूरशणनिष्पा
वराजमाषकुसुंभकाः। पद्मबिल्वार्कधत्तूरपारिभद्राटरूषकाः॥ न देयाः पितृकार्येषु पयश्चाजाविकं तथा॥ कोद्रवोदा
रवरककपित्थमधुकातसी। एतान्यपि न देयानि पितृभ्यः श्राद्धमिच्छता॥ निष्पावा वाढकाः बिल्वं च रक्तं निषिद्धं। जंबी
रं। रक्तबिल्वं च शालस्यापि फलं त्यजेदिति ब्राह्मोक्तेः। पारिभद्रे निंबतरुरित्यमरः। रक्तमंदारइति हेमाद्रिः। आटरूषो
वासा तत्पुष्पं। उद्दारः कंचनारः। मधुकं ज्येष्ठीमध्विति चंद्रिका। चणकाः वनमुद्गाः हेमाद्रौ ब्रह्मांडे। आमनालूढमन्त्रा
घ्रं पादोपहतमेव च। अमेध्यैर्जंगमैः स्पृष्टं शुष्कं पर्युषितं च यत्॥ द्विःस्विन्नं परिदग्धं च तथैवाग्रावलेहितं। शर्करा की
टपाषाणैः केशैर्यच्चाप्युपद्रुतं। पिण्याकं मथितं चैव तथातिलवणं च यत्॥ सिद्धाः कृताश्च ये भक्ष्याः प्रत्यक्षलवणीकृ
ताः। वाससा चावधूतानि वर्ज्यानि श्राद्धकर्मणि॥ द्विःस्विन्नं यत्सकृत्पाकेन भक्ष्यमपि हिंगुजीरकादिसंस्कारार्थं पुनः
पच्यते तद्वर्ज्यं। यत्तु तिक्रशीकान्नविकाराद्द्विपाकेनैव भक्षणार्हं तन्न निषिद्धं। अग्रावलेहितमास्वादितपूर्वं। पर्युषित
स्य सदा निषेधेपि पूर्वनर्वचनं। अपूपाश्च करंभाश्च धानावटकसक्तवः। शाकं मांसमपूपं च सूपं कृशरमेव च। यवागूपा
यसं चैव यच्चान्यत्स्नेहसंयुतं॥ सर्वं पर्युषितं भोज्यं शुक्तं चेत्परिवर्ज्जयेदिति माधवीये यमोक्तवटकादेरपि पर्युषितत्वस्य

२५५

निषेधार्थमिति चंद्रिकादयः। वर्ज्येषु विश्वामित्रः। कपित्थकुत्तुकं चैव नालिकेरं च पैनिकं। जंबूफलादि पक्वचपिण्याकं तंदु
लीयकं। हेमाद्रौ षट्त्रिंशन्मते। वर्ज्या मर्कटकाः श्राद्धे राजमाषास्तथैव च॥ मर्कटाः लंकाः। पैठीनसिः। वृंताकं नालिकापोत
कुसुंभाश्मंतकानि च। शाकानामभक्ष्याणीति। पोतं पोईं इति प्रसिद्धं। कुसुंभं करडइ इति महाराष्ट्रे प्रसिद्धं। मार्कंडेयः। वर्ज्या श्वा
भिषवानि स्युं शतपुष्पा गवेधुकाः। जंबीरं कफलं वर्ज्ये कोविदारश्च नित्यशः। सुक्तमिति। चंद्रिका। संधानकमिति पृथ्वीचं
द्रः। शतपुष्पा सोवा इति प्रसिद्धं। शाट्यायनः। मारिषं नालिका चैव रक्ता याचकलंबिका। असुरान्नमिदं चैव पितॄणां नोप
तिष्ठते। मारिषं मध्यदेशे मरुसा इति महाराष्ट्रे राजगिरा इति प्रसिद्धी कलंबिका वेणवाकृतिपत्रा। तत्रैव। गांधारिकाप
टोलानि श्राद्धकर्मणि वर्जयेत्। गांधारिका तंडुलीयमिति चंद्रिका॥ जवासाख्या दुरालभेति केदेवः। भारते। हिंगु
द्रव्येषु शाकेषु अलाबु लसुनं तथा। कुकुंडकान्यलानूनि कृष्णलवणमेव च। पुनः अलाबुग्रहणं निषेधार्थमिति
पृथ्वीचंद्रः। कुकुंडकं वर्तुलं श्वेतं शाकं। करकं बहंकलिंगोच्छं वर्जयेदम्लवेतसं। हेमाद्रौ ब्राह्मे। वार्त्ताकं पंचलोमशा
निकलानि च। कालिंगं रक्तचारं च चीणाकं घृतचारकं॥ कपालं काचमाचीचकां जंपिंडमूलकं। गृंजनं चुक्रिकां चै एमः
व गर्जरं जीकंकं तथा॥ वृंताकं श्वेतं। कंदूरं श्वेत वृंताकं कुंभांडं च विवर्जयेत्। इति देवलोक्तेः। तेन कृष्णस्यानिषेधः।

इति चंद्रिका माधवी। वस्तुतस्तु मदाश्वेतनिषेधात्पुनः श्राद्धे निषेधो मृग्यः। तेन भक्ष्यस्य कूष्मांडं ताकस्यापि निषेधार्थमितिवर्षं। कंडूरणकपिकच्छू। कुंभांडं वृत्तालाबु। पंचशिंबं वल्लमसूरणमाषमठकुलत्थाः। लोमशानि कपिच्छानि। रक्तचारलोहितचारफलं। वीणाकं दीर्घकूष्मकर्कटी। धूतचारं सिविच्छित चारफलं। चारोलीति प्रसिद्धं। कपालं नालिकेरं। काचं कतुवृत्तफलं। मारीचं आईमरीचानि। गृंजनं पलांडुभेदः। पश्चिमदिशि प्रसिद्धं। ननु गाजरं। तस्य पृथगुक्तेः। हेमाद्रिणा तु गृंजनं गाजरमेवोक्तं। तद्विंत्यं। शुक्तिका चिरकालसक्तं पानकं। चंद्रिकायां हारीतः। नवटप्लक्षोदुंबरशेलुदधित्थनीपमातुलिंगानि भक्षयेत्। शेलुः श्लेष्मांतकः। भोकरसंज्ञः। दाधित्थं कापित्थं। कपित्थं स्मृतिसारे। क्षीरे तु लवणं दत्वा उच्छिष्टमपि यद्धृतं। स्नानं रजकतीर्थेषु ताम्रेण गव्यं सुरासमं। गौडनिबंधे। स्मृतिसारे। नालिकेरोदकं कांस्ये ताम्रपात्रे स्थितं मधु। गव्यं च ताम्रपात्रस्थं मद्यतुल्यं घृतं विना। ताम्रपात्रे कृतं मांसं पञ्चगव्यं घृतेतरत्। आमिषं तु गवां मांसं दधिमद्यं पयो रजः। द्रव्यांतरयुतं मांसं पयसा संयुतं दधि। पयो नु कृतसौरं च ताम्रपात्रे न दुष्यति॥ अथ जलं॥ शुचि गोतृप्तिकृत्तोयं प्रकृतिस्थं महीगतं। वर्ज्यं जलमुक्तं हेमाद्रौ। ब्राह्मांडे। दुर्गंधि फेनिलं क्षारं पंकिलं पल्वलोदकं। न भवेद्यत्र गोतृप्तिर्नक्तं यच्चाप्युपाहृतं। यच्च सर्वार्थमुत्सृष्टं यच्चाभोज्यनिपानजं॥ निपानो जलाशयः। त

द्व्यंसलिलंतातसदैवश्राद्धकर्मणि।अच्छितलेशंखः।स्नानमाचमनंदानंदेवतापितृतर्पणं।शूद्रोदकैर्नकुर्वततथामेघाद्वि
निःसृतैः।हेमाद्रावादित्यपुराणे।चिरपर्युषितंवा।पिशूद्रस्पृष्टमथापिवा।जान्हव्यास्नानदानादौपुनात्येवसदापयः।कात्या
यनः।आपोनिशिनगृह्णीयान्नपिबेच्चकदाचन।उद्धृत्याग्निमुपर्यग्रेधार्याश्चोधाम्नेद्धतीरपेत।रजोदोषेतुप्रागुक्तं।नारदी
ये।त्यजेत्पर्युषितंपुष्पंत्यजेत्पर्युषितंजलं।नत्यजेज्जाह्नवीतोयंतुलसीपद्म।बिल्वकं।अन्यान्यपिपृथ्वीचंद्रोदयेमात्स्ये
।मध्याह्नःखड्गपात्रंचतथानेपालकंबलः।रौप्यंदर्भास्तिलागावोदौहित्रश्चाष्टमःस्मृतः।पापंकुत्सितमित्याहुस्तस्यसंता
पकारिणः।अष्टावेतेयतस्तस्मात्कुतपाइतिविश्रुताः।ब्राह्मे।यतिस्त्रिदंडःकरुणाराज्ञतंपात्रमेवच।दौहित्रंकुतप
कालश्छाग्याःकृष्णाजिनंतथा।शास्तानीतिशेषः।दौहित्रखड्गपात्रं।दृतिहित्रेखड्गपात्रं।इतिकल्पतरुः।अपरार्केस्मृत्यंत
रे।अपत्यंदुहितुश्चैवखड्गपात्रंतथैवच।घृतंचकपिलायागावोदौहित्रमितिकीर्तितं।ग्रहणादे।अमावास्यागतेसोमेया
नुखादतिगोस्तृणं।तस्यागोर्यद्भवेत्क्षीरंतद्दौहित्रमुदाहृतं।स्मृतिसंग्रहेतुछिष्टं।शिवनिर्माल्यंवांतंचमृतकर्पटं।श्राद्धे
सप्तपवित्राणिदौहित्रःकुतपास्तिलाः।उच्छिष्टंवत्सस्योच्छिष्टंदुग्धमित्यर्थः।शिवनिर्माल्यंगंगोदकं।वांतमंधु।मृतक एम
र्पटंतसरीपट्टांतिलेषु।आपस्तंबः।अटव्यांयेसमुत्पन्नाअकृष्टफलितालता।तेवैश्राद्धेपवित्राःस्युस्तिलोत्तेन

।तिलाःस्मृताः।अभावेग्राम्याः।गौराःकृष्णास्तथारण्यास्तथैवत्रिविधास्तिलाः।इतिब्राह्मोक्तेः।अथवर्ज्यानिचंद्रिकायांयमः
कुक्कुटोविड्वराहश्चकाकश्वाथबिडालकः।वृषलीपतिश्चवृषलःषंढोऽवीरारजस्वला।एतेतुश्राद्धकालेतुवर्ज्जनीयाः
प्रयत्नतः।खंजःकाणःकुणिःश्वित्रीदातःप्रेष्यकरस्तथा।न्यूनांगोप्यतिरिक्तांगस्तमप्यपनयेत्ततः।वायवीये।अन्नं
पश्येयुरेतेतुयदिवैहव्यकव्ययोः।उत्सृष्टव्यप्रधानार्थंसंस्कारस्तापदिस्मृतः।सुमंतुः।चंडालादिवीक्षितमन्नमभो
ज्यमन्यत्रमृद्भस्म।हिरण्योदकस्पशति।तत्रैवजमदग्निः।शुद्धवत्योथकूष्मांड्यःपावमान्यस्तरत्समाः।पूतेनवारि
णाद्भिःसर्वदोषमपानुदत्।चंद्रोदये।पादुकोपानहौछत्रंचिचरक्तांबरंतथा।।रक्तपुष्पंचमार्जारंश्राद्धभूमौविव
र्ज्जयेत्।।निर्म्लयदीपोघंटानिनादोहरसंनिधानंशंबूकशंखौकदलीदलंच।उन्मत्तजात्यर्कहयारिजानिश्राद्धस
वैगुण्यकराण्यमूनि।हयारिःजंमहिषीक्षीरादि।।अथश्राद्धदिनकृत्यं।चंद्रोदयेउशनाः।गोमयोदकैर्भूमिभाजनशो
चंकुर्यात्।पराशरः।कांजिकंदधितक्रंचश्रृतंवाश्रृतमेववा।पूर्वमेवनदातव्यंमेकोद्दिष्टेचपार्वणे।हेमाद्रौपराशरः।गृ
हाग्निशिशुदेवानांब्रह्मचारितपस्विनां।तावन्नदीयतेकिंचिद्यावत्पिंडान्ननिर्वपेत्।कौर्मे।तिलानवाकिरेत्तत्रसर्वतोबंध
येद्द्विजान्।तत्रैवदेवलः।तथैवपंक्तितोदत्ताप्रातःस्नात्वामहांबरः।आरभेतनवैःपात्रैरन्नारंभंचबांधवैः।अन्नात्मनेपरास्स

यमेवपाकःकार्यः। अशक्तौपत्न्या। तदभावेबांधवैः। ततस्तानिपपाचाशुसीताजनकनंदिनीति पद्मालिंगादि हेमाद्रिः श्राद्धदीपकलिकायामाश्वलायनः। समानप्रवरैर्भिन्नैः सपिंडैश्चगुणान्वितैः। कृतोपकारिभिश्चैव पितृकार्यंप्रशस्यते। व्यासः। गृहिणीचैवसुस्नातापाकंकुर्यात्। प्रयत्नतः। निष्पंनेषुचपाकेषुपुनःस्नानंसमाचरेत। पृथ्वीचंद्रोदयेब्राह्मे रजस्वलांचपाखंडांपुंश्चलींपतितांतथा। त्यजेच्छूद्रांतथावंध्यांविधवांचान्यगोत्रजां। व्यगकर्णांचतुर्थाहस्नातामपिरजस्वलां। वर्ज्जयेच्छ्राद्धपाकार्थममातृपितृवंशजां॥ मातृपितृवंशजाभिन्नांत्यजेदित्यर्थः। स्मृतिसारे। नपाकंकारयेत्पुत्रीमन्यांवाप्यसगोत्रजां। मृतवंध्यांचगर्भघ्नींगर्भिणींचैकडमुखीं। पाकपांभांडानितुहेमाद्रौनागरखंडे। सौवर्णान्यथरौप्याणिकांस्यताम्रोद्भवानिच। मार्त्तिकान्यपिभव्यानिनूतनानिदृढानिच। तत्रैवादित्यपुराणे। पचेदन्नं। नेहुस्नातःपात्रेषुशुचिषुस्वयं। स्वर्णादिधातुजातेषुमृण्मयेष्वपिवाद्विज। अछिद्रेष्वविलिप्तेषुतथानुपहतेषुच। नायसेषुनाभिन्नेषुदूषितेष्वपिकार्हिचित। पूर्वकृतोपयोगेषुमृन्मयेषुनतुक्काचित। वायुपुराणे। नकदाचित्पचेदन्नमयःस्थालीषुपैतृकं। अयसोदर्शनादेवपितरोविद्रवंतिहि। कालायसंविशेषेणनिंदंतिपितृकर्मणि। फलानांचैवशाकानांछेदनार्थानियानितुमहानसेपिशस्त्राणितेषामेवहिसन्निधिः। रष्यतेनेतरस्यात्रशस्त्रमात्रस्यदर्शनं। श्राद्धदेशेतुविदुषापितृणांतृप्तिमिच्छता।

एम्रः

महानसेपि पक्वानामपि कार्यं न दर्शनात् । तत्रैवापचमानस्य मांडेषु मध्यात्ताम्रमयेषु चाप्समुद्धृतेति वैघो गास्ति त्स्नङुः
खमहार्सबात् । तत्रैवादित्यपुराणे । पक्वान्नस्थापनार्थं तु शस्यं तेदारुजान्यपि । दृष्यादीन्यपि कार्याणि । यज्ञियेपि
ढारुभिः । यमः । विवाहे प्रेतकार्ये च मातापित्रोः क्षये हनि । नवभांडानि कुर्वीत यज्ञकाले विशेषतः । अथ पाकाग्निः । हेमा
द्रौ प्रजापतिः । औपासने नामान्नसिद्धिः स्तौकरणमेव च । पृथ्वीचंद्रोदये गिराः । शालाग्नौ तु पचेदन्नं लौकिके वापि नि
त्यशः । यस्मिन्नग्नौ पचेदन्नं तस्मिन्होमो विधीयते । मनुः । वैवाहिकेग्नौ कुर्वीत गृह्यं कर्म यथाविधि । पंचयज्ञविधानं
च पक्तिं चान्वाहिकीं द्विजः । श्राद्धस्य गृह्यलमुक्तंमपार्केण । अत्र विशेषः कर्मप्रदीपे । प्रातर्होमं तु निर्वर्त्य समुद्ध
त्य हुताशनात् । शेषं महानसे कृत्वा तत्र पाकं समाचरेत् । पाकांते मिंतमादाय स्वगृह्याग्नौ तु पुनः क्षिपेतात ततोग्नि
न्वैश्वदेवादिकर्म कुर्यादतंद्रितः । तदभावे लौकिके । ततः पचेयुरन्नानि निर्वापानंतरं शनैः । वैवाहिकेग्नावन्य
त्र लौकिके वापि संयतः इति कलिकायां संग्रहोक्तेः । पित्रर्थं निर्वापपक्षे त्वेतत्पर्यः । अत एव हेमाद्रौ वायुपुराणे । पि
त्रर्थं निर्वपेद्भूमौ कूर्चे वा दर्भसंस्कृते । इति तत्रैव पाद्ममात्स्ययोः । अग्निमान्निर्वपेत्पैत्र्यं चरुं वा सममुष्टिभिः पितृभ्यो
निर्वपामीति सर्वं दक्षिणतो न्यसेत् । चरुग्रहणादन्नशाकादावितिहेमाद्रिः । पिंडपितृयज्ञार्थपाकविषयो यं निर्वाप

इतिपृथगुक्तं।अयंचेतरेषामग्निः।आश्वलायनानांतुगुरुणामभिमता।अस्यतोवापक्षीयमाणा।अमावास्यायांशांतिकर्मकु
र्वन्नित्यादिसूत्रेणपचनाग्नेस्त्यागमुक्त्वाइहैवायमितरोजातवेदाइत्यर्द्धर्चेनमंशमीमयीभ्यामरणीभ्यामग्निंमंथेत्सप
चनाग्निर्भवतीतिसूत्रेवृत्तौचोक्तेः।पचनाग्नावेवपाकः।बौधायनेनाप्युक्तेः।आहृतपचनाग्नावौपासनंवा।भिवदंतीति
स्मार्तोग्नौपाकन्यथा।त्वाविषयइतिकेचित्।वस्तुतस्तुपूर्वोक्तस्यसर्वाधानिविषयत्वंयुक्तं॥शिष्टाचारोपिनपचनोदृश्य
ते।अंडविलायामपिसर्वाधानपक्षेवैश्वदेवंश्राद्धंचपचनेकुर्यादन्यथौपासनेइत्युक्तं।अग्नौकरणंतुप्रयोगपारि
जातादिभिरा।वृद्धिकादिसर्वश्राद्धेषुपिंडपिंडपितृयज्ञव्यातिषंगोक्तेर्लौ।केकेपचनेवापाकेकृतेपिगृह्याग्नौपक्वंचरु
णौवक्कार्यइतिप्रतिभाति।मदनरत्नेप्येवंविधुरोछिन्नाग्न्यादेस्तुएषोदिविविधानेनाग्निसंपादनमित्युक्तं।हरिहरभाष्ये।
इतिपाकाग्निः।चंद्रिकायांमार्कंडेयः।अर्कःषट्सुमुहूर्तेषुगतेषुप्रयतान्द्विजान्।प्रत्येकंप्रेषयेत्तेषांप्रदायामलकोदकं।
देवलः।ततोनिवृत्तेमध्याह्नेकृत्तरोमनखान्द्विजान्।अभिगम्ययथान्यायंप्रयच्छेद्दंतधावनं।तैलमभ्यंजनंस्नानंस्ना
नीयंचपृथग्विधं।पात्रैरौडुंबरैर्दद्याद्वैश्वदेविकपूर्वकं।औडुंबरैस्ताम्रमयैः।अत्रचौरामलकस्नानादिनिषिद्धतिथ्या
दिव्यतिरिक्तविषयमितिहेमाद्रिर्माधवश्च।यत्तुचंद्रिकायांप्रचेताः।तैलमुद्वर्तनंस्नानंदद्यात्सर्वाह्णएवतु।श्राद्धभुग्भ्यो

एमः

नखश्मश्रुछेदनं तु न कार्यमिति तन्निषिद्धतिथ्यादिविषयं॥ निषिद्धतिथ्यादि तु प्रागुक्तं। अभ्यंगे तु कालिकायां कात्यायनः। तैलमुद्वर्तनं देयं ब्राह्मणेभ्यः प्रयत्नतः। तैलाभ्यंगे तु कालिकायां कात्यायनः। तैलमुद्वर्तनं देयं ब्राह्मणेभ्यः अभ्यंगश्च कर्तव्यो वर्ज्यकालं न चिंतयेत्। अपरार्के प्रचेताः। स्नातोधिकारी भवति दैवे पित्र्ये च कर्मणि॥ श्राद्धकृच्छुक्लवासाः स्यान्मौनी च विजितेंद्रियः। हेमाद्रौ जाबालिः। तांबूलं दंतकाष्ठं च स्नेहस्नानमभोजनं। रत्यौषधपरान्नानि श्राद्धकर्त्ता विवर्जयेत्। वस्त्रविशेषमाह। तत्रैव भृगुः। नग्नः स्यान्मलवद्वासा नग्नः कौपीनकेवलः। द्विकच्छोनुत्तरीयश्च अकच्छो वस्त्र एव च। नग्नः काषायवासाः स्यान्नग्नश्चार्द्रपटः स्मृतः। नग्नो द्विगुणकच्छः स्यान्नग्नो रक्तपटैः स्मृतः। नग्नस्तु स्निग्धवस्त्रः स्यान्नग्नः स्यूतपटस्तथा। ततः कर्त्ता ऊर्ध्वपुंड्रं कुर्यात्। जपे होमे तथा दाने स्वाध्याये पितृकर्मणि। तत्सर्वं नश्यति क्षिप्रमूर्ध्वपुंड्रं विना कृतमिति हेमाद्रावुक्तेः। यज्ञो दानं तपो होमः स्वाध्यायः पितृकर्म च। वृथा भवति विप्रेंद्र ऊर्ध्वपुंड्रं विना कृतमिति बृहन्नारदीयात्। ऊर्ध्वं च तिलकं कुर्यात् दैवे पित्र्ये च कर्मणीति वृद्धपराशरोक्तेश्च। अन्ये तु ऊर्ध्वपुंड्रं द्विजातीनामग्निहोत्रसमो विधिः। श्राद्धकाले च संप्राप्ते कर्त्ता भोक्ता च वर्जयेदिति वामहस्ते चपेटर्भागहेंगबलेतथा। ललाटे तिलकं दृष्ट्वा निराशाः पितरो गता इति संग्रहोक्तेः। ऊर्ध्वपुंड्रं त्रिपुंड्रं वा चंद्राकारमथापि वा श्राद्धकर्त्ता

नकुर्वीतयावत्पिंडान्ननिर्वपेत इति विश्वप्रकाशेवरणाच्चनकार्यमित्याहुः॥ अत्राचमाद्यवस्था॥ अतएववृहन्नारदीये।
ऊर्ध्वपुंड्रंचतुलसीश्राद्धेनेच्छंतिकेचन। ऊर्ध्वपुंड्रविधिर्विप्रविषयः। निषेधःकर्तृपरः इति पृथ्वीचंद्रः। यत्तुहेमाद्रौदेवलः।
ललाटेपुंड्रकंदृष्ट्वास्कंधेमाल्यंतथैवच। निराशाःपितरोयांतिदृष्ट्वाचवृषलीपतिमितितदूर्ध्वेन। त्रिपुंड्रविषयं। श्राकिं
ऽस्नानाद्भंधाद्यैर्नालंकुर्यात्स्वविग्रहमित्याश्वलायनोक्तेः। पुंड्रंवर्तुलमित्यपरार्केमदनरत्नेच। पृथ्वीचंद्रस्तुपुंड्रंत्रि
पुंड्रैर्दुं। ऊर्ध्वंचतिलकंकुर्यान्नकुर्याद्वैत्रिपुंड्रकं। निराशाःपितरोयांतिदृष्ट्वाचैवत्रिपुंड्रकमितिवृद्धपराशरोक्तेः। भोक्तु
स्तिर्यग्लेपोभवस्येवा। वर्जयेत्तिलकंभालेश्राद्धकालेचसर्वदा॥ तिर्यग्वोर्ध्वपुंड्रंवाधारयेत्तुप्रयत्नतः॥ इतिव्यासोक्ते
रित्याह। पृथ्वीचंद्रोदयेब्राह्मे। सदर्भेणतुहस्तेनयःकुर्यात्तिलकंबुधः। आचम्यसविशुद्धेतदर्भत्यागेनचैवहि। त
तःश्राद्धंप्रारभेत। तत्कालमाहापरार्केगौतमः। आरभ्यतुकुतपेश्राद्धंकुर्यादारौहिणंबुधः। विधिज्ञोविधिमास्था
यरौहिणंतुनलंघयेत्। एतदेकोद्दिष्टेपार्वणेतत्क्रंमात्स्ये। ऊर्ध्वंमुहूर्तात्कुतपाद्यन्मुहूर्तचतुष्टयं। मुहूर्तपंचकं
ह्येतत्स्वधाभवनमिष्यते। तथा। मध्याह्नेसर्वदायस्मान्मंदीभवतिभास्करः। तस्मादनंतफलदस्तत्रारंभोविशिष्य एमः
ते। अथश्राद्धपरिभाषा। चंद्रिकायांकात्यायनः। दक्षिणांपातयेज्जानुंदेवानुपरिचरन्सदा। पातयेदितरंजानुपितॄ

न्यीचान्नदा। बौधायनः। प्रदक्षिणंतुदेवानांपितॄणामप्रदक्षिणं। देवानामृजवोदर्भाःपितॄणांद्विगुणास्तथा। पृथ्वीचं
द्रोदयेशंखः। आवाहनार्घसंकल्पेपिंडदानान्नदानयोः। पिंडाभ्यंजनकालेचतथैवांजनकर्मणि। अक्षय्यासनयोः
पाद्येगोत्रंनामप्रकाशयेत। तत्रैवपरिशिष्टे। स्वधोचपिंडदानेचांधधूपान्नयेतथा। संकल्पेचासनेदीपेअंजनाभ्यं
जनेतथा। अन्नार्घ्यदानाद्यंतेषुगोत्रंनामचकीर्त्तयेत। कलिकायांसंग्रहे। आसनावाहनेपाद्येअन्नदानेतथैवच।
अक्षय्येपिंडदानेचषट्सुनामानिकीर्त्तयेत। मत्स्ये। संबंधंप्रथमंब्रूयात्ततोगोत्रंनामतथैवच। पश्चाद्रूपंविजानीयात्क्र
मएषसनातनः। तत्रैव। सकारेणतुवक्तव्यंगोत्रंसर्वत्रधीमता। सकाद्धस्यचमहात्मनः। भिक्षोःपंचशिखस्याहंशि
ष्यःपरमधार्मिकः। इतिमोक्षधर्मेप्रयोगाच्च। तेनगोत्रयोःपर्यायत्वाच्छाखाभेदाद्व्यवस्थेतिशूलपाणिः। एतद्येषामा
म्नातंतेषामेव। हेमाद्रौवृद्धप्रचेताः। गोत्रंस्वरांतंसर्वत्रगोत्रस्याक्षय्यकर्मणि। गोत्रस्तुतर्पणेप्रोक्तःएवंदातानमुह्य
ति। सर्वत्रैवपितःप्रोक्तंपितातर्पणकर्मणि। पितुरक्षय्यकालेतुपित्रेसंकल्पनेतथा। शर्मन्नर्घ्यादिकेकार्यंशर्मात
र्पणकर्मणि। शर्मणोक्षय्यकालेतुपितॄणांदत्तमक्षयं। स्वरांतंसंबुध्यंतं। इतिहेमाद्रिः। तत्रैवचंद्रिकायांचस्मृत्यं
तरे। गोत्रस्यत्वपरिज्ञानेकाश्यपंगोत्रमुच्यते। यस्मादाहश्रुतिःसर्वाःप्रजाःकाश्यपसंभवाः। यत्तुसत्याषाढः।

अथानाज्ञातबंधोः पुरोहितगोत्रेणाचार्यगोत्रेणवेति। तच्चविवाहपरं। नामोच्चारणे विशेषमाह हेमाद्रौ बौधायनः।
शर्मांतं ब्राह्मणस्योक्तं वर्मांतं क्षत्रियस्य तु। गुप्तांतं चैव वैश्यस्य दासांतं शूद्रजन्मनः। पित्रादिनामाज्ञाने तत्रेवापृथि
वीषात्पिता वाच्यस्तात्पिता चांतरिक्षसत्। अभिधानापरिज्ञाने दिविषत्प्रपितामहः। पित्रादीनां नाम पुत्रे संज्ञायतेतदा
आपस्तंबसूत्रेप्येवं। एतदन्यथाख्यापरं। आश्वलायनानां तूक्तं तत्सूत्रे यदि नामान्यविद्वान् ततः पितामह प्रपिता
महेति ब्रूयात्। तत्कारिकापि। नामानि चेन्न जानीयात्ततेत्यादिवदेत्क्रमात्। ततेति संबंधमात्रपरं। ततेति पितृव्या
दावपि तथे। ति गौडाः। स्त्रीणां दांतं नाम ज्ञेयं दांतं नाम स्त्रीणामिति गोभिलोक्तेः। केचिद्देवीशब्दांतमाहुः अन्ये तु दे
वीदासेति द्वयोः समुच्चयमाहुः। हेमाद्रौ नारायणः। विभक्तिभिस्त्रयल्लिंगं हीयते पितृदैवते। तत्सर्वं सफलं ज्ञेयं विपरीत
निरर्थकं। चंद्रिकास्मृत्यर्थसारे: अर्घ्यप्रासनयोः षष्ठी द्वितीयावाहने तथा। अन्नदाने चतुर्थी स्याच्छेषाः संबुद्धयः स्मृ
ताः। यत्तु व्यासः। चतुर्थ्यासने नित्यं संकल्पे च विधीयते। प्रथमा तर्पणे प्रोक्ता संबुद्धिमपरे जगुः। अत्र शाखाभेदाद्व्य
वस्थेति हेमाद्रिः। हेमाद्रौ भृगुः। अर्घ्यावनेजनं पिंडमन्नं प्रत्यवनेजने। संबुद्धिं तत्र कुर्वत शेषे षष्ठीं विधीयते। तत्रैव एम:
मातुर्विशेषो नागरखंडे। मात्रे तथा मातुरासने कल्पने स्तयो। गोत्राद्येगोत्राद्याः प्रथमा। विभक्तयः। हेमाद्रौ प्रभासखं

डेः यज्ञोपवीतिना कार्यं दैवं कर्म प्रदक्षिणं। प्राचीनावीतिना कार्यं पितृकर्माप्रदक्षिणं। अनुपनीस्त्रीशूद्रादिस्तु
उत्तरीयेणैव सव्यापसव्ये ज्ञेयोतस्योपवीतस्थानीयत्वात्। अपसव्यं कमादृद्वं कृत्वा काश्चित्सगोत्र नः इति ब्राह्म
णेति वाचयति। यत्तु केचित् सदोपवीतिना भाव्यमित्यस्य पुरुषार्थत्वात्। प्राचीनावीतिकालेप्युपवीतांत
रेणान्यत्कार्यमेवेति तन्न विशेषणबाधात्। जन्मदर्शिः। सूत्रश्रोत्रजपं त्यक्त्वा। पिंडाघ्राणं च प्रदक्षिणं। आह्वानं स्वधातें
वार्घ्यं विना च परिवेषणं। विसर्जनं नैमित्तमस्य माशिषं प्रार्थनं तथा। विप्रदक्षिणं चैव स्वस्तिवाचनकं विना। पितृनुद्दि
श्यकर्तव्यं प्राचीनावीतिना सदा। हेमाद्रौ संग्रहे। आदौ विप्राग्निशौचांते अर्चने विकरे कृते। पिंडानप्यर्चयित्वा च विसृज्य
ब्राह्मणांस्तथा। आचामेद्बहुकर्ता च स्नाने क्षुते सुप्तस्तु। आद्यंतयोर्द्विः। आचामेच्छेषेषु च सकृत्सकृत्। तत्रैवाश्वा
ह्वानं भेदस्नाने च पादशौचार्चनांतयोः। विकरे पिंडदाने च षट्कृत्वाचमनमिष्यते। आश्वलायनः। दानाध्ययनदेवार्चनज
पहोमव्रतादिकान्। नकुर्याच्छ्राद्धदिवसे प्राग्द्विजानां विसर्जनात्। एतन्नित्यवर्ज्यमिति बोपदेवः। इदं विष्णुमिन्द्रे
वपरं। विष्णोर्निवेदितान्नेन यष्टव्यं देवतांतरं। पितृभ्यश्चापि तद्देयं तदानंत्याय कल्पते। पितृशेषं तु यो दद्याद्धु
रये परमात्मने। रेतोधाः पितरस्तस्य भवंति क्लेशभागिनः इति स्कांदात्। पितरः सर्वमनुष्याविष्णुना। शितमन्नं

२५१ तीति श्रुतेः। यः श्राद्धकाले हरिभुक्तशेषं ददाति भक्त्या पितृदेवतानां। तेनैव पिंडांस्तुलसीविमिश्रानाकल्पकोटिं पितरस्तृप्ताः। इति ब्राह्मोक्तेश्चेति श्रीभरतस्वामिना न्रसिंहपरिचर्यादयः। एतत्सर्वं निबंधरिणोक्तान्निर्मूलं। अत्र विशेषो हेमाद्रौ विष्णुधर्मे। श्राद्धादितु समभ्यर्च्य नृवराहं जनार्दनं। शिवपुराणे। पूजयित्वा शिवं भक्त्या पितृश्राद्धं प्रकल्पयेत्। पूर्वं निशेषधक्ता विहिताभिन्नपाः। तथा हेमाद्रौ। देवार्चा दक्षिणाङ्गादिः पादस्नानं समुद्दिशेत्। शिरोंगस्नानानुपादेषु वामांगादि च पैतृके॥ कलिकायां स्मर्यंतरे। श्राद्धारंभे चयेद्दर्भाः पादशौचे विसर्जयेत्। अर्चनादौ तु येद्दर्भा उच्छिष्टांते विसर्जयेत्। मार्जनादौ तु येद्दर्भाः पिंडोच्छादने विसर्जयेत्। उन्नामादौ तु येद्दर्भा दक्षिणांते विसर्जयेत्। प्रार्थनादौ तु येद्दर्भा नमस्कारे विसर्जयेत्। ऊहमाह विष्णुः। मातामहानामप्येवं श्राद्धं कुर्याद्विचक्षणः। मंत्रोहेन यथान्यायं शेषाणां मंत्रवर्जितं। यथान्यायमिति बहुवचनांतः पितृशब्दस्तत्र सर्वं पितृवाचित्वान्नोहः। तत्रापि शुंधंतां पितर इत्यत्रोह एव सर्वपितृवाचित्वे उत्तरमंत्रद्वयवैयर्थ्याद्बहुवचनेन सुनोद्यते। प्रकृतावसमर्थत्वात्त्वाशानितिवत्। ऊर्गां ते च नोहः। तस्माद्बहुवचनोहे इति निषेधात्। एकोद्दिष्टेप्येवं। प्रेतैकोद्दिष्टे त्वेकवन्मंत्रानूहेनैकोद्दिष्ट इति विष्णूक्तेरूहः। अत्र बहुवचनस्याप्यूहो वचनात्। वृद्धश्राद्धे तु विशेषं वक्ष्यामः। शेषाणामिति पित्र्यार्घ्ये

एमः

कोद्दिष्टे आवाहनादिमंत्रवर्जंकार्यमितिकल्पतरुः। ऊहयोग्यपितृपदयान्मंत्र एवातत्रनप्रयोज्यः। ननूहः नापिपितृ
शब्दे एहितःप्रयोज्यइतिशूलपाणिः। अर्थांतरत्वोक्तंप्राक्। बह्वृचकारिकायां। अर्घ्यप्रदानमंत्रेत्वमभ्रू आदि १ इमाच
रेत्। शुंधंतामितिपित्र्यादौमादिपदमाचरेत्। मातुःश्राद्धे पिंडस्थाने येच तामत्रावित्यत्रनोहः इतिवृ। त्रैकृत। तथा। मातुः
श्राद्धेप्यनूहेनकुर्यात्पिंडानुमंत्रणं। दशादानमुपस्थानंतद्वत्कार्यमितिस्थितिः। प्रवाहणामनूहेनतद्वत्प्राशनमिष्यते।
तथा। आयंतुनस्तिलोसीति उशंतस्त्वेतियानितु। अनूह्याःपितृशब्दोत्रपितृसामान्यवाचकः। आवस्त। बानांच
वक्ष्यते। हेमाद्रौमार्कंडेयः। स्नातःस्नातान्समाहूतान्स्वागतेनार्चयेत्पृथक्। कलिकायांनारदीये। प्रायश्चित्तवि
शुद्धात्मातेभ्योनुज्ञांप्रगृह्यच। दद्याद्दैवब्राह्मदंडार्थेहिरण्यंकुशमेवच। तत्रैवसंग्रहे। तिथिवारादिकंज्ञात्वासंक
ल्पश्चयथाविधि। प्राचीनावीतिनाकार्यंसर्वंसंकल्पनादिकं। संबंधंप्रथमंब्रूयान्नामगोत्रेतथैवच। वस्वादिरूप
तांचापिस्वपितृणामनुक्रमात्। चंद्रोदयेनारदीये। श्राद्धार्थेसमनुप्राप्तान्विप्रान्भूयोनिमंत्रयेत्। आपस्तंब
स्तुपूर्वेद्युर्निमंत्रणंपरेद्युर्द्वितीयंतृतीयमामंत्रणमित्याह। पूर्वमप्यानिमंत्रणीयाःइतिनिवेदनरूपंआद्यं। तद्विधि
माहशौनकः। गृहीत्वामुकसंज्ञस्यामुकगोत्रस्यचामुके। श्राद्धोतवैश्वदेवार्थंकरणीयःक्षणःस्त्वया। इत्येवंश्राह

कुद्धपादौं तथैव च दक्षिणतः। आद्यस्य कर्त्ता स ब्रूयात्त्वं प्राज्ञो तु भवामिति। सवदेत्प्राज्ञवानी। इतरस्त्वं प्रति द्विजः। देवौ पार्वणौ
ह्नरवाद्दैवौ वाच्यौ॥ पित्र्याद्येप्यनेनैव। ह्यातीतविधिना द्विजान्। ततः कर्त्ता बह्वृचो नाहिताग्निः पिंडपितृयज्ञं परिस्तरणादी
ध्माधानांतं कुर्यात्। अर्द्धाधानिभोप्येवमिति प्रयोगपारिजाते परिशिष्टे च भाष्यकारमते आह्निकेप्येवं। स्मृतिकारम
तेनेदं हेमाद्रौ शंभुः। संमार्ज्जितोपलिप्ते तु द्वारि कुर्वीत मंडले। उदक्प्लवमुदीच्यं स्याद्दक्षिणं दक्षिणाप्लवं। व्याघ्रः। उत्त
रेत्तत्संमुक्तान्पूर्वाग्रान्तत्र विन्यसेत्कुशान्। दक्षिणे दक्षिणाग्रांस्तु तस्मिन्विन्यसेत्कुशान्। तत्रैव बौधायनः। चतुर
स्रं त्रिकोणं च वर्त्तुलं चार्द्धचंद्रकं। कर्त्तव्यमानुपूर्व्येण ब्राह्मणादिषु मंडलं। तत्रैव वृद्धगार्ग्यः। हस्तद्वयमितं कार्यं
वैश्वदेविकमंडलं। दक्षिणे तु चतुर्हस्तं पितॄणामंघ्रिशोधने। कलिकापासंग्रहे। प्रादेशमात्रं देवानां चतुरस्रं तु मंडलं।
त्र्यस्रं षडंगुलं तस्माद्दक्षिणे वर्त्तुलं तथेति। उक्तं। यत्तु स्मृत्यन्तरे। गर्त्तः पंचांगुलो विप्रे जानुमात्रो महीभुजि॥ प्रादेशमा
त्रो वैश्ये च स्याधिकः स तु शूद्रके॥ तिर्यगूर्ध्वप्रमाणेन व्याख्यातो देवपित्र्ययोः। चतुरस्रं वर्त्तुलं च कथितं गर्त्तलक्षणं॥ पा
दप्रक्षालनं प्रोक्तमुपवेश्यासने द्विजान्। इति। पृथ्वीचंद्रे क्षालनं कुर्यान्निराशा। येतरोगताः। तत्सम्मतत्वे मंडलाग्रे ज्ञेयं पृथ
क् तत्र गोमये हेमाद्रौ भृगुः। असंतर्जीर्णदेहापारंध्या प्रसूता विशेषतः। आहीमानवसूतायान गोर्गोमयमाहरेत्। मा

एमः

त्स्योक्षतताभिः स्वपुष्पाभिस्तदभ्यर्च्यापि सव्यवत्या विप्राणां क्षालयेत्पादान्नाभिवंधपनः पुनः। प्रत्यङ्मुखः स्थितः कुर्याद्द्विप्रपादाभिषेचनं। तत्रैव भविष्ये। प्रक्षालयेद्द्विप्रपादानशन्नोदेवीरितित्र्यचा। पृथ्वीचंद्रोदये हरद्वसिष्टः। नकुशग्रंथियुक्तपाद्यं दद्याद्द्विचन्नराः। कलिकायां संग्रहे। ततः प्रक्षालयेत्पादौ भार्या स्नावितवारिणा। तथा श्राद्धकाले यदा पत्नी वामे नीरप्रदा भवेत्। आसुरं तद्भवेच्छ्राद्धं पितृणांनो। पातिष्ट तत्रैव। नाधः प्रक्षालयेत्पादौ कर्त्ता पित्रादिकर्मसु। पाद्यानंतरमर्घ्यमपि दद्यादिति हेमाद्रिः। तत्रैव लोगाक्षिः। मंडलाडुत्तरे देशे दद्यादाचमनीयकं तत्रैव। विधाय क्षालनं तेषां द्विराचमनमिष्यते। स्वयं चापि द्विराचामेद्विधिज्ञः श्रद्धयान्वितः। हेमाद्रौ नारदीये। पत्राचमनवारिणा। पादप्रक्षालनोदकैः। संगच्छंते बुधाः श्राद्धमासुरं तत्प्रचक्षते। हेमाद्रौ व्यासः। सव्येनैवासनं दत्वा दक्षिणोदक्षिणं करं। व्याहृतीभिः समस्ताभिः। आसनेषु प्रवेशयेत्। समाध्वंमिति चैवोक्तौ दक्षिणं जानु संस्पृशन्। आस्यतामिति तान्ब्रूयादासनं संस्पृशन्नपि। हेमाद्रौ शातातपः। द्वौ दैवे पूर्वतो विप्रौ प्राङ्मुखावुपवेशयेत्। पित्र्ये तूदङ्मुखांस्त्रींश्च बहूंश्चाथ यथासामगात्। याज्ञवल्क्यः। द्वौ दैवे प्राक्त्रयः पित्र्ये उदगेकैकमेव वा॥ यत्तु हेमाद्रौ हारीतः। दक्षिणाग्रदर्भेषु प्राङ्मुखान्ब्राह्मणान्भोजयेदुदङ्मुखो नित्येके। इति। तन्मैत्रायणीयविषयं। प्राङ्मुखान्भोजयेदुदङ्मुखो नित्येकर इति तस्यारिशिष्टत।

२५३ विकल्प इति हेमाद्रिः॥ माधवीये यमः॥ भिक्षुको ब्रह्मचारी वा भोजनार्थमुपस्थितः॥ उपविष्टेष्वनुप्राप्तः कामं तमपि भोजयेत्॥
कौर्मे। अतिथिर्यस्य नाश्नाति न तच्छ्राद्धं प्रचक्षते। विप्रनियमा माधवीये। पवित्रपाणयः सर्वेतिच मौनव्रतान्विताः। उच्छि
ष्टसंस्पर्शं वर्जयतः परस्परं। तत्रासनानि। पृथ्वीचंद्रोदये यमः। आसनं कुतपं दद्यादितरद्वा पवित्रकं। हेमाद्रौ चमत्का
रखंडे॥ पितॄणां पादितं हेमं राजतं वापि चासनं। येन तत्राप्रमपं दत्तं मासनं पि। पतत्कर्माणि। सर्वो दिव्यासनाहृदो नाहेप
च्यवते दिवः। हेमाद्रौ नागरखंडे। अपशंकुमयं पीठं प्रदेयं नोपवेशने। कालेकायांसंग्रहे। हैमं दुकूलं नेपालं मा
विकं दारुजं तथा। ताम्रं पात्रं बृषी चैव विष्टरादि च विन्यसेत्। अग्निदग्धान्यापन्नानि भग्नानि च विवर्जयेत्।
हेमाद्रौ छागलेयः। पश्चाद्द्वागाद्दूपक्रम्य प्राच्यां पंक्ति यथा भवेत्। दक्षिणाग्रं। स्थितास्तेषां पितॄणां श्राद्धकर्म
णि। पुलस्त्यः। श्रीपर्णा वारुणी क्षीरी राजवृक्षांस्त्वे कदंबकं। सप्तमं बकुलं पीठं पितॄणां दत्तमक्षयं। संग्रहे। शमी च
काश्मरी शेलुः कदंबो वरुणस्तथा। पंचासनानि शस्तानि श्राद्धे देवार्चने तथा। कारिका। द्वौ दैवे प्राङ्मुखौ पित्र्ये त्री एमः
न्विप्रानुदगाननमात्। पैठीनसिः। कुतपः श्राद्धवेलायां श्रोत्रियो यदि दृश्यते। आश्वलायनः। नीवीनासोदशां
तेन स्वाद्यार्थं प्रबंधयेत्। वृद्धयाज्ञवल्क्यः। दाक्षिणेकटिदेशे तु तिलैः सहकुशत्रयं। पद्मकाष्ठीयं। नीवीकायो

दशाग्रास्त्रिर्वीमकुशौकुशौः सहेतितद्वृद्धिश्राद्धे। पितॄणांदक्षिणेपार्श्वेविपरीतान्तुदैवेविकिरइतिस्मृत्यंतरात। वामेदक्षिणेवेत्या
चाणरघवस्थेतिमदनपारिजाते आचार्यैःप्राणायाममत्रपंक्तुतागायत्रीस्मरणंतथा। आद्वकर्त्रोस्मीतिवदेद्विप्रैर्वाच्यंकु
रुष्वच। ब्राह्मे। ततस्तिलान्स्वगृहेतुस्मिन। विकिरेद्वाप्रदक्षिणं। श्रद्धयापरयायुक्तोजपेदपहताइति। स्मृत्यर्थसारे। अपह
ताइतितिलान्तविकार्यउदीरता। मित्यृचाप्रोक्षयेत। पराशरः। तद्विष्णोरितिमंत्रेणगायत्र्याचप्रयत्नतः। प्रोक्षयेदन्ने
जातेतुभूइहद्याद्दिक्षुरूपे। हेमाद्रौब्रह्मांडे आद्यभूमौगपांध्यात्वाध्यात्वादेवंगदाधरं। ताभ्यांचैवनमस्कारंततःश्रा
द्धप्रवर्त्तते। देवताभ्यःपितृभ्यश्चमहायोगिभ्यएवच। नमःस्वाहायैस्वधायैनित्यमेवनमोनमः। आदिमध्यावसा
नेषुत्रिरावृत्तंजपेद्बुधः। पितरःक्षिप्रमायांतिराक्षसाःप्रद्रवंतिच। तत्रैवस्कांदे। तिलारक्षंतित्यसुरान्दर्भारक्षंतिरा
क्षसान॥ पंक्तिंवैश्रोत्रियोरक्षेदतिथिःसर्वरक्षकः। वसिष्ठः। शुद्धवतीभिःकूष्मांडीभिःपावमानीभिश्चपाकादिप्रोक्ष
येत। अथदेवार्चा। तत्रप्रत्युपचारमाद्यंतयोरपोदद्यादित्युक्तं। हद्रौस्मृत्यर्थसारे। हेमाद्रौब्राह्मे। आसनेष्वासनंदद्याद्वा
मेवादक्षिणेपिवा। पितृकर्माणिवामेचदैवेदद्यात्तुदक्षिणेप्रचेताः। आसनेष्वासनंदद्यान्नतुपाणौकदाचन। धर्मो
सीत्यथमंत्रेणगृह्णीयुस्तेतुतान। कुशान॥ धर्मोसिविशिराजाप्रतिष्ठितइतिमंत्रः। गालवः। दर्भानादायपहस्ताभ्यांगृ

हीत्वा दक्षिणे करे दैवे क्षणाः क्रियतां तु निरंगुष्ठं करं ततः। उत्तिष्ठेति द्विजान् ब्रूयुस्ते प्राप्नोतु भवानिति। कर्त्ता ब्रूयात्ततो विप्रः प्राप्नवानीति वै वदेत्। पृथ्वीचंद्रोदये बृहन्नारदीये। यवैर्दर्भैश्च विश्वेषां देवानामिदमासनं। दत्वेति भूयो दद्यात् दैवे क्षणा इति स्मरणात्। तत्र च षष्ठ्या चतुर्थ्या वा कार्यमिति मम एव। ततोर्घ्यं कल्पयेदिति मन्वादयः। शौनक जपं ताभ्यामर्घ्यं एदितस्य देवार्चनस्योक्तेराश्वलायनानां दैवेर्घ्यदानं नेति बोपदेवः। पारिशिष्टप्रयोगपारिजातविशेषात्। वृद्धिश्राद्धे तु दैवेप्यर्घ्यं दद्यात्। देवेभ्योपि पृथक् दद्यादिहार्घ्यं श्रुतिनोदनादिति। शौनकोक्तेः। अथार्घ्यपात्रं। पृथ्वीचंद्रोदये मत्स्यपाद्मयोः। पात्रं वनस्पतिमयं तथा पर्णमयं पुनः। जलजं वापि कुर्वीत तथा सागरसंभवं। ब्राह्मे। सौवर्णताम्ररौप्याश्मस्फाटिकं शंखशुक्तयः। भिन्नान्यपि हि योज्यानि पात्राणि पितृकर्मणि। हेमाद्रौ प्रजापतिः। सौवर्णं राजतं ताम्रं खाड्गं मणिमयं तथा। यज्ञियं चमसं चापि अर्घ्यार्थं पूजयेद्बुधः। अत्र विप्रैकत्वद्वित्वचतुष्ट्वादावप्यर्घ्यपात्रे द्वे एव। मानवसूत्रे तु दैवे द्वे पित्र्ये त्रीणि। पित्र्ये एकैकमुभयत्रैवेत्युक्तं। तदेकविप्रपरं। पात्रालाभपरं वेति हेमाद्रिः। मदनरत्ने तु दैवे एकपात्रमुक्तं। पृथ्वीचंद्रोदये पित्र्ये त्रीणि पैतृकपात्राणि द्वे दैवे। वैश्वदेविक इति। बृहत्पराशरोक्ते दैवे एवेत्याह। बह्वृचानां तु दैवे विप्रद्वित्वेऽप्येकमर्घ्यपात्रादर्द्धशो दद्यादित्युक्तं। परिशिष्टप्रयोगपारिजाते च। कालिकायां

एकं

हारीतः॥दत्तमक्षय्यतांयातिखड्गेनार्घ्यंतुयत्कृतं॥वृद्धमनुः।मृन्मयंदारुजंपात्रंअयःपात्रंचयद्भवेत्।राजतंदैविके
कार्येशिलापात्रंविवर्जयेत्॥पुराणसमुच्चये।मृत्स्नाभवंतथाकांस्यमारकूटंजतुसंभवं।त्रपुसीसलोहभवंसदापा
त्रंविवर्जयेत्।तत्रैव।अष्टांगुलंभवेत्पात्रंपितॄणांराजतंशुभं।दशांगुलंतुदेवानांसौवर्णंशक्तितःकृतं।स्थापये
दर्घ्यपात्रेद्वेन्युब्जेतत्रकुशोपरि।द्वेद्वेपवित्रेविधिवत्पात्रयोश्चोपरिक्षिपेत्।यज्ञपार्श्वः।पवित्रेस्थेतिमंत्रेणप
वित्रेछेदयेत्तुते।ओषधीमंतरेकृत्वाअंगुष्ठांगुलिपर्वणोः।स्फ्येननकाष्ठेनलोहेननमृन्मयननखादिभिः।वसिष्ठः।
तूष्णींप्रोक्ष्यांभसापात्रेकुर्यादूर्ध्वबिलेततः।प्रत्येत्पात्रयुग्मंतुकृत्वोपरिपवित्रके।वृद्धपराशरः।पात्रद्वयमथा
र्घ्यार्थंतैजसंचैकंवक्षनः।प्राङ्मुखोमरतीर्थेनशन्नोदेव्योदकंक्षिपेत्॥यवोसीतियवांस्तत्रतूष्णींपुष्पाणिचंद
नं।मानवसूत्रे।सुमनसःप्रक्षिप्यासूयवान्प्रक्षिप्येतियवोसीतिमंत्रः।पाद्मे।यवोसिधान्यराजोसिवारुणोमधु
मिश्रितः।निर्णोदःसर्वपापानांपवित्रमृषिभिःस्मृतः॥यो॥भेलेनतु।यवोसिसोमदेवत्येइतिमंत्रोत्रस्वाहाशब्दउ
क्तः।हेमाद्रौयमः।यवहस्ततोदेवान्विज्ञाप्यावाहनंप्रति।आवाहयेदनुज्ञातोविश्वेदेवासइत्यृचा॥वृद्धपराशरः।ततः
सव्यकरंन्यस्यविप्रदक्षिणजानुनि।देवानावाहयिष्येहमितिवाचमुदीरयेत्।आवाहयेत्यनुज्ञातोविश्वेदेवासआग

२५५ ताविश्वेदेवाःशृणुतेममितिमंत्रद्वयंपठेत्। श्राद्धविशेषेविश्वेदेवनामाज्ञानेहेमाद्रौबृहस्पतिः। उत्पत्तिंनामचैवैतेषांनवि-
दुर्येद्विजातयः अयमुच्चारणीयस्तैर्मंत्रःश्रद्धासमन्वितैः। आगच्छंतुमहाभागाविश्वेदेवामहाबलाः। येयत्रविहिताः
श्राद्धेसावधानाभवंतुते। इदंचावाहनंअर्घ्यापात्रासादनात्। प्राक्। हेमाद्रिणोक्तंतत्रकातीयैःप्राक्कार्यं। तथैव
तत्सूत्रात्। अन्यैस्तदुत्तरं। पृथ्वीचंद्रोदयेशंखः। सयवंपुष्पमादायचरणादिशिरोंतकं। अर्चतेत्यर्चनंकुर्यादंतरे
चोदकंतथा। पित्र्येतु। मूर्द्धादिपादपर्यंतं। पित्र्येकार्यंतुपूजनं। पादप्रभृतिमूर्द्धांतंदैविकेपूजनंभवेत्।। शिरः
प्रभृतिपादांतंनमोवइतिपैतृके। इतिमदनरत्नेप्रचेतसोक्तेः। कलिकायांसंग्रहे। तिष्ठन्कृतांजलिर्भूत्वापठेन्मं-
त्रंसमाहितः। विश्वेदेवाःशृणुतेत्यागच्छत्वपांततः। हेमाद्रौजातूकर्ण्यः। ततोर्घपात्रसपत्रिवाच्य। पित्वाद्विजोत्त-
मान्। तद्धस्तेचार्घपात्रंतुस्वाहार्घ्याइतिविन्यसेत्। गार्ग्यः। दत्वाहस्तेपवित्रंचकृत्वापूजांचपादतः। यादिव्याइ-
तिमंत्रेणहस्तेष्वर्घंविनिक्षिपेत्। संग्रहे। विश्वेदेवाइदंवोर्घ्यमितिदानंसमादिशेत्। तदंतेस्वाहानमइतिवाच्यं
यादिव्याइतिमंत्रेणस्वाहाकारनमोंतकमितिहेमाद्रौनागरखंडात्। आथर्वणसूत्रे। तु। पाद्यमर्घ्यमाचमनी- एम:
यंद्विजकरेनिनयेदित्यस्यैवत्रयमुक्तं।। गभस्तिः। अर्घ्यंचपिंडदानंचस्वहस्तहप्येत्तथैवच। गंधपुष्पादिकंसर्वंहस्त

नैवतु दापयेत। प्रतिविप्रं यादिव्या इति च्छाहत्रिः। बह्वृचानां त्वनेनत्त्वार्घ्यानुमंत्रं। ततः पात्रं दक्षिणे देवेभ्यः स्थानमसीति
न्युब्जमुत्तानं वा कार्यमिति गारुडे उक्तं॥ एतदापस्तंबानां नियतमन्येषां न हि माद्रौ विष्णुधर्मे। गंधैः पुष्पैश्च धूपैश्च व
स्त्रैश्चाप्यथभूषणैः। अर्चयेद्ब्राह्मणान्शक्त्या श्रद्दधानः समाहितः। पृथ्वीचंद्रोदये मार्कंडेयः। चंदनागुरुकर्पूरकुं
कुमानि प्रदापयेत। कलिकायां स्मृतिः। गंधद्वारेति वै गंधं मापनेते च पुष्पकं। धूरसीत्यमुना धूपं तु दीप्यस्वेति दीपकं।
पुष्पं वस्त्राणि मंत्रेण वस्त्रं दद्यात्प्रयत्नतः। आसने स्वासनं ब्रूयादर्घ्ये स्वर्घ्यं द्विजोत्तमः। सुगंधश्च सुपुष्पाणि सुमा
ल्यानि सुधूपकः। सुज्योतिश्चैव दीपे तु स्वाच्छादनमिति क्रमः। विप्राणां वर्तुलं वा त्रिपुंड्रं वा न कार्यं। हेमाद्रौ देवलः।
ललाटे पुंड्रकं दृष्ट्वा स्कंधे मालां तथैव च। निराशाः पितरो यांति दृष्ट्वा च वृषलीपतिं। पुवर्तुलमित्यपरार्के मदनर
त्ने च। पुंड्रं त्रिपुंड्रं वर्तुलमर्धचंद्रं च। ऊर्ध्वं च तिलकं कुर्यान्न कुर्याद्वै त्रिपुंड्रकं। ऊर्ध्वं च तिलकं कुर्याद्दैवे पित्र्ये च कर्मणि।
निराशाः पितरो यांति दृष्ट्वा चैव त्रिपुंड्रकमिति वृद्धपराशरोक्तेः। तिर्यग्लेपो भवस्यैवा कर्त्तव्ये तिलकं भाले श्राद्धकाले
च सर्वदा। तिर्यगूर्ध्वं त्रिपुंड्रं वा धारयेत्तु प्रयत्नतः। इति व्यासोक्तेरिति पृथ्वीचंद्रः। यत्तु ब्रह्मनारदीये। ऊर्ध्वपुंड्रं च तुल
सीश्राद्धे नेच्छंति केचनेति। तत्स्वर्तपरं। हेमाद्रौ ब्राह्मे। घृतिकं मृगनाभिं च रोचनां रक्तचंदनं। कालेयकं तथा गंधं तुरु

ष्ठं चापि वर्ज्जयेत्॥ कस्तूर्यौ विकल्प इति हेमाद्रिः वृद्धशातातपः पवित्रं तु करे कृत्वा यः समालभते द्विजाना राक्षसानां भवेद्धु
द्धं निराशैः पितृभिर्गतैः॥ पुष्पं तु ब्राह्मे। जाती चंपक लोध्रं श्च मल्लिका बाणबर्बरी। चूताशोकाटरूषं च तुलसी शतपत्र
कं। कुब्जकं तगरं चैव भृंगमारण्यकेतकी। यूथिका मतिमुक्तं च श्राद्धे योग्यानि भो द्विजाः। कमलं कुमुदं पद्मं पुंडरीकं
च यत्नतः इंदीवरं कोकनदं कल्हारं च निवेदयेत्। हेमाद्रौ वायुभविष्ययोः सुकुमारैः किसलयैर्यवदूर्वांकुरैरपि। सं
पूजनीयाः पितरः श्रेयःकामेन सर्वदा। स्कांदे। जातिश्च सर्वदा त्याज्या मल्लिका श्वेतयूथिका। जलोद्भवानि सर्वाणि
कुसुमानि च चंपकं॥ तत्रैव वृद्धमनुः। न निमुक्तः शिखावावर्ज्जं माल्यं शिरसि धारयेत्। वर्ज्या निरष्वी चेंद्रोद्ये भवि
ष्ये। केतकी तुलसीपत्रं बिल्वपत्रं च वर्ज्जयेत्। द्रोणं च करवीरं च धत्तूरं किंशुकं तथा॥ माधवी पेस्तत्यर्थसारे च
तुलसी निषिद्धा। तुलसीनिषेधो निर्मूल इति हेमाद्रिः। पिंडपाः तुलसीगंधमाघ्राय पितरस्तुष्टमानसाः प्रयां
ति गरुडारूढास्तत्पदं चक्रपाणिनः। इति प्रयोगपारिजाते पाम्रोक्तेरिति बोपदेवः। वृद्धपराशरः। न जातीकुसु
मैर्विद्वान् बिल्वपत्रैश्च नार्चयेत्। जपादिकसुमं सिंदीरूपिका सकुरंटिका। पुष्पाणि वर्ज्जनीयानि श्राद्धकर्म णमः
णि नित्यशः। हेमाद्रौ शंखः। उग्रगंधीन्यगंधीनि चैत्यवृक्षोद्भवानि च। जलोद्भवानि देयानि रक्तान्यपि विशेषतः

श्रृंगिणः। न जातीकुसुमानि दद्याच्च कदलीपत्रमिति। जात्यां विकल्प इति हेमाद्रिः। निषेधः पिंडविषयः। कुंदं शंभौ च मो
दद्याच्चोन्मत्तं गरुडध्वजे। पिंडे जातीं च नो दद्यात् देवीमर्केण नार्चयेदिति वृद्धयाज्ञवल्क्योक्तेरिति बोपदेवः। स्मृतिसारे। अ
गस्त्यं भृंगराजं च तुलसी शतपत्रिका॥ चंपकं तिलपुष्पं च षडेते पितृवल्लभाः। केतकीं करवीरं च बकुलं कुंदकं त
था। पाटलां चैव जातीं च श्राद्धे यत्नेन वर्जयेत्। केचित्पिंडे तुलसीमाहुः। पितृपिंडार्चनं श्राद्धे यैः कृतं तुलसीद
लैः। प्रीणिताः पितरस्तेन यावच्चंद्रार्कमेदिनीति मार्कंडेयोक्तेः। धूपस्तत्रैव विष्णुधर्मे। धूपस्तु गुग्गुलो देयस्त
थाचंदनसारजः। अगुरुश्च सकर्पूरस्तुरुष्ककल्कस्तथैव च॥ विष्णुः। घृतमधुयुक्तं गुग्गुलं श्रीखंडं देवदारुसरलादि
दद्यात्। तत्रैव देवलः। ये हि प्राण्यंगजा धूपा हस्तवाता हताश्च ये। न ते श्राद्धे नियोक्तव्या। ये च केचोग्रगंधयः। घृ
तं च केवलं दद्याद्गुग्गुलं वा तृणगुग्गुलं। दीपमाह विष्णुः। घृतेन दीपो दातव्यस्तिलतैलेन वा पुनः। वसामेदोद्भवं दीपं प्रयत्ने
न विवर्जयेत्। वस्त्रं ब्राह्मे। कौशेयं क्षौमकार्पासं दुकूलमहतं तथा॥ श्राद्धे श्वेतानि यो दद्यात्कामानाप्नोति चोत्तमान्। हेमाद्रौ ब्र
ह्मवैवर्ते। यज्ञोपवीतं दातव्यं वस्त्राभावे विजानता॥ पितृभ्यो वस्त्रदानस्य फलं तेनाश्नुतेऽखिलं। तत्रैव पाद्मे। निष्क्रयो वा
यथाशक्ति वस्त्राभावे प्रदीयते। अन्यान्यपि च देयानि तत्रैव कापुराणे। धात्वादिनिर्मितारम्यादापि काष्ठादुकर्मणि।

२४७ पितॄनुद्दिश्य यो दद्यात्स भवेद्भाजनं श्रियः। योर्घ्यप्रदानपात्रं तु पात्रमारात्रिकस्य च। दद्यात्पितृभ्यः प्रयतस्तस्य स्वर्गेक्षया गतिः॥ विष्णुधर्मे। यः कंचुकं तथोष्णीषं पितृभ्यश्चोपपादयेत्। ज्वसेरोद्भवानि दुःखानि स कदाचिन्न पश्यति। स्त्रीणां श्राद्धे तु सिंदूरं दद्युः शृङ्गातकानि च॥ निमंत्रिताभ्यः स्त्रीभ्यो ये तु स्युः सौभाग्यसंयुताः॥ हेमाद्रावादित्यपुराणे। न कृष्णवर्णं दातव्यं नापि कार्पाससंभवं॥ पितृभ्यो नापि मलिनं नोपभुक्तं कदाचन। न छिद्रितं नापदशं न धौतं कारुणापि च। कार्पासनिषेधोऽन्यसंभवे तत्रैव। पितॄन्सत्कृत्य वासोभिर्दद्याद्यज्ञोपवीतकं। यज्ञोपवीतदानेन विना श्राद्धं तु निःफलं॥ एतद्यति स्त्रीशूद्रश्राद्धेषु देयमिति हेमाद्रिः। तत्रैव नृसिंहपुराणे। कमंडलुं ताम्रमयं श्राद्धेषु प्रददाति यः। काष्ठेन निर्मितं वापि नालिकेरमथापि वा॥ दद्यात्कमंडलुं श्राद्धे स श्रीमानभिजायते। यो मृत्तिकाविरचितान् श्राद्धेषु च घटान् शुभान्। प्रदद्यात्करकान्वापि सोक्षय्यं विंदते सुखं। तत्रैव। उपानच्छत्रवस्त्राणि भुक्तिपात्रं कमंडलुं। शयनासनयानानि चान्नं सुसंस्कृतं गंधं तांबूलं दीपचामरं॥ पितृभ्यो यः प्रयच्छेत्तु विष्णुलोकं स गच्छति॥ सौरपुराणे। चामरं तालवृंतं च श्वेतच्छत्रं च दर्पणं॥ दत्वा पितॄणामेतानि भूमिपालो भवेदिह। तत्रैव नंदिपुराणे। अलंकाराः प्रदातव्या यथाशक्ति हिरण्मयाः। केयूरहारकटकमुद्रिकाकुंडलादयः। स्त्रीश्राद्धेषु प्रदेयाः स्युरलंकाराश्च योषितां॥ मंजीरमेखलादामकर्णिकाकंकणादयः। तथा। आ

एणः

दर्शव्यजनछत्रशय्यनासनपादुकाः। मानोज्ञाः पटवासाश्च सुगंधाश्च सुमुष्टिकाः। अंगारधानिकाः॥ शीते योगार्थहृद्यमपसृपः।
कटिसूत्राणि तौप्याणि मेखलाश्चैव कंबलाः। कर्पूरादेश्च भांडानि ताबूलायतनानि च॥ भोजनाधारपंत्राणि पतद्ग्राहं
स्तथैव च॥ तथांजनशलाकाश्च केशाभांच प्रसाधनं। एतान्दद्यात्तु यः सम्यक्सोश्वमेधफलं लभेत्। स्कांदे। सौवर्णेन
रजतं चापि कांस्येनाप्यथ निर्मितं। दत्वा भोजनपात्रं तु संप्राप्नुवति भूतले। वामनपुराणे। बंदीकृता स्त्रियो ये केचित्त्व
थं वा यदि वा परैः। येन केनाप्युपायेन यस्तान्मोचयते नरः॥ पितरस्तस्य गच्छेति शाश्वतं पदमव्ययं पाराशरः। वाचये
त्परपूर्णत्वं वासो दत्वा विधानतः। नारदीये। देवैश्च समनुज्ञातो यज्ञोस्मिन्नग्रगणां लघ्य। तत्रापि च्चे आसनाद्यशेषमर्चि
नकांडं वैश्वदेविकं ह्येयं॥ विशेषस्तूच्यते। तत्रासने द्विगुणाभुग्नकुशाः। अत्रावाहनमासनात्पूर्वं वार्घ्यपूरणोत्तरं वाग्नौ
करणानंतरं वेति स्मृतिषु पक्षद्वयमुक्तं। एषां शाखाभेदेन व्यवस्था। द्वितीयपक्ष एव बहुसंमतः। तत्रार्घ्यमाहाश्वला
यनः। तैजसाश्ममयेषु त्रिषु पात्रेष्वेकद्रव्येषु वा दर्भांतर्हितेष्वपः प्रसिंच्य शन्नोदेवीरित्यनुमंत्र्य तिलानावपति तिलो
सि सोमदेवत्यो गोसवो देवनिर्मितः। प्रत्नवद्भिः प्रत्तः स्वधया पितॄनिमाल्लोकान्प्रीणयाहि नः स्वधा नम इति च। अश्म
मयं स्फाटिकादि मृन्मयं हस्तकृतमेव। कुलालचक्रनिष्पन्नमासुरं दैविकं न तत्। तदेव हस्तघटितं दैविकं केवलं त

येति। छंदोपरिशिष्टात्। अन्यान्यपि पवित्राणि पूर्वमुक्तानि। मनुः अन्नाभावे द्विजाभावे यद्येको ब्राह्मणो भवेत्। पात्राण्यासादये त्रीणि न तु ब्राह्मणसंख्यया। दत्तकादेः कर्तुर्द्वे। पितृत्वादावपि वचनात्त्रीण्येव पात्राणीति हरिहरः। माधवीये वैजवापः। अर्घ्येपि पितॄणां त्रीण्येव कुर्यात्पात्राणि धर्मवित्। एकस्मिन्वा बहुषु वा ब्राह्मणेषु यथाविधि। हेमाद्रावप्येवं। अत्रानुमंत्रणं सकृत्। तिलोसीत्यस्य प्रतिपात्रमावृत्तिः। पितृशब्दस्यानूहश्चेति वृत्तिकृत्। दर्भश्च त्रिगुणं पवित्रं तिस्रस्तिस्रः शलाकास्तु पितृपात्रेषु पार्वणे। एकोद्दिष्टे शलाकैकां निधायोदकमाहरेत्। इति हेमाद्रौ चतुर्विंशतिमतात्। तत्रैव विष्णुः दक्षिणाग्रेषु दर्भेषु दक्षिणापवर्गं चमसेषु पात्रेषु पवित्रांतर्हितेष्वप आसिंचेच्छंनो देवीरिति मंत्रेण जलन्यासे च नंवं कुशाभिन्नविषयं। अस्मिन्पक्षे प्रतिपात्रं मंत्रावृत्तिः। कारिकायां। गंधपुष्पाणि चैतेषु पात्रेषु प्रक्षिपेद्बुधः। ब्राह्मे। जलं क्षीरं दधि कृतं तिलतंडुलसर्षपान्। कुशाग्रमधुपुष्पाणि दत्वा वामे ततः स्वयं। जानुकस्पर्शः। ततोर्घ्यपात्रसंपत्तिं वाचयित्वा द्विजोत्तमान्। तदग्रे चार्घपात्राणि सभार्घ्याणि विन्यसेत्। ततस्तिलहस्तो विप्रमसव्यजानो दक्षिणाकांत्यस्यावाहनं पृच्छेत्। अत्र गोत्रसंबंधनामानि द्वितीयांतानीति प्रागुक्तं। बैजवापगृह्ये। इति पितॄनावाहयिष्यामीत्यामंत्र्य। कोर्मे। अपसव्यं। एमः

ततः कृत्वा पितॄणां दक्षिणामुखः। आवाहनं ततः कुर्यादुशंतस्त्वेत्यृचा बुधः। आवाह्य तदनुज्ञातो जपेदायंतु नस्ततः

अत्र सव्यस्यापि प्रागुक्तो विकल्पः। अत्राद्यमंत्रावृत्त्यास्मत्पितरममुकशर्माणममुकगोत्रं वसुरूपमावाहयामीत्या
धुरक्षामूर्ध्वादिपादांतं तिलान्विकीर्यायंतु न इति सर्वांजे सकृज्जपेदिति निबंधाः। अत्रोपवेशनसंवेशनपाद्यार्घ्याच
मनीयान्यपि हेमाद्रिणोक्तानि। तान्यथर्ववेदिनां नियतानि। नान्येषां। तेषां च प्रपितामहादिपित्र्यं प्राप्तिलोप्ये
न सर्वः प्रयोगः। वाराहे। गंधपुष्पार्चनं कृत्वा दद्याद्धस्ते तिलोदकं। गार्ग्यः। शिरस्तः पादतो वापि सम्यगभ्यर्चयेत्त
तः। ततः। स्वधार्घ्या इति पितृपितामहादिविप्राग्रे प्रत्येकं निवेदयेदिति कारिकायां वृत्तौ च। आश्वलायनः। अपसव्ये
न तरपाणिं गृह्यांतरेणोपवीती स्वाद्दक्षिणेन वा सव्योपगृहीतेन पितरिदं तेऽर्घ्यं पितामहेदं तेऽर्घ्यं प्रपितामहेदं तेऽर्घ्य
मित्यपः पूर्वं ताः प्रतिग्राह्यापिष्यन्सकृत्सकृत्स्वधार्घ्या इति पृच्छति। स्वतु सृष्टास्वनुमंत्रयीत या दिव्या आपः पृथि
व्यां संबभूर्या आंतरिक्षा उपार्थिवीर्याः हिरण्यवर्णा यज्ञिया आपः शं स्योना भवंत्विति। अर्घ्यादि प्राग्गांधादे य
ज्ञोपवीतमेव वा। अर्घ्यादानात्प्राग्न्या। अपो दद्यात्। पद्मपत्रं सव्येन दक्षिणेन वार्घ्यं दद्यादित्युक्तं तथापि दक्षि
णेनेत्याभिमतोर्थः। कारिकायां वृत्तौ चैवं पित्रादेः। त्रिभिः पात्रैर्दद्यात्। पितुः स्थाने विप्रत्रयं चेदेकार्घ्यं विभज्य दद्या
त्। त्रयाणां स्वधार्घ्या इति सकृत्प्रश्नः। एवं पितामहादावपि। अन्यजलदानमर्घ्यमंत्राश्च प्रतिविप्रमावर्तंते। तेषु

गंधादौ च प्रतिविप्रपदार्थानुसमयः कांडानुसमयो वा॥ पित्रादित्रयाणां एकविप्रपक्षे त्रिभिः पात्रैरेकस्यैवार्घ्यं स्या
त्॥ इति वृत्तिः। कारिकायां। स्वधार्घ्या इत्यपोर्घ्यास्ता उपवीती निवेदयेत॥ निवेदनात्प्राक्प्राचीनावीतित्वमेवेत्यर्थः॥
अर्घ्यं सर्षपमादाय दक्षिणेन तु पाणिना। सव्यहस्तगृहीतेन निनयेत्पितृतीर्थतः। दत्वा दत्वा निनीतास्ता या दि
व्यचौनुमंत्रयेत। यत्तु। या दिव्या इति मंत्रेण हस्तेष्वर्घ्यं विनिक्षिपेत॥ इति। यच्च वाराहे। तिलांबुना चापसव्यं द
द्यादर्घ्यादिकं द्विजः इति। यच्च व्यासः। गोत्रसंबंधनामानि पितॄणामनुकीर्तयन्। एकैकस्य तु विप्रस्य अर्घ्यपात्रं
विनिक्षिपेत। इति। तद्बह्वृचातिरिक्तविषयं। तत आचामेत। एवं मातामहेष्वपि। आश्वलायनः। संस्रवान्सम
वनीय ताभिरद्भिः पुत्रकामो मुखमनक्ति। संस्रवः शेषः। संस्रवो हि परिशिष्टो भवतीति श्रुतेः। केचित्तु हस्तग
लितांबु वदंति। समवनीयं त्वेकपात्रे पितृपात्रे आसिच्येति वृत्तिः। प्रथमे पात्रे संस्रवान्समवनीयेति कातीय
सूत्राच्च। ब्राह्मे तु प्रतिबिंबावलोकनमुक्तं। स्कांदे। आयुःकामस्य नेत्रासेचनमुक्तं। पित्र्यविप्रैः प्राङ्मुखस्य क
र्तुरभिषेकः कार्य इति केचित। आश्वलायनः। नोद्धरेत्प्रथमं पात्रं पितॄणामर्घ्यपातितं। आवृतास्तत्र तिष्ठंति पि एमः
तरः शौनकोऽब्रवीत। यावद्विप्रविसर्जनमिति तु ये पादे यमीयः पाठः। अत्र वृत्तिः। पितृपात्रं समवनयनदेशान्न

चालयेदाश्राद्धसमाप्तेः। यस्मात्तत्र तृतीयपात्रेण हृता इति। यद्वा प्रथमपात्रमेव न्यग्बिलं कुर्यात्। इति। कामा
भावेपीदमेव शेषप्रतिपादनं। हेमाद्रौ कौर्मे। संस्रवांश्च ततः सर्वान् पात्रे कुर्यात्समाहितः। पितृभ्यः स्थानमसी
ति न्युब्जं पात्रं निधापयेत्॥ यमस्तु। पैतृकं प्रथमं पात्रं तस्मिन्पैतामहं न्यसेत्। प्रपितामहं ततो न्यस्य नोद्धरेत्तच्च
चालयेत् इत्याह। अथ संस्रवानानीय तृतीयेनाच्छाद्य न्युब्जीकुर्यादिति सर्वैकवाक्यता पार्श्व इति केचित्। अ
त्रिः। गंधादिभिस्तदभ्यर्च्य तृतीयेनापिधापयेत्। पितृभ्यः स्थानमसीति शुचौ देशे चर्चितेर्चयेत्। कल्पतरुः। वि
प्रवामेति हलायुधः। कर्तुर्वामेति शूलपाणिः। अर्चनं न्युब्जीकृते पितृत्वं। न्युब्जमुत्तरतो न्यसेदिति प्रचेतसो
क्तेः। सर्वं विप्रोत्तरतो न्यसेदिति हेमाद्रिः। उत्तानं विहितं वापि पितृपात्रं न तद्भवेदित्युशनसोक्तेः। न्युब्जतेव साधुः
मातामहादिसंस्रवानपि तत्पात्र एव गृहीत्वा प्रयाजवत्तंत्रेण न्युब्जीकुर्यादिति शूलपाणिः। एकोद्दिष्टे तु हेन
न्युब्जतेति पितृभक्तौ श्रीदत्तः। यमोपि। स्पृष्टमुत्तानमन्यत्रानीतमुद्घाटितं तथा पात्रं दृष्ट्वा व्रजंत्याशु पितरः
स्तं शपंति च। वैश्वदेवे उत्तानमिति मदनपारिजातः। दैवेजवापः। तस्योपरि कुशान्दत्वार्घ्यं दद्याद्देवपूर्वकं।
गंधपुष्पाणि धूपं च दीपं वस्त्रोपवीतकं। अत्र गंधादेर्दैवे पित्र्ये च पदार्थानुसमयस्य याज्ञवल्क्योक्तकांड

नुत्तमयेन विकल्पो ज्ञेयः। बह्वृचानां तु सूत्रे देवानुक्तेः॥ कांडानुसमय एव॥ अत्र प्राचीनावीति नामगोत्रसंबंधाद्यु
क्तं प्राक्। अन्यद्देववत्। रदंते। आचमनं च। हेमाद्रौ कालिकापुराणे॥ निर्वर्त्य ब्राह्मणादेशात् क्रियामेवं यथावि
धि भाजनानि ततो दद्याद्धस्तशौचं पुनः क्रमात्। आदेशात्याज्ञा। णो दद्यादित्यन्वयः॥ तेन तत्रापि प्रश्नानुज्ञे ये।
तत्रैव ब्राह्मे। मंडलानि च कार्याणि नैवारैश्चूर्णकैः शुभैः। गोमृत्तिकया वापि भस्मना गोमयेन वा। भृगुः। भस्मना वा
वारिणा वापि कारयेन्मंडलं ततः। चतुष्कोणं द्विजाग्र्यस्य त्रिकोणं क्षत्रियस्य तु। मंडलाकृतिर्वैश्यस्य शूद्रस्याभ्यु
क्षणं स्मृतं। दैवे चतुरस्रं पित्र्ये वर्तुलं कृत्वा क्रमेण यवान्सतिलान्दर्भांश्च दद्यादित्युक्तं। मार्कंडेयः। यातुधानाः
पिशाचाश्च क्रूरा ये चैव राक्षसाः। हरंति रसमन्नस्य मंडलेन विवर्जितं। हेमाद्रौ हारीतः। भूमावेव निदध्यान्नो
परि पात्राणीति। तानि तु हेमाद्रावत्रिराह। भोजने हैमरौप्याणि दैवे पित्र्ये यथाक्रमं। हारीतः। राजतपात्रसं
ताम्रकांस्यपात्राणि भोजने इति। तत्रैव वाराहे। सौवर्णानि हरौप्याणि कांस्यानि तदसंभवे। अन्यपि हि कार्या
णि दारुजान्यपि जानता॥ नायसान्यपि कार्याणि शेषे त्वलानि नु कचित्। न च मोसमयानीह शस्यंते तेत्र पुजान्यपि।
ऋषिभिः। पंचाशत्पलिकं कांस्यं मधिकं भोजनाय वै। गृहस्थैस्तु सदा कार्यमभावे रौप्यहेमयोः। पालाशेभ्यो विना

एम्नः

न स्युः पर्णपत्राणि भोजने। पृथ्वीचंद्रस्तु। कांस्यपात्रेह विद्दिष्टानि राक्षसाः पितरोगताः। इति व्यासोक्तेः। कांस्यपात्रनिषे
षेधमाह। वोपदेवस्तु स्मृतिसंग्रहमुदाजह्रार। श्राद्धे पलाशपत्राणि मधूकोडुंबराणि च। पारिकाकुटजप्लक्ष
क्रकूलानि कमात्सगुः। कदलीचूतपनसजंबूपुंनागचंपकाः। अलाभे मुख्यपत्राणां ग्राह्याः स्युः पितृकर्मणीति।
हेमाद्रौ कदलीपत्रनिषेधमाह गार्ग्यः। न जातीकुसुमानि दद्यान्न कदलीपत्रमिति। क्रतुः। असुराणां कुले जाता
रंभा पूर्वं परिग्रहः। तस्या दर्शनमात्रेण निराशाः पितरो गताः। एवं पात्राण्यासाद्य भस्ममर्यादां कृत्वा विप्रहस्ते शो
धनं कुर्यात्। तत्र पिशंगो रक्षाणो इति मंत्रद्वयं केचित्पठंति। मात्स्ये। अकृत्वा भस्ममर्यादां यः कुर्यात्पाणिशोध
नं। आसुरं तद्भवेच्छ्राद्धं पितॄणां नोपतिष्ठति। तत्रैव ब्रह्मांडे। प्रक्षाल्य हस्तपात्रादि पश्चाद्दद्भिर्विधानवत्। प्रक्षाल्य
मजलं दर्भैस्तिलैर्भिमंत्र्यं क्षिपेच्छुचौ। मंडलोपरीति हेमाद्रिः। अथाग्नौकरणं। हेमाद्रौ मार्कंडेयः। आहिताग्निस्तु
जुहुयाद्दक्षिणाग्नौ समाहितः। अनाहिताग्निस्त्वौपासनेप्यभावे द्विजेप्स्वेति वायवीये। आहत्य दक्षिणाग्निं
तु होमार्थं वै प्रयत्नतः। अग्न्यर्थे लौकिकं वापि जुहुयात्कर्मसिद्धये। आहिताग्निः सर्वाधानी। अर्द्धाधानी तु गृ
ह्येष्वेवेति चंद्रिकापराकौ मिताक्षरामाधवादयः। तस्यापि दक्षिणाग्नौ। लौकिके गृह्ये इति हेमाद्रिः कल्पतरुश्च।

२६१ आद्यपक्ष एव युक्तः। बहुसंमतश्चायं यद्यपि स्मार्त्तेऽग्नौकरणं श्रौते दक्षिणाग्नौ न युक्तं। तथापि वचनाद्भवतीति हेमाद्रि
चंद्रिकादयः। इदं दर्शश्राद्ध एव। आह्निकादिषु तु सर्वाधानी पाणौ। अर्द्धाधानी गृह्ये कुर्यादिति हेमाद्रिमाधवश्चा।
पक्वांतं कर्म निर्वर्त्य वैश्वदेवं च साग्निकः। पिंडयज्ञं ततः कुर्यात्ततोन्वाहार्यकं बुधः। इति लौगाक्ष्यादिभिः क्रमोक्ते
र्विहृतदक्षिणाग्निसत्वात्। अत एवात्र वचने साग्निकः आहिताग्निरुक्तो हेमाद्रिणा एतच्चापस्तंबादीनामेव। आ
श्वलायनस्य त्वाहिताग्नेः पाणावेवेति वृत्तिः। अर्द्धाधानिनः गृह्य एव व्यतिषंगेणेति। प्रयोगपारिजाते परिशिष्टे
च। बोपदेवस्त्वाह। होमश्राद्धः पिंडपितृपरः। पितृयज्ञे तु जुहुयाद्दक्षिणाग्नौ समाहितः। आहुत्वौपासनाग्नौ तु
निरग्निर्लौकिकेनले। अनग्निर्द्दूरभार्यश्च पार्वणे समुपस्थिते। संधायाग्निं ततः कुर्याद्धोममग्निं समुत्सृजेत।
इति त्रिकांडमंडनोक्तेः। आद्धेयस्त्वाग्नावेवेति। लौकिकाग्न्यादिविधानं चैतेत्तिरीयादिविषयं। बह्वृचस्य त्व
नग्नेरपि पाणिहोम एव। अग्निपाणि विना सूत्रे विधानात्तदनुक्तेः। अप्यभावे तु विप्रस्य पाणावेवोपपादयेत।
इति मन्तूक्तेश्चाष्टकावप्येवं। क्वचित्साग्नेरपि पाणिहोम उक्तो गृह्यपरिशिष्टे। अन्वष्टक्यं च पूर्वेद्युर्मासि मास्यथ पा एम
र्वणं। काम्यमभ्युदयेष्टम्यामेकोद्दिष्टमथाष्टमं। चतुर्थाद्येषु साग्नीनां वह्नौ होमो विधीयते। पित्र्यब्राह्मणहस्ते

स्याद्दत्रोरेव चतुर्थ्यापीति। एकोद्दिष्टं सपिंडीकरणं।। उद्धृते तन्निषेधात्। बह्वृचभाष्यकारास्तु सर्वेष्वेकोद्दिष्टेषु पाणि
होममाहुः। इदं बह्वृचानामेव। अत्रेदं तत्त्वं। स्थालीपाकेन सह पिंडार्थमुद्धृत्येति सूत्रे। नात्र पूर्वः स्थालीपाकश्चोद्यते। सर्वथा
द्देश्यप्रतीगात्वेनानुवादोयमिति वृत्तिकारोक्तेः। पार्वणे आर्थिकस्यानंगस्य व्यातिषंगस्य वार्षिकादिष्वनासिद्धेश्चार्धा
धानिनोपि पाणिहोम एवेति वृत्तिस्वरसः। एवं मासिकादावपि। षोडशमासिके श्राद्धे सपिंडीकरणे तथा। पाणावेव तु
होतव्यमन्यत्राग्नौ तु हूयते। इति वोपदेवोदाहृतवचनाच्च। भाष्यकारमते तु सूत्रे स्थालीपाकेनेति करणत्वान्नि
त्यवच्छ्रपणाच्च पार्वणे सांगं। अतः काम्यादिषु तदभावे कार्यस्य पिंडदानस्याप्यभावः। एतदेवानुसृत्य विकृ
तावपि वार्षिकादौ व्यतिषंग उक्तः। प्रयोगपारिजाते परिशिष्टे च। तेनैतन्मतेर्धाधानिनोग्नावेव। वस्तुतस्तु स्था
लीपाकेन सह शाखया प्रस्तरं प्रहरतीतिवत्। सहभावमात्रं लक्ष्यते। पत्नीवते त्वष्टुरुपलक्षणमिव नांगत्वं। न त्वेवा
नांगानुरोधेन भूतपिंडदानत्यागो युक्तः। तेन व्यतिषंगाभावेप्यग्नौ होमो भवतीति वोपदेवः। अनाहिताग्नेर्गृह्याग्नि
मतस्तु सर्वमतेप्यग्नावेव। वार्षिकादौ वृत्तिमते व्यतिषंगेन। अन्यमते त्वग्नौ। अत्र यथाचारमनुष्ठेयं। आश्वला
यनः। उद्धृत्य घृताक्तमन्नमनुज्ञापयत्यग्नौ करिष्ये करवै करवाणीति वा। प्रत्यनुज्ञा। कात्यायनः। उद्धृत्य घृताक्तमन्नम्

तां कुरुष्वेत्यथाग्नौ जुहोति। यथोक्तं पुरस्तादिति। व्यतिषंगापन्नेइदमिति वृत्तिः। करवैकरवाणीति अत्राग्नावित्यनुषंगः।
पुरस्तात्पिंडपितृयज्ञे। तच्चैवं। मेक्षणेनावदानं संपदा जुहुयात्सोमाय पितृमते स्वधा नमोग्नये कव्यवाहनाय स्वधा
नमः स्वाहाकारेण वाग्निं पूर्वं यज्ञोपवीती मेक्षणमनुप्रहृत्येति। अवदानसंदानउपस्तरणाद्यपेत्यर्थः। व्यति
षंगापन्ने अतिप्रणीते यं होमोन्यथा मुख्ये। अतिप्रणीतेग्नाविध्ममुपसमाधायेति। बह्वृचपारिशिष्टात्। केचि
त्तस्य रक्षोनिर्हरणार्थत्वान्मुख्येवदंति। तदेतद्विरोधाच्चिंत्यं। प्रयोगपारिजातेप्येवं। शौनकः। स्वाहाकारेण हो
मे तु भवेद्यज्ञोपवीतिवान्। तत्र प्रागग्रये कृत्वा पश्चात्सोमाय हूयते। अस्मो यज्ञोपवीत्येव प्रस्तिणं ततः छं
दोगपरिशिष्टे। अग्नौकरणहोमश्च कर्तव्य उपवीतिना॥ अपसव्येन वा कार्यो दक्षिणाभिमुखेन च। काती
यानां त्वपसव्यमेव। पिंडपितृयज्ञवद्धुत्वेति सर्वातिदेशात्। सव्यं तु छंदोगपरि॰। गोभिलेनैतदुत्तरमेवापसव्योक्तेः
छंदोगा जुहुयुः सव्येनापसव्येन याजुषाः इति वृद्धयाज्ञवल्क्योक्तेश्च। अथ पाणिहोमः। आश्वलायनः। अभ्य
नुज्ञायां पाणिष्वेके। इति। पिंडपितृयज्ञकल्पाभावे नास्त्यभावे काम्यादिष्वित्यर्थः। पाणिष्विति बहुवचनात्सर्ववि एमः
प्रपाणिषु होम इति वृत्तिः। एवं मातामहेपि। शौनकोपि। सर्वेषामुपविष्टानां विप्राणामथ पाणिषु। बिभज्य तु ड

यात्सर्वं सोमायेत्यादिमंत्रतः। यत्तु हेमाद्रौ कात्यायनः। पित्र्येयः पंक्तिमूर्धन्यस्तस्य तत्सर्वं सोमायेत्यादिमंत्रतः। यत्तु हे
माद्रौ कात्यायनः। पित्र्ये यः प्रकृत्वा मंत्रवदन्येषां तत्पत्नी पात्रेषु निक्षिपेत्। इति। तद्द हृत्वातिरिक्तानां। यत्तु तत्रैव मात्स्ये।
असंभावे तु विप्रस्य पाणौ वाप्यथ जले पि वा। अजकर्णेश्वकर्णे वा गोष्ठे वाप्य शिवांतिके। इति तत्तीर्थश्राद्धविषयं। तद्व
दापां समीपे स्याद्वा द्वंद्वे यो विधिस्तैदेइति तत्रैव कात्यायनोक्तेश्च निर्जले जलकस्थादौ। यत्तु चंद्रोदये यमः। देवादिप्र
करे नाग्निः कृत्वाग्नौकरणं द्विज इति। तदभार्यपरं। अपत्नीको मदाविप्रः श्राद्धं कुर्वत पार्वणं। पित्र्यविप्रैरनुज्ञातो वि
श्वेदेवेषु हूयते। इति तत्रैव कात्यायनोक्तेः। हूयते इति छांदसो व्यत्ययः। हेमाद्रौ वायवीये। विधुरो दैविके कुर्याच्छेषं पि
त्र्ये पि वेदयेत्। देवविप्रानेकत्वे तत्रैवा वैश्वदेयदेकस्मिन्न भवेयुश्छादयो द्विजाः। तदेकपाके होतव्यं स्याद्धि वि
र्विहितस्तदा॥ सोप्याहः॥ प्रथमं वा नियम्येतेति न्यायात्। तेन मृतभार्यस्य दैवे होमः। अनुपनीतब्रह्मचार्यादे
स्तापित्र्ये अस्य भावः स्मृतलावघावद्भार्यो न विंदतीति। हेमाद्रौ जातुकर्ण्योक्तेः। सभार्यन छाग्नेरपि पित्र्यकरेइ
ति पृथ्वीचंद्रः। उपवीतित्वे दैवे होमः। प्राचीनावीतेन पित्र्ये। पद्मासर्वत्र दैवपित्र्यकार्यो विकल्पः। इति हेमाद्रौ
मदनपारिजाते च। यदा तु पितृमातामहयोर्दैवपित्र्यविप्रभेदस्तदा भेदेन पाणित्तिमत्स्यपरार्कचंद्रिकादयः। यदा

तद्दैवंतंत्रंतद्दार्तंत्रेणसकृदेवपाणिहोमः इतिकेचित्।हेमाद्रिस्तुमातामहस्यभेदेपिकुर्यात्तंत्रंचसाग्निकः इतिकाती
यस्मृतेरभेदमाह।एवंपित्र्येपिमाधवीयेप्येवं।एवंसाग्नेरपिविदेशादौपाणिहोमोज्ञेयः यत्तुकर्केणाग्निंविनाश्राद्ध
मेवनास्तीत्युक्तंतत्सपिंडीकरणवार्षिकाद्यकरणापत्तेर्यत्किंचिद्देवा।यत्तुहहस्मारदीये।अनग्निर्द्विर्भार्यश्चापार्व
णेसमुपस्थिते।भ्रातृभिःकारयेच्छ्राद्धंसाग्निकैर्विधिवद्द्विजः।इत्याहदिवसेप्राप्तेस्वस्याग्निर्हरणेयदि।तत्रैवभ्रात
रःस्युश्चेच्छ्रौकिकायावितिष्ठितिः।उपासनाग्नौहारस्थेसमीपेभ्रातरिस्थिते।यद्यग्नौजुहुयाद्वापिपाणौवासहिपा
तकी।उपासनाग्नौहारस्थेकेचिदिच्छंतिसत्तमाः।पाणावेवतुहोतव्यमितितेनेतत्समंजसंतत्कृद्वानादराडुपेक्ष्यं।
हेमाद्रौयमः।अग्नौकरणवत्तत्रहोमोविप्रकरेभवेत्।अपर्युक्षदर्भोनास्तीयंयतोस्याग्निसमोद्विजः।अमेत्तृणेनकरे
णवाहोमः।मेक्षणप्रहरणंनेतिवृत्तिः।स्मृतिरत्नावल्यां।नानुज्ञापाणिहोमेस्यान्नस्तःपर्यूहणोद्धरणे।नाग्नेतम
घादितिचनस्याता।मिध्ममेक्षणे।कर्काचार्योप्येवमाह।माधवीयेचंद्रिकायांचानुज्ञादिसर्वंभवतीत्युक्तं।पाणिहो एमः
मेप्यग्नौध्याहापरार्केशौनकः।अनग्निश्चेदाज्यंगृहीत्वाभवतस्त्वेवाग्नौकरणमितिपूर्ववत्तथास्त्विति।आश्वलायनः
यदिपाणिष्वाचांतेष्वन्यदन्नमनुदिशत्यन्नमन्नेहुतंदत्तमक्षय्यमिति।पाणौहुतंपात्रेनिधायविप्रेणाचम्यहुतशेषंपात्रे

षुदद्यादित्यर्थः। इत्थं प्रभृतं नैमित्तिकं चेदमाचमनं न कृतभक्षणनिमित्तं। अन्नं पाणितले दत्तं पूर्वमश्नंत्यबुद्धयः।
पितरस्ते न तृप्यंति शेषान्नं न लभंति ते। यच्च पाणितले दत्तं यच्चान्यदुपकल्पितं। एकीभावेन भोक्तव्यं पृथग्भावो न
विद्यत इति बह्वृचपरिशिष्टात्। हेमाद्रावप्याचमने हेत्वर्थवाद उक्तः। पाणाप्यास्यो हि द्विजः स्मृत इति। भाष्ये त्वाचांते
षु भक्षितेषु। चमुभक्षणे। भक्षणोत्तरं च नाचमनं। अग्निसाम्यात्। पूर्वनिषेधात्तु सपिंडीकरणोत्तरेषु दद्यादिति चोदित
त्वात्। न त्वत्र जुहोतिचोदितत्वादित्युक्तं। न त्वेतद्वृद्धसंमतं। यत्तु बौधायनेन तस्मिंस्तु प्राशिते दद्याद्दन्नं प्रकृते भवे
दिति। भक्षणमुक्तं तच्छाखीयानामेवेति हेमाद्रिः। तत्रैव यमः। अपाणिहुताच्छेषं पितृपात्रेषु निःक्षिपेत्। अग्नौ क
रणशेषं तु न दद्याद्वैश्वदेविके। एतदग्निहोमेपि समं। तथा कर्कः। सूत्रे हुतशेषं दत्त्वेत्यविशेषात्सर्वं। विप्रेषु द
द्यादित्याह। तत्रैव बृहस्पतिः। पित्र्ये विप्रकरे हुत्वा शेषं पात्रेषु निक्षिपेत्। पिंडेभ्यः शेषयेत्किंचिन्न दद्याद्वैश्वदेविके। अ
थापस्तंबानां सूत्रे। उ। श्रीयतामग्नौ चाक्रियतामित्यामंत्रयते। काममुद्ध्रियतां काममग्नौ चाक्रियतामित्यतिसृष्ट उ
द्धृत्यानुद्धृत्य वा नष्टाग्निविधुरादेर्विशेषो हेमाद्रौ। यो नष्टाग्निर्द्विभार्यश्च पार्वणे समुपस्थिते। संधायाग्निं ततो हो
मं कृत्वा तं विसृजेत्पुनः। आयाश्चेति तत्कालेऽग्निं संधाय पक्वत्वात्त्यजेदित्यर्थः। एतदापस्तंबानामेव पाणिहोमस्तु ब

दोमादीनां। विश्वप्रकाशेपि। माग्निरौपासनेनग्निरग्नौकुर्वतलौकिके। पाणौ होमं प्रशंसंति नत्वापस्तंबशाखिनां। स्नात
कावित्युणावा स्यर्पद्विब्रह्मचारिणः। अग्नौकरणहोमं तु कुर्युस्ते लौकिके नले। अयाश्वा ग्रेमनोऽयोति रुद्धध्यव्याहृती
र्दनेत। ततोनुज्ञातो गृहीधनाद्याज्यभागांते यन्मे मातेत्याद्यैर्जुहुयात। तत्र सशान्त्याकृतयः। षडाज्यस्येति त्रयोदश
व्यस्ययोदा। यथा। यन्मे माता प्रलुलोभ०। तन्मे रेतः पिता वृङ्क्तां यात्तिष्ठंतीतिद्वाभ्यां अमुष्मै स्वाहेति पितुर्नाम्ना
द्वौ होमौ। यन्मे पितामही प्रलुलोभः तन्मे पितामहो वृङ्क्ता। अंतर्दधे इति तन्नाम्ना पितामहाय द्वौ। यन्मे प्रपितामह
ही तन्मे रेतः प्रपितामहो वृङ्क्तां। अंतर्दधे स्वतभिरिति तन्नाम्ना प्रपितामहाय द्वौ। मातामहे पुत्रहः यन्मे मातामही
तन्मे मामहो वृङ्क्तां। अन्यं मातामहाद्वृङ्क्तामित्याद्यौ। यन्मे मातुः पितामही प्रलुलोभः रेतो मातुः प्रपितामहो वृङ्क्तां
अन्यं मातुः प्रपितामहाद्वृङ्क्तां। सर्वत्रामुष्मा इत्यत्र के तं तन्नाम योऽत्यांत गृह्यसंग्रहे। पोत्सापित्रादिशब्दानांस्था
नेमातामहादिकः। अन्नहोमे तथास्य शेषं नलपिंडादिदानके। यन्मे मातामहीत्यादि तत्रोहाहरणं भवेत। ततो एप
पेकेहेत्येका त्वाहुतिः। ततः स्वाहा पित्रेरस्माद्येऽज्यं कृत्वा। स्विष्टकृतं कृत्वा सर्वभक्ष्यं किंचिदादाय योद्गुल्म भस्मा
पोस्यवत् तूष्णीं स्वाहाकारेणाजुहोति। परिषेचनांतं स्थालीपाकवत्। अथ मयोकरणहोमो मासिकश्राद्ध एव। त

च्चस्मान्नैयम्यभावेन कार्यमिति केचित्ता।कार्यमेवेति बहवः। अत एव सर्वाधानिनो होमवर्ज्यं मातृश्राद्धमुक्तं सुदर्शन
भाष्ये महालये तद्वदित्येके। प्रकरणांतरत्वात् कर्मांतरत्वेन स्मार्त्तपार्वणवत्कार्यमिति त्वस्मद्गुरवः। आह्निकादि
षु तस्मान्नैपार्वणविधेरेव। एवं मातृत्वाबिकादिषु। मातृश्राद्धविकृतावष्टकायां मातुःश्राद्धे वैकृतहोमेनप्राकृत
होमबाधः। अन्वष्टकासु मातृश्राद्धं नेति भाष्ये। तत्रापि श्राद्धं तास्वाक्रियमाणे तु मन्मे मातेत्यादौ गुणत्वेपि मातुः
प्राधान्यं विवक्षितं। मातृश्राद्धेन कल्पो व्याख्यात इति सूत्रात्। आग्नेय्येवमतो नाकार्यमिति क्वचित्तादृशि शाद्रस्येव वै
कृतदेवताभिधायित्वं। तेनामुष्या इत्यत्रामुकामुकशर्मभ्यां पितृभ्यामित्याद्यूहः कार्यः। तच्च मातृश्राद्धं जीवत्पि
त्रादिना व्युत्क्रममृतपित्रादिना च कार्यमित्युक्तं सुदर्शनभाष्ये। तत्प्रकारस्तु वक्ष्यते। मातापित्रोर्द्वि श्राद्धेतु
नोहः। तस्मादृचं नोहेदिति निषेधात् प्रकृतावूहाभावाच्च। पत्नीं संनह्येवत्। उपदेशिमते तूहः। यथा यन्मे मा
तरौ प्रलुलुभतुश्चरत्याव तनुव्रते इत्याद्यस्मात्पितृकृतं मातृश्राद्धनिर्णये ज्ञेयमिति दिक्। अन्यत्साग्निवत्। अथ
परिवेषणांतञ्चोपवीत्येवान्यत्तद्देवपूर्वं आमान्नं पक्वमिति पात्रेषु पत्नी दद्यादिति हेमाद्रिः। तत्रैव शौनकः। विधिना
दैवपूर्वं तु परिवेषणमाचरेत्। तत्रैव धर्मः। फलस्थानं तता प्रोक्ता स्वयं च परिवेषणे॥ तत्रैव वायुभविष्ययोः। भार्य

२६५ याश्राद्धकालेतुप्रशस्तंपरिवेषणं।ब्रह्मांडे।नापवित्रेणनैकेनहस्तेननविनाकुशं॥नायोसेन।यस्तेनैवश्राद्धेषुपरिवेष
येत्।वसिष्ठः।आयसेनतुपात्रेणयदन्नंसंप्रदीयते।भोक्ताविष्ठासमंभुंक्तेदातायनरकंव्रजेत्।पैठीनसिः।सीसका
यसरीतिपात्राण्यपयज्ञीयानि।त्रैवहारीतः।सौवर्णराजताभ्यांचखड्गेनौदुंबरेणवा।दत्तमक्षयतांयातिफल्गुपा
त्रेणवापुनः।कार्ष्णाजिनिः।दर्व्यादेयघृतंचान्नंसमस्तव्यंजनानिच।उदकंचैवपक्वान्नंनोदर्व्यातुकदाचन।यमः।
पंक्त्यांविषमदानंतुश्वनिष्कृतिर्नैवविद्यते।पृथ्वीचंद्रोदयेपराशरः।सर्वदाचतिलायात्यापितृकर्मेविशेषतः।मो
न्यपात्रेतिलान्दद्यान्निराशाःपितरोगताः।चंद्रिकायांवृद्धशातातपः।हस्तदत्तास्तुयेस्नेहालवणव्यंजनादयः
पितृणांनोपतिष्ठंतिभोक्ताभुंजीतकिल्बिषं।घृतपात्रेविशेषोग्रंथान्तरे।ओदनेपरमान्नेचपात्रमासाद्यमुग्धधीः
घृतेनपूरयेत्पात्रंतद्घृतंरुधिरंभवेत्।घृताद्दिपात्रंभूमौस्थापयेन्नभोजनपात्रे।इतिमदनरत्ने।संग्रहे।हस्तद
त्तैलनाश्नीयाल्लवणंव्यंजनादिकं।अपक्वंतैलपक्वंचहस्तेनैवप्रदीयते।पात्रालंभनमुक्तंचतुर्विंशतिमते।उ
त्तानदक्षिणांसव्यंनीचंपाचाणस्तुपस्पृशेत्।याज्ञवल्क्यः।दत्त्वान्नंपृथिवीपात्रमितिपात्राभिमंत्रणं।कृत्वेदंविष्णु एमः
रित्यन्नेद्विजांगुष्ठंनिवेशयेत्।बौधायनः।विप्रांगुष्ठेनाननखेनानुदिशतिपृथिवीतेपात्रंद्यौरपिधानंब्राह्मणस्य

पुरवेऽमृते। मृतं जुहोमि ब्राह्मणानां त्वा विद्यावतां प्राणापानयोर्जुहोम्यक्षितमसि मा मे पितॄणां क्षेष्ठा अमुत्रा
मुष्मिंल्लोके। आज्यं जुहोम्यग्नये स्वाहा। शाङ्कः कातीयसूत्रेऽक्तः। मे चैः स्वधा। शङ्कुः। अंगुष्ठविशेषमाह हेमाद्रौ धौम्यः।
परिवेषने चांगुष्ठं द्विजस्यान्ने निवेशयेत्। तथांऽन्नेन तु हस्तेन द्विजांगुष्ठं निवेशनं। यः करोति द्विजो मोहात् तद्वै रक्षां
सि भुंजते। तत्रैव यमः। विष्णो हव्यं च कव्यं च ब्रूयाद्रक्षस्व च क्रमात्। दैवे पित्र्ये चेत्यर्थः। तत्रैवात्रिः। संबंध नामगो
त्राणि स्वमन्त्रं ततः स्वधा। पितृकमादुदीर्येति स्वसूत्रोक्तं विनिवर्त्तयेत्। हैमेनामुक्तमन्त्राद्यमिदमन्नमुदीरये
न्। अत्रान्नदाने च तुभ्यस्यादि स्यादि विशेषाः पूर्वमुक्ताः। अत्र पूर्वोक्ता तेऽत्र पुरूरवार्द्रवसंज्ञका विश्वेदेवा देवता इ
दमन्नं सपरिकरं हव्यं अयं ब्राह्मण आहवनीयार्थे दत्तं दास्यमानं चातृप्तेः। गयेयंभः गदाधरो भोक्ता सौवर्णपात्र
स्थमन्नं ध्यवट। छायास्थममुकेभ्यो विश्वेभ्यो देवेभ्यः स्वाहा न मम मेति हेमाद्र्यनुमतः प्रयोगः। एवं पित्र्ये वसुरू
पादि तत्तन्नामऊह्यं। ततो ये देवासः इति दैवे ये चेह पितर इति पित्र्ये केचिज्जपंति। ततो छिद्रं वाचयेत्। तत्रैव प्रचेताः
आपोशानकरे विप्रे स्ते कल्प्याच्छिद्रभाषणात्। निराशाः पितरो यांति देवैः सह न संशयः। पारस्करः। तं कल्प्यापि
तद्देवेभ्यस्ता। वित्रीमधुमज्जपः। श्राद्धं निवेद्यापोशानं जुषम्बेयोष्यभोजनो निवेद्येति ब्रह्मार्पणं कुर्वेत्यर्थः। आपम

२६६

येन कर्त्तव्यं पित्र्यं कृत्स्नमशेषतः। अन्नदानादृते सर्वमेवं मातामहेष्वपीति। तदप्येतत्परं। तच्च ब्रह्मार्पणं हरिर्दीता चतुर्भि
श्चेति केचित्पठंति। धर्मप्रदीपे। ततोन्नं पितृदेवेभ्यः संकल्प्य च यथाविधि। दत्तं यद्दास्यमानं च आत्मनेनममेति च।
श्राद्धीयान्नस्य संकल्पोऽभावे वप्रदीयते। हस्तेषु दीयमानं तु पितॄणां नोपतिष्ठति। वैश्वदेवस्य वामे तु पितृपात्र
स्य दक्षिणे। संकल्पोदकदानं स्यान्नित्यश्राद्धे यथाह। चि। प्रचेताः। आपोशानं प्रदायाथ सावित्रीं त्रिर्जपेदथ।
मधुवाता इति त्र्यृचं माध्वित्येतत्त्रिकं तथा। मिताक्षरायां पारस्करः। संकल्प्य पितृदेवेभ्यः सावित्रीं मधुमज्जपः।
आहृत्य निवेद्यापोशानं जुषध्वेति भोजने गायत्रीं त्रिः सकृद्वापि जपेद्व्याहृतिसर्विका॥ मधुवाता इति त्र्यृचं माध्वि
त्येतत्त्रिकं तथा॥ याज्ञवल्क्यः। सव्याहृतिकां गायत्रीं मधुवाता इति त्र्यृचं। जप्त्वा यथासुखं वाच्यं भुंजीरंस्तेपि
वाग्यताः। यथासुखं जुषध्वमिति वाच्यं। अत्रिः। असंकल्पितमन्नाद्यं पाणिभ्यां यदुपस्पृशेत्। अभोज्यं तद्भवेद
न्नं पितॄणां नोपतिष्ठते। अन्ने दत्ते न गृह्णीयात्पाणावत्तोयं न संपिबेत्। आपोशाने विशेषः स्मृतिसमुच्चये। आपोशानं वा
मभागे सुरापानसमं भवेत्। दक्षभागे तु यः कुर्यात्सोमपानसमं भवेत्। यः पूरयत्यपोशाने सुरापानसमं भवेत्। हे एमः
माद्रौ वह्निः। दत्त्वैवाप्यथ वा दत्ते यो भूमौ नाति। क्षिपेद्बलिं॥ तदन्नं निःफलं याति निराशैः पितृभिर्गतैः। केचिदान्येन

कुर्वीत। तच्चापासैंधवसेनतथान्येनमाषान्नेनतथैवच। नकुर्याद्दुलिदानंतुओदनेनप्रकल्पयेत्। इतिस्मृतिसारेनिषेधात्। शंखः। श्राद्धेनियुक्तो। नभुंजानान्नपृछेल्लवणादिषु। उछिष्टाःपितरोयांतिपृछतोनात्रसंशयः। कात्यायनः। अश्नतो जपेत्सव्याहृतिकांगायत्रींसकृत्त्रिर्वाराक्षोघ्नीःपुरुषसूक्तमप्रतिरथमिति। हेमाद्रौसौरपुराणे। ऐंद्रंचपौरुषंसूक्तंश्र। वयेद्ब्राह्मणांस्ततः। मात्स्यपाद्मयोः। ब्रह्मविष्ण्वर्करुद्राणांस्तोत्राणिविविधानिच।। इंद्रेशसोमसूक्तानिपावमान्य स्वशक्तितः। मंडलब्राह्मणंतद्वत्स्त्रीतिकारिचतसृकः। अभावेसर्वविद्यानांगायत्रींजपमाचरेत्।। पृथ्वीचंद्रोदये ब्राह्मे। वीणांवंशध्वनिंचाथविप्रेभ्यःसंनिवेदयेत्। जपेच्चपौरुषंसूक्तंनाचिकेतत्रयंतथा। त्रिमधुत्रिसुपर्णंच पावमानीयजूंषिच। हेमाद्रौवह्निः। हुंकारेणापियोब्रूयाद्दत्ताद्यपिवदेद्गुणान्। भूतलाच्चोद्धरेत्पात्रंमुंचेद्धस्तेनवापिबेत्। प्रौढपादोबहिःकछोबहिर्जानुकरोपिवा। अंगुष्ठेनविनाश्नातिमुखशब्देनवापुनः। पीतावशिष्टता यानिपुनरुद्धृत्यवापिबेत्। खादितार्द्धात्पुनःखादेन्मोदकानिफलानिच। मुखेनवाधमेदन्नंनिष्ठीवद्धाजनेपिवा। इत्थमश्नन्द्विजःश्राद्धंहत्वागच्छत्यधोगति।। जाबालिः। इष्टमुष्णंहविष्यंचतद्यादन्नंशनैःशनैः। वृद्धशातातपः। अपेक्षितंयाचितव्यंश्राद्धार्थमुपकल्पितं। नयाचतेद्विजोमूढः। सभवेत्पितृघातकः। यत्तुयमः। श्राद्धेद्विजोनै

वदघान्नयावन्नं चदापयेत। इति। तदसंपादितवस्त्वादिविषयमिति हेमाद्रिः॥ हारीतः। ऊर्ध्वपात्रोह्यविहसन सक्तोधोविस्म
यान्वितः॥ नयष्टिस्वपदुंक्तेन तत्सीणार्यते पितॄन्॥ प्रचेताः॥ न स्पृशेत वामहस्तेन भुंजानोन्नं कदाचन। न पादौ न शिरो व
स्तिं न पदा भाजनं स्पृशेत। शंखः। आद्यपंक्तौ तु भुंजानो ब्राह्मणो ब्राह्मणं स्पृशेत। तदन्नमत्यजन् भुक्त्वा गायत्र्यष्टशतं
जपेत। उशनाः। भोजनं तु न निःशेषं कुर्यात्प्राज्ञः कथंचन। अन्यचदध्नः क्षीराद्वा क्षौद्रात्सक्तुभ्य एव च। ब्राह्मणो न चाश्रु
पातयेज्जातु न शुष्कां गिरमीरयेत। न चोद्वीक्षेत भुंजानानन्नं च कुर्वीत मत्सरं॥ यमः। स्वाध्यायं श्रावितिकोचिता। तस्मा
त्पि प्रधानत्वात्पितृवदिति तु युक्तं। सपिंडीकरणादौ वार्षिकवत। सपिंडीकरणादीनि यानि श्राद्धानि षोडश। त
त्र पिंडप्रधानत्वंपे तत्वाविनिवर्त्तकं इति स्मृतेः। महैकोद्दिष्टादौ तूभयप्राधान्याद्द्वावृत्तिरेव। एक एव द्विजो भोज्यः। पिं
डोप्येको विधीयते। इति स्मृतेः। वृद्धिसंकल्पनित्यश्राद्धादौ तु भोजनप्राधान्याद्धांताद्यावृत्तिरेवाहोद्दे श्राद्धे वि
कल्पेन पिंडदानं बुधैः स्मृतं। नित्यश्राद्धमदैवं स्यात्पिंडदानविवर्जितमिति स्मृतेः॥ भुक्तिक्रियायाः प्राधान्ये श्रा
द्धे संकल्पसंज्ञके। तत्रैव विप्रस्यतूपधाते पुनः॥ क्रियेति संग्रहोक्तेः श्राद्धमध्यादावप्येवं। तीर्थमहालयादौ दर्शवद्वि एमः
स्याः शाकाद्यालोचनं न प्रतीमः॥ आश्वलायनः। तत्रान्नं ज्ञात्वा मधुमतीः श्रावयेदक्षन्नमीमदंतेति च संपन्नं हृष्ट्वा

वयेस्सम्यग्धर्मशास्त्राणि चैव हि। प्रचेताः। भुंजानेषु तु विप्रेषु त्स्नग्यन्तुः सामलक्षणां जपेदभिमुखो भूत्वा पित्र्यं चैव वि
शेषतः। यजूंषि चैव रुद्रं च रक्षोघ्नीत्सच। एवचा। रक्षोघ्नीः कृणुष्व पाजः रक्षोहणमित्याद्याः। तत्रैव निगमः। भुंजत्सुज
पेत पावमानी रुदीरितां मधुमतीश्च। अन्नवत्यः पितृंस्तु तृप्तोषमिति। पृथ्वी चंद्रोदये भरद्वाजः। भुंजानेषु तु विप्रेषु
प्रमादात्स्खलते गृहे पादकृच्छ्रं ततः कृत्वा अन्यं विप्रं नियोजयेत॥ क्षणपाद्यादिष्विलेत्यर्थः॥ विप्रवमने तत्रैव वृद्धः।
निमंत्रितस्तु यः श्राद्धे भोजने मुखनिःसृते॥ तदेव होमं कुर्वत स्वस्यैव विप्रः समाहितः॥ प्राणादि पंचभिर्मंत्रैर्यावद्द्वा
त्रिंशसंख्यया॥ ब्राह्मणस्तु ततः कृत्वा घृतप्राशनमारभेत। शुग्विधानेतु। इंद्राय साम सूक्तेन श्राद्धविघ्नोपद्र
भवेत। अस्यादिभिर्भोजनेन श्राद्धं संपूर्णमेहीति। उक्तौ अस्यादिभिरिति लौकिकाग्निस्थापन चरु निर्वापाद्यान्य
भागांते नाम गोत्र पूर्वमग्नौ पितृनावाह्य संपूज्य पान्नत्यागं कृत्वा प्राणादिभिर्द्वा।त्रिंशदाहुतीर्हुनेदित्यर्थः। भोजने
न पुनः श्राद्धेन। तेन होमः पुनः श्राद्धं चेति पक्षद्वयमुक्तं। सूक्तजपस्तु भयानुगतः। स्मृतिसंग्रहे। प्राधान्यं पिंडदा
नस्य भोजनस्य तदंगता। अतो भुक्तिक्रियाहानौ श्राद्धहानिर्न मन्यते। पिंडस्तु नोद्धृतं वांतौ होम एव नाहुतिः। पिं
डदानात्प्राग्वांतौ तद्दिने उपवासं कृत्वा परेद्युः पुनः श्राद्धं कार्यमित्यर्थः। तत्रैव। श्राद्धपंक्तौ तु भुंजानो ब्राह्मणो

२६८ वमतेयदि। लौकिकाग्निंप्रतिष्ठाप्यअर्चयेत्स्वकृताशनं। तथा। एकएवयदाविप्रोभोजनेछर्दितोयदि। तदैवाग्निंसमाधाय
होमंकुर्याद्यथाविधि। द्वितीयपक्षोऽग्निविधाने। भोजनोपक्रमादूर्ध्वंप्रक्रमात्पूर्वतोयदि। श्राद्धविघ्नेपुनःकार्यंजपहो
मोनतद्दिने। स्मृतिसंग्रहे। अकृतेपिंडदानेतुभुंजानोब्राह्मणोवमेत। पुनःपाकात्तुकर्त्तव्यंपिंडदानंयथाविधि।
पिंडदानंश्राद्धं। अकृतेपिंडदानेतुपितामहादिवमेत्तदा। पुनःपाकेप्रकुर्वतश्राद्धंकुर्याद्यथाविधीति। तत्रैवोक्तेः।
तथा। पित्र्यर्थांमंत्रयाणांहिपिताचवमतेयदि। तद्दिनेचोपवासःस्यात्पुनःश्राद्धंपरेहनि। तथा। वमनेवाविरेकेवा
तद्दिनंपरिवर्ज्जयेत्। इदंमासिकाविषयं। दर्शादौतुवांतावामेनतद्दैवकार्यं। श्राद्धविघ्नेद्विजातीनामामश्राद्धंप्र
कीर्त्तितं। अमावास्यादिनियतंमाससंवत्सरादृते। इतिमरीचिस्मृतेः। श्राद्धेपिंडदानमेवप्राधान्यमितिकर्काचा
र्याः। तन्मतेदत्तोक्तोहोमएवनावृत्तिः। विप्रभोजनमितिमेधातिथिः। भोजनपिंडदानाग्नौकरणानीति। कप
र्दिभर्तृस्वामिहेमाद्र्यादयः। तन्मतेपूर्वोक्तनिर्णयः। तत्र। श्राद्धस्ययागदानोभयरूपत्वात्संपूर्णदानाद्वाद्भोज
नस्यांगत्वेपितोमवमने। वयुक्तंनैमित्तिकविधानमितियुक्तंप्रतीमः। अत्रेदंतत्त्वं। वैश्वदेविकस्यवमनेहोमए एमः
वनावृत्तिः। अंगत्वात्। तच्चास्नाथर्वादिभिश्राद्धेक्रतुदशावित्यादिस्मृतेश्च। तत्रत्रयाणांनजुहुयादितिवत्।। पिता

महालेऽपितथा॥पितेत्युक्तेरितिकेचित्।तस्यापिप्रधानत्वात्पितृवदितितुयुक्तं।सपिंडीकरणादौवार्षिकवत्।सपिंडीकरणादीतियानिश्राद्धानिषोडश।तत्रपिंडप्रधानत्वंप्रेतत्वविनिवर्त्तकं।इतिस्मृतेः।महैकोद्दिष्टादौतूभयप्राधान्याद्दावृत्तिरेव।एकएवद्विजोभोज्यःपिंडोप्येकोविधीयते।इतिस्मृतेः।वृद्धिसंकल्प।नित्यश्राद्धादौतुभोजनप्राधान्याद्धोंतादावावृत्तिरेव।वृद्धिश्राद्धेविकल्पेनपिंडदानंबुधैः।स्मृतं।नित्यश्राद्धमदैवंस्यात्पिंडदानविवर्ज्जितमितिस्मृतेः।भुक्तिक्रियायाःप्राधान्यंश्राद्धेसंकल्पसंज्ञके।तत्रैवविप्रस्यतत्पघातेपुनःक्रियेतिसंग्रहोक्तेश्च।मघादावप्येवं।तीर्थेमहालयादौदर्शवदित्याशार्काद्यालोचनंनप्रतीमः।आश्वलायनः।तृप्तान्ज्ञात्वामधुमतीःश्रावयेदक्षन्नमीमदंतेतिच।संपन्नंपृष्ट्वायद्यदन्नमुपभुक्तंततः।स्थालीपाकेनसहपिंडार्थमुद्धृत्यशेषंनिवेदयेत्।अभिमतेनुमतेचेति।अत्रगायत्रीमाध्वीतित्रिकजपोविज्ञेयः।तस्रान्वुधान्नमादायसतिलंपूर्ववज्जपेदितिप्रचेतसोक्तेः।व्यासः।तृप्ताःस्थेतितुपृष्ट्वात्ततेश्रुतृप्ताःस्मेत्युक्तेअभिमतेविप्रैःस्वीकर्त्तुमिष्टे।शौनकोपि।अन्नशेषैस्तुकिंकार्यमितिपृच्छेततांस्ततः।तैरिष्टैःसहभोक्तव्यमितिप्रत्युक्तिपूर्वकं।प्रदद्युःसकलंतस्मैस्वीकुर्युर्वायथारुचि।श्राद्धविशेषप्रश्नभेदमाहहेमाद्रौविष्णुः।पि

ऽन्येस्वदितमिति। गोष्ठ्यां सुश्रुतं संपन्नमित्यभ्युदये दैवे रोचतइति आयुष्ममिति। स्वेरिद्वाः स्वेरमिश्राद्धं। याज्ञवल्क्यः। अन्नमादाय तृप्ताः स्थ शेषं चैवानुमान्य च। तदन्नं प्रकिरेद्भूमौ दद्याच्चापः सकृत्सकृत्। इदं चात्र विकिरदानमन्यशाखिनां। आश्वलायनानां तु पिंडदानांत एव सूत्रे कृतोक्तेः। कात्यायनस्तु विकरोत्तरं गायत्र्यादिजपं तृप्तिप्रश्नं चाह। हेमाद्रौ देवलः। ततः सर्वाशनं पात्रे गृहीत्वा विविधं बुधः। तेषामुच्छेषणस्थाने विकरं भुवि निक्षिपेत्। माधवीये प्रचेताः। सार्ववर्णिकमादाय ये अग्नीति भुवि विक्षिपेत्। स च कुशे कार्यः। दर्भेषु विकरस्त्वपः। इत्युक्तेः। मंत्रः कातीयः। अग्निदग्धाश्च ये जीवा येप्यदग्धाः कुले मम। भूमौ दत्तेन तृप्यंतु तृप्ता यांतु परां गतिंमिति। सोमपानाश्च ये देवा यज्ञभागविवर्जिताः। तेषामन्नं प्रदास्यामि विकिरं वैश्वदेविकं॥ इति हेमाद्रौ गोभिलोक्तेनं दैवे। असंस्कृतप्रमीता ये त्यागिन्यो याः कुलस्त्रियः। दास्यामि तेभ्यो विकिरमन्नं तान्यप्सु पैतृकमित्यग्निपुराणोक्तेनापि। अन्येनं विकीर्य ये अग्निदग्धा इत्युच्छिष्टपिंडं कुशोपरि दध्यक दद्यादित्याहुः। ब्राह्मे। ततः प्रक्षाल्य हस्तौ च आचम्य हरिं स्मरेत्। माधवीये गौतमः। किकेरमुच्छिष्टैः प्रतिपादयेत्। हेमाद्रौ व्यासः। उच्छिष्टैरेव विकिरं सदैव प्रतिपादयेत्। मनुः। पिंडवत्प्रतिपत्तिः स्याद्विकिरस्येति तौतालिः। श्राद्धकाशिकायां प-

मानस्य दासादीनुद्दिश्य द्विजसत्तमः। तस्मादन्नं त्यजेद्भूमौ वाममभागोतु पैतृके। मनुः। उच्छेषणं भूमिगतमजि
ह्मस्याशठस्य च। दासवर्गस्य तत्पित्र्ये भागधेयं प्रचक्षते। विष्णुः। उदङ्मुखेष्वाचमनमादौ दद्यात्ततः प्राङ्मु
खेषु। पित्र्ये दैवे चेत्यर्थः। शातातपः। विश्वेदेवनिविष्टानां चरमं हस्तधावनं। हेमाद्रौ वाराहे। हस्तं प्रक्षाल्य
पश्चात्पः पिबेद्भुक्त्वा द्विजः सदा। तदन्नमसुरैर्भुंक्तं निराशाः पितरो गताः। मरीचिः। हस्तं प्रक्षाल्य गंडूषं यः
पिबेदविचक्षणः। आसुरं तद्भवेच्छ्राद्धं पितॄणां नोपतिष्ठते। तत्रैव संग्रहे। पवित्रंग्रंथिमुत्सृज्य मंडले भुवि
निक्षिपेत्। हस्तादीन्क्षालयेद्विद्वान्शरावादौ तु कुत्रचित्। व्यासः। तांबूलोद्गिरणं चैव गंडूषोद्गिरणं तथा।
कांस्यपात्रे तथा तांम्रे न कुर्वीत कदाचन। उष्णोदकैर्धान्यचूर्णैः। करौ श्मश्रूणि शोधयेत्। अथ पिंडदा
नं। तत्रार्चनोत्तरं अग्नौकरणोत्तरं भोजनोत्तरं विकिरोत्तरं स्वधोत्तरं विप्रविसर्जनोत्तरं वेति हेमाद्र्यादि
षु पक्षा उक्ताः। तेषां शाखाभेदेन व्यवस्था॥ प्रेतश्राद्धेषु पूर्वमन्येषु भोजनोत्तरमिति चंद्रिका माधवौ। सर्वत्र
भोजनोत्तरमिति बहवः। आश्वलायनः। भुक्तवत्स्वनाचांतेषु पिंडान्निदध्यादाचांतेष्वेके। भुक्तवत्स्विति पूर्वं निषे
धार्थं। साग्निरतिप्रतीतसमीपे नग्नेर्द्विजसमीपे। हेमाद्रौ जातूकर्ण्यः। व्याममात्रं समुत्सृज्य पिंडांस्तत्र प्रदापये

२७० ताग्रमारितमुत्तानंतरं व्यासः। आग्नेय्यामुत्तरज्येति। यत्तु तत्रैव। सिकताभिर्मृदा वापि वेदीं दक्षिणानिम्नगेति। तद
न्यशाखिपरं। देवलः। ततस्तैरभ्यनुज्ञातो दक्षिणां दिशमेत्य चाचंद्रिकायां पिंडनिर्वपणं कार्यं कुशाभावे विच
क्षणैः। काशेषु वा राजदूर्वासु पवित्रे परमेष्ठिते। आद्यलामनः स्फ्येन लेखामुल्लिखेदपहता असुरा रक्षांसि वेदि
षद इति तामभ्युक्ष्य सकृदाच्छिन्नैरवस्तीर्य प्राचीनावीती रेखां त्रिरुदकेनोपनयेच्छुंधंतां पितरः शुंधंतां पिताम
हाः शुंधंतां प्रपितामहा इति तस्यां पिंडान्दद्यात्पराचीनेन पाणिना पित्रे पितामहाय प्रपितामहायेति तत्रै
सोपेघस्वामत्रान्विति। हेमाद्रौ पारस्करः। करणाभ्यामुल्लिखेत्स्फ्येन कुशैर्वापि महोद्विजः। बह्वृचानां करेणैव ले
खां चाग्रेप्याभिसन्मुखेति। हत्रिः। दक्षिणाग्राचीवेदिमुद्धृत्येत्यापस्तंबोक्तेश्च। देवलः। आवाह्य पितॄन्दर्भयेत्तेषां
स्थानानि कल्पयेत। तेष्वासीनेषु पात्रेण प्रयच्छेत्सतिलोदकं। पराचीनेन निम्नपितृतीर्थेन। वायवीये मधुसर्पि
स्तिलयुतांस्त्रीन्पिंडान्निर्वपेद्बुधः॥ त्रिस्थलीसेतौ। तिलमन्नं च पानीयं धूपं दीपं पयस्तथा। मधुसर्पिः खंडयुतं
पिंडमष्टांगमुच्यते। याज्ञवल्क्यः। सर्वमन्नमुपादाय सतिलं दक्षिणामुखः। उच्छिष्टसन्निधौ पिंडान्दद्याद्वै पितृय एम°
ज्ञवत्। केचित्पिंडेषु माषान्नवर्जयंति। माषाः श्राद्धेषु देयाः स्याद्वर्जयित्वाग्रपिंडयोः। ब्राह्मणेषु यथामघेतथा

माषोग्निपिंडयोः॥ इति स्मृतिसारात्। माषान्सर्वत्र वै दद्यात्पिंडेग्नौ च विवर्जयेत्। इति स्मृतेश्च। अत्र मूलं चिंत्यं। हेमाद्रौ
वपितृवंशस्य प्रकृतार्थत्वात्सर्वान्नग्रहणमुक्तं। अत्र शेषमन्नमनुज्ञाप्य तस्मात्प्रकृतादन्नात्पिंडानमधुतिला
न्वितान् इति च शेषनियमात्तदभावे पिंडनिवृत्तिरिति मैथिलवाचस्पतिः॥ तन्न। तुषोपवापवत्। परप्रयुक्तद्रव्यत्वेप्य
र्थकर्मत्वात् गुणानुरोधेन प्रधानात्यागाच्च शेषलोपे पिंडद्रव्यांतरेण कार्यं। अतो नैयं प्रतिपत्तिः॥ किंतु प्रधानमि
त्युक्तं प्राक्। अन्यथा सपिंडीकरणादौ संयोजनादेः प्रधानस्य लोपापत्तिरिति दिक्। अथ पिंडप्रमाणं। हेमाद्रा
वंगिराः कपित्थबिल्वमात्रान्वा पिंडान्दद्याद्विधानतः। कुक्कुटांडप्रमाणान्वामलकैर्बदरैः समान् इति। तत्रैव बृ
पिंडोन्द्रग्रः कपित्थस्य प्रमाणेन पिंडान्दद्यात्समाहितः॥ तत्समं विकिरं दद्यात्पिंडांते षडंगुलं। अंत्येष्टिपद्धतौ भ
ट्टाल्का। एकोद्दिष्टे सपिंडे च कपित्थं तु विधीयते। नालिकेरप्रमाणं तु प्रत्यब्दे मासिके तथा। तीर्थदेशे च तत्पा
त्रे कुक्कुटांडप्रमाणतः॥ महालये गयाश्राद्धे कुर्यादामलकोपममिति आहुः॥ कलिकायां आचार्यः। यत्र सु
बहवः पिंडास्तत्र बिल्वफलोपमाः॥ यत्र चैको भवेत्पिंडस्तत्र खर्जूरसन्निभः॥ प्रेतपिंडस्तु दे[illegible]रागद्वादशांगुल
मुच्यते। इति। वायवीये। पत्नी पिंडांस्तु मद्ध्यायात्रिवर्णस्य सहायिनी। हेमाद्रौ लौगाक्षिः॥ महालये गयायां

चपेतश्राद्धे दशाहिको। पिंडशब्दप्रयोगः स्यादन्नमन्यत्र कीर्त्तयेत। शाट्यायनिः। अमावेतन्न इत्युक्त्वा तद्दत्ते च स्वधान
मः। असावित्यत्र संबंधरूपगोत्रादिविशिष्टं पित्रादिनाम संबुद्ध्यंतमुक्त्वा पुनश्चतुर्थ्यंतं तद्दत्ते यं पिंडः इदमन्नं वा स्व
धानमीतन ममेति वदेदिति हेमाद्रिः। पित्रादिनामाज्ञाने त्वापस्तंबः। यदि नामानि न विंद्यात् स्वधापितृभ्यः पृथिवीषद्भ्यः
इति प्रथमं पिंडं दद्यात् स्वधापितृभ्योंतरिक्षसद्भ्यः इति द्वितीयं स्वधापितृभ्यो दिविषद्भ्य इति तृतीयं एवं मातामहे
षु मातृषु च। बह्वृचानां तूक्तं प्राक्। कलिकायां स्मृतिः। यावदेवोच्चरेन्मंत्रं तावत्प्राणनिरोधनं। येषां गृह्ये दर्शे मातुः
श्राद्धं पृथगुक्तं। तेषां पितृभ्यः पश्चिमे मातृभ्यस्तस्याश्च मे मातामहेभ्यः पिंडादि देयं। इति शांखायनः। आस्मि
न्यस्ते तत्पश्चिमे मातामहीभ्यो। पिंडं दद्यात्। इति हेमाद्रिः। पूर्वासु पितृभ्यो दद्यात् अपरासु स्त्रीभ्यः इति सूत्राच्च। एवं
मत्रतीर्थमहालयादौ केचिदिच्छंति। नारीणां पृथक् श्राद्धं महर्षय इति। चतुर्विंशतिमतात्। पित्रादिनवदैवत्यं
तथा द्वादशदैवतमित्यपि पुराणे च। मातॄणां पृथगुक्तं। यत्र वा आचार्यगुरुशिष्येभ्यः सखिज्ञातिभ्य इति तत्पत्नी
भ्यश्च सखीभ्यस्तथैव च जलांजलांजलीनां पिंडांस्तेभ्यः सदा दद्यात् पृथक् भाद्रपदे नरः। तीर्थेषु चैव सर्वेषु माघमासे म रामः
घासु चेति। चतुर्विंशतिमते। दौहित्रपुत्रदाराश्च ये के निष्ठाः सहोदराः। निःसंताना मृता ये च तेभ्यो प्यत्र प्रदीयते इति

भविष्येत्वेकोद्दिष्टान्युक्तानि। तत्रापितत्पत्निमेपिंडदानंज्ञेयं। येषांनपृथक्कृतेस्मपत्नीकाःपित्राद्यैर्वाच्याः।
अन्वष्टकागयामाहुः श्राद्धंचैवमृतेहनि। एकोद्दिष्टंतथामुक्त्वास्त्रीपुमान्यत्रपृथग्भवेदितिशंखोक्तेश्च। मनुः।
तेषुदर्भेषुतंहस्तंनिमृज्याल्लेपभागिनां। हस्तलेपाभावेपिहस्तंनिमृज्याद्देवेतिमेधातिथिः। विष्णुः। अत्रपित
रोमादयध्वमितिदर्भमूलेकरावघर्षणं। कालिकायांतुमंत्रः। एकोद्दिष्टेषुवर्षांतुदर्भेल्लेपोनविद्यते। सपिंडी
करणादौतुलेपःसर्वत्रशस्यते। मनुः। आचम्योदक्परावृत्यत्रिरायम्यशनैरसून्। षड्तूंश्चनमस्कुर्यात्पितॄ
नेवचमंत्रवत्। उदकंनिनयेच्छेषंशनैःपिंडांतिकेपुनः। त्रिःप्राणायामंकृत्वेतिमेधातिथिः। अमंत्रंप्राणंनि
रुध्येतिकर्कोपाः। मंत्रवत्तुवसंतायनमः। नमोवःपितरइत्याद्यैः। शेषंपूर्वोक्तनयनशेषं। आश्वलायनः। निष्टता
नतुमंत्रयेतात्रपितरोमादयध्वंयथाभागमावृषायध्वमितिसव्यावृदुदगावृत्ययथाश्रान्तंप्राणीमासित्वाभि
पर्यावृत्यामीमदंतपितरोयथाभागमावृषायिषतेतिसरोप्राणाभस्तंभत्रयेन्नित्यंनिनयनमिति॥ नित्यग्रह
णशेषाभावेपिकुर्यादित्यर्थः। शौनकः। अथैषामत्रपितरइत्याद्येनानुमंत्रणं। अमीमदंतेत्याद्येनमंत्रेणाभ्यु
शौनकः। मंत्र्यतान। पिंडशिष्टान्नारोरन्नं। किंचिदाघ्रायतत्त्यजेत्। प्रहात्यान्नमस्मस्तुधंतामित्याद्यैरेवपूर्ववत्तामं

२७२ त्रेः पिंडेषु पानीयं निषिंचेत्पितृतीर्थतः। व्याघ्रः। अद्भिः प्रक्षाल्य तत्पात्रं प्रतिपिंडं तु पूर्ववत्। कृत्वावनेजनं कुर्यात्सिं
उपात्रमधोमुखं। एतत्कात्यायनादीनां। आचार्यः। ततः सव्यं गृहीत्वा चम्य नीवीं। विस्रस्य वाग्यतः। आश्वलायनः। असा
वभ्यंक्ष्वासाववभ्यंक्ष्वेति त्रिपिंडेष्वभ्यंजनांजने वासो दद्यात्। दशां मूर्णास्तुकां वा। पंचाशद्वर्षतायाऊर्ध्वं स्वलोम वै
तद्वः। पितरो वासो मा नातोन्यत्पितरो युङ्ध्वमिति। श्राद्धचिंतामणौ ब्राह्मे। एतद्वः पितरो वास इति जल्पन्न एघ
कु। अमुकामुकगोत्रे तत्तुभ्यं वासः पठेद्बुधः। एतत्कात्यायनानां। एतद्वः सूत्राणि प्रतिपिंडमिति तत्सूत्रात्ता। हेमाद्रौ
ब्राह्मे। श्रेष्ठमाहुस्त्रैककुदमंजनं नित्यमेव हि। तैलं कुलतिलेभ्यश्च दद्यादभ्यंजनं हिततं। अंजनप्राप्त्य
मापस्तंबविषयं। तत्रैव व्याघ्रः। गंधपुष्पाणि धूपं च दीपं च विनिवेदयेत्। देवलः। दक्षिणां सर्वभोगांश्च प्र
तिपिंडं प्रदापयेत्। भक्ष्याण्यपूपानि सूपव्यंजनान्यशनानि च। तत्रैव शंखः। यत्किंचित्पच्यते गेहे भक्ष्यं
भोज्यमगर्हितं। अनिवेद्य न भोक्तव्यं पिंडमूले कथंचन। एतत्सव्येनेति केचित्। युक्तं त्वपसव्येन। मनुः।
अवजिघ्रेच्च तान्पिंडान्यथान्युप्तान्समाहितः। ततो नमो वः पितर इत्यादिनोपस्थानं। मात्स्ये। अथाचांते एमः
षु चाचम्य वारि दद्यात्सकृत्सकृत्। तिलपुष्पाक्षतान्पश्चाद्दद्यात्प्योदकमेव च। अत्र दैवे सव्यं पित्र्ये त्वपसव्यं।

मितिकर्कः। परिभाषोक्तवचनात्सव्यमितियुक्तं। अत्रशिवाआपःसंतु। सौमनस्यमस्त्वितिप्रयोगोज्ञेयः।
मास्त्वे। दत्वाशीः प्रतिगृह्णीयाद्द्विजेभ्यःप्राङ्मुखोबुधः। अघोराःपितरःसंतुसंत्वित्युदीरयेत। वसिष्ठवचनेपुनर्द्विजैः। जौ
गोत्रंतथावर्द्धतां। नस्तथेत्युक्तःसतैःपुनः। दाताराेनोभिवर्द्धतामन्नंचैवेत्युदीरयेत स्वस्तिवाचनकंकुर्यात्पिंडानुद्धृ
त्यभक्तितः। स्वस्तिवाचनात्प्राक्पात्रचालनंकार्यंहेमाद्रौबृहस्पतिः। भाजनेषुचतिष्ठत्सुस्वस्तिकुर्वंतियेद्विजाः।
तदन्नमसुरैर्भुक्तंनिराशैःपितृभिर्गतैः। जातूकर्ण्यः। पात्राणिचालयेच्छ्राद्धेस्वयंशिष्योथवासुतः। नस्त्रीभिर्न
चबालेननासजात्याकथंचन। याज्ञवल्क्यः। स्वस्तिवाच्यंततःकुर्यादक्षय्योदकमेवच। अत्रैववृद्धशातातपः।
पितॄणांनामगोत्रेणकरेदेयंतिलोदकं। प्रत्येकंपितृतीर्थेनअक्षय्यमिदमस्त्विति। अत्रषष्ठीप्रागुक्ता। तत्रैव
नागरखंडे। उत्तानमर्घ्यपात्रंतुकृत्वादद्याच्चदक्षिणां। हिरण्यंदेवतानांचपितॄणांरजतंतथा। बृहस्पतिः। तस्मा
त्सलंकाकिणींवाफलंपुष्पमथापिवा। प्रदद्याद्दक्षिणांयज्ञेतथाससफलोभवेत। अन्नंपित्रुद्देशेनादक्षिणा
दानेपसव्यंविप्रोद्देशेतुसव्यमितिमाधवः। कालिकायांमाघार्यः। दद्याद्यज्ञोपवीत्येवतांबूलंददक्षिणांतथा।
अत्रिः। वदेच्चतांस्ततोविप्रान्पित्रादिभ्यःस्वधोच्यतां। गोभिलः। अघोराःपितरःसंत्वित्युक्तेस्वधांवाचयिष्ये

इतिपृच्छति।पितृभ्यःस्वधोच्यतामित्युक्तेऽस्तुस्वधेत्युच्यमानेधारांदद्यात।ऊर्जंवहंतीरमृतंघृतमिति।आपस्तंबेनतु
आन्नोत्तानमितर्पयंतीरित्यपिपारिषेचनेमंत्रउक्तः।आश्वलायनः।अथैतान्प्रवाहयेत्परेतनपितरःसोम्यासोगंभीरे
भिःपथिभिःपूर्विणेभिः।दत्वायास्मभ्यंद्रविणेहभद्रंरयिंचनःसर्ववीरंनियछतेति।मात्स्ये।वाजेवाजइतिजपन्कु
शाग्रेणविसर्जयेत।प्रचेताः।स्वस्तिवाच्यंततःकृत्वापितृपूर्वंविसर्जयेत।आश्वलायनः।अन्नंप्रकीर्यत्तुपवीती
यास्वधेतिविसृजेदस्तुस्वधेतिवा।ब्रह्मवैवर्ते।आमावाजेतुमंत्रंतुपठित्वाचप्रदक्षिणां।द्वारोपांतेततःकृत्वासंयतः
प्रविशेद्गृहं।प्रांजलिश्चततःप्राहतान्विप्रान्सत्यवादिनः।दातारोनोभिवर्द्धंतामन्नंचनउतीवाहि।एवमाश्वितिते
पंचतंब्रुवंतिसमाहिताः।एतन्मंडलदेशेकार्यमितिहेमाद्रिः।मनुः।दातारोनोभिवर्द्धंतांवेदाःसंततिरेवच।श्रद्धाच
नोमाव्यगमद्बहुदेयंचनोऽस्त्विति।बौधायनः।अन्नंचनोबहुभवेदतिथींश्चलभेमहि।याचितारश्चनःसंतुमाचयाचिष्म
कंचन।दातारोनोभिवर्द्धंतांलभध्वंयाचिष्णुमित्याघूहेनपठित्वाविप्रैःप्रतिवचनंकार्यमितिसुदर्शनभाष्ये।स्वादुषंस
इतिअन्नंप्रकीर्यब्राह्मणाःसःपितरइतिमंत्रद्वयंपठंति।शौनकः।ब्राह्मणानथनिर्यातान्परीत्य।त्रिःप्रदक्षिणां।स एमनः
स्त्रीकःस्वजने।सार्द्धंप्रणमेद्रचितांजलिः।कनिष्ठप्रथमाज्येष्ठचरमाःस्युःप्रदक्षिणे।हेमाद्रौबृहस्पतिः।अद्यमेसफ

लेऽन्नमभवत्पादाब्रुवंदनात्। अद्यमेवंशजाःसर्वेयातावोनुग्रहाद्दिवं। पत्रशाकादिदानेनक्ले।शितायूयमीदृशाः॥ त
त्क्लेशजातंचित्तात्तुविस्मृत्यक्षंतुमर्हथ। प्रचेताः। विसृजेद्ब्राक्तिसंयुक्तःसीमांतंचाप्यनुव्रजेत्। अथपिंडप्रतिपत्तिः।
हेमाद्रौब्रह्मांडे। पिंडानग्नौसदाद्याद्भोगाथप्रथमंनरः। पत्न्यैप्रजार्थ्यदद्याद्वैमध्यमंमंत्रपूर्वकं। उत्तमांगतिमान्विछ
न्गोषुनित्यंप्रयच्छति। आज्ञांप्रज्ञांयशःकीर्त्तिमप्सुपिंडंप्रवेशयेत्। प्रार्थयन्दीर्घमायुष्यंवायसेभ्यःप्रयच्छति। आ
ज्ञांप्रज्ञांप्रकाशंगमयेद्यस्तु। क्षितौवारश्मिणामुखेः। आश्वलायनः। मध्यमंपिंडंपत्नीप्राशयेदाधत्तपितरोगर्भंकु
मारंपुष्करस्त्रजं। यथायमरपाअसत्। इति। मत्रादस्ते आद्येनाहृयद्वितीयेनप्राशनं। आपस्तंबस्तुदानेमंत्रमा
ह। अपांत्वौषधीनांरसंप्राशयामि। भूतकृतंगर्भंधत्स्वेतिमध्यमंपत्न्यैप्रयच्छतीतिप्राशनेपि। यथेहपुरुषोऽसदि
तितदीयपाठः। अन्येषांतत्तच्छाखायांज्ञेयः। तत्रैवशंखः। पत्नीवामध्यमंपिंडमश्नीयाद्गर्भवान्विता॥ कलिका
यांछागलेयः। प्राचीनावीतमामंत्र्यपत्नीर्पिंडोविभज्यते। प्रतिपत्न्यस्यमंत्रस्यकर्त्तव्यावृत्तिरंततः। माधवीयेवि
ष्णुधर्मे। तीर्थश्राद्धेसदापिंडान्क्षिपेत्तीर्थेसमाहितः। याज्ञवल्क्यः। पिंडांस्तुगोजविप्रेभ्योदद्यादग्नौजलेपिवा॥
बृहस्पतिः। अन्यदेशगतापत्नीरोगिणीगर्भिणीतथा। तदातंजीर्णवृषभश्छागोवाभोक्तुमर्हति। अथापिंडोपघा

तेहेमाद्रौप्रायश्चित्तकांडेदेवलः॥श्वशृगालखरैःपिंडःस्पृष्टोभिन्नःप्रमादतः।कर्त्तुरायुष्यनाशःस्यात्प्रेतस्तन्नोपसर्पति।जा
तकस्पर्शः।पूर्वश्लोकांते।तद्दोषपरिहारार्थंप्राजापत्यंप्रकल्पयेत्।पुनःस्नात्वातदाकर्त्तापिंडंकुर्याद्यथाविधि।काकस्प
र्शेतुनदोषः।पिंडोपघातंप्रक्रम्य।धनस्यचविनाशःस्यात्काकस्पर्शादिकंविनेति।तत्रैवश्लोकगौतमोक्तेः।स्मृतिदर्पणे
त्रिः।मार्जारमूषकस्पर्शेपिंडेचविदलीकृते।पुनःपिंडाःप्रदातव्यास्तेनपाकेनतच्छ्रणात्।बौधायनः।श्वचंडालादिभिः
स्पृष्टःपिंडोयद्युपहन्यते।प्राजापत्यंचरित्वाथपुनःपिंडंसमाचरेत्।बोपदेवोप्येवमाह।दिनांतेतुप्राजापत्यमात्रं।शेष
प्रतिपत्तित्वेनपिंडावृत्तेर्मानाभावात्।इतिमैथिलाः।तन्न।सपिंडनादौशेषनाशेसंभोजनादिलोपापत्तेः।तेनवच
नाहमनेहवात्रापि।तन्मात्रपिंडदानवृत्तिः।अतएवननक्तंश्राद्धंकुर्वतारब्धेचाभोजनेसमापनादित्यापस्तंबस्मृ
त्रे।एतत्रैभोजनमात्रंपूर्वेद्युःकार्यं।श्राद्धसमाप्तिस्तुपरदिनेएवसमाप्तिपर्यंतंकर्तृरूपवासश्चेति।हरदत्तेस्तच्चप्रायेण
महालयादिनिर्णयेपूर्वमुक्तः।हेमाद्रौवृद्धपराशरः।युगादिषुमघायांचविषुवत्ययनेतथा।भरण्यांपुचकुवनपिं
डनिर्वपणंनहि।स्मृतिरत्नावल्यां।पुत्रेजातेव्यतीपातेग्रहणेचंद्रसूर्ययोः।श्राद्धंकुर्यात्प्रयत्नेनपिंडनिर्वपणादृते। स्म
तत्रैवकात्यायनः।वृद्धेरनंतरंचैवयावन्मासःसमाप्यते।नावसिंडान्नेवदद्यान्नकुर्यात्तिलतर्पणं।बौधायनः।संस्को

रेषु तथान्येषु मासं मासार्द्धमेव वा। तथा। भानौ भौमे त्रयोदश्यां नंदा भृगुमघासु च। पिंडदानं मृदा स्नानं न कुर्यात्तिलतर्पणं।
त्रिस्थलीसेतौ। कार्ष्णाजिनिः। विवाहव्रतचूडासु वर्षमर्द्धं तदर्द्धकं। उत्तरार्द्धं प्राग्वत्। वृद्धिमात्रे तथान्यत्र पिंडदानं नि
राक्रियो। कृतामार्गाद्धिभिर्मुत्वे मासमेकं तु कर्मिणां। हेमाद्रौ ज्योतिःपराशरः। विवाहे विहिते मासं त्यजेयुर्द्वादशे
वहि सपिंडाः। पिंडनिर्वापं मौंजीबंधे षडेवत्सु। तत्रैव। महालये गयाश्राद्धे मातापित्रोः क्षयेहनि। यस्य कस्यापि मर्त्यस्य
सपिंडीकरणे तथा। कृतोद्वाहोपि कुर्वीत पिंडनिर्वपणं सदेति। मातापित्रोरिति स्मृत्याह। विशेषणां हविर्भम्पलवदवि
वक्षितं तेन भ्रातृपितृव्यादिवार्षिकेपि पिंडदानं कार्यमिति केचित्। सपिंडीकरणं नवश्राद्धं षोडशश्राद्धोपलक्षणा
र्थं। इति निर्णयामृते। उक्तो स्मृत्याहे विशेषः संग्रहे। मातापित्रोराह्निके तु विवाहादिषु सर्वदा। तिलैः पिंडाः प्रदातव्या
अन्यश्राद्धे विवर्ज्जयेत्। अत्र मूलं चिंत्यं। एमकौतुके। नंहम्वकामख्यारम्भग्वग्निपितृकालभे। गंजैर्वैधृतिपाते च
पिंडास्त्याज्याः शुभेप्सुभिः। विश्वरूपनिबंधे तिथिवारप्रयुक्तो यो दोषो वै समुदाहृतः। स श्राद्धे तन्निमित्ते स्यान्नान्यश्रा
द्धे कदाचन। अन्यत्रोक्तं प्राक्। उच्छिष्टोद्वासनमाह हेमाद्रौ वसिष्ठः। श्राद्धे नोद्वासनीयानि उच्छिष्टान्यादितःक्षयात्। श्च्योतं
ते वै सुधाधाराः स्ताः पिबंत्यकृतोदकाः। व्यासः। उच्छिष्टं न प्रमृज्यात्तु यावन्नास्तमितो रविः। रदं गृहांतरस्तवे। एकगृहे तु मनुः।

२७५ उच्छेषणंतुतत्तिष्टेद्यावद्विप्राविसर्ज्जिताः। ततोगृहबलिंकुर्यादितिधर्मोव्यवस्थितः। बलिंवैश्वदेवादिनित्यकर्मेतिमेधातिथिः
ब्रह्मोद्देशे। शूद्रायचानुपेतायश्राद्धोच्छिष्टंनदापयेत। तथा। कामंदद्याच्चसर्वंतुशिष्यायचसुतायच॥ भोक्तुमितिशेषः। ज्ञा
तृप्तैः। द्विजभुक्तावशिष्टंतुशुचिर्भूमौनिखानयेत। अथवैश्वदेवादि। अत्रमामकः श्लोकः। श्राद्धेनग्निककर्तृकेत्रि
करणात्पश्चाज्जुहोतिर्बलिस्त्वंतेस्यादथवाभवेद्विकिरतःपश्चात्पृथक्पचेः। श्राद्धांतेत्वथवामहालयविधौपूर्वंभु
जेःस्यात्तद्द्वयेत्वंतेमासुचमध्यतःशुभविधावाद्येतथामासिके।११ अस्यार्थः। साग्नेःपृथक्पाकेनसर्वत्रादौवैश्वदेवः
पक्षांतंकर्मनिर्वर्त्यवैश्वदेवंचसाग्निकः। पिंडयज्ञंततःकुर्यात्ततोन्वाहार्यकंबुधः। पित्र्यर्थंनिर्वर्त्यवैश्वदेवंचसा
ग्निकः। पिंडयज्ञंततःकुर्यात्ततोन्वाहार्यकंबुधः। पित्र्यर्थंनिर्वपेत्पाकंवैश्वदेवार्थमेवच। वैश्वदेवंनपित्र्यर्थंनदा
र्शंवैश्वदेविकं।मितिलौगाक्षिस्मृतेः। अत्रसाग्निकआहिताग्निरितिहेमाद्रिः। श्राद्धात्प्रागेवकुर्वतवैश्वदेवंतुसा
ग्निकः। एकादशाहिकंमुक्त्वातत्र्यंतेविधीयते। इतिहेमाद्रौशालंकायनोक्तेश्च। तत्रैवपरिशिष्टे। संप्राप्तेपार्वणश्रा एमः
द्धेएकोद्दिष्टेतथैवच। अग्रतोवैश्वदेवःस्यात्पश्चादेकादशेऽहनि। स्मार्त्ताग्निमतांतद्रहितानांवाग्नौकरणोत्तरंविकिरो
त्तरंवाहोममात्रंपृथक्पाकेनभूतयज्ञादितुश्राद्धांतएव। अत्रमूलंहेमाद्रौचंद्रिकादौस्पष्टं। सर्वेषांश्राद्धांतेर्वातत्साके

ननित्यश्राद्धादीनित्यतयः। श्राद्धं निर्वर्त्त्यैव विधिवत्तवैश्वदेवादिकं ततः। कुर्याद्भिक्षां ततो दद्याद्धंतकारादिकं तथेति पैठीनसिस्मृतेः। ततः श्राद्धशेषात्। श्राद्धाङ्गि श्राद्धशेषेण वैश्वदेवं समाचरेत्। इति चतुर्विंशतिमताच्च। एवं वैश्वदेवकालत्रयस्य श्राशार्केण शांखायनपरिशिष्टमुदाहृत्यैवं व्यवस्थोक्ता। आदौ वृद्धौ क्षये चांते दर्शे पक्षे महालये। एकोद्दिष्टे निवृत्ते तु वैश्वदेवो विधीयते। इति। बह्वृक्स्मृत्युक्तत्वात्सर्वेषां श्राद्धांत एवेति मेधातिथिस्मृतिः। रत्नावल्यां बहवः बोपदेवस्तत्र त्रिकारेणाविसर्जनांतं श्राद्धमुक्त्वा तच्छेषणांत्विति पूर्वोक्तमनुवाकमोदाहरणाद्बह्वृचानां श्राद्धांत एव। मध्यमपक्षस्त्वन्यशाखापर इत्याह। हेमाद्रिस्तु बह्वावप्यंते एव वैश्वदेवमाह। कातीयानां तु ह्यन्यशाखापर इत्याह। हेमाद्रिस्तु बह्वाव स्मार्त्तश्रौताग्निमत्तामादावेव। अन्येषामंते। तैत्तरीयाणां साग्नीनां सर्वत्रादौ वैश्वदेवः। पंचयज्ञास्त्वंते चेति। सुदर्शनभाष्ये उक्तौ अस्य पक्षद्वयस्य पूर्ववद्व्यवस्था। हेमाद्रौ मार्कंडेयः। ततो नित्यक्रियां कुर्याद्भोजयेच्च ततोऽतिथीन्। ततस्तदन्नं भुंजीत सह भृत्यादिभिर्नरः। ततः श्राद्धशेषात्। नित्यक्रियां नित्यश्राद्धं। तत्र पृथक्पाकेन नैत्यकमिति तन्नैवोक्तेः। पाकैक्ये विकल्पः अथ नित्यश्राद्धं। हेमाद्रौ व्यासः। एकमप्याशयेद्विप्रं षण्णामप्यन्वहं गृही॥ अपीत्यनुकल्पः। प्रचेताः। नामंत्रणं न होमं च नाह्वानं न विसर्जनं। न पिंडदानं विकिरं न दद्यादत्र दक्षिणां॥ अत्र निर्दिश्य भोजयित्वा किं

२७६ चिद्दत्वाविसर्ज्जयेदितितेनैवोक्तेर्दक्षिणाविकल्पः। यत्तु नित्यश्राद्धंदैवहीनंनियमादिविवर्ज्जितं। दक्षिणारहितंचैवदद्यात्भो
क्तृव्रतोसिद्धतंमितिकाशीखंडेतद्विप्राभावपरमितिपृथ्वीचंद्रः। भविष्ये। आवाहनंस्वधाकारं पिंडाग्नौकरणादिकं। ब्रह्म
चर्यादिनियमा। विश्वेदेवानचैवहि। दातृणामथभोक्तृणां नियमोनचविद्यते। एतद्विधाह्निनासंभवेरात्रावपिकार्यं। दिवो
दितानिकर्माणिप्रमादादकृतानिवै। यामिन्याःप्रहरंयावत्तावत्कर्माणिकारयेदितिब्रहन्नारदीयोक्तेः। रात्रौप्रहरप
र्यंतंदिवाकृत्यानिकारयेत्। ब्रह्मयज्ञंचसौरंचवर्ज्जयित्वाविशेषतइतिपृथ्वीचंद्रधृतसंग्रहोक्तेश्च। नचदार्शिकाद्दि
काद्यपिरात्रौस्यादितिवाच्यं। दृष्टापत्तेः। तथाचमाधवेनप्रतिपत्प्रकरणेस्पष्टमुक्तं। वयंचाग्रेवक्ष्यामः। अस्यदिनेऽ
करणेलोपएव। एतेनश्राद्धंनकुर्वतेतिनिषेधादितिपृथ्वीचंद्रः। पात्राभावेकौर्मो। उद्धृत्यवायथाशक्तिकिंचिदन्नंप
कल्पयेत्। तत्रातिपत्तिमाहविष्णुः। भिक्षुकाभावेश्रान्नंगोभ्योदद्यात्। अग्नौवाप्रक्षिपेदिति। हेमाद्रौनागरखंडे। नि
त्यश्राद्धंनकुर्वतप्रसंगाद्यत्रासिध्यति। श्राद्धांतरेकृतेन्यत्रनित्यत्वात्। नहापयेत्। षड्दैवत्येपृथङ्नेत्यर्थः। मात्स्ये। त
ततस्तुवैश्वदेवांतेसभृत्यसुतबांधवः। भुंजीतातिथिसंयुक्तः सर्वंपितृनिषेवितं। सर्वपर्वनिषिद्धंमांसमाषाद्यपीत्य एमः
र्थः। एवंकृष्णैकादश्यांगृहिणोपिभोजनं। अस्यवैधत्वेननिषेधाप्रवृत्तेः। एवंग्रहणवेधेपि। यत्तुनादितात्रेरमाष

मांसंवर्जयेदित्युक्तं। तद्धेयमेव। श्रौतत्वेनतस्यबलवत्वात्। देवलः। श्राद्धंकृत्वातुयोमर्त्योनभुंक्तेयकदाचन। देवाहव्यंन
गृह्णंतिकव्यानिपितरस्तथा॥ शिवरात्र्येकादश्यादौत्ववघ्राणमेवेत्युक्तंप्राक्। यत्रतूपवासोनावश्यकस्तत्रैकभक्तंम
याचितंवाकार्यमिति। हेमाद्रिः। जातूकर्ण्यः। अहन्येवतभोक्तव्यंकृतेश्राद्धेद्विजन्माभिः। अन्यथाह्यासुरंश्राद्धंपर
भो पाकेचसेविते। श्राद्धशेषभोजनस्यक्वचिन्निषेधमाहहेमाद्रौप्रायश्चित्तकांडेमार्कंडेयः। पित्रादीनामथान्येषांश्रा
द्धशेषान्नैषेधभाजनं। व्रतिनांविधवानांचयतीनांचविगर्हितं। अन्येभिन्नगोत्राः। व्रतिनोब्रह्मचारिणः। श्राद्धाव
शिष्टभोक्तारस्तेवैनिरयगामिनः॥ सगोत्राणांसकुल्यानांज्ञातीनांचनदोषकृदितितत्रैवोक्तेः। तत्रैवजाबालिः।
विप्रस्त्वन्यगृहेश्राद्धशिष्टान्नंभोजनंचरेत्। प्राजापत्यंविशुद्धिःस्यादितिगोत्रेनदोषकृत्। यतीनांवपनंश्रणावज
पश्चेतितत्रैवोक्तेः। अस्यापवादमाहसएव। श्वशुरस्यगुरोश्चैव। पितृमातुलस्यमहात्मनः। ज्येष्ठभ्रातुश्चपुत्रस्यब्रह्मनि
ष्ठस्ययोगिनः। एतेषांश्राद्धशिष्टान्नंभुक्त्वादोषोनविद्यते। इतिकेचित्प्रशंसंतिमुनयस्तद्दर्शोपतं। विशेषांतरंत
त्रैवज्ञेयं। हेमाद्रौजाबालिः। तांबूलंदंतकाष्ठंचस्नेहस्नानमभोजनं। रत्यौषधपरान्नंचश्राद्धकर्ताविवर्जयेत्।
आचार्यः। नशूद्रंभोजयेत्तस्मिन्गृहेयत्नेनतद्दिने। श्राद्धशेषंनशूद्रेभ्यःप्रदद्यादखिलेष्वपि॥ इतिश्रीजगद्गुरुना

२७१

रायणभट्टसूनुरामकृष्णभट्टसुतकमलाकरकृते निर्णयसिंधौ पार्वणश्राद्धं॥ अथानुकल्पः॥ तत्र विप्रालाभे भोजयेद्
अथवाप्येकं ब्राह्मणं पंक्तिपावनं। दैवे कृत्वा तु नैवेद्यं पश्चात्तस्य तु निर्वपेदिति शंखोक्तेरेको विप्रः पूर्वमुक्तः॥ विप्राभावे दर्भ
बटुः प्रागुक्तः॥ निधाय वा दर्भवटूनासनेषु समाहितः। प्रैषानुप्रैषसंयुक्तं विधानं प्रतिपादयेत्। इति देवलोक्तेः॥ अश
क्तावामश्राद्धं॥ आपद्यनग्नौ तीर्थे च प्रवासे पुत्रजन्मनि। आमश्राद्धं प्रकुर्वीत भार्यारजसि संक्रमे। इति कात्यायनोक्तेः।
पृथ्वीचंद्रोदये जमदग्निः॥ यावत्स्यान्नाग्निसंयुक्त उच्छन्नाग्निरथापि वा। आमश्राद्धं तदा कुर्याद्वृषलहस्तः सदैव हि। आ
हिताग्नेः प्रवासस्थे तत्पत्नी गृहे दार्शं स्त्रियादिना कारयेत्। अमावास्यादिनियतं प्रोषिते धर्मचारिणी। पत्न्यो तु का
रयेन्नित्यमन्येनाप्यृत्विगादिनेति लघुहारीतोक्तेरिति पृथ्वीचंद्रोदयः॥ आदिपदमाब्दिकादिसर्वपार्वणपरमिति
शूलपाणिः॥ स्तुर्मतः। पाकाभावेधिकारः स्याद्द्विजादीनां नराधिप। अपत्नीनां महाबो विदेशगमनादिभिः॥ सदा चै
व तु शूद्राणामामश्राद्धं विदुर्बुधाः॥ प्रचेताः॥ स्त्रीशूद्रः स्वपचश्चैव जातकर्मणि चाप्यथ। आमश्राद्धं सदा कुर्याद्वि
धिना। पार्वणेन तु। स्वयं पचतीति स्वपचः॥ विस्तृशनसो। आत्मनो देशकालाभ्यां विप्लवे समुपस्थिते। आपद्यन एपः
ग्नौ तीर्थे च प्रवासे पत्न्यसंभवे। चंद्रसूर्यग्रहे चैव दद्यादामं विशेषतः। न पक्वं भोजयेद्विद्वान्स शूद्रोपि कदाचन। भोज

न्प्रत्यवायी स्यान्नचतस्यफलंभवेत्। अत्रप्रवासतीर्थग्रहणादामश्राद्धमेव। पाकश्राद्धंतुनभवत्येवेतिहेमाद्रि
रत्नावल्यादयः। अपरार्कविज्ञानेश्वरादयस्तु। पाकाभावेद्विजातीनामामश्राद्धंविधीयते। इतिसुमंतूक्तेः। साग्निकेनि
रग्निकैश्चप्रवासादौपाकाभावेआमादिनाकार्यं। पाकसंभवेत्वन्नेनैवेत्याहुः। अतएवपाकंश्राद्धमुक्त्वा। एतच्चानु
पनीतोपिकुर्यात्सर्वेषुपर्वसु। भार्याविरहितोप्येतत्प्रवासस्थोपिनित्यशः। इतिमात्स्ये। निरग्निकेणापिपाकेनोक्तमि
तिशूलपाणिकल्पतरुः। एतच्छ्राद्धमात्रपरमित्यन्ये। एकोद्दिष्टंतुकर्तव्यंपाकेनैवसदास्वयमिति। लघुहारीतीय
मपिसाग्नेरेव। निरग्नेर्महैकोद्दिष्टमप्यामेन। शूद्रस्यतुदशाहश्राद्धपिंडाद्यामेनेतिहलायुधः। उच्छन्नाग्नीनांत्वाम
श्राद्धमेव। पूर्वोक्तजमदग्निवाक्यात्। मरीचिः। श्राद्धविघ्नेद्विजातीनामामश्राद्धंप्रकीर्तितं। अमावास्यादिनि
यतेमाससंवत्सरादृते। स्मृतिदर्पणे। मृताहंचसपिंडंचगयाश्राद्धंमहालयं। आपन्नोपिनकुर्वीतश्राद्धमामेनक
र्हिचित्। हेमाद्रौव्यासः। आमंदद्यात्तुकौंतेयदद्यादामंचतुर्गुणं। द्विगुणंत्रिगुणंवापिनत्वेकगुणमर्पयेत्। स्मृत्यर्थ
सारेसममप्युक्तं। षड्त्रिंशन्मते। आमश्राद्धंयदाकुर्यात्पिंडदानंकथंभवेत्। गृहपाकात्समुद्धृत्यसक्तुभिःपायसेन
वा। पिंडान्दद्याद्यथालाभंतिलैःसहविमत्सरः। पृथ्वीचंद्रोदयेव्यासः। आमश्राद्धंयदाकुर्याद्विधिज्ञःश्राद्धदःसदा।

हस्तेग्नौकरणंकुर्याद्ब्राह्मणस्यविधानतः।एतत्साग्नेर्निरग्नेःसदातत्स्वाता।पत्न्या आमेनपिंडंदद्याच्चेद्विप्रंपक्वेनभोजयेत्।प
क्वेनकुरुतेपिंडमान्नं यःप्रयच्छति।तावुभौमनुजौप्रोक्तौनरकार्हौनसंशयः॥इति।तद्देशादिपरं।देशाचाराद्व्यवस्थेतियुक्तं।
मरीचिः।आवाहनेस्वधाकारेमंत्राज्जृत्याविसर्जने।अन्यकर्मण्यपन्हूत्याःस्युरामश्राद्धविधिःस्मृतः।आवाहनेहविषेअ
त्तवइत्यत्रस्वीकर्त्तवेइत्यूहः।स्वधाकारेनमोवःपितरःइषेइत्यत्रइषेपदस्थानेआमद्रव्यायेत्यूहः।विसर्जनेवाजेवाज
इत्यत्रतृप्ताःस्थइतिस्थानेतृप्यंततृप्यंतेतिवोहः।यद्यपितस्माद्धव्यंनोहेदितिस्मृत्यूहोनिषिद्धस्तथापिवचनादूह
ति।तत्रापिप्रश्नोवगाहश्चतुषमश्नोपयामसुखं।आमश्राद्धेभवेन्नेत्वदपोशानंचपंचमं।अयंचानुवादः।खलेवाल्या
छेदनादीनांमिवार्थाभावात्तत्रोपसिद्धेः।धर्मप्रदीपेतु।आमंचतुर्गुणंदद्यादथवाद्विगुणंतथा।हेमचाष्टगुणंतद्वदा
मेहेमेप्यसौविधिः।आमेहेमेतथानित्येनांदीश्राद्धेतथैवच।व्यतीपातादिकेश्राद्धेनियमान्परिवर्जयेत्।गृहपा
कात्मशुद्धस्सस्नाभिःपायसेनवा।पिंडदानंप्रकुर्वतआमेहेमेकृतेसति।आमश्राद्धेचवृद्धौचप्रेतश्राद्धेतथैवचाकि- एमः
किरंनैव— तमुनिः।कात्यायनोब्रवीत्।आमश्राद्धमनंगुष्ठमग्नौकरणवर्जितं।तत्रापिश्रावहीनंतुकर्त्तव्यंमानवै
र्ध्रुवं।आवाहनाग्नौकरणंविकिरंपात्रपूरणं।तत्रापिप्रश्नंनकुर्वीतआमेहेमेकदाचनेत्युक्तं।एतच्च।आवाहनंभवेत्का

र्पमर्घ्यदानंतथैवचेति।हेमाद्रौभविष्यादिविरोधाच्चिंत्यं।शाखांतरविषयंवात्रविकिरेण्पामेनेति।हेमाद्रिःशूद्रस्यतु
तत्रैवोक्तं।अग्नौकरणमंत्रश्चनमस्कारोविधीयते।अग्नयेकव्यवाहनायनमः।सोमायपितृमतेनमः।इत्ययंमंत्रः।मा
त्स्ये।मंत्रवर्ज्जंहिशूद्रस्यसर्वमेवविधीयते।एवंशूद्रोपिसामान्यंवृद्धिश्राद्धंचसर्वदा।नमस्कारेणमंत्रेणकुर्यादामान्न
वद्बुधः।।तच्चपूर्वाह्णेकार्यं।आमश्राद्धंतुपूर्वाह्णेएकोद्दिष्टंतुमध्यतः।पार्वणंचापराह्णेतुप्रातर्वृद्धिनिमित्तकमिति।
हारीतोक्तेः।।एतद्द्विजकर्तृकविषयं।शूद्रकर्तृकंतुपराह्णएव।मध्याह्नात्परतोयत्रकुतपःसमुदाहृतः।आमश्राद्धं
लतत्रैवपितृणांदत्तमक्षय्यं।इतिस्मृत्युक्तेरिति।अपराह्णेहेमाद्रौचोक्तं।तदभावेहेमश्राद्धमाहहेमाद्रौमरीचिः।
आमान्नस्याप्यभावेतुश्राद्धंकुर्वीतबुद्धिमान्।धान्याच्चतुर्गुणेनैवहिरण्येनसुरोचिषा।धर्मः।आमंतुद्विगुणंप्रो
क्तंहेमतद्वच्चतुर्गुणं।स्मृत्यर्थसारे।हिरण्यमष्टगुणंचतुर्गुणंसमंवादद्यात्।हेमाद्रौभविष्ये।अन्नाभावेद्विजाभा
वेप्रवासेपुत्रजन्मनि।हेमश्राद्धंसंग्रहेचैतत्स्त्रीशूद्रयोरपि।षड्त्रिंशन्मतेतुर्यपादेवर्ज्जोपित्वार्त्तयेहनीतिपाठः
यस्यभार्यारजस्वलेतिव्यासपाठः।पुत्रोत्पत्तौतुहे।मर्पनियममाहसंवर्त्तः।पुत्रजन्मनिकुर्वीतश्राद्धंहेम्नैवबुद्धिमान्।
नपक्वेननचामेनकल्याणान्यभिकामयेत्।भविष्ये।गृहपाकात्समुद्धृत्यसक्तुभिःपायसेनवा।।पिंडदानंप्रकुर्वीतहेम

२७९ श्राद्धंप्रकुर्वतहेमश्राद्धेकृतेसतिशूद्रस्तुगृहपाकेतत्पिंडान्निर्वपेन्नरः। सक्तुमूलंफलंतस्यपायसंवाभवेत्सृतं। हेमश्राद्धे
पिंडदानंनेतिदिवोदासः। स्मृत्यर्थसारेतुविकल्पउक्तः। तदाशयंनविद्मः। षट्त्रिंशन्मतेनामंत्रणाद्योकरणंविकिरोनैवदी
यते। तृप्तिप्रश्नोऽपिनैवात्रकर्तव्यःकेनचिद्भवेत्। अत्रमरीचिनाआमाभावेहेमविधानेनस्थानापत्त्याधर्मप्राप्तेः। पूर्ववन्मं
त्रोहःपूर्वाह्णकालताचज्ञेयेतिदिक्। पूर्वोक्तधर्मप्रदीपोक्तेश्च। व्यासः। हिरण्यमामंश्राद्धीयंलब्धंयत्क्षत्रियादितः। यथे
ष्टंविनियोज्यंस्याद्भुंजीयाद्ब्राह्मणात्स्वयं। विप्राल्लब्धंभुंजीयात्। कृत्वादिलब्धेननुश्राद्धेवैश्वदेवाग्निकार्ये। देवोद्देशे
नत्यक्तस्यदेवतांतरण्यन्यायायोगादितिदेवयाज्ञिकः। शूद्रलब्धेनकृतंतत्रैव। षट्त्रिंशन्मते। आमंशूद्रस्ययत्किंविद्ध
द्विकंप्रतिगृह्यते। तत्सर्वंभोजनायालंनित्येनैमित्तिकेनचेति। शुद्धितत्वेऽगिराः। शूद्रवेश्मनिविप्रेणाक्षीरंवायदिवाद
धि। निवृत्तेननभोक्तव्यंशूद्रान्नंतदपिस्मृतं। शूद्राद्द्विजगृहेष्वन्नंप्रविष्टंतत्सदाशुचि। पराशरः। तावद्भवतिशूद्रान्नंयाव
न्नस्पृशतिद्विजः। द्विजातिकरसंस्पृष्टंसर्वंतन्नाविरुध्यते। ऽविष्णुपुराणे। संप्रोक्ष्यपित्वागृह्णीयाच्छूद्रान्नंगृहमागतं।
अंगिराः। पात्रांतरगतंग्राह्यंदुग्धंचगृहमागतं। सपिंडश्राद्धदर्शक्तावाहहेमाद्रौसंवर्तः। समर्थंयःक्षशक्नोतिकर्तुं रामः
नैवेहपार्वणं। अपिसंकल्पविधिनाकालेतस्यविधीयते। पात्रेभोज्यस्यचान्नस्यत्यागःसंकल्पउच्यते। व्यासः। संक

स्वंतु यदा कुर्यान्न कुर्यात्यात्र प्ररणां। न चावाहनाग्नौकरणे पिंडांश्चैव न दापयेत्। पात्रमर्घ्यस्य। समंत्रकावाहनस्य निषेधः
तूष्णीं तु भवत्येवेति हेमाद्रिः। स्मृत्यंतरे। विकिरं तु न दातव्यमिति तृतीयपादे पाठः। स्मृत्यंतरे। त्यजेदावाहनं चार्घ्यम
ग्नौकरणमेव च। पिंडांश्च वि। किरान्न्य्ये श्राद्धे संकल्पसंज्ञके। हेमाद्रौ वृद्धशातातपः। पिंडनिर्वापरहितं यत्तु श्राद्धं
विधीयते। स्वधावाचनलोपोत्र विकिरस्तु न लुप्यते। इत्याह। पृथ्वीचंद्रोदये वसिष्ठः। आवाहनं स्वधाशब्दं पिंडाग्नौकरणं तथा॥
विकिरं। श्रेत्रिपंच सांकल्पे षड्विवर्जयेत्। विकिरे विकल्पः। स्मृत्यंतरे। अंगानि पितृयज्ञस्य यदा कर्तुं न शक्नुयात्। स तदा
वाचयेद्विप्रान्संकल्पात्सिद्धिरस्त्विति। छागलेयः। पिंडो यत्र निवर्त्तेत मघादिषु कथंचन। सांकल्पं तु तदा कार्यं नियमाद्ब्र
ह्मवादिभिः। कार्ष्णाजिनिः। मौंजीबंधाद्व्रतस्यार्द्धं वत्सरं पाणिपीडनात्॥ पिंडान्सपिंडनाद्दद्युः प्रेतपिंडं विनात्र तु। अस्या
पवादः। न पित्रोराब्दिकादौ पूर्वमुक्तः। त्यक्त्वाग्नेरपि सांकल्पमुक्तं षड्त्रिंशन्मते। अनग्निको यदा विप्रश्छन्नाग्निस्तथैव
च। तथा वृद्धिषु सर्वासु संकल्पश्राद्धमाचरेत्। अशक्तौ तु पृथ्वीचंद्रोदये ब्रहन्नारदीये। द्रव्याभावे द्विजाभावे अन्नमा
त्रं तु पाचयेत्। पैतृकेण तु सूक्तेन होमं कुर्याद्विचक्षणः। देवलः। पिंडमात्रं प्रदातव्यमभावे द्रव्यविप्रयोः। श्राद्धीयाह
नि संप्राप्ते भवेन्निरशनोपि वा। वृद्धवसिष्ठः। किंचिद्दद्यादशक्तस्तु उदकुंभादिकं द्विजे। तृणानि वा गवे दद्यात्पिंडान्वाप्य थ

निर्वपेत। तिलदर्भैः पितॄन्ध्वा पितॄन्तर्पयेत्स्नानपूर्वकं। हेमाद्रौ भविष्ये। अग्निना वा दहेत्कृत्स्नं श्राद्धकाले समागते। तस्मिन्वोपवसे
द्दक्षिणामपेद्वा श्राद्धसंहितां। स्नाद्वसंहितासमंत्रः श्राद्धसंकल्पः। विष्णुवाराहपुराणयोः। असमर्थोन्नदाने स्यधान्यमामं सं
स्वशक्तितः। प्रदास्यति तिलान्वापि स्वल्पामपि दक्षिणां। सर्वाभावे वनं गत्वा कक्षामूलप्रदर्शकः। सूर्यादिलोकपाला
नामिदमुच्चैः पठिष्यति। न मेस्ति वित्तं न धनं न चान्यच्छ्राद्धोपयोग्यं स्वपितॄन्नतोस्मि। तृप्यंतु भक्त्या पितरो मयैतौ भु
जौ कृतौ वर्त्मनि मारुतस्य। इत्येतत्पितृभिर्गतं भावाभवप्रयोजनं। यः करोति कृतं तेन श्राद्धं भवति भारत। प्रभासखंडे।
गत्वारण्यममानुष्यमूर्ध्वबाहुर्विरौत्यदः। निरन्नो निर्धनो देवाः पितरो मातृणां कृथाः। न मेस्ति वित्तं न धनं न भार्या श्राद्धं
कथं वः पितरः करोमि। वनं प्रविश्येह तु तन्मयोच्चैर्भुजौ कृतौ वर्त्मनि मारुतस्य। श्राद्धसर्वमेतद्भवतां प्रदत्तं मस्त्वंद
यद्यपि पितृदेवताद्याः। आख्याय चोत्क्षिप्य भुजौ ततो वै दिवा च रात्रिं समुपोष्यति ष्ठेत। भवेत्सर्वे तेन कृतेन तेषामृणा
नमुक्तः पितृदेवतानां। इत्यनुकल्पः॥ अथ श्राद्धभोजने प्रायश्चित्तं। दार्शषट्प्राणायामाः। वृद्धौ त्रयः। संस्कारेषु जात
कर्मादिचूडांतेषु सांतपनं। आद्ये चांद्रं च। अन्यसंस्कारेषूपवासः। सीमंते चांद्रं। इति विज्ञानेश्वरः। आपदि नव श्रा एमः
द्धैकादशाहेषु भोजने कार्यः। द्वादशाहे ऊनमासे च पादोनः। द्विमासे त्रिपक्षे ऊनषष्ठे नाह्न यो श्राद्धकृत्स्नाः। त्रिमासे

धाह्निकांतेषु सपिंडने च पादकृच्छ्रः। उपवासो वा। ढरुद्व्यार्थं भोजनेर्द्धं। अनापदि तुऊनमासांतेषु चांद्रं कार्यं च। द्वि
मासादौ पादोनं। त्रिमासादावर्द्धं कार्यः। आह्निके पादोनं कार्यः। पुनराह्निके एकाहः। क्षत्रियादिश्व द्विषु द्वित्रिचतुर्गुणा
नि ज्ञेयानि। चंडालसर्पपश्वादिहतपतितक्लीबादिनवश्राद्धे चांद्रं। आद्यमासिकांते चाद्रपाराकश्च। द्वादशाहादौ
पाराकः। द्विमासादावतिकृच्छ्रः। त्रिमासादौ कार्यः। आह्निके पादः। अभ्यासे सर्वं द्विगुणं। आमहेमसंकल्पश्राद्धे
षु तत्तदर्द्धानि। यदि ब्रह्मचारी चोक्तप्रायश्चित्तं कृत्वा त्रीनुपवासान् प्राणायामान् अष्टाधिकंशतं कृत्वा व्रत
शेषं समापयेत्। अनापदि द्विगुणं। दर्शादौ। अन्येषूपवासव्यतिरिक्ता। अत्र माधवमिताक्षरादौ कश्चिद्विरोधो वि
षयभेदात्परिहार्यः। एकादशाहे चांद्रं। पुनःसंस्कारश्चेति हेमाद्रिः। यत्तूशनाः। दशकृत्वः पिबेदापो गायत्र्या श्राद्ध
भुग्द्विजः। इति तदनुक्तप्रायश्चित्ते श्राद्धपरमिति विज्ञानेश्वरः। अथ पक्षयाहश्राद्धं। तत्स्वरूपमाह हेमाद्रौ व्यासः।
मासपक्षतिथिस्पृष्टे यो यस्मिन्म्रियतेऽहनि। प्रत्यब्दं तु तथाभूतं क्षयाहं तस्य तं विदुः। नारदीये। पारणे मरणे नॄ
णां तिथिस्तात्कालिकी स्मृता॥ अत्र चांद्रमानं ज्ञेयं। आह्निके पितृकार्ये च चांद्रो मासः प्रशस्यते। इति गार्ग्योक्तेः। म
लमासमृतस्य तु सौरं। मलमासमृतानां तु सौरमानं समाश्रयेदिति हेमाद्राबुक्तेः। एतन्मृतिमासस्यैवाधिक्ये ज्ञेयं।

ब्राह्मण्येप्रतिसंवत्सरंकार्यंमातापित्र्येष्ठस्येतिकनिष्ठस्यानावश्यकतार्थं। मदनरत्नेभविष्ये। सर्वेषामेवश्राद्धानांत्येष्टंसांव
+त्रोर्मृतेहनि। पितृव्यस्याप्यपुत्रस्यभ्रातुर्ज्येष्ठस्यचैवहि। अपुत्रस्येतिश्रात्राप्यन्वयः॥+१ त्सरंमतं। तथा। भोजकौ
यस्तुवैश्राद्धंनकरोतिखगाधिप। मातापितृभ्यांसततंवर्षेवर्षेमृतेहनि। सयातिनरकंघोरंतामिस्रंनाममनामतः॥
तच्चनास्मृतिषेकोद्दिष्टंपार्वणंचोक्तं। आद्यमाहयमः। सपिंडीकरणादूर्ध्वंप्रतिसंवत्सरंसुतैः। मातापित्रोःद्दिष्टंपा
र्वणंचोक्तं। आद्यमाहयमः। एथक्कार्यमेकोद्दिष्टंमृतेहनि। व्यासः। एकोद्दिष्टंतुकर्त्तव्यंपित्रोश्चैवमृतेहनि। एको
द्दिष्टंपरित्यज्यपार्वणंकुरुतेनरः। अकृतंतंद्विजानीयाद्भवेच्चपितृघातकः। अंत्यमाहशातातपः। सपिंडीकरणं
कृत्वाकुर्यात्पार्वणंवत्सरात्। प्रतिसंवत्सरंश्राद्धंछागलेयोदितोविधिः। यः सपिंडीकृतंप्रेतंपृथक्पिंडेनियोजयेत्।
विधिघ्नस्तेनभवतिपितृहाचोपजायते। अत्रौरसक्षेत्रजयोःपार्वणंदत्तकादीनामेकोद्दिष्टमित्येकःपक्षः। साग्नेः
पार्वणंनिरग्नेरेकोद्दिष्टमित्याह। अपरार्केप्येवं। दत्तकादयोदशपुत्रास्तुसाग्नयोनिरग्नयपक्षेकोद्दिष्टमेकुर्युः। प्रत्य
ब्दंपार्वणेनैवविधिनाक्षेत्रजौरसौ। कुर्यातामितरेकुर्युरेकोद्दिष्टंसुतादशेतिजातूकर्ण्योक्तेः। यदातुदत्तकस्यम एमः
हालयेवामृतेहस्तत्रपार्वणैकोद्दिष्टयोर्विकल्पः। वस्तुतस्तुसर्वेषांपार्वणैकोद्दिष्टयोर्व्रीहियववद्विकल्पः। सच

देशान्तरागश्च वस्थितरतीति सर्वनिबंधसिद्धीतः। अत एव पृथ्वीचंद्रोदये वृद्धपराशरः। मातापित्रोः पृथक्कार्यमेकोद्दिष्टं मृते
हनीति। उक्त्वाह। देशधर्मं समाश्रित्य वंशधर्मं तथापरे। सूरयः श्राद्धमिच्छंति पार्वणं च क्षयाहनीति। तच्च केवलपितृणां
नसपत्नीकानामिति हेमाद्रिः। अत्र मातामहान कार्याः कर्षूसमन्वितं मुक्त्वा तथाद्यं श्राद्धषोडशं। प्रत्याब्दिकं च शे
षेषु पिंडाः स्युः षडिति। स्थितिरीति कात्यायनोक्तेः। कर्षूसमन्वितं सपिंडनं। एकोद्दिष्टं क्रियते तेषामपि क्वचित्पा
र्वणमेव। अमावास्यां क्षयो यस्य प्रेतपक्षेथवा पुनः। पार्वणं तस्य कर्त्तव्यं नैकोद्दिष्टं कदाचनेति। शंखोक्तेः। एवं सन्या
सिनोपि। एकोद्दिष्टं यतेर्नास्ति त्रिदण्डग्रहणादिह। सपिंडीकरणाभावात्पार्वणं तस्य सर्वदेति। प्रचेतसोक्तेः। धा
यवीये। सन्यासिनोप्याब्दिकादि पुत्रः कुर्याद्यथाविधि। महालये तु यच्छ्राद्धं दर्शे यत्पार्वणं हि तत्। पृथ्वीचंद्रोदये
वृद्धपराशरः। संग्रामे संस्थितानां च प्रेतपक्षे शस्त्रघे। तेषां पार्वणमेवोक्तं संन्यासेपि च सत्तमैः। चेदज्ञ यानाशकसंयु
येषु यः प्रेतपक्षे मृतवन्त। पिंडाः सपिंडितानामपि वार्षिकानि भवंति तेषामिह पार्वणानि। तथा। मार्कंडेयपृष्टस्य कु
वतज्येष्ठो भ्राता नुजस्य च। दैवहीनं तु तत्कुर्यादिति धर्मविद्ब्रवीत्। दैवहीनमेकोद्दिष्टं ज्येष्ठो वा भ्राता नाद्यग
र्भजः। तथा च तत्रैव शातातपः। अनाद्यगर्भज्येष्ठोपि भ्राता सद्भिर्निगद्यते। स तेसपिंडनात्तस्य नैव पार्वणमाचरे

ता॥ श्राघाणमैंतु पार्वणमेकोद्दिष्टं वेत्यर्थः॥ मातुस्तु हेमाद्रौ कात्यायनः॥ प्रत्यब्दं यो यथा कुर्यात्पुत्रः पित्रे सदा द्विजः॥ तथै
व मातुः कर्तव्यं पार्वणं वान्यदेव वा॥ यत्तु तेनैवोक्तं॥ सपिंडीकरणादूर्ध्वं पित्रोरेव हि पार्वणं॥ पितृव्यभ्रातृमातॄणामेको
द्दिष्टं सदैव हीति॥ तत्सपत्नमातृपरं॥ यत्तु वृद्धपराशरः॥ अपुत्रस्य पितृव्यस्य तत्पुत्रो भ्रातृजो भवेत्॥ स एव तस्य कुर्व
त पिंडदानादिकां क्रियां॥ पार्वणं तेन कार्यं स्यात्पुत्रवद्भ्रातृजेन तु॥ पितृस्थाने तु तं कृत्वा शेषं पूर्ववदुच्चरेत्॥ इति त
त्पितृवद्दिशाचाराद्व्यवस्थितं ज्ञेयं॥ इति पृथ्वीचंद्रः॥ श्राद्धदीपककलिकायां॥ चतुर्विंशतिमते तु॥ पितृव्यभ्रातृणां ज्येष्ठानां
पार्वणं भवेत्॥ एकोद्दिष्टं कनिष्ठानां दंपत्योः पार्वणं मिथः॥ अपुत्रस्य पितृव्यस्य भ्रातुश्चैवाग्रजन्मनः॥ मातामहस्य तस्य पत्न्याः
श्राद्धं पार्वणवद्भवेत्॥ इत्युक्तं॥ पत्न्याः कर्तृत्वेऽपि पार्वणं॥ सर्वाभावे स्वयं पत्न्या स्वभर्तॄणाममंत्रकं॥ सपिंडीकरणं कुर्या
त्ततः पार्वणमेव चेति लौकाक्षिस्मृतेः॥ तत्र पत्न्यपि कुर्वत सापिंड्यं पार्वणं तथेति॥ सुमंतूक्तेश्चेति निर्णयामृते तूक्तं॥
अन्ये त्वेतत्साह्निकपार्वणपरमाहुः॥ अत एव॥ भर्तुः श्राद्धं तु या नारी मोहात्पार्वणमाचरेत्॥ न तेन तृप्यते भर्त्ता कृत्वा
तु नरकं व्रजेदिति स्त्रिया हे पाक्षिकैकोद्दिष्टप्रशंसार्थवचनेन पार्वणनिषेधार्थमित्युक्तं त्रिस्थलीसेतौ भट्टचरणैः॥ एम:
स्वभर्तृप्रभृतित्रिपरस्य नेन विरोधाच्च॥ अपुत्राणां त्वाह हेमाद्रावापस्तंबः॥ अपुत्रा ये मृताः केचित्स्त्रियो वा पुरुषाश्च

योतेषामपि च देयं स्यादेकोद्दिष्टं न पार्वणं। मित्रबंधुसपिंडेभ्यः स्त्रीकुमारीभ्य एव च॥ दद्याद्वैमासिकं श्राद्धं सांवत्स
रमतोन्यथा॥ पारिजाते तु। अन्यथा पार्वणमित्युक्त्वा सर्वत्र पार्वणैकोद्दिष्टवाक्यानि लतीर्थमहालयपराणीत्युक्तं। पृ
थ्वीचंद्रोदये वृद्धगार्ग्यः॥ मातुः सहोदरायाश्च पितुः सहभवाच या॥ तयोश्च नैव कुर्वत पार्वणं पिंडनादृते। प्रचेताः॥ सपिं
डीकरणादूर्ध्वमेकोद्दिष्टं विधीयते। अपुत्राणां च सर्वेषामपत्नीनां तथैव च। अपत्नीनां ब्रह्मचर्यादीनां। मार्कंडेयपु
राणे। प्रतिसंवत्सरं कार्यमेकोद्दिष्टं नरैः स्त्रियाः॥ मृताहनि यथान्यायं नृणां यद्वदिहोदितं। नृणामिति दृष्टांतागो
विप्रहतानां पाखंड्यादीनां सपिंडनाभावे सांवत्सरमेकोद्दिष्टं कार्यमेवेति शूलपाणिः॥ सपिंडीकरणादूर्ध्वं यत्रय
त्र प्रदीयते। भ्रात्रे भगिन्यै पुत्राय स्वामिने मातुलाय च॥ पितृव्यगुरवे श्राद्धमेकोद्दिष्टं न पार्वणं। यत्तु जातूकर्ण्यः
पितृव्यभ्रातृमातॄणामपुत्राणां तथैव च। मातामहस्य चास्तु तस्य श्राद्धादि पितृवद्भवेत्। इति। तदावश्यकत्वा
र्थः न तु पार्वणार्थमिति हेमाद्रिः॥ युक्तं चैतत्। मातुः पितरमारभ्य त्रयो मातामहाः स्मृताः॥ तेषां तु पितृवच्छ्राद्धं कुर्यु
र्दुहितृसूनवः॥ इति पुलस्त्योक्तेः॥ मातामहस्य पार्वणमेव। तत्साहचर्यात्पितृव्यादेस्तथा॥ पितृव्यभ्रातृमातॄणा
मेकोद्दिष्टं च पार्वणं। इति क्षयाहोपक्रमे पुलस्त्योक्तेश्च विकल्पः॥ केचित्त्वापस्तंबादीनां वाक्यानि व्युत्क्रमात्प्रमीता।

नंनैवकार्यासपिंडतेत्यस्यपितृव्यादिपरत्वादकृतसापिंडनपितृव्यादिपरणीत्याहुः। मातासपत्नमाताएकोद्दिष्टंतुकनिष्टपरंमिति। पृथ्वीचंद्रोदयेप्येवं॥ विशेषस्त्वधिकारिनिर्णयेप्रागुक्तः। केचित्पुत्रांतराभावेपितामहवार्षिकमप्यावश्यकं। पुत्राभावेचतत्पुत्रपत्नीमातातथा। पिता॥ विहाभावेपिसछिष्यःकुर्यात्तस्यौर्ध्वदेहिकमिति। मार्कंडेयपुराणादित्याहुः। तन्न। पौत्रेणैकादशाहादिकर्त्तव्यश्राद्धषोडशमितिकातीयेति विशेषोक्तेः॥ अथत्रयाहद्वैधनिर्णयः। तत्रैकोद्दिष्टंमध्याह्नेकार्यं। मध्याह्नश्चपंचधाभक्तेदिनेतृतीयभागइति। माधवः॥ आमश्राद्धंतुपूर्वाह्णे एकोद्दिष्टंतुमध्यतः पार्वणंचापराह्णेतुप्रातर्वृद्धिनिमित्तकमिति। हारीतोक्तेःप्रातःशब्दसाहचर्यात्। तत्रापिकुतपादिमुहूर्त्तद्वयेज्ञेयं। प्रारभ्यकुतपेश्राद्धंकुर्यादारौहिणंबुधः॥ विधिज्ञोविधिमास्थायरौहिणंतुनलंघयेत्। इतिश्लोकगौतमोक्तेरेतत्परत्वात्। रौहिणोनवमोमुहूर्त्तः॥ मैथिलाःश्राद्धकौमुदीचैवं। अन्यथा॥ ऊर्ध्वंमुहूर्त्तात्कुतपाद्यन्मुहूर्त्तचतुष्टयं। मुहूर्त्तपंचकंह्येतत्स्वधाभवनमिष्यते। इत्यादिविरोधात्॥ दीपिकापि। एकोद्दिष्टमुपक्रमेतकुतपेइति। माधवीयेव्यासोपि। कुतपेप्रथमेभागेएकोद्दिष्टमुपक्रमेत्। आवर्त्तेनसमीपेवातत्रैवनियतात्मवान्। तन्नीकुतपादिरौहिणांतोमुख्यःकालः। पृथ्वीचंद्रोदयेप्येवं। द्विमन्वयेत

व्याप्तौ त्र्यंशाद्यमव्याप्तौह पूर्वा विषमव्याप्त्या वाधिक्येन निर्णयः। अव्याप्तौ पूर्वैवापराविद्धाया निषेधात्। तच्च वक्ष्यते। पू
र्वाह्णविषेन ग्रहणे रौहिणालंघनापत्तेः परैवेति गौडाः। शुक्लकृष्णवशात्तद्गौडदर्पो दोषो वा व्यवस्थेत्यन्ये। तन्न। पराविद्धानि
षेधप्राबल्यात्। अत्र मूलं पार्वणं त्वपराह्णे कार्यं। पूर्वोक्तवचनात्। मध्याह्नव्यापिनी यास्यात्सैकोद्दिष्टे तिथिर्भवे
त्। अपराह्णव्यापिनी यास्यात्पार्वणे सा तिथिर्भवेत्। इति शंखीचंद्रोदये वृद्धगौतमोक्तेश्च। पूर्वेद्युरेव परेद्युरेव
वापराह्णव्याप्तौ सैव ग्राह्या। दिनद्वये तद्व्याप्तौ तदस्पर्शे प्रातः समव्याप्तौ वा पूर्वैव विषमव्याप्तावधिका ग्राह्या। अ
पराह्णव्यापिनी स्यादाब्दिकस्य यदा तिथिः। महती यत्र तद्व्याप्तं प्रशंसंति महर्षय इति मरीचिस्मृतेः। दर्शं च पौ
र्णमासं च पितुः सांवत्सरं दिनं। पूर्वविद्धमकुर्वाणो नरकं प्रतिपद्यते इत्यपरार्के नारदोक्तेः।। अहर्द्वयव्यापिनी चे
त्स्यान्मृताहस्य यदा तिथिः। पूर्वविद्धा प्रकर्तव्या त्रिमुहूर्ता च या भवेत्। इति सुमंतूक्तेः। पूर्वस्यां निर्वपेत्पिंडा
न्नित्यं गोरसभावितं इति हेमाद्रौ पाठः। तत्रैव वृद्धमनुः न्यहव्यापिनी चेत्स्यान्मृताहस्य च या तिथिः। पूर्व
विद्धैव कर्तव्या त्रिमुहूर्ता च या भवेत्। मदनरत्नेप्येवं। यत्तु कार्ष्णाजिनी व्यासौ। अह्नोत्तमयवेलायां कलामा
त्रापि यदा तिथिः। सैव प्रत्याब्दिके ज्ञेया नापरा पुत्रहानिदेति। तत्त्रिमुहूर्तोर्ध्वस्थितिः। पूर्वेद्युः सायं त्रिमुहूर्ताभावे त

२८५ परैवा त्रिमुहूर्त्ता न चेद्वा ह्यापरैव कुतपे हि सा। इति कालादर्शे गोभिलोक्तेः। कालादर्शेपि। अस्या द्विकेप्येवमेव तिथिस्या
ह्यापराह्णिकी। उभयत्र तथात्वे तु महत्वेन विनिर्णयः। समत्वे पूर्वविद्धैव ह्यतथात्वेपि सा यदि। त्रिमुहूर्त्ता भवेत्सा यं स
र्वेष्टोये विनिर्णयः। अन्यत्रापि। सांयेन्यत्र परत्र चेन्न ततिथिः द्वैवाह्निके मा तिथ्याह्या साध्य पराह्णयोर्यदि तदा
यत्राधिका सामता। तुल्या चेदुभयोः पराह्णसमये पूर्वा न चेत्तु द्वये पूर्वे वा त्रिमुहूर्त्तगा स्तत्समये नो चेत्परे वोदि
ता। माधवपृथ्वीचंद्रोदौ तु दिनद्वये पराह्णव्याप्त्या वैशतः समव्याप्तौ च क्षये पूर्वा वृद्धौ परा। खर्वदर्पौ परौ पूज्यौ
इत्युक्तेः। अपराह्णद्वयव्यापिन्यतीतस्य च या तिथिः। क्षये पूर्वा च कर्त्तव्या वृद्धौ कार्या तथोत्तरेति बौधाय
नोक्तेः। तथाह स्पतिथिर्या तु अपराह्णद्वये यदि। पूर्वा क्षये तु कर्त्तव्या वृद्धौ कार्या तथोत्तरेति वृहन्नारदीयपा
चेत्याहतुः। वृद्धिक्षयौ चात्र परतिथ्येन तु या स्वघटि घेः। तस्याः क्षये पराह्णद्वयव्याप्तेरसंभवात्। तदाह माधवः।
नयाख्याति। थिगो ह्यद्धिक्षयावूर्ध्वतिथेरुक्ता। दिति। पन्तु पृथ्वीचंद्रः। पूर्वाह्णव्रतनेषु पत्र सायाह्नास्तमययोगिनी ति
थिरुक्तात्प्रापराह्णव्यापिनी ज्ञेया सायाह्ने त्रिमुहूर्त्तेः स्यात्तत्र श्राद्धं न कारयेत्। इति मात्स्यादौ सायाह्ने निषेधा एमः
तास्य च त्रिमुहूर्त्तादिग्रहणं तच्छुद्धौ हि पराह्णरूपत्रिमुहूर्त्तपरमित्याहुः। तद्धेमाद्रिमदनरत्नकालादर्शादिग्रंथ

विशेषालम्बणापत्तेश्चिंत्यं । तस्मात्पूर्वोक्तमेव साधु । यदा विघ्नवशाद्दिने सांवत्सरं श्राद्धं न कृतं तदा रात्रावपि कार्यं । मृताहं समतिक्रम्य चंडालेष्वभिज्ञायते । इति मरीचिना मृताहातिक्रमे दोषोक्तेः । नक्तं श्राद्धं कुर्वतारब्धे वा भोजनसमापनमित्यापस्तंबेन गौणकालतोक्तेश्चेति माधवः ॥ आरब्धे विघ्नवशाद्रात्रिपाते भोजनसमाप्यं तं । रात्रौ गौणकालतोक्तेश्चेति माधवः । आरब्धे श्राद्धे विघ्नवशाद्रात्रिपाते भोजनसमाप्यं तं । रात्रौ कार्यं । शेषसमाप्तिः परदिने एवेति हरदत्तः । ग्रहणादिने वार्षिकप्राप्तौ तद्दिने एवान्नेनामेन हेम्ना वा कुर्यान्नोत्तरदिने इत्युक्तं प्राग्ग्रहणनिर्णये । तच्च प्रथमाब्दिकं ॥ त्रयोदशे मलमासे कार्यमन्यथा न । प्रत्यब्दं द्वादशे मासि कार्या पिंडक्रिया सुतैः । क्वचित्त्रयोदशेपि स्यादाद्यं मुक्त्वा तु वत्सरमिति । लघुहारीतोक्तेः । इदं मंस्याधिमासपरं । द्वादशेतीते इत्यर्थः त्रयोदशे । तेन यत्र द्वादशमासिकं शुद्धमासे भवति तत्र त्रयोदशोधिको एवाद्याब्दिकं कार्यं । यत्राधिकमध्ये द्वादशमासिकं तत्र तत्स्थाद्विरावृत्तिं कृत्वा चतुर्दशे शुद्धे प्राप्त्येव प्रथमाब्दिकं कार्यमिति निष्कर्षः । माधवीये हेमाद्रौ चेवं । द्वितीयादिकं तु शुद्धमास एवाधिके नाप्युभयोः । मलमासमृतानां तु यदा स एवाधिः स्यात्तदा तत्रैव कार्यं अन्यथा शुद्ध एवेति । प्रागुक्तं । दर्शे वार्षिकं चेत्तदा पूर्वं वार्षिकं कृत्वा ततः पिंडपितृयज्ञो दर्शश्राद्धं चेति निर्णयदीपेकामनउक्तः । देवयाज्ञिककृते स्मृतिसारेपि । दर्शे क्षयाहे संप्राप्ते कथं कु

र्वेतियाज्ञिकाः आदौस्वयागं निर्वर्त्य पश्चाद्दर्शो विधीयते। इत्युक्तं त्वेवं तद्वचने मूलाभावात्। दर्शपूर्णमासाभ्यामिष्ट्वा सोमेन यजे
तेति वत्। पिंडयज्ञं ततः कुर्यात्ततोन्वाहार्यकं बुधः। इति दर्शश्राद्धे पिंडपितृयज्ञानंतर्यात्तु स्यात्। वृद्धिकेप्यतिदेशात्त्वाज्ञावपि हृ
तेः पूर्वत्वाद पूर्वमंते स्यादितिन्यायेन पितृयज्ञानंतरं दर्शस्ततो वार्षिकश्राद्धमिति व्यतिषंगाख्यतनं भवत्येव तत्स्यार्थिकत्वा
त्। कालादर्शेपि। निमित्तानियतिश्चात्र पूर्वानुष्ठानकारणमिति। सर्वान्यत्वैकरूप्याभावात्तत्र याहनिमित्तस्यानियत
त्वं। देवज्ञानीयेप्येवं। एवं मासिकादिष्वपि ज्ञेयं। प्रत्यहं यो यथा कुर्यात्तथा कुर्यात्स तान्यपीति सर्वातिदेशात्। मृताहे
वृषोत्सर्गस्तत्कोद्देमाद्रौ। विष्णुधर्मे। अयने द्वितये चैव मृताहे बांधवस्य च। उत्सृजेन्नीलवृषभं कौमुद्याः समुपागते
॥ कौमुदी कार्त्तिकी। अथ शुद्धिश्राद्धं द्विवोदासीये। सपिंडीकरणादूर्ध्वं यावदब्दत्रयं भवेत्। तावदेव न भोक्तव्यं
क्षयेहनि कदाचन। वर्षांतः सपिंडनेप्येतत्कल्पं। मृताहनि तु संप्राप्ते यावदब्दचतुष्टयं। बहिः श्राद्धं प्रकुर्वीत न कुर्याच्छ्रा
द्धभोजनं। प्रथमेस्थीनिमज्जौ च द्वितीये मांसभक्षणं। तृतीये रुधिरं प्रोक्तं श्राद्धं शुद्धं चतुर्थकमिति श्राद्धकाशि
कोक्तेः। शुद्धं किंचिदिति ज्ञेयं। स्मृत्यंतरे। सप्तत्रिंशच्च यो मासा श्राद्धे भुंक्ते तमोहतः। सपंक्तिदूषितः पापः प्रेताशी च भवे एम्कः
त्तु सः। तत्र प्रथमे द्वेवर्षांत सपिंडनपक्षे मृताहात्पूर्वेद्युः सपिंडनमब्दपूर्तिश्राद्धं च कृत्वा परेद्युर्वार्षिकं कुर्यादिति स्मृत्य

थीसारे उक्तं। हेमाद्रि स्कन्दमृत्याहे सपिंडीकरणेनैव वार्षिकसिद्धिः। पूर्णे संवत्सरे पिंडः षोडशः परिकीर्तितः। तेनैव च सपिं
डत्वं तेनैवाब्दिकमिष्यते। इति वचनात् इत्याह। इदमेव युक्तं। अथ मृत्याद्यज्ञाने। मरीचिः। श्राद्धविघ्ने समुत्पन्ने अवि
ज्ञाते मृतेहनि। एकादश्यां तु कर्त्तव्यं कृष्णपक्षे विशेषतः। इत्युक्तेष्वष्टम्येकादश्यामपि। बृहस्पतिः। न ज्ञायते मृताह
श्चेत्प्रमाते प्रोषिते सति। मासश्चेत्प्रतिविज्ञातस्तद्दर्शे स्यादथाब्दिकमिति। दिनमासौ न विज्ञातौ मरणस्य यदा पुनः। प्र
स्थान मासदिवसौ प्राप्तौ पूर्वोक्तया दिशा। मदनरत्ने भविष्ये। मृताहं यो न जानाति मानवो विनतात्म
ज। तेन कार्यममावास्या श्राद्धं सांवत्सरं सदा। दिनमेव तु जानाति मासं नैव तु यो नरः। मार्गशीर्षे यदा भाद्रे माघे
वा तद्दिने भवेत्। इति बृहस्पतिस्मृतेराषाढोप्युक्तः। कालादर्शेपि मासाज्ञाने दिनज्ञाने कार्यमाषाढमाघयोरि
त्युक्तं। हेमाद्रौ प्रभासखंडे। मृताहं यो न जानाति मासं वापि कथंचन। तेन कार्यममायां स्याच्छ्राद्धं माघेथ मार्गके। भ
विष्ये। मृतवार्त्ताश्रुतेर्वाथ यो तो पूर्वोक्तक्रमेण तु। पूर्वोक्तेति। प्रस्थान दिनाज्ञाने मासज्ञाने च तद्दर्शे। मासाज्ञाने दि
नज्ञाने च गार्ग्यादाविति वत श्रवणादिनेपि ज्ञेयं इत्यर्थः। श्रवणदिनमासाज्ञाने माघमार्गदर्शे कार्यं पूर्वोक्तप्रभासखं
डात्। अतो न लोप इति। मूलपाराप्युक्तं हेयं। तिथितत्वेयमंशः। गतस्य न भवेद्वार्त्ता यावद्द्वादशवार्षिकी प्रेतावधारणं

२८६

तस्यकर्त्तव्यंसुतबांधवैः। यन्मासियदहर्यातस्तन्मासितदहाक्रिया। दिनाज्ञानेकुहूस्तस्य आषाढस्याथवाकुहूः।
अथश्राद्धविघ्नेनिर्णयः। तत्रविप्रस्यनिमंत्रणोत्तरंसूतकेमृतकेवाशौचाभावः। निमंत्रितेषुविप्रेषुप्रारब्धेश्राद्धक
र्मणि। निमंत्रणाद्धिविप्रस्यस्वाध्यायादिरतस्यच। देहेपितृषुतिष्ठत्सुनाशौचंविद्यतेक्वचित्। इतिब्राह्मोक्तेः। कर्तु
स्तुविष्णुराह। व्रतयज्ञविवाहेषुश्राद्धेहोमेर्चनेजपे। आरब्धेसूतकंनस्यादनारब्धेतुसूतकं। श्राद्धेप्रारंभस्तेनैवोक्तः।
प्रारंभोवरणंयज्ञेसंकल्पोव्रतसत्रयोः। नांदीमुखंविवाहादौश्राद्धेपाकपरिक्रियेतिमाधवीयेब्राह्मेपि। श्रा
द्धादौपितृयज्ञेचकन्यादानेचनोभवेत्। मिताक्षरायांस्मृत्यंतरे। सद्यःशौचंप्रकृत्य। यज्ञेसंभृतसंभारेवि
वाहेश्राद्धकर्मणीति। तिथितत्वादिगौडग्रंथास्तु। निमंत्रणोत्तरंकर्तुर्भोक्तुश्चनाशौचं। निमंत्रणोत्तरंश्राद्धेप्रा
रंभःस्यादितिस्मार्तिरितिवि। स्मृकौ। पक्वश्राद्धेपरिक्रियेतितद्दर्शश्राद्धविषयमित्याहुः। दातृगृहेमरणेदोषोजा
बालेनोक्तः। भोजनार्द्धेतुसंभुक्तेविप्रेर्दातुर्विपद्यते। गृहेइतिशेषः। यदाकश्चित्तदोच्छिष्टंशेषंत्यक्त्वासमाहिताः। आ
चम्यपरकीयेनजलेनशुचयोद्विजाः इति। अस्यश्राद्धविषयत्वंहेमाद्रिणोक्तं। पृथ्वीचंद्रोदयेप्येवं। ममतुप्र
तिभाति। इदंविवाहादिविषये। नतुश्राद्धविषयं। तसद्भावात्। विवाहोत्सवयज्ञेष्वित्युपक्रम्य। भुंजानेषुतु

एम°

विप्रेषुत्वंतरामृतसूतके। अन्यगेहोदकाचांताः सर्वे ते शुचयः स्मृताः। इति षट्त्रिंशन्मतेकवाक्यत्वात्। निमंत्रितेषु
विप्रेषु प्रारब्धे श्राद्धकर्मणीति। पूर्वोक्तविशेषाच्च श्राद्धेतु यद्यपि विष्णुना पाकोत्तरमाशौचाभाव उक्तः। तथा। त्रै
पिकर्त्तुरेव सः। भोक्तुस्तु दोषोस्त्येव। अविज्ञातगृहीतोश्रुतसूतकमृतके तथा। अविज्ञातेन दोषः स्याच्छ्राद्धादिषु
कथंचन। विज्ञाते भोक्तुरेतस्मात्प्रायश्चित्तादिकं क्रमात्। इति ब्राह्मोक्तेः। आदिशब्देनाशौचमुच्यते। तच्चाह विष्णुः।
ब्राह्मणादीनामशौचे यः सकृदेवान्नमश्नाति तस्य तावदाशौचं यावत्तेषामाशौचव्यपगमे प्रायश्चित्तं कुर्यादिति। यत्तु दे
हे पितृषु तिष्ठत्सु नाशौचं विद्यते क्वचित्। इति ब्राह्मं तच्छ्राद्धकालीनस्य निषेधेन तत्तदुत्तरकालीनस्याशुद्धिदीपस्तु नि
मंत्रितेष्वित्यामश्राद्धपरं भोजनार्हत्वेति। त्यादित्वन्नश्राद्धपरमित्याह। प्रायश्चित्तं त्वाह मार्कंडेयः। भुक्त्वा तु ब्राह्मणाशौ
चे चरेत्सांतपनं द्विजः। एतत्कामतः। अभ्यासे शातवः। ब्राह्मस्य तथा भुक्त्वा मासमेकं व्रती भवेदिति। अज्ञानात्तु छा
गलेयः। एकाहं च त्र्यहं पंच सप्तरात्रमभोजनं। ततः शुचिर्भवेद्विप्रः पंचगव्यं पिबेन्नरः। इति। वसर्तक्रमेणेदं। अभ्या
सेतु हूरणपमित्यादि मिताक्षरामाधवादौ ज्ञेयं। मिताक्षरामाधवादौ तु श्राद्धकर्त्तुर्भोक्तुश्च सर्वथा दोषाभाव उक्तः
आशौचमध्ये श्राद्धदिनप्राप्तौ तु माधवीये कालादर्शे च ऋष्यशृंगः। दैवे पितॄणां श्राद्धे तु आशौचं जायते यदा। आ

शौचेतुव्यातिक्रांतेतेभ्यः श्राद्धंप्रदीपते। श्राद्धचिंतामणौज्योतिषे प्रतिसंवत्सरं श्राद्धमाशौचात्पतितंयदिमलमासे
पितत्कार्यमितिभागुरिभाषितं। आशौचांतदिनत्वेनैमित्तत्वादित्यर्थः। एतन्मासिकाब्दिकपरं। नदार्शिकादौ। अतएवसु
दर्शनभाष्योपरपक्षेपिच्याणीतिनियमात्कृष्णपक्षश्राद्धलोपेप्रायश्चित्तमेव। नतुगौणकालेकरणं। तत्रोपवासः। वे
दोदिनानांनित्यानांकर्मणांसमतिक्रमे। स्नातकव्रतलोपेचशयश्चित्तमभोजनमिनूक्तेरित्युक्तं। आशौचेतुप्राय
श्चित्तमपितत्कालेनधिकारात्। आशौचेऽसंभवेत्तुव्यासः। श्राद्धविघ्नेसमुत्पन्नेत्वंतरामृतसूतके। वदंतिशुद्धेतत्का
र्यंदर्शेचापिविचक्षणाः। हेमाद्रौषड्त्रिंशन्मतेपि। मासिकेचाब्दिकेत्वह्निसंप्राप्तेमृतसूतके। आशौचानंतरंकुर्या
त्तन्मासमेंदुक्षयेपिवा। श्राद्धविघ्नेसमुत्पन्नेप्यविज्ञातेमृतेहनि। एकाद्दिनाम्। सूतकानंतरंकुर्यात्सूनस्तदहरेचचेति।
शर्मांतुकर्त्तव्यंकृष्णपक्षेविशेषतः। विशेषतःइत्युक्तेः। शुक्लायामपि आशौचेतरविघ्नेएतदिति। माधवपृथ्वीचंद्रौ। य
त्वात्रिः। तदहश्चेत्प्रदुष्येतकेनचित्सूतकादिना।। सूतकानंतरंकुर्यात्पुनस्तदहरेवचेति। तत्पूर्वेकालाभावेज्ञेयं। ए
तदाब्दिकेतरश्राद्धपरं। यच्चदेवलः। एकोद्दिष्टेतुसंप्राप्तेयदिविघ्नःप्रजायते। मासेन्यास्मिंस्तिथौतस्मिन्श्राद्धंकुर्यात्प्रय रामः
त्नतः। इतिरपिमासिकपरंमितिमदनरत्नेहेमाद्रौच। व्याध्यौदोविस्मरणेचैवंज्ञेयं। अथभार्यावजोदर्शने। तत्रदार्शिक

मामेन कार्यं। श्राद्धविघ्ने द्विजातीनां आमश्राद्धं प्रकीर्त्तितं। अमावास्यादिनियतं मासससंवत्सराद्दत इति हेमाद्रौ हारीतो
क्तेः। व्याघ्रपादोपि। आर्त्तवे देशकालानां विप्लवे समुपस्थिते। आमश्राद्धं द्विजैः कार्यं शूद्रः कुर्यात्सदैव हि। कालनिर्णय
दीपिकायां। दर्शे तु भार्यर्त्तवे प्यामश्राद्धविधिं प्रवासिविधुराद्याश्चाचरेयुर्द्विजाः। वस्तुतस्तु। पाकाभावे द्विजातीनामा
मश्राद्धं विधीयत इति सुमंतूक्तेः। पाककर्त्रंतरे सत्यन्ने नान्यथामेनेति। युक्तं मासिकानि तु सपिंडनानि अमावास्या तथा
ब्दिकं। अन्नेनैव तु कर्त्तव्यं यस्य भार्या रजस्वलेति कलिकायां वचनाच्च। कालादर्शे तु। स्त्रिया रजोदर्शने दर्शश्राद्धं पंच
मेहनीति फलांतरमुक्तं। पारिजाते प्येवं। एवं युगादावपि। आब्दिकं तु रजोदर्शने तद्दिन एव कार्यं। पुष्पवत्स्वपि दारेषु
विदेशस्थोप्यनाग्निकः। अन्नेनैवाब्दिकं कुर्याद्धेम्ना नामेन न क्वचिदिति माधवीये लौगाक्षिस्मृतेः। मरीचिरपि। अन
ग्निश्च प्रवासी च यस्य भार्या रजस्वला। आमश्राद्धं प्रकर्त्तव्यं न तत्कार्यं मृतेहनि। कार्ष्णाजिनिः। आपन्नोप्याब्दिकं
नैव कुर्यादामेन कुत्रचित्। अन्नेन तदमायां तु कृष्णे वा हरिवासरे॥ प्रयोगपारिजाते। रजस्वलायां भार्यायां यः क्षया
हं परित्यजेत्। सर्वै नरकमाप्नोति यावदाभूतसंप्लवं। मासिकानि सपिंडं च अमावास्या तथाब्दिकं। अन्नेनैव प्रकर्त्तव्यं य
स्य भार्या रजस्वला। देवयाज्ञिकनिबंधेपि भर्त्तुः श्राद्धं पंचमेह्नि कुर्याद्भार्या रजस्वला। पुत्रः पित्रोः प्रकुर्वीत मृताहनि शु

चिर्यतःकालादर्शेऽपि रजस्वलांगतोनाग्निर्विदेशस्थोथवाह्निके। दर्शादाविवनामेनसन्नेन श्राद्धमाचरेत्। अन्य आपि। विदेशगोवा। व्यातोवाग्निकोवा रजस्वलायामपिधर्मपत्न्यां॥ श्राद्धंमृताहेविदधीतपाकेनामेनहेम्नानतुपंचमेह्नि॥ एवंमासिकेपि। यत्तु मरीचिः॥ आह्निके समनुप्राप्ते यस्य भार्या रजस्वला॥ पंचमेहनि तच्छ्राद्धं न तत्कुर्यान्मृतेहनि॥ माधवीये कुर्यात्त श्राद्धंतस्रानकर्त्तव्यंपंचमेहनीत्युक्तश्राद्धं। तदपुत्रस्त्रीकर्त्तृकश्राद्धविषयं। अपुत्रातुयदाभार्यासंप्राप्तेभर्तुराह्निके। रजस्वलाभवेत्सातुकुर्यात्तत्पंचमेहनि॥ तिश्लोकगौतमोक्तेः। दैवेकर्मणिपित्र्येचपंचमेहनिशुध्यतीति। प्रभासखंडाच्च। ननुशुचित्वाद्दैवतत्वपंचमेहन्यर्थात्श्राद्धंप्राप्तमिति वचनंव्यर्थमेवं। गर्भिणीसूतिकादिश्चकुमारीवाथरोगिणी। यदाशुद्धातदान्येनकारयेत्प्रयतास्वयं॥ इति हेमाद्रौ भविष्योक्तेः। अनुपनीतस्त्रीशूद्राश्च श्राद्धमात्विजाकारयेयुः स्वयंवामंत्रकंकुर्युरिति स्मृत्यर्थसाराच्चान्यद्वाराकारणानिवृत्त्यर्थत्वान्नस्यात्। तदुक्तंदिशा आशौचानंतश्राद्धकर्त्तव्यतावेदवाक्यवैयर्थ्याच्च। अतःपत्नीपंचमेहनीत्युक्तं। यत्तुसप्ताहात्पितृदेवानां एम° भवेद्योग्याव्रतार्चने। इतितद्दोनिवृत्तिपरमिति हेमाद्रिभिन्नसर्वनिबंधसिद्धांतः। हेमाद्रिस्तु। श्राद्धादौ स्त्रियासहैवाधिकारात्तस्यांरजोदुष्टायांतन्निवृत्तेरेकभार्य्यैः॥ पंचमेहनिकार्यं। प्रागुक्तमरीच्युक्तेः। भार्यान्तरसत्वेपुष्पवत्त्व

पीतिवचनात्तद्दिन एवेत्याह। दीपिकायां। भार्यातौ सति पंचमे च दिवसे स्याद्वार्षिकं मासिकं पक्वान्नैर्वह्नभार्यैकस्त्वाधिकृते पत्न्यंतरे तिष्ठति। कुर्यात्तद्द्वितयं समुख्यादिवसेऽ ति। तच्चिंत्यं। सहाधिकारः सहत्वश्रुत्या वा एकफलभोक्त्रैकेन वा पाककर्तृत्वेन वा। नाद्यः। तदभावात्। पाणिग्रहणाद्धि सहत्वं कर्मस्वित्यस्याग्निसाध्यकर्मविषयत्वात्। आह्निकस्य पाके नैवोक्तेः। स्मार्ताग्निसाध्यत्वानियमात्। तामपहृभ्येतिवत्पूर्वोक्तवचनसत्वाच्च। कथं च भार्यांतरसत्वेऽधिकारः। ज्येष्ठया ना विनेतरेति नियमात्। ज्येष्ठापरत्वं च तेनैव वासिद्धेर्वचनवैयर्थ्यात्। न द्वितीयः। अविभक्तभ्रातृवदेकस्याशुचित्वेऽन्यस्यानधिकारापत्तेः। न तृतीयः। प्रवासनिर्देशसूतिकारोगित्वादिष्वप्यकरणापत्तेः। आरभेत नवैः पात्रैरन्वारंभं च बांधवैः। इति देवलोक्त्यात्मनेपदात्स्वबांधवानां च पाककर्तृतोक्त्या विरोधाच्च। ततस्ता। विपपाचामु सीता जनकनंदिनीति पाद्यादिलिंगात्। आशहस्यं भार्यापाकस्योच्येन तत्कस्याप्यनिषेधं तेनैतद्वचनमुक्तमाद्यभावा पूर्वोक्तवचोविरोधाच्च यत्किंचिदेवे। मदापि। आब्दीयाहनि संप्राप्ते यस्य भार्या रजस्वला। आब्दं तेन न कर्तव्यं कर्तव्यं पंचमेऽहनीति श्लोकगौतमपाठोऽन्यथा दर्शितः। माधवीये च तद्वत्पक्षांतरमुक्तं। तेनापि नाभिप्रेतार्थसिद्धिः। यस्य प्रेतस्येत्यर्थोता। तेनात्र हेमाद्रिर्बध्नामेति बहुवक्तव्येऽपि नोच्यते। अथान्वारोहणे निर्णयः। लौगाक्षिः। मृताहनि समभ्यासेन पिंडनिर्वपणं पृथ

द्धा नवश्राद्धं च दंपत्योरन्वारोहण एव तु। सवासेन तंत्रेणाहि पितृकवश्राद्धवेद्वयोरेकः पिंडो विप्रश्च पिंडशब्दः श्राद्धपरः
नवश्राद्धं पृथगिति। हेमाद्रिपृथ्वीचंद्रौ। अत्र मृताहनीत्येकैकत्वात द्विनभेदे दिनैक्ये वा मृततिथेरेकत्वे कालैक्यं कर्त्रै
क्यं पाकैक्यं एकचित्याधिरोहे तु तिथिरेकैव जायते। एकपाके न पिंडैक्ये द्वयोर्गृह्णीत नामनी। इति स्मृत्यंतराच्च। त्रं
स्येष्टिपद्धतौ भट्टैरप्युदाहृतं। अन्वारोहे तु नारीणां पत्न्यकश्रेकोद्दिष्टका क्रिया। पिंडदानक्रिया तद्वच्छ्राद्धं प्रत्याब्दिकं तथा।
नवश्राद्धानि सर्वाणि सपिंडीकरणं पृथक्॥ एकएव वृषोत्सर्गो गोरेकात्र दीयते। इति तिथिभेदे तु वार्षिकं पृथ
गेव। तथा वार्षिके समासविधानाज्ज्येष्ठपुत्रस्य कर्तृत्वे सपत्नमातुरन्वारोहणे तत्सुतेन सत्यपि तद्वार्षिकादिकम
विभक्तः सापत्नपुत्र एव ज्येष्ठः कुर्यान्नौरसः। कस्तुमपारणापृथ्वीचंद्रादिमते तु औरस एव मातुः पृथक्कुर्यात्। एवं
बह्वीष्वपि मातृषु ज्ञेयं त्रिस्थली सेतौ। पितामहश्चरणौरप्येवमुक्तं। पत्नु गार्ग्यः। एकचित्यां समारूढौ दंपती निध
नंगतौ। पृथक्श्राद्धं तयोः कुर्यादोदनं च पृथक्। औदनं पिंडः। तन्नवश्राद्धविषयः। यत्तु भृगुः। या समारोहणं कुर्या
द्भर्तुश्चित्यां पतिव्रता। तां मृताहनि संप्राप्ते पृथक्पिंडे नियोजयेत्। प्रत्यहं च नवश्राद्धं युगपत्तु समापयेत। तद्वैषां वार्षि एमः
कमेकोद्दिष्टमुक्तं तद्विषयं। प्रत्यहं मृत्यहनीत्यन्ये। नवश्राद्धं युगपदिति। दर्शे वा श्राद्धयक्ष्येकतंत्रेण पृथगित्यर्थमा

हत्हेमाद्रिः॥ एतन्मृततातिथेर्भेदविषयंमिति पृथ्वीचंद्राभिरोग्यामृताद्याः॥ देवयाज्ञिकोप्येवं। पराशरमाधवस्तुगार्ग्यभृग्वादि
वचनाल्लौगाक्षिवाक्ये समासेनपाकादितंत्रैक्ये दर्शैवर्गाद्वयवत्पृथक्श्राद्धंकुर्यात्। नवश्राद्धंचतथेत्याह। पृथ्वीचं
द्रचंद्रिकादयस्तु द्वयोरेकपिंडदानं लौगाक्षिवचनंचापद्विषयं। पृथक्पिंडदानंतुमुख्यः कल्पः। तदाह वृद्धपराश
रः॥ आरूह्यभर्तुश्चितिमंगनाया प्राप्नोतिमृत्युं स्वहनुसत्वसुक्ता। एकादशाहे तु तयोर्विधेयंश्राद्धंपृथक्त्वगमपे
त्यसद्भिः। एकत्वमिच्छंतिमतिमातिप्रहीणा एकादशाहादिषु येन्वनार्यैः। ते स्वर्गमार्गं विनिहत्यकुर्युः स्त्रीसवघा
तान्न एकादिवासं भर्त्रा सह मृता यातु नाकलोकमभीप्सती। साह श्राद्धं पृथक् पिंडान्नैकत्वंतुस्मृतं तयोः। पृथगे
वहि कर्त्तव्यश्राद्धमेकादशाहिकं। यानि श्राद्धानि सर्वाणि तान्युक्तानि पृथक्पृथक् इति। विश्वादर्शेपि। मातुर्या
पृकाहृद्धिमृताहेषु महालये। श्राद्धंकुर्यात्पृथक् दैवंतंत्रं वानुगताविपि। एकचित्यां समारूह्य मृतयोरेकबर्हिषि।
पित्रोः पिंडमन्नं पृथग्दद्यात्पिंडं त्वापस्तुतत्स्तुतदित्याग्निस्तु तेरित्याहुः। यत्तु षट्त्रिंशन्मते। एकत्वं सा गता भर्तुः पिंडे
गोत्रे च सूतके। न पृथक्पिंडदानं तु तस्मात्पत्नीषु विघ्नते एतितत् हृश्शादि परं। चंद्रप्रकाशेपि। एकचित्यां समारूढौ दं
पती प्रमृतौ यदि। पृथक्श्राद्धं प्रकुर्वत पत्युरेव हि तद्येहनि। मृतानामपि भर्त्स्यानां भार्याणां पतिना सह। तत्रैताभ्र प

२८०

णं कृत्वा श्राद्धं त्वामित्रयेहनि। पूर्वकस्य मृतस्याद्दो द्वितीयस्य ततः पुनः। ततीयस्य ततः कुर्यात्संनिपाते त्वयं क्रमः। इति सहग
मने सर्वत्र श्राद्धार्थमेकपाकः स्याद्ह मदनरत्ने प्रचेताः। एकचित्यां समारूढौ म्रियेते दंपती यदि। तंत्रेण श्रपणं कुर्या
त्पृथक्पिंडं समावपेत्। पृथ्वीचंद्रोदयेप्येवं। अत्र भर्तुराशौचमध्येऽन्यदिने स्त्रीमरणे पतिमरणाद्दिगणनया आशौ
चपिंडदानैकादशाहादि कार्यं। नात्र पक्षिणी वृद्धिः। मृतं पतिमनुव्रज्य पत्नी चेदनलं गता। तत्र पक्षिणी कार्या पैतृ
कादेव शुद्धिः स्यात्पुत्रोऽन्यो वाग्निदस्तस्यास्तावदेवाशुचितयोः। नवश्राद्धं सपिंडं च युगपत्तु समापयेत्। इति षडशीतिम
तात्। यदि नारी विशेदग्निं भर्त्राशौचक्रमे गृही। इति लघुहारीतोक्तेः। स्वा। भर्त्राशौचे चे। त्वन्वारोहणे तु त्र्यहमाशौचं।
ऋग्वेदवादात्साध्वी स्त्री न भवेदात्मघातिनी। त्र्यहाशौचे तु निर्वृत्ते श्राद्धं प्राप्नोति शास्त्रतः। इति ब्राह्मोक्तेरिति पृथ्वी
चंद्रापरार्कौ स्मार्त्तगौडादयश्च। देशांतरमृते पत्यौ साध्वी तत्पादुकाद्वयं। इत्युपक्रम्य ब्राह्मे त्र्यहाशौचे तु निर्वृत्ते रि
त्युक्तेर्भर्त्राशौचोत्तरमन्वारोहणे त्र्यहं सहगमने तु पूर्वमेव दशाहादि। पिंडास्तु दशापि सहैव। तथा जनकशूलपाणि
शुद्धितत्त्वधृतव्यासः। संस्थितं पतिमालिंग्य प्रविशेद्या हुताशनं। तस्याः पिंडादिकं देयं क्रमशः पितृपिंडवत्। अ
न्विता पिंडदानं तु यदा भर्तुर्दिने दिने। तदर्थारोहिणी यस्मात्तस्मात्सा नात्मघातिनी। इति विष्णूक्तेश्च। तेनाशौचमापेदशा

रामः

हादि। पृथक्चितौ भर्त्तुराशौचमध्ये तदूर्ध्वं वा सत्यां त्र्यहेण दशपिंडाः। अन्वितायाः प्रदा। तस्माद्दशपिंडा त्र्यहेणातु। स्वाम्य
शौचे व्यतीते तु तस्याः श्राद्धं प्रदीयते। इति। तत्रैव पैठीनसिस्मृतेः। भर्त्राशौचेंतरं मृतौ तु चतुर्थेह्नि श्राद्धं शूलपाणिना लिद
मग्निप्रणीयत्वेनोक्तं। पुत्रहतस्य सद्यःशौचं। ऋग्वेदवादादिमानारीरविधवेत्यादिः। एतदसवर्णापरमित्यन्ये। एतद
न्वारोहण एव। न त्वेकचितान्वारोहणे त्रिरात्रं। एकचितौ तु संस्थिते पतितिव्यासोक्तेः। सद्यःशौचमित्याहुः। अन्य
सपिंडाशौचमध्येन्वारोहणं त्वनाशंकमेव। शु। चेतायामंगलत्वात्। अन्ये तु रजोवत्याः सूतिकायाश्च गमननिषेधा
दितत्राशौचस्य। निषेधमाहुः। तन्मूलवचनं विनाचिंत्यमेव। स्मृत्यर्थसारे सहगमने सर्वत्र श्राद्धपिंडदैपाकैकं
कालैकं कर्त्रैकं चेति। यात्तु पतिमुद्दिश्यान्यकालेन्यतिथौ अन्वारूढा तस्याः श्राद्धं तन्मृततिथौ कार्यं न भर्तृ
तिथौ। पारणे मरणे नृणां तिथिस्तात्कालिकी स्मृतेति स्कांदात्तिथिरेकैव ज्ञायते। इत्यादिवचनाच्चेति मदनपारिजा
तपृथ्वीचंद्रादयः। अन्ये तु तस्याः पतिमरणेन मृतप्रायत्वात्। सहाग्रतः पृष्ठतो वा तद्गत्वा म्रियते यदि तस्याः श्राद्धं प
दातव्यं पृथक् पत्युः क्षयेहनीति। स्मृत्यंतरात्। अग्रतः पृष्ठतो वापि तद्गत्वा म्रियते यदि। तथैकस्याः श्राद्धं सुतैः
कार्यं पत्युरेव क्षयेहनीति पुराणसमुच्चयाच्च। भर्तृतिथावेवेत्याहुः। अत्र मूलं चिंत्यं। अत्र विशेषो हेमाद्रौ स्मृत्यंत

रोमात्तामंगलस्नानेणात्रिपतेपरितद्दिनात् उद्दिश्यविप्रपंक्तौतांभोजयेद्वास्तुवासिनीं। अथश्राद्धसंपातेनिर्णयः। तत्रपित्रोर्मृत
तिथ्येकत्वेमरणाक्रमेणादर्शेवर्गद्वयवंत्रेणश्राद्धंकुर्यात्। पौर्वापर्याज्ञानेतुपितृपूर्वंकुर्यादितिहेमाद्रिः। माधवस्तुयत्तु
। पित्रोःश्राद्धेसमप्राप्तेनवैपर्युषितेपिवा। पितृपूर्वंसुतःकुर्यादन्यत्रासन्निपातःइतिकार्ष्णाजिनीस्मृतेः। सर्वत्रपितृ
पूर्वं भिन्नप्रयोगमाहुः। पार्वणैकोद्दिष्टयोःसंपातेमाधवीयेजाबालिः। प्रत्येकमत्रभवेयातामेकोद्दिष्टंचपार्वणं। पार्वणं
त्वभिनिर्वर्त्यएकोद्दिष्टंसमाचरेत्। गृहदाहादिनायुगपन्मरणेतुभृगुः। एककालेगतासूनांबहूनामथवाद्वयोः। तं
त्रेणश्रपणंकृत्वाकुर्याच्छ्राद्धंपृथक्पृथक्। पूर्वकस्यमृतस्यादौद्वितीयस्यततःपुनः। तृतीयस्यततःकुर्यात्सं
निपातेष्वयंक्रमः। ऋष्यशृंगः। भवेद्यदिसपिंडानांयुगपन्मरणंतदा। संबंधासन्निमालोच्यतत्क्रमाच्छ्राद्धमाचरेत्।
गारुडेएकेनैवतुपाकेनश्राद्धानिकुरुतेत्रहिविकिरंत्वेकतःकुर्यात्पिंडान्कुर्यात्पृथक्पृथक्। अत्रानुगमनेच
दाहसपिंडतादौविशेषोवक्ष्यामः। अत्रिः। बहूनामुभयोर्वापिश्राद्धंचेत्स्यात्समेहनि। तंत्रेणश्रपणंकृत्वापृथ
क्श्राद्धानिकारयेत्। पुलस्त्यः। महालयेगयायांश्राद्धेगतासूनांक्षयेहनि। तंत्रेणश्रपणंकृत्वाश्राद्धंकुर्यात्पृथक्
। इदंचपृथक्पाकेनसंबंधासत्त्वात्तश्राद्धमेतदत्तमुख्यःपक्षः। एकत्रैवदिनेश्राद्धद्वयंप्राप्तंयदातदा। चरेद्देवपु

एम:

एवर्षात्पितुर्मातुश्च तत्सुतः॥ एकस्मिन्यः करोत्याब्दिकं द्वयोः श्राद्धं मदा द्विजः। तदा पूर्वमृतस्यादौ कृत्वा स्नात्वा प यथाविधि।
पश्चात्पश्चान्मृतस्यैव पृथक्पाकैः समाचरेत्। अन्यथा श्राद्धहंता स्याद्धुद्धसंकरकृद्भवेत्। इत्याश्वलायनोक्तेरिति पृथ्वी
चंद्रः। कात्यायनः। द्वे बहूनि निमित्तानि जायेरन्नेकवासरे। नैमित्तिकानि कार्याणि निमित्तोत्पत्त्यनुक्रमात्। ज्ञानात्तिः।
श्राद्धं कृत्वा ततस्यैव पुनः श्राद्धं न तद्दिने। नैमित्तिकं तु कर्तव्यं। निमित्तानुक्रमोदयं। कालादर्शे नित्यदार्शिकयोः श्रा
द्धं कुंभमासिकयोरपि। दार्शिक्यं निमित्तानुक्रमात्कस्य युगादेश्च दार्शिकालभ्ययोगयोः। दार्शिकस्य च मन्वादेः सं
पाते श्राद्धकर्मणः प्रसंगादितरस्यापि सिद्धेरुत्तरमाचरेत्। अस्य देवताभेदे पवादमाह। स एव॥ नित्यस्य चोदकुंभ
स्य नित्यमासिकयोरपि। दर्शस्य चोदकुंभस्य दार्शमासिकयोरपि। नित्यस्य चाब्दिकस्यापि दार्शिकाब्दिकयो
रपि। युगाद्याब्दिकयोश्चैव मन्वाद्याब्दिकयोस्तथा। पत्याब्दिकस्य चालभ्ययोगेषु विहितस्य च। संपाते देवता
भेदाच्छ्राद्धयुग्मं समाचरेत्। निमित्तानि यतिश्चात्र पूर्वानुष्ठानकारणं॥ पित्रोक्तापि तत्पूर्वत्वं सर्वत्र श्राद्धकर्मणि।
माधवीये स्मृतिसंग्रहे। काम्यं तंत्रेणानित्यस्य श्राद्धं तंत्रेण सिध्यति। अथ श्राद्धांगतर्पणं। पारिजाते पृथ्वीचंद्रो
दये च गर्गः। पूर्वं तिलोदकं दत्वा आमश्राद्धं तु कारयेत्। पक्वे हेत्यन भवेत्पूर्वं परेहनि तिलोदकं। पक्वश्राद्धे हि एण्ये

२९२ चअनुव्रज्यतिलोदकं॥मच्चानित्यतर्पणस्यैवायंपरेह्न्युत्कर्षः॥ननुश्राद्धांगतर्पणमस्तीतिवाच्यं।यत्तर्पयतितान्विप्रः
श्राद्धंकृत्वापरेहनि॥पितरस्तेनतृप्यंतिनचेत्कुप्यंतिवैभृशं॥इतिगर्गेशाकलनिंदाभ्यांमंगलोक्तेः॥श्राद्धप्रक्रमाहार्षि
कं।बृहन्नारदीयेप्याधिकंप्रक्रम्य।परेद्युःश्राद्धकृन्मर्त्योयोनतर्पयतेपितॄन्।तस्यतेपितरःक्रुद्धाःशापंदत्वाप्र
जंतिहि॥पितृशब्दश्चश्राद्धेज्यपरः।तेनभर्पते।पितृगणस्यपशुपुरोडाशयागवत्प्रस्तरप्रहरणवच्चेद्देवतासंस्कार
कार्थौ।तेनाह्निकदिनेनित्यंस्वपित्रादितर्पणंकार्यमेव।श्राद्धांगभूतस्यैवपरेद्युरुक्तेः॥प्रत्यहंगांतिलंदद्यात्त्रयिदे
पिपरेहनि।वर्गैकस्यैववचोयेषामन्येषांतुविगर्हितं।क्वचिद्विशेषमाह।गार्ग्यः॥कृष्णेभाद्रपदेमासिश्राद्धंप्रतिदिनं
भवेत्॥पितॄणांप्रत्यहंकार्यंनिषिद्धेह्न्यपितर्पणं।तर्पणंतिलतर्पणंनिषिद्धाहेपीत्युक्तेः॥सकृन्महालयेपिस्या
दष्टकास्वंतएवहि।अत्रसप्तमीभिर्देशादिगीतास्फुटैव।तत्रजपान्जुहुयात्।मद्रुभामरणीयायां।मंद्रंप्रातःसवने
इत्यादिवत्।अस्यापवादोबृहन्नारदीये।वृद्धिश्राद्धेसपिंडेचप्रेतश्राद्धेनुमासिके।संवत्सरविमोकेचनकुर्यात्तिल
तर्पणं।तस्यमर्थः।दर्शेविप्रनिमंत्रणोत्तरंपाकारंभोत्तरंवाश्राद्धप्रयोगस्यारब्धत्वात्ब्रह्मयज्ञोत्तरंनित्यतर्प एमः
णेनैवश्राद्धांगतर्पणस्यतंत्रेणप्रसंगेनवासिद्धिः।ततःपूर्वंवैश्वदेवोत्तरंचब्रह्मनपराह्णेयत्तर्पणंतत्तिलै।सहेति

वचनात्मघाश्रम्यां भानुवारे च मातापित्रोर्मृतेहनि। तिलैर्यस्तर्पणं कुर्यात्स भवेत्पितृघातकः॥ इति। एत्रावल्पांतृहु मन्वृक्लेषु। अत्र नित्यतर्पणे तिलनिषेधः। नतु तर्पणमात्रे तिलैरित्यस्य वैयर्थ्यापत्तेः। यत्तु कातीयं। उपरागे पितुः श्राद्धे पाते मार्यां च संक्रमे। निषिद्धेपि हि सर्वत्र तिलैस्तर्पणमाचरेदिति। तत्परेघुः श्राद्धांगतर्पणविषयमिति केचित्। श्राद्धशेषस्य तत्स्थानापन्नस्य तर्पणविषयमिति युक्तं। सकृन्महालये परेघुस्तर्पणं। अष्टकास्तु तत्सप्तम्यष्टमी श्राद्धयोः। तेतद्दैववर्गाद्यपस्य। अन्वष्टक्ये तु मातृवर्गस्यापि। तीर्थश्राद्धे दर्शवत्। मघावर्षादिष्वष्टकावदंते। अनेकश्राद्धसंपाते तु यदि तत्सगासिद्धिस्तदा तदीयमेव तर्पणं। तंत्रत्वे तु श्राद्धसमसंख्यत्वे आदावंते वा विषमसंख्यायां बह्वनुरोध इति। तस्माच्छ्राद्धांगतर्पणं सिद्धं। तद्विधिः संग्रहे। स्नात्वा तीरं समागत्योपविश्य कुशासने। संतर्पयेत्पितॄन्सर्वान् स्नात्वा वस्त्रं च धारयेत्। तर्पणे त्वरां। वित्यस्नानं कृत्वेत्यर्थः॥ अपसव्यं ततः कृत्वा सव्यं जान्वाच्य भूतले। नामगोत्रस्वधाकारैर्द्वितीयांतेन तर्पयेत्। अत्र वस्वादिरूपतो ज्ञास्त्वत्यर्थस्मारे। वसुरुद्रादितिसुतान् श्राद्धार्थे तर्पयेत्पितॄन्। तच्च। बह्वृचानां दक्षिणेनैव। अनादेशोद्दक्षिणांपतीपादिति स्मृत्यात। अत्र प्रत्यंजलि मंत्रावृत्तिः। निर्वापवत्संध्यार्घदानवत्तद्द्रव्यभेदात्। अतश्चापनेदिप्मोहरणाद्दौ

२९४

लद्ग्येकसान्नमंत्राहस्त्रिः।कोचित्तुपरिस्थानमंत्रवत्क्रियमाणानुवादित्वेनकरणत्वाभावात्सकृदिच्छंति एवंनित्येपिय
त्तुसंग्रहत्वान्नापठंति पित्रोःक्षयाहेसंप्राप्ते यःकुर्यात्तिलतर्पणं। आहुत्यंतद्भवेद्ब्रह्मंतज्ज्ञोयैःरुधिरंभवेत्। सर्वदातर्पणंकु
र्याद्ब्रह्मयज्ञपुरःसरं। मृताहेनैवकर्त्तव्यंकृतंचेन्निःफलंभवेत्। इतितत्सम्मूलत्वेसति। लविषयंयच्चपठंति। कपिलाः
मन्वाद्यास्तुयुगाद्यास्तुदर्शसंक्रमणेषुच। पोर्णमास्यांव्यतीपातेदद्यात्सर्वेतिलोदकं। अर्द्धोदयेगजच्छायेषष्ठी
षुचमहालये। भरण्यांचमहाश्राद्धेतदंतेतर्पणंविदुः। शौनकः। मातापित्रोर्मृताहेचपरेह्नानितिलोदकं। कारु
ण्यश्राद्धविषयेसद्योदद्यात्तिलोदकं। एतन्निर्मूलं। अथतिलतर्पणनिषेधः। गार्ग्यः। भानौभौमेत्रयोदश्यांनंदास्त
चमघासुच। पिंडदानंमृदास्नानंनकुर्यात्तिलतर्पणं। स्मृत्यर्थसारे विवाहव्रतचूडासुवर्षमर्द्धंतदर्द्धकं। अर्द्धंतदेवृद्धे
सत्यांचतन्मासिनेत्याहुः। तिलतर्पणे। हेमाद्रौमरीचिः। सप्तम्यांरविवारेचगृहेजन्मदिनेतथा। निशासंध्यासुपुत्रा
र्थीनकुर्यात्तिलतर्पणं॥ यत्तुसंग्रहे। नंदायांभार्गवादिनेकृत्तिकासुमघासुच। भरण्यांभानुवारेचगजच्छायाक्षये
तथा॥ अयनद्वितयेचैवमन्वादियुगादिषु। पिंडदानंमृदास्नानंनकुर्यात्तिलतर्पणमिति। तच्चिंत्यं। पानीयमप्यत्र
तिलैर्विमिश्रंदद्यात्पितृभ्यःप्रयतोमनुष्यः। इत्यादिविरोधात्। अत्रापदादरश्वीचंद्रोदये। तीर्थेतिथिविशेषेचगंगा

एमः

यां प्रेतपक्षके। निषिद्धेपि दिने कुर्यात्तर्पणं तिलमिश्रितं। स्मृत्यर्थसारेपि। तिथितीर्थविशेषेषु कार्यं प्रेते च सर्वदेति गो
भिलः। तिलाभावे निषिद्धाहे सुवर्णरजतान्वितं। तदभावे निषिंचेत्तु दर्भमंत्रेण वा पुनः। पतितस्यातिलोदकं वक्ष्यामः।
अथ वृद्धिश्राद्धं। तन्निमित्तं पृथ्वीचंद्रोदये ब्राह्मे। जन्मन्यथोपनयने विवाहे पुत्रकस्य च। पितॄन्नांदीमुखान्नाम
तर्पयेद्विधिपूर्वकं। वेदव्रतेषु चाधानयज्ञपुंसवनेषु च। नवान्नभोजने स्नाने ऊढायाः प्रथमार्तवे।। देवारामतडादि
प्रतिमासूत्सवेषु च। राजाभिषेके बालान्नभोजने वृद्धिसंज्ञकान्। वनस्थाद्याश्रमं गच्छन् पूर्वेद्युस्तथ एव वा पित
पूर्वोक्तविधिनातर्पयेत्कर्मसिद्धये। आद्यपदात्सन्यासः।। विष्णुपुराणे। यज्ञोद्वाहप्रतिष्ठासु मेखलाबंधमोक्ष
योः। पुत्रजन्मवृषोत्सर्गे वृद्धिश्राद्धं समाचरेत्।। तत्रैव। नामकर्मणि बालानां चूडाकर्मादिके तथेति निष्क्र
मान्नप्राशनयोर्न श्राद्धमिति मैथिलाः। तन्न। पूर्वोक्तविरोधात्। तानिष्ट्वेतिर्निषेधात्। इतोत्पत्रोतथा श्राद्धम
न्नप्राशनिके तथेति राजमार्तंडाच्च। यत्तु छंदोगपरिशिष्टं। सूर्येंद्वोः कर्मणी ये च तयोः श्राद्धं न विद्यते। र
तितन्त्रेषामेवेति कल्पतरुः। बह्वृचकारिकापि। स्यादभ्युदयिकं श्राद्धं वृद्धिपूर्वेषु कर्मसु। पुंसवने च सीमंते चौ
लोपनयनेद्वौहि। विवाहे वानलाधानप्रभृति श्रौतकर्मसु। रईश्राद्धप्रकुर्वेति द्विजा वृद्धिनिमित्तके। अन्य

षोडशसंस्कारश्रावण्यादिष्वपीष्यते। वाप्याद्युद्यापनादौ च कुर्युः पूर्त्तनिमित्तकं। बोपदेवकालादर्शे सीमंतव्रतचौ
लनामकरणान्नप्राशनोपायनस्नानाधानविवाहयज्ञतनयोत्पत्तिप्रतिष्ठास्तु च। पुरुषत्यावसथ्यप्रवेशनस्तुताः
घा स्यावलोकाश्रमस्त्रीकाम्यादि तिपाभिषेकदयितादौ च नांदीमुखं। यत्तु कामधेनौ। जलाशयप्रतिष्ठायां
वृषोत्सर्गादिकर्मसु। वत्सराभ्यंतरेपि चोर्द्ध्वं यस्योत्सर्गो कर्मणि। वृद्धिश्राद्धं न कुर्वीत तदन्यत्र समाचरेत्॥ इति। तत्र ज
लाशये वृद्धेस्य निषेधो नलकर्मणां स्यति। केचित्। अन्ये तु स्य निर्मूलतामाहुः। श्राद्धकौमुद्यां निर्णयामृते च मा
त्स्ये। अन्नप्राशे च सीमंते पुत्रोत्पत्तिनिमित्तके। पुंसवे च निषेके च नववेश्मप्रवेशने। देववृक्षजलादीनां प्रतिष्ठा
यां विशेषतः। तीर्थयात्रावृषोत्सर्गे वृद्धिश्राद्धं प्रकीर्त्तितं। इदं चावश्यकं। वृद्धौ न तर्पिता ये वै पितरो गृहमेधिभिः।
तद्धीनमफलं ज्ञेयं श्राद्धं। विधिरेव सः। इति शातातपोक्तेः। अत्र श्राद्धत्रयं स एवाह। मातृश्राद्धं तु पूर्वं स्यात्पि
तॄणां तदनंतरं। ततो मातामहानां च वृद्धौ श्राद्धत्रयं स्मृतं। तत्कालमाह पृथ्वीचंद्रोदये गार्ग्यः। मातृश्राद्धं तु पूर्वे एमः
द्युः कर्माहनि तु पैतृकं॥ मातामहं चोत्तरेद्युर्वृद्धौ श्राद्धत्रयं भवेत्। अशक्तौ शातातपः। पूर्वाह्णे मातृकं श्राद्धं मध्या
ह्ने पैतृकं तथा। ततो मातामहानां च वृद्धौ श्राद्धत्रयं स्मृतं। अत्राप्यशक्तौ सर्वं वा पृथग्दिनेष्वशक्तश्चेदेकस्मिन्पू

र्ववासरे। श्राद्धत्रयं प्रकुर्वीत वैश्वदेवं तु तांत्रिकमिति। वृद्धमनुरपि। अलाभे भिन्नकालानां नांदीश्राद्धत्रयं बुधाः। पूर्वेद्युर्वै
प्रकुर्वीत पूर्वाह्णे मातृपूर्वकं। अत्र महत्सु पूर्वेद्युस्तदहरल्पके इति गृह्यपरिशिष्टात् व्यवस्था ज्ञेया। तच्च प्रातरेव। पार्वणं
चापराह्णे तु प्रातर्वृद्धिनिमित्तकं॥ इति शातातपोक्तेः। अतश्चाह्नः सार्द्धप्रहरपर्यंतं। प्रहरोऽध्यर्द्धसंयुक्तः प्रातरित्यभिधीयते।
इति गार्ग्योक्तेरिति पृथ्वीचंद्रोदयः। इदं च पुत्रजन्मातिरिक्तविषयं। तदाह हारीतः। पूर्वाह्णे वै भवेद्वृद्धिर्विना जन्मनिमित्त
कं। पुत्रजन्मनि कुर्वीत श्राद्धं तात्कालिकं बुधः इति। एतदनियतनिमित्तपरं। नियतेषु निमित्तेषु प्रातर्वृद्धिनिमित्तकं। तेषाम
नियतत्वे तु तदानंतर्यमिष्यते। इति लौगाक्षिस्मृतेः। आधानांगनांदीश्राद्धं त्वपराह्ण एव। आमश्राद्धं तु पूर्वाह्णे तिष्ठन्नेन
तु मध्यतः। पार्वणं चापराह्णे तु वृद्धिश्राद्धं तथाग्निकमिति निर्णयामृते गल्लवोक्तेः। नांदीमुखाद्यं प्रातराग्निकं त्वपरा
ह्णतः इति विष्णूक्तेश्च। इदं च मातृपितृमातामहादिक्रमेण नवदैवत्यं कार्यं। तत्र मातामहाः सपत्नीकाः। मातामह
प्रमातामहवृद्धप्रमातामहानां सपत्नीकानामिति पृथ्वीचंद्रोदये गारुडे गद्यरूपेण पाठात्। हेमाद्रौ शंखः। नांदीमु
खे सत्यवसू संकीर्त्यौ वैश्वदेविके। वृद्धपराशरः। नांदीमुखेभ्यो देवेभ्यः प्रदक्षिणकुशासनं। पितृभ्यस्तन्मुखेभ्यश्च प्र
दक्षिणामतिस्मृतिः। यत्तु वृद्धवसिष्ठः। नांदीमुखे विवाहे च प्रपितामहपूर्वकं। नामसंकीर्तयेद्विद्वानन्यत्र पितृपूर्व

कां। यच्च स्मृत्यर्थसारे। वृद्धमुख्यास्तु पितरो वृद्धिश्राद्धेषु भुंजते इति॥ यच्च गारुडे। व्युत्क्रमप्राप्तिपाठेनं तच्छ्राद्धांतरविषयं।
पितृभ्यः पितामहेभ्यः प्रपितामहेभ्यः इति वृद्धौ चपरिशिष्टे कात्यायनेन चानुलोम्याम्नानात्॥ पृथ्वीचंद्रोदये प्येवी
येत्व केचिद्वृद्धिपदं पित्रादिषु प्रयुंजते। तन्न। अन समस्तधर्मशास्त्रानामरूपाणामागोत्रिणां। अनाम्नामतिलाद्येश्चनां
दीश्राद्धं तु सव्यवत्। इति पृथ्वीचंद्रोदये संग्रहोक्तेः। न च निषेधादेव विधिः कल्प्यत इति वाच्यं। प्रोष्ठपदीश्राद्धे प्रपिता
महास्य रेषां वृद्धपित्रादीनां देवतात्वान्नांदीश्राद्धत्वसाम्येनेहापि तत्प्राप्तौ निषेध्यात्। गोत्रनामादिनिषेधस्तु शुभा
र्थे। प्रथमांते न वृद्धौ संकल्पमाचरेदिति भुपक्रम्यालास्म वृद्धशास्त्रानामित्युक्तेः संकल्पश्राद्धपरः। सगोत्रनिषे
धस्तु यस्यां शाखायां भविष्यतीति तत्परः। गोत्रनामभिरामंत्र्य पितृभ्योर्घ्यं प्रदापयेत्। इति छंदोगपरिशिष्टे तद्वि
धानात्। यत्तु ब्राह्मे। पिता पितामहश्चैव तथैव प्रपितामहः। त्रयो ह्यश्रुमुखा ह्येते पितरः परिकीर्तिताः। तेभ्यः पू
र्वतरा ये च प्रजावंतः सुखोधिताः। ते तु नांदीमुखा नांदी समृद्धिरिति कथ्यते। इति। यच्च मार्कंडेयपुराणे। येस्युः पिता
एमः
महाद्ध्वं तत्तु नांदीमुखाः स्मृताः। इति तज्जीवत्पित्रादिनिककर्तृकवृद्धिश्राद्धविषयं। तेन वस्येदमावश्यकं। यत्तु
विष्णुः। पितरि पितामहे प्रपितामहे च जीवति नैव कुर्यादिति। तद्दर्शादिविषयमिति कल्पतरुः। मदनपारिजातेप्ये

वा।हेमाद्रिकृतनांदीमुखानांश्राद्धंतुकन्याराशिगतेरवौ।पौर्णमास्यांतुकर्तव्यंवराहवचनंयथेति।प्रोष्ठपदीश्राद्धेकवा
कृत्वातत्रैवपूर्वेषांदेवतात्वमित्याह।अत्रसत्यवसूवैश्वदेवावित्युक्तंप्राक्।यत्तुशातातपः।मातृश्राद्धंतुयुग्मैःस्या
द्दैवंप्राङ्मुखैःपृथक्।इति।तत्भिन्नप्रयोगमातृश्राद्धपरं।यत्तुमार्कंडेयपुराणेवैश्वदेवविहीनंतुकेचिदिच्छं
तिमानवाः।इतितद्भिन्नप्रयोगमातृश्राद्धभिन्नश्राद्धद्वयेदेवविकल्पार्थंप्रयोगैक्येतुदेवनियमइतिहेमाद्रिः।एतच्चमा
तृपूजापूर्वकंकार्यं।अकृत्वामातृपूजांतुयःश्राद्धंपरिवेषयेत्।तस्यक्रोधसमाविष्टाहिंसामिच्छंतिमातरः।इतिशा
तातपोक्तेः।कौर्मे।पुष्पैर्धूपैःसनैवेद्यैर्गंधाद्यैर्भूषणैरपि।पूजयित्वामातृगणंकुर्याच्छ्राद्धत्रयंबुधः।छंदोगपरिशि
ष्टे।कर्मादिषुतुसर्वेषुमातरःसगणाधिपाः।पूजनीयाःप्रयत्नेनपूजिताःपूजयंतिताः।प्रतिमासुचशुभ्रासु
लिखितासुपटादिषु।अपिवाक्षतपुंजेषुनैवेद्यैश्चपृथग्विधैः।कुड्यलग्नांवसोर्धारांसप्तधारांघृतेनतु।का
रयेत्पंचधारांवानातिनीचांनचोच्छ्रिताः।आयुष्याणिचशांत्यर्थंजप्त्वातत्रसमाहिताः।षड्भ्यःपितृभ्यस्तद
नुश्राद्धदानमुपक्रमेत्।अत्रसर्वेष्वितिग्रहणात्ग्रहयज्ञतद्विकारेष्वपिनित्यंश्राद्धं।नाष्ट्वातुपितृन्श्राद्धेकर्म
किंचित्समाचरेत्।इतिशातातपोक्तेश्च।इयंवसोर्धारातच्छाखीयानांनिष।ता।तन्येषामनियता।बह्वल्पंवास्व

शृत्योक्तेः। करणेऽभ्युदयः। पत्नीमात्रातं स्वशाखायामित्युक्तेः। आयुष्याणि आनोभद्रा इत्यादीनि षड्वा इति मात्रादित्रिको
पलक्षणमिति पृथ्वीचंद्रः। छंदोगानां षड्दैवत्यमन्येषां नवदैवत्यमित्याशार्कः। मम तु मतं। कोकिलमतानुसारिणां मा
तृमातामहप्रमातामहा इति मात्रा सहैव मातामहश्राद्धकरणात् तद्विषयमिदं षड्वा इति। मातरस्तत्रैवोक्ताः। गौ
री पद्मा शची मेधा सावित्री विजया जया। देवसेना स्वधा स्वाहा मातरो लोकमातरः। धृतिः पुष्टिस्तथा तुष्टिरात्मदेव
तया सह। गणेशेनाधिका ह्येता वृद्धौ पूज्याश्चतुर्दशी मातरो लोकमातरः इति विशेषणं। तेन चतुर्दशत्वं। प
राषोडशेति पाठस्तदा दैवतांतरं चंद्रिकायां चतुर्दिं विशेषणं। तेन त्रशतिमते त्वन्या उक्ताः। तिस्रः पूज्याःऽपि
तुः पत्नेतिस्त्रो मातामहस्य च। इत्येता मातरो ज्ञेयाः पितुर्मातुः स्वसाष्टमी। आसां जीवने पक्वान्नपूजनं। मृतानां
त्वक्षतपुंजेषु। इति हेमाद्रिः। ब्रह्माण्याद्यास्तथा सप्त दुर्गाक्षेत्रगणाधिपान्। वृद्ध्यादौ पूंजेषु इति घिलात्तप
पश्चान्नांदीमुखान्पितॄन्। मातृपूर्वान्पितॄन्पूज्य ततो मातामहानपि। मातामहास्ततः केचिद्युग्मा भोज्या द्वि
जातयः इति। अत्र द्वादशदैवतस्य देशाचारतो व्यवस्था। ब्रह्माण्याद्याः। ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी त एमः
था। वाराही च तथेंद्राणी चामुंडा सप्त मातरः। इत्यपरार्के उक्ताः। अत्र चोक्तादीनां यौगपद्ये तंत्रतोक्ताच्छंदोगपरि

शिष्टे। गणाशः। क्रियमाणानां मातृभ्यः पूजनं सकृतासकृदेवमवेष्ट्याद्धमादीन पृथग्गादिषु। मातृभ्य इति पक्षद्वये
चतुर्थ्य। एकानेकपुत्राणां संस्कारेष्वेकदिने एकदेशकालकर्तृकत्वादिस्यर्थः। तथा। असकृद्यानि कर्माणि क्रि
येरन्कर्मकारिभिः। प्रतिप्रयोगं नैव स्युर्मातरः सगणाधिपाः। कर्मान्तरत्वापि कुत्र श्राद्धं कार्यं कुत्र नेत्युक्तं तत्रैव।
आधाने होमयोश्चैव वैश्वदेवे तथैव च। बालिकर्मणि दर्शे च पूर्णमासे तथैव च। नवहोमे यज्ञे च यज्ञज्ञाव
दंत्येवं मनीषिणः। एकमेवमवेष्ट्याद्धमेतेषु न पृथक्पृथक्। एतेषु प्रतिप्रयोगमावर्त्तते किं त्वादौ। एतद्भिन्ने
होमयागादौ तु प्रतिप्रयोगमावर्त्तते। एवं श्राद्धमित्यर्थः। क्वचिद्दाहाद्वा बाधे निषेधमाह स एवानाष्टकास्तुभ
वेष्ट्याद्धं न श्राद्धे श्राद्धमिष्यते। न सोष्यन्तीजातेकर्मप्रोषितागमकर्मसु। विवाहादिः कर्मगणो य उक्तो गर्भा
धानशुश्रुमोपस्पचांते। विवाहादावेकमेवात्र कुर्याच्छ्राद्धं नादौ कर्मणः कर्मणः स्यात्। सोष्यन्त्याः आस
न्नप्रसवायाः सोष्यन्तीमभ्युदयेत्युक्तं कर्म कालसामनोक्तस्य श्राद्धस्यापाकप्राधान्यात्तस्य च। जातश्राद्धे
न दद्यात्तु पक्वान्नं ब्राह्मणाय पीतिति निषेधान्नजातकर्माणि नान्दीश्राद्धं। आमान्नेन वा कार्यमित्याशाके
गोजस्क। जातकर्मण्येव निषेधः पचन्मनिमित्तं तु कार्यमेव। जन्मन्यथोपनयनेऽस्तुक्तेः। नैमित्तिकमथो

२६७

वृद्धिश्राद्धमाभ्युदयात्मकं। पुत्रजन्मनिमित्तं तु जातकर्मसमं नरैरिति मार्कंडेयपुराणोक्तेस्त्याज्यं। हारलतायां श्राद्धविवेके चैव। एतेन जातकर्मणि कालांतरे श्राद्धनिषेधो न जन्मदिन इति वाचस्पतिमतं परास्तं। अत्र निषेककाल इति वचनात् गर्भाधानेन निषेधः। प्रोषितेति। प्रोष्येत्य गृहौ नुपतिष्ठेते। पुत्रं दृष्ट्वा जपतीति विहितं कर्म विवाहादि गर्भाधानं। तो यो गृहप्रवेशाद्यातिहोमचतुर्थकर्मादिः कर्मसमूह उक्तः सूत्रकारेण। तत्रापि प्रतिकर्म न वृद्धिः। अन्येपि हला। भियोगाद्योपवादविषयास्ते वर्जेयाः। अपरच राज्ञोच्यते। अथात्राधिकारिणः। विष्णुपुराणे। जातस्य जातकर्मादि क्रियाकांडमशेषतः। पितापुत्रस्य कुवत श्राद्धं चाभ्युदयात्मकं। अत्र केचित्। जीवत्पितुः साग्नेरेव वृद्धिश्राद्धाधिकारो न तु निरग्नेः। न जीवत्पितृकः कुर्याच्छ्राद्धमग्निमृते द्विजः। येभ्य एव पिता दद्यात्तेभ्यः कुवत साग्निकःपि तामहेप्येवमेव कुर्याज्जीवति साग्निकऽसाग्निकोपि न कुवत जीवति प्रपितामहे। इति चंद्रिकायां सुमंतूक्तेरित्याहुः। प्रयोगपारिजातेप्येनाहिताग्निर्न कुर्यादितीदं व्याख्यातं। तन्न। अनग्निकोपि कुवत जन्मादौ वृद्धिश्राद्धमित्र श्राद्धपरमित्युक्तं मदनरत्ने पिंडपितृयज्ञपरमिति पृथ्वीचंद्र कर्मणि। येभ्य एवापिता दद्यात्तानेवोद्दिश्यपतर्पयेदिति। हारीतोक्तेः। सीमंतवंतु वृद्धिश्राद्धमित्र श्राद्धमपरमित्युक्तं मदन

एमः

रत्नेपिंड पितृयज्ञ परमिति पृथ्वीचंद्रः। निर्णयामृते। हारीतीयेनग्निकोनाग्निरभिप्रेतः। पूर्वैवचनेतु साग्निः श्रौताग्निः स्मा
र्तोग्निश्चोच्यते। तेनोभयाग्निहीनस्यनेत्युक्तं। तन्न। पूर्वोक्तदिशागतिसंभवेनग्निपदस्य स्मार्ताग्निपरत्वेमानाभा
वात। वक्ष्यमाणनित्यानित्यसंयोगपाविरोधात। पितरोजनकस्येज्यायावव्रतमनाहितं। समाहितव्रतःपश्चा।
त्त्वान्यजेत। पितायहानि। मिपृथ्वीचंद्रोदयेयमवचोविरोधाच्च। अपरार्केपि। समावर्तनेब्रह्मचारीस्वयमेव
नांदीश्राद्धंकुर्यात। इत्याह। अतःपूर्वमेवसाधु। बोपदेवोप्येवमाह। जीवत्पितुःपुत्रनामकर्मादौनवृद्धिश्राद्धं।
हारीतीयेजन्मादावित्याद्विशिष्टेनतत्प्राप्तावपि। उद्वाहेपुत्रजननेपित्र्येष्ट्यांसोमिकेमखे। तीर्थेब्राह्मणआ
याते षडेतेजीवतःपितुरितिमैत्रपारिशिष्टेनउद्वाहेषवतस्योपसंहारात। एवंयच्चस्मृतसंस्कारादिपदंतदु
द्वाहादिपरमेवेति। तन्न। उद्वाहपदस्यस्वविवाहपरत्वस्यापिसंभवात्पुत्रविवाहपरत्वेमानाभावात। नामक
र्मेणिबालानांचूडाकर्मादिकेतथेत्यादिभिर्नित्यंश्राद्धस्यचोलाद्यंगत्वावगतेर्नित्यानित्यसंयोगाविरोधा
च्च। अतोजन्मादाविमिसर्वसंस्कारसंग्रहः। तथा कात्यायनः। स्वपितृभ्यःपितादद्यात्सुतसंस्कारकर्मसु। पि
डानोद्वहनात्तेषांतस्याभावेतुतत्क्रमात। सुतानांचोलादिसंस्कारेषुपितास्वपितृभ्यःपिंडांतंश्राद्धं। पिंडदांश

हारेष्येषामिति दर्शनात्। ऊर्द्ध्वस्नानात्। विवाहपर्यंतं दद्यात्। विवाहस्वप्रथमः। नांदीश्राद्धं पिता कुर्यादाद्ये पाणिग्रहे बुधः। अ
त ऊर्ध्वं प्रकुर्वीत स्वयमेव तु नांदिकमिति स्मृतेः। तस्य पितुरभावे तत्क्रमात्। असंस्कृतास्तु संस्कार्या भ्रातृभिः पूर्वसं
स्कृतैरिति। यः कर्तृक्रमः तेन क्रमेण ज्येष्ठभ्रात्रादिभिर्दद्यादिति चंडिकादयः। हेमाद्रिस्तु। तस्य पितुरभावे यः पितृव्य
पातुलादिसंस्कुपासि तत्क्रमात्संस्कार्यः। पितृक्रमात्संस्कार्यः। पितृक्रमाद्दद्यात्। ननु स्वपितृभ्यः। इति व्याचख्यौ।
समावर्त्तनस्यापि विवाहप्राचीनसुतसंस्कारत्वात्पितैव नांदीश्राद्धं कुर्यात्। तदभावे ज्येष्ठभ्रात्रादिः। तदभावे स्वय
मेव कुर्यात्। उपनयनेन कर्माधिकारस्य जातत्वात्। एवमाद्यविवाहेपीति पृथ्वीचंद्रचंकादयः। यदा तु पि
तरि संन्यस्ते प्रोषिते पतिते वाधर्मार्थिते सुतमन्यः संस्कुर्यात्। तदा संस्कार्ये पि। तुः। पित्रादिभ्यो दद्यात्। पि
तरो जनकस्येऽप्या यावद्व्रतमनाहितं॥ समाहितव्रतः पश्चात्स्वान्यजेत्तु पितामहानि पृथ्वीचंद्रोदये यमो
क्तेः। जीवत्पितृकस्य विशेषमाह। वृद्धे तीर्थे च संन्यस्ते ताते च पतिते सति। येभ्य एव पिता दद्यात्तेभ्यो दद्यात्स्व
यं सुतः। अन्यच्च बह्वृचपरिशिष्टे। जीवत्पिता सुतसंस्कारे मातृमातामहयोर्दद्यात्। तस्यां जीवत्यां मातामहस्यैव। एमः
इति तच्छाखीयानामेवेति दिक्। स्मृतितत्त्वादिगौडग्रंथेषु जीवन्मातृकः पितामह्यादिभ्यो दद्यात्। जीवंतमपि द

घाद्धापेतायान्त्रोद्दकोद्विजइतिकात्यायनोक्तेः।जीवेतस्मिन्सुतःकुर्युःपितामह्यासहैवतु।तस्यांचैवतुजीवत्यांत
स्याःश्वश्र्वेतिनिश्चयः।इतिहारीतोक्तेश्चेत्युक्तं।तस्मिन्भर्त्तरि।दाक्षिणात्यास्तुपूर्वोक्तस्यसपिंडीकरणात्स्वविष
यत्वात्।जीवेत्तुयदिवर्गाद्यस्तंवर्गंतुपरित्यजेदितिवचनात्तद्वर्गस्यलोपएवेत्याहुः।यात्तुचंद्रिकायांपारस्करः।नि
षेककालेसोमेचसीमंतोन्नयनेतथा।ज्ञेयंपुंसवनेश्राद्धंकर्मांगंवृद्धिवच्चतदिति।तत्रगर्भाधानादौकर्मांगंजात
कर्मादावुक्तं।तुवृद्धिवच्चतदिति।तत्रगर्भाधानादौकर्मांगंजातकर्मादावुक्तं।तुवृद्धिश्राद्धंपृथगेवावृद्धिवदि
त्युक्तेः।गौडनिबंधेमात्स्ये।अन्नप्राशेचसीमंतेपुत्रोत्पत्तिनिमित्तके।पुंसवेचनिषेकेचनववेश्मप्रवेशने।
देवव्रततडागादीनांप्रतिष्ठायांतथैवच।तीर्थयात्रावृषोत्सर्गेवृद्धिश्राद्धंप्रकीर्त्तितं।अत्रभूतनिमित्तानांवृ
द्धिश्राद्धंविनिमित्तानांमंगलंवृद्धिश्राद्धस्तद्धर्मातिदेशादितिगौडाः।अन्येतुनिषेकादौकर्मांगवृद्धिश्राद्ध
योःसमुच्चयमाहुः।नांदीश्राद्धसंज्ञातूभयानुगता।अथेतिकर्त्तव्यता।पृथ्वीचंद्रोदयेवृद्धपराशरः।मालत्या
शतपत्र्यावामल्लिकाकुब्जयोरपि।केतक्याःपाटलायावाद्देयामालानलोहिता।श्राद्धेमालानिषेधस्याय
मपवादः।तथा।सुवेषभूषणोत्तमालंकारैस्तथान्यैः।कुंकुमाद्यनुलिप्तांगैर्भाव्यंतुब्राह्मणैःसह।स्त्रियोपि

२६६

स्मृतस्तथाभूतामीत्यन्त्यादिहार्थिताः। हेमाद्रौ ब्रह्मांडे। कुशस्थाने च दूर्वाः स्युर्मंगलस्याभिवृद्धये। कुशा अपि वर्ज्यंते छं
दोगपरिशिष्टे। प्रातरामंत्रितान्विप्रान्युग्मानुभयतस्तथा। उभयतः दैवे पित्र्ये च। वैश्वदेवे द्वौ विप्रौ पित्रादीनामे
कैकस्य द्वौ द्वाविति विंशतिः। त्रिके वा द्वौ इति अष्टौ विप्राः। अत्र विप्रालाभे द्वियोपि भोज्याः। इत्याहाशार्के वृद्धवसि
ष्ठः। मातृश्राद्धे तु विप्राणामलाभे पूजयेद्। पि। पतिपुत्रान्विताभव्या योषितोष्टौ कुलोद्भवाः। मातृत्रिके चतस्रः माता
महीत्रिके चेति अष्टाविति हेमाद्रिः। अत्र पित्र्ये प्राङ्मुखा विप्राः। पाद्येपि पित्र्ये चतुरस्रमंडलमिति जयंतः। हेमाद्रौ
ब्रा ह्मेपि। विप्रान्प्रदक्षिणावर्तं प्राङ्मुखाननुपवेशयेत्। छंदोगपरिशिष्टे। गोत्रनामभिरामंत्र्य पितृभ्योर्घ्यं प्रदापयेत्।
नात्रापसव्यकरणं न पित्र्यं तीर्थमिष्यते। ज्येष्ठोत्तरकरान्युग्मान्कराग्राग्रपवित्रकान्। कृत्वार्घ्यं संप्रदातव्यं नैकै
कस्यात्र दीयते। पित्रादेर्द्वौ द्वौ विप्रौ तयोर्दक्षिणहस्तौ संयोज्य प्रथमोपवेशितविप्रकरोपरि तंत्रेणाद्वयोरर्घ्यं द
द्यादित्यर्थः। बह्वृचकारिकायां तु। दत्त्वार्घ्यादेकदेशः स्यादर्घ्यदानं प्रतिद्विजं। आह त्रिरपि मंत्रस्य प्रतिब्राह्म रामः
णमिष्यते। प्रतिद्विजं पृथक्कुर्यान्नीवीत्यर्घानुमंत्रणमित्यर्थः। मधुमध्वितिमस्तत्र त्रिर्जपो। शित्तु निष्ठतां। गाय
त्र्यनंतरं सोत्र मधुमंत्रविवर्जितः। न चाश्नत्सु जपेदत्र कदाचित्पितृसूक्तकं। तथा। संपन्नमिति तृप्ताः स्थ प्रश्नस्था

नैर्विधीयते।सुसंपन्नमितिप्रोक्तेशेषमन्नंनिवेदयेत्।अन्नप्योदकदानंचअर्घ्यदानवर्जितो।षष्ठ्यैवनियतंकुर्यान्नचतुर्थ्यांकदाचन।चंद्रोदयेब्राह्मोपठेछ्कुमिसूक्तंतुस्वस्तिसूक्तंतथाशुभं।।नांदीमुखान्पितॄन्भक्त्यासांजलिश्चसमाह्वयेत्।।तथा।।शाल्यन्नंदधिमध्वक्तंबदराणियवांस्तथा।।मिश्रीकृत्वातुचतुरःपिंडान्श्रीफलसन्निभान्।दद्यान्नांदीमुखेभ्यश्चपितृभ्योविधिपूर्वकं।।द्राक्षामलकमूलानियवांश्चविनियोजयेत्।।तान्येवदक्षिणार्थंतुदद्याद्विप्रेषुसर्वदा।।तत्रैवचतुर्विंशतिमते।द्वौद्वौचाभ्युदयेपिंडौदेवैकैकस्मैविनिक्षिपेत्।एकनाम्नापरंतुक्षीरदध्यापिंडानपृथक्पृथक्।।वसिष्ठः।।प्राङ्मुखोदेवतीर्थेनप्राङ्मूलेषुकुशेषुच।।दत्वापिंडान्नकुर्वतपिंडपात्रमधोमुखं।।नांदीमुखेभ्यःपितृभ्यःस्वाहेतिवापिंडदानमंत्रः।इतिहारीतः।।अत्रपिंडाःकृताकृताइत्युक्तं।तत्रैवभविष्ये।पिंडनिर्वपणंकुर्यान्नवाकुर्याद्विचक्षणः।वृद्धिश्राद्धेमहाबाहोकुलधर्मानवेक्ष्यतु।।छागलेयः।।अर्घ्येकरणमर्घ्येचावाहनंचावनेजनं।पिंडश्राद्धेप्रकुर्वतपिंडहीनेनिवर्त्तते।तेनात्रभोजनस्यैवप्राधान्यत्वाद्यदिविप्रस्यवमनंतदातस्यैवप्राधान्यात्पुनरावृत्तिरितिप्रसिद्धं।।अत्रसांकल्पविशेषः।प्रयोगपारिजातेसंग्रहे।शुभायप्रथमंतेनवृद्धौसंकल्पमाचरेत्।।नषष्ठ्यायदिवाकुर्यान्महान्दोषोभिजायते।नामगोत्रादिनिषेधोह्यत्रैवनतुस

पिंडकश्राद्धेइतिसएव। अत्रायंक्रमः। नांदीश्राद्धेदैवेक्षणाःक्रियतामितिद्वौप्रागग्रपवित्रिमंत्र्य। ॐतथेतिविप्राभ्यांप्राप्यापङ्क्ते
श्राप्नुवतांभवंतौप्राप्नवावेति। वैश्वदेवपक्षिश्येचाद्विवचनं। तेनविप्रद्वयेप्रयोगंकुर्यात्। आहिताग्निस्तुहेमाद्रौब्राह्मे।
योग्नौतुविद्यमानेपितृभ्योपिंडान्नानिर्वपेत्। पतंतिपितरस्तस्यनरकेतेचपच्यते। बह्वृचपरिशिष्टे। द्वौदर्भौपवित्रेपवि
त्राणिचत्वारिशन्नोदेवीरित्यनुमंत्रितास्तुयवानावपति। यवोसिसोमदेवत्योगोसवोदेवनिर्मितः। प्रत्नवद्भिःप्रत्न
पुष्ट्यानांदीमुखान्पितॄनिमाल्लोकान्प्रीणयाहिनःस्वाहेति। स्वाहार्घ्याइतिपृच्छति। विश्वेदेवाइदंवोर्घ्यं। नांदी
मुखाःपितरइति। यथालिंगमर्घदानं। गंधादिदानंद्विर्द्विः पाणौहोमोग्नयेकव्यवाहनायस्वाहासोमायपितृमते
स्वाहेति। अतोदेवाअवंतुनइत्यंगुष्ठग्रहणं। पावमानीःशंवतीरैंद्रीःप्रतिरथंचश्रावयेत्मधुवाताऋचस्थानेउपा
स्मैगायतेतिपंचमधुमतीःश्रावयेत्। अक्षन्नमीमदंतेतिषष्टीमुक्त्वाशेषेणैकैकस्यद्वौद्वौपिंडौदद्यादिति। चंद्रि
कायां। यांवृद्धौवसिष्ठः। तत्रैवप्रश्नेनसंपन्नंदैवेरुचितमित्यपि। दधिकर्कंधुमिश्रांश्चपिंडाःकार्यायथाक्रमं। का
त्यायनः। न्यमृपूर्ववाजिनमितिविप्रांश्चविसर्जयेत्। नांदीमुखाःपितरःप्रीयंतामित्यक्षय्यस्थानेस्वधांवाचयेद्यद
त्यस्यस्थानेनांदीमुखान्पितॄन्वाचयिष्येइतिनस्वधांप्रयुंजीतेति। अत्रसाग्निरनग्निर्वादौवैश्वदेवंकुर्यात्। आदौ

वृद्धौत्वयेचौते मध्ये श्राद्धे तु पार्वणे। एकोद्दिष्टे निवृत्ते तु वैश्वदेवो विधीयते। इत्याशार्केशंखायनवचनात्। हेमाद्रौ तु शेषमन्नमनुज्ञायतां। ततः श्राद्धाङ्किश्राद्धशेषेण वैश्वदेवं समाचरेत्। इति चतुर्विंशतिमतान्नांदीश्राद्धप्यंते वैश्वदेव उक्तः। बहूनानामपितन्त्र्यालोचनात्तथैव। पूर्वोक्तं तु येषां परिशिष्टं तद्विषयमन्याचेषयं वा ज्ञेयं। अथ श्राद्धांगतर्पणं नेत्युक्तं प्राक्॥ इति श्रीजगद्गुरुनारायणभट्टात्मजरामकृष्णभट्टसूनुकमलाकरकृते निर्णयसिंधौ वृद्धिश्राद्धं॥

अथ जीवत्पितृकश्राद्धं। तत्रानेकपक्षा दृश्यंते। जीवंतं पितरं भोजयित्वा परयोः श्राद्धं कुर्यात्। इत्येकः पक्षः। होमांतमेव कुर्यादित्यन्यः। होमांतः पित्र्ययज्ञः स्याज्जीवे पितरि ज्ञानतः। पितरं भोजयित्वा वा पिंडौ निपृणुयात्पणाविति यज्ञपार्श्वोक्तेः। यदि जीवेत्पिता न दद्यादाहोमात्कृत्वा विरमेदित्यापस्तंबोक्तेश्च। जीवत्पिता पिंडानग्नौ कृत्वा परेभ्यो देयमित्यपरः। जुहुयाज्जीवेभ्यः इत्याश्वलायनोक्तेः। जीवतामजीवतां चापिंडदानमितीतरः। जीवतामजीवतां वा देयमेवेति हिरण्यकेतुरिति निगमात्। तस्माज्जीवत्पिता कुर्याद्वाभ्यामेव न संशयः। इति भविष्योक्तेर्द्वाभ्यामेवेत्यन्यः। एते पक्षाः कलौ निषिद्धाः। प्रत्यक्षमर्चनं श्राद्धे निषिद्धं मनुरब्रवीत्॥ पिंडनिर्वपणं यापि महापातकसंमितमिति पृथ्वीचंद्रोदये भविष्योक्तेः। चंद्रिकाप्येवं। तस्मात्पितरि जीवति श्राद्धानारंभ एवेत्ये

नारंभ एवेत्येकः पक्षः। स पितुः पितृकृत्येषु अधिकारेण न विद्यते। इति कात्यायनोक्तेः। जीवे पितरि वै पुत्रः श्राद्धकालं विवर्ज्जयेत्। इति हारीतोक्तेश्च। पितुः पित्रादिभ्यो दद्यादिति सिद्धांतः। ध्रीयमाणे तु पितरि पूर्वेषामेव निर्वपेत्। इति मनूक्तेः। पितुः पितृभ्यो वा दद्यात्स पितेत्यपरार्कति। रीति कात्यायनोक्तेश्च। अयं बहुसंमतः पक्षः। अन्ये शाखाभेदेन ज्ञेयाः। एवं जीवन्मातामहेनाप्यूहेन कार्यं। मातामहानामप्येवं श्राद्धं कुर्याद्विचक्षणः। मंत्रोहेन यथान्यायं शेषाणां मंत्रवर्ज्जितं। इति विष्णूक्तेः। एवं मात्रादिकस्यापि तथा मातामहादिके। इति पृथ्वीचंद्रोदये त्रिषु एणाद्वो। पितरि जीवति तु स्वमातरि मृतायामपि पितुरेव मानमातामह्योच कुर्यात्। येभ्य एव पिता दद्यादिति वस्माणवचनादिति पितामहचरणाः। मदनरत्ने तु जीवत्पिता स्वमातृमातामहयोर्दद्यादित्युक्तं। कालादर्शेप्येवं। मृते पितरि जीवन्मातृकः पितामह्यादिभ्यो वृद्धौ दद्यादिति स्मृतितत्वादिगौडग्रंथाः। दाक्षिणात्यास्तु। पितृवर्गो मातृवर्गस्तथा मातामहस्य च। जीवेत्तु यदि वर्गाद्यस्तं वर्गं तु परित्यजेदिति वचनान्मातृवर्गत्याग एवेत्याहुः। एमः एवं पतितसंन्यस्तपितृकादेरपि ज्ञेयं। वृद्धौ तीर्थे च संन्यस्ते ताते च पतिते सति। येभ्य एव पिता दद्यात्तेभ्यो दद्यात्स्वयं सुतः इति षड्त्रिंशन्मतात्। संन्यस्ते जीवतीत्यर्थः। मृते तु संन्यस्ते तदाद्येदेयं। मृतेपि परेभ्य इति गौडाः। कात्यायनोपि।

ब्राह्मणादिहते ताते पतिते संगवर्ज्जिते। व्युत्क्रमाच्च मृते देयं येभ्य एव ददात्यसौ। अयं च संन्यस्तं। पित्रादेः सर्वश्राद्धाधिका-
रः। एतच्चैकोद्दिष्टपरं। एकादशाहपार्वणवार्षिकाद्यपि तस्यैव। अहन्येकादशे प्राप्ते पार्वणं तु विधीयते। इत्युक्त्वा त्रिदंडग्र-
हणादेव प्रेतत्वं नैव जायते। इत्युशनसा विशेषोक्तेः। ब्राह्मणादिहते इत्यादिनिषेधस्त्रिदंडादिपरः। अतः परमहंसानां
वार्षिकादिकमपि न कार्यं इति शूलपाणिः। श्राद्धतत्वादयोऽप्येवं॥ यत्तु हेमाद्रौ षोकोंडिष्यः। दर्शश्राद्धं गयाश्राद्धं श्रा-
द्धं चापरपक्षिकं। न जीवत्पितृकः कुर्यात्तिलैस्तर्पणमेव चेति। तत्संन्यस्तपित्राद्यतिरिक्तविषयं। मैत्रायणीयपरि-
शिष्टे। उद्वाहे पुत्रजनने पित्र्येष्ट्यां सौमिके मखे। तीर्थे ब्राह्मण आयाते षडेते जीवतः पितुः। तत्रैव। महानदीषु
सर्वासु तीर्थेषु च गयायां मृते। जीवत्पितापि कुर्वीत श्राद्धं पार्वणधर्मवित्॥ यामृततरातिमातृव्यतिरिक्तविषयं।
अन्वष्टक्यं गयाप्राप्तो सत्यां यच्च मृतेऽहनि। मातुः श्राद्धं सुतः कुर्यात्। पितर्यपि च जीवति। तत्रैवोक्तेः। गयाप्राप्तो
प्रासंगिकं॥ गयां प्रसंगतो गयायां गत्वा मातुः श्राद्धं समाचरेत्। इति वचनात्। तेन मृतमतमातृको गयायां तत्सा-
र्वणमात्रं कुर्यात्। तज्जीवने तु तीर्थश्राद्धमपि नेति कालादर्शस्मृतिदर्पणादयः। अन्ये तु गयोद्देशेन गत्वा श्रा-
द्धं नेति निषेधार्थः। सामान्यतः प्राप्ततीर्थश्राद्धमवगयायामपीत्याहुः। यदा तु प्रतिनिषिद्धे न गयां याति। तदा यत्तमा

नस्यापितृपितामहप्रपितामहानित्येवं श्राद्धं न तत्र स्वमातुः पितृपत्नीत्वेन पुनः पार्वणं कुर्यादिति त्रिस्थलीसेतौ तच्च फलावि
ष्णुपदाक्षयवटेष्वेवेति केचित्। आद्यांशे एवेत्यन्ये। मध्यमांश्ये इत्यपरे। संकोचहेत्वभावात्तत्र सर्वश्राद्धानि मातुः
कार्याणीति युक्तं प्रतिभाति। यत्तु मदनपारिजाते। न जीवत्पितृकः कुर्याच्छ्राद्धमग्निमृते द्विजः। येभ्य एव पिता दद्या
त्तेभ्यो दद्यात्तु साग्निकः॥ इति सुमंतूक्तेः साग्नेरेव जीवत्पितृकस्य तीर्थश्राद्धादि युक्तं। साग्नेरपि मैत्रायणीयशाखी
यस्यैव नान्येषां। षडेते जीवतः पितुरिति तस्यापि शिष्टे एवोक्तेरिति रत्नावली दिवोदासीयाः। तदयुक्तं। सोमंतवंपि
तृयज्ञविषयं। अन्यत्तु पित्राद्यतिरिक्तविषयं चेति पृथ्वीचंद्रोदयोक्तेः। वृद्धौ तीर्थे चेत्यादेः साधारण्येनाप्यपित
यात्वाच्च। तथा निरग्नेरपि नांदीश्राद्धमुक्तं प्राक्। एवं पितामहजीवनेऽपि ज्ञेयं। विशेषः पितृकृतजीवत्पितृकनिर्ण
ये ज्ञेयः। अथ पितामहे जीवति मृते पितरि यद्यपि पितामहो वा तच्छ्राद्धं भुंजीतेत्यब्रवीन्मनुरिति मनुना जीवतः
पितामहस्य भोजनमुक्तं तथाप्यत्यस्तार्चनस्य पूर्वे निषिद्धत्वात्पितामहं विहाय पितृप्रपितामहवृद्धप्रपितामहे
भ्यो देयं॥ पिता यस्य तु वृत्तः स्याज्जीवेच्चापि पितामहः॥ पितुः स नाम संकीर्त्य कीर्तयेत्प्रपितामहं इति मनूक्तेः। एमः
अयमेव सर्वसंमतः पक्षः। यत्तु छंदोगपरिशिष्टे। पितामहे ध्रियमाणे पितुः प्रेतस्य निर्वपेत्। पितुस्तस्य च वृत्तस्य जी

वेच्चेत्प्रपितामहः। इत्येकपुरुषं वा द्विपुरुषं वा पार्वणमाहुः। तत्तीर्थे पितृयज्ञपरं। वृद्धोपन्यस्तोक्तिमेव। एवं पूर्वयोर्मृतयोः
प्रपितामहे जीवति पितृमात्रे मृते प्रायोऽन्नवतो वृद्धप्रपितामहादिभ्यो देयं। जीवंतमपि दद्याद्वा प्रेतायान्नोद
कं द्विजः। पितुः पितृभ्यो वा दद्यात्सपितेत्यपराश्रुतिरिति कात्यायनोक्तेश्च। एतत्सर्वं मनसि कृत्वाह हेमाद्रौ विष्णुः
पितरि जीवति यः श्राद्धं कुर्यात्तेषां कुर्यात्पितरि पितामहे च जीवति येषांपित्रे पिंडं निधाय पितामहात्परेभ्यां द्वा
भ्यां दद्यात्। यस्य पिता पितामहश्च प्रेतौ स्यातां स ताभ्यां पिंडौ दत्वा पितामहप्रपितामहयोर्दद्यात्। यस्य पिताम
हः प्रेतः स्यात्स तस्मै पिंडं निधाय प्रपितामहात्परं द्वाभ्यां दद्यात्। यस्य पिता प्रपितामहश्च प्रेतौ स्यातां स पित्रे
पिंडं निधाय पितामहात्परं द्वाभ्यां दद्यात्। मातामहानामप्येवं श्राद्धं कुर्याद्विचक्षणः। मंत्रोहेन तु यथान्या
यं शेषाणां मंत्रवर्जितमिति। अत्र पितृवत्प्रपितामहे जीवति तत्पित्रादिभ्यः। यथा तत्र त्रिषु जीवत्सु नैव कुर्या
त्तथात्रापीत्यादि सर्वमतिदेश्यं। एवं मातृजीवनेऽपीति शूलपाणिकालादर्शौ। न त्रयेभ्य एवेत्यादौ यच्छब्दादेर्व्यक्ति
विशेषवाचित्वेन तदप्रसंगादिति दिक्। उत्तरार्द्धमाख्यातं प्राक्। पत्न्याश्च विज्ञानेश्वरेणोक्तं। पित्रे पिंडं निधायेति
पितुरेकोद्दिष्टैविधिना श्राद्धं कृत्वा प्रपितामहादिभ्यः पार्वणं कुर्यात्। तातश्चुक्रममृतस सपिंडीकरणपक्षे सपिंडीक

३०२ रणाच्छानापन्नत्वं ज्ञेयं। व्युत्क्रमात्तु प्रमीतानां नैव कार्या सपिंडतेति वचनात्। दर्शादौ तु पितुरेकोद्दिष्टमेव कार्यं। न जीवं-
तमपि दद्यादिति श्रुतेः। जीवेत्पितामहो यस्य पिता चोपरतो भवेत्। पितुरेकस्य दातव्यमेवमाहुर्मनीषिणः। इति
यज्ञपार्श्वोक्तेः। पितामहे जीवति वै पितर्येव समापयेत्। इति हारीतोक्तेश्च। शिष्टास्तु व्युत्क्रमात्तु प्रमीतानां नैव का-
र्या सपिंडता। यदि माता यदि पिता भर्त्ता नैष विधिः स्मृतः। इति माधवीये स्कांदोक्तेर्व्युत्क्रममृतसपिंडीकरणाभावः
। पितृव्यादिविषयपर इत्याहुः। एष विधिर्निषेधरूपः। त्रिषु जीवत्सु विष्णुराह। त्रिषु जीवत्सु नेव कुर्यादिति। एतद्द-
र्शादिविषयं। नांदीश्राद्धं तु परेभ्यस्त्रिभ्यो भावत्येवेति कल्पतरुः। पृथ्वीचंद्रोदयस्तु दद्यात्त्रिभ्यः परेभ्यस्तु जीवेत्
त्रितयं यदीति मनूक्तेः सर्वत्र विकल्पः। स च देशाचाराद्व्यवतिष्ठत इत्याहुः। सुदर्शनभाष्ये तु मातृश्राद्धं जीवत्पित्रा-
दीनां व्युत्क्रममृतपित्रादीनां च कार्यमेवेत्युक्तं। मदनरत्ने क्रतुः। अष्टकादिषु संक्रांतौ मन्वादिषु युगादिषु। चंद्रसू-
र्यग्रहे पाते स्वेच्छया पूजयेत्पितॄन्। जीवत्पिता नैव कुर्याच्छ्राद्धं काम्यं तथाविधं। अन्ये विशेषाः श्रीपितृकृतजीवत्पि-
तृकनिर्णये भट्टकृतत्रिस्थलीसेतौ च ज्ञेयाः। इति भट्टकमलाकरकृते निर्णयसिंधौ जीवत्पित्रादिश्राद्धं। अथ एमः
विभक्ताविभक्तनिर्णयः। पृथ्वीचंद्रोदये मरीचिः। बहवः स्युर्यदा पुत्राः पितुरेकत्र वासिनः। सर्वेषां तु मतं कृत्वा ज्येष्ठे

नैवल्यकृतां द्रव्येणचाविभक्तेनसर्वैरेवकृतंभवेत् । ज्येष्ठस्यकर्तृत्वेपि सर्वैफलभागिन इत्यर्थः । तेनयेब्रह्मचर्यादिनि
यमास्ते फलसंस्कारत्वात्सर्वैःकार्याः । एवं संसृष्टिनामपितुल्यत्वात् । मिताक्षरायांनारदः । भ्रातॄणामविभक्तानां
मेकोधर्मःप्रवर्त्तते । विभागेसतिसर्वेषांधर्मोविस्यात्पृथकपृथक् । बृहस्पतिरपि । एकपाकेनवसतां पितृदेवद्विजा
नां । एकंभवेद्विभक्तानांतदेवस्याद्गृहेगृहे । अत्रयद्यपिविशेषश्रवणात् । ब्रह्मयज्ञसंध्यादिष्वप्यविभक्तानांपृथ
ङ्निषेधःप्राप्नोति तथापिद्रव्यसाध्याश्राद्धवैश्वदेवादिष्वेवसः । द्रव्यस्यानेकस्वामिकत्वेनैकस्यव्ययेनाधिकारात् ।
यानितुद्रव्यासाध्यानिमंत्रोपवाससंध्याब्रह्मयज्ञपारायणादीनि नित्यनैमित्तिककाम्यानितेषुपृथगेवाधिकारः
द्रव्यव्ययाभावेनुमत्यनपेक्षणात् द्रव्येणचाविभक्तेनेत्यस्याविषयत्वात् । पृथगप्येकपाकानांब्रह्मयज्ञो द्विज
न्मनां । अग्निहोत्रंसुरार्चा च संध्यानित्यंभवेत्तथेति । प्रयोगपारिजाते आश्वलायनोक्तेश्च । अग्निहोत्रशब्दोग्निसा
ध्यश्रौतस्मार्त्तनित्यकर्मपरः । तेष्वप्यन्यानुमत्यैवाधिकारेऽन्यायसाम्यात् । पितृश्राद्धादिषु तुल्यफलेषु नि
त्येष्वनुमतिं विनाप्येकस्याधिश । एकोपि स्थावरे कुर्याद्दानाधमनविक्रयं । आपत्कालेकुटुंबार्थेधर्मार्थेचवि
शेषतः । इतिवचनात् । धर्मार्थेवश्यकर्तव्ये पितृश्राद्धादाविति विज्ञानेश्वरः । केचित्तुविभक्तानामपिपृथक्पाक

३०४ लेदेशांतरेचदर्शिकाह्निकयोः पृथक्त्वमाहुः।भ्रातॄणामविभक्तानांपृथक्पाकोभवेद्यदि।वैश्वदेवादिकंश्राद्धंकुर्युस्ते
वैपृथक्पृथक्पृथक्।इतिहारीतोक्तेः।अविभक्तेनपुत्रेणापितृमेधोमृताहनि।देशांतरेपृथक्कार्योदर्शश्राद्धंतथैव
चेतियमोक्तेश्चेति।तत्रमूलंचिंत्यं।तदयमर्थः।पंचमहायज्ञमध्येदेवभूतपितृमनुष्ययज्ञानन्यानुमत्याज्येष्ठएव
कुर्यात्।होमाद्यदानरहितंनभोक्तव्यंकदाचन।अविभक्तेषुसंसृष्टेषुएकेनापिकृतंकृतमितिव्यासोक्तेश्च।यत्रतुज्ये
ष्ठेनाकृतेवैश्वदेवेन्ने।सिद्धेन्नेनतूष्णीमग्नौकिंचिद्दत्त्वाभोक्तव्यं।पस्पत्वेषामयतोन्नं।सिद्धोत्सनिपतमश्नोकृत्वाग्रंब्रा
ह्मणायदत्त्वाभुंजीतेत्यविभक्ताधिकारेपृथ्वीचंद्रोदयेगोभिलोक्तेः।आश्वलायनस्तुपाकपार्थक्येपृथक्त्वंतदेक
त्वेपृथक्त्वमाह।वसतामेकपाकेनविभक्तानामपिप्रभुः।एकस्तुचतुरोयज्ञान्कुर्याद्यागयज्ञपूर्वकान्।अविभक्ता
वापृथक्पाका।द्विजातयःकुर्युःपृथक्पृथक्यज्ञान्भोजनात्प्रागदिनेदिनेइति।ब्रह्मयज्ञसंध्यास्नानतर्पणादी
ष्वुक्तहेतोःपृथगेवदेवपूजातूक्तवचनद्वयादेकत्रपृथग्वादर्शग्रहणश्राद्धादित्वेकस्यैव।तीर्थश्राद्धमपिपु
गपत्सर्वेषामविभक्तानांप्राशनिकस्यैव।भेदेनप्राप्तौभिन्नं।गयाश्राद्धमपिपुत्राण्येवं।एष्टव्याबहवःपुत्राःशीलवंतोगुणान्विताः।तेषांतुसमवेतानांयद्येकोपिगयांव्रजेत्।तारिताःस्मोवयंतेनसयातिपरमांगतिमितिहेमाद्रौ एमः

कौर्मोक्तेः। काम्ये तु पिद्दानहे माद्दीवन्यानुमत्येवा। विकारः। द्रव्याभावध्यजपा होतां विनापि अपरार्के पैठीनसिः। वि
भक्तैस्तु पृथक्कार्यं प्रति संवत्सरादिक। एकेनैवाविभक्तेषु कृते सर्वैस्तु तत्कृतं। सांवत्सरात्पूर्वो। त्रिमासिकान्ये
कत्रैव। तदाह लघुहारीतः। सपिंडीकरणांतानि यानि श्राद्धानि षोडश। पृथङ्नैव सुताः कुर्युः पृथग्द्रव्या अपि क्वचित्।
सपिंडने मासिकोपलक्षणं। अर्वाक्संवत्सराज्ज्येष्ठः श्राद्धं कुर्यात्समेत्यतु। ऊर्ध्वं सपिंडीकरणात्सर्वैः कुर्युः पृथक्पृथ
क्पृथक्। इति व्यासोक्तेः। उशनाः। नवश्राद्धं सपिंडत्वं श्राद्धान्यपि च षोडश। एकेनैव तु कार्याणि संविभक्तधनेष्वपि
मघात्रयोदशीश्राद्धं त्वविभक्तानामपि पृथगित्युक्तं प्राक्। यत्तु वृद्धवसिष्ठः। मासिकं च वृषोत्सर्गं सापिंडीकरणांत
था। ज्येष्ठेनैव प्रकर्त्तव्यं माद्विकं प्रथमं तथेति। तन्निर्मूलं बह्वृचपरिशिष्टे न च श्राद्धसंग्रहेषु। अथ तीर्थश्राद्धं।।
तत्र यद्यप्येतस्मात्पितामहकृतत्रिस्थलीसेतुरेव ज्ञागान्निति यापि किंचिदुच्यते। तत्र यात्रायां। सहा। त्रिर्वा स
पत्नीको गच्छेत्तीर्थानि संयतः। प्रायश्चित्ती व्रजेत्तीर्थे पत्नीविरहितोपि वा। यज्ञेष्वनधिकारी वा यश्च वा मंत्रसा
धकः। इति कौमाद्विषमात्साग्निः सपत्नीकस्यैवाधिकारः। भारते। ब्राह्मणः क्षत्रियो वैश्यः शूद्रो वा राजसत्तम। न
वियोनिं व्रजंत्येते स्नातास्तीर्थे महात्मनः। स्कांदे। विधवाधर्मेषु। स्नानं दानं तीर्थयात्रां विष्णोर्नामग्रहं मुहुः। एत

सुताद्यनुमत्यैव विधवायाः सधवायाः पत्या सहैवेति प्रागुक्तं काशीखंडे। मातुःपितुःस्नेहमनास्तथाच्छि सुतस्तकु
र्यात्तवलुतीर्थयात्रां॥ तद्विधिः स्कांदे॥ तीर्थयात्रां चिकीर्षुः प्राग्विधायोपोषणं गृहे। गणेशं च पितॄन्विप्रान्साधू
न्शक्त्या प्रपूज्य च। कृतपारणको हृष्टो गच्छेन्नियमधृक् पुनः। आगत्याभ्यर्च्य च पितॄन्यथोक्तफलभाग्भवे
त्। उपवासात्प्राङ्मुंडनं च कार्यं। प्रयागे तीर्थयात्रायां पितृमातृवियोगतः। कचानां वपनं कार्यं वृथा न विकचो भ
वेत्। इति विष्णूक्तेः। प्रायश्चित्तार्थयात्रायां गयायां चैतं द्विस्येको। केचित्तु हेमाद्रौ महाभारते। केशश्मश्रुनखादी
नां वपनं न च शस्यते। अतो न कार्यं वपनं गयाश्राद्धार्थिना सदा। ये भारतेऽस्मिन्न पितृकर्मतत्पराः संधार्यकेशा
न तिभक्तिभाविताः॥ न शास्त्रयार्थ्ये पितृतीर्थमागतास्तेषामृणं संक्षयमेष्यति ध्रुवं॥ इति निषेधात्तु यात्रांगं
वपनं न कार्यमित्याहुः। वस्तुतस्तु गयाधिकरणकस्यैवायं निषेधः। ननु यात्रांगस्य श्राद्धार्थिनेत्युक्तेः। विशालं
विरजं गयामित्यनेनैकवाक्यत्वाच्च श्राद्धं षण्मयद्वादशदैवतं वा घृतेन कार्यं। गच्छेद्देशांतरं यस्तु श्राद्धं कुर्यात्ससर्पिषे
ति विष्णुपुराणात्। यात्रांगवृद्धिश्राद्धोक्तेश्च श्राद्धं च पार्वणं दिन एव। उपोष्य रजनीमेकां प्रातः श्राद्धं विधाय च। गणे एमः
शं ब्राह्मणान्नत्वा भुक्त्वा प्रस्थितवान्सुधीः॥ इति स्कांदलिंगात्। गौडनिबंधे गौतमः। तीर्थयात्रासमारंभे तीर्थात्प्रत्या

गमेपि चाह्निद्विःश्राद्धं प्रकुर्वत बहुसर्पिःसमन्वितं। ह्याह्निपदं तद्धर्मीयश्राद्धोत्तरं यात्रासंकल्प इति भट्टाः। वायवीये। उद्यत
स्तु गयां गंतुं श्राद्धं कृत्वा विधानतः। विधाय कार्पटीवेषं ग्रामं कृत्वा प्रदक्षिणां। ततो ग्रामांतरं गत्वा श्राद्धशेषस्य भोजनं।
घृतस्य भोजनं। तच्च क्रोशमध्ये। श्राद्धोत्तरं क्रोशगमननिषेधात्। ततः प्रतिदिनं गच्छेत्प्रतिग्रहविवर्जितः। गयायामे
वैतन्नान्यत्रेति केचित्। हेमाद्रिस्तु। गयायां श्राद्धदिन एव प्रस्थानं। तीर्थांतरे श्राद्धोत्तरदिने इत्याह। प्रभासखंडे। यश्चा
न्यं कारयेच्छक्त्या तीर्थयात्रां नरेश्वरः। स्वकीयद्रव्ययानाभ्यां तस्य पुण्यं चतुर्गुणं। यात्रामध्ये आशौचे ऽजासि वा शुद्धि
पर्यंतं स्थित्वा तदंते गच्छेत्। मार्गे वैषम्ये तु न दोषः। यात्रामध्ये तीर्थांतरप्राप्तौ श्राद्धादिकार्यं वा। वाशिऽस्यार्थं गतेन वा
।शीऽन्यार्थं गतेन मुंडनोपवासादि न कार्यं इति प्रयागसेतौ भट्टाः। वस्तुतस्तु तत्रापि मुंडनोपवासादि तीर्थप्राप्तौ श्रा
द्धादिकार्यं। अर्द्धं तीर्थफलं तस्य यः प्रसंगेन गच्छति। इति ब्राह्मोक्तेः। स्कांदे। द्विर्भोजनं तृतीयांशो हरेत्तीर्थफलस्य च।
वाणिज्यं त्रीस्तथा भागान्हंति सर्वं प्रतिग्रहः। यानमर्द्धं चतुर्थांशं छत्रोपानहमेव चेति। उत्तरार्द्धे पाठांतरं। अत्र न
दीषु विशेषः। मार्गांतरनदीप्राप्तौ स्नायादपरपारतः। अर्वागेव सरस्वत्या एष मार्गगतो विधिः। यत्तु। पितॄन तर्पयि
त्वा तु नदीं तरति यो नरः। तस्मात्स्नानकामास्ते भवंति भृशदुःखिताः। इति तत्सरस्वतीपरं। तीर्थप्राप्त्यानुषंगेन स्नानं

३०६

समाचरेत्।स्नानजंफलमाप्नोतितीर्थयात्राकृतंनतु।मत्स्यास्त्रवंतीमतिक्रामेद्दनवासिष्यतीर्थप्राप्तौतुप्रभासखंडे।पाना
नितुपरित्यज्यमाव्यंपादचारैर्नरैः।लुठित्वा।लोटिंनीतत्रकृत्वाकार्पटिकाकृतिं।कृत्वेति।निर्गमनसमये।कारणोदं।
प्रथमंचालयेत्तीर्थेप्रणवेनजलंशुचि।अवगाह्यततःस्नायाद्यावन्मंत्रप्रयोगतः।मंत्रश्चप्रभासखंडोक्तोज्ञेयः
स्तद्यथा।ॐनमोदेवदेवायशितिकंठायदंडिने।रुद्रायचापहस्तायचक्रिणेवेधसेनमः।सरस्वतीचसावित्रीवेदमाता
गरीयसी।सन्निधात्रीभवत्वत्रतीर्थेपापप्रणाशिनी।इति।मंत्रस्नानंचवपनोत्तरंकार्यंपूर्वमावाहनंतीर्थेमुंडनंतद
नंतरं।ततःस्नानादिकंकुर्यात्स्वशाखोक्तंसमाचरेत्।इत्युक्तेः।यत्तुगत्वास्नानंप्रकुर्वीतवपनंतदनंतरमिति।तन्मु
शलस्नानपरं।काशीखंडेतीर्थोपवासःकर्तव्यःशिरसोमुंडनंतथा।उपवासेतत्रैवोक्तं।यत्राह्नितीर्थप्राप्तिःस्यात्त
दह्नःपूर्ववासरे।उपवासःप्रकर्तव्यःप्राप्तेऽह्निश्राद्धमाचरेत्।अत्र।उपवासंततःकुर्यात्तस्मिन्नहनिसुव्रतइतिप्रा
प्तिदिनेप्युपवासोक्तेर्विकल्पः।मुंडनेतुस्कांदेदेवलो।मुंडनंचोपवासश्चसर्वतीर्थेष्वयंविधिः।वर्जयित्वाकुरुक्षेत्रंविशा
लंविरजंगयां।विरजंलोणारं।प्रसिद्धमहत्तीर्थपरःसर्वतीर्थशब्दः।अत्रविशेषःस्मृत्यंतरे।ऊर्ध्वंमहाद्विमासोनासुन एमः
स्तीर्थंव्रजेद्यदि।मुंडनंचोपवासंचततोयत्नेनकारयेत्।तदातद्वपनंप्रयुक्तंप्रायश्चित्तमृतेद्विजेतिपाठः।प्रयागेप्रतियात्रं

त्पोऽनन्तरयद्यप्यतोऽक्षौरं कृत्वा तु विधिवत्ततः स्नायात्सितासिते। अपरार्के स्कांदे। उदङ्मुखः प्राङ्मुखो वा वपनं कारयेत्सु
धीः। केशश्मश्रुलोमनखान्युदक्संस्थानि वापयेत्। इदं प्रयागे सधवानामपि समूलं भवति। इति भट्टाः। युक्तं तु। सर्वान्के
शान्समुद्धृत्य छेदयेदंगुलद्वयं। एवमेव हि नारीणां शस्यते वपनक्रियेति। तच्चाकृतचूडानां न कार्यं। इति केचित्। त
त्त्वं तु नैमित्तिकस्नातपित्रादिमृतिवत्कार्यमेवेति। तदपि प्रयागेऽन्यत्रात्। तच्च यतिभिस्तीर्थेऽप्यृतुसंधिष्वेव कार्यं नान्य
दा कक्षोपस्थशिखावर्ज्यं त्वृतुसंधिषु वापयेदिति स्मृतेः। इदं जीवत्पितृकेणापि तीर्थे कार्यं मच मुंडनं। पिंडदानं चेति
दक्षवचनेनैनिषेधः। विना यज्ञं मातापित्रोर्मृतिं विना यो वापयति लोमानि स पुत्रः पितृघातकः। इति स्मृत्यात
त्संकोचात्। तदपि प्रयागे प्रतियात्रं। अन्यतीर्थे आद्ययात्रायामेवेति शिष्टाः। ततः स्नानं। परार्थे तु मार्कंडेयपुरा
णे। मातरं पितरं जायां भ्रातरं सुहृदं गुरुं। यमुद्दिश्य निमज्जेत अष्टमांशं लभेत सः। पैठिनसिः। प्रतिकृतिं कुश
मयीं तीर्थवारिणि मज्जयेत्। मज्जयेच्च यमुद्दिश्य सोऽष्टभागं फलं लभेत्। ततस्तर्पणं श्राद्धे पृथ्वीचंद्रोदये। ब्रा
ह्मे देवीपुराणे काशीखंडादिषु। अकालेऽप्यथवा काले तीर्थे श्राद्धं च तर्पणं। अविलंबेन कर्तव्यं नैव विघ्नं समा
चरेत्। मात्स्ये पितृणां चैव तर्पणमिति तत्पर्यपादः। तत्र देवतामहालयनिर्णये प्रागुक्ताः। शंखदेवलौ। तीर्थे द्रव्योपप

३०१ तींचनकालमवधारयेत।पात्रंचब्राह्मणंप्राप्यसद्यःश्राद्धंसमाचरेत।हारीतः।दिवावायदिवारात्रौभुक्तेचोपोषितेपिवा।
नकालनियमस्तत्रगंगांप्राप्यसरिद्वरां।भारते।भुक्तोवाप्यथवाभुक्तोरात्रौवायदिवादिवा।पर्वकालेप्यकालेवाशुचि
र्वाप्यथवाशुचिः।यदैवदृश्यतेतत्रनदीचित्रपथाप्रिया।प्रमाणंदर्शनंतस्यानकालस्तत्रकारणं।आशौचेपिकार्यं।विवा
हदुर्गयज्ञेषुयात्रायांतीर्थकर्मणि।नतत्रसूतकंतत्रकर्मयज्ञादिकारयेदितिपैठीनसिस्मृतेः।तदानीमकरणेत्वाशौ
चांतएवकुर्यात।प्रभासखंडे।नवारंनचनक्षत्रंनकालस्तत्रकारणं।यदैवदृश्यतेतीर्थंसर्वसहस्त्रकं।मलमासेपिका
र्यं।नित्यनैमित्तिकेकुर्यात्प्रयतःसन्मलिम्लुचे।तीर्थश्राद्धंगजच्छायांप्रेतश्राद्धंतथैवच।इतिबृहस्पतिस्मृतेः।एतच्चा
शौचेकृतभोजनस्यरात्रौवास्नानश्राद्धादिकंमाकस्मिकतीर्थप्राप्तावामहेमश्राद्धविषयंग्रहणादिवत।नतुबुद्धि
पूर्वमाशौचादौतीर्थप्राप्तिःकार्या।मलमासेतुमासद्वयेतीर्थश्राद्धंकार्यंइतिचंद्रिकायां।देवीपुराणे।श्राद्धंचतत्र
कर्तव्यमर्घ्यावाहनवर्जितं।हेमाद्रौ।अर्घ्यमावाहनंचैवद्विजांगुष्ठनिवेशनं।तृप्तिप्रश्नंचविकरंतीर्थश्राद्धेविवर्जये
त।भविष्ये।आवाहनंविसृष्टिश्चतत्रतेषांनविद्यते।आवाहनंनतीर्थेस्यांन्नार्घ्यप्रदानंतथाभवेत।आहूताःपित
रस्तीर्थंकृतार्घ्याःसंतिवैयतः।अग्नौकरणंनचेतिरत्नावल्यां।अत्रषड्दैवत्येपिश्राद्धेमात्रादीनांपिंडमात्रंदेयंहविः

एमः

क्तेः॥ पराशरः॥ जातौ विप्रो दशाहेन द्वादशाहेन भूमिपः॥ वैश्यः पंचदशाहेन शूद्रो मासेन शुध्यति। संवर्त्तः॥ जाते पुत्रे पितुः स्नानं सचैलं तु विधीयते। माता शुध्येद्दशाहेन स्नानात्तु स्पर्शनं पितुः॥ पुत्रपदात्तकन्योत्पत्तौ न पितुः स्नानमिति। हारलतायां। तत्र पुत्रपदस्य पौत्रीमातामहस्तेनेति कन्यायामपि प्रयोगात्। यच्च तत्रैवोक्तं। सूतके तु मुखं दृष्ट्वा जातस्य जनकस्ततः। कृत्वा सचैलं स्नानं तु शुद्धो भवति तत्क्षणात्। इत्यादिपुराणान्मुखदर्शनोत्तरमेव पितुः स्नानमिति। तन्न। विदेशे मुखदर्शनावध्यस्वतापत्तेः। मुखदर्शनोत्तरं पुनः स्नानार्थमिति स्मार्त्तगौडः। तन्न। मूलैक्वे न स्नानमात्रपरत्वात्। इदं सर्ववर्णसमं। सूतिका सर्ववर्णेषु दशरात्रेण शुध्यति। ऋतौ च न पृथक्शौचं सर्ववर्णेष्वयं विधिरिति हारलतायां। प्रचेतसोक्तेः। यत्तु। ब्राह्मणी क्षत्रिया वैश्या प्रसूता दशभिर्दिनैः। गतैः शूद्रा च संस्पृश्या त्रयोदशभिरेव चेति। प्रयोगपारिजाते पारस्करः। द्विजातेः सूतिका या तु सा दशाहेन शुध्यति। त्रयोदशेऽह्नि संप्राप्ते शूद्राः शुध्यंत्यसंशयः। तदस्पृश्यत्वपरं। अंगिराः। सूतके सूतिकावर्जं संस्पर्शो न निषिध्यते। संस्पर्शे सूतिकायास्तु स्नानमेव विधीयते। नाशौचं सूतके पुंसः संसर्गं चेन्न गच्छति। रजस्तत्राशुचि विज्ञेयं तच्च पुंसि न विद्यते। संसर्गो मैथुनं। स्पर्शस्त्वन्ये। मातुरेव सूतकं तां स्पृशतश्चेति हारलतायां समतत्वोक्तेः। तन्न। संस्पर्शे सूतिकायास्तु स्नानमेव विधीयते।

इति स्नानमात्रोक्तेः। सोमं तस्य स्नानपर्यंतमस्पृश्यमात्रबोधकत्वात्। एवकारो बालस्पृश्यत्वार्थः। याज्ञवल्क्यः। यत्नीः सह
सपिंडेष्वपि प्रकुर्याच्छयनासनं। बांधवो वा परो वापि स दशाहेन शुध्यतीति। बृहस्पतिस्मृतेः। शयनासनादिरूपं संसर्गमा
हुः। पराशरः। यदि पत्न्यां प्रसूतायां द्विजः संपर्कमृच्छति। सूतकं तु भवेत्तस्य यदि विप्रः षडंगवित्। पितृवत्सापत्नमाहुः।
प्राक्स्नानाद स्पृश्यत्वं। सूतिकास्पर्शे तु प्राग्वदाशौचं। अन्याश्च मातरस्तद्वत्तद्गृहं न व्रजंति चेत्। इति ब्राह्मोक्तेरिति। शु
द्धितत्वादयः। तद्गृहं गत्वा यदि सूतिकां न स्पृशंति तदाऽस्पृश्याः। अन्यथा नेति तस्यार्थः। कर्मानधिकारमाह। पैठी
नसिः। सूतिकां पुत्रवतीं विंशतिरात्रेण कर्माणि कारयेत्। मासेन स्त्रीजननीं। एतच्च सोमयागादिश्रौतभिन्नपरं सूत्रा
तापाश्च दशरात्रादूर्ध्वं स्नानादीति कातीयसूत्रात्। व्यासः। प्रथमे दिवसे षष्ठे दशमे चैव सर्वदा। त्रिष्वेतेषु न कुर्वत
सूतकं पुत्रजन्मनि। पुत्रशब्दोऽपत्यमात्रपरः। ब्राह्मे देवाश्च पितरश्चैव पुत्रे जाते द्विजन्मनां। आयांतीति तस्मात्तदहः पु
ण्यं षष्ठं सर्वदा जनने विशेषः। प्रागुक्तेः। अत्र प्रयोगः। परिजातस्य पुंप्रसवे दशाहः स्त्र्यपत्ये तु त्र्यहः। पुंजन्मनि सपिं
डानां दशाहाशुद्धिरिष्यते। त्र्यहादेकोदकानां च एकाहं सूतकं क्वचित्। स्त्रीजन्मनि सपिंडानां सोदकानां त्र्यहाच्छुद्धिः एमः
स्त्रीषु पुरुषवत्तेये सपिंडत्वं द्विजोत्तमाः इत्यग्निस्मृतेरित्याह। त्रिपुरुषसापिंड्यस्य कानीनकन्यापरत्वमाहुः। अप्र

त्तानां तथा स्त्रीणां सापिंड्यं सप्तपौरुषं। प्रत्तानां भर्तृसापिंड्यं प्राह देवः प्रजापतिरिति कौर्म्यपुराणात्॥ अथ मृताशौचं॥
हारीतः। जातमृते मृतजाते वा सपिंडानां दशाहमिति। दशाहमिति स्वाशौचपरं। जातमृते नालछेदोर्ध्वं। यावन्न छिद्य
ते नालं तावन्नाप्नोति सूतकं। छिन्ने नाले ततः पश्चात्सूतकं तु विधीयते। इति जैमिन्युक्तेः। नाड्यां छिन्नायां आशौच
मिति हारीतोक्तेश्च। प्राग्घातुः स्पर्शेपि न दोषः। इति शुद्धितत्वोक्तेः। परासृता। नाभिछेदात्प्राङ्मृते तोलहहत्मनुः। जी
वन्जातो यदि ततो मृतः सूतक एव तु। सूतकं सकलं मातुः पित्रादीनां त्रिरात्रकं॥ इदं च प्रसवाशौचमेव शावनिमि
त्तं स्नानमस्यैव। प्राङ्नामकरणात्सद्यः शौचमिति शंखोक्तेः। अत्र कश्चिदाह। नामकरणमाशौचांतकालोपलक्षणं। आ
शौचव्यपगमे नामधेयमिति विष्णूक्तेः। आशौचे व्यतिक्रांते नामकर्म विधीयते। इति शंखोक्तेश्च। नाम्नो नियत
कालत्वात्। न च नामधेयं दकालत्वं। दशम्यामतीतायां विशम्यां तु द्वादश्यां वापि कारयेत्। पुण्ये तिथौ मुहूर्ते वा न
क्षत्रे वा गुणान्विते। इति मनूक्तेरनियतकालत्वात्। दशम्यामतीतायां विप्राद्वादश्यामतीतायां क्षत्रियावैश्यः षो
डशे शूद्रः एकविंश इत्यपि ज्ञेयं। पुण्य इत्याद्यनुकल्पः। तेन नाम्नः कालोपलक्षणं। एवं दंतजननेपि। दंतजन्म
सप्तमे मासि इत्युपानेषदिति नियतकालत्वात्। चौले तु न कालोपलक्षणं। प्रथमेब्दे तृतीये वा कर्तव्यं श्रुतिचोद

३१० नात्। इति मनूक्तेः। ततः संवत्सरे पूर्णे चूडाकरणमिष्यते। विं द्वितीये वा तृतीये वा कर्तव्यं स्मृतिदर्शनात् इति यमोक्तेश्च। श्रुतत्वा
न्नियतकालत्वादिति। तन्मंदं। चौलवन्नामदंतजननयोरपि स्वरूपेणानिमित्तत्वोपपत्तेः। तद्विशिष्टकालानुवादे वाक्य
भेदात्। न प्रथममासादर्वाक्कृतं तज्जनने तदभावप्रसंगाच्च। यत्तूपनिषद्दर्शनेनानिर्णयकुर्यात्तिन्नूनं। शृणुतायुः पुरु
ष इति श्रुतेर्वाक्। पितृमरणे तदंत्यकर्मापि त्यजेत। ननु कानुपलक्षणानामोत्कर्षे तदभावे वा स्नानमात्राच्छुद्धिः
स्यात्। ततः किं। अमृता। अत एवोक्तं। आदंतजन्मनः सद्यः इति सा च विष्णुवचनाद्दाहभावविषये इति वक्ष्यामः। त्रिवर्षाद्दा
वपि स्यादिति चेत्तन्न दाहदंतानिमित्तौर्वशौचाशौचैः पूर्वस्य बाधात्। तदुक्तं। पूर्वाव्याधेन नोत्पत्तेरुत्तरस्य हि सिद्धता
तो। जननाद्दशरात्रे तु षष्ठे शतरात्रे संवत्सरे चेति पारिशिष्टे द्वादश्यामपरेण्यां मासे पूर्णे तथापरे। अष्टादशेऽहनि त
थावदन्त्ये मनीषिणः इति। भविष्ये च। नाम्नः कालनियमाच्च। न च प्राथम्याद्दशरात्रेतीते इति मुख्यः कालः। अन्यस्त्व
नुकल्पः इति वाच्यं। चौलेपि तथापत्तेः। न च दंतकालानुपलक्षणे सदंतजातमृतस्य दाहैकाहप्रसंगः। दशाहेन
बाधात्। नामकरणोत्तरमेव दाहप्रवृत्तेः। दशाभ्यंतरतो बाले प्रमीते तस्य बांधवैः। शावाशौचे न कर्तव्यं सूत्याशौ एम
चं विधीयते। इति वृहन्मनूक्तेश्च। आशौचं च दाहोपलक्षणं। सूतकवदिति पारस्करोक्तेः। यत्तु विष्णुः। अनिवृत्ते दश

हेतुपंचत्वं यदि गच्छति। सद्य एव विशुद्धिः स्यान्न प्रेतं तोदकक्रियेति। तदंतेतरदपि प्रेताशौचनिषेधार्थं। ननु सद्य स्त्वपरं। वा
क्यभेदात। किंच नामकरणात प्राकमृतस्य स्नानं। तदुक्तं लेकाहादि। नामकाले लेकादशाहे मृतस्य न किमपि स्यात।
अथ शंखवचनेक्य ज्ञोपे पंचमी। तदाग्रागिति नोपपद्यते। नाम्निवापि कृते सतीति मन्वादिविरोधात्कृत नाम्न इति मा
धवमितात्ग्रहणादिविरोधाच्च नकालोपलक्षणं व्यापीति दिक्। नाम्न उत्तरं दंतोत्पत्तेः प्राक्दाहे सत्यहः। अदंतजाते
तनयोशिशौ गर्भस्रुते तथा। सपिंडानां तु सर्वेषामहोरात्रमशौचकमिति यमोक्तेः। दाहाभावे तु स्नानमात्रं। अदंतजा
ते प्रेते सद्य एव नास्याग्निसंस्कार इति विष्णुना दाहाभावे तदुक्तेः॥ आदंतजननात्सद्यः इति याज्ञवल्कीयाच्चादाह
विकल्पं चाह लौगाक्षिः। तूष्णीमेवोदकं कुर्यात्तूष्णीं संस्कारमेव च। सर्वेषां कृतचूडानामन्यत्रापीच्छया द्वयं। अ
न्यत्राकृतचूडे। अत्र चूडाकरणं तृतीयवर्षरूपकालोपलक्षणार्थमिति मेधातिथिहरदत्तौ॥ मनुरपि नात्रिवर्ष
स्य कर्त्तव्या बांधवैरुदकक्रिया। जातदंतस्य वा कुर्युर्नाम्निवापि कृते सतीति वैउदकं दाहोपलक्षणं। र्थं। दंतोत्प
त्यनंतरं प्राक्। त्रिवर्षात्तात्मृते हः। दंतजातेप्यकृतचूडे त्वहोरात्रेवाशुद्धिरिति विष्णूक्तेः॥ त्रिवर्षोर्ध्वं कृतचूडेऽकृतचू
डे वा प्रागुपनयनात्र्यहः। यद्यप्यकृतचूडो वै जातदंतस्तु संस्थितः। तथापि दाहयित्वैनमाशौचं त्र्यहमाचरेत। इत्यंगिर

३११ सोक्तेः। अत्राजातदंतत्वमुद्देश्यविशेषणत्वादविवक्षितं दाहयितेत्यनुवादः। उभयविधौ वाक्यभेदात्। त्रिवर्षात्प्राक् चूडाभा
वेपि दाहे त्र्यहस्तदभावे विष्णूक्तेरेकाह इ माधवः। शुद्धितत्वादयो गौडास्तु। अजातदंतमरणे पित्रोरेकाहमिच्छंतो दंतजा
ते त्रिरात्रं स्याद्यदि स्यातां तु निर्गुणौ। इति कौर्म्योस्तु काश्यपः शूद्रपरं। अनूढानां तु कन्यानां तथा वै शूद्रजन्मनामिति त्र्य
हानुवृत्तौ शंखोक्तेः। त्रिरात्रं तु भवेच्छूद्रे षण्मासेपि शिशौ मृते इति मत्स्योक्ताच्च दंते जाते तु शूद्रे पंचाहः। पर्थ्यागिराः।
शूद्रे त्रिवर्षोह्रने तु मृते शुद्धिस्तु पंचभिः। अत ऊर्ध्वं मृते शूद्रे द्वादशाहो विधीयते। वर्षांतमतीतो यः शूद्रः संम्रिय
ते यदि मासिकं तु भवेच्छौचमित्यंगिरसभाषितमिति। यत्त्वनूढभार्यशूद्रास्वाति शावोक्तं मासाशौचं तत्सगुण
शूद्रपरं। निर्गुणे त्वनूढभार्ये शूद्रे त्रिवर्षोर्ध्वं द्वादशाहः। षड्वर्षोर्ध्वं मासः। षड्वर्षात्प्रागपि कृतोद्वाहे मास इत्याहुः।
एतत्तुल्यं वयसि सर्वेषामिति विरोधाच्छिष्टविगीतत्वादनादर्तव्यमिति विज्ञानेश्वरादयः। दाक्षिणात्यानां तथैव। अन्य
देशेप्यनुक्तमिति गौडाः। एवं कन्यास्वपि। तास्वप्यजातदंतासु पित्रोरेकरात्रमिति माधवः। यत्तु विज्ञानेश्वरेणोक्तं। प्र णपः
थमवर्षात्प्रागकृतचूडस्य मरणे त्र्यहः। निवृत्तचूडकानां च त्रिरात्राच्छुद्धिरिष्यते। इति मनूक्तेः। एतत्सर्वं प्रागुक्तासपिंडानां
मातापित्रोस्तु दशाहोर्ध्वं त्रिरात्रं। बालानामजातदंतानां त्रिरात्रेण शुद्धिरिति कश्यपोक्तेः। वैजिकादभिसंधानादनुरुध्या

द्घं त्र्यहमिति मनूक्तेश्चाजनद्विवर्षमुभयोः सूतकं मातुरेव हि। इति याज्ञवल्क्योक्तेः। गर्भस्थे प्रेते मातुर्दशाहं जाते तूभयोः
कृते नाम्नि सोदराणां चेति पैङ्ग्योक्तेश्च। यत्तु विज्ञानेश्वरेणोक्तं सोदराणां च पित्रोर्दशाहमस्पृश्यत्वमिति। तन्नेदानीं
प्रचरति। अत एव स्मृत्यर्थसारे। तन्नाहृतं कन्यासु चौलात्प्राक्मृतौ स्नानं। अचूडायां तु कन्यायां सद्यःशौचं विधीयते।
इत्यापस्तंबोक्तेः। इदं त्रिपुरुषमध्ये। अप्रत्तानां तु स्त्रीणां त्रिपुरुषी विज्ञायते इति वसिष्ठोक्तेः। इदं वाग्दानोत्तरमिति
गौडाः। अप्रत्तानां तथा स्त्रीणां सापिंड्यं साप्तपौरुषमिति वचनात्। चौलोत्तरं वाग्दानात्पूर्वं तत्रैकाहः। अविशेषेण
वर्णानामर्वाक्तं स्कारकर्मणः। त्रिरात्रात्तु भवेच्छुद्धिः कन्यासु ह्वा विधीयते। इत्यंगिरसोक्तं त्रिरात्रं विषयेऽह्नो विधा
नात्। अतः शूद्रस्योपनयनस्थानीयविवाहात्पूर्वं त्रिरात्रं विवाहोत्कर्षे तु षोडशाब्दमध्ये त्रिरात्रमेवेत्यपरार्कादयः। शूद्रे निर्गुणेऽष्टोर्ध्वं पंचाहः। षडब्दोर्ध्वं विवाहाभावे द्वादशाहः। इति गौडाः। सगुणानां तु षोडशाब्दोर्ध्वं विवाहाभावे
ऽपि पूर्णमाशौचं वक्ष्यते। तदुत्तरं प्राग्विवाहात्भर्तृकुले पितृकुले च सप्तपुरुषावधि त्रिरात्रं। अवारिपूर्वं प्रत्तास्तु या
नैव प्रतिपादिताः। असंस्कृतास्ता विज्ञेयास्त्रिरात्रमुभयोः स्मृतमिति मरीच्युक्तेः। रत्नाकरे शुद्धितत्त्वे च शंखः। पितृवे
श्मनि या नारी रजः पश्यत्यसंस्कृता॥ तस्यां मृतायां नाशौचं कदाचिदपि शाम्यति यावज्जीवमाशौचमिति वाचस्प

तिमिश्राः॥ अथानुपनीते किंचिदुच्यते। नाम्नः पूर्वं खननमेव॥ तदूर्ध्वं वर्षत्रयात्पूर्वं चौलाभावेप्युदकदाने विकल्पः॥न्या त्रिवर्षस्य
कर्त्तव्या बांधवैरुदकक्रिया॥ जातदंतस्य वा कुर्युर्नाम्नि वापि कृते सतीति मनूक्तेः॥ उदकक्रियासाहचर्याद्दाहोपलक्षणं।
खनने तु नान्यदौर्ध्वदेहिकं। ऊनद्विवर्षं निखनेन्न कुर्यादुदकं ततः इति याज्ञवल्क्योक्तेः। उदकमंत्यकर्म परमित्यपरार्कः।
यमः। ऊनद्विवार्षिकं प्रेतं घृताक्तं निखनेद्भुवि। यमगाथां गायमानो यमसूक्तमनुस्मरन्। माधवयो ब्राह्मणेपि। स्त्रीणां त
पतितो गर्भः सद्योजातो मृतोथवा। अजातदंतो मासैर्वा मृतः षड्भिर्गतैर्बहिः। वस्त्राद्यैर्भूषितं कृत्वा निक्षिपेत्तं तु काष्ठवत्।
खनित्वा शनकैर्भूमौ सद्यःशौचं विधीयते। अलंकरणमपि वस्यते। कृतचूडस्य तु त्रिवर्षात्प्रागूर्ध्वं वाप्युदकदानं नि
यतं। यत्तु वासिष्ठः। ऊनद्विवर्षे प्रेते गर्भपतने वा सपिंडानां त्रिरात्रमिति तत्प्रथमाब्दचूडापरं। वर्षत्रयादूर्ध्वं अकृतचू
डस्यापि नियतं। वर्षत्रयोर्ध्वं उपनयनात्पूर्वं च तूष्णीं अप्युदकदानं। तूष्णीमेवोदकं दद्यात्तूष्णीं संस्कारमेव चेति पू
र्वोक्तलौगाक्षिस्मृतेः। पिंडदानमपि कार्यं। असंस्कृतानां भूमौ पिंडं दद्यात्संस्कृतानां कुशेष्विति प्राचेतसोक्तेः। उदक
दानं सपिंडैः कृतचूडस्येति गौतमोक्तेः। उदकग्रहणं ऊर्ध्वदेहिकपरमिति हरदत्तः। द्वादशाब्दात्सरादर्वाक् पौगंडम
णाचिरपि। प्रेतपिंडं बहिर्दद्याद्दर्भमंत्रविवर्जितमिति। एतदनुपनीतपरमिति विज्ञानेश्वरः। अत्र चूडैव पूर्वावधिः। पू

एमः

र्वाक्येषुतद्ग्रहणात्। उदकग्रहणस्योपलक्षणत्वाद्दाहःपूर्वावधिरितिकेचित्। द्वादशाहूत्सएरित्यनुपनीतद्विजानूढश्मू
द्रविषयं। अथाशौचेपिंडदानविधिमाहपारस्करः। प्रथमेदिवसेदेयास्त्रयःपिंडाःसमाहितैः। द्वितीयेचतुरोदद्यादस्थिसं
चयनंतथा। त्रीस्तुदद्यात्तृतीयेह्निवस्त्रादिक्षालयेत्ततइति। अत्रदेवयाज्ञिकनिबंधेविशेषः। शिशुरादंतजननाद्बालः
स्याद्यावदाशिखं। कथ्यतेसर्वशास्त्रेषुकुमारोमौंजिबंधनात्। आपंचवर्षात्कौमारःपोगंडोनवहायनः। तथा। गर्भेनष्टे
क्रियानास्तिदुग्धंदेयंशिशौमृते। पंचमेपायसंक्षीरंदद्याद्बालविपत्तितः। एकादशाहंद्वादशाहंवृषोत्सर्गविधिंविना।
तथा। यत्रप्रमीयतेबालस्तत्रप्रायःप्रदीयते। किंचित्समानवयसांसकृत्यान्नंयथाविधि। भक्ष्यंभोज्यंचदातव्यं
तथाचस्तुखभक्षिका। तद्वस्त्राणिप्रदेयानिसोपानत्कानितत्समे। कुमाराणांचबालानांभोजनंवस्त्रवेष्टपं।। यच्चो
पदीयतेबालस्तत्रद्विप्रायप्रदीयते। तथा। भूमिनिक्षेपणंबाले आवर्षद्वयमाशिखं। ततःपरंखगश्रेष्ठदेहदाहोवि
धीयते।। अचूडेपूर्वंखननंनिवृत्त्यर्थमावर्षद्वयमितिप्रागपिकृतचूडस्यतान्निवृत्त्यर्थमाशिषमिति। तथा। चूडा
कर्मणिसंजातेविपत्तिर्यदाभवेत्। सूतकांतेप्रकर्तव्यंवृषस्योत्सर्जनंतदा। तत्रदोहःकर्तव्यउदकंतत्रनि। त्रि
तं। आद्यानिषोडशापिस्युःसपिंडीकरणंविना। इदंपंचवर्षोत्तरंजन्मतःपंचवर्षोणभुंक्तेदत्तमसंस्कृतं। पंचवर्षा

३१३ धिके प्रेते विपत्तिर्यदि जायते। वृषोत्सर्गादिकं कर्म सपिंडीकरणं विना। अहन्यहनि संप्राप्ते कुर्याच्छ्राद्धानि षोडश। पापसे
नगुडेनैव पिंडं दद्याद्यथाक्रमं। उदकुंभप्रदानं च पददानानि यानि च॥ दीपदानादि यत्किंचित्पंचवर्षाधिके सदा। क
र्तव्यं तु खगश्रेष्ठ व्रतार्वाक्प्रेतसंक्षये स्वधाकारेणैव कार्याण्येकोद्दिष्टानि षोडश। जुज्जुद्भैस्तिलैः शुक्लैः प्राचीनावी
तिना तथेति तत्रैवोक्तेः॥ वार्षिकादि तु न भवत्येव। सपिंडनाभावे पितृत्वायोग्यात्। दिवोदासीये। अव्रते निधनं प्राप्ते
विप्रादौ शूद्रजातिवत्॥ क्रियाः सर्वाः समुद्दिष्टाः सपिंडीकरणं विना॥ उदकं पिंडदानं च कृतचूडे विधीयते। स्त्रीणां
तूढाहात्प्रागुदकदपिंडदानविकल्पः॥ स्त्रीणां चैके प्रत्तानामिति गौतमोक्तेः। स्त्रीशूद्रास्तु सधर्माणः इति वचना
त्। शूद्रेप्येवं। एतद्द्वयोर्निमित्ताशौचं सर्ववर्णसमं। तुल्यं वयसि सर्वेषां मातिक्रांतं तथैव चेति व्याघ्रपादोक्तेः। यानि
तु॥ निवृत्तचूडके विप्रे त्रिरात्राच्छुद्धिरिष्यते। निवृत्ते क्षत्रिये षड्भिर्वैश्ये नवभिरुच्यते। शूद्रे त्रिवर्षन्यूने तु मृते शुद्धिस्तु
पंचभिः। अत ऊर्ध्वं मृते शूद्रे द्वादशाहो विधीयते। षड्वर्षांतमतीते च शूद्रे मासमशौचकमित्यां॥ गीरसादीनि। तानि शि
ष्टविगाहनान्नादत्तव्यानीति विज्ञानेश्वरमदनपारिजातादयः। तेनैतद्दशाद्ध शूद्राणां व्यवस्था प्रागुक्ता। हेयैव वा। तुल्यं एमः
वयसि सर्वेषामिति दाक्षिणात्यपरं। अन्यदेशे कौमारोक्ता व्यवस्थेति शुद्धितत्त्वे। अथ जाताशौचं। तत्राद्विजपुंसामुपनय

नोर्द्ध्वंप्रवर्त्तेत । त्रिरात्रमाव्रतादेशाद्दशरात्रमतःपरं । क्षत्रस्यद्वादशाहानि । विशःपंचदशैवतु । त्रिंशद्दिनानिशूद्रस्यतदर्द्धं
न्यायवर्त्तिनइतियाज्ञवल्क्योक्तेः ॥ यत्तुसएव । त्रिशत्रंदशरात्रंवाशावमाशौचमिष्यते । इत्याद्युक्तः ॥ तत्रदशाहेत्रिरात्रम
स्पृश्यत्वं । एकदिनोत्पन्नाशौचद्वयेदशाहमस्पृश्यत्वं । मरणंयदितुल्यंस्यान्मरणेनकथंचन । अस्पृश्यत्वंभवेद्गो
त्रंसर्वमेवसबांधवमित्यंगिरसोक्तेः दशाहाशौचपरत्वेदशरात्रमतःपरमित्यनेनपौनरुक्त्यापत्तिरितिशुद्धिविवेकः ।
यस्तुपुत्रानध्याप्यवृत्तिंविदधातितत्राहाश्वलायनः ॥ द्वादशरात्रंमहागुरुषुदानाध्ययनेवर्जयेरन्निति । शुद्धित
त्त्वेतु । त्रयःपुरुषस्यातिगुरवोभवंतिमातापिताचार्यश्चेतिविष्णूक्तेः । पित्रादयोमहागुरवः । भर्त्ताप्युक्तोरामायणे
पतिर्बंधुर्गतिर्भर्त्तादैवतंगुरुरेवच । शातातपः । पतिरेकोगुरुःस्त्रीणांसर्वस्याभ्यागतोगुरुः ॥ एकपदंमूढानांपित
मात्रनिषेधार्थं । सोदकानांत्रिरात्रंस्यात्त्र्यहात्तूदकदायिनां । इतिमनूक्तेः ॥ अग्निपुराणे । सपिंडतातुपुरुषेसप्तमेविनि
वर्त्तते । समानोदकभावस्तुनिवर्त्तेतचतुर्दशे । जन्मनामस्मृतेवैकेतत्परंगोत्रमुच्यते । बृहस्पतिः । दशाहेनसपिंडास्तु
शुद्ध्यंतिप्रेतसूतके । त्रिरात्रेणसकुल्यास्तुस्नात्वाशुद्ध्यंतिगोत्रजाः ॥ स्त्रीशूद्रयोस्तुविवाहोर्द्ध्वंजात्याशौचं । वैवा
हिकोविधिःस्त्रीणामौपनायनिकःस्मृतः । इत्युक्तेः । तद्धर्मानंभर्त्तुरेवहि । स्वजात्युक्तमशौचंस्यान्मृतकेजातकेत

येति माधवीये ब्राह्मण्याश्च शूद्रस्य विवाहाभावे षोडशवर्षादूर्ध्वं मासः । अनूढभार्यः शूद्रस्तु षोडशाद्वत्सरात्परं मृत्युं
समधिगच्छेन्मासात्तस्माद्बांधवाः । शुद्धिं समधिगच्छंतीति नात्र कार्या विचारणेति । अपरार्के शंखोक्तेः । निर्णयामृ
तपारिज्ञातादौ तदन्यथोक्तं । हारीतः । आमौंजीबंधनाद्विप्रः क्षत्रियश्च धनुर्ग्रहात् । आप्रतोदग्रहाद्वैश्यः शूद्रो वस्त्र
द्वयग्रहात् । धनुःप्रक्षत्रियश्च धनुर्ग्रहात् । आप्रतोदग्रहाद्वैश्यः शूद्रो वस्त्रद्वयग्रहात् । धनुःप्रतोदावष्टमे ह्येद्वा
दशे ह्येव वस्त्रयुग्ममिति । मेधातिथिस्तु । त्रिरात्रमाव्रतादेशादित्यत्र व्रतं कालोपलक्षणार्थं । स च कालः स्वकीयः ।
सर्वेषां चाष्टमवर्षरूपः । तेन चतुर्णामपि वर्णानां उपनयनाभावेप्यष्टमादूर्ध्वं पूर्णमेवाशौचं । तत्रापि प्राग
ष्टमाच्छिशवः प्रोक्ताः इति स्मृत्यंतरादित्यूर्ध्वं संपूर्णमर्वाक्त्रिरात्रं येप्या षोडशाद्विवाहालाभमित्याहुस्तेषामष्ट
मादूर्ध्वं मास एव । ऊर्ध्वमष्टभ्यो वर्षेभ्यः शुद्धिः शूद्रस्य मासिकीति वचनात् इत्याहुः । हारलता शुद्धितत्वादिग्रंथेऽस्मिं
थेष्वप्येवं । अनुपनीतो विप्र इत्युक्तो म्रियते यत्र तत्र स्यादाशौचं त्र्यहमेव हि । द्विजन्मनामयं कालस्त्रयाणां लष
डहकर इत्यादित्यपुराणोक्तेरुपनयनकालोपलक्षणं । षडब्दं मासत्रयाधिकपरं । गर्भाष्टमेष्टमे वाब्दे इत्युक्तेः । पत्नुजा
बालः । व्रतचूडाद्विजानां च प्रतीतिषु यथाक्रमं । दशाहस्त्र्यहमेकाहः शूद्रस्यापि द्विनिर्गुणात् इति । द्विजादंता दंपतीसु

एम:

शेषंततोमुष्टिमात्रंपैकैकमादृतः।क्रमशः।पितृपत्नीनांपिंडनिर्वपणंचरेदिति।तीर्थोपक्रमेदेवलोक्तेरिति पृथ्वीचंद्रः।ततः
सामान्यंपिंडंदद्यात्।ततःपिंडमुपादायप्रह्वाविप्रः।संस्कृतस्यच।ज्ञातिवर्गस्यसर्वस्यसामान्यंपिंडमुत्सृजेत्।इतितेनैवोक्तेः।
पाद्मे।तीर्थश्राद्धंप्रकुर्वीतपक्वान्नेनविशेषतः।आमान्नेनहिरण्येनकंदमूलफलैरपि।पिंडद्रव्यादिदेवीपुराणेहेमाद्रौ
ब्राह्मेच।सक्तुभिःपिंडदानंचसंयावैःपायसेनवा।कर्त्तव्यमृषिभिःप्रोक्तंपिण्याकेनगुडेनवा।पिंडानांतीर्थेप्रक्षेपमप्स्वना
न्याप्रतिन्याप्रतिपत्तिरित्युक्तंप्राक्।एतच्चविधवयाकार्यंनसपुत्रयेत्युक्तंप्राक्।सपुत्रयानकर्त्तव्यंभर्त्तुःश्राद्धंकदाचने
तिस्मृतेश्च।अनुपनीतेनापिकार्यं।एतच्चानुपनीतोऽपिकुर्यात्सर्वेषुपर्वस्वितिपाद्मेतीर्थश्राद्धमुपक्रम्योक्तेः।एतज्जी
वत्पितृकेणापिकार्यमित्युक्तंप्राक्।पतिनानुनकार्यं।नकुर्यात्सूतकंभिक्षुः।श्राद्धपिंडोदकक्रियां।त्यक्तंसन्यासयो
गेनगृहधर्मादिकंव्रतं।गोत्रादिचरणंसर्वंपितृमातृकुलंधनमितिस्मृतेः।।गयायांतूक्तंवायवीये।दंडंप्रदर्शयेद्भिक्षुर्ग
यांगत्वानपिंडदः।दंडंसंस्पृष्ट्वाविष्णुपदेपितृभिःसहमुच्यते।।गयायांमुंडपृष्ठेचकूपेयूपेवटेतथा।।दंडंप्रदर्शयन्भिक्षुः
पितृभिःसहमुच्यते।कृत्यरत्ने।प्रभासखंडे।तीर्थेचेत्प्रतिगृह्णाति ब्राह्मणोवृत्तिकुंठबलः।दशांशमर्जितंतद्दद्याद्देवकु
र्वन्नहीयते।इतिविशेषांतराणिभट्टकृतत्रिस्थलीसेतौज्ञेयानीतिदिक्।।इतिश्रीभट्टकमलाकरकृतेनिर्णयसिं

३०८ धौतीर्थश्राद्धविधिः। अथाशौचं॥ नारायणात्मजश्रीमद्रामकृष्णस्य सूनुना। कमलाकरसंज्ञेनाशौचं निर्णीयतेऽधु
ना॥ मरीचिः। आचतुर्थाद्भवेत्स्राव पातः पंचमषष्ठयोः। अत ऊर्ध्वं प्रसूतिः स्याद्दशाहं सूतकं भवेत्। स्रावे मातुस्त्रिरात्रं स्या
त्सपिंडाशौचवर्जनं। पाते मातुर्यथामासं सपिंडानां दिनत्रयं। अत्र सर्वत्र मूलं मिताक्षरायां ज्ञेयं। अत्र मासत्रये त्रिरा
त्रस्यानुवादः। रजस्वलात्वेनैव तत्सिद्धेः। यद्यप्यनेन चतुर्थमासेपि त्रिरात्रं प्राप्नोति तथापि षण्मासाभ्यंतरं यावद्गर्भ
स्रावो भवेद्यदि। तदा माससमैस्तासां दिवसैः शुद्धिरिष्यते। इत्यादिपुराणात्। रात्रिभिर्मासतुल्याभिर्गर्भस्रावे विशु
ध्यतीति मनूक्तेः। गर्भस्रावे यथामासमचिरे तूत्तमे त्रयः। इति मरीच्युक्तेश्च चतूरात्रं ज्ञेयं। अचिरे त्रिमासमध्ये। उ
त्तमे ब्राह्मणे। अत्र सपिंडानां स्नानं। सद्यः स्नानं सपिंडानां गर्भस्य पतने सति। इति तत्रैवोक्तं। एतदाचतुर्थमासात्
पाते त्रिदिनस्योक्तेः। अकारणाद्यः शुद्धेरसंभवात् सद्यःपदं स्नानपरं। एवमग्रेपि गर्भस्रावे स्नानमात्रं पुरुषस्ये
ति वृद्धवसिष्ठोक्तेः। पुरुषस्येत्युपलक्षणं पूर्वोक्तवचनात्। आचतुर्थमासं सपिंडानां न स्नानं। किंतु पुंस एव। पा
ते त्रिदिनं निर्गुणपरं। गुणवत्स्वजातदंतेपि शिशौ गर्भच्युते सपिंडानामेकरात्रमशौचकमिति यमोक्तेस्त्वेकाहरि एमः
ति मदनपारिजातः। सप्तममासादि दशाहं॥ एतत्सर्ववर्णविषयं। तुल्यं वयसि सर्वेषामतिक्रांते तथैव चेति। व्याघ्रो

ह्नेःपञ्चाब्दोपनीतपरमिति।तदेतन्नाद्रियंतेवृद्धाः।हीनोदशभिर्दिनैः।अंगिराः।सर्वेषामेववर्णानांसूतकेमृतकेत
+ यानितु।पराशरः।एकाहाद्ब्राह्मणःशुध्येद्योग्निवेदसमन्वितः।त्र्यहात्केवलवेदस्तु +१ ष्या।दशाहाच्छुद्धिरेतेषामि
तिशातातपोब्रवीत्।देवलः।आशुच्यंदशरात्रंतुसर्वेषामपरेविदुः।निधनेप्सकेचैवपश्यंतकर्मणःस्वयं।अंत्योत्त
ष्टस्यकर्महानौपीडावतोविप्रपरिचर्यापरस्यद्वेदशरात्रमितिहारलतायां।स्मृः।सद्यःशौचंतथैकाहस्त्र्यहश्चतुर
हस्तथापषड्हश्चद्वादशाहश्चपक्षोमासस्तथैवच।मरणांतंतथाचान्यद्दशपक्षास्तुसूतके।सद्यःशौचादिषडहां
ताःमिताक्षरायांस्मृत्यंतरेचतुर्थेदशरात्रंस्यात्षण्णिशाःपुंसिपंचमे।षष्ठेचतुरहाच्छुद्धिःसप्तमेत्वहरेवतु।इत्या
दीनितान्यापदनापद्गुणवाद्विषयाणिदेशाचारभेदाद्वानेयानि।अत्रमरणांतंजननिमित्ताद्भिन्नं।शिष्टविगा
नान्नादर्तव्यानीतिविज्ञानेश्वरः।अस्नात्वाचाप्यहुत्वाचअदत्वान्नंतुयोद्विजः।एवंविधस्यविप्रस्यसर्वदासूत
कंनचेत्।अन्यपूर्वायस्यगेहेभार्यातस्याप्यन्नस्यनित्यशः।आशौचंसर्वकार्येषुदेहेभवतिसर्वदा।ब्राह्मणादिवशाच्च
वस्थेत्यपरार्कःमदनपारिजातादयः।माधवस्तु।वृत्तैस्वाध्यायसापेक्षमघसंकोचनंतथेति।कलिवर्ज्येषूक्तेः
दशाहएवविप्रस्यसपिंडमरणेसति।कल्पांतरविषयाःमरणांतादिपक्षास्तुनिंदार्थवादः।अन्यथानार्मवाक्य

विप्रस्त्व दशाहं सूतकी भवेत् इति विरोधः स्यादित्याह। यत्तु देवलः। दशाहादि त्रिभागे नकृते संचयने क्रमात्। अंगस्पर्शनमिच्छंति वर्णानां तत्वदर्शिनः इति पूर्णाशौचे स्पृश्यतामाह। यच्चानुपनीतातिक्रांताशौचे त्रिरात्रादेतेनैवोक्तं। स्वाशौचकालाद्विज्ञेयं स्पर्शनं तत्त्रिभागत इति। तदपि युगांतरेषु। आस्थिसंचयनादूर्ध्वमंगस्पर्शनमेव चेति। माधवीये कलौ तन्निषेधात्। यत्तु हारलतायां। चतुर्थेहे निकर्तव्यः संस्पर्शो ब्राह्मणस्य तु। इति प्रचेतसोक्तेः त्र्यहैकाहाशौचेऽपि चतुर्थाह एवांगस्पर्श इति तन्न। देवलादिवचो [illegible] नास्पृश्यदशाहगोचरत्वात्। ये तु वर्णसंकरजा मूर्द्धावसिक्ताद्यास्तेषामाशौचविशेषः। कलौ नोपयुक्तः इति नोच्यते प्रतिलोमजानां नामाशौचं। मलापकर्षणार्थं तु स्नानमात्रमिति विज्ञानेश्वरः। माधवस्तु। शौचाशौचे। मलापकर्षणं प्रकुर्वरन् शूद्रवद्वर्णसंकराः। इति ब्राह्म्योक्तेः। शूद्रवद्दशाह हारलतायामप्येवं। दत्तक्रीतकृत्रिमादिपुत्रेषु अहीनवर्णागासु स्त्रीषु सपिंडत्वेऽपि प्रसवे मरणे पूर्वमृतेषु च। परपूर्वासु भार्यासु प्रसूतासु मृतासु चेति त्रिरात्रानुपपत्तेरिति विष्णूक्तेः। सपिंडानां त्वेकाहः। परपूर्वासु भार्यासु पुत्रेषु कृत्रिमेषु च। भर्तुः पित्रोस्त्रिरात्रं स्यादेकाहस्तु सपिंडत इति माधवीये हारीतोक्तेः। सूतके चैव मृतके त्रिरात्रं परपूर्वयोः। एकाहस्तु सपिंडानां त्रिरात्रं यत्र वै पितुरिति मरीच्युक्तेश्च। शंखः। अनौरसेषु पुत्रेषु भार्यास्वन्यगतासु च। परपू

एणः

र्वासु च स्त्रीषु त्रिरात्राच्छुद्धिरिष्यते। परपत्नी स्वयं संगृहीत्वा परपूर्वा। इदं सवर्णास्तु। हीनवर्णासु त्रीौस्तु तु शंखलिखितौ
। परपूर्वासु भार्यासु पुत्रेषु कृत्रिमेषु च। नानध्यायो भवेत्तस्य नाशौचं नोदकक्रिया। आशौचं तु त्रिरात्रं स्यात्समवर्णेषु
निश्चितं। यत्तु षडशीतौ। अन्यपूर्वा वरुद्धास्तु त्रिरात्राच्छुद्धिरिष्यते। तास्वेवानन्यपूर्वासु पंचाहोभिर्विशुद्ध्यतीति। ति
तत्र पंचाहे मूलं चिंत्यं। यत्तु याज्ञवल्क्यः। अनौरसेषु पुत्रेषु भार्यास्वन्यगतासु च। इत्येकाहमाह। तदसन्निधौज्ञे
यं। यद्वा पितुरेकाहस्तदासपिंडानां स्नानं। अन्याश्रितेषु दारेषु परपत्नीसुतेषु च। गोत्रिणः स्नानशुद्धाः स्यु
स्त्रिरात्रेणैव तत्पिता। पितेति वोढुरुपलक्षणं। तच्चोपक्रमात्। यत्तु रक्तपालकप्रतियोगिकपुत्रत्वात्पूर्वपि
तुर्न त्रिरात्रं। पूर्वसंबंधनं वृत्तेश्च। न दशाहादीति कश्चित्। तन्न। ज्ञानकेपि। वैजिकादभिसंधानादनुबंध्याद
घं त्र्यहमिति वाचनिकाशौचस्यानिर्वार्यत्वात्। पितृमरणोपि दत्तकादीनां त्रिरात्रं। शुद्धितत्वे ब्राह्मे। दत्तकश्च
स्वयंदत्तः कृत्रिमः क्रीत एव चेत्युपक्रम्य। सूतके मृतके चैव त्र्यहाशौचस्य भागिनः इत्युक्तेः। दत्तकस्य तु
पुत्रपौत्राणां जनने मरणे वा सपिंडानामेकाहः बीजिनश्चेति गौतमेत्साप्तपुरुषसापिंड्योक्तेः। सपिंडानां चै
काहस्योक्तत्वात्। सपिंडे तु पुत्रीकृते दशाह एव तत्राकांक्षाभावात्। पूर्वापरभर्त्रुत्पन्नयोस्त्वाह माधवीये मरी

त्रिः। मातुरेकाहादिपि इत्येके। भ्रातरएवन्यगोत्रजो। एकाहं सूतकं तत्र त्रिरात्रं मृतके तयोरिति दिक्। अदत्तकन्यानां तु विष्णु
राह। संस्कृतास्तु सुस्त्रीषु नाशौचं पितृपक्षे। तत्प्रसवमरणे चेत्पितृगृहे स्यातां तदैकरात्रं त्रिरात्रं चेति। प्रसवे एकरा
त्रं मरणे त्रिरात्रं इति विज्ञानेश्वरकौ माधवस्तु प्रसवे। त्रिरात्रं पित्रोः एकरात्रं बंधुवर्गस्य। दत्ता नारी पितुर्गेहे सूये
ताथम्रियेत वा। तद्बंधुवर्गस्त्वेकेन शुचिस्तु जनकस्त्रिभिः। इति ब्राह्मोक्तेरिति त्रिभिरित्याह। यत्तु कश्चिदाह।
पक्षपदेन भ्रातरौ गृह्यंते। वाक्यांतरेण भगिनीमृतौ त्रिरात्रोक्तेरिति तत्। च्चिंत्यं तदभावादेतद्विरोधाच्च भ्रातुः
प्रसवे एकाहः मृतौ त्रिरात्रमिति केचित्। युक्तं तु पाक्षिणी। भ्रातृभिन्नानामेकाहः। इतरेषां यथाविधीति वक्ष्यमा
णवचनाच्च। यत्तु प्रधानगृहे मृतौ पित्रोः पूर्वं भ्रातुस्त्र्यह इति कश्चित्। तन्न। निर्मूलत्वाशौचं पितृपक्षे एतद्विरोधा
च्च भ्रांतः। दत्ता नारी पितुर्गेहे प्रधाने सूयते यदा। म्रियते वा तदा तस्याः पिता शुध्येत्त्रिभिर्दिनैरिति कल्पतरौ शु
द्धितत्वे च। पतिगृहे प्रसवे तु पित्रादावस्याः पित्रादीनामाशौचं नास्ति। मृतौ पित्रोस्त्रिरात्रमस्त्येव। मृता
मृतासु योषित्सु संस्कृतासंस्कृतासु च। मातापित्रोस्त्रिरात्रं स्यादितरेषां यथाविधीति। अज्ञातदंतासु पित्रोरे
करात्रमिति माधवीये शंखः। काल्पोजिनि मृतेः। बैजिकादभिसंधानादिसुतके श्वसमस्यर्थतारेप्येवं। माधवस्तु।

एपः

इदं त्रिरात्रं जातदंतापरं। दंतोत्पत्तेः प्रागेकरात्रं पित्रोः। सद्यस्त्वप्रौढकन्यायां प्रौढायां वा सरात्रशुद्धिः। प्रदत्तायां त्रिरात्रेण दत्ता
यां पक्षिणी भवेदिति पुलस्त्योक्तेः। अन्यत्र कन्यामृतौ पित्रोः पक्षिणीत्याहुः। षडशीतावपि। पि। पितृगेहाद्दत्तोन्यत्र य
दि पुत्री प्रमीयते। पक्षिणी तत्र पित्रोः स्यान्नान्येषामिति निश्चयः। इति। ग्रामांतरे रूपं मृतिरिति स्मृत्यर्थसारे। भ्रातृसत्क
पक्षिणी माधवीये। पित्रोर्मृतौ स्त्रीणां त्रिरात्रं। पित्रोरुपरमे स्त्रीणामूढानां तु कथं भवेत्। त्रिरात्रेणैव शुद्धिः स्यादित्या
ह भगवान्यमः। इति। श्वश्रुश्वशुरयोर्भगिन्यां च मातुलान्यां च मातुले पित्रोः स्वसरि तद्वच्च पक्षिणीं स्नपयेन्निशामिति। बृहद्बृ
हस्पतिस्मृतेः शुद्धिस्तत्रैकोर्मे। आदंतात्सोदरे सद्यः आचूडादेकरात्रकं। आप्रदानात्त्रिरात्रं स्याद्दशरात्रमतः परं। बृहन्म
नूक्तेः। इदं दशाहांतः। ऊर्ध्वं तु पक्षिणी भ्रातुर्भगिनी गृहे तस्या वा तद्गृहे। त्रिरात्रमन्यत्र तु पक्षिणीति षडशीतावुक्तं। ब्रा
ह्मेपि। परस्परं मृतौ भ्रातृभगिन्योः पक्षिणी भवेत्। मातुलाशौचवत्सम्यक् पितृव्याशौचमिष्यते। इति शिष्टाः स्वस्य
निमृतौ स्नात्वा स्नानमात्रमाहुः। त्रिंशच्छ्लोक्यां। प्रेते गुर्वाचार्यमातामहदुहितृसुते श्रोत्रियर्त्विक्तपाज्यसखे स्त्रीये शुद्धिस्त्रि
रात्रं पि दिवसमशुचिः सोदकस्त्वेकपत्र्याः पक्षिण्यशौचं मातुलिकदुहितृसुतमहाध्यायिबंधुत्रय्यांतेवासिश्वश्रूस्व
मित्रश्वशुरभागिनिकाभागिनेयप्रयाणे मातामह्यां च पित्रोः स्वसरि च विरतौ मातुले मातुल्यां चाद्ययोस्न्योतिरेव स्व

२२७

विषुमनृपतौ ग्रामनाथे च नष्टे॥ शिष्योपात्तौँध्यायवधुत्रयगुरुतनयाचार्यभार्यासगोत्रानूचानश्रोत्रियेषु स्वगृह्यपर
मृतौ मातुले चैकरात्रं। त्रिं सब्रह्मचारिण्यथ तु कथमपि स्वल्पसंबंधयुक्ते स्नानं वासो युतं स्यादिदमपि सकलं सर्ववर्णे
षु तुल्यमित्यमलं मिताक्षरादौ स्पष्टं। दौहित्रभागिनेययोरुपनीतयो॥ त्रिरात्रं। अनुपनीतयोः पक्षिणी॥ संस्थिते
पक्षिणी रात्रिं दौहित्रे भागिनीसुते। संस्कृते तु त्रिरात्रं स्यादिति धर्मो व्यवस्थित इति। वृद्धमनूक्तेः॥ संस्कृते दाहेन
ते न दाहे त्रिरात्रं नान्यथेति गौडाः। तन्न। विशेषवैयर्थ्यात्। मातुलादौ सन्निधिविदेशाभ्यां पक्षिण्येकाहयोर्व्य
वस्था॥ मनुः। त्रिरात्रमाहुराशौचमाचार्ये संस्थिते सति। तस्य पुत्रे च पत्न्यां च दिवारात्रमिति स्थितिः। श्रोत्रिये
स्वगृहे त्रिरात्रं। श्रोत्रिये तूपसंपन्ने त्रिरात्रमशुचिर्भवेत्। इति माधवस्मृतेः। एकग्रामिणि त्वेकाहः। स्मृतिस्तु ब
हुल्पकालश्रौतस्मार्त्तेयाजनपरे त्रिरात्रैकरात्रे ज्ञेये। यद्यपि कर्मेकुर्वत एष वाचकशब्दो भवतीति शबराचा
र्यैः कर्ममध्येसलिङ्गमुक्तं तथापि कर्मण्याशौचनिषेधौत्सु॥ तदन्तरमेवैतद्युक्तं। गौडास्तु। समानोदकानां त्र्यहो
गोत्रजानामहः स्मृतं। मातृबंधौ गुरौ मित्रे मंडलाधिपतौ तथेति। जाबालोक्तेर्मातृबंधुष्वेकाहमाहुः। शिष्यैस्तो एमः
पनीतेष्वहः। शिष्यसतीर्थसब्रह्मचारिषु क्रमेण त्रिरात्रमहोरात्रमेकाहमिति माधवीये बौधायनोक्तेः। अन्यत्र तु

मनुः। मातुले पक्षिणीं रात्रिं शिष्यर्त्विग्बांधवेषु चेति। बंधुत्रयं। आत्मपितृष्वसृमातुलपुत्राः। पितुः पितृष्वसृमातु
लपुत्राः। मातुः पितृष्वसृमातृष्वसृमातुलपुत्राश्चेति विज्ञानेश्वरः। अत्र पक्षिणी पितृष्वस्रादिकन्यानामूढानां त्वेका
हः। तद्बंधुवर्गस्त्वेके नेति पूर्वोक्तब्राह्मात्। अयन्तु षडशीत्यां। एवं पित्रोर्भगिन्यो ये ये मातामहयोस्तथा। ये पिताम
हयोश्चैव भगिन्यो तत्प्रजाश्च याः। मातुलाः स्वस्य पित्रोश्च पत्न्यश्चैषां प्रजाश्च याः। यातरश्चेति सर्वेषु पक्षिणी स्व
गृहे अहः। एवं श्वशुरे जामातृदौहित्रविपदि स्मृतो। यच्च यमः। जामातरि मृते शुद्धिस्त्रिरात्रेणोभयोः स्मृता। पक्षि
णी शालकानां स्यादिति शातातपोऽब्रवीत्। इति तन्निर्मूलत्वान्मिताक्षरादिविरोधाच्चोपेक्ष्यं। मदनपारिजा
ते विष्णुः। असपिंडे स्वगृहे मृते एकरात्रं। अत्र हरदत्तोक्तः शबे चेत्यापस्तंबसूत्रे तशबे ग्रामे धनुःशतादर्वागन्न
मभोज्यं। दीपमुदकुंभोप निधाय तु भुंजीत यस्यासमानवंशं न्यद्गृहमेदं स्मृतिकायामित्याह। प्रधानगृहमृतौ तु गृ
हे यस्य मृतः कश्चिदसपिंडः कथं च न। तस्याप्यशौचं विज्ञेयं त्रिरात्रं नात्र संशयः। इत्यांगिरसोक्तमिति माधवः। ए
तेन त्रिरात्रमसपिंडेषु स्वगृहे संस्थितेषु चेति कौर्मे व्याख्यानं। शुद्धितत्वे बृहन्मनुः। श्वश्रूद्रपातितां श्वांत्या मृ
ताश्चेन्निजमंदिरे। शौचं तत्र प्रवक्ष्यामि मनुना भाषितं। यथा। दशराच्छु निमृते मासात्तद्रे भवेच्छुचिः। द्वाभ्यां तु प

तिते गेहमंत्येमासचतुष्टयात्। अयं तेवर्ज्यमद्गेहमित्येवंमनुरब्रवीत्। अंत्याः म्लेच्छाः। अत्यंतः श्वपाकः इति वाचस्पतिः
यमः। द्विजस्यमरणे वेश्मविशुध्यति दिनत्रयात्। संवर्त्तः। गृहशुद्धिं प्रवक्ष्यामि अतःस्थशवदूषिते। प्रोत्सृज्यमृन्मयंभां
डं सिद्धमन्नंतथैव च। गोमयेनोपलिप्याथछागेनघ्रापयेद्बुधः। ब्राह्मणैर्मंत्रपूतैश्च हिरण्यकुशवारिभिः। सर्वमभ्यु
क्षयेद्वेश्म ततः शुध्यत्यसंशयं। बृहद्विष्णुः। ग्राममध्यस्थितो यावच्छवस्तिष्ठतिकस्यचित्। ग्रामस्य तावदाशौचं नि
र्गते शुचितामियात्। गृहेपश्चादौ मृतेऽप्येवं। यत्तुमाधवीये प्रचेतसा मातुलश्वश्र्वादिषु त्रिरात्रमुक्तं। मातुलश्च सामातु
लयोः श्वश्रूश्वशुरयोर्गुरोः। मृते चर्त्विजि याज्ये च त्रिरात्रेण विशुध्यतीति। गुरुराचार्यः। ज्ञातिकुलागतस्तत्स्वगृह
मृतौ ज्ञेयं। श्वशुरयोरन्यत्र मृतावपि सन्निधौ त्रिरात्रं। असन्निधौ पक्षिणी। देशांतरे एकरात्रं। वक्ष्यमाणविष्णूक्ते
रिति माधवगौडादयः। अन्यत्र तु पित्रोः स्वसरि तद्घः स्नानेन शुध्यतीति। द्वंच पक्षिणीं क्षपयेन्निशामिति वृद्धम
नूक्तेः। यत्तु वृद्धमनुः। भगिन्यां संस्कृतायां च भ्रातर्यपि च संस्कृते। मित्रे जामातरि प्रेते दौहित्रे भगिनीसुते शालके
तत्सुते चैव सद्यः स्नानेन शुध्यतीति। तद्भ्रात्रदौहित्रादौ देशांतरे शालकसुतजामात्रोः स्वदेशे ज्ञेयं। शालके तु स्व एमः
देशेऽप्येकाहः। आचार्यपत्नीपुत्रोपाध्यायमातुलश्वशुरश्वश्रूश्वास्तुर्यसहाध्यायिशिष्येष्वेकरात्रमिति माधवीये वि

स्तूक्तेः। हरदत्तीये दशश्लोक्यामप्येवं। श्वश्रुर्यः शालकः। देशांतरे स्नानं। श्वशुरयोर्देशांतरे एकाहः। जाबालः। एकोद
कानां च त्र्यहो गोत्रजानामहः स्मृतं। सर्वत्र मूल्याभावे क्रियाकर्तुर्दशाहं। गुरोः प्रेतस्य शिष्यस्तु पितृमेधं समाचरं
वन्। प्रेताहारैः समं तत्र दशरात्रेण शुध्यतीति मनूक्तेः। शिष्यस्तूपलक्षणं। निरन्वये सपिंडे तु मृते सति दयान्वितः।
तदशौचं पुरा चीर्त्वा कुर्यात्तु पितृवत्क्रियां। इति माधवीये ब्राह्मोक्तेः। दिवोदासीये। सगोत्रो ऽसगोत्रो वा यो ऽग्निं दद्या
त्सखे नरः। सो ऽपि कुर्यान्नवश्राद्धं प्रेते च दशमे ऽह्नि। यत्रैकविषये पाक्षिण्येकदशाहादिपक्षद्वयमुक्तं तत्र सन्निधि
देशभेद्यादिकृता व्यवस्था। त्रिंशच्छ्लोक्यां। दानप्रसंगे यतो वोपनमति कुलजे पंडके चाल्पवःस्माद्यो। विद्धो विप्रगुरुस्त्वे
मृतवति तद्दिनं युद्धविद्धे च सद्यः। अत्र मूलमाकरे स्पष्टं। युद्धमूर्धमृतस्य स्नानं। उद्यते एहवे शस्त्रैः क्षत्रधर्म
हतस्य च। सद्यः संतिष्ठते यज्ञस्तथाशौचमिति स्थितिरिति मनूक्तेः। यज्ञो ऽस्य कर्म सर्वं तद्दैवस्य इत्यर्थः। यस्तु भा
रते राजधर्मेषु अशौच्यो हि हतः शूरः स्वर्गलोके महीयते। नत्यं नमुदकं तस्य न स्नानं नाप्यशौचकमिति श्रा
द्धादिनिषेधः स पुत्राद्यभावपरः। अत्र पर्वतत्र करणादीनां श्राद्धमुक्तं। अन्ये तु दशपिंडनिषेधमाहुः। यमिवत।
यत्तु पराशरः। आहवे ऽपि हतानां च एकरात्रमशौचकमिति। तद्युद्धहते न कालांतरमृते ज्ञेयं। असन्निधौ स्नानमिति

माधवः। शुद्धितत्वेग्निपुराणे। दंष्ट्रिभिःशृंगिभिर्वापिहताम्लेछैश्चतस्करैः। येस्वाम्यर्थेमृतायांतिराजन्स्वर्गेनसंशयः। सर्वे
षामेववर्णानांक्षत्रियस्यविशेषतः। यत्तुबृहस्पतिः। डिंबाहवेविद्युताचराज्ञागोविप्रपालने। सद्यःशौचंमृतस्याहु
स्त्र्यहंचान्येमहर्षयः। तच्छस्त्रविनापराङ्मुखहेचत्रिरात्रं। राज्ञावध्येहतेसद्यःशौचमन्यत्रत्रिरात्रं। तत्रैवव्याघ्रः। क्षते
नष्टिपतेपस्कृतस्याशौचंभवेद्द्विधा। आसप्ताहात्त्रिरात्रंस्याद्दशरात्रमतःपरं। शस्त्राघातेत्र्यहादूर्ध्वंयदिकश्चित्प्र
मीयते। आशौचंप्राकृतंतत्रसर्ववर्णेषुनित्यशः। शस्त्राघातेक्षतंविना। शवस्पर्शेतुहारीतः। शवस्पृशोग्रामंनप्र
विशेयुरानक्षत्रदर्शनात्। रात्रौचेदादित्यस्य। यत्तुमनुः। अह्नाचैकेनरात्र्याचत्रिरात्रैरेवचत्रिभिः। शवस्पृशो
विशुध्यति त्र्यहात्तूदकदायिनः। इतिअह्नारात्र्याचेत्यहोरात्रमुक्तं। त्रिभिस्त्रिरात्रैरिति। नवरात्रमेवदशरात्रमित्य
र्थः। तदन्नाशनेतद्गृहवासेनापदिवर्ज्येयं। अंगिराः। आशौचंयस्यसंसर्गादापतेद्गृहमेधिनः। क्रियास्तस्यन
लुप्यंतेगृह्याणांचनतद्भवेत्। अथनिर्हाराद्यशौचं। सवर्णाज्ञाताशौचायदिनिर्हरतिप्रेतंलोभाद्याक्रांतमान
सः। दशाहेनद्विजःशुध्येद्द्वादशाहेनभूमिपः। मासार्द्धेनतुवैश्यस्तुशूद्रोमासेनशुध्यतीति। कौर्मोक्तेः। विजाती
यनिर्हारेतुशावजाननीयमाशौचं। अत्रस्मृत्यहणोद्विगुणं। अवरश्चेद्वरंवर्णसमस्थावरोवावांपदि। वहेछवंतदाशौचंदृष्टा

रामः

थैद्विगुणंभवेत्। इति व्याघ्रोक्तेः। कौर्मेमेतद्विगौडाः। दाहेप्येवं वीपत्तु ब्राह्मे। योऽसवर्णं तु मूल्येन नीत्वा चैव दहेन्नरः। आशौचं तु
भवेत्तस्य प्रेतजातिसमं नृपेति। तदशापद्विज्ञेयं। स्नेहादकनिर्हारे तु दशाहमिति माधवः। अलंकारणे तु शंखः। कृच्छ्रपादोऽस
पिंडस्य प्रेतालंकरणे कृते। अज्ञानादुपवासः स्यादशक्तो स्नानमिष्यते। धर्मार्थमनाथसवर्णहरणे क्रियाकरणे च
द्विजस्यानंतयज्ञफलं स्नानं प्राणायामोग्निस्पर्शश्चेति माधवीये अग्निदेप्येवं। प्रेतसंस्पर्शकारी ब्राह्मणो नैव दुष्यति।
वोढा चैवाग्निदाता च सद्यः स्नात्वा विशुध्यतीति। अपरार्के वृद्धपराशरोक्तेः। स्नेहाद्दोषे तु त्रिरात्रं। असंबंधिद्विजा
न्वा हित्वा च सद्यः शौचं संबंधे त्रिरात्रमिति पैठीनसिस्मृतेः। गौतममिताक्षरायां तु द्वात्रिः। सूतकाद्विगुणंशा
वंशावाद्विगुणमार्त्तवं। आर्त्तवाद्विगुणासूतिस्ततोऽपि शवदाहकः। अत्र पूर्वोत्तरएनिवृत्तिरित्यर्थः। विष्णुः। मृतं
द्विजं न शूद्रेण हारयेत् न शूद्रं द्विजेन। देवलः। ब्रह्मचारी न कुर्वत शबवाहादिकक्रियां। यदि कुर्याच्चरेत्कृच्छ्रं
पुनः संस्कारमेव च। याज्ञवल्क्यः। आचार्यपित्रुपाध्यायान्निर्हृत्यापिपतेद्व्रती। अनुगमने सपिंडेन न दोषः। विहितं
हि सपिंडानां प्रेतनिर्हरणादिकं। तेषां करोति यः कश्चित्तस्याधिक्यं न विद्यते इति। इति देवलोक्तेः॥ दोषः स्यात्त्वसपिंड
स्य तत्त्वानाथक्रियां विनेति हारीतोक्तेश्च। समोकृच्छ्रवर्णे तु माधवीये। केशवः। अनुगम्य शवबुध्या स्नात्वास्पृष्ट्वाघृत

शना। सर्पिः प्राश्य पुनः स्नात्वा प्राणायामैर्विशुध्यति। हीनवर्णे तु क्षत्रियेहः॥ वैश्ये पक्षिणी। शूद्रे त्रिरात्रं। क्षत्रस्य वैश्ये त्र्यहः।
शूद्रे पक्षिणी। वैश्यस्य शूद्रेह इति विज्ञानेश्वरः॥ माधवस्तु विप्रस्य वैश्ये त्र्यहः॥ क्षत्रस्य शूद्रेप्येवं। अन्यत्प्रागवत्। स्ना
नाग्निस्पर्शघृताशनानि सर्वेनेत्याह। आशौचप्रकाशे वृद्धमनुः॥ दहनं वपनं चैव प्रेतस्यान्यस्य भार्गव॥ न कुर्यादुभ
यं मातुः कुर्यात्स्वे वा पितुः सदा॥ ज्येष्ठस्य वानपत्यस्य मातुलस्य सुतस्य च॥ हीनवर्णस्य दाहोर्ध्वदैहिककरणे तु ब्रा
ह्मणो हीनवर्णस्य न कुर्यादूर्ध्वदैहिकं। कामाल्लोभात्तथा मोहात्कृत्वा तज्जातितां व्रजेत्। मनुः॥ व्रात्यानां याजनं
कृत्वा परेषामन्त्यकर्म च। अभिचारमहीनं च त्रिभिः कृच्छ्रैर्व्यपोहति। परेषां सवर्णानां॥ हीनेषूक्तं द्वैगुण्यत्रैगुण्यचा
तुर्गुण्याद्यूह्यं। अथ रोदने समोत्तमवर्णयोः संचयनात्पूर्वं सचैलं स्नानं। ऊर्ध्वमाचमनं। हीनवर्णेषु तु संचयनात्
प्राक् सचैलमूर्ध्वं स्नानमात्रं। विप्रस्य क्षत्रवैश्यविषये तु ब्राह्मे। अस्थिसंचयने विप्रो रोति चेत्क्षत्रवैश्ययोः। तदा स्ना
तः सचैलः स्नात्वा द्वितीयेहनि शुध्यति। कृते तु संचयने विप्रः स्नानेनैव शुचिर्भवेत्। क्षत्रस्य वैश्येप्येवं। शूद्रे तु संचयात्
प्राक् विप्रस्य त्रिरात्रं। क्षत्रवैश्ययोर्द्विरात्रं। ऊर्ध्वं तु द्विजानामेकाहः॥ शूद्रस्य शूद्रस्पर्शे विनासंचयात्पूर्वमेकाहः। ऊ एकः
र्ध्वं सद्यो।तिरिति माधवीये ज्ञेयं। शुद्धितत्त्वे पारस्करः। अस्थिसंचयनादूर्ध्वं मासं यावद्द्विजातयः॥ दिवसेनैव शुध्यन्ति वाससां

स्नालनेनैवाप्लुतास्ते। दिवसेनैव त्र्यहात्क्षत्रियवैश्ययोरित्युक्तं। सपिंडानां रोदनं निर्हरणादावदोष इत्युक्तं प्राक्। विज्ञाने
श्वरस्तु सर्वत्रैकरात्रमाह। अथाशौचान्नभक्षणे विष्णुः। ब्राह्मणादीनामाशौचे यः सकृदेवान्नमश्नाति तस्य ता
वदाशौचं यावत्तेषामाशौचव्यपगमे प्रायश्चित्तमिति। अज्ञाने त्वंगिराः। अंतर्दशाहे भुक्त्वान्नं सूतके मृतकेऽथ
वा। अस्याशौचं भवेत्तावद्यावदन्नं व्रजत्यधः। प्रायश्चित्तं न मत्या। विप्रस्य वर्णक्रमेणैकाहत्र्यहपंचाहसप्ता
होपवासाः। दश विंशतिः षष्टिः शतं च प्राणायामाः पंचगव्याशनं च। अभ्यासे द्विगुणं। आपदि तु प्राणायाम
शतं। पंचशतमष्टसहस्रं गायत्रीजपश्च। मत्या यदि तु सवर्णाशौचे त्रिरघमर्षणं। गायत्र्यष्टसहस्रं च त्रि
याशौचे उपवासस्तद्वा वैश्याशौचे त्रिरात्रोपवासश्च। शूद्राशौचे कृच्छ्रः। क्षत्रवैश्ययोः पंचशतमष्टशतं गाय
त्रीजप उत्तमेषु। शूद्रस्य सर्वत्र स्नानं। मत्या नापदि विप्रस्य वर्णेषु सांतपनकृच्छ्रमहासांतपनचांद्रायणानि। अभ्या
से तु मासिकद्वैमासिकत्रैमासिकषाण्मासिकानीत्यादि माधवीयादौ ज्ञेयं। अथ दासस्य स्वदास्यसन्नस्य स्वस
पिंडमृतौ स्नानमात्रेण स्नानमात्रणस्वामिकार्यं स्पृश्यत्वं भक्तदासस्य त्र्यहोर्ध्वं तदधः स्पृश्यो भक्तदासस्त्र्यहाच्छु
द्धिरिति स्मृत्यंतरोक्तेः। मूल्यकर्मकराः शूद्राः दासीदासास्तथैव च। स्नाने शारीरसंस्कारे गृहकर्मण्यदूषिताः॥ इति शाता

तपोक्तेश्च। एतच्चान्यस्य तत्कार्यमात्रे। अन्यत्र मासाशौचमस्त्येव। एवं दास्यामपि। सूतिकायास्तस्याः अस्पृश्यत्वमपि मासमा
त्रमेव। दासीदासश्च सर्वो वै यस्य वर्णस्य यो भवेत्। तद्वर्णस्य भवेच्छौचं दास्यां मासस्तु सूतकं। इत्यंगिरसोक्तेः। षडशीता
वपि। स्वामिशौचेन दासाद्याः स्पृश्या मासात्तु कर्मसु॥ योग्याः स्युर्मासतो दासी सूतौ चेत्स्पृश्यतामियात्। दत्त्रदासा
दीनां स्वसपिंडादौ स्वाम्याशौचसमसंख्यादिनोर्ध्वं स्पृश्यत्वमपि मासाद्याशौचे स्वामिकार्ये स्पृश्यतेति हा। दत्त्रा। दासांते
वासिभृतकाः शिष्याश्चैकत्रवासिनः। स्वामितुल्येन शौचेन शुध्यंति मृतसूतके। इति बृहस्पतिस्मृतेः। दासश्चात्र।
गृहजातस्तथा क्रीतो लब्धो दायादुपागतः। अन्नाकालभृतस्तद्वदाहितः स्वामिना च यः। मोक्षितो महतश्च। म
युद्धप्राप्तः पणे जितः। तवाहमित्युपगतः प्रव्रज्यावसितः कृतः। भक्तदासश्च विज्ञेयस्तथैव वडवाहृतः। विक्रेता
चात्मनः शास्त्रे दासाः पंचदश स्मृताः। इति नारदोक्तो गृहगर्भभक्तदासौ विना ज्ञेयाः। वडवा दासी तया हृतः। तामुद्वा
ह्य दासो जात इत्यर्थः। अंतेवास्यपि तेनैवोक्तः। स्वशिल्पमिच्छन्नाहर्तुं बांधवानामनुज्ञया। आचार्यपवतनंदत्ते एस्यः
कृत्वा कालं सुनिश्चितं। आचार्यः शिक्षयेदेनं स्वगृहे दत्तभोजनं इतिष्यस्तत्तुल्यो विद्यार्थी। दासादेः स्वामीतत्सपिंड
मरणे तु विष्णुः। पत्नीनां दासानामानुलोम्येन स्वामितुल्यमाशौचं। मृते स्वामिन्यात्मीयमिति। प्रतिलोमदासाना

माशौचाभावः। वर्णानामानुलोम्येन प्रतिलोमतः॥ इति याज्ञवल्क्योक्तेः॥ अथ रात्रौऽजनने मरणे वा। रात्रिं त्रिभागां कृत्वा
द्यभागद्वये चेत्पूर्वं। अंत्ये तूत्तरमिति। मिताक्षरायां। अयं तु। प्रागर्द्धरात्रात्प्राग्वा सूर्योदयात्पूर्वं दिनमुक्तं। तत्र देशाचा
रतो व्यवस्था सर्वं चाशौचमाहिताग्नेर्दाहात्तद्दिनाद्दिनमारभ्य तेषां। अनग्निमतस्तूक्तं। तेऽशौचादि द्विजातिषु। दाहादग्निम
तो। विधाद्देशस्थे च मृते सतीति पैठीनसिस्मृतेः॥ साग्निराहिताग्निः। आहिताग्निश्चेत्प्रवसन्म्रियेत पुनः संस्कारं कृत्वा श
ववदाशौचमिति वासिष्ठे विशेषोक्तेः। दाहादेव तु कर्तव्यं यस्य वैतानिको विधिः। इति ब्राह्म्या च। यत्तु धूर्तस्वामिनारा
मांडारेण चोक्तं। आहिताग्नेरपि मरणाद्येव दशरात्रं। दशाहं शावमाशौचमिति मरणनिमित्तत्वात्तस्य। यत्तु दाहादे
वतस्याशौचमुक्तं। तन्मस्कारनिमित्ताशौचं पृथगेव। तेन गृह्याग्नेः संस्कारांगं त्रिरात्रं। श्रौताग्नेस्तु दशरात्रं मरणनि
मित्तत्तूभयोर्दशाहं दाहात्प्रागपीति। तद्वचनविरोधात्पूर्वस्यैवोत्कर्षान्मलकल्पनालाघवाच्चित्यं॥ अथातिक्रां
ताशौचं॥ तत्राशौचमध्ये जननाद्यज्ञाने तच्छेषेणाशुद्धिः। विगतं तु विदेशस्थं शृणुयाद्यो ह्यनिर्दशं। तच्छेषं तद्दशरात्र
स्य तावदेवाशुचिर्भवेत्। इति मनूक्तेः। अत्र केचित्पुत्रातिरिक्तविषयं तेषां त्वाशौचमध्ये श्रवणे तदाद्येव दशाहादि।
पितरौ चेन्मृतौ स्यातां दूरस्थोपि हि पुत्रकः। श्रुत्वा तद्दिनमारभ्य दशाहं सूतकं भवेत्। इत्यस्य सर्वापवादत्वादित्याहुः

तन्नाज्ञातमरणस्यानिमित्तत्वात्। अनन्निमितं उक्रांतेरित्यादिविरोधाच्च स्मृत्यर्थसारेपि। जनने मरणे वा प्रथमदिनादूर्ध्वं
ज्ञाते पुत्रादीनां शेषेणैव शुद्धिरिति। षडशीतावपरार्के चैवं। दशाहादूर्ध्वं ज्ञाते तु वेसिष्टः। मासत्रये त्रिरात्रं स्यात् षण्मासे प
क्षिणी तथा॥ अहस्त्वनवर्षादर्वागूर्ध्वं स्नानेन शुध्यतीति। जनने त्वतिक्रांताशौचं तु नास्त्येव। नाशुद्धिः प्रसवाशौचे व्य
तीतेषु दिनेष्वपीति। देवलोक्तेः। पितुः स्नानं तत्रापि भवत्येव। श्रुत्वा पुत्रस्य जन्म चेति। सवाससा जलमाप्लुत्य शुद्धो भवति
मानवः। इति मनूक्तेः। तच्चातिक्रांताशौचं दशाहादिज्ञात्याशौचविषयं न तूपनीत त्रिरात्रादौ। उपनीते तु विषमं
तस्मिन्नेवातिकालजमिति व्याघ्रोक्तेः। निर्दशं ज्ञातिमरणं। अतिक्रांते दशाहे त्विति मनूक्तेश्च। माधवीये देवल
स्तु। आत्रिपक्षात्त्रिरात्रं स्यात् षण्मासात्पक्षिणी ततः। परमेकाहमावर्षादूर्ध्वं स्नातो विशुध्यतीत्याह। तत्रापद
नापद्विषयत्वेन व्यवस्था। इदं चैकदेशे। देशांतरे तु स्नानमात्रं। देशांतरमृतं श्रुत्वा क्लीबे वैखानसे यतौ। मृते स्ना
नेन शुध्यंति गर्भस्रावे च गोत्रिणः। इति पाराशरोक्तेरिति विज्ञानेश्वरः। स्नानं वत्सरांते। अर्वाक् त्रिपक्षात्त्रिनिशं ष एमः
ण्मासाच्च दिवानिशं। अहः संवत्सरादर्वाक् देशांतरमृतेष्वपीति विष्णूक्तेरिति माधवः। इदं सपिंडानां देशांतरे स्ना
नं सोदकानामिति युक्तं। तल्लक्षणं। महानद्यंतरं यत्र गिरिर्वा व्यवधायकः। वाचो यत्र विभिद्यंते तद्देशांतरमु

यते।देशांतरंवदंत्येकेषाष्टियोजनमायतं।चत्वारिंशद्वदंत्यन्यत्रिंशदन्येतथैवचेति।एतत्सर्वंमातृपितृभिन्नविषयं।
तयोक्तं॥पितरौचेदितिपूर्ववाक्यात्तदासंपूर्णदशाहादि।स्मृत्यर्थसारेपि।मातापितृमरणेदूरदेशेपिसंवत्सरोर्ध्वमपि
पिपुत्रोदशाहादिकंसंपूर्णमाशौचंकुर्यादिति।स्त्रीपुंसोःपरस्परंपत्नीषुचैवमिति।शुद्धितत्वाद्योगोउक्तः।ऊर्ध्वं
संवत्सरादाद्याद्बंधुश्चेद्भूपतेमृतः।भवेद्दशाहमेवात्रतच्चसन्यासिनांनतुइति।पित्रोर्वृषथ्येचत्रिरात्रमूर्ध्वमेका
हः।बंधुर्मातापिताभर्त्ताच।पूर्वोक्तदशाहस्तत्कालिंगादिपरइत्याहः।तेबंधुपदस्यपित्रादिपरत्वेमानाभावात्सपे
त्न्याःसपत्नमातुस्त्र्यहः॥पितृपत्न्यामपेतायांमातृवर्ज्जंद्विजोत्तमः।संवत्सरेव्यतीतेपित्रिरात्रमशुचिर्भवेत्।
हीनवर्णमातृषुसपत्नीषुचैवमितिस्मृत्यर्थसारे।केचित्तु।पितृपत्न्यामपेतायामौरसेतनयेतथेति।ब्राह्म्यो
क्तेरौरसेपीदमाहुः।षडशीतावप्येवं।एतत्सर्वंवसोतुल्यं।तुल्यंवयसिसर्वेषामतिक्रांतंतथैवचेति।व्याघ्रोक्तेः।
अथाशौचसंपातेउच्यते॥तत्रशावेशावंसूतकेसूतकं।सूतकंशावेसूतकेशावंवा।तत्राप्युत्तरंकालतः।
पूर्वेणसमंन्यूनमधिकंवेतिद्वादशभेदाः।यदैकादिनेसमंन्यूनमधिकंवाशौचद्वयंतत्रोत्तरेणान्यस्यापिशुद्धिः।
द्वयोरेककालत्वात्।यदाद्वितीयादिदिनेपूर्वेत्तरसजातीयंशावेजननंसामकालंन्यूनकालंवापरंस्यात्तदापू

पन्नेषुपूर्वशेषेणशुद्धिः। अंतराजन्ममरणेशेषाहोभिर्विशुध्यतीतियाज्ञवल्क्योक्तेः। अतएज्ञातत्वपर्यः ज्ञातस्यैवजननाशेर्निमित्तत्वात्। पूर्वाशौचोत्तरंतन्मध्योत्पन्नेज्ञाते तदुत्तरमेवकार्यं। शुद्धितत्वेप्युक्तं। पूर्वाशौचांतउत्पन्नंसमानंलघुवानिमित्तंतत्कालादुपरिक्षितंस्वाशौचहेतुरेवअज्ञातंतुन। अविज्ञातेतुनदोषःस्याच्छ्राद्धादिषुकथंचनेति। अस्पाशौचसांकर्येप्यप्रवृत्तेः। तेनाज्ञानाद्वृषोत्सर्गादौकृतेपश्चात्तज्ज्ञानेपिनावृत्तिरितिमाधवीये। यमोपि। जननेत्जननंचेत्स्यान्मरणेमरणंतथा। पूर्वशेषेणशुद्धिःस्यादुत्तराशौचवर्जनं। अत्रकेचिदंतर्दशाहेस्यातांचेत्पुनर्मरणजन्मनी। तावत्स्यादुत्तरेणशुचिर्विप्रोयावत्तत्स्यादनिर्दशम्। इतिमनुपराशराद्यैर्दशाहग्रहणात्पूर्णाशौचएवपूर्वशेषशुद्धिः। त्र्यहाद्यल्पाशौचसंपातेतदुत्तरेणैवशुद्धिरित्याहुः। हेरदत्तोप्येवमाह। गौडा अप्येवं। तन्न। याज्ञवल्क्यादिवशेनदशाहस्यतुल्यकालाशौचोपलक्षणत्वात्। समानाशौचसंपातेप्रथमेनसमापयेत्। असमानद्वितीयेनमंगिरावचोपथ्येतिमाधवीयेशंखोक्तेः। अपरार्केमिताक्षरादिविरोधाच्च। यदातुसूतकेशावंसमन्यूनंसमधिकं एमः वातदानपूर्वशेषेणशुद्धिः। तदाहांगिराः। सूतकेमृतकंचेत्स्यान्मृतकेत्वथसूतकं। तत्राधिकृत्यमृतकशौचंकुर्यान्नसूतकं। षट्त्रिंशन्मते। शावाशौचेसमुत्पन्नेसूतकंतुयदाभवेत्। शावेनशुध्यतेसूतिर्नसूतिःशावशोधि

नीः। चतुर्विंशतिमतेपि। मृतेन शुध्यते जातं न मृतं जातकेन तु। अतोयं द्वादशाहजननमध्ये लदंतेवा त्र्यहाद्दिशावंतदा पूर्वेण शुद्धावपि तन्निमित्तमस्पृश्यत्वमेव। मरणोत्पत्तियोगे तु गरीयो मरणं भवेत्। इति कौर्माच्च। गौतमव्याख्यायां तु द्वात्रिरपि। सूतकाद्द्विगुणं शावं शावाद्द्विगुणमार्त्तवं॥ आर्त्तवाद्द्विगुणा सूतिस्ततोपि शवदाहकः। अत्र पूर्वेणानोत्तरानिवृत्तिरस्पृश्यत्वाधिक्यादित्यर्थः। षडशीतावपि। स्वभावबद्धसूतिस्तन्न्यूनशावविशोधिनीति। रात्रिशेषादौ वर्द्धिते। द्वित्रिदिनैरागंतुकैः सूतैर्वक्रत्वं न स्वभावेन। अतस्तत्र न्यूनशावस्यापि न पूर्वेण शुद्धिरिति वक्तुं स्वभावेनेत्युक्तं। ब्राह्मेपि। नागंतुकेष्वहो। भिन्नशौचमनुपद्यते। न च पातनिमित्तेन शावस्यान्यस्य शोधनमिति। एवं नवपक्षः। यदा तु त्र्यहाद्यल्पाशौचे सजातीयं वा विजातीयं वा दीर्घकालमुत्तरं तदापुत्तरं पूर्णं कार्यं। न पूर्वेण शुद्धिः। स्वल्पाशौचस्य मध्ये तु दीर्घाशौचं भवेद्यदि। न पूर्वेण विशुद्धिः स्यात्स्वकालेनैव शुध्यति। उशनसोक्तेः। तेन त्र्यहाद्दिशावमध्ये दशाहादि सूतकेपि न पूर्वेण शुद्धिरित्यपरार्कः। शावनिमित्तमस्पृश्यत्वं च भवत्येव। शुद्धिविवेके तु शावेन शुध्यते सूतिरिति। पागुक्तेः। तत्रापुत्तराशौचानिवृत्तिरुक्ता। तन्न। उत्तरस्य कालाधिक्येन बलवत्वात्। माधवीयेयमोपि। आद्यं वृद्धिमदाशौचं पश्चिमेन समापयेत्। यथा त्रिरात्रे प्रक्रांते दशाहं प्रविशेद्यदि

।आशौचं पुनरागच्छेत्तत्समाप्य विशुध्यतीति हारीतोपि। गुरुणा लघुश्छेत लघुश्छेतलघुनानैव गुर्विति। गुरुत्वलघु
त्वं च कालकृतमेवापूर्वानुरोधात्। मिताक्षराप्येवं। यत्तु। अघानां यौगपद्ये तज्ज्ञेया शुद्धिर्गरीयसा। मरणोत्पत्तियो
गे तु गरीयो मरणं भवेत्। इति हारीतकौर्मादि। तत्रास्पृश्यत्वाभिप्रायं शावस्पृग्रहतं ज्ञेयं। क्वचिदल्पकालेन। विदी
दीर्घकालाशौचानिवृत्तिमाह देवलः। परतः परतः शुद्धिरघवृद्धौ विधीयते। स्याच्चेत्पंचतमादह्नः पूर्वेणैवात्र शिष्यते। अ
स्यार्थः। अघवृद्धौ दीर्घाशौचे। परतः शुचिः परमाशौचं। यदि पूर्वाशौचं उत्तरस्य पंचमदिनात्यतूात अनुवर्तते तदा पूर्वेणैव शु
द्धिः। पूर्वस्योत्तराशौचार्द्धाधिककालव्यापित्वे पूर्वशेषाच्छुद्धिरित्यर्थः। यथा षष्ठमासे गर्भपातनिमित्तषडहाशौचत्वमध्ये द
शाहपाते पूर्वेणोत्तरानिवृत्तिः। यथा वा त्र्यहमध्ये स्रावपातनिमित्तचतुरहादचाहप्याचेरिति क्वाचित्। तत्र दशाहादधिपू
र्वशेषशुध्यावेदवाक्याविरोधात्। षष्ठादिदिनेषु पूर्वाशौचमंत्यरात्रौ तु द्व्यह इत्यनेनौचित्याच्च। अस्मद्गुरवस्तु पंचमादह्नः आ।
लतोन्यनं त्र्यहादि चेत्स्यात्तदा। अस्मिन्विषये पूर्वेणैव शुद्धिः शिष्यते। रात्रिशेषे त्र्यहादिपाते त्र्यहाद्यल्पाशौचानां परस्परं रा
त्रिशेषे संपाते च न द्व्यहादिवृद्धिरित्यर्थमाहुः। क्वचित्सर्वशेषेणापुद्धेरपवादमाह गौतमः। रात्रिशेषे सति द्वाभ्यां प्रभाते ति एमः
सृभिरिति। प्रभाते त्ययामे। रात्रिशेषे द्व्यहाच्छुद्धि यामशेषे शुचि त्र्यहात्। इति शातातपोक्तेः। इदं शावांते सूतकपाते स

ज्ञातीये तुल्यं। अत्र केचित। अत्र रात्रिशब्दः अहोरात्रिपरः। अह्नः शेषे द्वाभ्यां प्रभाते तिसृभिरिति शंखलिखितोक्तेः। अथ
यदि दशरात्रसंनिपाते पुराद्यं दशरात्रमशौचमानवमाद्दिवसात् तदूर्ध्वं द्विरात्रेणाप्युष्टायां त्रिरात्रेणेति बौधायनोक्तेः।
पुनः पाते दशाहात्प्राक् पूर्वेण सह गच्छति। दशमेऽह्नि पतेद्यस्याहर्द्वयात्स विध्यति। प्रभाते तु त्रिरात्रेण दशरात्रेष्वयं विधिः
इति देवलोक्तेः। नवमदशमौ चोपांत्यदिवसपरौ। तेन द्व्यहत्रियादावपि तथेत्याहुः। माधवीयेप्येवं। अन्ये त्वाहुः। अंतर्द
शाहे स्यातां चेत्पुनर्मरणजन्मनी। तावत्स्यादशुचिर्विप्रो यावत्तत्स्यादनिर्दशमिति मनुपराशराद्यैर्दशमदिनेनोत्तरस्य
शुद्धेरुक्तत्वाद्विरोधः। स्पष्ट एवाविरोधे च यद्वै किंचन मनुरब्रवीत्तद्भेषजं कलौ पाराशरस्मृतिरित्यनेन पूर्ववच्च सांबाधः।
अत एव वाचस्पतिना तेषामनाकरत्वमुक्तं। नाकरत्वेपि ज्ञातिमात्रविप्रादिविषयं देशांतरविषयं युगांतरविषयं
वाक्तति नागोतमीयेत्रिशब्देनाहोरात्रपक्षरात्रिमात्रावाविशिष्टं इति मिताक्षरोक्तेश्च। न कुकविकृतेरिवान्यथाव्या
ख्यायुक्ता। माधवमते। अनिर्गतदशाहमिति पूर्वस्वग्रंथविरोधापत्तेश्चेति अस्मत्पितृचरणास्तु। बौधायनीये
तो द्वितीयाशौचस्य नवमं दिनं प्रथमस्य दशममेवाहः। त्र्यहादिवृद्धेः। पूर्वशेषापवादत्वात्तस्य च न्यायतो द्वितीयदि
नादेव प्रवृत्तेः। अतऊर्ध्वमिति दशमरात्रिपरं। शंखलिखितोक्तो देवलोक्तो ह चाशेषे दशमेऽह्नि चानीते रात्रौ पतेदित्यर्थः

दशम्यांपितानामकुर्यादितिवत।तेननमन्वाद्यैर्विरोधोनापिमिताक्षराद्यैरित्याहुः।अपरार्केनिर्णयामृतेप्येवं।यत्तुतत्रैव
ब्राह्मे।आद्येभागद्वयंयावत्सूतकस्यतुसूतके।द्वितीयेपतितेत्वाद्यात्सूतकाच्छुद्धिरिष्यते।अतऊर्ध्वंद्वितीयात्तुसूतकांता
च्छुचिःस्मृतः।एवमेवविचार्यंस्यान्मृतकेमृतकांतरे।मृतकस्यांतरेयत्रसूतकंप्रतिपद्यते।सूतकस्यांतरेवाथमृतकंयत्र
विद्यते।सूतकंतेनवैतत्रशुद्धिर्विप्रेषुसर्वशइति।अस्यार्थः।तत्रैवोक्तः।पूर्वाशौचपरमहोरात्रस्यदिनरूपेआद्यभाग
द्वयेत्वाशौचपातेपूर्वेणाशुद्धिर्भागद्वयोर्ध्वंरात्रौसूतकांतरेद्वितीयात्सर्वाभिन्नात्सूतकांतात्त्र्यहादिरूपाच्छुद्धिरिति
।अपरार्केत्वाशौचकालंत्रिधाविभज्यनिर्गुणविषयत्वेनेदमुक्तं।अस्यनिर्मूलत्वोक्तिरज्ञोक्तिरेव।अतःपूर्वाशौचा
त्परात्रावन्याशौचेहोरात्रद्वयमाधिक्यं।रात्रेरन्त्ययामेतुदिनत्रयमितिभट्टचरणोपदिष्टःपंथाः।एतत्संपूर्णाशौच
संपातएव।त्रिरात्रादिसंपातेतुपूर्वशेषेणैवशुद्धिः।द्विरात्रादिवृद्धेःपूर्ववाक्येदशाहविषयत्वादपवादाभावेशेषशु
द्धेरेवसामान्यतःप्रवृत्तिरितिषडशीतौ।तुदशाहांतेअहापातेद्वित्रिदिनवृद्धिरुक्ता।।रात्रिशेषेपराशौचंपूर्वेणाधि
कमापतेत।ऊर्ध्वंदिनद्वयंपूर्वाद्यामशेषेदिनत्रयमिति।अनधिकंसमंन्यूनंवा।तत्तुच्छंनिर्मूलत्वादंतेपक्षिण्यादिपातेद्विरा णमः
त्रादिवृद्ध्यापत्तेश्च।पूर्वाशौचांतवर्द्धितद्वित्रिदिनमध्येऽधिकाशौचांतरपातेतुवर्द्धितस्याल्पत्वादधिकेनैवशुद्धिः।अथवा

दांतमाह शंखः॥ मातर्यग्रे प्रमीतायामशुद्धौ म्रियते पिता॥ पितुः शेषेणशुद्धिः स्यान्मातुः कुर्यात्तु पाक्षिणी॥ पादत्रयं स्पष्टं। चतुर्थस्य त्वयमर्थः॥ पित्राशौचमध्ये मातृमृतौ पित्राशौचाति मातुः पाक्षिणीमधिकां कुर्यादिति। अत्र शुद्धावित्युक्ते एतमहादेः॥ पितुराशौचाभावान्मातृमरणेन पाक्षिणी॥ किंतु पूर्णमाशौचं। इयं च पक्षिणी तत्तीयादिदिनपरानाद्यादिनद्वये। प्रतिनिमित्तं नैमित्तिकावृत्तिरिति न्यायापवादः पूर्वशेषापवादत्वात्। इति पितृचरणाः॥ सपिंडाद्याशौचेन मातापित्रोराशौचापगमो नास्त्येव। एवं भर्तुरपि। इयं च पाक्षिणी दशमदिनात् सर्वे मातृमरणे ज्ञेया। दशम्यां रात्रौ प्रभाते वा मातृमरणे घ्यहत्र्यहसमुचितापाक्षिणीति कश्चित्। तन्न। संख्यांतरोपजननेनापत्यात्र्यहादिश्रुतिबाधापत्तेः। अत एवैकादेया रात्र्यादौ कृतसंख्याबाधापत्तेः समुच्चयो निरस्तो द्वादशगुहाणीत्स घस्रेतर्गतेः गुरुणा लघुबाधादित्युक्तेः। श्वामातुरारोहणे तु न पाक्षिणी। यदा नारी विशेदग्निं प्रियस्य प्रियवांछया। तदाशौचं विधातव्यं भर्तृशौचक्रमेण हि। इति पृथ्वीचंद्रोदये हारीतोक्तेः। षडशीतिमतेऽपि। मृतं पतिं। मृतं पतिमनुव्रज्य पत्नी चेदनलं गता। न तत्र पाक्षिणी कार्या पैतृकादेव शुध्यति। पुत्रो वान्योऽपि दत्तस्यास्तावदेवाशुचिस्तयोः॥ नव श्राद्धं चापि पिंडं च सुतापत्तु समापयेत्॥ गृहीताशौचानां पुत्राणां पितुः संस्कारे मातुः सपिंडस्य वा मरणेनायं निर्णयः॥ अतिक्रांतकालाद्विद्यमानो निमित्तस्यबल

३२९

वत्वात्। द्वादशवर्षोत्तरं संस्कारशौचे प्रत्यक्षमरणेप्येवं। यत्तु। अपरार्के। ब्राह्मण्ये। ऋग्वेदवाद्दात्साध्वी स्त्रीन भवेदात्मघाति
नी। त्र्यहाशौचे तु निर्वृत्ते श्राद्धं प्राप्नोति शास्त्रवदिति। तदन्ते शौचोत्तरं मन्वारोहणे त्रिरात्राशौचपरमिति पृथ्वीचंद्रः। तत्क्ष
णादेशान्तरिमाद्यनुगमनेल्पाशौचपरं। शुद्धितत्वादयो गौडास्तु। भर्त्रशौचोत्तरमन्वारोहणे त्रिरात्रं गृहगमने तु सं
पूसमुद्दहृतस्य सद्यःशौचेन्वारोहणे ब्राह्मण्योक्तेः द्विरात्रत्वाद्भर्तुः पित्र्यहेणा पिंडदानं। एकचितौ तु सद्यःशौचमित्या
द्धः। अन्यत्प्राग्युक्तं। पूर्वशेषेणाशुद्धेरपवादांतरमुक्तं षडशीत्यां। पूर्वाशौचेऽन्यया शुद्धिः सूतके मृतके च सा। सूतिका
मग्निदं विना। मूल्येन दाहकरणे। मातुलादिसंबंधे दाहमात्रकरणे त्रिरात्रमेवेत्युक्तं प्राक्। वृद्धात्रिः। सूतका
द्द्विगुणं शावं शावाद्द्विगुणमार्तवं। आर्तवाद्द्विगुणा सूतिस्ततोपि शवदाहकः। इति। यथाशौचे संपातितेऽपि न शा
बजनन प्रतिबंधः। आशौचे तु समुत्पन्ने पुत्रजन्म यदा भवेत्। कर्तुस्तात्कालिकी शुद्धिः पूर्वाशौचेनु शुध्यती
ति प्रजापतिस्मृतेः। आशौचे द्विविधेपीत्यर्थः। शातातपः। अंतर्दशाहे जननात्पश्चात्स्यान्मरणं यदि। प्रेतमुद्दि
श्य कर्तव्यं पिंडदानं यथाविधि। प्रोरब्धे प्रेतपिंडे तु मध्ये ऽजननं भवेत्। तथैवाशौचपिंडांस्तु शेषान्दद्याद्यथा एम्कः
विधि। मातुः पक्षिणो मध्ये पितुरेकादशाहे च कुर्यात। आद्यं श्राद्धमशुद्धोपि कुर्यादेकादशेहनीति स्मृतेः। अथाशौ

चापवादः॥सपंचधा।कर्तृतः॥कर्मतः॥द्रव्यतः॥मृतदोषतः॥विधानाच्च।आद्यो ब्रह्मचारीपत्न्यादिषु।नैष्ठिकानांवनस्थानां यतीनांब्रह्मचारिणां।नाशौचंकीर्तितंसद्भिः पतितेचतथामृते।इतिकौर्मोक्तेः॥तुर्यपादेशावेवापितथैवचेति।देवलपाठः॥ आशौचमंत्यकर्मोपलक्षणं।ब्रह्मचारीनकुर्वीतशवबाहादिकाःक्रियाः॥यदिकुर्याच्चरेत्कृच्छ्रंपुनःसंस्कारमेवचेतिदेवलोक्तेः॥एतत्पित्राद्यतिरिक्तविषयं।आचार्यंस्वमुपाध्यायंमातरंपितरंगुरुं॥निर्हृत्यतुव्रतीप्रेतंनव्रतेनवियुज्यते॥इतिमनूक्तेः॥निर्हरणमंत्यकर्मपरं॥एवंमातामहस्य।यथाव्रतस्थोपि सुतःपितुःकुर्यात्क्रियांनृप।तथामातामहस्य॥पिदौहित्रःकर्तुमर्हतीतिभविष्योक्तेः॥मातापित्रोरुपाध्यायस्याचार्यस्योर्ध्वदेहिके।कुर्वन्मातामहस्यापिव्रतीनभ्रश्यतेव्रतात्।इतिकालादर्शाच्च।तत्रांत्यकर्मनिमित्तमस्पृश्यत्वंदशाहमस्त्येव।असगोत्रोवासगोत्रोवायोग्निंदद्यात्सखेनरः॥सोपिकुर्यान्नवश्राद्धंशुध्येत्तुदशमेहनीतिदिवोदासोक्तवचनात्।अतएव।ब्रह्मचारिणःशवकर्मिणोव्रतान्निवृत्तिरन्यत्रमातापित्रोर्गुरोरेष्वेतिगौतमीये।व्रतनिवृत्तेरेवपर्युदासोनाशौचस्य।संध्यादिकर्मलोपस्तनास्ति।नत्यजेत्सूतकेकर्मब्रह्मचारीस्वकंक्वचित्।इतिछंदोगपरिशिष्टात्।पित्रोर्गुरोर्विपत्तौतुब्रह्मचार्यपियस्तुतःस्वव्रतस्थापिकुर्वीतवह्निपिंडोदकक्रियां।तेनाशौचंनकर्त्तव्यंसंध्याचैवनलुप्यते।अग्निका

र्यं च कर्त्तव्यं सायं प्रातस्त्वनित्यशः ॥ इति चंद्रिकायां संवर्त्तोक्तेः ॥ अत्र कर्मानाधिकाररूपशौचनिषेध एव ॥ अपरार्के माध
वादयस्तु ॥ एकाहमाशौचमाहुः ॥ आचार्ये चाप्युपाध्याये गुरौ वा पितरि च वा ॥ मातरि वा स्वयं दग्ध्वा व्रतस्थस्तत्र भोजनं ॥
कृत्वा पतति नो तस्मात्प्रेतान्नं तत्र भक्षयेत् ॥ अन्यत्र भोजनं कुर्यान्न च तैः सह संविशेत् ॥ एकाहमशुचिर्भूत्वा द्विती
येह्नि शुध्यतीति ब्राह्मोक्तेः ॥ तदन्नभोजने तु प्रायश्चित्तं ॥ पुनरुपनयनमाशौचं वा दिवोदासादयस्तु ब्राह्मे ॥ प्रथ
मेह्नि संध्यादिलोपश्च ब्रह्मचारी यदा कुर्यात् पिंडनिर्वपणं पितुः ॥ तावत्कालमशौचं स्यात्पुनः स्नात्वा विशुध्यतीति
प्रजापतिवचनात् ॥ द्वितीयाहादौ पिंडदानकाल एवास्पृश्यत्वमात्रं नान्यदित्याहुः ॥ दशाहमस्पृश्यत्वेपि कर्मा
स्नानार्थमेतदित्युक्तं ॥ अंत्यकर्माकरणे तु ब्रह्मचारिणः पित्रादिमरणेप्याशौचाभाव एव ॥ सोपि ब्रह्मचर्यकाल
एव ॥ समावर्त्तनोत्तरं तु पूर्वमृतानां त्र्यहाशौचं भवत्येव ॥ आदिष्टी नोदकं कुर्यादाव्रतस्य समापनात् ॥ समाप्ते तूद
कं दत्वा त्रिरात्रमशुचिर्भवेदिति मनूक्तेः ॥ तत्रापि विकल्पः ॥ पितर्यपि मृते नैषां दोषो भवति कर्हिचित् ॥ आशौचं क
र्मणोंते स्यात्त्र्यहं वा ब्रह्मचारिणां ॥ इति छंदोगपरिशिष्टात् ॥ तथा कृतजीवच्छ्राद्धेन किमप्याशौचं न कार्यमिति हेमा रामः
द्रिः ॥ शुद्धितत्त्वे कौर्मे ॥ सद्यः शौचं समाख्यातं दुर्भिक्षे चाप्युपद्रवे ॥ डिंबाहवहतानां च विद्युता पार्थिवैर्द्विजैः ॥ उपसर्गमृ

तेचैवसद्यःशौचंविधीयते। इतिपराशरोक्तेः। उपसर्गोत्थंतमरकइतिशूलपाणिनिरूढमहादयः। यावल्क्योपि। आपद्यपि
चकष्टायांसद्यःशौचंविधीयते। इतिमरणसमयेपिनाशौचं। तथाचशुद्धिरत्नाकरेदक्षः। स्वस्थकालेत्विदंसर्वंसूतकं
परिकीर्त्तितं। आपद्गतस्यसर्वस्यसूतकेपिनसूतकं। अतःसतिवैराग्येसंन्यासोप्यातुरस्यभवतीतिकेचित। अथक
मेतः। त्रिंशच्छ्लोकी। तत्रकार्येषुसत्रिव्रतियतिनृपवद्दीक्षितार्त्विक्कलदेशभ्रंशापत्स्वनेकश्रुतिपठनभिषक्कारुशिल्पा
तुराणां। संप्रारब्धेषुदानोपनयनयज्ञश्राद्धपुहूप्रतिष्ठाचूडातीर्थयात्राजपपरिणयनाद्युत्सवेषेतदर्थेनाशौ
चमितिशेषः। सत्रीअन्नसत्रवान्। मुख्यसत्रस्यदीक्षितपक्षात्सिद्धोव्रतीअनंतव्रतादिनियमवान्। नर्वतनांव्रते
इतिविष्णूक्तेः। प्रचेताः। कारवःशिल्पिनोवैद्यादासीदासास्तथैवच। राजानोराजभृत्याश्चसद्यःशौचाःप्रकीर्त्तिताः। कु
स्वःसूपकाराद्याः। शिल्पिनश्चैलनिर्णेजकाद्याः। आतुरस्यव्याधिनाशार्थेदानादौ। तुलादानादेःप्रारंभोनांदीश्रा
द्धसंकल्पोवा। यज्ञनंतडागोत्सर्गकोटिहोमादि। लघुविष्णुः। व्रतयज्ञविवाहेषुश्राद्धेहोमेर्चनेजपे। आरब्धेसूतकं
नस्यादनारब्धेतुसूतकं। प्रारंभोवरणंयज्ञेसंकल्पोव्रतसत्रयोः। नांदीश्राद्धंविवाहादौश्राद्धेपाकपरिक्रियेति। पाकस्य
परिसमंतात्क्रियापाकप्रोक्षणमितिशुद्धिप्रदीपः। तन्मंदांतीर्थेति। आशौचेआकस्मिकतीर्थप्राप्तौ। विवाहयज्ञ

र्गेषु यात्रायां तीर्थे कर्मणि। न तत्र सूतकं तद्वत्कर्म यज्ञादिकारयेदिति पैठीनसिस्मृतेः। अत्र विशेषः प्रागुक्तः। जपः पुरश्चर
णादिः स्तोत्रपाठ अविच्छेदेन संकल्पित हरिवंशश्रवणादिश्च। अतएवोक्तं ब्राह्मे। गृहीतनियमस्यापि न स्यादन्य
स्य कस्यचिदिति। एवं देवपूजादि। गौडशुद्धितत्वे मंत्रमुक्तावल्यां। जपो देवार्चनविधिः कार्यो दीक्षान्वितैर्नरैः। नास्ति पापं
यतस्तेषां सूतके वा यतात्मनां। राघवभट्टीये नारदः। अथ सूतकिनः पूजां वक्ष्याम्यागमनोदितां स्नात्वा नित्यं च वि
वर्त्स्यमानसत्क्रियया तु वै। बाह्यपूजांक्रमेणैव ध्यानयोगेन पूजयेत्। यदि कामी न चेत्कामी नित्यं पूर्ववदाचरेत्।
यत्तु नृसिंहकल्पे। सदा मंत्रजपं मुक्त्वा यदि स्यादशुचिर्नरः। मनसा विहितस्तत्र स्मरेन्मंत्रं न तूच्चरेत्। तन्मूत्राद्य
शौचपरं। एवमर्चनचंद्रिकायां। अशुचिर्वाशुचिर्वापि गच्छंस्तिष्ठन्स्वपन्नपि। मंत्रैकशरणो विद्वान्मनसैव त
दाभ्यसेत्। कालनियमाभावे तु हेयमेव। उत्सवोद्यापादिषु। एषु नाशौचं। अयं चाशौचाभावोनन्यगतित्वे आर्त्तै
च ज्ञेयः। अत्र मूलमाकरे स्पष्टं। अवदीक्षितस्यावभृथात्पूर्वमेवाशौचाभावः। तदादित्वाशौचमहत्येव प्रागवभृ
थात्करोति स्नाता यामवभृथ इति पत्न्या रजसि विशेषोक्तेः। अपत्राशुचित्वस्य तत्कल्पत्वात्। तेन च वैतानोपासनाः का
र्याः इति वैतानत्वेऽप्यवभृथादिनभवत्येव। अतएवोक्तं माधवस्यूनसूतकवीये। ब्राह्मे। तद्वद्गृहीतदीक्षस्य त्रैविद्यस्य म

राम:

होमएवस्नानंत्ववमस्थेयावद्व्रतावत्तस्यनमस्तकमिति। वैतानोपासनाःकार्याइत्यनेनैवाग्निहोत्राविज्ञांदीक्षितानांचेतिपु
नर्दीक्षितग्रहणंयजमानेस्वयंकर्तव्यतार्थं। स्नानमप्यस्यर्थवेतिविज्ञानेश्वरः। वस्तुतस्तुदीक्षणीयासंस्कृतस्यप्रागवभृ
थात्कर्मपात्कर्मप्राप्त्यर्थंदीक्षितग्रहणं। तथाचस्कंदेहोमपरिशिष्टेनदीक्षितएपाःपंयज्ञेनकृच्छ्रादितपश्चाग्निहोति
शुद्धितत्त्वेप्येवं। ऋत्विजांचमधुपर्कात्परमाशौचाद्यभावः। गृहीतमधुपर्कस्ययजमानाच्चऋत्विजः। पश्चादाशौचेपति
तेनभवेदितिनिश्चितंमिति। ब्राह्म्यात। अतएवगार्ग्यांडराः। चतुर्णांचरणापन्नेन्येषोमाशौचेन्येआगमापितव्याः।
इत्याह एवंस्मार्त्तेपितुलाकोटिहोमादौमधुपर्कोसतिदोषाभावोज्ञेयः। यत्तुप्रारंभोवरणंयज्ञेइतितत्रापिमधु
पर्कोत्तरंज्ञेयं। तेनाधानेपिपशुबंधादौतदभावेन्येभवतीतिसिद्धं। अपवादांतरमाहयाज्ञवल्क्यः। नोपासनाःका
र्याःक्रियाश्चश्रौतिनोदनात्। तत्रत्यागमात्रेस्नानोत्तरं। श्रौतेकर्मणितत्कालंस्नातःशुद्धिमवाप्नुयात्। इतिस्मृतेः।
त्यागातिरिक्तेतुश्रौतेस्मार्त्तेवान्यस्यैवकर्तृत्वं। सूतकेमृतकेचैवअशक्तौश्राद्धभोजने। प्रवासादिनिमित्तेषुहाव
येन्नतुहापयेत्। इतिबृहस्पत्युक्तेः। नित्यानिविनिवर्त्तेरन्वैतानवर्ज्जंशालाग्नौचैकेन्यएतानिकुर्युरितिपैठीन
सिस्मृतेश्चेति। विज्ञानेश्वरः। एकग्रहणंपूजार्थं। तेनस्मार्त्तेकार्यमेवेतिहारलतायां। दाक्षिणात्यास्तुविकल्प

३२९

माङ्कः॥ अपरार्कादिनिबंधात्तु श्रौतं सर्वं स्वयं कर्तव्यं। स्मार्तं तु त्यागमतिरिक्तं न्यस्यैव कर्तव्यं। त्यागमात्रे तु स्वस्य कर्म वैतानि
कं कार्यं। स्नानोपस्पर्शनात्स्वयं। इति हारीतोक्तेः। दर्शं च पौर्णमासं च कर्म वैतानिकं च यत्। सूतके पि त्यजन्मोहात्प्रायश्चि
त्तीयते द्विजः। इति मरीच्युक्तेः। जन्महान्योर्वितानस्य कर्मत्यागो न विद्यते। इति हारीतोक्तेः। शालाग्नौ केवलो होमः
कार्य एवान्यगोत्रजैः। इति जाबालोक्तेश्चेत्याहुः। आशार्केप्येवं। याज्ञिका अप्येवं। सूतके तु समुत्पन्ने स्मार्तं कर्म क
थं भवेत्। पिंडयज्ञं चरुं होमम् असगोत्रेण कारयेत्। इति जातूकर्ण्योक्तेश्च हुः स्मार्तं स्थालीपाकः। श्रवणाकर्मादिश्चेति
विज्ञानेश्वरः। प्रारब्धं तु असपिंडेनापि कार्यं। न च तत्कर्म कुर्वाणः सनाभ्योप्यशुचिर्भवेदिति मनूक्तेः॥ छंदोगपरिशिष्टेपि
होमः श्रौते तु कर्तव्यः शुष्कान्नेन फलेन वा। अकृतं हावयेत्स्मार्ते तदभावे कृताकृतं। अकृतं व्रीह्यादि कृताकृतं तंडु
लादि। स्मार्तहोमादौ विकल्पः। शालाग्नौ चैके प्रागुक्तेः। यदा करणं तदान्यद्वारा। अत्रेदं तत्त्वं। येषां बह्वृचादीनां द्वा
दशाहमहोमेपि नाग्निविच्छेदस्तैर्न कार्यं। तैत्तिरीयादेस्तु कार्यं। चतूरात्रमहूयमानोग्निर्लौकिकः संपद्यते। इति सुद
र्शनभाष्ये वचनात्। समारूढेग्नौ तेनापि न कार्यो। किंतु पुनराधानमेव समारोपप्रत्यवरोहयोराशौचापवादाभावा एमः
दनन्यकर्तृकत्वाच्च। अन्यथा पुनराधानमपि स्यात्। यत्त्वाश्वलायनः। तेनापि सूतके शावे पर्वणीष्टिं महापदि। पुष्प

वत्यांचभार्यायांनकुर्यात्तांकदाचन।स्मार्त्तोग्निः सूतके शावेस्वयंनजुहुयाद्द्विजः॥श्रौताग्निस्तुसकृद्धुत्वा समासेवास्वयंकृनेत।
इतितदपिसमारूढपरं। तत्राह स एव। स्मार्त्तोग्निरात्मनोन्येषामभावे सूतकादिषु। समारोप्यतदात्मसु वित्हृत्यजुहुयात्स्वयं। इ
ति। तथाह मनुः॥ प्रत्यूहेन्नाग्निषुक्रियेति। वैश्वदेवस्यतथिसाध्यत्वेपिनिवृत्तिः॥ विप्रोदशाहमासीतवैश्वदेवविवर्जितः इ
ति। संवर्त्तोक्तेः॥ यद्यपिपंचयज्ञविधानंतुनकुर्यान्मृत्युजन्मनोरितितेनैवोक्तेः॥ पूर्वनिषेधोव्यर्थः॥ तथाप्यापस्तंबादीनां
वैश्वदेवस्यपंचयज्ञभिन्नत्वात्पृथक्‌निषेधः॥ हरदत्तस्त्वाशौचेपिवह्नौवैश्वदेवःकार्यः॥ तस्य ह्यावनध्यायोयदात्माशुचि
र्महेशइति ब्रह्मयज्ञस्यैवाशौचे विशिष्यनिषेधात्। संध्यादीनामप्यपवादमाह। अपरार्केपुलस्त्यः॥ संध्यामिष्टिंचरुंहोम
मंयावज्जीवंसमाचरेत्। नत्यजेत्सूतकेचापित्यजन्गच्छेदधोद्विजः॥ सूतकेमृतकेचैवसंध्याकर्मसमाचरेत्। मनसोच्चा
रयेन्मंत्रान्प्राणायाममृतेद्विजः॥ पद्मचंद्रिकायांजाबालिः॥ संध्यापंचमहायज्ञान्नैत्यकंस्मृतिकर्मच। तन्मध्ये
हापयेत्तेषांदशाहांतेपुनःक्रियेति। संवर्त्तः। सूतकेकर्मणांत्यागःसंध्यादीनांविधीयते। यच्च। विष्णुपुराणे। सर्वकाल
मुपास्थानंतुसंध्ययोःपार्थिवेष्यते। अन्यत्रसूतकाशौचविभ्रमातुरभीतितः। इतितत्पूर्णसंध्यापरं। अर्घ्यांतामानसी
संध्याकुशवारिविवर्जिता। इतिशुद्धिदीपेच्यवनोक्तेः। पैठीनसिस्त्वर्घ्यंमंत्रोच्चारणमाह। सूतकेसावित्र्यांजलिंप्राद्दि

प्पसूर्यंध्यायन्ननमस्कुर्यात्।भरद्वाजोपि।सूतकेमृतकेकुर्यात्प्राणायाममंत्रकं।तथामार्जनमंत्रा स्तुमनसोच्चार्यमार्जयेप
त्।गायत्रींसम्यगुच्चार्यसूर्यायार्घ्यंनिवेदयेत।अमार्ज्जनंतलनवाकार्यमुपस्थानंनचैवहि।ग्रहणेश्राद्धदावप्पाशौचाप
वादमाहव्याघ्रः।स्मार्तकर्मपरित्यागोराहोरन्यत्रसूतके।इतिलैंगोपि।सूतकेमृतकेचैवनदोषोराहुदर्शने।तावदेव
भवेच्छुद्धिर्यावन्मुक्तिर्नदृश्यते।प्रयोगपारिजाते।बृहस्पतिः।कन्याविवाहेसंक्रांतौसूतकंनकदाचनं।वृद्धशातातपः।
यद्वाभोजनकालेतुअशुचिर्भवतिद्विजः।भूमौनिक्षिप्यतंग्रासंस्नात्वाविप्रोविशुध्यति।भक्षयित्वातुतंग्रासमहोरात्रेण
शुध्यति।अशित्वासर्वमेवान्नंत्रिरात्रेणविशुध्यति।इदमविशेषात्सूतकद्विपरमिति।शुद्धितत्वेशूलपाणोश्चा।अथ
द्रव्यतः।मरीचिः।लवणेमधुमांसेचपुष्पमूलफलेषुच।शाककाष्ठतृणेष्वप्सुदधिसर्पिःपयःसुच।तिलौषधा
जिनेचैवपक्वापक्वेस्वयंग्रहः।पण्येषुचैवसर्वेषुनाशौचंमृतसूतके।स्वयमेवस्वाम्यनुज्ञयाग्राह्यं।नतद्धस्तादित्य
र्थः।क्रयेतुतद्धस्तादपिनदोषः।पक्वंलड्डुकादि।अपक्वंतंडुलादि।एतदन्नंसत्रपरं।अन्नंसत्रप्रवृत्तानामामंग्राह्य
मगर्हितं।भुक्त्वापक्वान्नमेतेषांत्रिरात्रंतुव्रतीभवेत्।इत्यंगिरसोक्तेः।पक्वान्नंमोदकादिनभक्ष्यं।षड्त्रिंशन्मते।उभा एमः
भ्यामपरिज्ञातेसूतकंनैवदोषकृत्।एकेनापिपरिज्ञातेभोक्तुर्दोषमुपावहेत्।विवाहोत्सवयज्ञेषुत्वंतरामृतसू

तक्रोपरैरन्नं प्रदातव्यं भोक्तव्यं च द्विजोत्तमैः। भुंजानेषु तु विप्रेषु त्वंतराम्मृतसूतके। अन्यगेहोदकाऽचांताः सर्वे ते शुचयः स्मृ-
ताः। बृहस्पतिः॥ विवाहोत्सवेत्याद्युक्त्वा। पूर्वसंकल्पितान्नेषु न दोषः परिकीर्तितः। षडशीतौ। संसर्गाद्यस्य चाशौचं यस्याति-
क्रांतकालता। तदीयस्य पदार्थस्य नाशौचं विद्यते क्वचित्। शुद्धितत्वे। शुध्येदित्यनुवृत्तौ विष्णुः। प्रोक्षणेन पुस्तकमिति।
अथ मृतदोषे। हेमाद्रौ षट्त्रिंशन्मते कौर्मे च। व्यापादयेद्य आत्मानं स्वयमग्न्युदकादिभिः। विहितं तस्य नाशौचं नापि कार्यो-
दका क्रिया। शवदर्शनमाशौचमत्ये वा हतानां नृपगोविप्रैरन्वक्षं चात्मघातिनामिति याज्ञवल्क्योक्तेः। शुद्धितत्वे कौर्म्ये। सद्यः
शौचं समाख्यातं शापादिमरणे तथा। आदिपदाद्भिचारहते। भविष्ये। स्वेच्छया मरणं विप्राः शृंगिदंष्ट्रिसरीसृपैः। अंत्य-
त्यजविषोद्बंधैरात्मना चैव ताडनैः। पाषंडमाश्रिताश्चैव महापातकिनस्तथा॥ स्त्रियश्च व्यभिचारिण्य आरूढपतिता-
स्तथा॥ न तेषां स्नानसंस्कारो नाशौचं नसपिंडनं। गौतमः। प्रायोनाशकशस्त्राग्निविषोदकोद्बंधनप्रपतनैश्चेच्छता-
मिति। नाशौचमिति शेषः। अंगिराः। चंडालादुदकात्सर्पाद्ब्राह्मणाद्वैद्युतादपि। दंष्ट्रिभ्यश्च पशुभ्यश्च मरणं पापकर्म-
णां। उदकं पिंडदानं च प्रेतेभ्यो यत्प्रदीयते। नोपतिष्ठति तत्सर्वमंतरिक्षे विनश्यति। षट्त्रिंशन्मतेप्येवं। ब्राह्मेपि। शृंगि-
दंष्ट्रिनखिव्यालविषवह्निक्रियाजलैः। व्यालो गजः। सुदूरात्परिहर्तव्यः कुर्वन्क्रीडां मृतेस्तु यः। नागानां विप्रियं कुर्वन्

हतश्चाप्यथ विद्युता। निगृहीतः स्वयं राज्ञा चौर्यदोषेण कुत्रचित्। पारदारान्हरंतश्च द्वेषात्तु पतिभिर्हताः। असमानैश्च संकी-
र्णैश्चंडालाद्यैश्च विग्रहं। कृत्वा तैर्निहतास्तद्वच्चंडालादीन्समाश्रिताः। शस्त्राग्निगरदाश्चैव पाखंडाः क्रूरबुद्धयः। क्रोधा-
त्प्रायं विषं वह्निं शस्त्रमुद्बंधनं जलं। गिरिवृक्षप्रपातं च ये कुर्वंति नराधमाः। कुशिल्पजीविनो ये च सूनालंकारधारिणः।
मुखेभगास्तु ये केचित् क्लीबप्राया नपुंसकाः। ब्रह्मदंडहता ये च ये चापि ब्राह्मणैर्हताः। महापातकिनो ये च पतिता-
स्ते प्रकीर्तिताः। पतितानां न दाहः स्यात् नांत्येष्टिर्नास्थिसंचयः। न चाश्रुपातः पिंडो वा कार्यं श्राद्धादिकं क्वचित्। एतानि पतितानां
तु यः करोति विमोहितः। तप्तकृच्छ्रद्वयेनैव तस्य शुद्धिर्न चान्यथा। एतद्बुद्धिपूर्वं। सर्वेषां करणे तु माधवीये। वसिष्ठः। य आत्म-
त्यागिनां कुर्यात् स्नेहात् प्रेतक्रियां द्विजः। स तप्तकृच्छ्रसहितं चरेच्चांद्रायणं व्रतं। अज्ञाने तु। कृत्वाग्निमुदकं स्नानं स्पर्शनं व-
हनं कथां। रज्जुच्छेदाश्रुपातं च तप्तकृच्छ्रेण शुध्यतीति ज्ञेयं। प्रत्येकं बुद्धिपूर्वे एतदिति मदनपारिजातः। प्रत्येकं तु स्पर्शाश्रुकरणे
मिति शरणायां ज्ञेयं। तच्छवकेवलस्पर्शाश्रुवाद्यानि तत्पर। पूर्वोक्तानामकारी चेदेकरात्रमभोजनं। एकरात्रं तु नाश्रुपाते त्रिरा-
त्रं बुद्धिपूर्वकं। इति माधवीये उत्तरार्द्धे। अन्येषु तु संवर्त्तः। एषामन्यतमं प्रेतं यो वहेत दहेत वा। कटोदकक्रियां कृत्वा कृच्छ्रं
सांतपनं चरेत्। अज्ञाने त्वर्द्धं। एतदनाहिताग्नेः। आहिताग्नेः कृच्छ्रमेवेति माधवः। मिताक्षरायां। आत्मनस्त्यागिनां नास्ति

एणः

पतितानांतथा॥ क्रियातेषामपितथागंगातोयेसंस्थापनमतं। आहिताग्नेस्तु। विशेषोहेमाद्रौभविष्ये स्वेतानंप्रक्षिपेदप्सु आवसथ्यंचतुष्पथे। पात्राणितुदहेदग्नौसाग्निकेपापकर्मणि। छंदोगपरिशिष्टेपि। महापातकसंयुक्तोदैवात्स्यादग्निमान्यदि। पुत्रादिःपालयेदग्नीन्युक्तआदोषसंक्षयात्। प्रायश्चित्तंनकुर्याद्यःकुर्वन्वाम्रियतेयदि। गृह्यंनिर्वापयेच्छ्रौतमप्स्वस्येत्सपरिच्छदं। पात्राणिदद्याद्विप्रायदहेदप्स्वेववाक्षिपेत्। माधवीयेपराशरः॥ आहिताग्निर्मृतोविप्रश्चंडालेनात्मघातकः॥ दहेतब्राह्मणोविप्रोलोकाग्नौमंत्रवर्जितं। प्राजापत्यंचरेत्पश्चाद्विप्राणामनुशासनात्। दग्ध्वास्थीनिपुनर्गृह्यक्षीरेणप्रक्षालयेत्ततः॥ स्वेनाग्निनास्वमंत्रेणपृथगेनंपुनर्दहेत्। हेमाद्रौतु। दाहयित्वाशवंतेषांभूयोविधिपूर्वकमित्युक्तेः। एतद्दर्पादिनामरणेज्ञेयं। प्रमादमरणेतुआशौचादिसर्वंभवत्येव। तदाहांगिराः॥ अथकश्चित्प्रमादेनम्रियताग्न्युदकादिभिः। तस्याशौचंविधातव्यंकर्तव्याचोदकक्रियेति। ब्राह्मेपि। प्रमादादपिनिःशंकस्त्वकस्माद्विधिचोदितः। शृंगिदंष्ट्रिनखिव्यालविषविद्युज्जलादिभिः॥ चंडालैरथवाचौरैर्निहतोवापिकुत्रचित्। तस्यदाहादिकंकार्यंयस्मान्नपतितस्तुसइति। प्रमादमरणेत्रिरात्रमाशौचमितिगौडाः॥ शुद्धितत्वादयः। दशाहादीतिदाक्षिणात्याः। अस्यापवादोहेमाद्रौभविष्ये। प्रमादादिच्छयावापिनकुर्यात्सर्पहतोमृतेनागपूजांविनानकुर्यादित्यर्थः। बौधायनोपि। बुद्धिपूर्वामहत्यानांक्रियापालो

पोविधीयते॥ क्रियांत्यकर्म। तत्र दुर्मरणनिमित्तं दानं कार्यं। तच्च विश्वप्रकाशादौ शातातपीये च। व्याघ्रेण निहते विप्रे विप्रकन्यां
विवाहयेत्। सर्पदष्टे नागबलिर्देयः सर्पश्च कांचनः। चतुर्निष्कमितं हैमं गजं दद्याद्गजैर्हते। राज्ञाभिनिहते दद्यात्पुरुषं तु हिर
ण्मयं। चौरेण निहते धेनुं वैरिणा निहते वृषं। वृषेण निहते दद्याद्यथाशक्ति च कांचनं। शय्यामृते प्रदातव्या शय्या तूलीस
मन्विता॥ निष्कमात्रसुवर्णस्य विष्णुनामसमाधिष्ठिता। शौचहीने मृते चैव द्विनिष्कस्वर्णजं हरिं। संस्कारहीने च मृते। कुमा
रमुपनाययेत्॥ निष्कत्रयस्वर्णमितं दद्यादश्वं हयाहते। शुनाहते क्षेत्रपालं स्थापयेन्निजशक्तितः। शूकरेण हते दद्यान्म
हिषं दक्षिणान्वितं। कृमिभिश्च हते दद्याद्गोधूमान्यं च खारिकाः। वृक्षं वृक्षहते दद्यात्सौवर्णं वस्त्रसंयुतं। अग्निना निहते
कार्यमुदपानं स्वशक्तितः। दारुणा निहते चैव कर्तव्या सदने सभा। शस्त्रेण निहते दद्यान्महिषीं दक्षिणान्वितां।
अश्मना निहते दद्यात्सवत्सां गां पयस्विनीं॥ विषेण च मृते दद्यान्मेदिनीं हेमनिर्मितां। उद्बंधनेन च मृते कापिं कनक
र्मितं। जले जलेन वरुणं हैमं दद्याद्द्विनिष्कजं॥ विसूचिकामृते स्वादु भोजयेच्च शतद्विजान्। घृते धेनुस्तु दातव्या कं
ठान्नकवले मृते। कासरोगेण च मृते अष्टकृच्छ्रव्रतं चरेत्। अभिचारमृते लक्षं गायत्र्याः प्रयतो जपेत्। शाकिन्यादिग्र
हग्रस्ते जपेद्रुद्रं यथोदितं। विद्युत्पातेन निहते विद्यादानं समाचरेत्। अंतरिक्षमृते कार्यं वेदपारायणं तथा। सच्छास्त्रपुस्त

एमः

कंदद्यादस्पृश्यस्पृश्यतोमृते। पतितेचमृतेकुर्यात्प्राजापत्यांस्तुषोडश। मृतेचापत्यरहितेकृच्छ्राणांनवतिंचरेत्। एवं
कृतेविधानेतुविदध्यादौर्ध्वदेहिकं। तथावैधमरणेपिनदोषः। तदाहतुर्मनुवृद्धगौ। वृद्धःशौचस्मृतेर्लुप्तप्रत्याख्या
ताभिषक्क्रियः। आत्मानंघातयेद्यस्तुभृग्वग्न्यनशनांबुभिः। तस्यत्रिरात्रमाशौचंद्वितीयेत्वस्थिसंचयः। तृतीयेतूदकं
दत्वाचतुर्थेश्राद्धमाचरेदिति। हेमाद्रौविष्णुधर्मे। नरस्तुव्याधिरहितोनत्यजेदात्मनस्तनुं। असूर्यानामयेलोकाअं
धेनतमसावृताः। तांस्तेप्रेत्याधिगच्छंतियेकेचात्महनोजनाः। अरिष्टेनात्मनोज्ञात्वामृत्युकालमुपस्थितं। व्याधि
तोभिषज्ञात्यक्तःपूर्णोवामुष्टिवात्मनः। यथाशास्त्रानुसारेणसंत्यजेदात्मनस्तनुंतस्मिन्कालेतुत्यागाद्यद्येष्टफ
लमाप्नुयात्। आयुषस्तुपुरादृष्टंमरणंब्राह्मणस्यचनेतिगौडानामपपाठः। उत्तरार्द्धासंगतेः। क्षत्रियस्यतुसंग्रा
मेमृतेमहोदयोषितः। अपरार्केब्रह्मगर्भः। योजीवितुंनशक्नोतिमहाव्याध्युपपीडितः। सोऽग्न्युदकंमहायात्रां
प्रकुर्वन्नात्रदुष्यति। अत्रोक्तवक्ष्यमाणवचोनिचयात्प्रयागातिरिक्तेऽचिकित्स्यरोगाद्युपहतानामधिकारः
सोपिजीर्णवानप्रस्थस्यैवेतिविज्ञानेश्वरादेवयाज्ञिकादयः। अतएवमिताक्षरादौभृगुपातानशनादिकंवा
नप्रस्थस्यैवोक्तं। मनुरपि। आसांमहर्षिचर्याणांत्यक्त्वान्यतमयातनुं। वीतशोकभयोविप्रोब्रह्मभूयायकल्पते। ज

रतीति।तेनान्यत्रापितद्विषयतैवाम्नातेक्यात्।तेनयतेर्नाधिकारः।काम्येऽनधिकाराच्च।नैमित्तिकेत्वकरणेदोषोनित्यताच
स्यात्।प्रयागेरोगिणामरोगिणांच।यत्तु।शूद्रब्राह्मणक्षत्रियावैश्याश्चान्त्यजाश्चतथाधमाः।एतेत्यजेयुःप्राणान्वैवर्जयित्वा
द्विजंनृप।यतिस्तुब्राह्मणस्तत्रब्रह्महाचात्महाभवेदिति।तन्निर्मूलमितिमदनाः।तत्वंतुहेमाद्रौव्रतकांडेलिखनान्निर्मू
लत्वंचिंत्यमेव।प्रक्रमात्तुपतितेवेतिभृगुपातमात्रपरंयुक्तं।ब्राह्मणस्याप्यनुज्ञातमितिवक्ष्यमाणविरोधाच्च।यत्त्वादित्यपु
राणे।अब्राह्मणोवास्वर्गादिमहाफलजिगीषया।प्रविशेज्ज्वलनंतोयंकरोत्यनशनंतथेति।तत्प्रयागातिरिक्तपरमिति
केचित्।हेमाद्रौत्वतदग्रे।प्रयागवटशाखाग्रादित्युक्तेर्ब्राह्मणस्यप्रयागेऽपिनेतिप्रतीयते।माधवीये।पुराणेचादित्य
पुराणे।दुश्चिकित्स्यैर्महारोगैःपीडितस्तुपुमानपि।प्रविशेज्ज्वलनंदीप्तंकरोत्यनशनंतथा।अगाधतोयराशिं
चभृगोःपतनमेवच।गच्छेन्महापथंवापितुषारगिरिमादरात्।प्रयागवटशाखायांदेहत्यागंकरोतिच।स्वयंदेहवि
नाशस्यकालेप्राप्तेमहामते।उत्तमान्प्राप्नुयाल्लोकान्नात्मघातीभवेत्क्वचित्।एतेषामधिकारस्तुसर्वेषांसर्वजं
तुषुनराणांमध्यनारीणांसर्ववर्णेषुसर्वदा।ईदृशंमरणंयेषांजीवानांकुत्रचिद्भवेत्।आशौचंस्यात्त्र्यहंतेषांवज्रा एषः
नलहतेतथा।वाराणस्यांम्रियतेयस्तुप्रत्याख्यातभिषक्क्रियः।काष्ठपाषाणमध्यस्थोजाह्नवीजलमध्यगः।अवि

मुक्तोन्मुखस्तस्य कर्णे मूलगतो हरः। प्रणवं तारकं ब्रूते नान्यथा कुत्रचित्क्वचित्। हेमाद्रौ चैवं। अत्र प्राप्ते काले इत्युक्तेरप्राप्तमरणकालाच्च वृद्धादिमरणं कलौ निषिद्धं। भृग्वग्निपतनैश्चैव वृद्धादिमरणं तथेति। माधवेन पृथ्वीचंद्रेणा च कलिवर्ज्येषूक्तेः। न चात्र यावदुक्तनिषेधः। विशिष्टोद्देशो वा कामभेदात्। न च कलौ वानप्रस्थाश्रमनिषेधाद्देवासे हेमाद्रिणा निषेधोप्यर्थ इति वाच्यं। सर्ववर्णस्त्रियादिभिस्तद्भिन्नस्यापि प्राप्तेः काम्यं भवत्येव। ये वैतत्त्वं विसृजंतीति श्रुतेः। स्मृत्यासंकोचायोगात्। न चेयं स्वाभाविकस्मृत्युक्तिपरा। धीरपदोक्तेः। तात्स्य भारतादिषु न लोकवचनात्तात न वेदवचनादपि। मतिरुत्क्रमणीया ते प्रयागमरणं प्रतीत्युक्तेः। अत एव विष्णुधर्मे रोग्यादिगणमुद्दिश्योक्तं। यथा युगानुसारेण संत्यजेदात्मनस्तनुमिति। काम्यमप्युक्तं मात्स्ये। अग्निप्रवेशं ये कुर्युरविमुक्ते विधानतः। प्रविशंति मुखं ते मे निःसंदिग्धं वरानने। हेमाद्रौ विवस्वान्। सर्वेंद्रियविमुक्तस्य स्वव्यापाराक्षमस्य च। प्रायश्चित्तमनुज्ञातमग्निपातो महापथश्च धर्मजिनासमर्थस्य कर्तुः पापांकितस्य चाब्राह्मणस्याप्यनुज्ञातं तीर्थे प्राणविमोक्षणं। अपरार्के चैवं। सहगमनं कलौ भवत्येव। कलौ नान्या गतिः स्त्रीणां सहानुगमनादृते इति ब्रह्मवैवर्तात्। तेन मरणांतं प्रायश्चित्तं काशीखंडादौ चातुर्मास्यात तनुत्यागविषयश्च युगांतरपर एव। प्रयागेपि त्रिस्थलीसेतौ स्कांदे यथा कथंचित्तीर्थेस्मिन् प्राणत्यागं करो

तियः।तस्यात्मघातदोषोनप्राप्नुयादीप्सितान्यपि।ब्राह्मेविष्णुः।देहत्यागंतथाधीरः कुर्वंतिममसान्निध्यौमत्रनुप्रविशं
त्येवनपुनर्जन्मनेनराः।कौर्मे।व्याधितोयादिवादीनः कुद्धोवापिमकेन्नरः।गंगायमुनमासाद्ययस्तुप्राणान्परित्यजेत
ईप्सितांल्लभतेकामानवदंतिमुनिपुंगवाः।तथा॥प्रयागतिर्थेगयुक्तस्यसत्वस्थस्यमनीषिणः।सागतिस्त्यजतःप्राणा
न्गंगायमुनसंगमे।वाराहे।तत्रयोमुंचतिप्राणान्नवटमूलेषुसुंदरि।सर्वलोकानतिक्रम्यममलोकंप्रपद्यते।तथा॥
अकामोवासकामोवावटमूलेषुसंदरि।शीघ्रंप्राणान्प्रमुंचेतयदीच्छेत्परमांगतिं।तथा।पंचयोजनविस्तीर्णेप्रया
गस्यतुमंडले।व्यातीतान्पुरुषान्सप्तभविष्यांश्चचतुर्दश।नरस्तारयतेसर्वान्यस्तुप्राणान्परित्यजेत्ताध्यात्वाविष्णु
पदांभोजंप्रयागेविष्णुतत्परः।तनुंत्यजतियोमाघेतस्यमुक्तिरसंशयः।दुष्कृतोपिदुराचारोब्रह्महत्यादिपातकी।हरिं
ध्यात्वात्यजन्देहंप्रायशोमुक्तिभाग्भवेत्।भविष्ये।समाःसहस्राणिचसप्तवैजलेदशैकमग्नौपतनेचषोडश।महाह
वेषष्टिरशीतिर्गोग्रहेअनाशकेभारतचाक्षय्यागतिरिति।सामान्यतोऽपिफलं।एवमन्येविधयोज्ञेयाः।यत्तुगौडाः।प्र
यागादिमरणंब्राह्मणाभिन्नविषयमाहुः।तद्दूषणंपितामहचरणैःप्रयागविधौकृतमितिनात्रोच्यते।अत्रदशा
हमाशौचं।त्रिरात्रस्यपास्यकालगोचरत्वादितिमदनः।पृक्षंत्वचिरात्रांदिवोदासीयेप्येवं।शुद्धितत्वेपिकाश्यपः।अ

एषः

नशतम्हतानामशनिहतानामग्निजलप्रविष्टानां भृगुसंग्रामदेशांतरमृतानां जातदंतानां च त्रिरात्रमिति एवं मरणां
तप्रायश्चित्तेपि। पूर्वोक्तश्चात्महादेर्दशाहाशौचादिनिषेधस्तदानीमेवावत्सरांते तु सर्वमौर्ध्वदेहिकं कुर्यात्। गोब्रा
ह्मणहतानां च पतितानां तथैव च। ऊर्ध्वं संवत्सरात्कुर्यात्सर्वमेवौर्ध्वदेहिकमिति। हेमाद्रौ षट्त्रिंशन्मतात्। एवं म्ले
छीकृतानामपि गयाश्राद्धमपि कार्यं। ब्रह्महा च कृतघ्नश्च गोघाती पंचपातकी। सर्वे ते निष्कृतिं यांति गयायां पिं
डपातनात्। इत्यग्निपुराणात् ब्राह्मेपि। क्रियते पतितानां तु गते संवत्सरे क्वचित्। देशधर्मप्रमाणत्वाद्गयाकू
पे स्वबंधुभिः। मातंगपादमूले वा श्राद्धं हरिहरौ स्मरन्। सूर्यपर्वे इत्यर्थः। तच्च वर्षमध्ये कृत्यमुक्तमपरार्के वायु
पुराणे। शुक्लपक्षस्तु द्वादश्यां कुर्याच्छ्राद्धं तु वत्सरं। ऊर्ध्व दशाहान्निवा कुर्याच्छुक्ले च प्रथमेहनि। छागलेयः। नारा
यणं समुद्दिश्य शिवं वा यत्स दीयते॥ तस्य शुद्धिकरं कर्म तद्भवेन्नैतदन्यथा। स चात्मघातादिप्रायश्चित्तं कृत्वा
कार्यः। तदुक्तं हेमाद्रौ षट्त्रिंशन्मते। कृत्वा चांद्रायणं पूर्वं क्रिया कार्या यथाविधि। नारायणबलिः कार्यो लोकगर्हाभ
यान्नरैः। पिंडोदकक्रियाः पश्चाद्वृषोत्सर्गादिकं च यत्। एकोद्दिष्टानि कुर्वीत सपिंडीकरणं तथा। दिवोदासीये वृद्धशा
तातपः। क्वापि पतिते च मृते शुद्धे प्राजापत्यांस्तु षोडश। मृते चापत्यरहिते कृच्छ्राणां नवतिं चरेत्। इत्याह। इदं प्रायश्चि

त्राहीपित्रादिविषयां इंद्रियैरपरित्यक्ता पेयमूढाविषादितः॥ घातयंति स्वमात्मानं चंडालादिहताश्च ये॥ तेषां पुत्राश्च पौ
त्राश्च दूष्यपापसमभिप्लुताः॥ यथाश्राद्धं पतत्वंति विल्लुना मप्रतिष्ठितं। तथा तेसं प्रवक्ष्यामि मम कृत्स्नं स्वयंभुवे॥ इति हेमा
द्रौ तेनैवोक्तेः॥ तत्रैव बौधायनोपि नारायणबलिं व्याख्यास्यामः। चंडालादुदकात्सर्पाद्ब्राह्मणाद्वैद्युतादपि। दंष्ट्रिभ्य
श्च पशुभ्यश्च मरणं पापकर्मणां। विषशस्त्ररज्जुपाषाणाद्देशांतरे वा। अभिशस्तपतितसुरापात्मत्यागिनां ब्राह्मणाह
तानां च द्वादशवर्षा।णि नाराणि वा कुर्वी।तेति। गृह्यपरिशिष्टे तु। चंडालादित्या घुत्का दग्ध्वा शरीरं प्रेतस्य संस्थाप्यास्थी
नि यत्नतः॥ प्रायश्चित्तं तु कर्तव्यं पुत्रैश्चांद्रायणत्रयमित्युक्तं। मदनरत्ने ब्राह्मे। प्रमादादपि निःशकस्माद्विधिनोदि
तः। चंडालैर्ब्राह्मणोम्बौरैर्निहतो यत्र कुत्रचित्। तस्य दाहादिकं कार्यं यस्मान्नपतितस्तु सः। चांद्रायणं तप्तकृच्छ्र
द्वयं तस्य विशुद्धये। यद्वा कृच्छ्रान् पंचदश कृत्वा तु विधिना दहेत्। बुद्धिपूर्वमृतानां तु त्रिंशत्कृच्छ्रान् समाचरेदित्युक्तेः।
स्मृतिरत्नावल्यां तु द्विगुणं प्रायश्चित्तं कृत्वा वगोप्य वृत्तसर्वकार्यमित्युक्तं। आत्मनोघातशुद्ध्यर्थं च चांद्रायणद्वयं।
तप्तकृच्छ्रचतुष्कं च त्रिंशत्कृच्छ्राणि वा पुनः॥ अर्वाक्संवत्सरात्तु कुर्याद्दहनादि यथोदितं। कृत्वा नारायणबलिमनि एमः
त्यलात्तदापुषः॥ इति। इदं वात्मवधनिमित्तं तज्ज्ञातिप्रायश्चित्तेन समुचितं कार्यं। अत एव बौधायनेनोक्तं। द्वादशवर्षा।णि

त्रीणि वेति। मदनपारिजाते स्मृत्यर्थसारे चाब्रह्महादीनां तद्योग्यं प्रायश्चित्तं कृत्वा नारायणबलिः कार्यः। इत्युक्तं। एवं म्लेच्छीकृतानामपि। यत्तु कश्चिदाह पुत्रकृतेन प्रायश्चित्तेन पितुः पापनाशे मानाभावः। आत्मघाते तु वचनादस्तु। महापातके तु कथं स्यादिति सत्यमेवात्मवधप्रायश्चित्तस्य ज्ञातिवधनिमित्तेन समुच्चयं वदन् हृदयशून्य एवान हि ज्ञातिवधनिमित्तं पुत्रैः कार्यमिति वचनमस्ति। पुत्रकर्तृकसर्वप्रायश्चित्तादिविलम्बापत्तेः। प्रागुक्तवचनाच्चेति दिक्। इदं प्रायश्चित्तं ब्राह्मणानामेव। प्रायश्चित्तानर्हाणां तु पतितोदकमात्रं कार्यमिति केचित्। मदनपारिजातादिस्वरसोप्येवं। वस्तुतस्तु तदर्हानर्हयोर्वचनेनुपादानात् अविशेषविशेषात् तत्रापि नारायणबलिः गयाश्राद्धं चेति युक्तं। पतितोदकविधिस्तु पित्राद्यतिरिक्तविषय इत्यपरे। स यथा। हेमाद्रौ ब्राह्म्ये। पतितस्य तु कारुण्याद्यस्तत्क्रियां कर्तुमिच्छति। स हि दासीं समाहूय सर्वग्रामं दत्तवेतनां। अमुं द्व घटमिह स्थाप्य यथावृत्तं ब्रवीत्यपि। हे दासी गच्छ मूल्येन तिलानानय सत्वरं। तोयपूर्णं घटं चेमं सतिलं दक्षिणामुखी। उपविश्य तु वामेन चरणेन ततः क्षिप। कीर्त्तयेः पातकीसंज्ञां त्वं पिबेति मुहुर्वदेः। निशम्य तस्य वाक्यं सा लब्धमूल्या करोति तत्। एवं कृते भवेत्तृप्तिः पतितानां च नान्यथा इति। इदं च मृताहे कार्यं। पतितस्य दासी मृताह्नि पदा घटमपवर्ज्जयेदेतावतायमुपचारितो भवतीति मदनरत्ने विशेषः।

३३६

इदं चात्मत्यागिविषयं। आत्मत्यागिनः पतितास्तेनाशौचोदकभाजः स्युरित्युपक्रम्य विष्णुना एतस्याभिधानादिति गौ
डः। यत्तु कश्चिदाह। यः पतितो घटस्फोटेन बांधवैर्बहिःकृतस्तद्विषयाणि क्रियानिषेधवाक्यानि जीवत्येव तस्मि
न्नंत्यकर्मणः कृतत्वात्पुनः करणाभावादिति। स बंधुत्यागेन ज्ञातवैराग्यस्य कृतप्रायश्चित्तस्याप्यकरणापत्तेर्मि
ताक्षरादिविरोधमपश्यन्नस्मद्गुरुभिरुपेक्षणीयः। न च कृतघटस्फोटस्य संग्रहविधिर्नेति वाच्यं। मनुना कृतघट
स्फोटस्य त्यागमुक्त्वा प्राय। श्चित्ते तु चरिते पूर्णं कुंभमपां नवं। तेनैव सार्धं प्रास्येयुः स्नात्वा पुण्ये जलाशय इत्युक्तेः।
अन्यथा प्रायश्चित्तमात्रेण एतस्य संग्रहात्। अतो घटस्फोटेन बहिःकृतस्यापि पित्रादेरदृष्टं तेन नारायणबलिः। निषे
धास्तु पित्रादिपरा इति तत्त्वं। केचित्तु नारायणबलौ कृतेऽप्येतत्कर्म सपिंडनवर्ज्यं कार्यं। गोब्राह्मणहतानां च
पतितानां तथैव च। व्युत्क्रमाच्च प्रमीतानां नैव कार्या सपिंडता। ब्राह्मणादिहते ताते पतिते संगवर्जिते इति
श्राद्धप्रकाशोक्तेश्चेत्याहुः। तेन हेमाद्रिस्थपूर्वोक्तषट्त्रिंशन्मतविरोधात्। निर्मूलत्वाच्छ्राद्धप्रकाशस्य वृद्धिश्रा
द्धविषयत्वाद्वोपेक्ष्याः। नारायणबलिस्तु हेमाद्र्याद्यनुसारेणोच्यते। तत्रादौ क्रियानिबंधे गारुडे तर्पणमुक्तं। कार्यं एषः
वा पुरुषस्तेन मंत्रैर्वैष्णवैरपि। दक्षिणाभिमुखो भूत्वा प्रेतं विष्णुमिति स्मरन्। अनादिनिधनो देव शंखचक्रग

दाभा॥ अस्य पुंडरीकाक्ष प्रेतमोक्षप्रदो भवेति॥ शुक्लैकादश्यां देशकालौ संकीर्त्यामुकगोत्रस्यामुकस्यात्मघातजदोषनाशार्थं ऊर्ध्वदेहिकसंप्रदानत्वयोग्यतासिध्यर्थं उक्तप्रायश्चित्तं कृत्वा पुनरुक्तसंकल्पं कृत्वा पुनरुक्तसंकल्पं कृत्वा नारायणबलिं करिष्ये इति संकल्प्य॥ ब्रह्माणं विष्णुं शिवं यमं सप्रेतं पंचकुंभेषु॥ विष्णुः स्वर्णमयः कार्यो रुद्रस्ताम्रमयस्तथा॥ ब्रह्मा रौप्यमयस्तत्र यमो लोहमयो भवेत्॥ प्रेतो दर्भमयः कार्य इति गारुडोक्तासु सर्वासु हैमीषु वा प्रतिमासु षोडशोपचारैः पुरुषसूक्तेनाभ्यर्च्याग्निं प्रतिष्ठाप्य चरुं पुरुषसूक्तेन प्रत्यृचं नारायणायेति॥ मितं हुत्वा देवामग्रे दक्षिणाग्रेषु दर्भेषु विष्णुरूपं प्रेतं स्मरन्नामगोत्राभ्यां मधुघृततिलयुतान्यज्ञोपवीत्येवामुकगोत्रामुकशर्मन्प्रेत विष्णुरूपाय ते पिंडं उपतिष्ठतामिति दत्त्वा पुरुषसूक्तेनाभिमंत्र्य शंखोदकेनाभिषिच्याभ्यर्च्यामुकशर्माणममुकगोत्रं विष्णुरूपं प्रेतं तर्पयामीति पुरुषसूक्तेन प्रत्यृचं तर्पयित्वा एकं आमान्नं ब्रह्मादिपंचभ्यो दद्यात्॥ मंत्रस्तु॥ ब्रह्माविष्णुमहादेवयमाश्चैव सकिंकराः बलिं गृहीत्वा कुर्वंतु प्रेतस्य च शुभांगतिमिति निवेदयेत्॥ मिताक्षरायां तु होमबल्यादि नोक्तं॥ ततः प्रतिदैवतं त्रिविधफलशर्करामधुघृतानि च निवेद्य पिंडानभ्यर्च्य नद्यां क्षिप्त्वा रात्रौ नवससपंचविप्रान्निमंत्र्योपोषितो जागरं कृत्वा श्वोभूते पुनर्विष्णुं यमं संपूज्यैकोद्दिष्टविधिना श्राद्धपंचकं करिष्ये। इत्युक्त्वा

एमः

३३७ विष्णुयमप्रेतान्स्मरन्‌विप्रानुपवेश्यप्रेतस्थानेचैकंविष्णुस्मरणाद्यावाहनार्घ्ययुतंतत्‌त्रिप्रश्नांतंकृत्वोल्लेखनादिकृत्वा
न्नशेषेणाब्रह्मणोविष्णवेशिवायसपरिवारायचतुरःपिंडान्दत्वाप्रेतनामगोत्रेस्मृत्वाविष्णुनाम्नापंचमंदत्वाभ्यर्च्याचां
तेतेभ्योदक्षिणांदत्वैकंप्रेतंस्मृत्वाविशेषतःसंतोष्यविप्रैःप्रेतायेदंतिलोदकंउपतिष्ठतांइतिसतिलमुदकंदापयित्वा
भुंजीतेति।अत्रविशेषांतरंभट्टकृतांत्येष्टिपद्धतौज्ञेयं।सर्पहतेतुवर्षपर्यंतंपूर्वेद्युरेकभक्तःपूर्वंशुक्लपंचम्यामुपवासं
नक्तंवाकृत्वापिष्टमयंनागंअनंतंवासुकिंशंखंपद्मंकंबलंककर्कोटकाश्वतरधृतराष्ट्रशंखपालकालीयतक्षकक
पिलेतिनामभिःप्रतिमासंसंपूज्यपायसेनविप्रान्संभोज्यवत्सरांतेहैमंनागंगांचदत्वानारायणबलिंकुर्यात्।मू
लंतुहेमाद्रौज्ञेयं।बोधायनसूत्रेसर्पमृतानांनमोऽस्तुसर्पेभ्यइतितिस्रआहुतीर्हुत्वोदकेमृतानांसमुद्रायवरुणा
येतिहुत्वेति।क्रियांकुर्यादितिशेषः।व्याघ्रैः।सौवर्णीभारनिष्पन्नांगांकृत्वातद्भेदद्यात्।व्यासासमदत्वाविधिवत्पित
ऋणान्तपमाप्नुवान्।हेमाद्रौभ।विष्णौ।पंचम्यांपंनागंहेमंस्वर्णं।नैकेनकारयेत।हीराज्यपात्रमध्यस्थंपूज्यविप्रायदा
एमः
पयेत्।प्रायश्चित्तमिदंप्रोक्तंनागदष्टस्यशंभुनेति।अपरार्केस्मृत्यंतरेतदैवशुध्यतिप्रेतोनारायणबलौकृते।प्रोद
दाति।क्रियापिंडंतस्मैप्रेतायवैसुतः।तस्यैवाशौचमुद्दिश्यपहमेवनसंशयः।विष्णुश्राद्धसमाप्नोतुत्रयोदश्यांदिन

त्रयं। आशौचं पिंडदः कुर्यान्नतद्वंशगोत्रजाः। यस्यैवं मृत्युकाले तु व्युच्छिन्नासंततिर्भवेत्। स वसेन्नरके घोरे पंकमग्नः क
रीयथेति। उपक्रम्य। बलिनारायणं कुर्यात्तस्योद्देशेन भक्तिमान्। इति गारुडोक्तेः॥ अपुत्रस्यापि पत्न्याद्यैः कार्यमित्यु
क्तं देवयाज्ञिकेन॥ अथ विधानादाशौचाभावः। यथा यतिषु दुर्मृतादिषु। त्रयाणामाश्रमाणां च कुर्याद्दाहादिकाः क्रि
याः। यतेः किंचिन्न कर्त्तव्यं न चान्येषां करोति स इति ब्राह्म्यात्। उशनाः। एकोद्दिष्टं न कुर्वीत यतीनां चैव सर्वदा। अहन्ये
कादशे प्राप्ते पार्वणं तु विधीयते। सपिंडीकरणं तेषां न कर्त्तव्यं सुतादिभिः। त्रिदंडग्रहणादेव प्रेतत्वं नैव जायते। त
त्संस्कारं वक्ष्यामः। दत्तात्रेयः। एकोद्दिष्टं जलं पिंडमाशौचं प्रेतसत्क्रियां। न कुर्याद्वार्षिकादन्यद्ब्रह्मीभूताय भिक्षवे
। वार्षिकादिति पूर्वभावे मासिकादिनिषेधो न तु दर्शादेः॥ सन्न्यासिनोऽप्याब्दिकादि पुत्रः कुर्याद्यथाविधीति। वाय
वीयोक्तेः। पृथ्वी चंद्राद्ये प्रजापतिः। अहन्येकादशे प्राप्ते पार्वणं तु विधीयते। सपिंडीकरणं तस्य न कर्त्तव्यं सुता
दिभिः। एषु सपिंडनादिनिषेधानुवादेन पार्वणोक्तेस्तत्संस्कारनापन्नस्य पार्वणस्य प्राप्यते। नारायणेति ब्रूयादेवं कृ
तोद्देश्यमिति वचनात्। इदं वार्षिकादिविधानं च त्रिदंडिपरं। एकदंडिपरमहंसादीनां तु न किमपि कार्यं। पूर्वोक्तोशनोवा
क्ये त्रिदंडिग्रहणादिति शूलपाण्यादयो गौडाः। त्रिदंडिशब्देन मनोदंडादित्रयोक्तेः। यस्यैते नियता दंडाः स त्रिदंडि

३३८ हि चोच्यते ऽइति स्मृतेः। बोधायनः। नारायणबलिश्चास्य कर्त्तव्यो द्वादशेऽहनि। अस्य पार्वणेन समुच्चयो ज्ञेयः। तं च स एवाह।
कृत्वा विष्णोर्महापूजां पायसं विनिवेदयेत्। अग्नौ कृत्वा तु तच्छेषं व्याहृतिभिः समाहितः। यतीन् गृहस्थान्साधून्वा नि-
मंत्र्य द्वादशावरान्। अभ्यर्च्य गंधपुष्पाद्यैर्मंत्रैर्द्वादशनामभिः। संभोज्य हव्येनान्नेन दक्षिणां च निवेदयेत्। त्रयोद-
शं द्विजश्रेष्ठमात्मज्ञं संयतेंद्रियं। विष्णुं यथा तथाभ्यर्च्य पाद्यार्घ्यैश्च विधानतः। दद्यात्पुरुषसूक्तेन गंधपुष्पादिकं
क्रमात्। वस्त्रालंकरणादीनि यथाशक्ति प्रदापयेत्। उच्छिष्टसंनिधौ तस्य दर्भानास्तीर्य भूतले। भूर्भुवः स्वः स्वधा-
युक्तेन तस्मै दद्याद्बलित्रयं। अश्वमेधसहस्रस्य वाजपेयशतस्य च। यत्फलं तल्लभेदेवं यः करोति यतिक्रियां। शौनक-
स्तु। शौनकोऽहं प्रवक्ष्यामि नारायणबलिं परं। चंडालादुदकात्सर्पाद्ब्राह्मणाद्वैद्युताग्नितः। दंष्ट्रिभ्यश्च पशुभ्यश्च र-
ज्जुशस्त्रविषाश्मभिः। देशांतरमृतानां च कनिष्ठानां तथैव च। पतीनां योषिनां पुंसामन्येषां मोक्षकांक्षिणां। पुराण्या
या घस्तयार्थी यद्द्वादशेऽहनि कारयेत्। द्वादशे श्रावणे ह्यंते। पंचम्यां पर्वणो हस्तु चेति ऽउक्त्वा पूर्वोक्तं सर्वविधिमुक्त्वा
ऽतो देवेति षाड्भिः पुरुषसूक्तेन प्रत्यृचं पायसं हुत्वा केशवादिद्वादशनामभिस्तद्वपिणोपि त्रै द्वादशविप्रान्संभोज्य ते रामः
रेव द्वादशपिंडान्दापयेत्। इत्यधिकमाह। पुद्ममृते तु प्रागुक्तं। कृतजीवच्छ्राद्धे मृते सपिंडैराशौचं कार्यं न वा। त

डक्तं हेमाद्रौ लैंगे। मृते कुर्यान्न कुर्याद्वा जीवन्मुक्तो यतः स्वयं॥ कालं गते द्विजे भूमौ खनेद्वापि दहेत वा। पुत्रः कृत्यम
शेषं च कृत्वा दोषो न विद्यते। जीवत्यपि विशेषस्तत्रैवोक्तः। नित्यं नैमित्तिकं यत्तु कुर्याद्वा संत्यजेत वा। बांधवे पि मृते त
स्यतैवाशौचं विधीयते। सूतकं च न संदेहः स्नानमात्रेण शुध्यति। एतद्योगिविषये। एतद्योगिविषयं। योगमार्ग
रतोपि वतितस्याप्युक्तेः। तथाहिताग्नौ प्रोषितमृते तदस्थिदाहात्पूर्वं पुत्रादीनां नाशौचं संध्यादिकर्मलोपश्च ना
स्ति। अनाग्निमत उक्तं तेनाशौचादि द्विजातिषु। दग्निमतो विंध्याद्विदेशस्थो मृते सतीति स्मृतेः। आहिताग्नेर्दाहात्प्रा
गपि दशाहः। संस्कारांगं च भिन्नो दशाहः इति धूर्तस्वामी रामांडारश्च। तच्चिंत्यं। मूले कगाद्वचोविरोधाच्च। एतत्स्मृत्यागुक्तं।
अत्र देहस्यैव संभवे दाहः। आहिताग्नौ विदेशस्थे मृते सति कलेवरं। निधेयं नाग्निभिर्यावत्तदीयैरपि दह्यते। इ
ति ब्राह्मोक्तेः। तदभावे छंदोगपरिशिष्टे। विदेशमरणेऽस्थीनि आहृत्याभ्यज्य सर्पिषा। दाहयेद्बर्हिषाच्छाद्य पा
त्रन्यासादि पूर्ववत्। अस्थ्नामलाभे पर्णानि शकलान्युक्तया वृता। दाहयेदस्थिसंख्यानि ततः प्रभृति सूतकं। हे
माद्रौ षड्विंशन्मते। कुर्याद्दर्भमयं प्रेतं दर्भैस्त्रिशतषष्टिभिः। पालाशीभिस्समिद्भिर्वा संख्या चैवं प्रकीर्तिता। भवि
ष्ये च चत्वारिंशच्छिरः स्थाने ग्रीवायां तु दशैव तु। बाह्वोश्चैव शतं दद्याद्विंशतिं च तथोरसि। उदरे विंशतिं दद्यात्। त्रिंशच्च

१३३८

कटिदेशके ऊर्वोश्चैव शतं दद्यात्त्रिंशतं तं जंघयोर्द्वयोः। पादांगुलीषु दश वै एषा च प्रेतकल्पना। मदनरत्ने यज्ञपार्श्वः॥ शिरस्य
शीत्यर्द्धं दद्याद्ग्रीवायां तु दशैव तु। बाह्वोश्चैव शतं दद्याद्दश चैवांगुलीषु च। उरसि त्रिंशतं दद्याद्विंशतिं जठरे तथा। द्वाद
शार्द्धं वृषणे धारद्दार्द्धं शिश्र एव च। ऊर्वोश्चैव शतं दद्यात्त्रिंशतं तं जंघयोर्द्वयोः। पादांगुलीषु दशकं प्रेतत्प्रेतस्य कल्प
नं। मस्तके नालिकेरं तु अलाबु तालुके तथा। पंचरत्नं मुखे न्यस्य जिह्वायां कदलीफलं। चक्षुषोस्तु कपर्द्दौ द्वौ नासि
कायां तु तालकं। कर्णयोर्ब्रह्मपत्राणि केशे वटप्ररोहकाः। नालकं कमलानां तु आंत्रस्थाने विनिर्दिशेत। मृत्तिकां तु
वसास्थाने धातौ नालकगंधकौ। शुक्रे तु पारदं दद्यात्पुरीषे पित्तलं तथा। संधिषु तिलपिष्टं तु मांसे स्याद्यवपिष्टकं।
मधु स्याच्छोणितस्थाने त्वचःस्थाने मृगत्वचा। स्तनयोर्गुंजिके दद्ये नासायां शतपत्रकं। कमलं नाभिदेशे स्याद्वृंता
के वृषणौ श्रितौ। लिंगे च रक्तमूलं च परिधानं दुकूलकं। गोमूत्रं गोमयं गंधं सर्वौषध्यादि सर्वतः। इति। रदंतिरत्ने र
पि तत्रैव वृद्धमनुः। प्रोषितस्य तथा कालो गश्चैव द्वादशाब्दिकः। प्राप्ते त्रयोदशे वर्षे प्रेतकर्माणि कारयेत। बृहस्प
तिः। यस्य न श्रूयते वार्त्ता यावद्द्वादशवत्सरं। कुशपुत्रकदाहेन तस्य स्यादवधारणा। भविष्ये। पितरि प्रोषिते यस्य न एमः
वार्त्ता नैव चागमः। ऊर्द्धं पंचदशाद्वर्षात्कृत्वा तत्प्रतिरूपकं। कुर्यात्तस्य तु संस्कारं यथोक्तविधिना ततः। तदादीन्येव सर्वा

द्वा

णि प्रेतकर्माणि कारयेत्। द्वादशाहं प्रतीक्ष्या पित्तापि भिन्नविषयेति मदनरत्ने उक्तं। गृह्यकारिकायां तु। तस्य पूर्ववय
स्कस्य विंशत्यह्नोर्ध्वतः॥ क्रिया। ऊर्ध्वं पंचदशाहात्तु मध्यमे वयसि स्मृता॥ द्वादशाहात्परादूर्ध्वमुत्तरे वयसि स्मृता॥ चांद्रा
यणत्रयं कृत्वा विंशतिकृच्छ्राणि वा सुतैः। कुशप्रतिकृतिं दग्ध्वा कार्याः शौचादिकाः क्रियाः॥ इत्युक्तं। पराशरः। देशां
तरगतो नष्टस्थितिर्न ज्ञायते यदि। कृष्णाष्टमी अमावास्या कृष्णा चैकादशी च या॥ उदकं पिंडदानं च तत्र श्राद्धं च कार
येत्। इदं मासज्ञाने। तत्राहिताग्नेः पूर्णं शौचं। अनाहिताग्नेस्तु त्रिरात्रं। अनाहिताग्नेर्देहस्तु कदास्योगृह्याग्निना स्वपं
तल्लाभे पालाशानां वृन्तैः कार्यः पुमानपि विहिते व्यस्तया यत्नात् कृष्णसारस्य चर्मणा। ऊर्णासूत्रेण बध्नातु प्रले
प्व्योपवेत्तथा। स्तुपिष्टैर्जलसंमिश्रैर्दग्ध्व्यश्चतथाग्निना। असौ स्वर्गाय लोकाय स्वाहेत्युक्त्वा स बांधवैः। एवं प
र्णशरं दग्ध्वा त्रिरात्रमशुचिर्भवेत्। इति ब्राह्म्योक्तेः। इदं त्रिरात्रं न दशाहमध्ये दाहे। तत्र प्रोषिते कालशेषः स्यादि
त्युक्तेः। किंतु तदूर्ध्वं। तत्र पत्नीपुत्रयोः पूर्वमगृहीताशौचयोर्दशाहाद्यं वा गृहीताशौचयोस्तु त्रिरात्रं। पत्नी मृते
भर्तुश्चैवं। सपत्न्योश्चैवमिति स्मृत्यर्थसारे। अन्यसपिंडानां तु सर्वत्र पर्णशरदाहे त्रिरात्रं। तदाहुर्गालवः। देशांतरमृ
तं श्रुत्वा नाशौचं चेत्स्कथंचन। कालात्ययेऽपि कुर्वत दाहकाले दिनत्रयमिति। स्मृत्यर्थसारे तु गृहीताशौचानां स्व

३५०

नमात्रमुक्तं। बह्वृचपरिशिष्टेपि। अथातीतसंस्कारः। स चेदंतर्दशाहं स्यात्तत्रैव सर्वं समापयेदूर्ध्वमाहिताग्निर्द्दशाहात्सर्वे
माशौचं कुर्यादन्येषु पुत्रपत्नीभ्योः पूर्वमगृहीताशौचयोः कर्मांगं त्रिरात्रमिति। षडशीतावप्येवं। विश्वादर्शे तु प्रतिकृति
दहने तस्मिंदे स्यात्त्रिरात्रमिति उक्तं। द्वादशवर्षादिप्रतीक्षोत्तरं दाहे तु पुत्रादीनां सर्वेषां त्रिरात्रमिति कल्पतरुदिवो
दासादयः। अथ प्रेतसंस्कारे वा कालः। हेमाद्रौ गार्ग्यः। प्रत्यब्दशवसंस्कारो दिनं मैव विशोधयेत। आशौचमध्ये सं
स्कारे दिनं शोध्यं तु संभवे। आशौचविनिवृत्तौ चेत्पुनः संक्रियते मृतः। संशोध्यमेव दिनं स्यात्स्यादूर्ध्वं संवत्सराद्यदि।
प्रेतकार्याणि कुर्वतश्चेष्टं तत्रोत्तरायणं। कृष्णपक्षश्च तत्रापि वर्ज्जयेत्तु दिनक्षयं। वाराहे। चतुर्थष्टिमगे चंद्रे द्वादशे
च विवर्ज्जयेत। प्रेतकृत्यं व्यतीपाते वैधृते परिघे तथा। करणे विष्टिसंज्ञे च शनैश्चरदिने तथा। त्रयोदश्यां विशेषेण ज
न्मताराऽत्रये तथा। जन्मदशमैकोनविंशतिताराऽत्रितयं। भारते। नक्षत्रे तु न कुवत यस्मिन्जातो भवेन्नरः। न प्रोष्ठपद
योः कार्यं तथाग्नेये च भारत। दारुणेषु च सर्वेषु प्रत्यरे च विवर्ज्जयेत। काश्यपः। भरण्यार्द्रमघाश्लेषामूलं द्विच
रणानि च। प्रेतकृत्येति दुष्टानि धनिष्ठाद्यं च पंचकं। फाल्गुनीद्वितयं रोहिण्यनुराधापुनर्वसू। आषाढे द्वे विशाखा
च भानि द्विचरणानि च। ज्योतिर्नारदः। चतुर्दशीं तिथिं नंदां भद्रां शुक्रारवासरौ। सितेज्ययोरस्तमयं पौषं ग्रीष्मं विषमाब्दि

रामः

भं।शुक्लपक्षंच संत्यज्य पुनर्दहनमुत्तमं।वत्सरत्रएर्द्धतः पंचनक्षत्रेषु त्रिजन्मसु।।पोस्नब्रह्महर्द्रपोश्चेवदहनात्कुलनाशनं।
त्र्यस्याप्यब्दमाहुः।तंत्रे त्वबैजवापः।प्रेतस्य मास्याहृष्यस्य प्राप्तेत्वेकाद्दशेहनि।नक्षत्रतिथिवारादिशोधनीयं न किंच
न।युगमन्वादिके क्रांतिं दर्शे प्रेतक्रिया यदि।दैवाद्दापतिता तत्र नक्षत्रादि न शोधयेत्।विश्वप्रकाशे पितुरूभार्गव
योर्मौढ्ये पौषमासे मलिम्लुचे।नातीतः पितृमेधः स्यादूर्ध्वं गोदावरीं विना।दानमपि तत्रैवोक्तं।मद्रायां भूमिदाने
स्यात्त्रिपादर्द्धे हिरण्यदः।वारेषु तत्र द्वर्क्षे तु वासोदानं विधीयते।धनिष्ठापंचकमृते पंचारत्नानि क्षापयेत्।एकाशी
तिपलं कांस्यं तदर्द्धं वा तदर्द्धकं।लवणषट्त्रिपलं वापितदर्द्धा द्विप्राय शक्तितः।इत्यलं प्रसंगेन।हेमाद्रौ वृद्धमनुः।अमृ
तं मृतमाकर्ण्य कृतं यस्यौर्ध्वदेहिकं।प्रायश्चित्तमसास्नात्रैकृत्वाग्नीनादधीत च।जीवन्यदि समागच्छेद्धृतकुंभे
निमज्ज्य तं।उद्धृत्य स्नापयित्वास्य जातकर्मादि कारयेत्।द्वादशाहं व्रतचर्या।त्रिरात्रमथवास्यतः।स्नाद्वहेत तां भार्या
मन्यां वा तदभावतः।आग्नीनाधाय विधिवद्व्रात्यस्तोमेन वा यजेत्।अथैंद्राग्रेमेन पशुना गिरिं गत्वा च तत्र तु।
इष्टिमायुष्मतीं कुर्यादीप्सितांश्च क्रतूंस्ततः।अनाहितायेस्तुचरुः।मृतवार्त्ताश्रवणमात्रे त्वाश्वलायनः।स्ताभ
पएव।यस्मिन्जीवे मृतशब्दः इति।यस्य तु जीवत एव मृतवार्त्तां श्रुत्वा स्त्रिया सहगमनं कृतं तत्रातद्वैधमेवा भर्तृम

३४१ रणस्यज्ञानस्यैवानिमित्तत्वात प्रमात्वस्यगौरवेण। युक्तत्वाच्चेति केचित्। तन्न। मरणाज्ञानस्य निमित्तत्वे अतीतानागतयोर
पितत्वापत्तेः। मत्कें वैधदाहाभावेन तस्याः सहगमनाभावाच्च। तस्मादाशौचवत्तज्ज्ञातमरणस्यैव निमित्तत्वं। न चात्र तदाप्ति
परं काम्यमरणमस्तु। अत आत्महननदोषोक्तीति तातपादाः। तथा सर्पसंस्कारकृते त्रिरात्रमाशौचं। तद्विधिं चाह शौ
नकः। अथ वक्ष्यामि सर्पस्य संस्कारविधिमुत्तमं। सिनीवाल्यां पौर्णमास्यां पंचम्यां वापि कारयेत्। कृतसर्पवधो विप्रः
पूर्वजन्मनि वा यदि। वधं प्रख्यापयेत्पापी चरेत्कृच्छ्रांश्चतुर्दश। विप्राय लोहदंडं च तन्मूल्यं वापि दापयेत्। मूल्यमाह।
निष्कत्रयं द्विनिष्कं वा निष्कमेकं कनीयसं। अनुमत्यादिकार्हेणां निष्कनद्धंतेदईकं। इदं स्वर्णरूप्ययोः शक्त्याद्देयं।
संस्कारमाह। प्रियंगुव्रीहिगोधूमतिलपिष्टेन वा पुनः। कृत्वा सर्पाकृतिं सूर्पे विधाय प्रार्थयेत्। दीर्हां एहि पूर्वमृतः स
र्प अस्मिन्पिष्टे समाविश। संस्कारार्थमहं भक्त्या प्रार्थयामि समाहितः। वस्त्रोपवीतगंधाद्यैः संपूज्य च हरेद्बहिः। कु
र्यात्संस्कारसंकल्पं प्राणायामपुरःसरं। यज्ञोपवीतिना कार्यं सर्पसंस्कारकर्म तु। लौकिकाग्निं प्रतिष्ठाप्य समिदाधा एम:
नमाचरेत्। ततोऽग्नेराग्निदिग्भागे भूमिं संप्रोक्ष्य वारिभिः॥ चितिं कृत्वाथ संस्तीर्य कुशैराग्नेयकाग्रकैः। पर्युक्ष्याग्निं परिस्तीर्य
परिषिच्य समर्पयेत्। कृत्वेध्माधानमाघारौ चक्षुषी च यथाविधि। सर्पं गृहीत्वा यत्नेन चितिमारोपयेत्सुधीः। स्रुवेण

त्नुकुर्यादाज्यमग्नौ व्याहृतिभिस्त्रिभिः। सर्पास्ये तु हुत्वा दद्यात्स्वं व्याहृत्या च समग्रया॥ आज्यशेषंस्तु वेणोवसपदेहे निषिं
चयेत्। चमचस्छे तैलैः सर्पं व्याहृत्याभुत्स्य पाणिना॥ अथेत्हागारत्यनया सर्पायाग्निं प्रदापयेत्। उपतिष्ठेद्दृत्यमा
नंनमोस्तु सर्पमंत्रतः। ज्ञानतोऽज्ञानतो वापि कृतः सर्पवधो मया। पूर्वजन्मनि वा सर्प तत्सर्वं क्षंतुमर्हे। सि। स्त्रीराज्ये
न तत्त्वाग्निं प्रोक्ष्य व्याहृतिभिर्जलैः। नास्ति संचयनं कुर्यात्स्नात्वाचम्य गृहं व्रजेत्। ब्रह्मचर्यादिकं कार्यं त्रिरात्राशौ
चमेव च। सचैलं तु चतुर्थेह्नि स्नात्वा॥ विप्रान्समर्चयेत्॥ तर्पणं तत्र यथाशेषः कपिलो नाग एव च। कालिकः शंखपा
लश्च भूधरश्चेति नामभिः॥ गंधपुष्पाक्षतैर्धूपदीपाद्यैरर्चयेद्द्विजान्॥ घृतपायससंमिश्रैर्द्विजानष्टौ तु भोजयेत्। एवं
कृते विधानेन सर्पसंस्कारकर्मणि॥ सर्पहिंसाकृतात्पापात्प्रमुच्यते नात्र संशयः इति। इति सर्पसंस्कारः। क्वचिज्जीव
तोऽप्पतकर्माशौचं च कार्यं। तथा प्रायश्चित्तज्ञानिधेः पतितस्य घटस्फोटे पतितस्योदकं कार्यं मापितृबांधवैः सह।
निंदितेहनि सायाह्ने ज्ञातिसंविगुरुसंनिधौ। दासीघटमपां पूर्णं पर्यस्येत्प्रेतवत्पदा। अहोरात्रमुपासीरन्नाशौचं बां
धवैः सहेति मनूक्तेः। निंदितेरिक्ताहे। अपरार्के वसिष्ठोपि। वेदविप्लावकश्शूद्रयाजकोत्तमवर्णेवर्णापतितास्तेषां पा
त्रमिनवनमपात्रसंकारादकृतत्व पात्रमारायद्दासोः सवर्णपुत्रो वा बंधुः। सहंशो वा गुणहीनः सव्येन पादेन प्रवृत्ताया

नदर्भानन्नपसव्यंकृत्वालोहितान्वोपस्तीर्यापःपूर्णंपात्रमस्मैनिनये।न्तेनेतारंचास्यप्रकीर्णकेशाज्ञातयोन्वालभेरन्न
पसव्यंकृत्वागृहेषुस्वैरमापद्येरन्।अतऊर्ध्वंतेनतद्धर्मयेयुः।स्तद्धर्माणस्तद्धर्मपंतइति।उत्तमस्त्रीब्राह्मण्यस्तेषांवर्णाः
समूहस्तस्मात्पतिताब्रह्महादयः अपात्रसंकरःकुत्सितपात्रसमूहः।अवृत्तायाः।छिन्नायाःस्वैरंपथ्येछंधर्मादिकार्यं
कुर्येकुर्युः।अस्माद्वचनसामर्थ्यात्पात्रनिनयनात्प्राक्पतितस्त्रीणांधर्मकार्येष्वधिकारोनास्तीत्यपरार्कः।तस्यावि
द्यागुरून्योनिसंबंधांश्चसंनिपात्यसर्वाण्युदकादिप्रेतकार्याणिकुर्युः।पात्रंचास्यविपर्यस्येयुः।दासःकर्मकरोवाऽ
वकरादमेध्यंपात्रमानीयदासीघटात्पूरयित्वादक्षिणाभिमुखःपदा।दासःकर्मकरोवाऽवकरादमेध्यंपात्रमानीय
दासीघटात्पूरयित्वादक्षिणाभिमुखःपदापर्युदस्येदमुमनुदकंकरोमीतिनामग्राहंसर्वेचान्वालभेरन्प्राचीनावी
तिनोमुक्तकेशाअपउपस्पृश्यग्रामंप्रविशेयुरिति।गौतमोक्तेश्च।उदकादीत्युक्तेदाहनिवृत्तिः।प्रेतकार्याण्येकाद
शाहांतानि।दास्याहृतोंबुघटोदासीघटः।तेनोदकेनामेध्यपात्रंपूरयित्वादासादिन्युब्जंवामपादेनवाकुर्यादिति
हरदत्तः।अत्रचनामग्राहवचनमुदकादिप्रेतकार्येतद्वर्जंतार्थीतेनतत्रस्त्रीभवति।एतच्चप्रायश्चित्तानिच्छोः।तस्यगुरो एमः
बांधवानांराज्ञश्चसमक्षंसोपानाभिर्व्याप्पतमनुपुनः।पुनराचारंलभतेतिसपद्येवमनवस्थितमतिःस्याद्वतोस्यपात्रं

विपर्येस्येदिति। शंखोक्तेः॥ जीवंतमेवो। द्दिश्य पिंडोदकश्राद्धानि माम्नादघादित्यपरार्कः॥ कृतप्रायश्चित्तस्य घटस्फोटे कृते
पितृग्रहे विधिमाह गौतमः। यस्तु प्रायश्चित्तेन शुध्येत्तस्मिन् शातकुंभमयं पात्रं पुण्यपद्ध्रदात्पूरयित्वा स्रवंतीभ्यो वात
त एनमुपस्पर्शयेयुरथास्मै तत्पात्रं दद्युस्तत्प्रतिगृह्य जपेच्छांता द्यौः शांता पृथिवी शांतं शिवमंतरिक्षं यो रोचनस्तमि
ह गृह्णामि। इत्येतैर्यजुर्भिः पावमानीभिस्तरत्समंदीभिः कूष्मांडैश्चाज्यं जुहुयात्। हिरण्यं दद्याद्गां वाचार्याय॥ यस्य तु प्रा
णांतिकं प्रायश्चित्तं। स मृतः शुध्येत्सर्वाण्येव तस्मिन्नुदकादीनि प्रेतकर्माणि कुर्युरिति देवशांत्युदकं सर्वेषूपपातके
ष्विति घटस्फोटोत्तरं प्राणांतिकप्रायश्चित्ते कृते तु मृत एव शुध्येत् तत्र संग्रहविधिः। अतस्तेन विनापि प्रेतकर्म
कुर्यादित्यर्थः। उपपातकेष्वपि घटस्फोटे कृते एवं कार्यमित्यर्थः॥ याज्ञवल्क्यः॥ चरितव्रत आयाते निनयेरन्न
वं घटं। जुगुप्सेरन्न चाप्येनं संवसेयुश्च सर्वशः॥ कृतघटस्फोटस्यैवायं परिग्रहविधिरिति हिं॥ मिताक्षरापरार्के च।
अन्यथा प्रायश्चित्तमात्रे एतत्प्रसंगात्। मनुरपि घटस्फोटमुक्त्वा निवर्तेरंस्तत्तस्मात्संभाषणसहासने। इत्युक्त्वा
प्रायश्चित्ते तु चरिते पूर्णकुंभमपां नवं। तेनैव सार्द्धं प्रास्येयुः स्नात्वा पुण्ये जलाशये॥ इति तच्च दृष्टप्रायुक्तं॥ अपरार्के
वसिष्ठोपि। पतितानां चरितव्रतानां प्रत्युद्धारोऽथाप्युदाहरंति। अग्रेभ्युद्धणीगच्छेत्क्रीडन्निव हसन्निव। पश्चात्पातय

तां गच्छेच्छौचं निर्हरन्निवेत्याचार्यं मातृपितृहंतारस्तत्प्रसादादपगतपापा[illegible]बा तेषां प्रत्यापत्तिः पूर्णह्रदात्स्रवंत्या वा
कांचनं पात्रं माहेयं वाद्भिः पूरयित्वापोहिष्ठीयाभिरेनमद्भिरभिषिंचेयुः सर्व एवाभिषिक्तस्य प्रत्युद्धारः पुत्रजन्मना व्याख्या
त इति। प्रत्युद्धारः परिग्रहः। तत्रोद्धरतां हस्तन्निवाय्येसःस्यात्। तापात्रयातां घटस्फोटं कुर्वतां हरन्निव पश्चात्तं गच्छेत्।
मातापित्रादिहंतॄणां परिग्रहो न कार्यः। तस्य सादेसति चीर्णव्रतानां कार्यः। प्रवृत्तं निर्णये पुत्रजन्मनेत्यभिषेकोत्त
रं जातकर्मादयः संस्काराः। पुत्रजन्मवत्कार्याः इत्यपरार्को व्याचख्यौ। अत एव विज्ञानेश्वरः घटेऽपवर्जिते ज्ञातिम
ध्यस्थो यवसं गवां। दद्यात्प्रथमं गोभिः सत्कृतस्य हि सत्क्रियेति। अत्र्यावांभन्नणाभावे पुनर्व्रतं चरेदित्यपेतस्य कृते
एव चीर्णव्रतविधौ विशेषोयमिति वदन् घटस्फोटोत्तरं परिग्रहे एवैतन्न सर्वत्रेत्याह। तस्मात्कृतेपि घटस्फोटे प्रा
यश्चित्तपरिग्रहविधिः पुनःसंस्कारो भवतीति सिद्धांत यज्जीवच्छ्राद्धे कृते हेमाद्रौ बोधायनः। तत्राशौचं दशाहादीत्य
लं प्रसंगेन। एवं सापवादे आशौचे उक्ते प्रतिशाखं भिन्नेप्यंत्यकर्मणि साधारणं किंचिदुच्यते। तत्राधिकारिणः।
प्रागुक्ताः। सर्वाभावे धर्मपुत्रो वा कार्यः। अपुत्रेणासुतः कार्यो यादृक्तादृक्प्रयत्नतः। पिंडोदकक्रियाहेतोर्नामसंकी एषः
र्त्तनाय चेति॥ व्यासवचनात्। गृह्यपरिशिष्टे। असगोत्रः सगोत्रो वा यदि स्त्री यदि वा पुमान्। प्रथमेहनि यो दद्यात्स दशा

हं समापयेत्। दद्यात्पिंडमिति शेषः। भविष्ये। यत्राद्योदीयते पिंडस्तत्र सर्वान्समापयेत्। श्राद्धेपि। प्रथमे ह्नि यो दद्यात्स देतामान्नं समाहितः। अन्नेन वस्तु यान्येषु स एव प्रदद्यात्यपि। विज्ञानेश्वरादयस्तु। अग्निं दद्यादिति व्याचक्षते। सगोत्रो वा सगोत्रो वा योग्निं दद्यात्स एव नरः। सोपि कुर्यान्नवश्राद्धं शुद्धस्तु दशमेहनीति दिवोदासीये वचनाच्च। ते न देशांतरे मंत्रवद्दाहे ज्ञाते दाहकर्त्रीति तस्यैव त्र्यहादशाहकर्त्रोदाहोप्यावर्त्तनं। पत्नदापत्न्याः सहगमनंमपि विज्ञानेश्वरमते नैमवत्स्येवेति सिद्धं। तत्रैव। दृष्ट्वाच्छानस्थमासन्नमर्द्धोन्मीलितलोचनं। भूमिष्ठं पतितं पुत्रोपद्धिदानं प्रदापयेत्। तद्धिशिष्टं गयाश्राद्धादश्वमेधशतादपि। तानि पथ्या। मोक्षं देहि हृषीकेश मोक्षं देहि जनार्दन। मोक्षधेनुप्रदानेन मुकुंदः प्रीयतां ममेति मोक्षधेनुमंत्रः। ऐहिकामुष्मिकं यच्च सप्तजन्मार्जितं नृणां। तत्सर्वं शुद्धिमायातु गामेतां ददतो ममेति ऋणाधेनुमंत्रः। आजन्मोपार्जितं पापं मनोवाक्कायकर्मभिः। तत्सर्वं नाशमायातु गोप्रदानेन केशवेति पापधेनोः। भारते। शुक्लपक्षे दिवा भूमौ गंगायां चोत्तरायणे। धन्यास्तातमरिष्यंति हृदयस्थे जनार्दने॥ हेमाद्रौ वाराहे। व्यतीपातोथ संक्रांतिस्तथैव ग्रहणं रवेः। पुण्यकालास्तदा सर्वे यदा मृत्युरुपस्थितः॥ व्यासः। आसन्नमृत्युना देया गौः सवत्सा तु पूर्ववत्। तदभावे तु गौरेव नरकोत्तरणाय वै॥ तदा यदि न शक्नोति दातुं वैतरणीं तु गां॥

३४४ शक्तोन्योऽशक्तदादत्वाद्दद्याच्छ्रेयोमृतस्यच। मरन्नत्वेज्ञात्वकर्ण्यः। उत्क्रांत्यादीनिदानानिदशदद्यान्मृतस्यतु। गोभू
तिलहिरण्याज्यवासोधान्यगुडानिच। रूप्यंलवणमित्याहुर्दशदानान्यनुक्रमात्। एतानिदशदानानिनराणांमृ
त्युजन्मनोः। कुर्यादभ्युदयार्थंतुप्रेतेपिहिपरत्रवै॥ ब्राह्म्ये। ताम्रपात्रेतिलैःपूर्णंप्रस्थमात्रंद्विजायतु। सहिरण्यं
चयोदद्याच्छ्रद्धावित्तानुसारतः॥ सर्वपापविशुद्धात्मालभतेगतिमुत्तमां॥ उत्क्रांतिवैतरण्यौचदशदानानिचैवहि
। प्रेतेपिंडत्वात्प्रेतंशवधर्मेणदाहयेत्। तत्रैवपरिशिष्टे। म्रियमाणस्यकर्णेतुपुण्यमंत्रान्जपेत्ततः। क्रियाणिवं
धेगाहडेत्वष्टौदानानिउक्तानि॥ तुलसीसंनिधौकृत्वाशालग्रामशिलांतथा। तिलालोहंहिरण्यंचकार्पासं
लवणंतथा॥ सप्तधान्यंक्षितिर्गावएकैकंपावनंस्मृतमिति। दशदानानिवैतरणीधेनूत्क्रांतिधेनुदानादिमह
कृतान्येषिपद्धतौज्ञेयं। कर्त्रात्यकर्माधिकारार्थंत्रीन्कृच्छ्रान्कुर्यात्। इतितत्रैवोक्तं। पत्रदेवयाज्ञिकेनमुमुक्षो
र्मधुपर्कदानमुक्तं। तदुक्तंवाराहे। हृष्टात्तुविद्धलंत्येनं। यमयातनिवारिणं। प्रयाणकालेतुनरोमंत्रेणवि
धिपूर्वकं। मधुपर्कंस्वरन्गृह्यमंत्रमेतमुदाहरेत्। गृहाणचेमंमधुपर्कमाद्यंसंसारनाशनकरंत्वमृतेनतुल्यं एनः
॥नारायणेनरचितंभगवान्प्रियाणांदाहेचशांतिकरणंसुरलोकपूज्यं। अनेनैवतुमंत्रेणदद्याच्चमधुपर्ककं॥

नरस्यमृत्युकालोतुपरलोकसुखावहं। अथदुर्मरणोदिवोदासीये। चंडालादिमृतेविप्रेत्वंतरिक्षमृतेपिवा। कृच्छ्रा
तिकृच्छ्रचांद्रैस्तुशुद्धिस्तत्रप्रकीर्त्तिता। देवजानीयेजाबालिः। शूद्रेणादग्धोयोविप्रोनलभेच्छाश्वतींगतिं॥ प्रायश्चि
त्तंप्रकुर्वतब्राह्मणाःपापशुद्धये। चांद्रायणंचपाराकंप्राजापत्यंविशोधनं। गृह्यकारिकायां। उदक्यासूतिकावापि
परिप्रेतस्पृशातिहि। तस्यैषांविधिरादिष्टोवात्स्येनैवमहात्मना। एषसूतिकोक्तः। मदनरत्नेस्मृत्यंतरे। उदक्योच्छिष्टो
धार्योच्छिष्टोभयोच्छिष्टेतथैवच। अस्पृश्यस्पर्शनेचैवखड्गादिमरणेपिच। स्नानंकृत्वादसंस्पृष्टेकृमिकीटोद्भवेपि
च। एतद्दोषानुसारेणप्रायश्चित्तंसमाचरेत्। कृच्छ्रांत्रिषट्पंचदशांश्चांद्रंत्रयमथापिवा। भुंजीततदानींसंपाद्यशव
धर्मेणदाहयेत्। गृह्यकारिकायां। खड्गायांमरणेचैवंत्रीहीनकृच्छ्रान्प्रकल्पयेत्। सर्वांत्यजैस्तुसंस्पृष्टोमृतोदे
वात्कथंचन। एकत्रिंशताकृच्छ्रैस्तुशुद्धिरुक्तामनीषिभिः। कुणपेलईदग्धेल। चितास्पृष्टेंत्यजादिभिः। तत्स्पर्शनंदू
षणंचत्रिभिःकृच्छ्रैर्विशुध्यति। धर्मप्रदीपे। चंडालसूतिकोदक्यास्पृष्टेप्रेतेतथैवच। तस्यपापस्यशुद्ध्यर्थंकृच्छ्रा
न्यंचदशाचरेदिस्तुतं॥ मनुः। अस्वर्ग्याह्याहुतिःसास्याच्छूद्रसंस्पर्शदूषिता। अत्रापिकृच्छ्रत्रयं। अस्पृश्यस्पर्शनेचैवं
सूतकैः। तत्रैवकर्मप्रदीपे॥ रात्रौवायदिवाशेषेवाग्निर्यंतेचेद्द्विजातयः। दाहंकृत्वायथान्यायमंत्रोपिंडोनिर्वपेत्ततः।

रजस्वलागर्भिण्यादिमृतौ तु कस्यामतः । निर्णयामृते पारिजाते च यमः ॥ संध्यायां वा तथा रात्रौ दाहः पाथेयकर्म च । नवश्रा
द्धं च नो कुर्यात्कृतं निष्फलतां व्रजेत् । एतद्दिनमृतस्य रात्रिनिषेधार्थं । पत्नस्त्वादे । यदि रात्रौ दहेत्तस्य समाप्तिर्द्वेहनस्य तु ॥
परेह्न्युदिते सूर्ये कार्या तस्योदकक्रिया । न दग्धस्य तु नवैकार्या रात्रौ जातूदकक्रियेति । तन्निर्मूलं । रात्रिमृतस्य त
त्रैव संस्यहे । रात्रौ दग्धस्य तु पिंडं तेकुलावपनवर्जितं । वपनं नेष्यते रात्रौ श्वस्तनी वपनक्रियेति । वपनं तु प्रातः । तच्च
सर्वैः पुत्रैः कार्यं । गंगायां भास्करक्षेत्रे मातापित्रोर्गुरौ मृते । आधाने सोमपाने च वपनं सप्तसु स्मृतमिति ॥ मिताक्षरा
यां स्मृतेः । मरणस्नानं गिलान्नैमित्तिकमिदं । तदेव संग्रहवचनेन परेद्युरुत्कृष्यते । तीर्थस्नात । तेन कस्यचिद्दाहां
गहोक्तिश्चिंत्या । मदनरत्ने गालवः । प्रथमेहनि कर्तव्यं वपनं चानुभाविनां । प्रेतस्य केशश्मश्र्वादि वापयित्वा प्रदा
पयेत् । आशौचांते तु पुनः कार्यं । विधिबलात् । मदनपारिजातेप्येवं । तेन सर्वस्यास्य निर्मूलोक्ती रत्नोक्तैव । स्मृति
रत्नावल्यां । शवं रात्र्युषितं चेद्वीनकृच्छ्रान्कृत्वा दहेत्तु तत्र मदनरत्नेंगिराः । ऊर्ध्वोच्छिष्टाधरोच्छिष्टेष्वंतरिक्ष
मृतेपि च । कृच्छ्रत्रयं प्रकुर्वीत आशौचमरणेपि च । अथ साग्नेर्विशेषः कारिकायां ॥ कृष्णपक्षे प्रमीयेत यद्यग्निः प्रात एनः
राहुती शेषात्तत्कुर्याद्दर्शपर्यंताः प्रसहोमवत् । प्रतिपत्प्रातर्होमांतादूर्ध्वं यद्याहिताग्निरपरपक्षे म्रियेत ।

इतिभेनंपूर्वपक्षहरेपुरित्याप्यलापनोक्तो॥ तदानीमेवजुहुयात्सायंकालाहुतीरपि॥ सायंम्रियेतचेत्सायेमाहुती
र्जुहूयादर्था॥ तदानीमेवजुहुयात्सायंकालाहुतीरपि॥ मस्कृहीतमंत्रेष्टंभिन्नेतंत्रेचहोमयोः दार्शेच्यापिप्रकु
र्वतस्थालीपाकंतदैवतुल्यंहोगपरिशिष्टे॥ हुतायांप्रातराहुत्यांदुर्बलश्चेद्गृहीभवेत्॥ प्रातर्होमस्तदैवस्याज्जी
वेच्चेत्सपुनर्नवा॥ दुर्बलोमुमूर्षुः॥ त्रिकांडमंडनः॥ दर्शेष्टिंचतदाकुर्याद्दिष्टिर्यादिनसंभवेत्॥ देवतानांप्रधाना
नामेकैकस्यहुनेत्पृथक्पुरोनुवाक्यायाज्याभ्यांचतुएत्रघृताहुतीः॥ तथा॥ अग्नावरण्योराहृते प्रमीयेतेयति
यदि॥ प्रेतंस्पृष्ट्वामथित्वाग्निंत्वाचोपावरोहणं॥ घृतंचद्वादशोपात्तंतूष्णींहुत्वाशवक्रिया॥ विच्छिन्नाहुत्यो ता
ग्नेर्मृतौतुप्रेताधानंतत्रैवोक्तं॥ प्रेतंस्वाम्यालपेत्त्रिस्वामथितान्याग्नानलेरतिं॥ सन्निधाप्या॥ एणीमंथेघस्येति
यजुषाततः॥ यस्याग्नेयोजुह्वतोमांसकामाःसंकल्पयंतेयजमानमांसं॥ नायंतुतेहविषेसादितायस्वर्गंलोकं
पिमंप्रेतंनयंत्विति मंत्रः॥ प्रणीपपावकंतूष्णींद्वादशोपात्तसर्पिषा॥ तूष्णींहुत्वाततः कुर्यात्प्रेतेमान्याहति॥ क्रि
या॥ नष्टेष्वग्निषुचारण्योर्नाशेस्वामीम्रियेतचेत्॥ आहोद्दाणीद्वंद्वंमनोज्योतिरित्यंचास्ततः॥ यजुःपार्श्वः॥ यजमा
नेचिताहृदेपात्रन्यासेहुतेसति॥ वर्षाघभिहेतेवश्लोकयंकुर्वीतयाज्ञिका॥ तदर्हंदग्धकाष्ठेनमथनंतत्रकारये

तातश्चेषालाभतोऽन्येन दग्धशेषेण वा पुनः। कृत्वास्थिं लौकिके वह्नौ दग्धशेषं दहेत वा। अत्राग्निषु सत्सु पर्णशरैः शरीरो
त्पत्तिः शरीरे वाऽसति प्रेताधाने नाग्न्युत्पत्तिः। उभयाभावे तु प्रेताधाने नाधिकाराद्दाहादिसंस्कारलोपः। तु उदकदाना
द्येव कार्यमिति केशवीकारः। शतद्वयीप्रभवाः। तन्न। द्वादशवर्षादिप्रतीक्ष्योत्तरं दाहविधिविरोधान्निषेकाद्याः श्म
शानांतास्तेषां वै मंत्रतः क्रियाः इति विरोधात्। क्रियालोपगतायेवेति निषेधात्। तदभावे पलाशानां वृंतैः कार्यः पुमा
नपीत्यभावे विधानाच्च। पत्न्या अप्येवं दाहः। दाहयित्वाग्निहोत्रेण स्त्रियं वृत्तवतीं पतिरिति याज्ञवल्क्योक्तेः। यत्तु द्विती
यां चैव यो भार्यां दहेद्वैतानिकाग्निभिः। जीवन्त्यां प्रथमायां तु सुरापानसमं स्मृतमिति तदाधाने सहानधिकृता
विषयमिति ज्ञानेश्वरः। मदनरत्ने ब्राह्मेऽपि। आहिताग्न्योश्च दंपत्योर्यस्त्वादौ म्रियते यदि। तस्य देहः सपिंडैश्च द
ग्धव्यस्त्रिभिरग्निभिः। पश्चान्मृतस्य देहस्तु दग्धव्यो लौकिकाग्निना। अनाहिताग्निदेहस्तु दाह्यो गृह्याग्निना द्विजैः।
त्रिकांडमंडनस्तु विकल्पमाह। ज्येष्ठायां विद्यमानायां द्वितीयायै स्वयोषिते। कामं नित्याग्निहोत्रं वा न कथंचन प्र
यच्छति। स्त्रीमात्रमविशेषेणादग्ध्वान्यैर्वैदिकाग्निभिः। विवाह्याद्दधते यस्तु आधानमेवास्ति पद्धूरिति। अत्रेदं तत्त्वं। मा एषः
र्येः पत्नी मृतौ द्वौ पक्षौ। पुनर्विवाहेच्छायां पूर्वामग्निभिर्दहेत इत्येकः पक्षः। भार्यायै पूर्वमारिण्यै दत्वाग्नीनंत्यकर्म

णि॥पुनर्दारक्रियांकुर्यात्पुनराधानमेवचेतिमनूक्तेः॥दाहयित्वाग्निहोत्रेण॥स्त्रियंवृत्तवतींपतिरितियाज्ञवल्क्योक्तेश्च॥पु
नर्विवाहाशक्तौ॥निर्मथ्येनतांदग्ध्वापूर्वाग्निषेवाग्निहोत्रेष्ट्यादिकार्यमित्यन्ये॥आहार्येणानाहिताग्निंपत्नीचेदा
श्वलायनोक्तेः॥भरद्वाजोपि॥निर्मथ्येनपत्नीमिति॥पूर्वाग्न्येकदेशेनदहेदितियज्ञपार्श्वद्व्याज्ञिकादयः॥यानिचात
स्मादपत्नीकोप्यग्निहोत्रमाहरेदितिश्रुतिः॥विष्णुश्छंदोगपरिशिष्टेच॥मृतायामपिभार्यायांवैतानाग्निंनहित्यजेत्॥
उपाधिनापितत्कर्मयावज्जीवंसमाचरेत्॥हेमकुशपत्न्यादिः॥अन्येकुशमयींपत्नींकृत्वातुगृहमेधिनः॥अग्निहोत्रमु
पासंतेयावज्जीवमनुव्रताः॥इत्यपरार्केस्मृत्यंतरात्॥कात्यायनोपि॥रामोपिकृत्वासौवर्णींसीतांपत्नींयशस्विनीं॥
ईजेबहुविधैर्यज्ञैःसहभ्रातृभिरच्युतइत्यादीनितानिपूर्वाग्निषेवाग्निहोत्रपराणि॥नत्वपत्नीकस्याधानार्था
नि॥क्रतुविधिश्रद्धानामाधानाप्रयोजकत्वात्॥अपत्नीकस्याधानाग्रहात्तेरितिमानवपरिशिष्टाच्च॥सोमोन
भवत्येव॥अपत्नीकोप्यसोमपइतिश्रुतेः॥यत्तुभरद्वाजापस्तंबसूत्रे॥दारकर्मण्यप्यशक्तआत्मार्थमग्न्याधे
यमिति॥अस्यार्थः॥पुनर्विवाहाशक्तौयद्यग्न्याधेयंपूर्वंकृतमस्तितदात्मार्थमेवानपत्न्यैरिष्ट्यादीति॥ब्राह्मण
भाष्यापरार्कौशार्करामांडारादितत्वमप्येवं॥त्रिकांडमंडनस्तुपक्षद्वयमाह॥अन्येप्यपत्नीकस्याधानमाहुस्तदा

शयंतविप्राः॥ वृद्धयाज्ञवल्क्यः॥ आहिताग्निर्यथान्यायंदग्धव्यस्त्रिभिरग्निभिः॥ अनाहिताग्निरेकेणलौकिकेनापरोजनः॥
कतुः॥ एवंवृत्तांसवर्णांस्त्रीं द्विजातिःपूर्वमारिणीं॥ दाहयेदग्निहोत्रेणयज्ञपात्रैश्चधर्मवित्। कारिकायां। पत्नीमपिदहे
देवंभर्तुःपूर्वमृतायदि। अनग्निकांदहेद्देवंकापालेनहविर्भुजा। आशौचप्रकाशेकतुः। विधुरंविधवांचैवकपालपा
लस्याग्निनादहेत्। ब्रह्मचारिणंपतितंचैवदहेदुत्तपनाग्निना। तुषाग्निना। तुषाग्निनाचदग्धव्यःकन्यकाबालएवच।
अग्निवर्णंकपालंतुकृत्वातत्राविनिक्षिपेत्। काषादिततोवह्निर्जातोयःसकपालजः। अनुपनीतेयद्यपिज्ञा
रण्यग्निःकैश्चिदुक्तस्तथापितस्यकलौनिषिद्धलोकेरयमेवज्ञेयः। मध्यंतरे। गृहस्थोब्रह्मचारीचविधुरोविधवाः
स्त्रियः। औपासनश्चोत्तपनस्तुषाग्निश्चकपालजः। उत्तपनस्तु। दर्भाग्रेंतुप्रज्वाल्यपुनर्दर्भैस्तुसंयुतः। पुनर्दर्भै
र्हृतोयोग्निरेषउत्तपनःस्मृतः। यमः। यस्यानयतिशूद्रोग्निंतृणंकाष्ठंहवींषिच। प्रेतत्वंचसदातस्यसचाधर्मेण
लिप्यते। देवलः। चंडालाग्निरमेध्याग्निःसूतिकाग्निश्चकर्हिचित्। पतिताग्निश्चिताग्निश्चनशिष्टग्रहणोचिताः। मनुः। दक्षि
णेनमृतंशूद्रंपुरद्वारेणनिर्हरेत्। पश्चिमामोत्तरपूर्वैस्तुयथासंख्यंद्विजातयः। अत्रप्रातिलोम्येनक्रमपूर्वामुखस्तु
नेतव्योब्राह्मणोबांधवैर्गृहात्। उत्तराभिमुखोराजावैश्यःपश्चान्मुखस्तथा। दक्षिणाभिमुखःशूद्रोनिर्हर्तव्यःस्वबां

एमः

धवैः॥ इत्यादित्यपुराणात्॥ इत्यपरार्कः॥ तेन त्रिंशच्छ्लोको वा कुर्यात्तल्लोमक्रमो हेयः॥ आश्वलायनः॥ ज्येष्ठे प्रथमा॥ कनिष्ठ जघ
न्या गच्छेयुः॥ अथाधानोत्तरं द्वितीयविवाहे कृते यजमानमरणे श्रौतस्मार्ताग्न्योः संसर्गः बोधायनसूत्रे॥ अथ पत्न्याहि
ताग्निर्द्वैभार्यो विंदेत प्राक्कृत्वा योगान्निर्यतोपासनं संपरिस्तीर्याज्यं विलाप्य चतुर्गृहीत्वा समिद्वत्यग्नौ जुहोति संमितं
संकल्पयामिति समिदाकृतीर्ज्यां हुत्वा स्वकुलाथ्ये तमग्निमपंते योनिर्त्वें लियइति समिधे समारोप्य गार्हपत्ये स
मिधमभ्यादधाति भवतं नः समनसाविति गार्हपत्य आज्यं विलाप्य चतुर्गृहीतं गार्हपत्ये जुहोत्यया वग्नि स्वरातिप्र
विष्ट इत्यपरं चतुर्गृहीत्वा चित्तिः स्रुगिति सग्रहं जुहोत्यथ गार्हपत्ये स्रुवाहुतीर्जुहोति ब्राह्मण एकहोतेति दश
मिथ्य प्राचीनावीत्वाहार्यपचने जुहोति ये समाना ये सजाता इति द्वाभ्यामथ तत्र स्रुवाहुतिं जुहोत्यग्नये क
व्यवाहनाय स्विष्टकृते स्वधा नमः स्वाहेति सव्यं यज्ञोपवीती द्वादशगृहीतेन स्रुचं पूरयित्वा पुरुषसूक्तेनाहवनी
ये जुहोत्यथ स्रुवाहुतीर्जुहोत्यग्नये स्वाहाग्नये तं त्वमतेग्नये वैश्वानरायेत्यथ चतुर्गृहीतं जुहोति मनो ज्योतिरि
त्यत ऊर्ध्वं पैतृकं कर्म प्रतिपद्यते॥ आहिताग्नौ विदेशमृते पाथिकृतीष्टिर्मृताग्निहोत्रं तद्दाहः पात्रयोजनं कल्पसू
त्रादिभ्यो ज्ञातव्यः पितामहपद्धतेश्च ज्ञेयमिति बहुवक्तव्योऽप्युपरम्यते॥ स्मार्ताग्निस्तु कर्मदनरत्ने छंदोगपरिशिष्टे चाद्व

लस्नापयित्वातत्सुदुह्य चेलाभिसंवृतां दक्षिणाशिरसम्भूमौ बर्हिष्मत्यां निवेशयेत् । घृतेनाभ्यक्तमाप्लाव्य शुद्धवस्त्रोपवी
तिनं । चंदनोक्षितसर्वांगं सुमनोभिर्विभूषयेत् ॥ हिरण्यशकलान्यस्य क्षिप्त्वाछिद्रेषु सप्तसु । मुखेष्वथापिधायैने
नं निर्हरेसुः स्तुतादयः । आमपात्रेन्नमादाय प्रेतमग्निपुरःसरं । एकोनिर्गछेत्तस्यार्धमर्द्धपथ्युत्सृजेद्भुवि । ऊर्ध्वमा
दहनकार्यमासीनो दक्षिणामुखः । सव्यं जान्वाच्य शनकैः सतिलपिंडदानवत् । अथपुत्रादिराप्लुत्य कुर्याद्दारुच्चयं
महत् । तत्रोत्तानं निपात्यैनं दक्षिणाशिरसं मुखे । आज्यपूर्णां स्रुवं दद्याद्दक्षिणाग्रां नसि स्रुवं । पादयोरधरां प्राची
मरणीमुरसीतरां । पार्श्वयोः शूर्पचमसौ सव्यदक्षिणयोः क्रमात् । मुसलमेढ्रे न्यसेन्मध्ये बुध्नमंतरूर्वोरुलूखलं ॥ चाचो
विलीकमंत्रेव चान्येष्वप्ययं विधिः । अपसव्येन कृत्वैतद्वाग्यतः पितृदिङ्मुखः । अथाग्निं सव्यमाहृत्य दद्याद्दक्षिण
तः शनैः । अस्मात्त्वमधिजातोसि त्वदयं जायतां पुनः । असौ स्वर्गाय लोकाय स्वाहेति परिकीर्त्तयेत् । तथा । एवमेवा
हिताग्नेश्च पात्रन्यासादिकं भवेत् । कस्माज्जिनादिकं चात्र विशेषो धर्मनोदितः । तत्रैव । अनयेवावृता नारी दग्धव्या
याव्यवच्छिता । अग्निप्रदानमंत्रोस्या पुंनोदितः । तत्रैव । अनयेवावृता नारी दग्धव्या याव्यनपयोस्पेरतिष्ठितिः इ एमः
दंछंदोगानामेव । पात्रन्यासो कैः हृतानदेहत्वे साग्निपरं । निरग्निस्तूपमानधोमुखः । स्त्रीउत्तानामादाघा । सगोत्रजेमृ

हीलाता। चितामारोप्यते शवः। अधोमुखो दक्षिणादिक्चरणास्तु पुमानिति। उत्तानदेहा नारी तु सपिंडैरपि बांधवैरिति
आदित्यपुराणादिति शुद्धितत्त्वहारलतादयः। उक्ताः शिरस्त्वं समगोतरपुरं। याराहेतयिदानेन्यो मंत्रः। कृत्वा तु दुष्कृ
तं कर्म जानता वाप्यजानता॥ मृत्युकालवशं प्राप्य नरं पंचत्वमागतं। धर्मासमायुक्तं लोभमोहसमावृतं। दहेयं स
र्वगात्राणि दिव्याल्लोकान्स गच्छतु। ज्वलमानं महावह्निं शिरःस्थाने प्रदापयेत। चतुर्वर्णेषु संस्थानमेवं भवति पुत्रि
के। अत्र क्रियाणि बंधेणारुदे। षड्पिंडदानमुक्तं। मृतस्योत्क्रांतिसमये षट् पिंडान्क्रमशो ददेत। मृतिस्थाने तथा
द्वारे चत्वरे तार्क्ष्य कारणात। विश्रामे काष्ठचयने तथा संचयने च षट्॥ तथा। आदौ देयास्तु षट् पिंडा दशपिंडाद
शाहिकाः। स्थाने चार्द्धपथे तीर्थे चितायां शवहस्तके। श्मशानवासिभूतेभ्यः पथसंचयने तथा। त्वं भूतकृज्ज
गद्योने त्वं लोकपरिपालक। उक्तः संहारकस्तस्मादेनं स्वर्गमृर्गमृतेनतय। इत्यग्निं दत्वा॥ अस्मात्त्वमिति मंत्रे
ण दग्धे आज्याहुतिरुक्ता। आहिताग्नेः पात्राणिः। शम्यां शिश्ने विनिक्षिप्य अरणीं मुष्कयोरपि। जुहूं च दक्षि
णे हस्ते वामे तूपभृतं न्यसेत। पृष्ठे तूलूखलं दद्यात् पृष्ठे च मुसलं न्यसेत्। उरसि क्षिप्य दृषदं तंडुलाज्यतिलान् मुखे।
श्रोत्रे च प्रोक्षणीं दद्यादाज्यस्थालीं च चक्षुषोः। कर्णे नेत्रे मुखे घ्राणे हिरण्यशकलं न्यसेत। अग्निहोत्रोपकर

३५९

णामशेषं तत्र निक्षिपेत्। प्रचेताः। स्नानं प्रेतस्य पुत्राद्यैर्वस्त्राद्यैः पूजनं ततः। नग्नदेहं दहेन्नैव किंचिद्देयं परित्यजेत्। यमः। प्रे
तं दहेच्छुभैर्गंधैः स्नापितं स्रग्विभूषितं। आश्वलायनसूत्रे। संस्थिते प्रेतालंकारान्कुर्वंति केशश्मश्रुलोमनखानि वापयंति।
नलदेनानुलिंपंति नलदमालां प्रतिमुंचंतीति। माधवीये ब्राह्म्ये। दरिद्रोपि न दग्धव्यो नग्नः कस्यांचिदापदि। तथा। निः
शेषस्तु न दग्धव्यः शेषं किंचित्त्यजेन्नरः। दाहकाग्निनाशे तु मदनरत्ने यज्ञपार्श्वः। यज्ञमाने मृते क्वापि चितादौ वा प्रवेशि
ते। वर्षाद्यभिहतेग्नौ तु कथं प्रेतविकल्पना। शेषं दग्ध्वा प्रदग्धेषु निर्मथ्यैव तु कारयेत्। अथ पर्णशरादिदाहे। अग्निनाशे
पश्चात्तद्देहलाभे तदार्द्धदग्धकाष्ठानि ता निर्मथ्येत्तं दहेत्। यद्यर्द्धदग्धकाष्ठं तु तदीयं नैव लभ्यते। तदा तदास्थिरखंडं
लं निक्षेप्तव्यं महाजले। इति। दंपत्योरेकदा मृत्यौ विशेषमाहापस्तंबः। तयैव प्रेते सहैव पितृमेधो द्विवचनलिंगान्मंत्रा
न्संराधयंति पितृमेधो दाहांतं कर्मादाहांतमेकतंत्रमिति बोधायनोक्तेः। अस्थिसंचयनमप्येकं। उदकपिंडदानादि
पृथगेव। सहगमनेप्येवं। तदाह मदनरत्ने भाष्यार्थसंग्रहकारः। एककाले मृतौ भार्याभर्त्तौ वा यदि चेद्द्वयोः। तत्रैकदहनं कुर्या
त्पिंडश्राद्धं पृथक्पृथक्। एककालमृतौ जायापती यदि तदा पितुः। विभज्याग्निक्रिया कुर्यादिति यज्ञदर्शसांप्रतं। दाहांतमे एमः
कतंत्रमिति याज्ञिकसंमतं। मृतं पतिमनुव्रज्य या नारी ज्वलनं गता। अस्थिसंचयनांतास्या भर्तुः संस्कार एव हि। कीकसा

नांतुत्तस्कारोन्याय। सिद्धोपि नो मतः॥ एककालमृते त्वेवं कीकसानां विधिः स्मृतः॥ नवश्राद्धं सपिंडांतं भिन्नकालमृतौ य
थ्या। कर्पर्द्दीकारिकापि। मृते भर्त्तरि तद्दाहात्प्राक्पत्नी म्रियते यदि। पत्यां वा प्राक्प्रमीतायां दाहादर्वाक्पतिर्मृतः। तत्र
तंत्रेण दाहः स्यान्मंत्रेषु द्वित्वमूह्यते। कीकसानां तु संस्कारः पृथगेव तयोर्भवेत्। एकाहमृत्योयुगपन्नवश्राद्धादिकं त
योः॥ मृतपतिमनुव्रज्य पत्नी चेदनलं गता। तत्रापि सहतंत्रेण पृथग्वास्थिक्रिया भवेत्। अस्थिसंचयने एय स्के विकल्पः
सहगमने सर्वत्र पाकैक्यमाहुः प्रचेताः॥ एकचित्यां समारूढौ म्रियेते दंपती यदि। तंत्रेणाश्रपणं कुर्यात्पृथक्पिंडं समाचरे
त्। अथोदकदानं। वसिष्ठः। शरीरमग्नौ सं~~आपसंबंधः मातुश्च~~। योज्यानवेक्ष्यमाणा। आपोभ्युपयंति सव्योत्तराभ्यां पाणिभ्या
मुदकक्रियां कुर्वंत्ययुग्मं॥ आपस्तंबः। मातुश्च योनिसंबंधेभ्यः पितुश्चासप्तमात्पुरुषाद्यावत्तां वा संबंधो ज्ञायते तेषां प्रे
तेषूदकक्रियेति। याज्ञवल्क्यः। सप्तमाद्दशमाद्वापि ज्ञातयेभ्युपयंत्यपः। अपनः शोशुचदघमनेन पितृदिङ्मुखाः॥ सकृत्
प्रसिंचंत्युदकं नामगोत्रेण वाग्यताः॥ सप्तमाद्दशमाद्वापि दिवसाद्दातदंतकमिति विज्ञानेश्वरः॥ कांताम्यास्त सप्तमाद्द
शमाद्वा पुरुषादित्याहुः॥ सप्तमात्पुरुषाद्दशमाद्वा समानग्रामवासे यावत्संबंधमनुस्मरेयुरिति पारस्करोक्ते॥ मंत्र स्ना
नांगमेवेति हेमाद्रिः॥ प्रचेताः। प्रेतस्य बांधवा यथार्हमुदकमवतीर्य नोद्धर्षयेयुरुदकांते प्रसिंचेयुरपसव्याह्यज्ञोपवी

तथा सप्तोदक्षिणामुखो ब्राह्मणस्योदङ्मुखः प्रात्यङ्मुखो राजन्यवैश्ययोः॥ सएव नदीकूलं ततो गत्वेत्युक्त्वा सचेलस्नातः तस्नात्वाशु
चिः प्रयतमानसः॥ पाषाणं तत्र आदाय विप्रे दद्याद्दशांजलीन्॥ द्वादश क्षत्रिये दद्याद्वैश्ये पंचदश स्तथा॥ त्रिंशच्छूद्राय
दातव्यास्ततः संप्रविशेद्गृहं॥ ततः स्नानपुनः कार्यं गृहशौचं च कारयेत॥ प्रेतस्नाने विशेषः॥ शुद्धितत्वे आदित्यपुराणे॥
आर्द्रैव वस्त्रं च प्रक्षाल्य पुनः परिधाय स्नायादित्यर्थः॥ अपनद्यतिवा महता नामिकया ऊलालोडनं॥ अवतरणे हृद्दपुरः
सरस्वोक्षेपं धाबाबं पुरस्कृत्येति बौधायनी यं कुलालादुच्छा न परमिति हारलतादयः॥ आश्वलायनः॥ सव्यावृतो ब्रुतुंत्यनी
दमाणाय प्रोदकमवहद्गवति तस्याप्यसकृदुन्मज्येकीञ्जलिमुत्सृज्य तस्मागोत्रं नामगृहीत्वेति प्रचेतसान्वहमंजलित्र
यमप्युक्तं॥ त्रिःप्रसेकं कुर्युः प्रेतस्यप्यालिविति॥ तथा॥ दिनेदिनेंजलीन्पूर्णान्प्रदद्यात्प्रेतकारणात्॥ तावद्वृद्धिश्च कर्त्तव्या
यावत्पिंडः समाप्यते॥ एकवृद्धिस्त्रिकवृद्धिर्वेत्यर्थः॥ मदनरत्ने भाद्वाजगृह्येतु द्विकवृद्धिरप्युक्ता॥ आशौचांते प्रदद्या
त्प्रेतपुत्रस्तिलांजलीन्॥ प्रथमेह्नि सकृद्दद्यात्पिंडयज्ञावृतादिवा॥ त्रींश्च दद्याद्द्वितीयेह्नि पंच दद्यात्तृतीयके चतु
र्थे सप्त संख्यातास्तपंचमे नव चोत्सृजेत् षष्ठेत्वेकादश प्रोक्ताः सप्तमे तु त्रयोदश॥ अष्टमे पंचदशका नवमे दश सप्त च॥
एकोनविंशतिं चाग्रे शतांजलिमतः स्मृतौ॥ केचिद्दशांजलीन्प्रोचुः केचिदाहुः शतांजलीन्॥ पंचपंचाशतं चान्ये स्वशाखे

एमः

त्कव्यवस्थया श्राद्धं देयं परिशिष्टे। अथानवेक्ष्यमाणास्ते सर्वे चैव शवस्पृशः। गोत्रनामपदांते तु तर्पयामीत्यनंतरं। दक्षिणाग्रान्कुशान्कृत्वा सतिलं तु पृथक्पृथक्। विष्णुपुराणे। सपिंडीकरणं यावदृजुदर्भैः पितृक्रिया। सपिंडीकरणादूर्ध्वं द्विगुणैर्विधिवद्भवेत्। रामायणे। इदं पुरुषशार्दूल विमलं दिव्यमक्षयं। पितृलोकेषु पानीयं मद्दत्तमुपतिष्ठतां। द। नवा को विकल्पः। याज्ञवल्क्यः। कामोदकं सखिप्रत्तास्वस्त्रीयश्वशुरर्त्विजां। कामइच्छा। प्रेततृप्तीच्छायां देयमन्यथा नेत्यर्थः। शंखपारस्करौ। आचार्ये चैवं मातामहयोश्च स्त्रीणां चाप्रत्तानां कुर्वरं त्वाश्च तेषामिति। द्विवचनान्मातामहयोरपि। शंखलिखितौ। उदकक्रियां कामं श्वशुरमातुलयोः शिष्ये सहाध्यायिनि राजनि चेति। वृद्धमनुः। क्लीबाद्या नोदकं कुर्युः स्तेना व्रात्या विकर्मिणः। गर्भभर्तृद्रुहश्चैव सुराप्यश्चैव योषितः। याज्ञवल्क्यः। न ब्रह्मचारिणः कुर्युरुदकं पतितास्तथा। षडशीतौ। स्त्रीयाचारादपि भ्रष्टाः पतिता ये च दूषिताः। न कुर्युरुदकं पतितास्तथा। षडशीतौ। स्त्रीयाचारादपि भ्रष्टाः पतितास्पे ते वै तेभ्योप्यन्येन चैवैहि। मदनरत्ने हारीतः। तततामपविद्धानां चरतीतां च कामतः। प्रत्तानां चैव कन्यानां निवर्त्य सलिलक्रिया। अपरार्के शंखलिखितौ। अपपात्रितस्याग्निपिंडोदकानि व्यावर्त्तंते। अपपात्रितः कृतघटस्फोटः। तस्यापि संग्रहविधौ कृते आशौचोदकादि कुर्यादेवेत्याशौचप्रकाशः। अथाशौचनियमाः। याज्ञवल्क्यः। इति संस्र

त्य गछेयुर्गृहं बालपुरःसराः। विदश्य निंबपत्राणि नियता द्वारि वेश्मनः। आचम्याग्न्यादि सलिलं गोमयं गौरसर्षपान्। प्रविशेयुः स
मालभ्य कृत्वाश्मनि पदं शनैः। प्रवेशनादिकं कर्म शवस्पर्शिनामपि। क्रीतलब्धाशना भूमौ स्वपेयुस्ते पृथक् क्षितौ। इदं चाद्येह्नि।
वसिष्ठः। अघप्रस्तरे त्र्यहमनश्नंत आसीरन् क्रीतोत्पन्नेन वा वर्तेरन् शुद्धितत्वे वैजवापः। शमीमालभंते शमी पापं शमय
त्विति। अश्मानमश्मेवेति स्थिरो भूयासमिति अग्निमग्निर्नः शर्म यच्छत्विति स्यीतिरियंगिरा ग्राममनुपस्पृशंतः क्रीतलब्धा
चान्यगेहादेकान्नमलवणमेकारात्रं दिवा भुंजीरंस्त्रिरात्रं कर्मोपरमणं क्रीताद्यशनमुपवासो वाशक्तस्य। आश्वलायनस्तु।
नैतस्यां रात्र्यामन्नं पचेरं। त्रिरात्रमक्षारालवणाशिनास्युर्द्वादशरात्रं चेत्याह। अशक्तौ रत्नाकरे आपस्तंबः। भार्यापरगु
रुसंस्थापयां चाकालभोजनानि कुर्वरन्नायदा मृतिः परदिने तावत्कालमित्यर्थः। बृहस्पतिः। अधःशय्यासनादीनाम
लिना भोगवर्जिताः। अक्षारालवणान्नाः स्युर्लब्धक्रीताशनास्तथा। भोगोभ्यंगतांबूलादिः। स्नानःपरिभाषायामुक्तः।
यत्तु मार्कंडेयपुराणे। तैलाभ्यंगो बांधवानामंगसंवाहनं च यत्। तेन चाप्यायते जंतुर्यच्चाश्नंति स्वबांधवाः। प्रथमेह्नि
तृतीये च सप्तमे नवमे तथा। वस्त्रत्यागं बहिः स्नानं कुर्याद्दद्यात्तिलोदकमिति। तदंत्यदिनपरं। आशौचांते ति एमः
लकल्कैः स्नाता गृहे प्रविशेयुरिति विष्णूक्तेः। विष्णुपुराणे वास्थिसंचयनोर्ध्वं भोगोप्युक्तः। शय्यासनीयभोगस्तु

श्यपिंडनामपीष्यते। अस्थिसंचयनादूर्ध्वं संयोगात्तु न योषितां। भारते। तिलान्दद्यत्पानीयं दीपं दद्यात्तथा गृत। ज्ञातिभिः सह
भोक्तव्यमेतत्प्रेतेषु दुर्लभं। मनुः। मांसाशनं न कुर्वान शयीरंश्च पृथक् क्षितौ। देवलः। नीयेकारिकायां। लवणान्नी रमाषान्ना
पूपमांसानि पायसं। वर्ज्जयेदाहृतान्नेषु बालवृद्धातुरैर्विना। उपवासो गुरौ प्रेते पत्न्याः पुत्रस्य वा भवेत्। मरीचिः। प्रथमेह्नि
तृतीये च सप्तमे दशमे तथा ज्ञातिभिः सह भोक्तव्यमेतत्प्रेतेषु दुर्लभं। भोजनं च दिवैव। दिवा चैव तु भोक्तव्यममांसं भरतर्ष
भेति विष्णुपुराणात्। कीलालगावावादिवान्नमश्नीयुरिति पारस्करोक्तेश्च। मदनरत्ने हारीतः। पाणिषु मन्मयेषु पुटकेषु
वाश्नीरन्। शुद्धितत्वे आदित्यपुराणे। आशौचमध्ये यत्नेन भोजयेच्च स्वगोत्रजान्। अंत्यदिने तु मदनरत्ने ब्राह्मे। यस्य य
स्य तु वर्णस्य यद्यत्स्यात्पश्चिमं त्वहः स तत्र गृहशुद्धिं च वस्त्रशु। द्धिं करोत्यपि। अंत्यकर्मकालीनवस्त्रप्रोक्तं तत्रैवोक्तं।
ग्रामाद्बहिस्ततोगत्वा प्रेतस्पृष्टे तु वाससी। अंत्यानामाश्रितानां च त्यक्त्वा स्नानं करोत्यथ इति शंखः। दानं प्रतिग्रहो हो
मः स्वाध्यायः। पितृकर्म च। प्रेतपिंडक्रियावर्ज्जमाशौचे विनिवर्त्तते। काठकगृह्ये यत्र प्राणोत्क्रमस्तत्रान्वहं महाबलिं
कुर्यादिति पारस्करः। तद्दानीमेव वस्त्रं तंडुलं दीपं कांस्यभाजनं प्रेताय दद्यात्। आशौचप्रकाशे भरद्वाजः। वासोन्नं चज
लं कुंभं प्रदीपं कांस्यभाजनं। नग्नप्रच्छादने श्राद्धे ब्राह्मणाय निवेदयेत्। भृगुः। तिलोदकं तथा पिंडान्नग्नप्रच्छादनादिकं।

३५२ रात्रौनकुर्यात्संध्यायांयदिकुर्यान्निरर्थकं।अथप्रेतपिंडाः।यद्यपिहेमाद्रौपारस्करेणब्राह्मणेदशपिंडाःक्षत्रियेद्वादशस्मृताः।वै
श्येपंचदशप्रोक्ताःशूद्रेत्रिंशत्प्रकीर्त्तिताः।इत्युक्तंतथापिविप्रेतेभ्यःसर्ववर्णेभ्यःपिंडान्दद्याद्दशैवतु।इतितेनैवोक्तेः।सर्वेषांदशै
वज्ञेयाः।मदनरत्नेप्येवं।तथाचहेमाद्रौब्राह्मपाद्मयोः।जात्युक्ताशौचतुल्यास्तुवर्णानांक्वाचिदेवहि।देशधर्मान्पुरस्कृत्यप्रे
तपिंडान्वपंत्यपीत्युक्त्वाविप्रान्येषुदशपिंडोत्कर्षउक्तः।देयस्तुदशमःपिंडोराज्ञांवैद्वादशेहनि।वैश्यानांवैपंचदशेदेयस्तु
दशमस्तथा।शूद्रस्यदशमःपिंडोमासेपूर्णेह्निदीयते।इति।वृद्धमृतादेः।सद्यःशौचेत्र्यहादौचतेनैवोक्तं।सद्यःशौचेप्रदात
व्याःसर्वेपियुगपत्तथा।त्र्यहाशौचेप्रदातव्याःप्रथमेन्ह्येकएवहि।द्वितीयेहनिचत्वारस्तृतीयेपंचचैवहि।त्र्यहेप्रकारांत
रंप्रागुक्तं।शातातपः।आशौचस्यचह्रासेपिपिंडान्दद्याद्दशैवतु।तत्रैकपात्रेसाकृत्यदशपिंडान्दद्यात।उत्तरीयशिला
पात्रकर्तृद्रव्यविपर्यये।पूर्वदत्तांजलीन्दद्यात्पूर्वपिंडांस्तथैवचेति।गृह्यकारिकायां।पात्रविपर्ययेदोषोक्तेः।।शिलाविप
र्ययेघटस्फोटादेर्नाशादिति।अत्राभ्यंजनादिपदकर्मणःएकहायनीनयनवदप्रयोजकत्वात्।तद्वच्चाचलौकिकग्रहणं
कंचित्तुनवान्यादायभांडानिआरुकंचरुकंतथा।इतिप्रचेतसोक्तेः।पात्रानेकत्वमाहुः।।क्रियाकर्तुर्नाशेन्येनशेषःस एनः
मापनीयः।एवंक्रियाप्रवृत्तानांयदिकश्चिद्विपद्यते।तद्बंधुर्वाक्रियाकार्यासर्वैर्वासहकारिभिरितिशुद्धितत्वेबृहस्पतिस्मृ

ते ॥ पत्न्याः कर्तृत्वे रजोदर्शने तदंते कुर्यात् । शावाद्द्विगुणमात्रं वमि त्युक्तेः ॥ अशौचाते आर्त्तवे कर्त्तुरस्वास्थ्ये चान्येन क्रिया
सर्वा वर्ज्जनीया । कर्त्तुर्विपर्ययात्कालातिक्रमा योगाच्चावाराहे । स्थंडिले प्रेतभागं तु दद्यात्सर्वान्क्रमेण तु । कृत्वा च पिंडदा
नं तु नाम गोत्रे समुद्दरि । मरीचिः । प्रेतपिंडं बहिर्दद्याद्दर्भमंत्रविवर्ज्जितं । प्रागुदीच्यां चरुं कृत्वा स्नातः प्रयतमानसः । द
र्भवर्ज्जमनुपनीतपर । असंस्कृतानां भूमौ पिंडं दद्यात्संस्कृतानां कुशोपरीति प्राचेतसोक्तेः ॥ मिताक्षरायां स्मृत्यंतरे
के श्च । भूमौ माल्यं पिंडं पानीयमुपलेपनं वा दद्युः । पुनः पुष्पैः फलमूलैश्च पयसा शाकेन च गुडेन वा । तिलमिश्रं तु दर्भे
षु पिंडं दाक्षिणातो हरेत् । प्रथमेहनि यद्द्रव्यं तदेव स्याद्दशाह्निकं । मदनरत्ने मात्स्ये । तैजसं मृन्मयं वाथ पात्रं संशोध्य य
+ तूष्णीं प्रसेकं पुष्पं च धूपं दीपं तथैव च । शालिना सक्तुभिर्वापि शाकैर्वाप्यथ निर्वपेत् । + ॥ त्वतः लौकिकाग्नावधिश्रि
त्यपचेदन्नं घृतप्लुतं । स्नात्वा यथा तिलसंमिश्रं प्रदद्याद्दर्भसंस्तरे । शुद्धितत्वे देवजानीये च ब्राह्मे । प्रथमेहनि योदद्यात्
प्रेताय अन्नं समाहितः । अन्नं नव सु चान्येषु तदेव प्रदद्यादपि । मृन्मयं भांडमादाय नवं स्नातः सुसंयतः । तंडुलप्र
सृतिं तत्र त्रिः प्रक्षाल्य पचेत्स्वपं सपवित्रे स्थितः तैलमिश्रं कृमिकेशविवर्ज्जितं । द्वारोपांते ततः क्षिप्त्वा शुद्धां वा गोरस
त्रिकां । भूपृष्ठे संस्तरेद्दर्भान्याम्याग्रान्देशतं भवाता । ततो वनेजनं दद्यात्तं स्मरन् गोत्रनामनी ॥ तिलसर्पिर्मधुक्षीरैः संसि

क्रांतप्रमेव बहिर्दद्यात् प्रेताय पिंडं तु दक्षिणाभिमुखस्थितः। अर्घ्यैः पुष्पैस्तथा धूपैर्दीपैस्तोयैश्च शीतलैः। ऊर्णातंतुमयैः
सूत्रैर्वा सोभिः पिंडमर्चयेत्। दिवसे दिवसे पिंडो देय एवं क्रमेण तु। सद्यःशौचे प्रदातव्याः सर्वेपि युगपत्तथा। अहःशौ
चेपि दातव्यास्त्रयः पिंडाः समाहितैः। द्वितीये चतुरो दद्यादस्थिसंचयनं तथा। त्रींस्तु दद्यात्तृतीयेह्नि वस्त्रादि क्षालये
त्ततः। दशाहेपि च दातव्यः प्रथमे त्वेक एव हि। एकस्त्वेकांजलिस्त्वेवं पात्रमेकं च दीयते। द्वितीये द्वौ तृतीये त्रीनित्युक्ता
एवं स्युः पंचपंचाशत्तोयस्यांजलयः क्रमात्। तोयपात्राणि तावंति संयुक्तानि तिलादिभिः। पात्रं कुंभः। अत्राहःप
दमहोरात्रपरं। तेन रात्रावपि देयमिति गौडाः। दिवसपदाद्रात्रौ नेति मैथिलाः। स एवेत्युक्तेः। सपिंडेन दशपिंडे प्रक्रां
ते पुत्रागमेपि स न दद्यात्। असगोत्रः सगोत्रो वेति प्रागुक्तेश्च दाहकर्त्रैव दशाहं कुर्यादिति मिताक्षरायां। शुद्धितत
त्वे वायवीयेपि। असगोत्रः सगोत्रो वा यदि स्त्री यदि वा पुमान्। यश्चाग्निदाता प्रेतस्य पिंडं दद्यात्स एव हीति।
तत्रैव। पूरकेण तु पिंडेन देहो निष्पते यतः। कृतस्य करणायोगात्पुनर्नावर्त्तते क्रियेति। शुद्धिप्रकाशे वायवीये
पि। निवर्त्तयति यो मोहात् क्रियामन्यनिवर्त्तितां। विधिघ्नस्तेन भवति पितृहा चोपजायते। तस्मात्प्रेतक्रियायेन केना एप्रः
पि च कृता यदि न तां निवर्त्तयेत्प्राज्ञः सतां धर्ममनुस्मरन्निति। आदित्यपुराणे। तिं पितृशब्दं स्वधां चैव न प्रयुंजीत कर्हि

।चिताग्रनुशावृं तथा चेह प्रयत्नेन विवर्ज्जयेत्॥ उपतिष्ठतामयं पिंडः प्रेतायेति समुच्चरन्॥ क्रियानिबंधे व्यासः॥ प्रेतायेतोऽ प
पिंडं दत्वा तु ततोऽश्रीयाद्दिनात्यये॥ भविष्ये॥ ओदनामिषसक्तूनां शाकमूलफलादिषु॥ प्रथमेऽहनि यद्दद्यात्तद्दद्यादुत्तरेऽहनि।
गृहद्वारे श्मशाने वा तीर्थे देवगृहेऽपि वा॥ यत्राद्यो दीयते पिंडस्तत्र सर्वान्समापयेत्॥ ब्राह्मे॥ शिरस्त्वाद्येन पिंडेन प्रेतस्य
क्रियते सदा॥ द्वितीयेन तु कर्णाक्षिनासिकाश्च समासतः॥ गलांसभुजवक्षांसि तृतीयेन यथाक्रमं॥ चतुर्थेन तु पिंडे
न नाभिलिंगगुदानि च॥ जानुजंघे तथा पादौ पंचमेन तु सर्वदा॥ सर्वपर्वाणि षष्टेन नाभिलिंगगुदानि च॥ जानुजंघे
तथा पादौ पंचमेन तुसप्तव सप्तमेन तु नाडयः॥ दंतलोमान्यष्टमेन वीर्यं तु नवमेन च॥ दशमेन तु पूर्णत्वं तृप्तता क्षुद्वि
पर्ययः॥ इति याज्ञवल्क्येन तु पिंडयज्ञावृता देयं प्रेतायान्नं दिनत्रयं स्मृतं॥ अत्र तारतम्यं ज्ञेयं॥ इति विज्ञानेश्वरः॥ तेन
त्र्यहाशौचे परत्वदेवयाज्ञिकोक्तं चिंत्यं॥ आशौचस्य च ह्रासेऽपि पिंडान्दद्याद्दशैव हि इति वचनाच्च॥ दिनत्रयावश्यकत्वार्थ
मिति हारलतादयः॥ शातातपः॥ जलमेकाहमाकाशे स्थाप्यं क्षीरं च मृन्मये॥ पारस्करः॥ मृन्मये तां रात्रीं क्षीरोदके विहा
यसी निदध्युः॥ प्रेतात्र स्नाहीत्युदकं पिब चेदमिति क्षीरं॥ हरदत्ताचावेवेति गौडाः॥ गारुडे तु अश्मपक्वे मृन्मये पात्रे दुग्धं द
द्याद्दिनत्रयमित्युक्तं॥ हेमाद्रौ पात्रमतु दशाहमुक्तं॥ तस्मान्निबंधे यमाकाशे दशरात्रं पयोजलं सर्वतापोपशांत्यर्थं

मध्यअमक्विनाशनं देवज्ञानीयेकार्ये कार्यांप्तत्र प्रेतोपकृतये दशाहत्रमवांदितं। कुर्यात्प्रदीपं तैलेन वारिपात्रं च मार्त्तिकं। भोज्या
द्यन्नकाले तु भक्तमुष्टिं च निर्वपेत्। नामगोत्रेण संबुध्याधारे ष्यांपिंडवत्। मृतलोकात्पितृलोकं तु गंतुं श्राद्धं समा
चरेत्। तृप्त्यर्थं हि भवति मृतस्य मनुजस्य तु। अथ दशाहमध्ये दर्शपाते निर्णयः।। भविष्ये। प्रवृत्ताशौचतंत्रस्तु यदि
दर्शः प्रपद्यते। समाप्य चोदकं। पिंडस्नानमात्रं समाचरेत्। ऋष्यशृंगः। आशौचमंतरा दर्शो यदि स्यात्सर्ववर्तिनां। समाप्तिर्वै
प्रेतस्तंत्रस्य कुर्यादित्याह गौतमः। पैठीनसिः। आद्यं दावेव कर्त्तव्या प्रेतपिंडोदकक्रिया। द्विरैं दर्वे तु कुर्वीत पुनः शावं स
मश्नुते। माता। पित्रोः स्तकश्लोको गौतमः। अंतर्दशाहे दर्शश्चेत्तत्र सर्वं समापयेत्। पित्रोस्तु यावदाशौचं दद्यात्पिंडान् जलां
जलीन्। इदमपि त्र्यहमध्ये दर्शपाते। तावदेवोत्तरं तंत्रे पर्यवस्येत्र्यहास्यं। इति गालवोक्तेः। अन्येषां + त्र्यहूर्ध्वं दर्शे तु पित्रोरपि तं
त्र समाप्यमेव। पित्रोराशौचमध्ये तु यदि दर्शः समापतेत्। + त्र्यहमध्ये पि समाप्तिरिति पराशरमाधवीये निर्णयामृते
चोक्तं। कालादर्शेपि। दर्शे दशाहमध्ये स्यादूर्ध्वं तंत्रं समापयेत्। त्रिरात्रादूर्ध्वं पित्रोर्मृतावपीति विलिख्य पश्च मदनपारिजाते
तु माधवीयमापदृनोरसादिविषयं त्र्यहोर्ध्वमपि पित्रोर्न तंत्रसमाप्तिरित्युक्तं। मदनरत्नेप्येवं। मम तु देशाचारा व्य
वस्थेति प्रतिभाति। अथास्थिसंचयः। तत्राश्वलायनेमे कृष्णपक्षएकादशीत्रयोदर्शे पुत्राषाढीफाल्गुनीप्रोष्ठपदां

एम.

भिन्नवर्षेषु क्रांतदाशौचमध्ये संभवेत हर्षीच प्राज्ञाह्याकरणोज्ञेयं। आशौचमध्ये तु मदनरत्ने संवर्त्तः। प्रथमेह्नि तृतीये वा सप्तमे नवमे तथा। अस्थिसंचयनं कार्यं दिने तद्गोत्रजैः सह। छंदोग्यपरिशिष्टे तु। अपरेषु तृतीये वा अस्थिसंचयनं भवेत्। इति द्वितीयेप्युक्तं। विष्णुकात्यायनौ। संचयनं चतुर्थ्यामिति। माधवीये यमः। भौमार्कमंदवारेषु तिथियुग्मे विवर्जयेत्। वर्ज्जयेदेकपादर्क्षे द्विपादर्क्षे स्थिसंचयं। प्रदातृजन्मनक्षत्रे त्रिपादर्क्षे विशेषतः। ब्राह्म्ये चतुर्थे ब्राह्मणानां तु पंचमेह्नि भूभृतां। नवमे वैश्यजातीनां शूद्राणां दशमात्परः। दशमेह्नीति वा पाठः। शौनकः। पालाशे चास्थिदाहे च सद्यः संचयनं स्मृतं। काम्यमरणे तु तस्य त्रिरात्रमाशौचं द्वितीये त्वस्थिसंचयः। इत्युक्तं। अंगिराः। प्रेतीभूतं यथोदिश्य यः शुचिर्न करोति चेत्। देवतानां तु यजनं तं शपंत्यर्थे देवताः। तद्विधिः सर्वस्तत्रे भट्टकृतो ज्ञेयः। हेमाद्रौ नागरखंडे। त्रीणि संचयनस्यार्थे तानि वे शृणु सांप्रतं। यत्र स्थाने भवेन्मृत्युस्तत्र श्राद्धं प्रकल्पयेत्। एकोद्दिष्टं ततो मार्गे विश्रामो यत्र कारितः। ततः संचयनस्यार्थे तृतीयं श्राद्धमिष्यते। अपरार्के मदनरत्ने च ब्राह्म्ये। सद्यः शौचे तदेकाहे सद्यः संचयनं भवेत्। त्र्यहाशौचे द्वितीयेह्नि कर्तव्यस्त्वस्थिसंचयः। तच्चैव। श्मशानदेवतायागं चतुर्थे दिवसे चरेत्। मृन्मयेषु च भांडेषु कुंभेषु रुचकेषु च। सुपक्वैर्भक्ष्यभोज्यैश्च वर्णयसैः पानकैरपि। फलैर्मूलैर्वनोद्भूतैः पूज्याः क्रव्याद देवताः।

धूपो दीपस्तथा माल्यमर्घ्यं देयं त्वरान्वितैः। तत्र पात्राणि पूर्णानि शस्त्राण्यग्नेः समंततः। निवेदद्भिर्वक्तव्यं तैः सर्वैरनहंकृ
तैः। नमः क्रव्यादमुख्येभ्यो देवेभ्य इति सर्वदा। येत्र श्मशाने देवाः स्युर्भगवतः सनातनाः। तेस्मत्सकाशाद्गृह्णंतु बलि
मष्टांगमक्षयं प्रेतस्यास्य शुभाल्लोकान्प्रयच्छंतु च शाश्वतान्। अस्माकमायुरारोग्यं सुखं च ददता चिरं। एवं कृत्वा बलिं
सर्वान्नक्षीरिणाभ्युस्य वाग्यतः। एवं दत्वा बलिं चैव दद्यात्पिंडत्रयं बुधः। एकं श्मशानवासिभ्यः प्रेतायैव तु मध्यमं। तृ
तीयं तस्करेभ्यश्च दक्षिणासंस्थमादरात्। ततो यज्ञीयवृक्षोत्थां शाखां वा माहाय वाग्यतः। प्रेतस्यास्थीनि दृष्ट्वा गृह्णाति प्रधा
नांगोद्भवानि च। शिरसो वक्षसः पाण्योः पार्श्वाभ्यां चैव पादतः। पंचगव्येन संस्नाप्य हेमवस्त्रेणवेष्ट्य च। प्रक्षिप्य मृन्म
यभांडे नवे साच्छादने शुभे। अरण्ये वृक्षमूले वा शुद्धे संस्थापयत्यपि। गृहीत्वास्थीनि तद्भस्मनीलातोये विनिक्षिपेत।
ततः संमार्जनं भूमेः कर्तव्यं गोमयांबुभिः। पूजा च पुष्पधूपाद्यैर्बलिभिः पूर्ववत्क्रमात। अथ तीर्थे स्थितेप्यविधिः।।
तत्रैव। तत्स्थानाच्छनकैनत्वा कदाचिज्जाह्नवीजले कश्चित्। क्षिपति सत्सुतो दौहित्रो वा सहोदरः। मातुः कुलं पितुः कु
लं वर्जयित्वा नराधनि मातापितृपूर्वजानां नयंति गंगामभि ये कदाचित। सद्बांधवस्यापि दयाभिभूतास्ते यांतु तीर्था एम.
निफलप्रदानि। स्नात्वा ततः पंचगव्येन त्रिस्नाहिरण्यमध्वाज्यतिलैश्च योज्या। ततस्तु मृत्सिंदपुटे निधाय पश्यन्दि

शंप्रेतगणोपगूढं॥ नमोस्तु धर्माय वदेत्प्रविश्य जलं स मे प्रीतः स्त्विति क्षिपेच्च॥ उत्थाय भास्वंतमवेक्ष्य सूर्यं सद्दक्षिणां विप्र
मुखाय दद्यात्॥ एवं कृते प्रेतपुरस्थितस्य स्वर्गे गतिः स्यात्तु महेंद्रतुल्या॥ यमः॥ गंगातोयेषु यस्यास्थि क्षिप्यते शुभकर्म
णः॥ न तस्य पुनरावृत्तिर्ब्रह्मलोकात्सनातनात्॥ तथा॥ अस्तंगते गुरौ शुक्रे तथा मासे मलिम्लुचे॥ गंगायामस्थिनिक्षे
पं न कुर्यादिति गौतमः॥ दशाहांतर्न दोषः॥ दशाहाभ्यंतरे यस्य गंगातोयेस्थि मज्जति॥ गंगायां मरणं यादृक्तादृक्फ
लमवाप्नुयात्॥ इति मदनरत्ने वृद्धमनूक्तेः॥ शौनकः॥ शौनकोहं प्रवक्ष्यामि अस्थिक्षेपविधिं क्रमात्॥ आदौ ग्रामाद्ब
हिर्गत्वा स्नानं कुर्यात्सचैलकं॥ प्रोक्षयेत्पंचगव्येन मुखं मंत्रविचक्षणः॥ गायत्र्याद्यैः पंचगव्यैर्मंत्रैर्निखातास्थिभूमिं
प्रोक्षयेदित्यर्थः॥ उपसर्पो द्विभिर्मंत्रैः प्रार्थनं श्रवनं तथा॥ मृत्तिकाधारणं चास्थ्नां ग्रहणं च यथाक्रमं॥ उपस
र्पेति चतुर्भिर्मंत्रैः क्रमेण प्रार्थनादि ज्ञेयं॥ स्नात्वास्थिशुद्धिं कुर्वीत एतोन्विंद्र इति सूक्ततः॥ स्पृष्ट्वास्थीनि ततः स्नानं पंच
गव्येन शुद्ध्यति॥ दश स्नानानि कुर्वीत तन्मंत्रैर्विचक्षणः॥ गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकं॥ भस्म मृन्मधुवारी
ति मंत्रतः स्नानानि वै दश॥ कुशैः संमार्जयेदस्थीनित्यपो देवीति मंत्रतः॥ एतोन्विंद्रं शुचीवेति न तमंहः वीतीति ती च पावमानी
ममाग्नेव रुद्रसूक्तं यथाक्रमं॥ एतैः कुशैः मार्जनं॥ हेमश्राद्धं ततः कुर्यात्पितृननुद्दिश्य तत्वतः॥ पिंडदानं प्रकुर्वीत ततश्चैति

तिलतर्पणं। आस्थिक्षेपांगं चेदं। अजिनं कंबलादर्भा गोकेशाश्शाणमेव च। भूर्जपत्रं ताडपत्रं सूत्रं चावेष्टनं स्मृतं। हेम मौक्तिकरौप्यं च प्रवालं नीलकं तथा॥ निक्षिपेदस्थिमध्ये तु शुद्धिर्भवति नान्यथा॥ ततो होमं प्रकुर्वत तिलाज्येन विचक्षणः। उदीरतेति ऋक्केनद्वनेद्वष्टोत्तरं शतं। ततो गत्वा क्षिपेत्तीर्थे स्पर्शदोषो न विद्यते। मूत्रं पुरीषाचमनं कुर्वन्नास्थीनि धारयेत। अत्र दशदानवैतरणीऋणमोक्षधेनुदानमुक्तं दिवोदासीये काशीखंडे। धनंजयोपि धर्मामातृभक्तिपरायणः। आदायास्थीन्यथो मातुर्गंगामार्गं स्थितो भवत्। पंचगव्येन संस्नाप्य तथा पंचामृतेन वै। यक्षकर्दमलेपेन लिप्त्वा पुष्पैः प्रपूज्य च। आवेष्ट्य नेत्रवस्त्रेण ततः पट्टांतरेण च। ततः सुरतवस्त्रेण ततो मांजिष्टवाससा। नेपालकंबलेनाथ मृदा चाथ विशुद्धया। ताम्रसंपुटके कृत्वा मातुरंगान्यथो वहन्। तथा व्यासः। पट्टवस्त्रं चकोशेयं मांजिष्ठं श्वेतवस्त्रकं। कंबलं शाणपट्टं च अजिनं चतथोत्तरं। एषां विकल्पः। अन्यच्चात्र विशेषः। त्रिस्थलीसेतौ दिवोदासीये च ज्ञेयः। संचयनोत्तरं आद्यमाहाश्वलायनः। आद्यमस्मै दद्युरिति। स्मृत्यर्थसारे। संचयने कृते मनुष्यलोकं गच्छत एपः पाथेयश्राद्धमामेन कार्यमिति। अनुपनीतस्य न संचयनं॥ अथ नवश्राद्धं॥ अ॰ पृथ्वीचंद्रोदये अंगिराः। प्रथमेह्नि तृतीये च पंचमे सप्तमे तथा। नवमेकादशे चैव तन्नवश्राद्धमुच्यते। शिवस्वामी। नवश्राद्धानि पंचाहुराश्वला

पनशाखिनः। आपस्तंबः। षडित्याहुर्विभाषावितरेषुहि। पंचएकादशाहिकं क्रिया मरणाद्विषमेषुदिनेष्वेके श्राद्धं कु
र्यादानवमाद्यदिनवमं विछिद्य तेकादशे तत्कुर्यादिति मदनरत्ने बौधायनोक्तेः। भविष्ये। नवसप्तविशं गाण्ड्यान नवश्राद्धा
न्यनुक्रमात्। आद्यंतयोर्वर्णयोक्त षडित्याहुर्महर्षयः। हेमाद्रौ बृहद्वसिष्ठः। अलब्ध्वातु नवश्राद्धं प्रेतत्वान्नैव मुच्यते।
अर्वाक्तु द्वादशाहस्य लब्ध्वा तरति दुष्कृतं। अतः षडेवाएतान्येव विषमश्राद्धान्युच्यंते। नागरखंडेतु। पंचमे सप्तमे तद्वदष्ट
मे नवमे तथा। दशमेकादशे चैव नवश्राद्धानि तान्येविसुक्तं। कात्यायनस्तु। चतुर्थे पंचमे चैव नवमैकादशे तथा।
यस्त्र हीयते जंतोस्तन्नवश्राद्धं दशाहानि षडस्मृतीत्युक्तं। नारायणवृत्तौ। दीपिकायां। अथ तत्तु प्रादाद्ये चतुर्थे दि
ने श्राद्धं पंचमसप्तमाष्टनवदिग्रुद्रेषु युग्मद्विजैः। प्रथमे द्वितृतीयेच पंचसप्तनवस्वपि। द्वौ द्वौ पिंडौ प्रदातव्यौ शे
षेष्वेकंतु निर्वपेत्। एको विषमश्राद्धे। वपवपिंडश्चेकरति द्वावित्यर्थः। अत्र देशाचाराद्व्यवस्था। अपरार्के भविष्ये। नव
श्राद्धं त्रिपक्षं च षण्मासं मासिकानि च। नकरोति सुतो यस्तु तस्याधः पितरो गताः। वाराहे। गतोसि देवलोकं त्वं कृतां
त्वविहितां स्वधां। मनसा वायुरूपेण विप्रे त्वाहं नियोजये। पूजयिष्यामि भोगैस्त्वामेवं विप्रेनिमंत्रयेत्। आवाहने
पितृंश्चैव। इह लोकं परित्यज्य गतोसि परमां गतिं। मनसा वायुभूतेन विप्रे त्वाहं नियोजये। तत्रैव बह्वृचपरिशिष्टं।

३५७ अनूदकमधूपंचगंधमाल्यविवर्जितं। नवश्राद्धममंत्रंच पिंडोदकविवर्जितं। उदकमर्घ्यं। पिंडोदकं शुंधंतां पितरः इत्यवने
जनादि। एकोद्दिष्टेषु सर्वेषु न स्वधा ना।भिरम्यतां॥ नाग्नौकरणमंत्रश्च एवं वाग्यतिलोदकं। अनपत्येषु सर्वेषु नस्वधा
भिरम्यतां। स्वस्त्यस्तु विसर्जने द्वेवं सकृस्नणववर्जितं। एकोद्दिष्टस्य पिंडेषु अनुशब्दो न विद्यते। पितृशब्दं न कुर्व
त पितृहा चोपजायते॥ सपिंडनात्प्रागिति हेमाद्रिः॥ तेनानस्वधां च प्रयुंजीत प्रेतपिंडे दशाहिके। इति शुष्मभृंगो
क्तो दशाहिकोक्तेः एकादशाहे स्वधाप्रयोग एवेति हारलतापराला। रत्नावल्यां॥ आशिषो द्विगुणा दर्भा जपाशीः
स्वस्तिवाचनं॥ पितृशब्दः स्वसंबंधः शर्मशब्दस्तथैव च। पात्रालंभोऽवगाहश्च उल्मुकोल्लेखनादिकं॥ तृप्तिप्रश्नश्च
विकिरः शेषप्रश्नस्तथैव च। प्रदक्षिणा विसर्गश्च सीमांतागमनं तथा। अष्टादश पदार्थाश्च प्रेतश्राद्धे विवर्ज्जयेत्।
अत्र स्वधा पितृभ्यो नमः शाद्वान्नांति लोसीति मंत्रे प्रेतशब्दोहेन तृप्तौ वा तिलावपनं। तृप्तौ मध्यप्रदानं। अमुष्मै
स्वाहेति प्रेतनाम्ना पाणिहोमः। नाम्ना एकः पिंडः। निनयनं मंत्रेऊहः। अनुमंत्रणादिलमंत्रं। अभिरम्यतामिति स
र्ज्जनं। इति नवश्राद्धवर्ज्जैकोद्दिष्टेषु। नवश्राद्धेलमंत्रकं सर्वमिति नारायणवृत्तिः। क्रियानिबंधे। उत्तानं स्थापये
त्पात्रमेकोद्दिष्टे सदा बुधः। न्युब्जं तु पार्वणे कुर्यान्न्युब्जोपरि कुशान्न्यसेत्। नवश्राद्धं गृहे कार्यं भार्यापत्राग्रयोपि

एप:

चान्तपिंडीकरणांतानि प्रेतश्राद्धानि यानि वै तानि स्युर्लोकिके वह्नावित्याहत्वाश्वलायनः। इदं संभवेन्नेन कार्यं। नवश्राद्धे
षु यच्छिष्टं गृहे पर्युषितं च यत्। दंपत्योर्भुक्तशेषं च न तद्भुंजीत कर्हिचित्। इत्यंगिरोवचनं लिंगात्। द्वाभ्यां तदा तु कृच्छ्राभ्यां
शुद्धिः स्यात्तु विवेकिनां। इति ब्राह्मोक्तं। विघ्ने तु निर्णयामृते कारावः। नवश्राद्धं मासिकं च यद्यदंतरितं भवेत्। तत्तदु
त्तरसात्कुर्यादन्येष्वेवं प्रचक्षते। हेमाद्रौ गालवः। शुद्धामाशौचांते ग्रहवृद्धौ। अन्वारोहे तु। वेतुसूतकं चेत्स्यान्निशायां
च मृतौ तथा। नवश्राद्धानि देयानि यथाकालं यथाक्रमं॥ निशायामाशौचांते ग्रहवृद्धौ। अन्वारोहे तु। नवश्राद्धानि स
र्वाणि सपिंडीकरणं पृथक्। एक एव वृषोत्सर्गो गोरेकात्र दीयते। आशौचांते कार्यमुक्तं ब्राह्म्ये। पत्न्यपत्यस्य तु वा ग
स्य यद्यत्स्यात्पाश्चिमं वहः। स तत्र च तु शुद्धि च गृहशुद्धिं करोत्यपि। समाप्य दशमं पिंडं प्रेतस्य श्वेच वाससी। अंत्या
नामाश्रितानां च त्यक्त्वा स्नानं करोति च। श्मश्रुलोमनखानां च पत्न्याद्यं तत्तु हात्यपि। गौरसर्षपकल्केन तिलक
ल्केन संयुतं। शिरःस्नानं ततः कृत्वा तोयेनाचम्य वाग्यतः। वृषभं गांस्तु वर्णं च स्पृष्ट्वाशुद्धो भवेन्नरः। क्रियानिबंधे ग
त्यकारिकायां। अत्र पिंडत्रयं दद्युस्तत्सखिभ्यस्तथादिमं॥ प्रेताय मध्यमं तद्वत्तृतीयं च यमाय वै। तथा। कर्त्री
च प्राथिता सर्वैर्ज्ञातिसंबंधिबांधवाः। इष्टैरभ्यंगतः पूर्वैत्रास्त्रीन्धर्मोदकांजलीन्। पूर्ववन्नामगोत्राभ्यां नियमो

नेहकश्चना मदनरत्नेविष्णुहारीतौ। आशौचांतेकृतश्मश्रुकर्मागात्रतिलकल्ककैः। सर्षपकल्कैर्वास्नाता। शुक्लवाससो
गृहंप्रविशेयुस्तत्रशांतिकंकृत्वाब्राह्मणपूजनंकुर्युरितिदेवलः। दशमेहनिसंप्राप्तेस्नानंग्रामाद्बहिर्भवेत्॥ तत्रत्याज्या
निवासांसिकेशश्मश्रुनखानिच। अपरार्केबृहस्पतिः। नवमेवासमांत्यामोनखलोम्नांतथांतिते। तत्रैवव्यासः। आ
शौचांत्यदिनेक्षौरंजनन्यांचगुरौमृते॥ एतस्मैतास्ववयसांक्रियाहापस्तंबः। अनुभाविनांचपरिवपनमिति। अनुभा
विनःकनिष्ठाःइतिज्ञानेश्वररत्नाकरादयः। आशौचमनुभवतांपुंसांसर्वाशौचेमुंडनं। आज्ञयानृपतेर्द्विजन्मनांदार
कर्मभृतस्तस्तकेषुच। वंधमोन्नमखदीक्षितेष्वपिक्षौरमिष्टमखिलेषुचोडुषु। इतिरत्नमालोक्तेः। जननाशौचेपीति
शुद्धितत्वादयः। अत्रदेशाचारतोव्यवस्था॥ परिशिखावर्ज्जीकेशश्मश्रुलोमनखान्वापयीतशिखावर्ज्जमिति
गोभिलोक्तेः। यत्त्वापस्तंबः। नसमावृत्तावपेयुरन्यत्रविहारादित्येके। विहारोदर्शादियागः। तेनविनासमावृत्तागृ
हस्थानवपेयुरित्यर्थः॥ यच्च। दृष्ट्याछिन्नस्त्रियःकेशांस्तमाहुर्ब्रह्मघातिनं। ततकेशश्मश्रुधारपतामप्याभवतिसं एषः
ततिरितिदानधर्मोक्तेःकाम्यपरं। अनुभाविनःपुत्राहपरइत्येके। पुत्रःपत्नीचवपनंकुर्यादतेपश्चाद्विधि॥ पिंडदा
नोचितोन्योपिकुर्यादित्युक्तंसमाहितभद्रस्यपरार्केव्यासोक्तेः। पत्न्यामिताह्नरायां॥ द्वितीयेहनिकर्त्तव्यंक्षुरकर्मप्रयत्न

तः तृतीये पंचमे वापि दशमे वा प्रदानतः इति। आ प्रदानतः इति चतुर्थ्यादीनि तत्प्रथमदिने संभवे ज्ञेयं। अलुप्तकेशो
यः पूर्वं सोत्र केशान्प्रवापयेत्। द्वितीयेह्नि तृतीयेह्नि पंचमे सप्तमेपि वा। यावच्छुद्धिं प्रदीयेत तावदित्यपरं परं इति माध
वीये मदनरत्ने बौधायनोक्तेः॥ मदनपारिजाते तु दशमे प्रथमे सप्तमे समुच्चय इत्युक्तं। यत्तु दशमे पिंडसमुत्कर्षस्य रात्रिशेषे
शुचिर्भवेत् इति तदेकादशाहश्राद्धांगविप्रनिमंत्रणार्थं ज्ञेयं। अथैकादशाहः। मनुः। विप्रः शुद्ध्यत्यपः स्पृष्ट्वा क्षत्रि
यो वाहनायुधं वैश्यः प्रतोदं रश्मीन्वा यष्टिं शूद्रः कृतक्रियः। शुद्धितत्वे देवलः। आद्याहः स्तु निष्क्रान्ते पुस्नाताः कृतमं
गलाः। आशौचाद्विप्रमुच्यंते ब्राह्मणान्स्वस्ति वाच्य च। याज्ञवल्क्यः। मृतेहनि तु कर्तव्यं प्रतिमासं तु वत्सरं। प्रति
संवत्सरं चैव आद्यमेकादशेहनि। ज्ञातियाद्येराशौचेप्येकादशेह्नि श्राद्धं कार्यं। आद्यं श्राद्धमशुद्धोपि कुर्यादे
कादशेहनि। कर्तुस्तात्कालिकी शुद्धिः अशुद्धः पुनरेव स इति हेमाद्रौ शंखोक्तेः। पैठीनसिः। एकादशेह्नि यच्छ्राद्धं तत्सा
मान्यमुदाहृतं। चतुर्णामपि वर्णानां सूतकं तु पृथक्पृथक्। यत्तु मरीचिः। आशौचांते ततः सम्यक्पिंडदानं समा
प्यते। ततः श्राद्धं प्रदातव्यं सर्ववर्णेष्वयं विधिरिति तत्सर्ववर्णानां दशाहाशौचपरं। यत्तु विष्णुः। अथाशौचापगमे इ
ति। यच्च गोस्ये हारीतः। श्वोभूते एकोद्दिष्टं कुर्यात्। यच्च बैजवापः। ऊर्ध्वं दशम्याः अपरेद्युरिति तद्द्विप्रविषयं। एतेन

दशपिंडोत्कर्षपक्षेऽवयवपिंडासमाप्तौकथमेकादशाहेश्राद्धमितिमूर्खोक्तिःपरास्ता।वचनादशौचमध्यऽवतत्राप्यवि
रोधात्।भविष्ये।एकादशभ्योविप्रेभ्योदद्यादेकादशेहनि।भोजनंतत्रचैकस्मैब्राह्मणायमहात्मने।पद्ममात्स्येएकादशे
हनितथाविप्रानेकादशैवतु।क्षत्रादिःसूतकांतेतुभोजयेदयुजोद्विजान्।इतितच्छूद्राणांश्राद्धपरमितिमदनपारिजा
तः।गौडास्तुमात्स्यवचनात्क्षत्रियादीनामाशौचांतएवेत्याहुः।रामायणेपि।समतीतेदशाहे।प्रकृतशौचोयथाविधिचक्रे
द्वादशिकंश्राद्धंत्रयोदशिकमेवच।द्वादशिकंद्वादशाहेननिर्वर्त्यंत्रयोदशाश्राद्धंत्रयोदशिकं।चतुर्दशाहेविधे
यं।सपिंडनंपाद्मेपादि।क्षत्रियाणांद्वादशाहाशौचेत्रयोदशेह्न्येकोद्दिष्टं।चतुर्दशेसपिंडनं।विधिवद्वाक्यादेकादशा
हाशौचांतयोर्विकल्पइत्येके।सद्यःशौचादौयद्वहतादेरेकादशाहः।अन्येषामाशौचांतइतिवयं।कौर्म्येएकादशे
ह्निकुर्वतप्रेतमुद्दिश्यभक्तितः।द्वादशेचाह्निकर्तव्यमनिंद्येप्यथवाहनि।निंद्यंप्रेतक्रियायाकालेउक्तं।एकादशेहनिविधे
धवत्सुक्तंप्राक्।बृहस्पतिः।वस्त्रालंकारशय्यादिपितुर्यद्वाहनादिकं।गंधमाल्यैःसमभ्यर्च्यश्राद्धभोक्त्रेतदर्पयेत्।
श्रोत्रियाभोजनीयास्तुनवसप्तत्रयोदश।ज्ञातयोबांधवानिःस्वामात्याचातिथयःपरो।दैवयाज्ञिकनिबंधे।एका एमः
दशसुविप्रेषुप्रेतमावाह्यभोजयेत्।तत्राद्यापचशय्यादिदद्यादाद्यमितिस्मृतं।विष्णुः।एकमंत्रान्नूहेतैकोद्दिष्टे।ब

द्ववचनांतानेकवचनांतान्वदेदित्यर्थः। एतद्दृष्टार्थंतो। अस्य विषये गौणकालमाह हेमाद्रौ बोधायनः। एकादशंचैव
स्याद्द्वादशेऽहनिवा पुनः। अत ऊर्ध्वमयुग्मेषु कुर्वताहस्तुशक्तितः। अर्द्धमासेतथामासि ऋतौ संवत्सरेपिवाति। तत्रैव लघु
हारीतः। एकोद्दि ब्राह्मणांभोजयेदाद्येहोत्र ष्टांतकुर्वतपाकेनैवसहस्वयं। अभावेपाकपात्राणांतद्दहः समुपोषणं। गो
भिलः। ब्राह्मणांभोजयेदाद्येहोतव्यमनलेपिवा। पुनश्चभोजयेदेकंद्विगुणान्नंत्रिमेवेदिति। एतदाद्यमासिकाद्याब्दिक
योःसिद्ध्यर्थमितिभट्टाः। तेनमहैकोद्दिष्टषोडशश्राद्धाद्भिन्नमेव। अत एवाद्यं सर्वैकोद्दिष्टप्रकृतिभूतमेकादशे
इतिविज्ञानेश्वरः। इति। अन्येत्वाद्यमासिकाद्याब्दिकयोराद्यमेकादशेऽहनीतिनियमाद्भेदमाहुः। द्वयोस्तंत्रेणबाधा
र्थंगालवीयामित्यन्यायुद्धहतादौतुहेमाद्रौ पृथ्वीचंद्रोदये च पैठीनसिः। सद्यःशौचेपिदातव्यंप्रेतस्यैकादशेऽहनि।
स एव दिवसस्तस्य श्राद्धशय्यासनादिषु। एवमेकादशाहादौ। अतोत्रद्वितीयेद्वौ काद्विवचनांतोच्चाराकरणादिति
वदेत्। कल्पतरुवाचस्पतिप्रमुखाः सर्वमहानिबंधविरोधादुपेक्ष्याः। उशनाः। त्र्यहाशौचेपिकर्त्तव्यमाद्यमेकादशे
हनि। अतीतविषयेसद्यस्त्र्यहोर्ध्वंवातदिष्यते। याज्ञवल्क्यः। एकोद्दिष्टंदैवहीनमेकार्घ्यैकपवित्रकं। आवाह
नाग्नौकरणरहितंह्यपसव्यवत्। उपतिष्ठतामित्यक्षय्यस्थाने विप्रविसर्जने। अभिरम्यतामितिवदेद्ब्रूयुस्तेभिरताः

स्मृत। अग्नौकरणनिषेधोन्यपरः। बह्वृचानां तु सर्वैकोद्दिष्टेषु तद्भवत्येवेत्युक्तं प्राक्। स्वदितमिति तृप्तिप्रश्न इति कात्यायनः।
प्रथमे पात्रे संस्रवानित्यस्य तदुत्तरीयेणापिधानस्य च बाधान्न पात्रन्युब्जतेति शूलपाणिः। प्रचेताः। नात्र पात्रालंभो नात्रा
शिषः प्रार्थयेत्। अत्र विशेषो हेमाद्रौ ब्राह्मे। श्मश्रुकर्म तु कर्तव्यं नखच्छेदस्तथैव च। स्नपनाभ्यंजनं दद्यात्। द्विमा यदि वि पू
र्वकं तथा। उपवेश्यासने भद्रे छात्रं तत्र प्रकल्पयेत्। पश्चादुपानहौ दद्यात्सर्वाण्याभरणानि च। विष्णुः। दक्षिणांतं श्राद्ध
मुत्स्कादत्तादप्योदके च चतुरंगुलपृथ्वीतिस्रः कर्षूः कुर्यात् कर्षूणां समीपेग्निमाधाय परिस्तीर्यैकैकस्मिन्नाहुति
त्रयं तु हुत्वा सोमाय पितृमते स्वधा नमो यमाय कव्यवाहनाय यमायांगिरस्वते इति स्थानत्रये प्राग्वत्पिंडनिर्वपणं दधि
मधुघृतमांसैः कर्षूत्रयं पूरयेत् एतत्त इति जपेत्। शेषं नवश्राद्धवत्। अत्र साग्नेरप्यंते वैश्वदेव इत्युक्तं प्राक्। इदं शा
द्रकर्त्रा पुत्रेण वा कार्यमित्युक्तं क्रियानिबंधे रत्नकारिकायां। तिलोसि प्रेतदेवत्यः प्रेतलोकाङ्क्षिणोंतिकं। पुत्र मु
त्रमुत्स्का तिलानेवं प्रक्षिपेदर्घपात्रतः। दक्षिणामुदकुम्भं च सान्नं दद्यात्तथैव गां। तस्मै दद्याद्युक्तशेषं तद्भांडमप्यपि
भाजनं। विप्राभावे स्मार्तेकोद्दिष्टं तु अग्नौ पाय संश्रपयित्वाऽप्सु गांते तदग्रे श्राद्धप्रयोगं कृत्वाग्नौ प्रेतमावाह्य गंधा एम॥
द्यैः संपूज्य पृथिवीते पात्रमित्यादिनान्नं संकल्प्योदीरतामवर इत्यष्टाभिश्चरुं तु एकहस्ताभिर्हुत्वा त्रिंशदाहुतीर्हुत्वा पिंडदानं।

द्दिश्राद्धं समापयदिति याज्ञवल्क्यः। एतत्सापिंडीकरणमेको। दिष्टं स्त्रिया अपि। अथ वृषोत्सर्गः॥ स च नित्यकाम्यनक
रोति वृषोत्सर्गस्तु तीर्थे वा जलांजलीनान दद्याविस्तुतो यत्तु पितृऋण्वा। एवं सउच्चारः पुरीषां एष्टव्या बहवः पुत्रा यद्ये
कोपि गयां व्रजेत। यजेत वाश्वमेधेन नीलं वा वृषमुत्सृजेत्। इति मात्स्ये कोम्योक्तौ। एकादशेह्निप्रत्यघस्य नोत्सृ
ज्यते वृषः। प्रेतत्वं सुस्थिरं तस्य दत्तैः श्राद्धशतैरपि। इति षड्त्रिंशन्मते नित्यं श्राद्धकृते॥ एवं कृत्वा त्वघ वाप्नोति फलं वाजिम
खोद्भवं। यमुद्दिश्योत्सृजेन्नीलं स लभेत परां गतिं। वृषोत्सर्गः पुनात्येव दशातीतान्दशापरान्। इति देवीपुरा
णे भविष्यादौ फलश्रुतिः। अयं द्वादशाहे प्रोक्तो भविष्ये। चैत्र्यां वापि तृतीयायां वैशाख्यां द्वादशेह्नि चेति। विष्णुध
र्मे तु मृताहे प्युक्तः। विषुवद्द्वितये चैव मृताहे बांधवस्य चेति। अयं गृहेन कार्यः। न गृहे मोचयेन्नीलं कामयन्पुष्कलं फ
लं। इति कालिकापुराणात्। कामधेनौ। वत्सराभ्यंतरे पित्रोर्वृषस्योत्सर्गकर्मणि। वृद्धिश्राद्धं न कुर्वीत तदन्यत्र समार
भेत। तल्लक्षणं ब्राह्म्ये। लोहितो यस्तु वर्णेन मुखे पुच्छे च पांडुरः। श्वेतः खुरविषाणाभ्यां स नीलो वृष उच्यते। श्वेतव
र्णस्य मुखादीनि श्यामानि श्यामस्य वा श्वेतानि यस्य सोपि नीलः उक्तो मात्स्यादौ। देवीपुराणे। चतस्रो वात्सिका भद्राद्दे
या संभवतो पि वा। यत्तु पठंति। वृषोत्सर्जनवेलायां वृषाभावः कथंचन। मृद्भिः पिष्टैश्च दर्भैर्वा वृषं कृत्वा विमोचयेत्। न श

क्यतेवृषोत्सर्गोहायनंवातत्रकारयेत्। यतिस्तन्निर्मलं। तद्विधिर्हि माङ्झीभट्टकृतौ चंद्रोदयः॥ अत्र देवयाज्ञिकेन वृषोत्सर्गाय पू
र्वंपुरुषसूक्तेन विष्णुरूपिप्रेतोद्देशेन विष्णुतर्पणमुक्तं। तत्र मूलं चिंत्यं। पारस्करः॥ सव्येन पाणिना पुच्छं समालंब्य वृषभस्य
तु। दक्षिणेनाप आदाय सतिलाः सकुशास्ततः। प्रेतगोत्रं समुच्चार्य अमुकस्मै इति ब्रुवन्। वृष एष मया दत्तस्तं तारयतु
सर्वतः। सहेम सतिलं भूमावित्युक्त्वा यत्र विनिक्षिपेत्। तथा। विधारयेन्न तं कश्चिन्न च कश्चन वाहयेत्। न दोहयेच्च तां धेनुं
न च कश्चन बंधयेत्। स्त्रीषु विशेषः संग्रहे। पतिपुत्रवती नारी भर्तुरग्रे मृता यदि। वृषोत्सर्गं न कुर्वीत गां च दद्यात्पयस्विनीं
पतिपुत्रयोः साहिस्याक्षिवलिलं। अन्वारोहणेपि गोदानमुक्तं प्राक्। आशौचांतरपि वृषोत्सर्गघटमासिकशय्यादि
दद्यादेवेत्युक्तं। क्रियाणि बंधेस्मृत्यंतरे। मृतके मृतके चैव द्वितीयं मृतकं यदि। पिंडदानं प्रकुर्वीत वृषोत्सर्गं तथैव च। न
हन्यात्सूतकं कर्म द्वादशैकादशाहिकं। शुद्धो वा यदि वाशुद्धः कुर्यादेवाविचारयन्। इति। अत्र पदद्दानमुक्तं देवज्ञा
नीये गारुडे एकादशाहं प्रक्रम्य। यदद्भिर्दीयते सर्वं द्वादशाहे विशेषतः। पदानि सर्ववस्तूनि वारिधानि त्रयोदशः
पोदद्यादिति मृतस्येह जीवतोप्यात्महेतवे। सुखी भूत्वा महामार्गे येन तेयमगच्छति। तथा। आसनोपानहौ छत्रं मु एम
द्रिका च कमंडलुः। भाजनं भोजनाधारो वस्त्राण्यष्टविधं पदं। तथा। भाजनासनदानेन मुद्रिकाभोजनेन च। आत्पय

ज्ञोपवीताभ्यां पदं संपूर्णतां व्रजेत्। महिषीरथगोदानात्तु सुखी भवति। निश्चितं। सर्वोपस्करयुक्तानि पदान्यत्र त्रयोदश। यो ददाति मृतस्येह जीवन्वाप्यात्महेतवे। स गच्छति परं स्थानं महाकष्टविवर्जितं॥ त्रयोदशपदानीत्थं प्रेतायैकादशेहनि। दातव्यानि यथाशक्ति तेनासौ प्रीणितो भवेत्। अन्नं चैवोदकं चैव पानहौ च कमंडलु॥ छत्रं वस्त्रं तथा यष्टि लोहदंडं तथाष्टमं। अग्निष्टिकां तथा दीपं तिलास्तांबूलमेव च। वस्त्रं पुष्पदानं चोपदानानि चतुर्दश। योऽश्वं रथं गजं वापि ब्राह्मणे प्रतिपादयेत्। स महिम्नोऽनुसारेण तत्तत्सुखमवाप्नुयादिति। अत्र मूलं चिंत्यं॥ अथ शय्यादानं॥ हेमाद्रौ भविष्ये। तस्माच्छय्यां प्रकुर्वीत सारदारुमयीं दृढां। दंतपत्रचितां रम्यां हेमपट्टैरलंकृतां॥ हंसतूलीप्रतिच्छन्नां शुभगंडोपधानिकां॥ प्रच्छादनपटीयुक्तां गंधधूपादिवासितां॥ तस्यां संस्थापयेद्धैमं हरिं लक्ष्म्या समन्वितं। अत्र हरिस्थाने प्रेतं। उच्छीर्षके घृतभृतं कलशं परिकल्पयेत्। तांबूलं कुंकुमक्षोदकर्पूरागुरुचंदनं। दीपिकोपानहौ छत्रचामरासनभाजनं। पार्श्वेषु स्थापयेद्भक्त्या सप्तधान्यानि चैव हि। शयनस्थस्य भवति यदन्यदुपकारकं। भृंगारकरकाद्यं च पंचवर्णं वितानकं। मंत्रस्तु। यथा न कृष्ण शयनं शून्यं सागरजातया। शय्याममाप्यशून्यास्तु तथा जन्मनि जन्मनि। यस्मादशून्यं शयनं केशवस्य शिवस्य च। अर्द्धतदेवादत्त्वैवं तस्य सकलप्राणिपत्याविसर्जयेत्। एका

दशाहे पितय्या।वे।घोषेषउदाहृतः॥ विशेषं चात्र राजेंद्र कथ्यमानं निशामय॥ तेनोपभुक्तं यत्किंचिद्वस्त्रवाहनभोजनं॥ य
दिष्टं च तस्यासीत्तत्सर्वं परिकल्पयेत्॥ तमेवं पुरुषं हैमं तस्यां संस्थाप्य नेत्रदा॥ पूजयित्वा प्रदातव्या मृतशय्या यथोदि
ता॥ पाद्मे। मृतकांते द्वितीयेऽह्नि शय्यां दद्यात्सलक्षणां॥ कांचनं पुरुषं तद्वत्फलवस्त्रसमन्वितं॥ संपूज्य द्विजदांपत्यं
नानाभरणभूषितं। अस्थिलादिकं गृह्यमस्त्रं कलासपायसे॥ भोजयेद्द्विजदांपत्यं विधिरेष सनातनः। एवमेव विधि
+ उपवेश्य तु शय्यायां मधुपर्केण पूजयेत्। रजतस्य तु पात्रेण दधिदुग्धसमन्वितं। + ॥ ईदृक्पार्वती यो द्विजोत्तमः। ए
तत्प्रतिग्रहेतत्रैवागृहीतायां तु तस्यां वै पुनः संस्कारमर्हति। शय्यादानफलं भाविष्योत्स्वर्गे पुरंदरपुरे सूर्यपुत्रालये तथा
गत्वं च सत्यलोकं तु शय्यादानप्रभावतः। आभूतसंप्लवं यावत्तिष्ठत्यातंकवर्जितः। इति। अथ कुंभदानं। हेमाद्रौ स्मृति
समुच्चये। एकादशाहात्प्रभृति घटस्तोयान्नसंयुतः। दिने दिने प्रदातव्यो यावत्संवत्सरं सुतैः। लौगाक्षिः। यस्य संवत्सरा
दर्वाक् सपिंडीकरणं भवेत्। मासिकं चोदकुंभं च देयं तस्यापि वत्सरं॥ उत्त्रार्हे तस्याप्यन्नं सोदकुंभं दद्यात्संवत्सरं द्विजे
रपि। याज्ञवल्क्यपाठः। सपिंडनापकर्षस्यापकर्षप्राप्ते बाधकमिदमिति शूलपाणिः। तन्न। प्रकृतिविकारभावेन त एमः
दंतन्यायाविषयत्वात्। मात्स्ये। यावदब्दं च यो दद्यादुदकुंभं विमत्सरः। प्रेतायान्नसमायुक्तं सोऽश्वमेधफलं लभेत्। के

चित्रमोदशाहमाम्याङ्क्तान्निर्मलौ अत्र देवयाज्ञिकः। सपिंडनापकर्षे सांवत्सरं यावत्। उदकुंभमर्वागेव दद्यान्नोर्ध्वं प्रेत
लोकगतस्यान्नं सोदकुंभं प्रयच्छते। इति गोविंदार्णवधृतविष्णूक्तेः। अन्नं चैव स्वशक्त्यातु संख्यां कृत्वाह्निकावधि।। दातव्यं
ब्राह्मणे स्कंदघटादेर्निष्क्र पंतवा।। अपि श्राद्धशतैर्दत्तैः रुदकुंभं विना ततः। दरिद्राद्भुः। छिन्नस्तातन्त्रमंतिचमवा सर्वे। ते
नापकृष्य दातव्यं प्रेतस्योदकुंभकं इति गोभिलभाष्ये स्कांदाच्च। सपिंडनात्प्रागेव तस्य विधानात्। ऊर्ध्वं निषेधात्। इत्या
हुः। तन्न। उदकुंभे पार्वणविधानानुपपत्तेरेवं व्याख्यायां मासाभावान्मिताक्षराविरोधाच्च वचनं परिसमूलं तदाहन्नावप
कर्षे विधत्ते। प्रेतश्राद्धानि सर्वाणि सपिंडीकरणं तथेति। हेमाद्रौ शाट्यायनोक्तेः। तस्याप्यन्नं सोदकुंभमिति याज्ञवल्क्य
विरोधाच्च। मदनरत्ने गौतमः। अदैवं पार्वणं श्राद्धं सोदकुंभमधर्मकं। कुर्यात्प्रत्याब्दिकं श्राद्धं संकल्पविधिनान्वहं। अत्र
धर्मे ब्रह्मचर्यादिनियमहीनं। एतन्मासिकवदेकोद्दिष्टं पार्वणं कार्यं। अपरार्कस्तु। सपिंडीकरणे वृत्ते पृथक्त्वं नोपपद्यते।
पृथक्त्वे तु कृते पश्चात्पुनः कार्या सपिंडता। इति लघुहारीतोक्तोवधापि तस्याप्यन्नं सोदकुंभं देयं संवत्सरं द्विजे। इति याज्ञव
ल्कीयेतस्यत्वेकत्वोक्तेः सपिंडनोत्तरमप्येकोद्दिष्टमेवेत्याह। अत्र पिंडदानं कृताकृतं। अंलनोछेकथेहराहान्नमस्मै ब्रा
ह्मणायोदकुंभं च दद्यात्पिंडमप्येके निपृणंतीति हेमाद्रौ पारस्करोक्तेः। श्राद्धशक्तौ पिंडमात्रमिति गौडाः। तन्न। अपि श्रा

द्बाधापत्तेः। हारीतः। मृतेपितरि वैपुत्रः पिंडमब्दं समाचरेत्। अन्नं कुंभं च विप्राय प्रेतानिर्दिश्य धर्मतः। प्रेतशब्दोच्चारणं नेति हृ
लायुधः। यद्वा। प्रेतस्यनिर्दिश्योयत्र तदैकोद्दिष्टं। तद्धर्मकमित्यर्थः। अत्राशौचांतादिनाद्याब्दांते यावद्वत्सरापूर्त्तेः शौचं ना
धिकारिविशेषणं। तेन मृतिदिनमारभ्यैतत्कार्यमिति केचित् तन्न हि माद्यब्दं तत्र वचो विरोधात्। मध्ये आशौचादिनाबा
धेतल्लोप एव दार्शवत्। तथा प्रथमाब्दे दीपदानमुक्तं देवज्ञानीये गारुडे। प्रत्यहं दीपको देयो मार्गे तु विषमे नरः। यावत्सं
वत्सरं चापि प्रेतस्य सुखवर्त्तिप्सया। प्राङ्मुखो दङ्मुखं दीपं देवागारे द्विजालये। कुर्याद्याम्यमुखं पित्र्ये आद्भिः संकल्पयेत्त
तः॥ अथ मासिकानि॥ तानि कृत्वैव सपिंडनं कार्यं। तथा च गोभिलः लौगाक्षी। श्राद्धानि षोडशादत्वा नैव कुर्यात्सपिंड
नं। श्राद्धानि षोडशापाद्य विदधीत सपिंडनं। तानि त्वाह जातूकर्ण्यः। द्वादशप्रतिमास्यानि आद्यषण्मासिके तथा। त्रै
पक्षिकाब्दिके। चेति श्राद्धान्येतानि षोडश॥ आद्यषण्मासिकाब्दिकशब्दाः ऊनमासिकोनषष्ठोनाब्दिकपराः द्वादशा
हे षाण्मासिकं ऊनषष्ठोनाब्दिके इत्यर्थः। कात्यायनस्त्वन्यथाह। द्वादशप्रतिमास्यानि आद्यषाण्मासिके तथा। सपिंडीकर
णं चैव इत्येतच्छ्राद्धषोडशं। एकाहेन तु षण्मासा यदा स्युरपि वा त्रिभिः। न्यूनाः संवत्सरश्चैव स्यातां षाण्मासिके। द्विवचनाहू एम:
नषष्ठोनाब्दिके इत्यर्थमाह पृथ्वीचंद्रोदयः। व्यासस्त्वन्यथाह। द्वादशाहे त्रिपक्षे च षाण्मासे मासिकाब्दिके। श्राद्धानि षो

इत्येतानि संस्मृतानि मनीषिभिः॥ द्वादशाहय न्यूनमासिकपर्यंतस्य द्वादशाहेप्युक्तेरिति कालादर्शः॥ मदनरत्ने ब्राह्मे त्वन्यथो
क्तं॥ नृणां तु त्यक्तदेहानां श्राद्धाः षोडश सर्वदा। चतुर्थे पंचमे चैव नवमे एकादशे तथा। ततो द्वादशभिर्मासैः श्राद्धा द्वादश सं
ख्ययेति। चतुर्थादिदिनानि। भविष्ये त्वन्यथोक्तं। अस्थिसंचयनं श्राद्धं त्रिपक्षे मासिकानि तु। रिक्तयोश्च तथा तिथ्योः
प्रेतश्राद्धानि षोडशेति। रिक्तयोस्तिथ्योरिति न्यूनषष्ठेमासिकपर्यायमिति हेमाद्रिः॥ अत्र कुलदेशशाखाभेदाद्व्यवस्थेति स
र्वनिबंधाः॥ गालवः॥ ऊनषाण्मासिकं षष्ठे मासे वान्यूनमासिकं। त्रैपक्षिकं त्रिमासे स्यात् हनाब्दं द्वादशे तथा॥ ऊनमा
सिके तु गोभिलः॥ मरणाद्द्वादशाहे स्यान्मास्यूने चोनमासिकं। मदनरत्ने कालादर्शे च श्लोकगौतमः॥ एकाद्वित्रिदि
नैरूने त्रिभागेनोन एव वा। श्राद्धान्यूनाब्दिकादीनि कुर्यादित्याह गौतमः॥ क्रियानिबंधे कस्तुतः। सार्द्धे एकादशे
मासे सार्द्धे वै पंचमे तथा॥ ऊनाब्दमूनषण्मासं भवेतां श्राद्धकर्मणा॥ सुक्तं। तत्र मूलं चिंत्यं। ऊनेषु वर्ज्यानाह मरीचिः
द्विपुष्करेषु नंदायां सिनीवाल्यां भृगोर्दिने। चतुर्दश्यां च नोनानि कृत्तिकासु त्रिपुष्करे॥ अस्यापीति षे॥ त्रिपादृक्षं तिथिर्भद्रा भौ
मेज्यरविभिः सह। तदा त्रिपुष्करो योगो द्वयोर्योगे द्विपुष्करः॥ गाहवः॥ त्रिभिर्वा दिवसैर्हीने त्वेकेनाहितयेन वा॥ आद्यादि
पुच मासेषु कुर्यादूनाब्दिकादिकं। एकन्यूनपक्षे पंचम्यां मृतस्य तत्तृतीयायां त्रिभिर्न्यूने प्रतिपदि। द्व्यूने द्वितीयायां

मितिके। चेत्। माघे वस्क। षाण्मासिकाब्दिके श्राद्धे स्यातां पूर्वेद्युरेव तौ। मासिकानि स्वकीये तु दिवसे द्वादशेपि च। इति पैठीन
सिवाक्येऽऊनषण्मासिकमूनाब्दिकं च मृताहात्पूर्वेद्युः कार्यमित्याह। पूर्वेद्युर्मृताहादित्यर्थः। मासिकानि स्वकीये तु दिवसे
त्युक्तेरिदमेव युक्तं। मंदनरत्नेप्येवं। याज्ञवल्क्यः। मृताहनि तु कर्तव्यं प्रतिमासं तु वत्सरं। प्रतिसंवत्सरं चैवमाद्यमेका
दशेहनि। अत्राद्यमासिकमाब्दिकं चैकादशेह्नीति निर्णयामृतादयः। ब्राह्मणं भोजयेदाद्ये होतव्यमनले यवा। पु
नश्च भोजयेद्विप्रान्द्विरावृत्तिर्भवेदिति। गोभिलीयं च तद्विषयमाहुः। अन्येतु मासपक्षतिथिस्पृष्टे इत्यादिविरोधादाब्दिकं
वर्षांते एव मासिकं तु मासादौ। द्विरावृत्तिरेकादशाहिकाद्यमासिकपरा। देवयाज्ञिकोप्येवमाह। लौगाक्षिरपि। मासा
दौ मासिकं कार्यमाब्दिकं वत्सरे गते। आद्यमेकादशे कार्यमाधिके त्वाधिकं भवेत्। दीपिकायां तु। आद्यं रुद्रमितेर्के सं
सितौ तद्दिने वा स्यात् द्वितीयं त्रैपक्षिकमिति। गौडास्तु। मृततिथ्यवधिके एकदिनाधिके मास संवत्सरपदं गौणं। पूर्णोहेऽप
दस्तमासपरत्वमिति शूलपाणिः। तन्नद्वितीयमासाद्यूनाद्वावाद्यमासिकादीनि तन्मोल्यं कृतं। अशक्तौ तु हारीतः। मु
ख्यं श्राद्धं मासि मासि अपर्याप्तावृतुं प्रति। द्वादशाहेन वा भोज्या एकाहे द्वादशेपि वा। ऋतुं प्रति द्वे द्वे इत्यर्थः। यदा एम
पितुर्मरणात्त्रयोविंशतिमे दिने दर्शो वृद्धिर्वा स्यात्तदा द्वादशदिनेषु द्वादशमासिकानि कार्याणीत्यर्थः। जेपस्तेषु त्रि

फ्लेतोतेमृताहे कार्यं वृद्धकालादर्शनिर्णयामृतादय प्रकाजतान्यूनेषु मासेषु विषमाहे समे पिवा॥ त्रैपाक्षिकं त्रिपक्षे स्या
न्मृतौहे स्यत्तित एणि तु। इति कार्ष्णाजिनिस्मृतेः। पूर्वत्र वृद्धे प्रवृत्तत्वत्यर्थमाहुः। तेन तदंतरशद्वविरोधा त्रैपाक्षिक
द्वितीयमासिकयोः। संकरापत्तेरेवं व्याख्यायां मानाभावाच्चोपेक्ष्याः। त्रिपक्षसापिंडने त्वेवं शङ्काभावादधिकरणत्वमे
वत्तेयं। पक्षाक्षिक्रियानिवंधे गारुडे। त्रैपाक्षिकं त्रिपक्षे तु अवृत्ते विषमेह्निनो। मासिकान्यपि चोनानि श्च ष्टा। विंशातिमेदि
नो। इति। त्तेर्मूलं स्मृतिरत्नावल्यां। द्वादशाहे यदा कुर्यात्। पितुः पुत्रः सपिंडनं। एकादशेह्नि कुर्वत प्रेते श्राद्धानि षोड
शापेठीनसिपिंडीकरणादर्वं कुर्याच्छ्राद्धानि षोडशा एकोद्दिष्टविधानेन कुर्यात्सर्वाणि तानि तु। सपिंडीकरणादूर्ध्वं य
दा कुर्यात्तदा पुनः। प्रत्यहूं पोय थाकुर्यात्तथा कुर्यात्स्तान्यपि। मदनरत्ने कात्यायनः। श्राद्धमग्निमतः कार्यं दाहादे
कादशेह्नि। फ्रवाणि तु प्रकुवत प्रमिताह्नि सर्वदा। ध्रुवाणि त्रैपाक्षिकाहूर्ध्वानि॥ क्रियापातं बंधे गारुडे। त्रिपक्षात्पूर्व
तः साग्नेर्भवेत्संस्कारा। वासरो। ऊर्ध्वंमृतदि।ने साग्नेः सवाण्येवमृताह तः। एतानि च यदा सपिंडनात्पूर्वं युगपत्कुर्यात्तदा
कालकर्त्रैक्यात्तंत्रत्वादेकः पाकः। इति केचित्। पाकभेद इति भट्टचरणाः। अत्र केचिदाहुः। देशकालदेवतैक्यात्तंत्रता
छ्राद्धकालातिक्रमापत्ते द्वादशाहेऽपि सर्वाणि संक्षेपेण समापयेत्। तासामेवत्तु पुनकुर्यात्त्रैतशङ्कं न कारयेत्। इति का

३६५

साप्नोक्तेर्नैकश्राद्धद्वयं कुर्यात्सिमानेहनि कुत्रचित्। इत्यस्यस्यदेवतैकायत्तेप्यत्रत्सत्वात्। श्राद्धं कृत्वा तु तस्यैव पुनः श्राद्धं
न कारयेत्। इति जाबालोक्तेः॥ षोडशसंख्यापाश्चवाजपेये प्राजापत्यसप्तदशत्ववत्साम्नाय्यप्रागाद्धिलवच्च दर्शपात संक्रां
तिश्राद्धवत्। युगपदनुष्ठानेप्युपपत्तेः। आद्यमासिकाद्यूनाब्दिकांतेषु षोडशश्राद्धेषु हृगणः क्रियतामित्येवं प्रयोगो लोके। वि
प्रः पिंडोर्घ्यं स्यैवेति विरुद्धविधिविषयं सेप्येवं। तन्मंदं। द्वादशाहेनवाभोऽन्यापएकाहे द्वादशापि वा। इति हेमाद्रौ हारीतवचो विरो
धात्। तेन विषमेह्नि सपिंडार्घ्यैक्यापेभिन्नामतिसिद्धं। एतानि द्वादशाहादौ सपिंडनात्पूर्वं कृत्वाप्यपि वृद्धिं विनापकर्षो कनः
स्वकाले कार्याणि। यस्य संवत्सरादर्वाक् सपिंडीकरणं कृतं। मासिकं चोदकुंभं च देयं तस्यापि वत्सरमिति मदनरत्ने गा
ग्योक्तेः॥ न चेदं मासिकानां नापकर्षविधेर्ज्ञेः किंतु सपिंडनोर्ध्वं स्वकालेनुष्ठानमेवेति वाच्यं। वाक्यविहितात्तु सपिंडता। विधिवत्ता
न्निकुर्वत पुनः श्राद्धानि षोडशेति। माधवीयेप्यभिलोकेष्वा। अर्वाक्संवत्सराद्यस्य सपिंडीकरणं कृतं। षोडशानां द्विराहं
त्तिः कुर्यादित्याह गौतमः। इति तत्रैव गालवोक्तेः। षोडशत्वं चैकादशाहसपिंडनपक्षे। तत्राद्यमासिकस्य कालसत्त्वा
त्। अत्यपक्षे षपथा संभवं ज्ञेयं। यत्तु द्विरपि कार्यां। अनुमासिकानि वर्षेत्रान्येव सापिंड्यनः। पश्चाद्द्वादशे त्वसुक्तेहत्वा एमः
नां न पुनः क्रियेति रत्नमुक्तं तदेतद्विरोधाच्चिंत्यापत्ते गोडाः। सपिंडीकरणं तावदूर्ध्वं यावश्येतां केपातु धैरिति। शातातपोक्तेर्मा

सिकानां प्रेतत्वविमोक्षार्थत्वात्सपिंडनापकर्षे तर्द तन्न्यायेन तेषामप्याकर्षान्मासिकानां न पुनः कृतिरिति। यत्तु मासिकं चोदकुं मं चेति लौगाक्षिवचनं तन्निर्मूलं समूलेऽपि दर्शपरं चेत्स्याद्धस्तेन उक्तवक्ष्यमाणवचोनिरोधान्मूलविरित्युपेक्ष्याः। यत्तु मिताक्षरायां सपिंडनोर्ध्वं स्वकाले एव कार्याणि अपकर्षस्त्वानुकल्पत्वमुक्तं। तदपि पूर्वविरोधाच्चिंत्यं। तेन वृद्धिं विनापकर्षे तु पुनः कृतिः॥ अर्वाक्संवत्सराद्यस्य सपिंडीकरणं भवेत्। प्रेतत्वमिह तस्यापि ज्ञेयं संवत्सरं नृपेति अग्निपुराणात्। वृद्धिनिमित्तापकर्षे तत्स्यैव तन्निवृत्तेः। अन्यथा वृद्ध्यसंभवादिति शूलपाणिः। कार्ष्णाजिनिः। सपिंडीकरणादर्वाक्पूर्वकृतान्यपि। पुनरप्यपकृष्यंते वृद्ध्युत्तरनिषेधनात्। निषेधे चाह कात्यायनः। निर्वर्त्य वृद्धितंत्रे तु मासिकानि न तंत्रयेत्। अयातयामं मरणं न भवेत्पुनरस्यास्तिति द्विरनुष्ठानं चोत्तरेषामेवं न पूर्वेषां स्वकालकृतानां तदाह माधवीये कार्ष्णाजिनिः। अर्वाग्वाब्दाद्यत्र यत्र सपिंडीकरणं कृतं। तदूर्ध्वं मासिकानां स्याद्यथाकालमनुष्ठितिः। हेमाद्रौ शाट्यायनिः। प्रेतश्राद्धानि शिष्टानि सपिंडीकरणात्तथा। अपकृष्यापि कुर्वीत कर्तुं नांदीमुखं द्विजः। वृद्धिं विनापकर्षे दोषमाहोशनाः। वृद्धिश्राद्धविहीनस्तु प्रेतश्राद्धानि यश्चरेत्। स श्राद्धी नरके घोरे पितृभिः सह मज्जतीति। आधानेऽपकर्षमाह। हेमाद्रावुशनापि तु। सपिंडीकरणं वार्षिके प्रतिवत्सरे। आधानाद्युपसंप्राप्तावेतत्स्यात्। पिव

त्सरणं। विशेषस्तूक्तो विवाहनिर्णयोकावः। नवश्राद्धं मासिकं च षघदं तरितं भवेत्। तत्तदुत्तरणात्तं स्यादनुपेये प्रचक्षते।
गाहडेपि। आपदाघकृतं तत्तु कुर्यादूर्ध्वं मृताहनि।। अथ सपिंडीकरणं।। माधवीये हारीतः।। यातु पूर्वममावास्या हि वाहा
दृशमी भवेत्। सपिंडीकरणं तस्यां कुर्यादेव सुतोग्निमान्।। मृताहाद्दूर्ध्वं दशमी एकादशीत्यर्थः। सपिंडीकरणं कुर्यात्पूर्ववच्चा
ग्निमान्सुतः।। परतो दशरात्राच्चेत्कुहूरहो परीतरः। इति कार्ष्णाजिनीस्मृतेः।। आहिताग्नेस्तेन विना श्रौतापिंडपितृयज्ञासिद्धेः।
तदाहगालवः।। सपिंडीकरणात्प्रेते पैतृकं पदमास्थिते। आहिताग्नेः।। सिनीवाल्यां पितृयज्ञः प्रवर्त्तते। मदनरत्ने प्रजापतिः।।
नासपिंड्याग्निमान्सुतः। पितृयज्ञं समाचरेत्। अपरार्के कात्यायनः। एकादशाहं निर्वर्त्य पूर्वेद्युः श्राद्धयथाविधिः। प्रकुर्वीताग्नि
मान्पुत्रो मातापित्रोः सपिंडतां। आशौचांत प्रथमदर्शयोर्मध्ये कस्मिंश्चिद्दिनेत्यर्थः। पित्रादिकानां सपत्नीकानां देवता
त्वे मातुरपि तत्रानुप्रवेशान्मातुरपि प्राग्दर्शात्सपिंडनं युक्तमित्यपरार्कः। एवं पितामहादेरपि सपिंडनं प्राग्दर्शात्कार्यं। ते
न विना पार्वणाप्रयोगात्। द्वादशाहे वा कार्यं। सान्निकस्तु यदा कर्त्ता प्रेतश्चानग्निमान्भवेत्। द्वादशाहे भवेत्कार्यं सपिंडी
करणं सुतैरिति गोभिलोक्तेः। साग्नेः प्रेतस्य तत्रिपक्षे। प्रेतश्चेदाहिताग्निःस्यात्कर्त्तानाग्निर्यदा भवेत्। सपिंडीकरणं तस्य एमः
कुर्यात्पक्षेत्तीयके। इति सुमंतूक्तेः। मदनरत्ने लघुहारीतोपि। अनग्निस्तु यदा वीरा भवेत्कुर्यात्ति दा गृही। प्रेतश्चेदाग्निमां

त्कस्या॥ त्रिपक्षे वै सपिंडनं। द्वयोः साग्निकत्वे द्वादशाह एव। साग्निकस्तु यदा कर्त्ता प्रेतो वाप्यग्निमान् भवेत्। द्वादशाहे तदा का
र्यं सपिंडीकरणं पितुरिति तेनैवोक्तेः। द्वयोरप्यनग्नित्वे तु भविष्ये। सपिंडीकरणं कुर्याद्यजमानस्त्वनग्निमान्। अ[illegible]हिता
ग्नेः प्रेतस्य पूर्णेब्दे भरतर्षभ। द्वादशेह्नि षण्मासे त्रिपक्षे वा त्रिमासि वा॥ एकादशेपि वा मासि मंगलस्याप्युपस्थिते। कात्या
यनगोभिलौ। यदहर्वा वृद्धिरापद्यते। यच्चद्वादिदिने एवेति वाचस्पतिस्तन्न। प्रातर्वृद्धिनिमित्तकमिति नियमात्सपिंडन
स्य चापराह्णस्य कालानत्वेनैत्वेन पूर्ववाधापत्तेः। वृद्धिदिने तत्पूर्वदिने वेति श्रीदत्तः। स्मार्तगौडस्तु वृद्धिपूर्वे वर्षांत्य
श्चेत्तरणःसपिंडनस्य प्रेतत्वनाशे सहकारी। तेन पौरुषविघ्नाद्वृद्ध्यभावेपि तत्कर्तृव्यतानिश्चयसहितमेव कालांतरे क्रि
यमाणा वृद्धिपूर्वेद्युः सहकृतं तत्प्रेतत्वनाशकमित्याह। तन्न। अकालेकृतस्य फलाजनकत्वात्। एतेन निमित्तनिश्चय
वत एवाधिकाराद्वृद्ध्यभावेपि नक्षतिरिति मिश्रोक्तिः परास्ता। वृद्धिपूर्वदिनस्य वर्षांतस्य कालस्यांगत्वेन निमित्तत्वाभावा
त्तेन पुनःकार्यमित्यपि। मदनरत्ने पुलस्त्यः॥ निरग्निकः सपिंडत्वं पितुर्मातुश्च धर्मतः। पूर्णे संवत्सरे कुर्याद्वृद्धिर्वा यदहर्भ
वेत्। चतुर्विंशतिमते। सपिंडीकरणं चाब्दे संपूर्णेभ्युदयेपि वा। द्वादशाहे तु केषांचिन्मतं चैकादशे तथा॥ पृथ्वीचं
द्रोदये बौधायनः। अथ सपिंडीकरणं त्रिपक्षे तृतीये वा मासि षष्ठे चैकादशे वा द्वादशे द्वादशाहे चैकादशाहे वेति

३६७ एतत्प्रक्रम्याविष्णुः। मासिकार्थं द्वादशाहं श्राद्धं कृत्वा त्रयोदशेऽह्नि वा कुर्यात्। मंत्रवर्ज्जं हि शूद्राणां द्वाशेऽह्नि संवत्सराभ्यंतरे यद्यधि
मासो भवेत्तदा मासिकार्थं दिनमेकं वर्द्धयेदिति आशौचोत्तरं द्वादशत्वहः। स्तुमासिकानि तेष्वेवाद्यषष्ठद्वादशाह्निकेषून मासि
कादीनि कृत्वा त्रयोदशेऽह्नि सपिंडनं कुर्यात्। अधिकमासे तु चतुर्द्दशेऽह्निर्यात्। शूद्रस्त्वयो दशे द्वादशेऽह्नि अन्यस्य मासिका
त्यदिनपरत्वादिति पृथ्वीचंद्रः। पैठीनसिः। संवत्सरांते संसर्ज्जनं नवमे मासीत्येके। अत्र सपिंडनस्योक्तकालाभावे त्रिपक्षा
दिसंवत्सरांता अनुकल्पा ज्ञेयाः। कल्पतरुस्त्वये वृद्धिनिमित्त एव सर्वेपकर्षप्रकारा इत्याह तन्न। यदहेवेति स्नातं त्र्यब्दकृतेः॥
यद्यपि वृद्धिनिमित्तोपकर्षो निरस्तेवोक्तः। स्तथाप्यसावपि ज्ञेयः। उक्तकालासंभवे वर्षांतादिगौणकालवद्वृद्धेः। विप्रासेः॥
वस्यमरणमोमिलवचनात्। अयातयामं मरणं न भवेत्सुनरस्याखितिदोषश्चात्य विशेषाद्धा आह पराकं पृथ्वीचंद्रादिस्वरसो
प्येवं। अत्र वृद्धिपदं चूडोपनयनविवाहमात्रपरं। सीमंतादौ तु वृद्धिश्राद्धं एवेत्याचार्यचूडामणिः। पुंसवनाद्यन्नप्राश
नांते त्वावश्यकेष्वपकर्षः इति श्राद्धविवेकः। स्मृतिसारे पि वृद्धस्येति। प्रत्यवायो भवेद्यस्मिन्न कृते त्वाद्धिकर्मणि। तन्निमि
त्तं समाकृष्यापि श्रद्धोः कुर्यात्सपिंडनं। गर्भाधानस्य तु ज्ञ ततरे पितं भवात्। अन्यथा श्राद्धं परान्नं च गंधमाल्यं च मैथुनं। इ रामः
तिदेवल्लेन प्रथममाद्दमे मैथुननिषेधात्तत्र न तत्रापकर्षः इति श्राद्धकौमुद्यादयः। तन्न। अकृतस्नातांतु स्त्रियो भार्यां इति निषे

धाद्ब्रह्मचार्येव पर्वाण्याद्याश्चतस्रश्च वर्ज्जयेदिति मैथुने दोषाभावाच्च।। पितामहचरणैः। पौत्रस्य वृद्धौ नापकर्षः।
तस्य महागुरुत्वाभावात्। तत्र तदूर्ध्वं प्योवृद्धिश्राद्धमिति श्राद्धचंद्रिका। तन्न। भ्राता वेत्यादौ तदभावे प्रपौत्रकर्मोक्तेः। तेनानिर्देशो
पुपलक्षणं।। व्याघ्रः। आनंत्यात्कुलधर्माणां पुंसां चैवायुषः क्षयात्। अस्थिरत्वाच्छरीरस्य द्वादशाहः प्रशस्यते। एतदाशौचांतो
पलक्षणं। सर्वेषामेव वर्णानामाशौचांते सपिंडनमिति निर्णयामृते कात्यायनोक्तेः। सर्वेषामिति त्रैवर्णिकपरं। शूद्राणां त्वा
शौचमध्येमंत्रवर्ज्जं हि शूद्राणां द्वादशेहनि कीर्त्तितं। इति विष्णूक्तेः। एतद्दर्शश्राद्धकारिशूद्रविषयं। अपरार्के कल्पतरौ च।
वृद्धैर्मनुः। द्वादशेह्नि विप्राणामाशौचांते तु भूभुजां। वैश्यानां तु त्रिपक्षाद्वाथ मासात्सपिंडनं। निर्णयामृते गोभिलः। द्वा
दशाहादिकालेषु प्रमादादननुष्ठितं। सापिंडीकरणं कुर्यात्कालेषूत्तरभाविषु। इदं साग्नेरुत्तरकालासंभवे गौणकालविधा
नार्थमिति मदनपारिजातः। मदनरत्ने त्वेवं कृष्णभृंगः। सपिंडीकरणश्राद्धमुक्तकालेन चेत्कृतं। ऐंद्रे हस्ते च रोहिण्यां मै
त्रभे वा समाचरेत्। कालादर्शेपि। एकादशेह्नि त्रिपक्षे वा त्रिमासि वाथ षष्ठे चैकादशे वाब्दे तं पूर्णे वा शुभग्रामो सपिंडीकर
णस्येत्थमष्टौ कालाः प्रकीर्त्तिताः। साग्नौ कर्त्तर्यं भावाद्योपेते साग्नौ तृतीयकः। अनग्नेस्तु द्वितीयाद्याः सप्त कालानु
नीरिताः। मौते हिणीरौद्रहस्तेषु मैत्रभे वापि तच्चरेत्। नारदसंहितायां तु। सापिंडीकरणं कार्यं वत्सरे वार्द्धवत्सरे। त्रिमासे वा त्रि

पक्षे वा मासि वाब्दादृशोक्तिवेत्युक्तं। वत्सरेतीतेप्येवं। ततः सपिंडीकरणं वत्सरात्परतः स्थितमिति भविष्योक्तेः। पितुः सपिंडीक
रणं वत्सरादूर्ध्वतः स्थितमिति नागरखंडोक्तेः॥ पितुः सपिंडीकरणं वार्षिके मृतवासरे इत्युशनसोक्तेश्च। पूर्णे संवत्सरे पिंडः
षोडशः परिकीर्तितः। तेनैव च सपिंडत्वं तेनैवाब्दिकमिष्यते। इति हेमाद्रौ वचनाच्च। अस्यामाकरत्वोक्तिर्मूलत्वोक्तिर्वा। य
त्तु पूर्णे संवत्सरे कुर्यात्सपिंडीकरणं सुतः॥ एकोद्दिष्टं च तत्रैव मृताहनि समापयेत्॥ इति धवलनिबंधे जाबाल्युक्तेः। पुत्रः
सपिंडनं कृत्वा कुर्यात्स्नानं सचैलकं। एकोद्दिष्टं ततः कुर्यात्कुतपे च विचारयेदिति स्वल्पमात्स्योक्तेश्च। आब्दिकं तद्दिने पुनः का
र्यमिति केचित्। तन्निर्मूलत्वाद्धेमाद्रिविरोधाच्चोपेक्ष्याः। षोडशत्वं सपिंडस्य षोडशश्राद्धांतर्भावपक्षे। स्मृत्यर्थसारे तु वर्षांत्यदि
ने संवत्सरविमोकश्राद्धं सपिंडनं च कृत्वा परेद्युर्मृताहे वार्षिकं कार्यमित्युक्तं। गौडा अप्येवमाहुः। तत्पूर्वविरोधाच्चिंत्यं। तच्च
न पुत्रे सति नान्यः कुर्यात्। श्राद्धानि षोडशादत्वा न तु कुर्यात्सपिंडनं। प्रोषितावापि ते पुत्राः कालादतिचिरादपीति वाय
वीयोक्तेः। षोडशश्राद्धानां वर्षादूर्ध्वं काललाभावेपि तान्यदत्वा न कुर्यात्। किंतु दत्वैव। तानि यदि कनिष्ठश्राद्धादिनाकृ
तानि तदा सपिंडनमेव कुर्यात् इत्यपरार्कः। सपि विधिवद्दने तु कनिष्ठानां नैवाधिकार इत्यर्थः। तत्रैव। अज्ञानादथवा मो
हान्न कृता चेत्सपिंडता। तत्रापि विधिवत्कार्या कालादतिचिरादपि। तेषां पिंडेष्वेष्टस्यैवाधिकारः। ज्येष्ठेन जातमात्रेण पु

एम:

त्रीर्भवति मानवः। अपरार्के प्रचेता अपि। एकादशाद्याः क्रमशोऽन्त्येष्टस्य विधिवत्क्रियाः। प्रकुर्यान्नैकशः आद्यमाह्निकं तत्पृथक्पृथक्। मरीचिः। सर्वेषां तु मतं कृत्वा ज्येष्ठेनैव तु यत्कृतं। द्रव्येण वाविभक्तेन सर्वैरेव कृतं भवेत्। यत्तु वाचस्पतिशूलपाणिभ्यामुक्तं। द्रव्यदानानुमत्यभावे कनिष्ठैः पृथक्कार्यमिति तन्न। एवकारस्य तदभावेऽपि पृथक्करणाभावार्थत्वात्। अंधादेरिव ज्येष्ठे सति कनिष्ठानामनधिकाराच्च। अतस्तेषां प्रत्यवायमात्रं। आहिताग्निः कनिष्ठस्तु कुर्यादेव। अन्यथा। पितृयज्ञासिद्धेः। एवमावश्यकत्वे वृद्धावपि कनिष्ठोऽन्यः सपिंडो वा कुर्यात्। भ्राता वा भ्रातृपुत्रो वा सपिंडः शिष्य एव वा। सहपिंडक्रियां कृत्वा कुर्यादभ्युदयं ततः। तथैव काम्यं यत्कर्म वत्सरात्प्रथमादृते इति। मदनरत्ने लघुहारीतवचनात्। वृद्ध्यनंतरं प्रथमाब्देऽपि काम्यं मध्ये कुर्यात्। वृद्ध्यभावे तु प्रथमाब्दादूर्ध्वमेवेत्यर्थः। काम्योक्तेरनावश्यके ष्टापूर्तादौ नापकर्षः। एतद्भ्रातृपुत्रादिकर्संस्कारे प्राप्ताधिकारस्य नांदीश्राद्धाधिकारार्थं। अभ्युदयपदं च नांदीश्राद्धनिमित्तकर्ममात्रपरमिति हेमाद्रिः। तेनान्त्येष्टेर्देशांतरस्थे कनिष्ठः सपिंडनं विनैव वृद्धिं कृत्वा पुत्रसंस्कारं कुर्यादिति श्रीदत्तोक्तिः परास्ता। भ्रातृशिष्याद्युक्तेर्नांदीश्राद्धस्य देवतामात्रपरोपकर्षहेत्वप्राप्तेः। अस्य क्रममात्रपरत्वाद्वृद्धिकर्त्रैव सपिंडनं कुर्यादिति न नियम इति गौडाः। अत एव कन्यायामात्ममरणे भ्रात्रा सपिंडने कृते पितुर्नाधिकारः। शूलपाणिस्तु। महागुरौ प्रेते च वृद्धिकर्म न युज्यते। इति निषेधान्न

तस्य भ्रात्रादिः सपिंडनं कृत्वा तत्पुत्रकन्यादेस्तु स्वयं कुर्यान्नत्वपुत्रसंस्कारे। संस्कार्यपि पितुः सपिंडनं विना वृद्धौ देवतालाभावादित्याह। तन्न। देवताप्रयुक्तापकर्षस्यानिरस्तत्वात्। वृद्धिं विना कनिष्ठेन कृते तु विदेशस्थेन ज्येष्ठेन पुनः कार्यं। यवीयसा कृतं कर्म प्रतशब्दं विहाय्यते। तज्ज्यायसापि कर्त्तव्यं सपिंडीकरणं पुनरिति स्मृतेः। ज्येष्ठेन वा कनिष्ठेन सपिंडीकरणे कृते। आद्यपादे मातापित्रोः कनिष्ठेनेति वा पाठः। देशांतरगतानां च पुत्राणां तु कथं भवेत्। कृत्वा तु वपनं कार्यं दशाहांतं तिलोदकं। ततः सपिंडीकरणं कुर्यादेकादशेहनि। द्वादशेहनि कर्त्तव्यमिति शातातपोब्रवीत्। इति वचनाच्चेति भट्टाः सिंगाभट्टीयेप्येवं। एवं च वचनेत्र च मलेपि स्यं। स्मृत्यर्थसारे। विभक्ता वृद्धिकामाश्चेत्पुत्राः पृथक् सपिंडीकरणं कुर्युरित्युक्तं। अत्र दत्तकस्य तत्पुत्रादीनां विशेषः प्रागुक्तः। केचित्तु वृद्धिं विनापि कनिष्ठस्य सपिंडनमाहुः। मातापित्रोर्मृतेः काले ज्येष्ठे देशांतरस्थिते। कनिष्ठेन प्रकर्त्तव्यं सपिंडीकरणं तदेति कार्ष्णाजिनीस्मृतेः। गते वा रोषिते ज्येष्ठे पित्रा वा प्रेषिते सति। षण्मासान्न निवर्त्तेत तदा कार्यं कनीयसा। सवर्त्तेः पुनः सपिंडीकरणं श्राद्धं पार्वणवद्भवेत्। अर्घ्यसंयोजनेनैव पिंडसंयोजनेन च। तेषां वचसां निर्मूलत्वात्प्रोषितावसिते पुत्र इत्यादि विरोधाच्चोपेक्ष्याः। मुक्तमम्नतौ तु हेमाद्रौ ब्राह्मे। एमः
मृते पितरि यस्याथ विद्यते च पितामहः। तेन देयास्त्रयः पिंडाः प्रपितामहपूर्वकाः। तेभ्यस्तु पैतृकः पिंडो नियोक्तव्यस्तु

पूर्ववत्। मातर्यप्यमृतायां च विद्यते च पितामह्याः प्रपितामह्याः पूर्ववत्कार्यं तत्राप्ययं विधिः। एवं पितामहसत्त्वे वनेतासित्रा
पि भिन्नैर्मां। तदाह सुमंतुः त्रयाणामपि पिंडानामेकेनापिंडने। पितृत्वमश्नुते प्रेत इति धर्मो व्यवस्थित इति। यत्तु। व्यु
त्क्रमात्तु प्रमीतानां नैव कार्या सपिंडतेति। तन्मातामितभर्तृभिन्नाविषयं। व्युत्क्रमेणमृतानां च सा। पिंडीकृतिरिष्यते। यदि
माता यदि पितामह्या नैषा विधिः स्मृतः। इति माधवीये स्कांदोक्तेः मदनरत्नादौ चैवं। अत्र प्रपितामह्यादिभिः पितुः सपिंड
ने कृते पितामहे मृते तत्सपिंडने सति पुनस्तेन सपिंडनं कार्यमिति हेमाद्रिमतमाह। अन्ये नेतन्मन्यंते। तत्त्वं तु पितुः सपिंड
नाभावे पितामहेन सह कार्यं पुनः न तत्स्थले। त्रयाणामपि पिंडानामेकेनापि सपिंडने। पितृत्वमश्नुते प्रेत इति धर्मो व्यवस्थि
त इति विष्णुधर्मोक्तेः। पितामहे प्रपितामहे वा पुत्रांतरैरसंस्कृतेप्यसंस्कृताभ्यामेव पितुः सपिंडनं कुर्यात्। असंस्कृतौ न
संस्कार्यौ पूर्वौ पौत्रप्रपौत्रकैः। पितरं तत्र संस्कुर्यादिति कात्यायनोऽब्रवीत्। इति छंदोगपरिशिष्टमपि शुद्धेन शुद्धप्रा
ता। असंस्कृतौ दाहाद्यैरिति केचित्। असपिंडीकृतावितितु तत्त्वं। अत एवोक्तं तत्रैव। पापिष्ठमपि शुद्धेन शुद्धं पापकृ
तापि वा। पितामहेन पितरं संस्कुर्यादिति निश्चयः। पापिष्ठमकृतसपिंडनं न तु पातितादिं। अभिशस्तपतितपि वापि
तामहेन पितरं संस्कुर्यादिति निश्चयः। पापिभ्रूणघ्ना। स्त्रियश्चाभिचारिण्योर्न संसृजेदिति वैजवापोक्तेः। पापकर्मणो न सं

३७०

स्तेरन्निति गौतमोक्तेश्चेत्युक्तं निर्णयामृते पूर्वयोः पुत्राभावे तु पौत्रः कुर्यादेव पितामहः॥ पितुः पश्चात्तं चलं यदि गच्छति
पौत्रेणैकादशाहादि कर्तव्यं श्राद्धषोडशं। नैतत्पौत्रेण कर्तव्यं पुत्रवांश्चेत्पितामहः॥ पितुस्तु पिंडतां कृत्वा कुर्यान्मासानु
मासिकमिति कात्यायनोक्तेः। अपरार्के शूलपाणौ चैवं। तेन सपिंडनस्यानित्यत्वात् कृतसपिंडनयोरेव पार्वणानु
प्रवेश इति मूर्खोक्तिः परास्ता। कृते सपिंडीकरणे प्रेतः पार्वणभाग्भवेदिति हारीतविरोधाच्च। केचित्पुत्रांतराभावे पिताम
ह वार्षिकमप्याहुः। तन्न। श्राद्धषोडशमिति नियमात्। इच्छया भक्त्ये वा पितामहस्य चेद्दद्यादेकोद्दिष्टं न पार्वणं। इति वाच
स्पतिधृतगार्ग्योक्तेः। त्रयाणां यो गच्छेत्तु प्राधान्यात्स पितुः सपिंडनं कृत्वा पूर्वयो कुर्यात्॥ पितामहे मृते दशाहांतः पितृमृ
तौ पितुः संस्कारं कृत्वा पितामहस्य पुनः सर्वमावर्तयेत्। सावृत्ते दशाहे नैवं। अशक्त्या पित्रानुज्ञातेन पौत्रेण पितामहश्रा
द्धमक्रांते। पितृमृतौ दशाहाशौचं वहन्नेव पौत्रः। पितामहकर्म कुर्यात् अक्रांतत्वादिति मदनपारिजातपृथ्वीचंद्रौ। पत्र।
उत्तरात्रितयज्येष्ठारोहिणी याम्य सर्प पितृभे पुत्रवान्विभो श्मश्रुकर्म सकलं च वर्जयेत्प्रेतकार्यमपि बुद्धिमान्नरः। इ
ति सपिंडनप्रकरणोप्यठात मुख्यकाले निषिद्धत्वे सपिंडनापकर्षः॥ सर्वकालेषु तद्धस्येतद्वर्ज्यान्येव पूर्वोक्तबाह्यान्युक्ता एमः
नि षोडशश्राद्धानि कार्याणीति वाचस्पतिमिश्राः। तन्न। अस्य परिभाषात्वेन वाक्यात्सावकाशकर्मपरत्वात्। अस्य प्रेत

मात्रे दैवत्यत्वाभावाच्च। अथ स्त्रीषूच्यते। हेमाद्रौ बृहस्पतिः। भर्तृगोत्रेण नाम्ना च मातुः कुर्यात्सपिंडनं। यत्तु भविष्ये। पितृगोत्रं समुत्सृज्य न कुर्याद्भर्तृगोत्रतः इति तदासुरादिविवाहोढापरं। आसुरादिविवाहेषु पितृगोत्रेण धर्मवित् इति शातातपोक्तेति स्त्रानेकवचनेषु पितामह्या पत्न्या पितामहेन वा सहोक्तं। तत्र व्यवस्थोक्ता भविष्ये। जीवत्पितृका पितामह्या मातुः कुर्यात्सपिंडनं। प्रमीतपितृकः पित्रा तत्पित्रा पुत्रिकासुतः। तत्पित्रा मातुः पित्रा। लौगाक्षिः। पितामह्यादिभिः सार्द्धं मातरं तु सपिंडयेत्। पितरि म्रियमाणे तु तेनैवोपरते सति। शंखः। मातुः सपिंडीकरणं कथं कार्यं भवेत्सुतैः। पितामह्यादिभिः सार्द्धं सपिंडीकरणं स्मृतं। येन केनापि सापिद्ये यत्रान्वष्टकादौ मातुः श्राद्धं पृथगुक्तं। तत्र पितामह्या सह कार्यं नांदीमुखेष्टकाश्राद्धे गयायां च मृतेहनि। पितामह्यादिभिः सार्द्धं मातुः श्राद्धं समाचरेत्। इति शातातपोक्तेः। अपुत्रायास्तु पैठीनसिः। अपुत्रायां मृतायां तु पतिः कुर्यात्सपिंडनं। श्वश्र्वादिभिः सहैवास्याः सपिंडीकरणं भवेत्। यत्तु लघुहारीतः। पुत्रेणैव तु कर्तव्यं सपिंडीकरणं स्त्रियाः पुरुषस्य पुनस्त्वन्ये त्रात्पुत्रादयोपि ये इति। यच्च मार्कंडेयपुराणे। सपिंडीकरणं स्त्रीणां पुत्राभावे न विद्यते। इति तत्पुत्रपत्न्यभावे ज्ञेयं। अत्र सपत्नीपुत्रोपि ज्ञेयः। बह्वीनामेकपत्नीनामेका चेत्पुत्रिणी भवेत्। सर्वास्तास्तेन पुत्रेण प्राहपुत्रवतीर्मनुरिति मनूक्तेरेतत्परत्वात्। यत्तु शातातपः। मृते पितरि मातुस्तु न कार्या सहपिंडता। पितुरेव सपिंडत्वे तस्याः।

२७१ अपिकृतं भवेत्। तदशक्तपरं। केषांचिद्धामतमिति हेमाद्रिः। अन्वारोहणे तु भर्त्रैव सापिंड्यं। मृतायाश्चानुगतानाथ्यं मातेन सह पिंड
तां। अर्हे स्वर्गवासं च यावदाभूतसंप्लवमिति शातातपोक्तेः। पत्या चैकेन कर्तव्यं सपिंडीकरणं स्त्रियाः। सा मृतापि हि तेनै
कं गता मंत्राहुतिव्रतैरिति यमोक्तेश्च। अत्रैकशब्दः पितामह्यादिपक्षनिरासार्थः। पतिपदं वर्गपरं। सपिंडनस्य पार्वणैकोद्दि
ष्टरूपत्वादिति माधवकल्पतरुमदनरत्नादयः। अन्ये तु भर्त्रैवैकेनाङ्कः। स्वेन त्रीसहैव वा स्याः सपिंडीकरणं भवेत्। इत्येवकारश्र
वणात्। पृथ्वीचंद्रोदये विकल्प उक्तः। इदं तु तत्त्वं। यदा हेमाद्र्यादिमते द्वयोरेकः पिंडस्तदा वर्गेण सह। यदा माधवपृथ्वीचंद्रा
पिमते पृथक् पिंडस्तदैकेन पत्यैव। वचनाद्वैकेनापि। अतो मातुः पिंडमसपिंडीकृते नैव पतिपिंडेन संयोज्यैकीकृतं पिंडद्व
यं तत्पित्रादिभिः संयोजयेत्। अत्यपक्ष एव युक्तः। स्मृत्यर्थसारे तु। अन्वारोहणे नैकदिनमरणे स्त्रियाः पृथक्तत्पिंड
ननास्ति। भर्तुः कृते स्त्रिया अपि कृतं भवति। इत्युक्तं तन्मतांतरमस्ता। इदं ब्राह्म्यादिविवाहेषु ज्ञेयं। आसुरादिषु तु
शातातपः। तन्मात्रा तत्पितामह्या तच्छ्वश्र्वा वा सापिंडनं। आसुरादिविवाहेषु विन्नानां योषितां भवेत्। मातामह्यामा एनः
तुः पितामह्या तत्पितामह्या चेत्यर्थः। पितापितामहयोः स्वः पूर्णे संवत्सरे सुतैः। मातामातामहे तद्वदित्याह भगवा
न्शिवः। इदमासुरादिविवाहोढापरं। पुत्रिकापुत्रपरं चोक्तं प्राक्। हेमाद्रिस्तु ब्राह्म्यादिष्वपि सर्वत्रदेशभेदाद्विकल्प

माहा। अतएव गुर्ज्जरिकोकिलमतानुसारिणां मातृमातामहप्रमातामहणां इति श्राद्धप्रयोगः। सपिंडनं च दृश्यते। हेमाद्र्या
वापत्तिबोपि। कोकिलस्य यथा पुत्रा अन्यसंचयजीविनः। पुष्टास्ते स्वकुलं यांति एवं नारीमृता सती। यदपि विवाहानंत्र
रे मातृतामहेन मातुः सापिंड्ये पितृश्राद्धवन्मातृश्राद्धं नियममित्याह। यत्तु वृद्धिश्राद्धे छंदोगपरिशिष्टं पठ्या। पितृस्य सत
दनु श्राद्धदानमुपक्रमेत्। इति तदेतद्विषयमेव। मातुः पृथक्श्राद्धाभावात्। अतएव हेमाद्रौ भविष्ये। मातुः सापिंडनं प्रक्रम्य। उ
दितेऽनुदिते चैव होमभेदो यथा भवेत्। तथा कुलक्रमायातमाचारं च चरेद्बुध इत्युक्तं। अस्पह ह्यावपवादमाह। तत्रैव व्याघ्र
पात्। कुर्यान्मातामहश्राद्धं सर्वदा मातृपूर्वकं। विधिज्ञा विधिमास्थाय वृद्धौ मातामहादिवत्। केचिदेतत्पुत्रिकापुत्रपरमा
हुः। पत्युः सापिंड्यमाह लौगाक्षिः। सर्वाभावे स्वयं पत्न्यः स्वभर्तॄणाममंत्रकं। सपिंडीकरणं कुर्युस्ततः पार्वणमेव चेति। पु
त्रवचनं। अपुत्रस्य परेतस्य नैव कुर्यात्सपिंडतां। यच्चापस्तंबः। अपुत्राये मृताः केचित्पुरुषा वा स्त्रियोपि वा। स
पिंडीकरणाहूर्ध्वमेकोद्दिष्टं विधीयते। अपुत्राणां च सर्वेषामपत्नीनां तथैव चेति हेमाद्रौ प्रचेतसोक्तेश्च। अन्ये
तु द्विविधवाक्यदर्शनाद्विकल्पमाहुः। स्मृत्यर्थसारेपि। ब्रह्मचारिणामपत्यानां सपिंडनं च नास्ति। तेषां सदैको
द्दिष्टमेव। व्युत्क्रममृतानां सापिंड्यं कार्यं न वा। केचित्सर्वत्र सपिंडनमाहुः। इति। अपुत्रे व्युत्क्रममृते विशेषो रेणुका

कारिकायां। भ्रातावाभ्रातृपुत्रोवासपिंडःशिष्यएववासपिंडीकरणंकुर्यात्पुत्रहीनेमृतेसति। सर्वबंधुविहीनस्यपत्नीकुर्यात्स
पिंडनं। ऋत्विजंकारयेद्वापिपुरोहितमथापिवा। वसुरुद्रादितिसुतैःकार्यातेषांसपिंडता। सक्रमाच्चप्रमीतायेताद्विनाप्रेत
ताध्रुवां। पुनःसपिंडनंतेषांकुर्यात्प्रेतेपितामहे। इति। अत्रमूलंमृग्यं। यतीनांसपिंडनंनास्ति। किंत्वेकादशेह्निपार्व
णंकार्यं। तदपित्रिंशद्दिनः। एकदंड्यादीनांतदपिनेत्युक्तंप्राक्। दंडग्रहणात्पूर्वंमृतेतुदाहादिसपिंडनांतंसर्वकार्य
मितिमहच्चरणाः। सपिंडनविधिमाहवैजवापः। समासेसंवत्सरेचतुरोदपात्राणिप्रसुनक्त्येकंप्रेतायत्रीणिपितृभ्यः
प्रेतपात्रंपितृपात्रेष्वासिंचतियेसमानाइतिद्वाभ्यांमेवपिंडोप्याधिमृशत्येषवोनुगतःप्रेतःपितरस्तंददामिवः। शि
वंभवतुशेषाणांजायंतांचिरंजीविनः। समानीवःसंगच्छध्वंसंवदध्वमिति। यद्यपितच्चापिदैवरहितमेकोद्दिष्टंक
पवित्रकं। वाग्नौकरणंतच्चतंत्वावाहनवर्जितं। इतिमार्कंडेयेनोक्तं। तथापिसपिंडीकरणश्राद्धंदेवपूर्वंनियोजयेत्
इत्यादिविरोधाद्विकल्पः। पेताशेषाज्ञेयं। अत्रकामकालौवैश्वदेवावित्युक्तंप्राक्। मैत्रायणीयपरिशिष्टेपित्र्यवि
मकरोहोमःसाग्नेरपिभवेदिह। यत्तुगोभिलः। अनुक्तकालेष्वपितुव्युत्क्रमेणमृतेष्वपि। आमेनवापिसापिंड्यंहेम्ना एम
वापिप्रकल्पयेत। तदप्यादिमातापितृभिन्नपरं। आपन्नोपिनकुर्वीतश्राद्धमामेनकर्हिचित। तेतेनैवोक्तेः। कामधे

नोलैघुहारीतः। सपिंडीकरणं प्रागब्देत श्राद्धं तु षोडशं। पक्वान्नेनैव कर्त्तव्यं सामिषेण द्विजातिभिः॥ विश्वप्रकाशे प्रेतः
सपिंडनादूर्ध्वं पितृलोकं स गच्छति। कुर्यात्तस्य तु पार्श्वे पंद्वितीयेऽह्नि सपिंडनात्। स्मृत्यर्थसारेऽप्येवं। ततो वृद्धिश्राद्धं कुर्या
त्॥ एतन्मलमासेपि कार्यं। अधिमासे न कर्त्तव्यं श्राद्धमाभ्युदयं तथा। तथैव काम्यं यत्कर्म वत्सरात्मध्यमाहृते। इति
हेमाद्रौ हारीतोक्तेः। इति सपिंडीकरणं॥ अथ प्रथमाब्दे निषिद्धानि॥ हेमाद्रौ। स्नानं चैव महादानं स्वाध्यायं चाग्नित
पणं। प्रथमाब्दे न कुर्वीत महागुरुनिपातने। अग्नितपणं लक्षहोमादि। नत्वाधानं तत्तु प्रथमाब्दे भवत्येव। तदा
ह हेमाद्रावुशना॥ पितुः सपिंडीकरणं वार्षिकं मृतवासरे। आधानाद्युपसंप्राप्तावेतत्प्रागपि वत्सरात्। अल्प
तपेणमिति शुद्धितत्वे पाठः। आदिपदं वृद्धिनिमित्तनित्यकर्मपरं। दिवोदासीये। महातीर्थस्य गमनमुपवास
व्रतानि च। संवत्सरं न कुर्वीत महागुरुनिपातने। इदं श्राद्धकौमुद्यां देवीपुराणस्थमुक्तं। गौडनिबंधे मात्स्ये। स
पिंडीकरणादूर्ध्वं प्रेतः पार्वणभाग्भवेत्। वृद्धीष्टापूर्त्ते योग्यश्च गृहस्थश्च सदा भवेत्। वर्षांत सपिंडनाभावे लौकि
काः इत्यर्थः। गृहस्थः सपिंडोपीत्यर्थः। अत एव प्रेतकार्याण्यपनिर्हृत्य चरेन्नाभ्युदयक्रियां। आचतुर्थं ततः पुंसि
पंचमे शुभदं भवेत्। इति ज्योतिषेउक्तं। माधवीये देवलः। प्रमीतौ पितरौ यस्य देहस्तस्याशुचिर्भवेत्। न दैवं ना

३७३ त्तिवा पित्र्यं यावत्संपूर्णो न वत्सरः। इदं वर्षांते सपिंडनपरं। तथैक्काम्यं यत्कर्म प्रथमाद्वत्सराद्दूत्तरतिलघुहारीताद्येकवाक्य
त्वात्। वृद्धिं विनापकर्षे तु वर्षमध्ये काम्यादिभवत्येवेति गौडाः। अत एव लौगाक्षिः। अन्येषां प्रेतकार्याणि महागुरु
निपातने। कुर्यात्संवत्सरादर्वाक् श्राद्धमेकं तु वर्ज्जयेत्। दाहाद्येकादशाहांतं कार्यं। तत्राशौचात्तरस्याप्रतिबंधक
त्वात्। आद्यश्राद्धमशुद्धोपि कुर्यादेकादशेहनीत्युक्तेश्च। एवं सपिंडनं पत्न्यादेरपवादमाह। माधवीये ऋष्यशृंगः।
पत्न्याः पुत्रस्य तत्पुत्रभ्रात्रोस्तत्तनयस्य च। स्नुषायाश्च श्वश्रोश्च पित्रोश्चैकसंघातमरणे यदि। अर्वागब्दान्मातृपितृपूर्वं सा
पिंड्यमाचरेत्। लौगाक्षिः। पत्नीपुत्रस्तथा पौत्रो भ्राता तत्सुतकावपि। पितरौ च परस्यैकस्मिन्नाम्रियेतां वा सहा यदा।
आद्यमेकादशे कुर्यात्त्रिपक्षे तु सपिंडनं। धवलनिबंधे। महागुरुनिपाते तु प्रेतकार्यं यथाविधिः। कुर्यात्संवत्सराद
र्वागेकोद्दिष्टं न पार्वणं। भृगुः। माता चैव तथा भ्राता भार्या पुत्रस्तथा स्नुषा। एषां मृतौ चरेच्छ्राद्धमन्यस्य न पुनः पि
तुः। एतदपि सपिंडनपरं। पितुर्मृतावन्यस्य श्राद्धं न चरेदित्यर्थः। शुद्धितत्वे श्राद्धकौमुद्यां च देवलः। अन्यश्राद्धं
परान्नं च गंधं माल्यं च मैथुनं। वर्ज्जयेद्गुरुपाते तु यावत्पूर्णो न वत्सरः। पारस्करभाष्ये बृहस्पतिः। पितर्युपरते पुत्रो। एमः
तः श्राद्धान्निवर्त्तते। मातर्यपि च वृत्तायां यापितृश्राद्दते समं। समं पितरं विनान्यश्राद्धं नेत्यर्थः। शुद्धितत्वे देवलः। महा।

गुह्यनिपातेतुकाम्यंकिंचिन्नचाचरेत्। आर्त्विज्यंब्रह्मचर्यंचश्राद्धंदेवक्रियांतथा। एतत्सपिंडनात्प्रागितिकेचिके।चित्।
तदुक्तंरमपास्मृत्ये। श्राद्धकौमुद्यांकालिकापुराणेपूर्वार्द्धे। विशेषतःशिवापूजांप्रमीतपितृकोनरः। यावत्सरपर्यंतंम
नसापिनचाचरेत्। केचित्तु। पित्रोर्वृमशौचंस्यात्सपत्न्याःसंमातुरेवच। त्रैमासिकंतुभार्यायास्तदर्द्धंभ्रातृपुत्रयोरिति
स्मृतेः। सपत्नमातुरर्द्धमाहुः। श्राद्धकौमुदीकारस्तु। द्वयोरेवमहागुर्वोरब्दमेकमशौचकं। नान्येषामधिकाशौचंस्व
ज्ञातिविहिता। कलिनेति। समूलजातूकर्ण्यविरोधान्निर्मूलमाहुः। हेमाद्रिरेभविष्ये। गयाश्राद्धंमृतानांतुपूर्णेवर्षेप्रशस्यते। त्रि
स्थलीसेतौगारुडे। तीर्थश्राद्धंगयाश्राद्धंश्राद्धमन्यच्चपैतृकं। अब्दमध्येनकुर्वतमहागुरुविपत्तिषु। इदंत्वसर्थेसपिंडना
भावेवृद्धेसपिंडनापकर्षेऽब्दमध्येपिदर्शादिकार्यमेव। मातुःसपिंडनंकृत्वाकुर्यान्मासानुमासिकं। इतिछंदोगपरिशि
ष्टात्। सपिंडीकरणादूर्ध्वंप्रेतःपार्वणभुग्भवेत्। इतिमात्स्यात्। ततःप्रभृतिवैप्रेतःपितृसामान्यमश्नुते। विंदतेपितृ
लोकंचततःश्राद्धंप्रवर्त्तते। इतिहारीताच्चेतिमूलपाणिः। यत्तुकातीयंसपिंडीकरणादूर्ध्वंनदद्यात्प्रतिमासिकं। एकोद्दि
ष्टविधानेनदद्यादित्याहशौनकइतितत्रैकोद्दिष्टविधिनादद्यादित्यन्वयः। तुर्यपादेपार्वणविकल्पउक्तः। अत्रेदंतत्त्वं। वृ
द्धिंविनार्वागपिसपिंडनापकर्षे। पितृत्वप्राप्तिर्वर्षांतएव। कृतेसपिंडीकरणेनरःसंवत्सरात्परं। प्रेतदेहंपरित्यज्यभोगदे

३७५

हंप्रपद्यते॥इतिविष्णुधर्मोक्तेः॥अर्वाक्संवत्सराद्यस्यसपिंडीकरणंभवेत।प्रेतत्वमपितस्यापिविज्ञेयंवत्सरंनृपेति।अग्निपुराणाच्च।
तेनतत्सत्वेपितृवृद्धिदैवपित्र्येष्वनधिकारः॥वृद्धिनिमित्तेत्वनंतरमेव।अर्वाक्संवत्सराद्वृद्धौपूर्णेसंवत्सरेपिवा।येसपिंडीकृताःप्रे
तानतेषांतुपृथक्क्रियेति।शातातपोक्तेः।तथैवकाम्यमितिहेमाद्रिधृतहारीतादिवशाच्चेवमिति।तथा।अश्छिद्रेपंगयाश्रा
द्धंश्राद्धंचापरपाक्षिकं।प्रथमेऽब्देनकुर्वतकृतेपितृसपिंडने।अस्यापवादः।अश्छिद्रेपंगयाश्राद्धंश्राद्धंचापरपाक्षिकं।प्रथमे
ब्देपिकुर्वतकृतेपितृसपिंडने यदिस्याद्वृद्धिमांस्ततः।मघाख्यंश्राद्धंतद्धानितिमदनपारिजातादयः।अन्येपथाश्रुत
माहुः।तत्वंतुयदीदंसमूलंतदावृद्धिविनापकर्षेपूर्वंवृद्ध्यर्थेतुपरमितियोज्यमिति।पतितानांगयायांविशेषोब्राह्मे।
क्रियतेपतितानांचागतेसंवत्सरेक्वचित।देशधर्मप्रमाणत्वात्गयाश्राद्धंस्वबंधुभिः।अथपविधानानि॥तत्रपंचकमृ
तेमदनरत्नेगारुडे।आदौकृत्वाधनिष्ठार्द्धमेतन्नक्षत्रपंचकं।रेवत्यंतंसदादूष्यमशुभदाहकर्मणि।शवस्यतुसमीपेच
देकुश्याःपुत्तलास्तदा।दर्भमय्यस्तुचत्वारःकृत्स्नमंत्राभिमंत्रिताः।ततोदाहःप्रकर्तव्यस्तैस्तुपुत्तलकैःसह।सूतकांतेततः
पुत्रैःकार्यंशांतिकपौष्टिकं।पंचकेषुमृतोयोवैनगतिंलभतेनरः।तिलांश्चैवहिरण्यंचतमुद्दिश्यघृतंददेत।क्रियानिबंधे।
भाजनोपानहौछत्रंहेममुद्राचवाससी।दक्षिणादीयतेविप्रेसर्वपातकमोचनी।मदनरत्नेगार्ग्यः।यदिभद्रातिथीनांस्या

द्रानुभौमशनैश्चरैः॥ त्रिपादृक्षे स्वसंयोगो द्वयोर्योगे द्विपुष्करः॥ द्वित्रिपुष्करयोगे तु मृतिमृत्यत एव ह्य। दहने मरणे चैव त्रिगुणं स्या
त्त्रिपुष्करे॥ एकनेप्येवमेव स्याद्वेतद्दोषोपशांतये। तिलापिष्टैर्यवैर्वापि शरीरं कारयेत्ततः॥ शूर्पे निधाय पालं कृत्य दाहयेत्येतत्कोपरि
तद्दाहे मंत्रमाह बौधायनः॥ अस्मात्त्वमिति मंत्रेण। तिलपिष्टं प्रदाहयेत्। द्विस्त्रिपुष्करयोर्दोषस्त्रिभिः कृच्छ्रैर्व्यपोहति। वासवेम
रणं चेत्स्याद्गृहे वापि पुनर्मृतिः॥ स्तवर्णे द्विजानां दद्यात्कृत्स्नवस्त्रमथापि वा। वासवं धनिष्ठा॥ ब्राह्म्ये। कुंभमीनस्थिते चंद्रे मरणं
यस्य जायते। न तस्योर्ध्वगतिर्दृष्टा संततौ न शुभं भवेत्। न तस्य दाहः कर्तव्यो विनाशस्त्वेषु जंतुषु। अथवा तद्दिने कार्यो दाह
स्तु विधिपूर्वकं॥ धनिष्ठापंचके जीवो मृतो यदि कथंचन। त्रिपुष्करे याम्यमेवाकुलज्ञान्मारयेद्ध्रुवं। तच्चानिष्टविनाशार्थं वि
नाशार्थं विधानं समुदीर्यते। दर्भाणां प्रतिमाः कार्याः पंचोर्णासूत्रवेष्टिताः। यवपिष्टेनानुलिप्तास्ताभिः सह शवं दहेत्।
प्रेतवाहः प्रेतसखः प्रेतपः प्रेतभूमिपः। प्रेतहर्ता पंचमस्तु नामान्येतानि च क्रमात्। अत्र प्रतिमाः गंधपुष्पैः पूजयित्वा प्रथमां
शिरसि द्वितीयां नेत्रयोः तृतीयां वामकुक्षौ च तुर्यं नाभौ। पंचमीं पादयोर्न्यस्य तद्वत्परिनामभिर्घृतं हुत्वा यमाय सोमर्च्य व
कमिति मंत्राभ्यां प्रत्येकं त्वास्वाऽस्पंदने दिति महृताः॥ सूतकांते ततः पुत्रः कुर्याच्छांतिकपौष्टिकं। कांस्यपात्रस्थितं तैलं
वीक्ष्य दद्याद्द्विजन्मने। ब्रह्मविष्णुमहेशेंद्रवरुणप्रीतये ततः। माषमुद्गयवव्रीहिप्रियंग्वादि प्रयच्छति। स्वर्णदानं रुद्र

ना:
३७५

ज्ञाप्यंलक्षहोमोद्विजार्च्चनंगोमृद्दानंषडुशेनकुर्याद्दोषोपशांतये। अपरार्कः। धनिष्ठापंचकमृतेपंचरत्नानितन्मुखेप्रास्याद्दु
तित्रयंतत्रक्नेहृहव्यमाप्येति। ततोनिर्हरणंकुर्यादेषःशास्त्रेविधिःस्मृतः। इतरंनिखनेद्देवजलेवाप्रतिपादयेत। त्रिपादृक्षेमृ
तेतद्धद्विराप शकलंमुखे। तस्याःपिष्टमयंकुर्यात्पुरुषत्रितयंततः। होमंप्रतिमुखंकुर्यात्तथावहवपामिति। कार्ष्णायसंच
कार्पासंकुसुंभप्रतिपाद्यचान्तियात्यिसा। त्रिंसकुर्यात्तन्मुमन्त्रोवान्यमुत्सृजेत। तत्रैव। कंनीलकंहीरंकंपद्मरागंचमौक्तिकं। पं
चरत्नमितिप्रोक्तमृषिभिस्तत्त्वदर्शिभिः। रत्नानांचाप्यभावेतुस्वर्णंकर्षार्द्धमेववा। सुवर्णस्याप्यभावेतुआज्यंदेयंविचक्ष
णैः। मद्रनरत्नेष्वेवं। तथा। एकाशीतिपलंकांस्यंतदर्द्धंवातदर्द्धकं। नवषट्त्रिपलंवापिदद्याद्विप्रायशक्तितः। तथान्यत्र।
स्वगृह्योक्तविधानेनकृत्वाग्नेःस्थापनंततः। अन्वाधाननिर्वपणंदेवतानांतथाहुतीः। यमायधर्मराजायमृत्यवेचांतका
यच। वैवस्वतायकालायसर्वभूतक्षयायच। औदुंबरायदध्नायनीलायपरमेष्ठिने। वृकोदरायचित्रायचित्रगुप्ताय
वैनमः। त्रिपादृक्षेष्वेतदेव। अपरार्के। पुनर्वसूत्तराषाढाकृत्तिकोत्तरफाल्गुनी। पूर्वाभाद्रा। विशाखाचवह्नेयमेता। त्रिपाद
र्क्षामयूराचित्रेंगार्गः। मृतः श्मशानंयोनीत उपजीवतिमानवः। गृहेयस्यप्रविष्टोसौतिष्ठेदघा। प्रदीकपचेचन। आचिरा
न्मृत्युमाप्नोतित्यक्तदारपरिग्रहः। तत्रशांतिंप्रवक्ष्यामिधर्मराजमतंयथा। सक्षीराणांघृताक्तानामग्रेईलामुखेबुधः

रामः

उंबरीणां विधिवत्ततः शांतिः कृता भवेत्। सावित्र्यष्टसहस्रेणाद्वीरशांतिं चकारयेत्। कपिलां तिलकं। स्वं च कृतां ते भूरिद
क्षिणा॥ अथ ब्रह्मचारिमृतौ॥ शौनकः॥ ब्रह्मचारिमृतोऽतीतिं कथयामि समासतः॥ तत्रावकीर्णे दोषस्य प्रायश्चित्तप्रशात
ये। द्वादशाब्दं षडब्दं वा त्र्यब्दं शक्त्या समाचरेत्। स्नातको ब्रह्मचारी च निधनं प्राप्नुयाद्यदि। तत्कुलं क्षयमाप्नोति सोपि दु
र्गतिमाप्नुयात्। मृतस्य त्रियमाणस्य षडब्दं व्रतमाचरेत्। त्रिंशद्भ्यो ब्रह्मचारिभ्यो दद्यात्कौपीनकान्नवान्। हस्तमात्राक
र्णमात्राद्यात्कृष्णाजिनान्यपि च। पादुकाछत्रमाल्यानि गोपीचंदनमेव च। मणिप्रवालमालाश्च भूषणादि समर्पयेत्। ए
वं कृते विधाने च विघ्नः कोपि न जायते। अत्र मूलं मृग्यं॥ अथ कुष्ठीमृतौ यमः॥ मृतस्य कुष्ठिनो देहं निखनेद्गोष्ठभूमि
षु। वासरांस्त्रितयं पश्चादुद्धृत्यान्यत्र तं दहेत्। न गंगाप्लवनं कार्यं नि।क्षेपे विधि।रुच्यते। षडब्दमत पूर्वेण विधिनां त्य
क्तं तु चरेत्। ततोऽस्थिसंचयं तस्य गंगायां प्रक्षिपेत्सुधीः। मासि मासि ततः कुर्यान्मासिश्राद्धानि पार्वणान्॥ इत्ये
तत्कुष्ठिमरणे काथितं शास्त्रकोविदैः। भ्रुद्धितले भविष्ये। शृणु कुष्ठिणां विप्र उत्तरेणोत्तरतो गुरुं। विचर्चिका तु दद्रुश्च
र्मा च चरीयस्तृतीयकः। विकर्चूर्वेराणाली श्वौ च कृष्णश्वेते तथाष्टकं। इत्युक्त्वा मृतं च प्रापयेत्तीर्थं मध्यवा तरुमूल
कं। न पिंडं नोदकं कार्यं नैव दाहक्रियां चरेत्। षण्मासी यत्रिमासी यमृतः कुष्ठी कदाचन। यदि स्नेहाच्चरेद्दाहं य

तिचांद्रायणंचरेत्। अकृतप्रायश्चित्तकुष्ठ्यादिदाहेदंप्रायश्चित्तं। अतएवकुनख्यादिश्वित्रकुष्ठिनोपिद्वादशरात्रं शूलपाणिनोक्तं
अतएवान्यदीयकुष्ठिनांमरणांतमाशौचमुक्तंकौक्रियाहीनस्यमूर्खस्यमहारोगिणएवच। यथेष्टाचरणस्याहुर्मरणांतम
शौचकं। महारोगास्तु। वातव्याध्यश्मरीकुष्ठमेहोदरभगंदराः। अर्शांसिग्रहणीत्यष्टौमहारोगाः प्रकीर्तिताः इति॥ अथरजस्व
लायामृतौशातातपः॥ रजस्वलायाःप्रेतायाःसंस्कारादीनिनाचरेत्। ऊर्ध्वंत्रिरात्रात्स्नातांतांशवधर्मेणदाहयेत्। अतःप्रक्षा
ल्यकाष्ठवद्दग्ध्वात्र्यहोर्ध्वंदहेत्। संकटेतुमदनरत्नेस्मृत्यंतरे। उद्धृतेनतुतोयेनस्नापयित्वातुमंत्रतः। आपोहिष्ठेतितिसृभिर्हिर
ण्यवर्णाश्चतस्राभिः पवमानानुवाकेनतदंपतीतिचसप्तभिः। ततोयज्ञपवित्रेणगोमूत्रेणाथवाद्विजाः। स्नापयित्वान्यव
स्त्रैराच्छाद्यशवधर्मतः। दाहादिकंततःकुर्यात्यज्ञापतिवचोयथा। यज्ञपवित्रमापोअस्मानितितिमिताक्षरायां पंचभिः
स्नापयित्वातुगव्यैःप्रेतांरजस्वलां। वस्त्रांतरावृतांकृत्वादाहयेद्विधिपूर्वकं। गृह्यकारिकायां। अंतरितमृतायेचवह्नावश्रुप
माहृतः उदक्यासूतिकानारीचरेच्चांद्रायणत्रयं। ततोयवपिष्टेनानुलिप्याष्टोत्तरशतमपोदकैःसंस्नाप्य भस्मगोमय
मृत्कुशोदकपंचगव्यशुद्धोदकैरापोहिष्ठापवमानीभिःसंस्नाप्यान्येवस्त्रेवृतेदहेदितिमहाः। अत्रप्रायश्चित्तमाहबौधा
यनः। उदक्यासूतिकामृत्याचरेच्चांद्रायणत्रयमिति॥ अथसूतिकायामृतौमिताक्षरायां॥ सूतिकाचमेदेयाद्वायनैःप

एम:

यांमृतायांतु कथं कुर्वंति याज्ञिकाः। कुंभे सलिलमादाय पंचगव्यं क्षिपेत्ततः। पुण्यभिरभिमंत्र्यापो वाचा शुद्धिं लभेत्ततः। ते
नैव स्नापयित्वा तु दाहं कुर्याद्यथाविधि। आज्ञिगावो मंत्रियाभिर्वामदेव्याभिरेव च। अन्यैश्च वारुणैर्मंत्रैः संस्नाप्य विधिना
दहेत। गृह्यकारिकायां। सूतिका मरणे प्राप्ते सर्वौषध्यनुलेपनं। अस्त्रकीतु संसृष्टशूर्पाणांतु शतं क्षिपेत। प्रायश्चित्ते विशे
षस्तत्रैव। सूतिकातु यदा साध्वी विस्ता ता मरणं गता। त्रिवर्षपूर्णपर्यंतं शुध्यं कृच्छ्रेण सर्वदा। इदं चाघव्यूहे। सूतिकातु य
दा नारी रजस्वला तु परिप्लुता। त्रिषष्टादिनादर्वाग्गोकाहेन विशुध्यति। गर्भिणीमृतोतु मरन्नरस्त शोनकः। गर्भिण्युदकां सं
स्कारं शिशुसंस्कारमेव च। प्रवक्ष्यामि समासेन शौनकोहं द्विजन्मनां। गर्भिणीमरणे प्राप्ते गोमूत्रेण जलैः सह। आपो
हि ष्ठादिभिर्मंत्रैः प्रोक्ष्य भर्त्ता समाहितः। प्रेतं श्मशाने नीत्वाथो दक्षिण्यस्योदरं ततः। पुत्रमादाय जीवं चेत्तत्स्तनं द
त्वा स्नाय च। यत्नेन ततः शशायेत्सूचाग्न्यामे निधाय च। उदरं चाव्रणं कुर्यात्सर्पदाज्येन पूर्य च। मृद्भस्मकुशाग्रा गोमू
त्रैरापोहिष्ठादिभिस्त्रिभिः। स्नाप्य चाछाद्य वासोभिः शवधर्मेण दाहयेत्। तत्रैव षडशीतिमते। गद्यानि। गर्भिण्यां मृ
तायां दक्षिणाशिरसं निधाय तत्स्यानाभिरंध्रात्सम्यमुदरं चतुरंगुलं हिरण्यगर्भः समवर्त्ततेति छित्वा गर्भं स्वे दक्षाणा
त्तं प्रक्षाल्य निखनेत्सपदि जीवन्जीवत्वं मम पुत्रकेत्युक्त्वा त्रिपेत्वेति पंचभिः स्नापयित्वा हिरण्यमंतर्द्धाय भूमौ निधायव्या

३७७

इतिभिरभिमंत्र्य यस्ते स्तनः शशयो इति स्तनं पाययित्वा शिशुं गृहं प्रापयेत् । गर्भछेदस्खले शतामुध्वायेति पंचाहुतीर्हुत्वा प्राणा
य स्वाहा पूष्णे स्वाहेत्यनुवाकाभ्यां आहुत्या चाज्यं हुत्वा भिन्नमुद्गरं सूत्रेण संग्रथ्य घृतेनानुलिप्य ब्राह्मणाय तिलान् भू
मिं गां सुवर्णं दद्यात् । अथ यथोक्तेन कल्पेन दहेत् । बौधायनेन तु शतामुध्वायेति पंच होमानंतरं प्राणापानाय व्या
नाय संपानायोदानाय समानाय व्यानाय । शुचे शोकाय तपसे त्येब्रस्तहस्याये सर्वस्यै इति स्वाहा ते राहुतयोप्यधिक उक्तः । गृ
ह्यकारिकायां । यदा गर्भवती नारी सशल्या संस्थिता भवेत् । कुक्षिं भित्वा ततः शल्यं निर्हरेद्यदि जीवति । प्रमीतं निख
नेत्तं तु प्रायश्चित्तमतः परं । मासत्रयं त्रिशताकृच्छ्रैः शुध्यते शल्यदोषतः ॥ सगर्भदहने तस्या वर्णजं वधपातकं । प्रायश्चित्तं
चरित्वा तु शुध्यंति पापकारिणः । दग्ध्वा तु गर्भसंयुक्तां चिरष्टं कृच्छ्रमाचरेत् ॥ अथान्वारोहणं स्त्रीणामात्मनो भर्तुरेव
